नमो नमो निम्मल दंसणस्स

आगमसुत्ताणि

(सटीकं)

भागः - २२

: संशोधकः सम्पादकश्च :

मुनि दीपरत्नसागर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालब्रह्मचारी श्री नेमिनाथाय नमः
नमो नमो निम्मल दंसणस्स
श्री आनंद-क्षमा-ललित सुशील सुधर्मसागर गुरूभ्योनमः

आगम सुत्ताणि (सटीकं)

भाग : २२
व्यवहार-छेदसूत्रम् - २

-: संशोधकः सम्पादकश्चः :-

मुनि दीपरत्नसागर

ता. १४/४/२००० रविवार २०५६ चैत्र सुद ११

४५- आगम सुत्ताणि-सटीकं
मूल्य रू.११०००/-

卐 आगम श्रुत प्रकाशन 卐

-: संपर्क स्थल :-
''आगम आराधना केन्द्र'' शीतलनाथ सोसायटी विभाग-१,
फ्लेट नं-१३, ४-थी मंझिल, व्हायसेन्टर, खानपुर,
अहमदाबाद (गुजरात)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहार-छेदसूत्रस्य विषयानुक्रमः

पीठिका एवं उद्देशकः १...३ गताः भागः-२१, उद्देशकः ४...१० अत्र वर्त्तते

मूलाङ्कः	विषयः	पृष्ठाङ्कः	मूलाङ्कः	विषयः	पृष्ठाङ्कः
९५-१२६	उद्देशकः ४	३		- आचार्य उपाध्याय पदप्रदानं	
	- विहार मर्यादा			- वसती निवसनम्	
	- वर्षावास मर्यादा			- राज्य परावर्तनम	
	- सङ्घस्य सहवसनम्			- मृतक व्यवस्था	
	- गणाधिपति पदं		- २०२	उद्देशकः ८	३२२
	- एकान्त विचरण			- वसति वास :	
	- वन्दन व्यवहार			- शय्या - संस्तारक :	
-१४७	उद्देशकः ५	१२४		-स्थविराणामुपकरणम्	
	- निर्ग्रन्थ्याः विहार मर्यादा			- उपकरण-प्रदानं	
	- निर्ग्रन्थ्याः वर्षावासः			- अधिकपात्रस्य विधिः	
	- निर्ग्रन्थ्याः प्रर्वतिनीपदं			- आहार प्रमाणम्	
	- आचारप्रकल्प मर्यादा		- २४८	उद्देशकः ९	२८३
	- वैयावृत्त्यं			- शय्यात्तरस्य आहारः	
	- सर्पदंश चिकित्सा			- भिक्षु प्रतिमा	
-१५९	उद्देशकः ६	१५३		- मोक प्रतिमा	
	- मोहविजय एवं गवेषणा			- अभिग्रहस्य त्रैविध्यम्	
	- अतिशय वर्णनम्		- २८५	उद्देशकः १०	४०६
	- अल्पश्रुत			- भिक्षु प्रतिमा	
	- बहु श्रुत			- व्यवहार	
	- प्रायश्चितसूत्र			- श्रमणपरिक्षा	
	- ब्रह्मचर्यव्रत			- आचार्यसम्बन्धीकथनं	
-१८६	उद्देशकः ७	२२५		- शिष्य सम्बनधकथनं	
	- गणसम्बन्ध			- शैक्ष सम्बन्धीकथनं	
	- दीक्षा, विहार आदि			- आगम अध्ययनकाल	
	- स्वाध्याय व वाचना			- वैयावृत्त्यं	

Jain Education International For Private & Personal Use Only www.jainelibrary.org

આર્થિક અનુદાતા

-પ.પૂ. માલવભુષણ તપસ્વી આચાર્યદેવ શ્રી નવરત્નસાગર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી શ્રી લાલભાઈ દેવચંદ શાહ તરફથી - નકલ એક.

-પ.પૂ. સરળ સ્વભાવી-શ્રીમદ્ ભગવતીસૂત્ર વ્યાખ્યાન પટુ આચાર્યદેવ શ્રી નરદેવસાગરસૂરીશ્વરજી મ.સા. તથા પૂજ્યશ્રીના શિષ્યરત્ન તપસ્વી ગણિવર્યશ્રી ચંદ્રકીર્તિસાગરજી મ.સા.ની પ્રેરણાથી શ્રી પુરુષાદાનીય પાર્શ્વનાથ શ્વે. મૂર્તિ. જૈન સંઘ, દેવકીનંદન સોસાયટી, અમદાવાદ તરફથી નકલ એક.

-પ.પૂ. શાસન પ્રભાવક-ક્રિયારાગી આચાર્યદેવશ્રી વિજય ઋચકચંદ્ર સૂરીશ્વરજી મ.સા.ની પ્રેરણાથી એક સદ્ગૃહસ્થ તરફથી નકલ એક.

-પ.પૂ. સાહિત્યપ્રેમી મુનિરાજ શ્રી સર્વોદય સાગરજી મ.સા.ની પ્રેરણાથી-"અચલગચ્છાધિપતિ પ.પૂ.આ.ભ.શ્રી ગુણસાગરસૂરીશ્વરજી મ.સા.ના શિષ્યરત્ન પ.પૂ. મુનિરાજ શ્રી ચારિત્રરત્નસાગરજી મ. ની ૧૯મી અઠ્ઠાઇ નિમિત્તે-શ્રી ચારિત્રરત્ન ફા.ચે.ટ્રસ્ટ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્ત્યકારિકા સાધ્વી શ્રી મલયાશ્રીજી મ.સા.ના શિષ્યા વ્યવહાર વિચક્ષણા પૂ. સાધ્વી શ્રી હિતજ્ઞાશ્રીજી મ.ની પ્રેરણાથી જૈન આરાધના મંદિર-"જ્ઞાનખાતા" તરફથી નકલ એક.

-પ.પૂ. સૌમ્યમૂર્તિ સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી મ.ની પ્રેરણાથી પ.પૂ. ગુરુમાતા-વાત્સલ્યમૂર્તિ સા.શ્રી રત્નત્રયાશ્રીજી મ.ની પંચમી પુન્યતિથિ નિમિત્તે શ્રીમતી લીલમબેન પ્રાણલાલ પી. દામાણી તરફથી નકલ એક.

-પ.પૂ. સ્વનામધન્યા સા. શ્રી સૌમ્યગુણાશ્રીજી તથા તેઓના શિષ્યા સા.શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી-૨૦૫૩ના યશસ્વી ચાતુર્માસ નિમિત્તે શ્રી પાર્શ્વપદ્માવતી જૈન સંઘ, પારૂલનગર, અમદાવાદ તરફથી નકલ બે.

-પ.પૂ. રત્નત્રયારાધકા સાધ્વીશ્રી સૌમ્યગુણાશ્રીજી તથા તેઓશ્રીના શિષ્યા સા. શ્રી સમજ્ઞાશ્રીજીની પ્રેરણાથી સંવત ૨૦૫૪ના નિર્મળ આરાધનામય ચાતુર્માસની સ્મૃતિમાં-ઘાટલોડિયા (પાવાપુરી) જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ તરફથી નકલ એક.

0835 gyanmandir@

Jain Education International For Private & Personal Use Only www.jainelibrary.org

-પ.પૂ. સાધ્વી શ્રી રત્નત્રયાશ્રીજી મ.ના પરમ વિનેયા સા.શ્રી સૌમ્યગુણાશ્રીજીની પ્રેરણાથી તેઓના સંસારીભાઈશ્રી ઇન્દ્રવદનભાઈ દામાણીના અનુમોદનીય પુરુષાર્થથી "આગમ દીપ-સંપુટ"ના બદલામાં પ્રાપ્ત રકમમાંથી-નકલ ચાર.

-પ.પૂ. પ્રશમરસનિમગ્ના સાધ્વીશ્રી પ્રશમશીલાશ્રીજી મ.ની પ્રેરણાથી-સમ્મેતશિખર તિર્થોદ્ધારિકા પ.પૂ. સાધ્વીશ્રી રંજનશ્રીજી મ.સા.ના શિષ્યા અપ્રતિમ વૈયાવૃત્યકારિકા સા.શ્રી મલયાશ્રીજી તત્ શિષ્યા સા. શ્રી નરેન્દ્રશ્રીજી-તત્ શિષ્યા સા. શ્રી પ્રગુણાશ્રીજી મ.ના. આત્મશ્રેયાર્થે-અરિહંત ટાવર, જૈન સંઘ, મુંબઇ તરફથી નકલ એક.

-પ.પૂ. આગમોદ્ધારક આચાર્યદેવશ્રી ના સમુદાયવર્તી પ.પૂજ્ય વૈયાવૃત્યકારિકા સા.શ્રી મલયાશ્રીજી મ.ના શિષ્યા પૂ.સા. શ્રી કૈવલ્યશ્રીજી મ.ના શિષ્યા પૂ.સા.શ્રી ભવ્યાનંદશ્રીજી મ.સા.ના સુશિષ્યા મિષ્ટભાષી સાધ્વીશ્રી પૂર્ણપ્રજ્ઞાશ્રીજી મ.સા. તથા તેમના વિનિત શિષ્યા સા. શ્રી પૂર્ણદર્શિતાશ્રીજી તથા સા. પૂર્ણનંદીતાશ્રીજીની પ્રેરણાથી-સર્વોદય પાર્શ્વનાથ ચેરીટેબલ ટ્રસ્ટ, મુલુન્ડ મુંબઈ તરફથી નકલ એક.

-પ.પૂ. વૈયાવૃત્યકારિકા સાધ્વીશ્રી મલયાશ્રીજી મ.ના પ્રશિષ્યા સા. શ્રી ભવ્યાનંદશ્રીજીમ.ના સુવિનિતા સા.શ્રી કલ્પપ્રજ્ઞાશ્રીજી તથા કોકીલકંઠી સા. શ્રી કૈરવપ્રજ્ઞાશ્રજી ની પ્રેરણાથી -મેહુલ સોસાયટી, આરાધનાભવન, સુભાષનગર, વડોદરાની બહેનો તરફથી નકલ એક

-શ્રી વિશાશ્રીમાળી તપગચ્છજ્ઞાતિ-જ્ઞાનખાતું, જૈન પાઠશાળા, જામનગર તરફથી નકલ બે.

-શ્રી મંગળ પારેખનો ખાંચો-જૈન શ્વે. મૂર્તિ. સંઘ, અમદાવાદ. તરફથી ૨૦૫૪ના ચાતુર્માસ નિમિત્તે નકલ બે.

- શ્રી આકોટા જૈન સંઘ, વડોદરાની બહેનો તરફથી નકલ એક.

-શ્રીમતી નયનાબેન રમેશચંદ્ર શાહ, વડોદરાની પ્રેરણાથી આગમોના સેટના બદલામાં પ્રાપ્ત રકમમાંથી નકલ પાંચ.

શેષ સર્વે રકમ "અમારા"આજ પર્યન્ત પ્રકાશનોના બદલામાં પ્રાપ્ત થયેલી છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमो निम्मल दंसणस्स
पञ्चम गणधर श्री सुधर्मा स्वामिने नमः

३६/ व्यवहार-छेदसूत्रं-२-

(सटीकं)

तृतीयं-छेदसूत्रं

[मूलम् + [स्वोपज्ञनिर्युक्तियुक्तं] सङ्घदासगणि विरचितं भाष्यं + मलयगिरि आचार्य विरचिता टीका]

उद्देशकः - ४ -

उक्तः तृतीयोद्देशकः । सम्प्रति चतुर्थ आरभ्यते । तत्रेदमादिसूत्राष्टकम्-

मू. (९५) *नो कप्पइ आयरियउवज्झायस्स एगानियस्स हेमंतगिम्हासु चरिए ।।*

मू. (९६) *कप्पइ आयरियउवज्झायस्स अप्पबिइयस्स हेमंतगिम्हासु चरिए ।।*

मू. (९७) *नो कप्पइ गणावच्छेइयस्स अप्पबिइयस्स हेमंतगिम्हासु चरिए ।।*

मू. (९८) *कप्पइ गणावच्छेइयस्स अप्पतइयस्स हेमंतगिम्हासु चरिए ।।*

मू. (९९) *नो कप्पइ आयरियउवज्झायस्स अप्पबिइयस्स वासावासं वत्थए ।।*

मू. (१००) *कप्पइ आयरियउवज्झायस्स अप्पतइयस्स वासावासं वत्थए ।।*

मू. (१०१) *नो कप्पइ गणावच्छेइयस्स अप्पतइयस्स वासावासं वत्थए ।।*

मू. (१०२) *कप्पइ गणावच्छेइयस्स अप्पचउत्थस्स वासावासं वत्थए ।।*

अथास्य सूत्राष्टकस्य कः सम्बन्ध इति सम्बन्धप्रतिपादनार्थमाह-

[भा.१७२५] एयद्दोसविमुक्को होइ गणी भावतो पलिच्छन्नो ।
दव्वपलिच्छागस्स उ परिमाणठा इमं सुत्तं ।।

वृ- एतेऽनन्तरस्र तृतीयोद्देशके ये दोषा उक्तास्तैस्तैर्दोषैर्विमुक्त एतद्दोषविमुक्तो भवति गणी आचार्य उपाध्यायो गणावच्छेदको वा भवति । स च नियमाद् भावतः परिच्छन्नः सूत्रार्थतदुभयोपेतः, द्रव्य-परिच्छदः परिवारो वस्त्रादिकं लक्षणसम्पन्नता च, तत्र परिवारस्य द्रव्यपरिच्छदस्य परिमाणार्थमिदमादिमं सूत्रं सूत्राष्टकम् ।। पुनः प्रकारान्तरेण सम्बन्धकथनार्थमाह-

[भा.१७२६] आदिमसुत्ते दोन्नि वि भणिया तइयस्स, इह पुनं तेसिं ।
कालविभागविसेसो, कत्थ ऽवे कत्थ वा तिन्नि ।।

वृ- तृतीयस्योद्देशकस्यादिमे सूत्रे द्वावपि साधर्मिकौ विहरन्तावुक्तौ । तथा चादिसूत्रपाठः-''दो साहम्मिया एगतो विहरंति'' इत्यादि । इह पुनस्तयोर्द्वयोः कालविभागविशेषो भण्येत । यथा कुत्र कस्मिन् कालविशेषे द्वौ कल्पेते कुत्र वा त्रय इति कालविशेषविभागतो द्वित्र्यादिसाधुविहारकल्पाकल्प-विधिप्रतिपादनार्थमिदं सूत्राष्टकम्, इह कालेऽपि वाच्ये सामान्यतः सतम्यर्थमात्रविवक्षायां त्रप्रत्ययो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न विरुद्ध इति कुत्रेत्युक्तम् ।। अथवान्येन प्रकारेण सूत्रसम्बन्धः, तमेवाह-

[भा.१७२७] पारायणे समत्ते व निग्गतो, अत्थओ भवे जोगो ।
बहुकायव्वे गच्छे एगेन समं बहिं ठाति ।।

वृ- पारायणं नाम सूत्रार्थतदुभयानां पारगमनं तस्मिन् पारायणे समाप्ते वाशब्दः सम्बन्धस्य प्रकारोपदर्शनार्थः । निर्गत आत्माद्वितीय इति वाक्यशेषः । कस्मान्निर्गत इति चेदत आह-बहुकायव्वे इत्यादि, गच्छःसबालवृद्धाकुलस्ततस्तस्मिन् बहुवैयावृत्त्यं कर्तव्यमतो गच्छे बहुकर्तव्ये तिष्ठतो मा सूत्रार्थतदुभयानां स्मरणे विघ्नो भूयादित्येकेन समं गच्छाद्बहिः पृथक् तिष्ठति, यदि पुनरेकाकी स्थातुमिच्छति तदा न कल्पते । एतदर्थप्रतिपादनार्थमादिसूत्रद्विकं, तत्प्रसङ्गतः शेषाण्यपि सूत्राणीत्येषोऽर्थतो योगसम्बन्धः ।। अनेन सम्बन्धे नायातस्यास्य व्याख्या, न कल्पते आचार्यश्चोपाध्यायश्च समाहारो द्वन्द्वः आचार्योपाध्यायं तस्य आचार्योपाध्यायस्य चेत्यर्थः, एकाकिनो हेमन्तग्रीष्मयोः शीतकाले उष्णकाले वेत्यर्थः, चरितुं विहर्तुं कल्पते आचार्योपाध्यायस्यात्मद्वितीयस्य हेमन्तग्रीष्मयोश्चरितुम् । एवं द्वे सूत्रे गणावच्छेदकस्य भावनीये, नवरमत्राद्यसूत्रे आत्मद्वितीयस्य प्रतिषेधो द्वितीयसूत्रे त्वात्मतृतीयस्यानुज्ञा । एवममीषां चत्वारि सूत्राणि वर्षाविषयाण्यपि वेदितव्यानि, नवरमत्र प्रथमसूत्रे आचार्यस्योपाध्यायस्य चात्मद्वितीयस्य प्रतिषेधो द्वितीयसूत्रे त्वात्मतृतीयस्यानुज्ञा, तृतीयसूत्रे गणावच्छेदकस्यात्मतृतीयस्य प्रतिषेधश्चतुर्थसूत्रे त्वात्मचतुर्थस्यानुज्ञेति । इहोत्सर्गतो द्वयोस्त्रयाणां वा जघन्यतोऽपि विहारो न कल्पते यत इदं जघन्यादिभेदतो विहारपरिमाणम् ।।

[भा.१७२८] पनगो व सत्तगो वा कालदुवे खलु जहन्नतो गच्छो ।
बत्तीसईसहस्सो उक्कोसो, सेसओ मज्झो ।।

वृ- कालद्विके ऋतुबद्धे काले वर्षाकाले च जघन्यतः खलु यथाक्रमं गच्छो भवति पञ्चकः सप्तकश्च, पञ्च परिमाणमस्य पञ्चकः, एवं सप्तकः, वाशब्दः समुच्चये, किमुक्तं भवति, ऋतुबद्धे काले पञ्चको वर्षाकाले सप्तकः, कथमिति चेदुच्यते, ऋतुबद्धे काले आचार्य आत्मद्वितीयो, गणावच्छेदकस्त्वात्म-तृतीयः एवं पञ्चकः । वर्षाकाले जघन्यतः आचार्यआत्मतृतीयो, गणावच्छेदक आत्मचतुर्थ एवं सप्तक इति, उत्कर्षतः कालद्विकेऽपि द्वात्रिंशत्सहस्राणि, तथा च भगवत ऋषभस्वामिनो ज्येष्ठस्य गणधरस्य पुण्डरीकनाम्नो द्वात्रिंशत्सहस्रो गच्छोऽभूत, शेषकः शेषपरिमाणो गच्छो मध्यमः ।। सम्प्रति जघन्यतः पञ्चकसप्तकाभ्यां हीनतायां प्रायश्चित्तमाह—

[भा.१७२९] उउ वासे लहु लहुगा एए गीते, अगीते गुरु गुरुगा ।
अकयसुयाण बहूण वि लहुओ लहुया वसंताणं ।।

वृ- उउत्ति ऋतुकाले पञ्चकाद् हीनानां गीतार्थानां विहरतां प्रायश्चित्तं लघुको मासः, वासेत्ति वर्षाकाले सप्तद् हीनानां गीतार्थानां विहरतां चत्वारो लघुमासाः, एते लघु लघुका गीते गीतार्थविषया द्रष्टव्याः, अगीते अगीतार्थविषयाः पुनर्गरु गुरुकाः, किमुक्तं भवति-ऋतुकाले पञ्चकाद् हीनानामगीतार्थानां वसतां प्रायश्चित्तं गुरुको मासः, वर्षाकाले सप्तकाद् हीनामगीतार्थानां चत्वारो गुरुका मासाः । अकृत-श्रुतानामगृहीतोचितसूत्रार्थतदुभयानां बहूनामपि पञ्चकसप्तकादीनामपि वसतां यथाक्रममृतुकाले प्रायश्चित्तं लघुको मासः । वर्षाकाले चत्वारो लघुकाः ।। अत्र चोदक आह—

[भा.१७३०] एवं सुत्त विरोहो अत्थे वा उभयतो भवे दोसो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणियं पुन सुत्तं, इमेय तहिं कारणा हुंति ।।

वृ- यदि नामैतत् जघन्यादिभेदेन गच्छपरिमाणं, तत एवं सति सूत्रतोऽर्थतः तदुभयतश्च विरोधो दोषो भवेत् । सूत्रेऽन्यथाविहाराज्ञानात् । अत्र आचार्यः प्राह-कारणिकं कारणैर्निर्वृत्तं पुनरिदं सूत्रमतो न दोषः तानि च कारणानि पुनरिमानि वक्ष्यमाणानि तत्राधिकृतसूत्रप्रवर्तने भवन्ति ।। तान्येवाह-

[भा.१७३१] संघयणे, वाउलणा, नवमे पुव्वम्मि, गमनमसिवादी ।
सागरे, जाते जयणा, उउबद्धे, लोयणा, भणिया ।।

वृ- इयं कारणविक्या शेषवक्तव्यविषया च गाथा, ततोऽयं संक्षेपार्थः । संहननं यद्युत्तमं भवति, व्याकुलता वा व्याकुलीभवनं वा गच्छे, नवमे वा पूर्वे उपलक्षणमेतत् दशमे वा सूत्रमभिनवगृहीतं सम्यक् स्मर्तव्यमस्ति, गमनं वा अशिवादिभिरसिवावमौदर्यादिभिः सम्पन्नं, सागरत्ति स्वयंभूरमण-सदृशमतिप्रभूतमनेकातिशयसम्पन्नं नवमं पूर्व परावर्तनीयमस्ति, तत एतैः कारणैर्द्वावपि विहरेयातां, तथा जातत्ति जातादिकल्पो वक्तव्यस्तत्रापि भङ्गचतुष्टये प्रथमवर्जेषु शेषेषु त्रिषु यतना वक्तव्यता, यथा ऋतुबद्धे काले आगच्छद्गच्छद्भिरविरहितं तत्स्थानं कर्तव्यम्, गणिनाऽप्यवलोकना स्वयं करणीया कारणीया च, एतानि कारणान्यधिकृतसूत्रप्रवृत्तौ भणितानि ।। साम्प्रतमेतामेव गाथां व्याचिख्यासुः प्रथमतः संहननमिति पदं व्याख्यानयति-

[भा.१७३२] आयरिय उवज्झाया संघयणा धितिए जे उ उववेया ।
सुत्तं अत्थो व बहुं गहितो, गच्छे य वाघातो ।।

वृ- आचार्या वा उपाध्याया वा ये संहननेन प्रथमेन वज्रऋषभनाराचलक्षणेन धृत्या च वज्रकुड्य-समानया उपेता युक्ताः सूत्रमर्थो वा बहुः प्रभूतो गृहीतो गच्छे च सूत्रार्थस्मरणव्याघातः ।। कुतो व्याघात इति चेत्, उच्यते-व्याकुलनातः । तामेव व्याकुलनामाह-

[भा.१७३३] धम्मकहि महिड्ढीए आवासनिसीहिया य आलोए ।
पडिपुच्छण वादिगहण, रोगी तह दुल्लभं भिक्खं ।।

[भा.१७३४] वाउलणे सा भणिया जह उद्देसम्मि पंचमे कप्पे ।
नवमे दसमा उ पुव्वा अभिनवगहिया उ नासेज्ञा ।।

वृ- स हि धर्मकथी लब्धिसम्पन्नस्ततो भूयान् जनः श्रोतुमागच्छतीति धर्मकथया व्याकुलना । तथा महर्द्धिको राजादिः धर्मश्रवणाय तस्य समीपमुपागच्छति ततस्तस्य विशेषतः कथनीयं, तदावर्जने भूयसामावर्जनादन्यथा व्याकुलनातः सम्यग्धर्मग्रहणाभावे तस्य रोषः स्यात्, तस्मिंश्च रुष्टे भूयांसो दोषाः, अथवा अन्यः कश्चनापि महर्द्धिकाय कथयति तदानीमपि उष्णीकैर्भवितव्यं मा भूत् कोलाहलतस्तस्य सम्यग्धर्माप्रतिपत्तिरिति कृत्वा । तथा महति गच्छे बहव आवश्यकी निर्गच्छन्तः कुर्वन्ति, बहवः प्रविशन्तो नैषेधिकी, ते सम्यग् निरीक्षणीयाः, अन्यथा तयोरकरणे, उपलक्षणमेतदन्यस्या अपि च सामाचार्याः प्रत्युपेक्षणादेः सम्यगकरणे यदि स्मारणं न करोति तत उपेक्षाप्रत्ययप्रायश्चित्तसंभवः, ततः आवश्यकादिनिरीक्षणायां व्याघातः । तथा भिक्षामटित्वा समागतस्य तस्य संघाटस्यालोचयतो यदि पठ्यते तदा विकटनायामग्रेतनस्य पश्चात्तनस्य च संमोहः, संमोहाच्च सम्यगनालोचना तद्भावाच्चरणव्याघात इति तदालोचनायां न पठनीयम् । तथा गच्छे वसतो बहवः प्रतिपृच्छानिमित्त-मागच्छन्ति ततस्तेषामपि प्रत्युत्तरदाने व्याघातः । तथा तं बहुश्रुतं तत्र स्थितं श्रुत्वा वादिनः समागच्छन्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततस्तेऽपि निग्रहीतव्याः, अन्यथा प्रवचनोपघातस्ततस्तन्निग्रहणेऽपि व्याकुलना; तथा महति गणे बहवः प्राधूर्णकाः समागच्छन्ति, ततस्तेषां विश्रामणया पर्युपासनया च व्याघातः । तथा बहवः खलु महति गणे ग्लानास्तेषां यावदालोचना श्रूयते,तदा व्याकुलना । तथा महति गणे भूयसां प्राघूर्णकादीनां प्रायोग्यं भैक्षं दुर्लभमिति साधवः केऽपि कुत्राप्यन्यत्र प्रेषणीया इतिव्याघातः, वाउलणेसा इत्यादि एषा व्याकुलना यथा कल्पे कल्पाध्ययने पञ्चमे उद्देशे सविस्तरं भणिता तथात्रापि द्रष्टव्या, ।। नवमे पुव्वम्मीति व्याख्यानयतिनवमे दशमे पूर्वेऽभिनवे गृहीते यदि सततं ततो नश्येतामतोऽर्थ द्वयोर्विहारः ।।

[भा.१७३५] असिवादि कारणेहिं उम्मुगनायं ति होज्ज जा दोन्नि ।
सागरसरिसं नवमं अतिसयनयभंगगहणत्ता ।।

बृ- अशिवं नाम मारिः, सा उपस्थिता, तत्र च ज्ञातमुल्मुकं यथा उल्मुकानि बहून्येकत्राहृतानि ज्वलन्ति एकं द्वौ वा न ज्वलतः, एवं त्रिप्रभृतिषु बहुषु मारिः प्रभवति, नैकस्मिन् द्वयोर्वा, तत एवमशिवकारणेनादशब्दादवमौदर्येण राजप्रद्वेषतो वा गणभेदस्तावद्भवति यावत् पृथक् पृथग् द्वावपि भवेतामतो नानुपपन्नो द्वयोर्विहारः ।। सागरेति व्याख्यानयति-सागरसद्दशं स्वयंभूरमणजलधितुल्यं नवममुपलक्षणमेतत् दशमं च पूर्व, कस्मादित्याह-अतिशयनयभङ्गादनेकैरतिशयैरनेकैर्नयैरनेकैर्भङ्गैश्च गुपिलत्वात् । ततोऽगीतार्थानामतिशयाकर्णनं मा भूत् । नयबहुलत?आ भङ्गबहुलतया वा बहूनां मध्ये परावर्तनं दुष्करमिति द्वयोर्विहारः । अन्यच्च-

[भा.१७३६] पाहुड, विज्ञातिसया, निमित्तमादी, सुहं च पइरिक्के ।
छेदसुयंमि व गुणणा अगीयबहुलंमि गच्छंमि ।।

बृ- प्राभृतंयोनिप्राभृतं गुणयितव्यम् । विद्यातिशया नाम विद्याविशेषा यैराकाशगमनादीनि भवन्ति ते वा परावर्तनीया वर्तन्ते । निमित्तमतीतादिभावप्ररुपकम् आदिशब्दात् योगा मन्त्राश्च परिगृह्यन्ते । एते सर्वेऽपि सुखं सुखेन प्रतिरिक्त विविक्ते प्रदेशेऽभ्यस्यन्ते, न अगीतबहुले अगीतार्थसंकुले गच्छे छेदश्रुतस्य व्यवहारादेः, गाथायां सप्तमी षष्ठ्यर्थे, गुणना परावर्तनां(नं) कर्तु शक्यम्, तेषामगीतार्थानां कर्णाभ्यटनतः श्रुत्वा विपरिणामतो गच्छान्निर्गमनं मा भूदिति, सूरेरुपाध्यायस्य वात्मद्वितीयस्यान्यत्र गमनम् ।। सम्पति याद्दशे द्वयोरन्यत्र गमनमुचितं ताद्दशमाह-

[भा.१७३७] कयकरणिज्जा थेरा सुत्तत्थविसारया सुयरहस्सा ।
जे य समत्था वोढुं कालगयाणं उवहिदेहं ।।

बृ- कृतकरणा नाम गीतार्थतया परिणामकतया चान्पदापि अन्यैः सहानेकश ईद्दशानि कार्याणि कृतवन्तः, यद्यपि च कदाचिद् द्वितीयः सहायो न कृतवान् तथापि योग्यतया स कृतकरणीय इव द्रष्टव्यः, स्थविरः श्रुतेन पर्यायेण च, तथा सूत्रार्थयोर्विशारदाः सूत्रार्थविशारदाः, तथा श्रुतानि रहस्यानि अनेकान्यनेकशो यैस्ते श्रुतरहस्या इति सहायं प्रति विशेषणम् । सूरेरुपाध्यायस्य वा पूर्वगत-सूत्रार्थधारिणोऽधिगतच्छेदश्रुतस्य च श्रुतरहस्यत्वाव्यभिचारात् ।तथा द्वयोरेकतरस्मिन् काले गतेऽपरेण शरीरपारिस्थापनिकां कर्तु गच्छता द्वयोरप्युपाधिः शून्यायां वसतौ न मोक्तव्यो, मा दस्यवस्तमपहार्षुरिति कृत्वा द्वयोरप्युपधिंमृतकशरीरं चान्यरेण वोढव्यम् ।ततो ये कालगतानां देहं द्वयोरुपधिं च वोढुं समर्थास्ते अधिकृतमूत्रविषयाः ।। तथा चाह-

[भा.१७३८] एयगुणसंपउत्ता, कारणजाएण ते दुयगावि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उउबद्धम्मि विहारो, एरिसयाणं अनुन्नातो ।।

वृ- एतैरनन्तरगाथोक्तैर्गुणैः सम्प्रयुक्ता एतद्गुणसम्प्रयुक्ताः कारणजातेनानन्तरोदितेन केनचित्कारणविशेषेण तावाचार्यादिकावुपाध्यायादिकौ वा ऋतुबद्धे काले विहरतो न कश्चिद्दोषोऽधिकृतसूत्रेणानुज्ञानात् तथा चाह ईदृशयोर्ऋतुबद्धे काले अधिकृतसूत्रेण विहारोऽनुज्ञातो दोषाभावात् कारणविशेषस्य च गरीयस्त्वात् ।। जातेति चत्वारः कल्पाः सूचिताः, तानेवाह-

[भा. १७३९] जातो य अजातो वा दुविहो कप्पोउ होति नायव्वो ।
एक्केक्को वि य दुविहो, सम्मत्तकप्पो य असमत्तो ।।

वृ- द्विविधः खलु कल्पो भवतिज्ञातव्यस्तद्यथा जातोऽजातश्च । एकैकोऽपि च द्विधा-समाप्तकल्पः असमाप्तकल्पश्च । एतानेव चतुरो व्याख्यानयति-

[भा. १७४०] गीयत्थो जायकप्पो ऽगीतो खलु भवे अजातो तु ।
पनगं समत्तकप्पो, तदूनगो होति असमत्तो ।।

वृ- जातकल्पो नाम यो गीतार्थः सूत्रार्थतदुभयकुशलो, ऽगीतोऽगीतार्थः खलु भवेदजातो-ऽजातकल्पः, समापतकल्पो नाम परिपूर्णसहायः, स च जघन्येन पञ्चकं पञ्चकपरिमाण ऋतुबद्धे काले, वर्षाकाले सप्तपरिमाणः, तदुनकस्तस्मात् पञ्चकात्सप्तकाद्वा हीनतरः कल्पो भवत्यसमाप्तो अपरिपूर्णसहायत्वात् ।। अत्र भंगचतुष्टयं, तदेवाह--

[भा. १७४१] अहवा जातो समत्तो, जातो चेव य तहेव असमत्तो ।
असमत्तो जातो य, असमत्तो चेव उ अजातो ।।

वृ- अथवेति प्रकारान्ते पूर्वं कल्पचतुष्टयं सामान्यतः प्ररुपितमिदानीं संयोगतः प्ररुप्यते, जातकल्पोऽपि समाप्तकल्पोऽपीत्येको भङ्गः, जातकल्पोऽसमाप्तकल्प इति द्वितीयः, अजातकल्पः समाप्तकल्प इति तृतीयः, अजातकल्पोऽसमाप्तकल्प इति चतुर्थः । अत्र प्रथमभङ्गः शुद्धः शेषेषु त्रिषु भङ्गेषु यतना कर्तव्या ।। तेसिं जयणेति सूचागाथोक्तं पदं व्याख्यानयन् प्राह-

[भा. १७४२] तेसिं जयणा इणमो, भिक्खग्गह निक्खमप्पवेसे य ।
अनुन्नवणं पि य, समगं बेंति य गिहि दिज्ज ओहाणं ।।

वृ- तेषामाद्यवर्जानं त्रयाणां भङ्गानामियं यतना, समकमेककालं भिक्षाग्रहाय, उपलक्षणमेतत् विचाराय च, निष्क्रमः समकमेव चावग्रहस्यानुज्ञापनम् । इयमत्र भावना-भिक्षाग्रहणाय विचाराय वा सर्वमुपकरणमादाय समकमेव निष्क्रामतः समकमेव च प्रविशतः । तथा वसतिं प्रथमं याचमानौ समकमेव शय्यातरमनुज्ञापयतः तथा निर्गच्छन्तौ समकमेव शय्यातरसमीपमुपगम्य ब्रुवाते, यथा गृहे गृहस्य प्रतिश्रयस्य उपधानं स्थगनं दद्यादिति।। उउबद्धेति पदव्याख्यानार्थमाह-

[भा. १७४३] उउबद्धे अविरहियं, एत्तं जं तेहिं होइ साहूहिं ।
कारेइ कुणइ व सयं, गणीवि ओलोयणमभिक्खं ।

वृ- ऋतुबद्धे काले तयोः कारणवशतस्तथास्थितयोस्तत्स्थनमागच्छद्भिश्च भिक्षार्थं ग्रामं प्रविशद्भिर्विचारार्थाय यथा वा निर्गत्य मिलनार्थमायद्भिर्गच्छद्भिश्च पुनः स्वस्थानं प्रतिचलद्भिः साधुभिरविरहितं भवति ।। आलोयगत्ति पदं व्याख्यानयति-यो-ऽसौ गणी आचार्यः सोऽपि तयोर्द्वयोर्जनयोः अवलोकनां गवेषणामभीक्ष्णं द्वितीयेतृतीये वा दिने स्वयं करोति, अन्यैर्वा कारयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१७४४] एएहिं कारणेहिं हेमंते धिंसु अप्पबीयाणं ।
धिइदेहमकंपाणं, कप्पति वासो दुवेण्हंति ।।

वृ- एतैनन्तरोदितैर्व्याकुलनादिभिः कारणैर्हेमन्ते शीतकाले ग्रीष्मे धर्मकाले द्वयोरप्यात्मद्वितीययोराचार्योपाध्याययोर्धृत्या देहेन चाकम्पयोरचाल्ययोर्धृतेर्वज्रकुड्यसमानत्वात् देहस्य च प्रथमसंहननात्मकत्वात् कल्पते वासः । तदेवमृतुबद्धकालविषयाणि भाष्यकृता प्रपञ्चितानि ।। सम्प्रति वर्षाकालविषयाणि प्रपञ्चयति-

[भा.१७४५] नियमा होइ असुन्ना वसही, नयने य वन्निया दोसा ।
दुस्संचर बहुपाणा वासावासेवि उच्छेदो ।।

वृ- वर्षावासे वर्षाकाले नियमाद्वसतिरशून्या कर्तव्या, किं कारणमिति चेत्, उच्यते, वर्षासूपकरणं सह न नीयते, अथ भिक्षादि गच्छन्नयति तर्हि वर्षाप्रपातेन तिम्यते, तथा चाह-उपकरणस्य सहनयने पूर्वं कल्पाध्ययने तेमनादयो दोषा वर्णिताः ।। अन्यच्च शून्यायां वसतौ कृतायां गवादिभिर्भञ्जनं भटादिभिर्वा रोधनं भवेत् । तथा च सत्यन्यस्यां वसतौ गन्तव्यं । तस्या अलाभे अन्यद् ग्रामान्तरं गमनीय, यत्र च दुस्संचरा मार्गाः सलिलहरितादिभिरात्मविराधनासंयमविराधनाभावात् । तथा बहुप्राणा मार्गा द्वित्रिचतुःपञ्चेन्द्रियाणामनेकजातीयानां सम्मूर्च्छनात् । तथा शय्यातरेण शून्यां वसतिमालोक्यादाक्षिण्या एते क्वाप्यनापृच्छ्य गता इति प्रद्वेषतस्तेषां सर्वेषां वा तत् द्रव्यस्यान्यद्रव्यस्य वा व्युच्छेदः क्रियते । यत इमे दोषास्तस्यात् शून्या वसतिः कदा न कर्तव्येति जघन्यतोऽप्याचार्यस्योपाध्यायस्य चात्मतृतीयस्य वर्षाकाले विहारः, अन्यथा प्रायश्चित्तम् ।। तथा चाह-

[भा.१७४६] वासाण दोण्ह लहुवा आणादिविराधनावसहिमादी ।
संथारग उवगरणे गेलन्ने सल्लमरणे य ।।

वृ- यदि पुनर्द्वौ जनौ वर्षाकाले वसतः तदा प्रायश्चित्तं चत्वारो लघुकाः आज्ञादयश्च दोषाः । तथा विराधना वसत्यादेरादिशब्दादात्मसंयमप्रवचनपरिग्रहः । तथा संस्तारकविषये उपकरणविषये च भूयांसो दोषाः तथा द्वयोर्जनयोर्विहरतोरेकः कथंचनापि ग्लानो जायेत ततो ग्लानं वसतौ मुक्त्वा परस्मिन् भिक्षादिनिमित्तं बहिर्गते (तो)यः पश्चात् ग्लानस्य दोषः द्वितीयोद्देशकेऽभिहितः । यच्च सशल्यस्य सतो मरणं तदेतत्सर्वमत्रापि द्रष्टव्यम् । एवं द्वारगाथासंक्षेपार्थः ।। साम्प्रतमेनामेव विवरीपुराह-

[भा.१७४७] सुन्नं मोत्तुं वसहिं भिक्खादिकारणाओ जइ दोवि ।
वच्चंतितत्तो दोसा गोणाईया हवंति इमे ।।

वृ- यदि द्वावपि शून्यां वसतिं मुक्त्वा भिक्षादिकारणवशतो व्रजतस्तत इमे वक्ष्यमाणा दोषा गवादिका गवादिनिमित्ता भवन्ति ।। तानेवाह-

[भा.१७४८] गोणे साणे छगले सूगरमहिसे, तहेव परिकम्मे ।
मिच्छत्तबडुगमादी अच्छंते सलिंगमादीणि ।।

वृ- गौः श्वा छगलः शूकरो महिषो वा शून्यां वसतिमवबुध्य प्रविशेत् तथा परिकर्म गृहस्थः कुर्यात् । यदिवा मिथ्यात्वोपहता बटुकादयः प्रविशेयुः अथैको गच्छत्येकः पश्चात्तिष्ठति ततः एकस्मिन् पश्चात्तिष्ठिति स्वलिङ्गादीनि स्वलिङ्गप्रतिसेवनादय आत्मपरोभयसमुत्था बहवो दोषाः । एषापि द्वारगाथा ।। तत्र गवादिद्वारव्याख्यानार्थमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१७४९] गोणादीए पविट्ठे धाडंतमधाडणे भवे लहुया ।
अहिगरण वसहिभंगा तह पवयण संजमे दोसा ।।

वृ- गवादिके गोश्वच्छगलशुकरादिके प्रविष्टे यदि तान् गवादीन् घाटयति ततस्तत्प्राऽयोगोलकल्पास्तिर्यञ्च इति तद्धाटने भवति प्रायश्चित्तं चत्वारो लघुकाः, तथा ते गवादयो निर्द्धाटिताः संतो हरितादीनी खादेयुस्ततोऽधिकरणदोषसंभवः । अधाडणत्ति अथ न निर्धाटयति तर्हि वसतिभंगस्तथा प्रवचने संयमे च दोषाः प्रवचनविराधना, उपलक्षणमेतत् आत्मविराधना चेत्यर्थः । तथा हि यदि श्वादयो बालमृतकलेवरादि भक्षयन्तस्तिष्ठन्ति तदा महती प्रवचनस्य कुत्सेति प्रवचनविराधना, शूकरप्रभृतयश्च निष्काश्यामानाः कदाचित्संमुखा अपि चलेरन् तत आत्मविराधना । श्वादयश्च तिष्ठन्तो मार्जारमूषिकादिमुपहन्युरिति संयमविराधना । तदेवं गोणे साणेत्यादि व्याख्यातम् ।।

[भा.१७५०] दुक्खं ठिएसु वसहीपरिकम्मं कीरइत्ति इति नाउं ।
भिखाइ निग्गएसुं सअट्ठमीसं विमं कुज्जा ।।

वृ- ते गृहस्थाः परिभाव्यन्ति-स्थितेषु साधुषु दुःखं महता कष्टेन वसतेः परिकर्म क्रियते स्वाध्यायभङ्गादिदोषभावात्, गतेषु तु न कश्चिद् दोष इति ज्ञात्वा परिभाव्य भिक्षादिनिमित्तं निर्गतेषु साधुषु सअट्ठत्ति स्वार्थं स्ववसतिबलिष्ठताकरणार्थ मिश्रं वा संयता अपि सुखेन स्वाध्यायादिकं च कुर्युरिति स्वार्थं संयमनिमित्तं च इदं वक्ष्यमाणं परिकर्म कुर्युः । तदेवाह-

[भा.१७५१] उच्छेव बिलच्छगणे, भूमीकम्मे सपुञ्चणामज्ञे ।
कुड्डाण लिंपणं दूमणं च एयं तु परिकम्मं ।।

वृ- उच्छेवो नाम यत्र पतितुमारब्धं तत्रान्यस्येष्टकादेः संस्थापनम् । बिलस्थगनं कोलादिकृताबिलेष्विष्टकाशकलादिप्रक्षिप्योपरि गोमयमृत्तिकादिना पिधानम् । भूमिकर्म नाम विषमाणि भूमिस्थानानि भंक्त्वा समार्जन्या संमार्जनम् आमर्जनं मृदुगोमयादिना लिम्पन् ।। तथा कुड्यानामेव च दूमणंति धवलनं एतत्परिकर्म कुर्युः ।। अत्रैव प्रायश्चित्तविधिमाह-

[भा.१७५२] जइ ढक्कंतोच्छेवा तति मास बिलेसु गुरुग सुद्धेसु ।
पंचेंदियउद्दाते, एगदुगतिगे उ मूलादी ।।

वृ- यति यावन्त उच्छेवा ढक्किताः समारचितास्तति तावन्तो लघुमासाः प्रायश्चित्तं, बिलेषु शुद्धेषु पञ्चेन्द्रियजीवरहितेषु स्यगितेषु गुरुगत्ति चत्वारो गुरुमासाः अथ पञ्चेन्द्रियव्याधातो बिलस्थगने अभूत् तत एकद्वित्रिषु व्याहतेषु यथाक्रमं मूलादि एकस्मिन् पञ्चेन्द्रियेऽपद्राविते मूलं द्वयोरनवस्थाप्यं त्रिषु त्रिप्रभृतिषु पारांचितमिति ।।

[भा.१७५३] भूमीकम्मादीसु फासुग, देसे उ होइ मासलहुं ।
सव्वंमि लहुग अफासुएण देसंमि सव्वे वा ।।

वृ- भूमिकर्मादिषु-भूमिकर्मसंमार्जनामर्जनकुड्यलेपनधवलनेषु । देशतः प्रासुकेषु कृतेषु प्रत्येकं प्रायश्चित्तं भवति मास लघु, सर्वस्मिन् उपाश्रयेषु प्रासुकेषु कृतेषु प्रत्येकं चत्वारो लघुकाः । अप्रासुकेनापि जलादिना देशतः सर्वतो वा भूमिकर्मादिषु कृतेषु प्रत्येकं चत्वारो लघुकाः ।।

[भा.१७५४] सोच्चा गयत्ति लहुगा अप्पत्तिय गुरुग जं च वोच्छेदो ।
बदुचारणभइमरणे पाहुणनिक्केयणा सुत्ते ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- शय्यातरो यदि शून्यां वसतिमालोक्य कस्यापि पार्श्वे दृष्ट्वा श्रुत्वा च तद्वच एतज्जानाति यथा गताः साधव इति न चाप्रीतिरुत्पन्ना तदा प्रायश्चित्तं चत्वारो लघुकाः । अथाप्रीतिकं करोति यथा अदाक्षिण्या एते अनापृच्छ्य गता इति तर्हि गुरुगत्ति चत्वारो गुरुका मासाः । अथैकानेकभेदेन तद्द्रव्यान्यद्रव्यव्यवच्छेदस्तदा तन्निमित्तमपि चतुर्गुरुकप्रायश्चित्तम् । अधुना मिच्छत्तबडुगमादीति व्याख्यानयति-बटुचारणेत्यादि, बटुका द्विजातयः चारणा वैतालिकविशिषाः भटाः प्रतीतास्ते गताः क्वापि साधव इति विज्ञाय तस्मिन् शून्ये उपाश्रये आवासयेयुः, तत्र च कलहादिप्रसङ्गः, तथा शून्यां वसतिमालोक्य कश्चित्तिरश्चो मनुष्यो वा समागत्य म्रियते तत्र च राजग्रहादिदोषसंभवः तथा केचित् शय्यातरस्य प्राधूर्णकाः शून्येयं वसतिरिति कृत्वा शय्यातरानुज्ञया तत्र तिष्ठेयुर्न च ते निष्काशयितुं शक्यन्ते, निष्कासने वा प्रद्वेषादिप्रवृत्तिः, तथा तिरश्ची मानुषी वा प्रसवितुकामा शून्यां दृष्ट्वा तत्रागत्य प्रसवते (प्रसुवीत), तस्या निष्काशने आश्रयत्याजने संयमविराधनायो दोषा यथोक्ताः प्राक्, एते शून्य उपाश्रये क्रियमाणे दोषाः ।। सम्प्रति अच्छंति सलिङ्गमादीणि इति व्याख्यानयति-

[भा.१७५५] अह चिट्ठति तत्थेगो एगो हिंडइ उभयहा दोसा ।
सलिंगसेवणादी आउत्थ परे उभयतो य ।।

वृ- अह तत्रैकस्तिष्ठति एको हिण्डते तत उभयथा उभयेन प्रकारेण यस्तिष्ठति तद्गता यश्च हिण्डते तद्गताश्चेत्यर्थः, स्वलिङ्गसेवनादयो दोषाः स्वलिङ्गसेवना संयतीप्रतिसेवना आदिशब्दात्परलिङ्गसेवना गृहिलिङ्गसेवना च परिगृह्यते । कथंभूता इत्याहआत्मोत्था आत्मनैव संयत्यादिकं कदाचित्प्रार्थयते इत्यर्थः, तथा परे परतः संयत्यादिकृतक्षोभनात्, उभयतः स्वतः परतश्च समुत्थाः ।। यदुक्तं प्राक् वसोद्दा गयत्ति लहुगा' इत्यादि गाथापूर्वार्धं तद्व्याख्यानार्थमाह-

[भा.१७५६] सुन्ने सागारि दट्ठुं संथारे पुच्छे कत्थ समणाओ ।
सोउं गयत्ति लहुगा अप्पत्तिअच्छेदे चउ गुरुगा ।।

वृ- संस्तरन्ति साधवोऽस्मिन्निति संस्तार उपाश्रयः सागारिकः शय्यातरः, सप्तमी प्राकृतत्वाद् द्वितीयार्थे, ततोऽयमर्थः शून्यं संस्तारमुपाश्रयं सागारिको दृष्ट्वा पृच्छेत् कुत्र गताः श्रमणा इति तत्र प्रतिवचः श्रुत्वा गता इति ज्ञाते अप्रीत्यकरणे प्रायश्चित्तं चत्वारो लघुकाः अप्रीतिके समुत्पन्ने च्छेदे च तद्द्रव्यान्यद्रव्यव्यवच्छेदे चत्वारो गुरुकाः । तदेवं विराधना वसत्यादेरिति व्याख्यातम् ।।

सम्प्रति 'संथारग उवगरणे' इति व्याख्यानयति-

[भा.१७५७] कप्पट्ठा संथारे खेलण लहुगो तुवट्टे गुरुगो उ ।
नयने दहने चउ लहु, एत्तो उ महल्लए वुच्छं ।।

वृ- संस्तारे उपाश्रये यदि कप्पट्ठगत्ति बालकः खेलति क्रीडति ततः खेलने प्रायश्चित्तं लघुको मासः । अथ त्वग्वर्तनं कुर्यात्तर्हि त्वग्वर्तनकृतो गुरुको मासः । अथ स बालकस्तत्र स्थितः स्तेनेन नीयते प्रदीपनकेन वा लग्नेन दह्यते, तदा चतुर्लघु । अत ऊर्ध्वं महति त्वग्वर्तनादि कुर्वति प्रायश्चित्तं वक्ष्ये ।।

[भा.१७५८] तुवट्ट नयन दहने, गुरुगा हवंतनायारे ।
अह उवहम्मति उवहित्ति घेत्तुं नं हिंड मासलहुं ।।

[भा.१७५९] उल्लेलहुग, गिलाणादिगा य सुन्नेठवेंति चउ लहुगा ।
अनरक्खितोवहम्मतिहिं पावेंति जं जत्थ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- महान् पुरुषः शून्यमुपाश्रयं दृष्ट्वा तत्र त्वग्वर्तनं करोति, यदि वा उपकरणं नयति दहति वा, तदा त्वग्वर्तने नयने दहने वा, प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः ;अथानाचारं करोति, तत्रापि चत्वारो गुरुकाः ।। अधुना उपकरणेति व्याख्यानार्थनीतं वर्षेणार्द्रीक्रियते तदा चत्वारो लघुकाः । अथ तस्मिन्नुपाश्रये शून्ये सति ग्लानादिकान्, आदिशब्दात् प्राघूर्णकादिपरिग्रहः, गृहस्थाः स्थापयन्ति तदापि चत्वारो लघुकाः । अयोपधिं सह न नयति तदा सोऽरक्षितोः सन् उपहन्यते तस्करैर्वापह्रियते, तदपहारे च जघन्यमध्यमोत्कृष्टापहारनिमित्तं प्रायश्चित्तं, हृते च तस्मिन्नुपकरणे यद् अनेषणादिकं यत्रोपकरणविषये तौ सेवाते तन्निमित्तमपि प्रायश्चित्तं तौ प्राप्नुतः ।। सम्प्रति 'गेलन्ने सल्लमरणे य' इति द्वारद्वयमाह-

[भा. १७६०] गेलन्न मरणसल्ला बितिउद्देसंति वन्निया पुव्विं ।
ते चेव निरवसेसा नवरं इह इं तु बितियपयं ।।

वृ- ग्लान्यं मरणसल्लत्ति सशल्यमरणमेते द्वे अपि पूर्व द्वितीयोद्देशके प्रथमसूत्रे ये दोषतया सविस्तरं वर्णितिते एव निरवशेषे अत्रापि वक्तव्ये, नवरं तत्र द्वितीयपदमपवादपदं नोक्तमिह तु, इकारतरः पादपूरणे, तदुच्यते ।। तदेवाह-

[भा. १७६१] असिवादिकारणेहिं अहवा फिडिया उ खेत्तसंकमणे ।
तत्तियमेत्ता व भवे दोण्हं वासासु जयण इमा ।।

वृ- अशिवादिभिः कारणैर्द्वावपि वर्षासु विहरतः । अथवा एकस्मात् क्षेत्रादन्यस्मिन् क्षेत्रे सङ्क्रमणे कथमपि मार्गतः स्फिटितौ परिभ्रष्टावेकत्र वर्षासु विहरत उपलक्षणमेतत् तेनैतदपि द्रष्टव्यम्- अशिवादिकारणतो गणस्फोटं कृत्वेकाकिनो जाताः सङ्केतवशाच्च कचिद्वर्षासु द्वौ मिलितविति । तत्तियमेत्ता व भवे इति अथवा शेषाः प्रतिभग्ना मृता वा अवशिष्टौ तावन्मात्रावेव द्वावेव भवतस्तिष्ठतः । एवं द्वौ वर्षासु भवतः । ततस्तयोश्च द्वयोर्वर्षासु इयं वक्ष्यमाणा यतना ।। तामेवाह-

[भा. १७६२] एगो रक्खति वसहिं भिक्खवियारादि बितियतो याति ।
संथरमाणे असंथरे निद्दोस्सुवरिं ठवित्तु वहिं ।।

वृ- एको वसतिं रक्षति । द्वितीयो भिक्षाविचारादौ भिक्षायां विचारे बहिर्भूमावादिशब्दादन्यस्मिन् वा प्रयोजने याति । एवं यतना तदा भवति तदा तौ संस्तरतः । असंथरेत्ति अथैकाकिनो भिक्षाया अलाभादन्यतो वा कुतश्चित्कारणान्न संस्तरतस्तदासंस्तरे द्वावपि सह हिण्डाते तत्रेयं यतना, यदि वसतौ निर्दोस्यं(ष्यं) निर्भयं तदा उपधिमुपरि वसतेः स्थापयतो बध्नीतो यथा न कोऽपि पश्यतीति । एवंभूतां च यतनां कुर्वन्तौ तावप्रायश्चित्तविषयौ । अथ न कुरुतस्तदा यद् आपद्यते प्रायश्चित्तं तत्प्राप्नुत इति ।।

[भा. १७६३] सुत्तेणेवुद्धारो कारणियं तं तु होति सुत्तंति ।
कप्पोत्ति अनुन्नातो वासाणं केरिसे खेत्ते ।।

वृ- यत एवं दोषास्ततो द्वयोर्विहारो वर्षासु साक्षात्पंचमेन सूत्रेण प्रतिषिद्धस्त्रयाणां तु विहारस्योद्धारो-ऽनुज्ञातः सूत्रेणैव षष्ठेन कृतः सोऽप्युत्सर्गतो न कल्पते ततस्तत्सूत्रं कारणिकमशिवादिकारणनिष्पन्नं भवति वेदितव्यम् ।। अथ कीदृशे क्षेत्रे वर्षासु, गाथायां षष्ठी सप्तम्यर्थे प्राकृतत्वात्, त्रयाणां विहारः कल्प इति कल्पते इत्यनेनं पादेनानुज्ञातः । सूरिराह-

[भा. १७६४] महती वियारभूमी विहारभूमी य सुलभवित्ती य ।
सुलभा वसही य जहिं जहन्नयं वासखेत्तं तु ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यत्र महती विचारभूमिः पुरीषोत्सर्गभूमिः, यत्र च महती विहारभूमिर्भिक्षानिमित्तं परिभ्रमणभूमिः, यत्र च वृत्तिर्भिक्षावृत्तिः सुलभा, वसतिश्च यत्र सुलभा, तत् जघन्यं वर्षायोग्यं क्षेत्रं उत्कृष्टं त्रयोदशगुणोपेतम् ।। तानेवाह-

[भा.१७६५] चिक्खल्ल पाण थंडिल वसही गोरस जनाउलो वेज्जो ।
ओसह निचयाहिवती पासंडा भिक्ख सज्झाए ।।

वृ- यत्र चिक्खल्लः कर्दमो भूयान्न भवति, प्राणाश्च द्वीन्द्रियादयो भूयांसो न संभूर्च्छन्ति, यत्र च भूयांसि स्थण्डिलानि, वसतयश्च द्वित्र्यादयो यत्र प्राप्यन्ते, गोरसं च प्रभूतं, प्रत्येकभूयोजनसमाकुलः कुलवर्गः, वैद्यश्च यत्र विद्यते, औषधानि च सुप्रतीतानि, निचयाश्च धान्यानामतिप्रभूताः, अधिपतिः प्रजानामतीव सुरक्षी वर्तते, पाषण्डाश्च स्तोका विद्यन्ते, भिक्षा च सुलभा, स्वाध्यायश्च निर्व्याघातः । एतदुत्कृष्टं वर्षासु योग्यं क्षेत्रम् ।। साम्प्रतमेतद्गुणाभावे वर्षासु वसतां प्रायश्चित्तमाह-

[भा.१७६६] पाणा थंडिल वसही अहिवति पासंड भिक्ख सज्झाए ।
लहुया, सेसे लहुओ, केसिंची सव्वहिं लहुगा ।।

वृ- यदि यत्र प्राणा अतिबहवो, यदि वा न विद्यन्ते स्थण्डिलानि, वसतयो वा द्वित्र्यादिका न विद्यन्ते, अधिपतिर्वा नास्ति, पाषण्डा वा बहवः, भिक्षा च न सुप्रापा, स्वाध्यायो वा न निर्वहति, तत्र वर्षाकालं करोति तदैतेषु दोषेषु प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः । शेषे चिक्खल्लादिके दोषे प्रत्येकं लघुको मासः । केषांचिदाचार्याणां मतेन पुनः सर्वत्र सर्वेष्वपि दोषेषु प्रत्येकं चत्वारो लघुकाः ।।

[भा.१७६७] नीसरण कुच्छणा गार कंटका सिग्ग आयभेदो य ।
संजमतो पाणादी आगाह निमज्जणादीया ।।

वृ- निस्सरणं नाम फेल्हसणं । कुत्सना अङ्गुल्यन्तराणां कोत्तः गाराः कर्करकाः । कण्टकाश्च स्थूलशूलादयः । सिग्गत्ति देशीपदमेतत् परिश्रम इत्यर्थः । एष आत्मभेद एते आत्मविराधनायै दोषा इत्यर्थः । संयमतः संयमे पुनरयं दोषः प्राणाद्वीन्द्रियादय आदिशब्दात् पृथिवीकायादिपरिग्रहः, ते विद्यन्ते, तथा यदि सुखेनात्र गच्छामीति विचिन्त्य सोदके कर्दमे गच्छात तथा कचिदगाधे निमज्जति, आदिशब्दात् पादजङ्घादिक्षोभिताः सकर्दमजलविप्रुष उत्थापयति, ताभिश्च प्राणादिविधातः, सन्मुखागच्छत्-पुरुषादिखरण्टनं निजशरीरोपकरणखरण्टनं चेति परिग्रहः ।

[भा.१७६८] धुवणे वि होंति दोसा उप्पीलणादी य बाउसत्तं च ।
सेहादीनमवन्ना अधोवने चीरनासो वा ।।

वृ- कर्दमाकुले मार्गे गमनतः कर्दम उपकरणे लगति, तथा चोपकरणस्य धोवनेऽपि, आस्तामधोवने इत्यपि शब्दार्थः, दोषाः । के ते इत्याह-उत्पीडनादय उत्पीडनं प्राणादीनां प्लावनमादिशब्दात् शरीरायासस्वाध्यायविधातादिपरिग्रहः । अपि च वस्त्राणि शरीरं च प्रक्षालयतो बाकुशिकत्वमुपजायते, शरीरोपकरणबकुशीकारणात्, अय न प्रक्षालयति, तर्ह्यधोवने शैक्षकादीनामवज्ञासंभवश्चीवरनाशश्च कर्दमेन शटनात् । वाशब्दः सप्नुच्चये ।। सम्प्रति प्राणसंभवे दोषानाह-

[भा.१७६९] मुइंगविच्छुगादिसु दो दोसा संजमे य सेसेसु ।
नियमा दोस दुगुंछिय अथंडिल निसग्ग धरणे य ।।

वृ- मुइंगा नाः पिपीलिका वृश्चिकादिषु शेषेषु च प्राणेषु बाहुल्येन संभवत्सु द्वौ दोषौ तद्यथा संयमे,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चशब्दादात्मनि च, आत्मविराधना संयमविराधना चेत्यर्थः, तत्र वृश्चिकादिभिर्दशादात्मविराधना, कीटिकादिसत्त्वव्याघाताच्च संयमविराधना।। स्थण्डिलाभावे दोषानाह- नियमत्यादिस्यण्डिलाभावे अस्थण्डिले जुगुप्सिते वा स्थण्डिले निसर्गे पुरीषप्रश्रवणोत्सर्गे नियमाद् दोषाः संयमविराधनादयः । तत्रास्थण्डिले हरितकायादिव्यापादनात् संयमविराधना, पादादिल्हसनादात्मविराधना, जुगुप्सिते स्थण्डिले प्रवचनविराधना । अथैतद्दोषभयान्न व्युत्सृजति किन्तु धारयति । तत आह, धारेण च दोषा आत्मविधातादयः तथा च "पुरीषादिधारणे जीवितनाशादिः" "मुतनिरोह चक्खुं वच्चनिरोहे य जीवियं चयति" इत्यादिवचनात् । ग्लानत्वे च चिकित्साकरणतः संयमव्याघातः; ।। यत्र सङ्कटा वसतिर्यत्र द्वित्र्यादयो वसतयो न लभ्यन्ते तत्र दोषानाह-

[भा.१७७०] वसहीए संकडाए विरल्ल अविरल्लणे भवे दोसा ।
वाघातेन व अन्नाऽसतीए दोसा उ वच्चंते ।।

वृ- वसतौ सङ्कटायां सत्यामुपधेः विरल्लेति विस्तारणे वा दोषा भवन्ति के ते इति चेदुच्यते;-यदि उपधिस्तीमितो विस्तार्यते ततः सङ्कटत्वादन्यमप्यतीमितमुपधिं तीमयति । अथ न विस्तार्यते तर्हि स कोथमुपयाति, तत्संसर्गतः शरीरस्य च मान्द्यमुपजायते । एकस्यश्च वसतेः कथमपि व्याघाते अन्यस्याश्च अभावे ग्रामान्तरं व्रजनीयं, तत्र च व्रजति संयमात्मप्रवचनविराधना । तथा हि-मार्गे जल-हरितकायादिव्यापादनात् संयमविराधना अगाधे सलिले प्रविशत आत्मविराधना, वसत्यलाभतो वर्षाकालेऽपि वर्षप्रपातेनावरुध्यमानान् पथगिच्छतस्तान् दृष्ट्वा लोकः प्रवचनं कुत्सयते, ईदृशा एवैते वर्षास्वपि नाश्रमं क्वचिदपि लभन्ते इति प्रवचनविराधना।। गोरसाभावे दोषानाह-

[भा.१७७१] अतरंतबालवुड्ढा अभाविता चेव गोरसस्स असती ।
जं पाविहित्ति दोसं आहारमएसु पाणेसु ।।

वृ- अतरन्तो नाम असहास्तथा बाला वृद्धाश्च तथा येऽभाविता येषां गोरसव्यतिरेकेण नान्यत्किमपि प्रतिभासते, ते गोरसस्य असति अबावे आहारमये, प्राणेषु सत्सु यद्गाढानागाढपरितापनादिकं दोषं प्राप्स्यन्ति, तन्निमित्तं सर्वमपि प्रायश्चित्तमाचार्यो लप्स्यते, तस्माद्यत्र तदभावस्तत्र न वस्तव्यम् ।

[भा.१७७२] ननु भणितो रसच्चाओ, पणीयरसभोयणे य दोसा उ ।
किं गोरसेन भते, भन्नइ सुण चोयग इमं तु ।।

वृ- ननु सूत्रे रसानां क्षीरादीनां त्यागो भणितः, "अनशनमूनोदरता, वृत्तेः संक्षेपणं, रसत्यागः" इत्यादिबाह्यतपोव्यावर्णनात् । प्रणीतरसभोजने च दोषाः कामोद्रेकादयः शरीरोपचयादिभावात्, ततः किं भदन्त गोरसेन कर्तव्यम् । सूरिराह-श्रृणु चोदक! इदं वक्ष्यमाणम् ।। तदेवाह-

[भा.१७७३] कामं तु रसच्चागो, चतुत्थमंगं तु बाहिरतवस्स ।
सो पुन सहूण जुज्जति असहुण य सज्ज वावत्ति ।।

वृ- काममनुमतमेतत् । रसत्यागश्चतुर्थमङ्गं चतुर्थो भेदो बाह्यतपसः षड्भेदात्मकस्य । केवलं, पुनःशब्दः केवलार्थः, स रसत्यागः सहानां युज्यते संगच्छते । असहानामसमर्थानां रसाभावे सद्यस्तत्कालं व्यापत्तिर्मृत्युः ।। अन्यच्च-

[भा.१७७४] अगिलाए तवोकम्मं परक्कमे संजतोत्ति इति वुत्तं ।
तम्हा उ रसच्चाओ न नियमतो होति सव्वस्सा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- संयतस्तपःकर्म प्रति अम्लान्या पराक्रमेदित्युक्त भगवता तस्मान्न नियमतः सर्वस्य रसत्यागो भवति।

[भा.१७७५] जस्स उ सरीरजवणा, रुते पणीयं न होइ साहुस्स।
सो वि य हु भिन्नपिंडं भुंजउ अहवा जह समाही ।।

वृ- यस्य साधोः शरीरयापना न प्रणीतं प्रणीतरसमृते भवति, सोऽपि च आसतां पूर्वोक्ता असहा इत्यपिशब्दार्थः ।हु निश्चितं भिन्नपिण्डं धृतादिना मिश्रितं गलितापिण्डं भुञ्जीत । अथवा यथासमाधि क्षीरादि भुङ्क्ते केवलं मा गृद्धिर्भूयादिति संपृष्ट(संमृष्ट) पानकादिना मीलयित्वा क्षीरमापिबेत्।।

[भा.१७७६] चउभंगो अजनाउलकुलाउले चेव ततियभंगो उ।
भोइयमादि जनाउल कुलाउल मडंबमादीसु ।।

वृ- जनाकुल-कुलाकुलयोश्चतुर्भङ्गिका जनाकुलमपि कुलाकुलमपीति थमो भङ्गः, जनाकुलं न कुलाकुलमिति द्वितीयः, न जनाकुलं कुलाकुलमिति तृतीयः; न जनाकुलं नापि कुलाकुलमिति चतुर्थः, प्रथमभङ्गे बहूनि कुलानि बहूनि मानुषाणि । द्वितीयभङ्गे कुलानि स्तोकानि जनास्त्वतिबहवः, कुले कुले भोजिकादिजनानां सहस्रसंख्याया भावात् । तृतीयभङ्गे बहूनि कुलानि जनाः स्तोकाः, गृहे गृहे एकस्य द्वयोर्वा मानुषयोर्भावात् । चतुर्थभङ्गे न बहूनि कुलानि नापि बहवो जनाः; कतिपयकुलानां प्रतिकुलं च स्तोकमानुषाणां भावात् ।। अत्र यौ भङ्गौ ग्राह्यौ तावाह-अजनाकुलेत्यादिना न जनाकुलं कुलाकुलमिति तृतीयो ग्राह्यः एतदनुज्ञानात् प्रथमः सुतरामनुज्ञातो द्रष्टव्यस्तस्योभयगुणोपेतत्वात् । आह च चर्णिकृत्-''जइ ताव तइओ भंगो । अनुन्नाओ प्रगेव पढमो भंगो अनुन्नातो'' इति, शेषौ तु द्वौ भंगौ नानुज्ञातौ कुलानामल्पत्वात् ।। सम्प्रति जनाकुलतां कुलाकुलतां च व्याख्यानयति-भोइय इत्यादि प्रथमभङ्गे द्वितीयभङ्गे च जनाकुलं भोजिकादिभिरतिप्रभूतैर्जनैराकीर्णत्वात् कुलाकुलं मडम्बादिषु स्थानेषु । तथा हि-मडम्बे अष्टादशकुलसहस्राणि, आदिशब्दात्पत्तनादिपरिग्रहः । व्याख्यातं जनकुलद्वारम्।।

[भा.१७७७] वेज्जस्स ओसहस्स व, असतीए गिलाणउ जं पावे।
वेज्जसगासं नेते आनंते चेव जे दोसा ।।

वृ- यदि नाम कोऽपिग्लानो जायते, तदावैद्यस्य औषधस्य चासत्यभावे यत् ग्लानो अनागाढागाढपरितापनादि प्राप्नोति तन्निमित्तं सर्व प्रायश्चित्तमाचार्यः प्राप्नोति । अन्यच्च तादृशे क्षेत्रेऽवतिष्ठमानो वैद्योऽत्र नास्तीति ग्लानेऽन्यस्मिन् ग्रामे वैद्यस्य सकाशं नीयमाने आनीयमाने वा ये दोषां अनागाढमनागाढं वा परितापनं स्तेनैरुपकरणाद्यपहरणं व्याघ्रादिश्वापदैर्भणमित्यादि तद्धेतुकमपि प्राप्नोति । एवमौषधस्याप्यानयसाधुवु ग्रामान्तरे प्रेष्यमाणेषु दोषा वाच्वाः।।

[भा.१७७८] नेचइया पुन धन्नं दलंति असारअंचितादीसु।
अहिवंमि होइ रक्खा, निरंकुसेसुं बहू दोसा ।।

वृ- निचयेन संचयेनार्थाद् धान्यानां ये व्यवहरन्ति ते नैचयिकास्ते असारा दरिद्रा अञ्चिताः पूज्या राजमान्याः पितृपितृव्यादयो वा आदिशब्दादनञ्चितादिपरिग्रहस्तषु क्रयेणान्यथा वा धान्यं ददति । ततः सर्वत्र भिक्षा सुलभोपजायते।। तथा अधिपेऽधिपतौ विद्यमाने रक्षा भवति । निरङ्कुशेषु लोकेषु मध्ये पुनर्वसतो बहवो दोषा उपकरणापहारापमानादिलक्षणाः।। पाषण्डद्वारमाह-

[भा.१७७९] पासंडभाविएसुं, लंभति ओमानमो अत्तिबहूसु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अवि य विससुवलद्धी हवंति कज्जेसु उ साहाया ।।

वृ- यदि स्तोकाः पाषण्डास्ततोऽशनादीनि वस्त्राणि भैषजानि चातिसुलभानि भवन्ति अतिबहुषु पुनः पाषण्डेसु सत्सु पाषण्डभावितेभ्यो जनेभ्यो, गाथायां सप्तमी पञ्चम्यर्थे, अपमानं लभन्ते । अपीति संभावने । चः पुनरर्थे । संभाव्यते पुनरियं विशेषोपलब्धिरन्यपाषण्डेभ्योऽतिशयोपलब्धिर्यथा यदन्यत् पाषण्डिनां कल्पते तत्साधूनां न कल्पते । तत एवं लोको भावितः सन् साधूनां कल्पिकं ददाति । तथा कार्येषु च बहुप्रकारेषु शृङ्गनादि(तादि)लक्षणेषु वयमपि पाषण्डा एतेऽपि च पाषण्डा धर्मस्थिता इति कृत्वा सहाया भवन्ति । । सम्प्रति भिक्षाद्वारमाह-

[भा.१७८०] नाणतवाण विवड्डी गच्छस्स य संपया सुलमभिक्खे ।
न य एसणातो धातो नेव य ठवणाए भंगो उ ।।

वृ- सुलभा भिक्षा यत्र तस्मिन् सुलभभिक्षे ग्रामादौ वसतां ज्ञानस्य श्रुतज्ञानस्य तपसश्चा-नशनादेर्विशिष्टा वृद्धिर्भवत्याहारोपष्टम्भतः स्वाध्यायस्य तपश्च कर्तुं शक्यत्वात्तथा गच्छस्य सम्पत् स्फीतताऽतिविशिष्टा भवति । शिष्याणां प्रातीच्छिकानां वाऽनेकेषामागमात् न च एषणाया घातः प्रेरणा, नापि स्थापनाया मासकल्पवर्षाकल्परूपाया अथवा स्थापनाकुलानां भङ्गः प्रेरणा ।।

[भा.१७८१] वायंतस्स नु पनगं पनगं पडिच्छतो भवे सुत्तं ।
एगग्गं बहुमानो कित्ती य गुणा य सज्झाए ।।

वृ- यत्र स्वाध्यायश्चतुःकालं निर्वहति तत्र वर्षावासः कर्तव्यो यतः स्वाध्यायेऽमी गुणाः सुत्रमाचारादिकं सूत्रतोऽर्थतस्तदुभयतश्च वाचयतः पञ्चकं वक्ष्यमाणं सङ्ग्रहादिकं भवति । यथा च वाचयतः पञ्चकं तथा प्रतीच्छतः श्रोतुरपि पञ्चकं तस्यापि संग्रहादिनिमित्तं श्रुतश्रवणाय प्रवृत्तेः । तथा वाचयतः प्रतीच्छतश्चैकाग्र्यं श्रुतैकपरतोपजायते, सा च विश्रोतसिकारिका भवति । तथा बहुमानो भक्तिः श्रुतस्य तीर्थकरस्य च कृतो भवति । कीर्तिश्च अवदाता सकलधरामण्डलव्यापिनी यथा भगवतः आर्यवैरस्येति ।। अधुना पञ्चकं व्याख्यानयति-

[भा.१७८२] संगहुवग्गह निज्जर सुयपज्जवजायमव्ववच्छित्ती ।
पनगमिणं पुव्वुत्तं जे चायहितोपलंभादी ।।

वृ- यत्पञ्चकं पूर्वमुक्त तदिदं तद्यथा-सङ्ग्रह उपग्रहो निर्जरा श्रुतपर्यवजातमव्यवच्छित्तिश्च । तत्र संग्रहः शिष्यादेस्तथा च श्रुते शिष्यादयः संगृह्यन्ते । उपग्रह उपष्टम्भः स च श्रुतज्ञानादिप्रदानतः । निर्जरा ज्ञानावरणादिकर्मविनिर्जरणं । श्रुतपर्यवजातं प्रभूता प्रभूततरा श्रुतज्ञानपर्यायवृद्धिः । अव्यव-च्छित्तिस्तीर्थस्य । ये चात्महितोपलंभादय आत्महितोपलंभः परहितोपलंभः उभयहितोपलंभः एकाग्द्रं बहुमानं चेति तद्वा पञ्चकं प्रतिपत्तव्यम् ।।

[भा.१७८३] एवं ठियाण पालो आयरिओ सेस मासियं लहुयं ।
कप्पट्ठिनीलकेसी आयसमुत्था परे उभए ।।

वृ- एवं त्रयोदशदोषविमुक्ते त्रयोदशभिर्गुणैरुपेते क्षेत्रे कारणवसतः त्रयाणां वर्षासु स्थितानां द्वयोर्भिक्षार्थं विनिर्गमे तृतीयः पश्चात्पालो वसतिपालः आचार्यः स्थापनीयः । अथान्यं स्थापयति तत आह-शेषे आचार्यव्यतिरिक्ते वसतिपाले स्थाप्यमाने प्रायश्चित्तं मासिकं लघु । तथा यदि तरुणं श्रमणं वसतिपालं पश्चात् स्थापयति, तत इमे स्वलिङ्गासेवनादिका दोषास्तद्यथा-आत्मसमुत्थाः परे परसमुत्था

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उभयस्मिन् उभयसमुत्थाः । कस्या इवेत्याह-कप्पट्ठिनलिकेसीति कल्पस्थिता बालिका नीलकेशी कृष्णकेशी तरुणीत्यर्थः, ततो विशेषणसमासः, तस्या इव, विभक्तिलोप इवलोपश्च प्राकृतत्वात् । इयमत्र भावना-तरुणी बालिका तरुणानां महतां च प्रार्थनीया भवति । एवं तरुणोऽपि तरुणीनां महतीनां च प्रार्थनीयस्ततस्तस्मिन् पश्चात्स्थाप्यमाने स्वलिङ्गपरलिङ्गगृहिलिङ्गासेवनविषया आत्मसमुत्थाः परसमुत्थाः उभयसमुत्थाश्च मैथुनदोषाः संभवन्ति । एतदेवाह-

[भा.१७८४] तरुणे वसहीपाले कप्पठिसलिंगमादि आउभया ।
दोसा उ पसज्जंती अकप्पिए दोसिसे अन्ने ।।

वृ- तरुणे वसतिपाले सति कप्पट्ठित्ति तरुण्याः बालिकाया इव स्वलिङ्गादिकाः स्वलिङ्गासेवन-गृहिलिङ्गासेवनरुपा आ उभयाइति आत्मसमुत्था उभयसमुत्था उपलक्षणमेतत् परसमुत्थाश्च दोषास्तस्य प्रसजन्ति अकल्पिके च बालादाविमे दोषास्तानेवाह—

[भा.१७८५] बलि धम्मकहा किड्डा पमज्जणा वरिसणा य पाहुडिया ।
खंधार अगनि, भंगे मालतवेना, य नातीय ।।

वृ- साधवः कदाचित्कारणवशतः सप्रावृत्तिकायां वसतौ स्थिता भवेयुः, तत्र यदि बालादिर्वसतिपालः क्रियते तदा बलिदोषः । तथा हि-तत्र बलिकारकाः स्वभावेन वा गच्छेयुः कैतवेन वा, तत्रापि ये कैतवेन ते प्रथमत एवोपकरणहरणबुद्धया, ये तु स्वभावतस्ते नोपकरणहरणनिमित्तमागच्छन्ति । किन्त्वागतानां बलिं कुर्वतां बालमेकाकिनं दृष्ट्वा हरणबुद्धिरुपजायते । ततोऽपहरन्ति । अथवा बलौ विक्षिप्यमाणे उपकरणं कूरेण खरण्टयते । ततो बालो जल्पति बहिरुपकरणं निष्काशयामि । एवमुक्त्वा सकलमप्युपकरणादाय बहिर्निर्गतस्तावदभ्यन्तरे ते उपधिमपहरन्ति । ये तु कैतवेन समागच्छन्ति ते उपधिमपहर्तुकामा ब्रुवते-क्षुल्लक ! बलिरेष समागच्छति ततस्त्वं बहिर्निर्गच्छ । एवं तं बालं बहिर्निष्काश्योपधिमपहरन्ति । अथवा ब्रूयुरिदं वयं बलिं करिष्यामस्ततस्त्वं बहिस्तिष्ठान्यथा कूरेण खरण्टना भविष्यति । एवमुक्ते बहिर्निर्गते बाले उपधिमपहरन्ति । अथवेदमाचक्षेत, उपधिमिभ्यन्तरात् बहिरपनय यावदुलिं वयं विदध्महे । स च बालस्तत्कार्यमजानानः समस्तमुपकरणेकवारं ग्रहीतुमशक्नुवन् स्तोकं गृहीत्वा बहिः संस्थाप्य यावदन्यस्य ग्रहणाय मध्ये प्रविशति तावत्ते धूर्ता अपहरन्ति ।। धम्मकहत्ति धर्मकथाश्रवणाय केचित्स्वभावत आगच्छेयुरपरे कैतवेन समागत्य चेद् ब्रुवते-कतय क्षुल्लकास्माकं धर्मकथां, स च तत्त्वमजानानः कथामारभते । ततः कथाप्रमत्ते केचित्तथैवोपविष्टाः श्रृण्वंत्यपरे तूपधिमपहरन्ति ।। किड्डत्ति क्रीडानिमित्तमपि केचित् स्वबावतः समागच्छत्यपरे कैतवेन । तेषु च समागतेषु स बालकः स एव प्रमार्जने आवर्षणे च वेदितव्यः ।।

पाहुडिया इति प्राभृतिकाभिक्षा अर्छनिका च । तत्र केचित् कैतवेन स्वभावेन वा वदन्ति, क्षुल्लक ! गृहाण भिक्षाम्, अथवा बहिर्निर्याहि यावद्वयमर्चनिकां कुर्मस्ततो यावद्भिक्षार्थं याति बहिर्वा निर्गच्छति तावदपहरन्ति ।। खन्धारत्ति अपरे कैतवेन स्वभावेन वा वदेयुर्यथा एष रात्रा सह स्कन्धावारः समागच्छति । तत्रि यदि स्वभावेन ततो नश्यति, स नश्यन् बालस्तैरपह्रियते । कैतवेन समागचछंतो ब्रुवते, क्षुल्लक! पलायस्व, स्कन्धावारःसमागच्छति, ततः स नश्यति । इते अपहरन्ति ।। अगणित्ति, प्रदीपनं लग्नं परतः स्वभावेन श्रुत्वा स्वयं वावलोक्य स बालक उपधिलोभाद्वा स्वयं वसतेर्वहिर्न निर्गच्छति नापि किञ्चिदुपकरणं निष्काशयति । ततस्तस्य बालकस्योपकरणस्य च विनाशः, यदि उपकरणनिष्काशनाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मध्ये प्रविष्टो, गुप्तः सन्, स बालको दह्येत कैतवेन वा केचित् ब्रूयुर्मन्दभाग्य! नश्य प्रदीपनकं लग्नं वर्त्तते। एवमुक्ते स उपकरणं बहिर्निष्काशयितुमारभते ततोऽपहरन्ति ।।

भङ्गे मालवतेनत्ति मालवा म्लेच्छविशेषाः शरीरापहारिणः, स्तेना उपकरणापहारिणस्तैर्भङ्गे स बालको भयतो जनेन सार्धं नश्यति, न च सारमुपधिं गृह्णाति। यदि वा उपधिप्रतिबद्धः सन् स वसतावेव तिष्ठेत्, ततः स मालवैरपह्रियते स्तेनैर्वा उपकरणमिति। अथवा केचित् कैतवेन ब्रूयुर्मालवाः स्तेना वा क्षुल्लक! समापतितास्तस्मात् पलायस्व जनेन सार्धमिति, एवमुक्ते स बालकस्तत्त्वमजानानो नश्यति, इतरे उपकरणमपहरन्ति ।। नातित्ति ज्ञातयः स्वजनास्ते समागतास्तैरेकाकी दृष्टस्ततो नीयते, अन्ये वोपधिमपहरन्ति। अथवाऽन्येन केनचित् आगच्छन्ति दृष्टाः तेन कथितं क्षुल्लक! तव ज्ञातयः समागच्छन्ति। ततः स पलायते इतरश्चोपकरणमपहरति। अथवा कोऽपि धूर्तः कैतवेन ब्रूयात्, क्षुल्लक! क्व ते निजकाः, क्षुल्लकः प्राह-अमुके ग्रामे नगरे वा, सोऽन्यस्मै कथयति, ततस्तेषां सजातीनां नामचिन्हान्यवगम्य तस्य क्षुल्लकस्य समीपमागत्य भणति-अमुकस्य त्वं निजकः। क्षुल्लकः प्राह-कथं त्वं जानासि। ततः स तन्मातापित्रादीनां नामवर्णादि कथयति। ततः क्षुल्लकस्य प्रत्यय उपजायते, ततो वक्ति सत्यमहं तेषां निजकः। ततो धूर्तो ब्रूते-आगतास्तव निमित्तं, मया अमुकप्रदेशे दृष्टा इति, ततः स पलायते, इतरे ह्रत्युपकरणम्। एवं यथा बालेऽकल्पिके दोषास्तथा अव्यक्ते निद्राप्रमत्ते कथाप्रमत्ते वा कल्पिके वेदितव्याः।

[भा.१७८६] तम्हा पालेइ गुरु पुव्वं काउं सरीरचिंतं तु।
इहरा आउवहीणं विराहधना धरंतरमधरंते ।।

वृ- यतस्तरुणे बालकादौ वाऽकल्पिके वसतिपाले स्थितेऽनन्तरोक्त दोषा आचार्ये तु न भवन्ति, तस्माद्गुरुराचार्यो वसतिं पालयति, कथमिति चेदत आह-पूर्वं शरीरचिन्तां कृत्वा संज्ञाभूमिं गत्वा इत्यर्थः, अय शरीचिन्तां न करोति ततः प्रायश्चित्तं मासलघु, इमे च दोषाः। 'इहरा उ' इत्यादि, इतरथा शरीरचिन्ताया अकरणे यदि संज्ञां धारयति तत आत्मविराधना मरणस्यग्लानत्वस्य चावश्यं तन्निरोधे भावात्। अथ न धारयति किन्तु मात्रके व्युत्सृजति ततः श्राद्धादीनामागतानां गन्धागमन उड्डाहः। अथ बहिर्याति च तत्रोपधेर्विराधना तस्करापहाररूपये चैकाकिनो दोषास्ते च भवन्ति।। एष संस्तरणे विधिरुक्तोऽसंस्तरणे पुनराचार्यो वसतिं प्रलोकमानस्तस्मिन्नेव पाटके प्रत्यासन्नेषु गृहेषु भिक्षार्थं हिण्डते। तथा चाह-

[भा.१७८७] जइ संघाडो तिण्ह विपज्जत्तानेइ तो गुरु न नीति।
अह नवि आणे ताहे वसहिआलोगहिंडणया ।।

वृ- यदि सङ्घाटकः साधुयुग्मं त्रयाणामपिआत्मद्विकस्य गुरोश्चेत्यर्थः पर्याप्तं परिपूर्णमानयति ततो गुरुर्भिक्षार्थं न न्येति निर्गच्छति। अथ नैव त्रयाणां पर्याप्तमानयत्यलाभादशक्तेर्वा, तदा वसतेरालोको यथा भवत्येवमाचार्यस्य प्रत्यसन्नेषु गृहेषु हिण्डनम्।। कियत्पुनस्तत्र गृह्णातीति चेदत आह-

[भा.१७८८] आसन्नेसुं गेण्हइ जत्तियमेत्तेण होइ पज्जत्तं।
जावइए य ऊणं इयराणीयं तु तं गेण्हे ।।

वृ- तस्मिन्नेव पाटके प्रत्यासन्नेषु गृहेषु गृह्णाति तावन्मात्रं यावन्मात्रेण पर्याप्तं परिपूर्णं भवति। अथ तावन्न लभ्यते तर्हि यावता ऊनं तत् तावत् इतराभ्यामानीतं गृह्णाति। न च त्रयोऽपि परिपूर्णं भुञ्जते किं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वल्पं, तथा चाह–

[भा.१७८९] सव्वे वप्पाहारा भवंति गेलन्नमादिदोसभाय ।
एवं जयंति तहियं वासावासे वसंता उ ।।

वृ- ग्लान्यादिदोषभयात्सर्वेऽपि तेऽल्पाहारा भवन्ति । एवं तत्र वर्षावासे वर्षायोग्ये क्षेत्रे वसन्तो यतन्ते ।।

मू. (१०३) से गामंसि वा जाव संनिवेसंसि वा बहूणं आयरियउवज्झायाणं अप्पबिइयाणं बहूण गणावच्छेइयाणं अप्पतइयाणं कप्पइ हेमंतगिम्हासु चरिए अन्नमन्नं निस्साए ।।

मू. (१०४) से गामंसि वा जाव संनिवेसंसि वा बहूणं आयरियउवज्झायाणं अप्पतइयाणं बहूण गणावच्छेइयाणं अप्पचउत्थाणं कप्पइ वासावासं वत्थए अन्नमन्नं निस्साए ।।

वृ- अस्य सूत्रसंबंधमभिधित्सुराह–

[भा.१७९०] इति पत्तेया सुत्ता डिगसुत्ता इमे पुन गुरुणं ।
दुप्पभिई तप्पभिई बहुत्तमिह मग्गणा खेत्ते ।।

वृ- इत्येवमुपदर्शितेन प्रकारेणाष्टौ प्रत्येकानि प्रत्येकभावीनि सूत्राण्युक्तानि, प्रत्येकानन्तरं च समुदाय इतीमे पुनर्द्वे वक्ष्यमाणे पिण्डकसूत्रे, केषां पिण्डक इत्याह-गुरुणामाचार्यादीनां, आचार्यादिसमुदायविषये इत्यर्थः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-सेशब्दोऽथशब्दार्थः, अथ ग्रामे वा यावत्करणात् 'नगरंसि वा पट्टणंसि वा मडंबंसि वा' इत्यादिपरिग्रहः, सन्निवेशे वा बहूनां द्वित्रिप्रभृतीनामाचार्योपाध्यायानामात्मद्वितीयानां बहूनां द्वित्रिप्रभृतीनां गणावच्छेदकानामात्मतृतीयानां हेमन्तग्रीष्मयोश्चरितुं कल्पते, अन्योन्यनिश्रया परस्परोपसम्पदा । अथ ग्रामे वा यावत् सन्निवेशे वा बहूनामाचार्योपाध्यायानामात्मतृतीयानां बहूनां गणावच्छेदकानामात्मचतुर्थानां च वर्षावासं वस्तुं कल्पते, अन्योन्यनिश्रयेत्येष सूत्रसंक्षेपार्थः ।। अत्र बहुत्वव्याख्यानार्थमाह- 'दुप्पभिइ' इत्यादि द्विप्रभृति त्रिप्रभृति वा, अत्र बहुत्वमवगन्तव्यम् । किमर्थमिदं सूत्रमिति चेदुतच्यते-इह मार्गणा क्षेत्रे कर्तव्येत्येतदर्थ एकस्मिन् क्षेत्रे च स्थितानां कस्य क्षेत्रमाभवति कस्य नेति चिन्तायां ये परस्परनिश्रया समाप्तकल्पा वर्तन्ते, तेषामाभवत्यन्येषां नेत्येवमर्थमित्यर्थः ।। एतदेवाक्षेपपुरस्सरमाह-

[भा.१७९१] हेट्ठा दोण्ह विहारो, भणितो किं पुन इदानि बहुयाणं ।
एगक्खित्तठियाणं तु, मग्गणा खेत्त अक्खेत्ते ।।

वृ- ऋतुबद्धे काले द्वयोर्विहारोऽधस्तात्पूर्वं द्वितीयसूत्रे, उपलक्षणमेतत्, वर्षासु षष्ठसूत्रेण त्रयाणां, ततस्तेनैवेदं गतार्थं, किमर्थं पुनरिदानीं बहुकानामाचार्यादीनां सूत्रम् ? । सूरिराह-एकक्षेत्रस्थितानां मार्गणा कर्त्तव्या कस्य क्षेत्रं भवति, कस्याक्षेत्रं कस्य नाभवति क्षेत्रमित्यर्थः तत्र परस्परोपसम्पदा समाप्तकल्पभूतानां भवत्यन्येषां न भवत्येवमर्थम् । तथा चैतदेव निर्युक्तिकृत्सविस्तरमाह-

[भा.१७९२] उउबद्धे समत्ताणं उग्गहो एगदुगपिंडियाणं पि ।
साहारणपत्तेगे संकमति पडिच्छए पुच्छा ।।

वृ- पञ्च जनाः समाप्तकल्पाः, ऊना असमाप्तकल्पाः; ऋतुबद्धे काले बहूनामाचार्याणां परस्परोपसम्पदा समाप्तकल्पानामेकद्विकपिण्डितानामपि । पञ्चाप्येकका: सन्तः पिण्डिता एकपिण्डिताः, अथवा द्विकेन वर्गद्वयेन, एक एकाकी एकश्चतुर्वर्गः, अथवा एको द्विवर्गोऽपरस्त्रिवर्ग इत्येवंरूपेण पिण्डिता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विकपिण्डिताः तेषामेकद्विकपिण्डितानामापिशब्दात्त्रिवर्गपिण्डितानां चतुर्वर्गपिण्डितानामपि । तत्र त्रिवर्गपिण्डिता द्वावेकाकिनावेकस्त्रिवर्गः, चतुर्वर्गपिण्डितास्त्रय एकाकिन एको द्विवर्गः, अवग्रह आभवति न शेषाणामसमाप्कल्पस्थितानाम् । यदि पुनर्द्वौ गच्छौ समाप्तकल्पावेकत्र क्षेत्रे समकं स्थितौ स्याताम्, तदा तत्क्षेत्रमाभवतिद्वयोरपि द्वयोः साधारणम् । तच्च साधारणं क्षेत्रं तेषां समाप्तकल्पतया प्रत्येकं स्थितानां मध्ये ये सूत्रार्थनिमित्तं यानुपसम्पद्यंते तत उत्तीर्य तेषामुपसम्पद्विषयाणामाभाव्यतया संक्रामति, तथा चाह-साधारणं क्षेत्रं प्रत्येकं व्यवस्थितमपि प्रतीच्छ्के प्रतीच्छकादुत्तीर्य तेषां संक्रामति । ते हि प्रतीच्छकास्तन्निश्रामुपपन्नास्ततस्तेषां क्षेत्रमितरेषां सङ्क्रामति । अथ प्रतीच्छका नोपसम्पद्यन्ते, केवलं 'पुच्छत्ति' पृच्छामात्रं सूत्रार्थविषयः क्रियते । तदा 'पुच्छाहिति' इत्यादिना मार्गणा कर्तव्या ।।

अत्रैव विशेषमाह-

[भा. १७९३] अप्पबितियप्पतईय द्वियाण खेत्तेसु दोसु दोण्हं तु ।
उउबद्धे होइ खेत्तं, गमनागमनं जतो अत्थि ।।

वृ- एकस्मिन् क्षेत्रे एक आचार्य उपाध्यायो वा आत्मद्वितीयः स्थितोऽपरस्मिन् क्षेत्रेऽपर आचार्य उपाध्यायो गणावच्छेदको वा (वात्म) तृतीयस्थितः, केवलं परस्परमुपसंपदा, ततस्तयोर्द्वयोः क्षेत्रयोरात्मद्वितीयात्मतृतीयस्थितयोऋतुबद्धे काले तदुभयमपि क्षेत्रमाभाव्यं भवति कुत इत्याह-गमनागमनं यतःपरस्परमस्ति परस्परोपससम्पन्नत्वादतः समाप्तकल्पतया भवत्याभाव्यमिति ।।

सम्प्रति यैः कारणैरुपसम्पद्यते तान्याह-

[भा. १७९४] खेत्तनिमित्तं सुहदुक्खतो व सुत्तत्थकारमे वावि ।
असमत्ते उवसंपद्य संमत्ते सुहदुक्खयं मोत्तुं ।।

वृ- असमाप्तस्यासमाप्तकल्पस्योपसम्पद्भवति क्षेत्रनिमित्तं सुखदुःखहेतोर्वा सूत्रार्थकारणाद्वा । किमुक्त भवति । अन्यत् तादृशं क्षेत्रं न विद्यते, यदि वा असमाप्तकल्पतया विहरतां दुःखं, समाप्तकल्पस्य पुनरुपसंपदि, सुखदुःखतां मुक्त्वा, शेषाणि कारणानि दृष्टव्यानि, समाप्तकल्पा अन्यक्षेत्रं तादृशं नास्तीति क्षेत्रनिमित्तं सूत्रनिमित्तं तदुभयनिमित्तं वान्यत् गच्छान्तरमुपसंपद्यंते, न सुखदुःखहेतोः, समाप्तकल्पतया तेषां विहरणे दुःखाभावादिति भावः ।। अथ ते कथमेकाकिनोऽसमाप्ता वा जाता इत्यत आह-

[भा. १७९५] पडिभग्गेसु मएसु व असिवादीकारणेसु फिडिया वा ।
एएण तु एगागी असमत्ता वा भवे थेरा ।।

वृ- शेषेषु साधुषु व्रतात्प्रतिभग्नेषु मृतेषु वा, अथवा, अशिवादिभिः कारणैः स्फिटिताः परस्परं वित्रुटिताः, एतेन स्थविरा एकाकिनोऽसमाप्ता वा भवेयुः ।।

साम्प्रतमेगदुगपिंडियाणं पि, इत्यस्य व्याख्यानार्थमाह-

[भा. १७९६] एगदुगपिंडिया वि हु लभंति अन्नोन्ननिस्सिया खेत्तं ।
असमत्ता बहुया वि हु न लभंति अनिस्सिया खेत्तं ।।

वृ- एकका: पिण्डिता एकपिण्डिताः, द्विकेन वर्गद्वयेन पिण्डिताः, अपिशब्दात्त्रिकपिण्डिताश्चतुष्क पिण्डिताश्च । अमीषां भावना प्रागेवोक्ता, हु निश्चितम्, अन्योन्यनिश्रिताः परस्परमुपसम्पन्ना लभन्ते क्षेत्रं, ये पुनः असमाप्ताः परस्परोपसम्पद्ग्रहणाभावतोऽसमाप्तकल्पास्तिष्ठन्ति, ते परस्परमनिश्रिताः, निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शनमिति न्यायादत्र हेतौ प्रथमा । ततोऽयमर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परमनिश्रितत्वात् बहुका अपि सन्तो हु निश्चितं न लभन्ते क्षेत्रं, समाप्तकल्पानामेव क्षेत्रस्याभावना, तथापूर्वाचार्यकृतस्थितिः ।।

[भा.१७९७] जइ पुन समत्तकप्पो दुहा ठितो तत्थ होज्ज चउरन्ने ।
चउरो वि अप्पभूते लभंति, दो ते इतरनिस्सा ।।

वृ- यदि पुनः समाप्तकल्पः पञ्चजनात्मको वसतेः सङ्कटतादोषेणैकस्मिन् क्षेत्रे द्विधा स्थितः, एकस्यां वसतौ द्वौ जनावपरस्यां त्रयस्तथास्मिन् क्षेत्रेऽन्यस्यां वसतावन्ये चत्वारो जनाः स्थिता भवेयुः, तथापि चत्वारोऽपि तस्य क्षेत्रस्याप्रभवो, न तेषां तत् क्षेत्रमाभाव्यं भवति । यौ पुनर्द्वौतौ तत्क्षेत्रं लभेते ।। कुत इत्याह-इतरनिश्रौ, अत्रापि हेतौ प्रथमा, यतस्तावितरत्रयनिश्रावंतः समाप्तकल्पत्वाल्लभंते ।।

अथ कस्मादसमाप्तकल्पानामेकाकिनां चाभाव्यं क्षेत्रं न भवति, तत आह-

[भा.१७९८] एगागिस्स उ दोसा असमत्ताणं च तेन थेरेहिं ।
एस ठविया उ मेरा इति वि हु मा होज्ज एगागी ।।

वृ- यत एकाकिनः सतोऽसमाप्तानां चासमाप्तकल्पानां च दोषा भूयांसस्तेन कारणेन स्थविरैरेषा मर्यादा स्थापिता इत्यपि खलु कारणात् क्षेत्रानाभवनलक्षणात् एकानिऽसमाप्तकल्पा वा मा भूवन्निति ।

सम्प्रति साहरणपतेगे इत्यादि व्याख्यानयति-

[भा.१७९९] दोमादि ठिया साहारणम्मि सुत्तत्थकारणा एक्के ।
जति तं उवसंपज्जे, पुव्वठिया वि संकंतं ।।

वृ- द्वयादयो द्विप्रभृतयो गच्छाः समाप्तकल्पाः समकमेकस्मिन् क्षेत्रे स्थितास्तेषां तत् क्षेत्रमाभाव्यतया साधारणम्, तस्मिन् साधारणे क्षेत्रे स्थिताः सन्तो यदि तमेकं गच्छमन्ये सूत्रार्थकारणादुपसम्पद्यंते, अथवा ये पूर्व समाप्तकल्पतया स्थितास्तेषामाभवति तत्क्षेत्रं, न पश्चादागतानां समाप्तकल्पानामपि, परं ते पूर्वस्थिता अपि यदि पश्चादागतं गच्छं सूत्रार्थकारणादुपसम्पद्यन्ते, तर्हि यस्य समीपमुपसम्पद्यन्ते तस्य तत्क्षेत्रं संक्रान्तं तस्य तदा भवति, नान्येषामिति भावः । ते हि तस्य प्रतीच्छकीभूताः, तेन तेषां क्षेत्रमितरस्य संक्रामतीति ।।

अथ नोपसम्पद्यंते किन्तुं सूत्रमर्थ वा पृच्छन्ति, तत्राह-

[भा.१८००] पुच्छाहि तीहि दिवसं, सत्तहि पुच्छाहि मासियं हरति ।
अवखेत्तुवस्सए पुच्छमाणे दूरावलिय मासो ।।

वृ-तिसृभिः पृच्छाभिः कृताभिः पृच्छ्यमानः परिपूर्ण दिवसं यावत्क्षेत्रगतं सचित्तादि हरति गृह्णाति, त्रिपृच्छादानतस्तस्य क्षेत्रस्यैकं दिवसं यावत्तदाभवनात्, सप्तभिः पृच्छाभिर्मासिकं हरति, किमुक्तं भवति ? सप्तपृच्छासु कृतासु पृच्छ्यमानः परिपूर्णमासं यावत्तत् क्षेत्रगणंसचिताादि लभते मासं यावत्तस्य क्षेत्रस्य तदाभवनादिति । 'अवखेत्तुवस्सए' इति अक्षेत्रे स्थितानामुपाश्रये उपाश्रयविशेषा मार्गणा कर्तव्या, सा चाग्रे करिष्यते । तथा यदि पृच्छ्यमान आत्मीयमुपाश्रयं, दुरमुपलक्षणमेतत् आसन्नं वा, आवलिकाप्रविष्मुपलक्षणमेतत्, मण्डलिकं वा पुष्पावकीर्णं वा कथयति, तदातस्मिन् प्रायश्चित्तं मासो लघुकस्तं च पृच्छन्तं न लभंत एष संक्षेपार्थो व्यासार्थोऽग्रे कथयिष्यते ।।

अक्षेत्रे उपाश्रयस्य मार्गणा कर्तव्येत्युक्तं तत्र तावदक्षेत्रमाह-

[भा.१८०१] ण्हाणानुजाण अद्धाणसीसए कुलगणे चउक्के य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गामाइवानमंतरमहे य उज्जानमादीसु ।।

[भा.१८०२] इंदक्कील मनोग्गाहो जत्थ राया जहिं व पंच इमे ।

अमच्च पुरोहित सेठी सेनावइ सत्थवाहो य ।।

वृ- स्नानमर्हतः प्रतिमानां तन्निमित्तमेकत्रमिलितानां, अनुयानं रथयात्रा तन्निमित्तं मिलितानां, अथवा अध्वशीर्षकं यतः परं समुदायेन सार्थेन सह गन्तव्यं सम्यग् मार्गाविहनात् तत्र मिलितानां, कुलत्ति कुलसमवायमिलितानां, गणत्ति गणसमवायमिलितानां चतुष्कं सङ्घः तत्समवायमिलितानां, गामाइ इत्यादि ग्राममहे वा, आदिशब्दान्नगरादिमहे वा, वानमन्तरमहे वा उद्यानमहे वा आदिशब्दात्तडागादिमहेषु वा, इन्द्रकीलकमहे वा, यत्र च सकलजनमनोग्राहो राजा, यत्र वा इमे अमात्यपुरोहितश्रेष्ठि-सेनापतिसार्थवाहाः पञ्च गता वर्तन्ते । तत्र कथमपि गताः समकं स्थिताः तर्हि साधारणवसतिः, । अथ विषमं स्थितास्तर्हि ये पूर्वं स्थितास्तेषां वसतिराभवति नेतरेषां पश्चादागतानां । तस्यां च वसतौ यः शिष्यः शिष्यतया उपतिठति तं वसतिस्वामिनो लभन्ते नेतरे ।।

'पुच्छमाणे दूरावलिय मासो' इत्यस्य व्याख्यानार्थमाह-

[भा.१८०३] पुप्फावकिन्न मंडलियावलिय उवस्सया भवे तिविहा ।

जो अब्भासे तस्स उ दूरे कहंतो न लभे मासो ।।

वृ- क्वचिद् ग्रामे नगरे वा साधवः पृथग् उपाश्रये स्थिताः ते चोपाश्रयाः त्रिविधा भवेयुः- पुष्पावकीर्णकाः, मण्डलिकावद्धा आवलिकास्थिता वा स्थापना एतेषामुपाश्रयाणां मध्ये कुतश्चिदेकतरस्मादुपाश्रयाद्विचारादिनिमित्तं कोऽपि निर्गतस्तं दृष्ट्वा कोऽपि प्रव्रजिषुः पृच्छेत् । यथा कुत्र साधूनां वसतिरिति । स ब्रूते-किंकारणं त्वं पृच्छसि ? । शिष्यः प्राह-प्रव्रजिष्यामीति । तत्र यदि स एवं पृष्टः सन् 'दूरे कहन्तो न लभे मासो' इति आत्मयिमुपाश्रयं दूरमासन्नं वा कथयति तर्हि तस्य प्रायश्चित्तं लघुको मासो, न च तं शिष्यं लभते, कस्य पुनः स आभवतीति चेत् तत आह-योऽभ्यासे तस्य, किमुक्तं भवति तस्मादवकाशात् यस्य प्रत्यासन्नतर उपाश्रयस्तस्याभवति ।।

[भा.१८०४] किह पुन साहेयव्वा उद्दिसियव्वा जहक्कमं सव्वे ।

अह पुच्छइ संविग्गे तत्थ व सव्वे व अद्धावा ।।

वृ- कथं पुनः कथयितव्या उपाश्रयाः । सूरिराह-उद्देष्टव्या यथाक्रमं सर्वे यथा अमुकस्यामुकपदेशे । एवं कथिते यत्र व्रजति तस्य स आभवति । अथ स पृच्छति संविग्रान् बहुश्रुततरान् तपस्वितरांश्चेत्यर्थः । तत्र यथाभावमाख्यातव्यं, वितथाख्याने मासलघु, न च स तं लभते । किन्तु ये तपस्वितरा बहुश्रुततराश्च तेषां स आभवति । अथ सर्वे अर्धा वा संविग्नास्ततस्तथैवाख्याने यत्र स व्रजति तस्य स आभवति, न शेषस्येति । एतदेव सविशेषमाह-

[भा.१८०५] मुत्तूण असंविग्गे जे जहियं ते साहती सव्वे ।

सिट्ठम्मि जेसि पासं, गच्छति तेसिं न अन्नेसिं ।।

वृ- इह ये पार्श्वस्थादयोऽसंविग्नास्ते यदि पृच्छ्यन्ते, तदा तेन कथनीयास्तान् मुक्त्वा शेषेषु पृष्टेषु ये यत्र विद्यन्ते तात् तत्र सर्वान् कथयति । शिष्टे च कथिते च सति येषां पार्श्वं गच्छति तेषामाभवति नान्येषाम् ।।

[भा.१८०६] नियल्लगाणं व भया हिरिवत्ति यसंजमाहिगारे वा ।

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

एमेव देसरज्जे गामेसु व पुच्छकहणं तु ।।

वृ- इह कोऽपि तस्मिन् ग्रामे नगरे देशे राज्ये वा न प्रव्रजति, किं कारणमिति चेदुच्यते, निजकानां स्वज्ञातीयानां भयात्, मा निजका उत्प्रव्राजयेयुः, प्रव्रजन्तं वा मा रुन्ध्युरिति । यदि वा तेषां निजकानां समक्षं लज्जते, ततो हीनो, वाऽथवाऽसंयमाधिकारः असंयमाधिकारणं तद् ग्रामादि अप्कायादि-प्रचुरत्वात् । ततोऽन्यद् ग्रामादिकं गन्तुमनास्तथैव विचारादिगतं पृच्छेत्, यथा कस्मिन् ग्रामे नगरे देशे राज्ये वा साधव एवमन्यस्मिन् देशे राज्ये ग्रामेषु वा पृच्छायामेवं पूर्वोक्तेनैव प्रकारेण यथाभावं कथनं कर्तव्यं । किमुक्तं भवति-यथा त्रिविधेषूपाश्रयेषु आसन्नदूरतपस्विबहुश्रुतानां पृच्छायां व्याकरणमनाभाव्यमाभाव्यं च वर्णितं तथात्रापि द्रष्टव्यम् । तद्यथा यद्यथा ग्रामादिकं पृष्टं ततया कथनीयं वितथाख्याने तस्य प्रायश्चित्तं मासलघु । तत्र च गतो येषां समीपमुपगच्छति स तेषामाभवति ।।

[भा.१८०७] अहवा वि अन्नदेसं संपट्ठियगं तगं मुणेऊण ।
माया-नियडि-पहाणो, विप्परिणामो इमेहिं तु ।।

वृ- अथेति प्रकारान्तरे । तच्च प्रकारान्तरं विपरिणामविषमं वक्ष्यमाणरीत्या द्रष्टव्यं विचारादिविनिर्गतं साधुं दृष्ट्वा कोऽपि परेण आदरेण वन्दते, तं च तथा वन्दमानं पृच्छति कुतस्त्वं ? कुत्र वा सम्प्रस्थित इति स प्राह-अमुकं देशं सम्प्रस्थितस्तत्र गत्वा प्रव्रजिष्यामि । तत एवमन्यदेशं सम्प्रस्थितं तं ज्ञात्वा, माया परवञ्चनाभिपायो निकृतिराकारवचनाच्छादनं यथा कूटाख्यातृत्वेन नंक्ष्यते, मायानिकृती प्रधाने यस्य स तथा, एभिर्वक्ष्यमाणैश्चैत्यादिभिर्विपरिणामयति ।। तान्येव विपरिणामस्थानानि चैत्यादीनि दर्शयति-

[भा.१८०८] चेइय साहू वसही, वेज्जा व न संति तम्मि देसम्मि ।
पडिनीय सन्नि साणी, वियारक्खेत्ता अहिगमग्गो ।।

वृ- यत्र त्वया गन्तव्यं तस्मिन् देशे चैत्यानि, यदि वा साधवो, ऽथवा वसतयो, यदा वैद्या । न सन्ति; तथा बहवस्तत्र प्रत्यनीकाः, न च दानादिप्रधानानि संज्ञिकुलानि, श्वानः प्रभूता, न च तत्र विचारभूमिः, सर्वत्र पानीयाकुलत्वात्, नापि तत्र विहारयोग्यानि क्षेत्राणि, अधिकश्च भूयान्मार्गः पन्था, एतैः प्रकारैर्विपरिणामयति ।। तत्र प्रथमतश्चैत्यमधिकृत्याह-

[भा.१८०९] वंदन पुच्छाकहणं अमुगं देसं वयामि पव्वइउं ।
नत्थि तहिं चेइयाइं दंसणसोही जतो होइ ।।

वृ- परया भक्त्या विचारादिनिर्गतस्य साधोर्वन्दनं ततः पृच्छा कुत्र गन्तव्यम् । तदनन्तरं तस्य कथनममुकंदेशं व्रजामि प्रव्रजितुमिति । एवमुक्ते स प्राह-न सन्ति तत्र चैत्यानि । यतो येभ्यो दर्शनशोधिः सम्यग्दर्शननिर्मलता भवति ।। कथं तेभ्यो दर्शनशोधिरित्यत आह-

[भा.१८१०] पूयाउ दट्ठुं जगबंधवाणं साहू विचित्ता समुवेंति तत्थ ।
चागं च दट्ठूण उवासगाणं, सेहस्स वि थिरइ धम्मसद्धा ।

वृ- जगद्बान्धवानां पूजां द्रष्टुं तत्र तेषु चैत्येषु साधवो विचित्रा भव्या भव्यतराः समुपयन्ति, मूर्तिं दृष्ट्वा देशनां वा समाकर्ण्य तथा उपासकानां स्नानविलेपनादिषु त्यागं च वित्तत्यागं दृष्ट्वा आस्तामन्येषां शुभपरिणामोल्लासः शैक्षस्यापि धर्मश्रद्धा स्थिरति स्थिरीभवतीत्यर्थः । चैत्यानि तु तत्र न विद्यन्ते ततः ततः किं तत्र गत्वा त्वया कार्यमिति।। साधुद्वारमाह-

[भा.१८११] न संति साहू तहियं विवित्ता, उसन्नकिन्नो खलु सो कुदेसो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संसग्गिहज्जंमि इमंमि लोए, सा भावना तुज्झ वि मा हवेज्जा ।।

वृ- न सन्ति तत्र साधवो विविक्ता एकान्तसंविग्नाः, किन्तु अवसन्नकीर्णोऽवसन्नव्याप्तः खलु स कुदेशः, अयं च लोकः संसर्गिहार्यः संसर्ग्याह्रियते, संसर्ग्यनुयायी भवति तथा स्वाभाव्यात् । ततः संसर्गिहार्येऽस्मिन् लोके वर्तमानस्य तवापि सा अवसन्नभावना मा भूदिति तत्र न गन्तव्यम् शय्याद्वारमाह-

[भा.१८१२] सेज्जा न संति अहवेसणिज्जा, इत्थी पसुंपंडगमादिकिन्ना ।
आउत्थमादीसु य तासु निच्चं, ठायंतयाणं चरणं न सुज्झे ।।

तत्र शय्या न सन्ति, अथवा एषणीया न विद्यन्ते, यदि परमात्मकृताः स्युर्यदिं वा स्त्रीपशुपंडकाद्याकीर्णाः सन्ति, तासु चात्मोत्यादिषु आत्मकृतादिषु नित्यं सर्वकालं तिष्ठतां चरणं न शुध्यति चारित्रशुद्धिर्नोपजायते ।। वैद्यादिद्वारचतुष्टयमाह-

[भा.१८१३] वेज्जा तहिं नत्थि तहोसहाइं, लोगो य पाएण सपच्चणीओ ।
दानाइ सन्नी य तहिं न संति, साणेहिं किन्नो सह लूसएहिं ।।

वृ- तत्र वैद्यास्तथा औषधानि च न सन्ति लोकश्च प्रायेण तत्र सप्रत्यनीकः दानादिप्रधानाश्च संज्ञिनः श्रावकास्तत्र न सन्ति तथा श्वभिः स लूषकैश्चौरैः कीर्णो व्याप्तः ।

विहारक्षेत्रद्वारे आह-

[भा.१८१४] अनूवेसंमि वियारभूमी विहारखेत्ताणि य तत्थ नत्थी ।
साहूसु आसन्नट्ठिएसु तुज्झं, को दूरमग्गेण मडप्फरो ते ।।

वृ- यत्र त्वया गन्तव्यम् तस्मिन् अनूपदेशे सजले देशे विचारभूमिर्नास्ति, नापि तत्र सन्ति विहारयोग्यानि क्षेत्राणि, अन्यच्च साधुष्वासन्नस्थितेषु तव को दूरमार्गेण मडप्फप्परो गमनोत्साहः ।। तदेवमृतुबद्धकालविषयं सूत्रं भावितम् । अधुना वर्षावासविषयं भावयति-

[भा.१८१५] वासासुं अमणुन्ना असमत्ता जे ठिया भवे वीसुं ।
तेसिं न होइ खेत्तं अह पुन समनुन्नय करेंति ।।

[भा.१८१६] तो तेसि होंति खेत्तं, को उ पभू तेसि जो उ रायणिओ ।
लाभो पुन जो तत्था सो सव्वेसिं तु सामन्नो ।।

वृ- वर्षासु वर्षाकाले ये अमनोज्ञाः परस्परोपसम्भद्विकला असमाप्ता आभाव्यमसमाप्तकल्पत्वात् । अथ पुनः सुखदुःखादिनिमित्तं समनोज्ञतां परस्परोपसम्पदं कुर्वन्ति, ततो भवति तेषामाभाव्यं क्षेत्रं परस्परोपसम्पदा समाप्तकल्पीभूतत्वात् । अथ तेषां कः प्रभुः ? उच्यते,यो रत्निको रत्नाधिको यस्य पर्यायाधिकतया वन्दनादीनि क्रियन्ते स तेषां प्रभुः, लाभः पुनर्यस्तत्र भवति स सर्वेषां सामान्यः साधारणः सर्वेषामप्याचार्यत्वादुपाध्यायत्वाद्वा ।।

[भा.१८१७] अहव जइ वीसु वीसं ठियासु असमत्तकप्पिया हुज्जा ।
अन्नो समत्तकप्पी एज्जाही तस्स तं खेत्तं ।।

वृ- अथवा असमाप्तकल्पिका यदि विष्वक् विष्वक् स्थिता भवेयुः, अन्यः समाप्तकल्पी समाप्तकल्पोपेतः पश्चादागच्छेत् तस्य तदा भवति क्षेत्रम्, नेतरेषां पूर्वस्थितानामपि असमाप्त-कल्पत्वात् ।।

[भा.१८१८] अहवा दोन्नि व तिन्नि व समगं पत्ता समत्तकप्पीओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वेसिं तु तेसिं तं खेत्तं होइ साहरणं ।।

वृ- अथवा द्वौ वा त्रयो वा गच्छाः सासकल्पिनः पृथक् पृथक् कल्पोपेताः समकं प्राप्ताः ततस्तेषां सर्वेषामपि तत्क्षेत्रमाभाव्यतया साधारणं भवति ।।

[भा.१८१९] अपुन्नकप्पो व दुवे तओ वा, जं काल कुज्ञा समणुन्नयं तु ।
तक्कालपत्तो य समत्तकप्पो, साहारणं तं पि हु तेसि खेत्तं ।।

वृ- असमाप्तकल्पा अपूर्णकल्पा पूर्वम् द्वौ त्रयोवा गच्छाः स्थिता न च परस्परमुपसम्पद् गृहीताः । पश्चात् च्च सूत्रार्थादिनिमित्तमुपसम्पद् गृहीतुमारब्धाः । ते च यत्कालं यस्मिन् काले समनोज्ञतां परस्परमुपसम्पदं कुर्युः कुर्वन्ति तत्कालप्रास्तस्मिन् काले प्राप्तोऽन्यः समाप्तकल्पस्तेषामपि तत् क्षेत्रं भवति साधारणम्, परस्परोपसम्पद्ग्रहणवेलायामेव समाप्तकल्पस्यापि प्राप्तत्वात् ।। संप्रति परस्परोपसम्पन्नानां साधारणावग्रहावस्थितानां सूत्रमर्थं वाधिकृत्य य आभवनविशेषस्तमभिधित्सुराह-

[भा.१८२०] साहारणट्ठियाणं जो भासति तस्स तं हवति खेत्तं ।
वारगतदिन पोरिसि मुहुत्त भासेउ जो ताहे ।।

वृ- साधारणस्थितानां साधारणावग्रहावस्थितानां मध्ये यः सूत्रमर्थं वा भाषते तस्य तद्भवति क्षेत्रं न शेषाणाम् । अथ ते वारवारेण भाषन्ते ततः आह-यो यदा वारकेणं दिनं पौरुषां मुहूर्तं वा भाषते, तस्य तावन्तं कालमाभाव्यम्, न शेषकालम् । इयमत्र भावना-यो यति दिवसान् भाषते, तस्य तति दिवसानाभाव्यम्, अथवा प्रतिदिवसं यो यति पौरुषीर्भाषते तस्य तति पौरुषीरवग्रहो, यदि वा यो यति मुहूर्तान् भाषते, तस्य तावत्कालमवग्रहो न शेषकालमपीति ।।

[भा.१८२१] आवलिया मंडलिवा, घोडगकंडूइवए व भासेज्जा ।
सुत्तं भासति सामाइयादि जा अड्डसीतिं तु ।।

वृ- इह सूत्रस्यार्थस्य वा भाषणे त्रयः प्रकाराः, तद्यथा-आवलिकया मण्डल्या घोटककण्डूयितेन च, तत्र या विच्छिन्ना एकान्ते भवति मण्डली सा आवलिका, या पुनः स्वस्थान एव सा मण्डली, घोटककण्डूयितं नाम यद्वारंवारेण परस्परं प्रच्छनं तत् घोटकयोः परस्परं कण्डूयितमिव घोटककण्डूयितम्, ततः सूत्रमर्थं वा भाषते । आवलिकया मण्डलीकया घोटककण्डूयितेन वा । तत्र सूत्रं भाषते सामायिकादि तावत् यावत् दृष्टिवादगतानि अष्टाशीति सूत्राणि । पूर्वेषु तु विशेषो वक्तव्य इति तदनुपादानम् । सम्प्रति यथोक्तप्रमाणमावश्यकमधीते, आवश्यकवाचनाचार्यः पुनरावश्यकप्रतिप्रच्छकस्य समीपे दशवैकालिकमधीते दशवैकानिकवाचनार्यस्याभवति क्षेत्रम्, तथा एकस्य पार्श्वे दशवैकालिकमधीते दशवैकालिकवाचनाचार्यः पुनर्दशवैकालिकप्रतिप्रच्छकस्य पार्श्वे उत्तराध्ययनान्यधीते, उत्तराध्ययनवाचनाचार्यस्याभाव्यं क्षेत्रम् । एवं यथोत्तरं तावद्भावनीयं यावदष्टाशीति सूत्राणि ।।

[भा.१८२२] सुत्ते जुहत्तरं खलु, बलिया जा होति दिट्ठिवातोत्ति ।
अत्थे वि होइ एवं छेअसुअत्थं नवरि मुत्तुं ।।

वृ- यथा सूत्रे यथोत्तरं बलिष्ठतोक्ता, एवमर्थेऽपि भावनीया, तद्यथा-एक एकस्य पार्श्वे आवश्यकार्थमधीते, आवश्यकार्थवाचनाचार्यः पुनरावश्यकार्थप्रतिप्रच्छकस्य समीपे दशवैकालिकार्थमधीते दशवैकालिकार्थवाचनाचार्य स्यामाभाव्यं तत् क्षेत्रम्, एवं तावद्वाच्यं यावदष्टाशीतिसूत्रार्थः । नवरं च्छेदसूत्रार्थ मुक्त्वा । अर्थाचार्याणामुपरिच्छेदसूत्रार्थाचार्यो वक्तव्यः । तद्यथा एक एकस्य पार्श्वे दृष्टि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वादगतानामष्टाशीतिं सूत्राणामर्थमधीते, अष्टाशीतिसूत्रार्थवाचनाचार्यः पुनरष्टाशीतिसूत्रार्थ-प्रतिप्रच्छकस्य समीपे च्छेदसूत्रार्थमधीते च्छेदसूत्रार्थवाचनाचार्यस्याभाव्यं तत् क्षेत्रम् ।

[भा.१८२३] एमेव मीसगंमि वि, सुत्तत्तो बलवगो पगासो उ ।
पुव्वगयं खलु बलियं, हेट्ठिलत्था किमु सुयातो ।।

वृ- एवमेवानेनैव प्रकारेण मिश्रकेऽपि सूत्रार्थरुपोभयस्मिन्नपि वक्तव्यम्, सर्वत्र सूत्राद् बलवान् प्रकाशोऽर्थस्य प्रकाशकः । तद्यथा-एक एकस्य पार्श्वे आवश्यकसूत्रमधीते, तस्य समीपे पुनः सुत्रवाचनाचार्य आवश्यकस्यार्थमधीते, आवश्यकार्थवाचनाचार्यस्याभवति तत्क्षेत्रम्, एवं तावद्भावनीयं यावदष्टाशीतिसूत्रार्थवाचनाचार्यः । सर्वत्राधस्तात्सूत्रादर्थाद्वा पूर्वगतं बलीयस्तथा चाह-पुव्वगयमित्यादि, यदि पूर्वगतं सूत्रं खलु अधस्तनादर्थाद्भवति बलवत् किमङ्गसूत्रात्, सुतरामधस्तनात्सूत्राद्बलीय इत्यर्थः । तद्यथा-एक एकस्य पार्श्वे आवश्यकस्य सूत्रमर्थं तदुभयं वाधीते, तस्य समीपे पुनरावश्यकसूत्रार्थतदुभयवाचनाचार्यः पूर्वगतं सूत्रमधीते आवश्यकसूत्रादि-प्रतीच्छकस्याभवति । एवं तावद्वाच्यं यावदष्टाशीति सूत्राणि पूर्वगतसूत्राच्च पूर्वगतार्थो बलीयान्, तत एक एकस्य पार्श्वे पूर्वगतसूत्रमधीते तस्य समीपे पूर्वगतसूत्रवाचनाचार्यः पूर्वगतमर्थं पूर्वगतसूत्र-प्रतीच्छकस्याभवति ।। अथ किं कारणं शेषात् सूत्रादर्थात्पूर्वगतं सूत्रं बलीयस्तत आह-

[भा.१८२४] परिकम्मेहि य अत्था सुत्तेहिव जे य सूईया तेसिं ।
होइ विभासा उवरिं पुव्वगयं तेन बलियं तु ।।

वृ- दृष्टिवादः पञ्चप्रस्थानः, तद्यथा-परिकर्माणि सूत्राणि पूर्वगतमनुयोगश्चूलिकाश्च । तत्र ये परिकर्मभिः सिद्धश्रेणिकाप्रभृतिभिः सूत्रैश्चाष्टाशीतिसंख्यैरर्थाः सूचितास्तेषां सर्वेषामप्यन्येषां च उपरि पूर्वेषु विभाषा भवति, अनेकप्रकारं ते तत्र भाष्यन्ते इत्यर्थः । तेन कारणेन पूर्वगतसूत्रं बलिकम् ।। सम्प्रति येन कारणेन सूत्रादर्थो बलीयान्, तदभिधित्सुराह-

[भा.१८२५] तित्थगरत्थाणं खलु अत्थो, सुत्तं तु गणहरत्थाणं ।
अत्थेन य वंजिज्जइ सुत्तं तम्हाउ सो बलवं ।।

वृ- अर्थः खलु तीर्थकरस्थानं तस्य तेनाभिहितत्वात्, सूत्रं तु गणधरस्थानं तस्य तैर्दब्धत्वात्, अर्थेन च यस्मात्सूत्रं व्यज्यते प्रकटीक्रियते, तस्मात्सोऽर्थः सूत्राद् बलवान् ।।

अथ कस्मात् शेषार्थेभ्यः च्छेदसूत्रार्थो बलीयानित्यत आह-

[भा.१८२६] जम्हा उ होइ सोही, च्छेयसुयत्थेण खलियचरणस्स ।
तम्हा च्छेयसुयत्थो बलवं मोत्तूण पुव्वगयं ।।

वृ- यस्मात् स्खलितचरणस्य स्खलितचारित्रस्य च्छेदश्रुतार्थेन शोधिर्भवति, तस्मात्पूर्वगतमर्थं मुक्त्वा शेषात्सर्वस्मादप्यर्थात् च्छेदश्रुतार्थो बलवान् ।।

तदेवमावलिकामधिकृत्योक्तम् अधुना मण्डलीमधिकृत्याह-

[भा.१८२७] एमेव मंडलीए वि पुव्वाहियनट्ठ धम्मकहि वादि ।
अहवा पइन्नग सुए, अहिज्जमाणे बहुसुतेवि ।।

वृ- यथा अधस्तादावलिकायामुक्तम्, एवमेव मण्डल्यामपि द्रष्टव्यम् । सा मण्डली क्व भवतीतिचेदुच्यते-पूर्वाधीते नष्टे उज्ज्वाल्यमाने, धर्मकथायां धर्मकथाशास्त्रेषु, वादे वादशास्त्रेषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उज्ज्वाल्यमानेष्वधीयमानेषु वा, अथवा प्रकीर्णकश्रुते अधीयमाने बहुश्रुतेऽपि बहुश्रुतविषयेऽपि मण्डली भवति । तत्राप्याभाव्यमावलिकायामिव; अथ कथमावलिकायामिव मण्डल्यामपि द्रष्टव्यमिति चेत् । उच्यते,-एकएकस्य पार्श्वे पूर्वाधीतं नष्टमावश्यकमुज्वालयति, आवश्यकवाचनाचार्यः पुनस्तस्य समीपे दशवैकालिकम्, दशवैकालिकवाचनाचार्यस्याभवति इत्यादि सर्व तथैव, तथा एकएकस्य पार्श्वे आवश्यकं नष्टमुज्वालयति, एषोऽप्यावश्यकवाचनाचार्योऽन्यस्य समीपे दशवैकालिकं, दशवैकालिकवाचनाचार्योप्यपरस्य दृष्टिवादमुज्वालयति, दृष्टिवादवाचनाचार्यस्याभवति, न शेषाणामाभवनस्योत्तरोत्तरं संक्रान्त्याऽन्तिमेऽवस्थानादेतच्चावलिकायामपि द्रष्टव्यम् । तथा यस्य पार्श्वे धर्मकथाशास्त्राणि वो (चो) ज्वालयत्यधीते वा तस्य पाठकस्याभवति न पाठ्यमानस्य, तथा बहुश्रुततरोऽपि यद्यन्यस्य समीपे प्रकीर्णकश्रुतमधीते तदा तस्य प्रकीर्णकश्रुतवाचनाचार्यस्याभवति न बहुश्रुततरस्य, किं बहुना, यो यस्य समीपे पठत्युज्वालयति वा तस्य सत्कमाभाव्यमितरो वाचनाचार्यो हरतीति ।। अथावलिकाया मण्डल्याश्च कः प्रतिविशेष इत्यत आह-

[भा.१८२८] छिन्नाच्छिन्नविसेसो, आवलियाए उ अंतए ठाति ।
मंडलीए सट्ठाणं, सचित्तादीसु संकमति ।।

वृ- आवलिकामण्डल्योः परस्परं छिन्नाच्छिन्नरुपो विशेषः, आवलिका छिन्नाविविक्ता एकान्ते भवति । मण्डलिका त्वच्छिन्ना, "आवलिय तत्थ छिन्ना मंडलिया होइ अच्छिन्ना उ" इति वचनात् । एतदेव सुव्यक्तमाह-आवलिकायामुपाध्यायको(ध्यायो)ऽन्तर्मध्ये विविक्ते प्रदेशे तिष्ठति, मण्डल्यां पुनः स्वस्थानमाभवनं च पाठयितरि संक्रामति सचि तादिषु तत्क्षेत्रगतसचित्तादिविषियम् ।।

अधुना घोटककण्डूयितमधिकृत्याह—

[भा.१८२९] दोण्हं तु संजयाणं, घोडगकंडूइयं करेंताणं ।
जो जाहे जं पुच्छइ सो ताहे पडिच्छतो तस्स ।।

वृ- द्वयोः संयतयोर्घोटककण्डूयितमवि घोटकं कण्डूयितं परस्परं प्रच्छनमित्यर्थः तत् कुवतां यो यदा यं पृच्छति स तदा तस्य प्रतीच्छकः इतरः प्रतीच्छ्यः यावच्च यः प्रतीच्छ्यस्तावत्तस्याभवति, न शेषकालमिति ।। उपसंहारमाह-

[भा.१८३०] एवं तो असमत्ते कप्पे भणितो विहि उ जो एस ।
एत्तो समत्तकप्पे वुच्छामि विहिं समासेण ।।

वृ- एवं तावदसमाप्ते कल्पे यो विधिर्भवति, स एष भणितः । अत ऊर्ध्वं समासेन समाप्तकल्पे विधिं वक्ष्यामि ।। प्रतिज्ञातमेव निर्वाहयति-

[भा.१८३१] गणिआयरियाणंतोखेत्तंमि ठियाण दोसु गामेसु ।
वासासु होति खेत्तं निस्संचारेण बाहिरतो ।।

वृ- गणोऽस्यास्तीति गणी गणावच्छेदक आचार्यः प्रतीतस्तयोर्ग्रामियोः पृथक् पृथक् स्थितयोर्वर्षास्वाभवति क्षेत्रं ग्रामद्वयलक्षणम्, अन्तः-क्षेत्रं स्थितयोः क्षेत्रमध्यव्यवस्थितयोः न पुनः परस्परं गमनागमनतः, कुतःइत्याह बहिर्निःसंचारेण स्वस्वग्रामाद्बहिः पानीयहरिताद्याकुलतया संचाराभावतः ।।

[भा.१८३२] वासासु समत्ताणं, उग्गहो एगदुगपिंडियाणं पि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहारणं तु केसिं वोच्छं दुविहं च पच्छकडं ।।

वृ- वर्षासु बहूनामाचार्याणां परस्परोपसम्पदा समाप्तकल्पानां, वर्षासु समाप्तकल्प ऊना असमाप्तकल्पाः, एगदुगपिंडियाणंति संप्राप्त्याप्येकका: सन्तः पिण्डिता एकपिण्डिताः अथवा द्विकेन वर्गद्वयेन एक एकाकि एकः षड्वर्गो, यदि वा एको द्विवर्ग एकः पञ्चवर्ग इत्यादिरुपेण पिण्डिता द्विकपिण्डितास्तेवामेकद्विकपिण्डितानाम्, अपिशब्दा त्रिकचतुष्कादिपिण्डितानां वावग्रह आभवति, न शेषाणामसमाप्तकल्पस्थितानां, तथा साधारणं शैक्ष्यं वक्ष्ये ।साधारणः (णे) शैक्षो यस्याभवति तस्य तं वक्ष्ये । तथा द्विविधं च गृहस्थसारुपिकभेदतो द्विप्रकारं च पश्चात्कृतमुपरि गणावच्छेदकपृथक्त्वसूत्रे वक्ष्यामि ।। तत्र साधारणं शैक्षं वक्तुमाह-

[भा.१८३३] अक्खेत्ते जम्मुवट्ठितो, खेत्ते वा समट्ठियाण साहारे ।
वायंतिय ववहारे, कयंमि जो जस्सुवट्ठाइ ।।

वृ- अक्षेत्रे स्नानादिप्रयोजनतः क्वाप्येकत्र मिलितानां यो यस्योपतिठति शैक्षः, स तस्याभवति । अथवा समकमेककालं ये स्थिताः पृथक् पृथक् समाप्तकल्पास्तेषां समकस्थितानां तत्क्षेत्रं साधारणं, तस्मिन् साधारेण क्षेत्रे समकस्थितानाम्, अथवा पश्चादागता अप्येवं व्यवस्थां कृत्वा प्रविष्टा यद् यस्योपतिठति तत् तस्याभवतीति तत एवं वाचन्तिके व्यवाहारे व्यवहारे कृते, यो यस्योपतिठति, स तस्याभवति ।।

[भा.१८३४] साहारणट्ठियाणं सेहे पुच्छंतु वसए जो उ ।
दुरत्थं पि हु नियय, साहति उ तस्स मासगुरु ।।

वृ- विचारादिविनिर्गं साधुं दृष्ट्वा कोऽपि शैक्षकः पृच्छति कुत्र साधूनां वसतय इति, एवं साधारणस्थितानां साधारणक्षेत्रावस्थितानामुपाश्रयान् पृच्छति शैक्षे यो निजकमात्मीयमुपाश्रयं दूरस्थम्, अपिशब्दात् प्रत्यासन्नं वा साधयति कथयत्ति, तस्य हु निश्चितं प्रायश्चितं मासगुरुः ।।

कथं पुनः कथनीयमित्याह-

[भा.१८३५] सव्वे उद्दिसियव्वा, अह पुच्छइ कयरो एत्थ आयरितो ।
बहुस्सुय तवस्सि पव्वायगो य तत्थ वि तहेव ।।

वृ- सर्वे यथाक्रममुपाश्रया उद्देष्टव्या यथा अमुकस्याचार्यस्योपाश्रयोऽमुकप्रदेशे, अमुकस्यामुके इति, एवं कथिते यत्र याति तेषामाभवति । अथ स पृच्छेत् कतरोऽत्राचार्यो बहुश्रुतो वा तपस्वी वा प्रव्राजको वा, तत्रापि तस्यामपि पृच्छायां तथैव कथनीयमन्यथा कथने मासगुरुः ।।

[भा.१८३६] सव्वे सुयत्था य बहुस्सुया वा, पव्वावगा आयरिया पहाणा ।
एवं तु वुत्ते समुवेति जस्स, सिट्ठे विसेस चउरो य किण्हा ।।

वृ- अथ सर्वे श्रुतार्थाः, सर्वे बहुश्रुताः, सर्वे च प्रव्राजकाः, सर्वे चाचार्याः प्रधानाः ततस्तथैव यथाभावं कथनीयाः । एवं तूक्ते यस्य समीपे समुपैति, तस्याभवति; अथात्मीयानां बहुतरगुणोकीर्तनतोऽन्येषां बहुतरनिन्दनेन रागद्वेषाकुलतया विशेषं कथयति, ततः शिष्टे विशेषे तस्य विशेषकथकस्य प्रायश्चित्तं चत्वारो मासाः कुत्स्नाः परिपूर्णका गुरुका इत्यर्थः । अथ सर्वेषां मिलितानां स शैक्षः समागत एवं ब्रूयात्-

[भा.१८३७] धम्मभिच्छामि सोउं जे पव्वइस्सामि रोइए ।
कहणा लद्धितोऽहीणो जो पढमं सो उ साहति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- धर्मं श्रोतुमिच्छामि युष्माकं पार्श्वे । जे इति पादपूरणे । श्रुते धर्मे रुचिते प्रतिभासिते सति प्रव्रजिष्यामि । एवमुक्ते कथना धर्मस्य भवति, कः कथयतीति चेदत आह-यो लब्धितः कथनलब्धेरहीनः स प्रथमं साधयति कथयति । अथान्येऽपि द्वित्रिप्रभृतयो लब्धितः समानास्तर्हि यो रत्नाधिकस्तेन कथयितव्यम् ।।

[भा.१८३८] पुनोवि कहमिच्छंते, तत्तुल्लं भासते परो ।
एवं तु कहिए जस्स, उवट्ठायति तस्स सो ।।

वृ- अहं पुनरपि धर्मकथां श्रोतुमिच्छामि ततः पुनरपि कथां धर्मकथां श्रोतुमिच्छामीति ब्रवीति, ततः पुनरपि कथां श्रोतुमिच्छति परोऽन्यो भाषते तत्तुल्यं तावन्मात्रमेवममपरवेलायामन्य । उक्तं च 'जारिसं पढमेण कहियं, तारिसं सेसेहिं वि कहियव्वमिति', एवं प्रदीपकथनसदृशतया सर्वैः कथिते यस्योपतिष्ठति तस्य स आभवति । अथान्ये विशेषेण विशेषतरेण कथयन्ति तर्हि ते तं न लभन्ते किन्तु यो रत्नाधिकस्तेषां, तस्य स आभवति ।।

[भा.१८३९] अनुवसंते च सव्वेसिं सलद्धि कहणा पुन ।
रायनियादि उवसंतो तस्स सो मा य नासउ ।।

वृ- अथ यादृशं प्रथमेन कथितं तादृशेऽन्यैरपि कथिते स नोपशाम्यति, न प्रव्रज्याभिमुखीभूतो भवति, ततस्तस्मिन्ननुपशान्ते पुनः कथना धर्मस्य सर्वेषां रत्नाधिकप्रभृतीनां स्वलब्ध्या यथास्वशक्तितुलनया, एवं च कथने यस्य समीपे स उपशान्तस्तस्याभवति, कस्मादेवं कथनेति चेदत आह-मा सोऽनुपशान्तः सन् नश्यतु संसारं परिभ्रमत्विति कृत्वा ।। अथ सर्वे आचार्या एकत्र मिलितास्तिष्ठन्ति, स च शैक्षक एवं कंचन पृच्छति, कोऽत्राचार्यः ? तत एवं कथनीयम्, सर्वे बहुश्रुताःसर्वे चाचार्याः सर्वे प्रधाना इति एवमुक्ते, यदि शैक्षिको ब्रूते-यं जानीय यूयमाचार्यं तं मम दर्शयत, तत्राह-

[भा.१८४०] जं जाणह आयरियं तं देह ममंति एव भणियंमि ।
जह बहुया ते सीसा दलंति सव्वेसिमेक्केक्कं ।।

वृ- यं जानीथ यूयमाचार्यं तं मम देहति दर्शयतेत्येवं भणिते यदि ते शिष्याः शिष्यत्वेनोपस्थिता बहवो भवन्ति, ततः सर्वेषामेकैकं शिष्यं ते एकत्र मिलिताः परस्परसम्मत्या ददति प्रयच्छन्ति ।।

अथ एक एव शिष्यस्तत्र विधिमाह-

[भा.१८४१] रायनिया थेरासति कुलगणसंघे दुगादिनो भेदो ।
एमेव वत्थपाए, तालायरसेवगा भणिया ।।

वृ- यद्येक एव शिष्यस्तदा यस्तेषां सर्वेषामपि रात्निको रत्नाधिकस्तस्य तं समर्पयन्ति, अथ सर्वे समरत्नाधिकास्ततो यस्तेषां वृद्धतरस्तस्य, अथ सर्वे वृद्धास्तर्हि यस्य शिष्या न सन्ति तस्य । अथ सर्वेषामपि शिष्या न विद्यन्ते तत इयं सामाचारी । सर्वेषां शिष्याणामसत्यभावे कुलत्ति यदि ते सर्वे समानकुलास्ततः कुलस्थविरस्य तं ददति, अथान्यकुलसत्का अपि तत्र वर्तन्ते, तत आह-गणत्ति गणस्थविरस्य समर्पयन्ति, अथान्यगणसत्का अप तत्र विद्यन्ते, तत आह-संघे इतिसङ्घस्थविराय ददति, अथवा स एकःशिष्यः साधारणस्तावत् क्रियते यावदन्ये उपतिष्ठन्ते, उपस्थितेषु च तेषु यदा सर्वेषां परिपूर्णा भवन्ति तदा विभज्यन्ते । एवं द्विकादयोऽपि भेदा वाच्याः । द्विप्रभृतीनामपि शिष्याणामुपस्थितानामेवं विभाषा कर्तव्या । एवमेव अनेनैव च प्रकारेण वस्त्रपात्रादिलाभेऽपि द्रष्टव्यम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्च वस्त्रपात्रादिकं तालाचरा वा दद्युः सेवका वा वणिजो वा एतेषा प्रायो वर्षासुं दानसंभवात् ।। एतामेव गाथां व्याचिख्यासुः प्रथमतो रायनिया थेरासति इति व्याख्यानयति-

[भा.१८४२] रायनियस्स उ एगं दलंति तुल्लेसु थेरगतरस्स ।
तुल्लेसु जस्स असती, तहावि तुल्ले इमा मेरा ।।

वृ- एकं शिष्यमुपस्थितं रात्निकस्य रत्नाधिकस्य ददति । अथ सर्वे समरत्नाधिकास्ततस्तुल्येषु रत्नाधिकेषु यः स्थविरतरस्तस्य । अथ सर्वे स्थविरतरास्तर्हि तुल्येषु स्थविरतरेषु यस्य शिष्याणामभावस्तस्य । अथ शिष्याभावेनापि सर्वे तुल्यास्तत इयं मर्यादा ।। तामेवाह-

[भा.१८४३] साकुलगा कुलथेरे, गणथेरे गणिव्वए यरा संघे ।
रायनियथेरे असति कुलादिथेराण वि तहेव ।।

वृ- यदि ते सर्वे सकुलकाः समानकुलकाः ततः कुलस्थविरस्य ददति, अथान्यकुलका अपि विद्यन्ते तदा 'सङ्घे' सङ्घस्थविरस्थ । अथैषां मध्ये तत्कालमेकस्याप्यभावस्तत आह-'रायनिए' इत्यादि रत्नाधिकस्थविरस्याभावे कुलादिस्थविराणामपि च तथैव अभावे सति ।।

[भा.१८४४] साहारणं व काउं, दोण्हि वि सारेंति जाव अन्नो उ ।
उप्पज्जइ सिहो एमेव य वत्थपत्तेसु ।।

वृ- साधारणं वा तं शिष्यं कृत्वा द्वावपि तं तावत्सारयतो यावदन्यशिष्यस्तयोरुत्पद्यते, ततो विभजनमिति, अत्र द्विग्रहणं त्रिप्रभृतीनामुपलक्षणम्, तेन बहूनामध्ययं न्यायो द्रष्टव्यः, एवमेव वस्त्रपात्रेष्वपि साधारणतया सम्पन्नेषु विधिर्द्रष्टव्यः ।। अत्र पर आह-

[भा.१८४५] चोएइ वत्थपाया, कप्पंते वासवासि घेत्तुं जे ।
जह कारणंमि सेहो, तह तालचरादिसु वत्था ।।

वृ- चोदयति शिष्यः वर्षावासे वस्त्रपात्राणि गृहीतुं कल्पन्ते काका पाठ इति प्रश्नावगमः सूरिराह-यथा कारणे पूर्वोपस्थित इत्येवं लक्षणे अव्यवच्छित्तिकारको भविष्यतीत्येवंरुपे वा अपवादतः शैक्षः कल्पते, तथापवादतस्तालाचरदिषु वस्त्राणि उपलक्षणमेतत् पात्राणि च कल्पन्ते ।।

[भा.१८४६] साहारणो अभिहितो, इदानि पच्छाकडस्स अवयारो ।
सो उ गणावच्छेइयपिंडगसुत्तंमि भन्निहिती ।।

वृ- यदुक्तं प्राक् साधारणं शक्ष्यं वक्ष्ये द्विविधं च पश्चातूकृतमिति तत्र साधारणः शैक्षोऽभिहितः, इदानीं पश्चात्कृतस्यावतारः प्रस्तावः, स तु गणावच्छेदकपिण्डकसूत्रे गणावच्छेदकबहुत्वसूत्रे भणिष्यते ।। तदेवमाचार्योपाध्यायगतान्यप्येकत्वबहुत्वसूत्राणि विभावयिषुराह-

[भा.१८४७] एमेव गणावच्छेयएगत्त-पुहुत्त दुविहकालम्मि ।
जं इत्थं नाणत्तं, तमहं वुच्छं समासेनं ।।

वृ- एवमेवाचार्योपाध्यायसूत्रगतेन प्रकारेण द्विविधे काले ऋतुबद्धे काले वर्षाकाले च गणावच्छेदकैकत्वपृथकत्वसूत्राणि भावयतिव्यानि, किमुक्तं भवति । यथा आचार्योपाध्यायानामेकत्वपृथक्त्वसूत्राणि द्विविधकालगतानि व्याख्यातानि या वाभवत्यनाभवति च सामाचारी तथा गणावच्छेदकस्यापि एकत्वपृथकत्वसूत्राणि द्विविधकालगतानि भावयितव्यानि । सैव च सामाचारी आभवत्यनाभवतीति, नवरमत्र यन्नानात्वं तदहं समासेन वक्ष्ये ।। तत्र ऋतुबद्धे तावद् भण्यते यदि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गणावच्छेदक आत्मद्वितीयो वसति तदा तस्य प्रायश्चित्तं मासलघु, इमे च दोषाः-

[भा.१८४८]　　जह होति पत्थणिज्ञा कप्पट्ठी नीलकेसी सव्वस्स ।
तह चेव गणावच्छो किं कारण, जेन तरुणो उ ।।

वृ- यथा कप्पट्ठीति बालिका, नीलकेशी कृष्णकेशी तरुणीत्यर्थः । सर्वस्य तरुणस्य महतो वा प्रार्थनीया भवति, तथा गणावच्छेदकोऽपि, कि कारणम्, सूरिराह-येन कारणेन स गणावच्छेदकस्तरुण-स्तरुणतया तरुण्या महत्या वा प्रार्थनीयो जायते ।।

[भा.१८४९]　　दोण्हं चउकन्नरहसं, हवेज्ज च्छक्कं न मो न संभवति ।
सिद्धं लोके तेन उ, परपच्चयकारणा तिन्नि ।।

वृ- लोके इदं सिद्धं प्रतीतं यद् द्वयोश्चतुःकर्णं रहस्यं भवति, षट्कर्णं मो इति पादपूरणे, त्रयाणां रहस्यं न सम्भवति, तेन कारणेन परप्रत्ययकारणात् परेषां प्रत्ययोत्पादनार्थं त्रयो विहरन्ति । इतरथासमर्थः स आत्मनिग्रहं कर्तुम्, त्रयोऽपि चोत्सर्गतो न कल्पन्ते, तत इदमपि सूत्रं कारणिकमवगन्तव्यम् । कारणतश्च तेषां त्रयाणां तिष्ठतामियं यतना-

[भा.१८५०]　　जयणा तत्थुउबद्धे समभिक्खाणुन्ननिक्खमपवेसा ।
वासासु दोण्हि चिट्ठे दो हिंडे असंथरे इयरे ।।

वृ- तत्र ऋतुबद्धे काले इयं यतना, समकं भिक्षा, समकं शय्यातरस्य समीपे वसतेरनुज्ञा, समकं विचारार्थं निष्क्रमः, समकं वसतौ प्रवेशः । वर्षासु पुनरियं, द्वौ पश्चात्तिष्ठतो द्वौ हिण्डेते एतच्च संस्तरणे, इतरौ द्वौ गणावच्छेदकतदन्यलक्षणौ वसतेः प्रत्यासन्नेषु गृहेषु वसतिं प्रलोकमानौ हिण्डेते यावता च न पूर्यते तावदितरानीतं गृह्णीतः । इदमपि वर्षाविषयं कारणिकम्, अकारणे चतुर्णां तिष्ठतां प्रायश्चित्तं चतुर्लघु । सम्प्रति बहुत्वविषये गणावच्छेदकसूत्रे भावयति-

[भा.१८५१]　　एमेव बहुणं पी, जहेव भणिया उ आयरियसुत्ते ।
जाव य सुयोवसंपय, नवरि इमं तत्थ नाणत्तं ।।

वृ- एवमेव अनेनैव प्रकारेण । किमुक्तं भवति । यथा एकत्वे ऋतुबद्धे वर्षासु च पूर्वसूत्रमुक्तमेवं बहूनामपि ऋतुबद्धे वर्षासु च वक्तव्यम् । भावनापिच यथा बहुत्वविषये आचार्यसूत्रे भणिता तथैवात्रापि भणनीया, सा च तावत्, यावत् श्रुतोपसम्पत् । तथाहि, तैरपि समाप्तकल्पीकरणार्थमन्योन्यनिश्रया, तया परस्परोपसम्पदा इत्यर्थः । सा च निश्रा द्विविधा-गीतार्थनिश्रा श्रुतनिश्रा च, तत्र च यद्गीतार्थस्य समीपेउपसम्पदनं सा गीतार्थनिश्रा, तया परस्परोपसम्पन्नत्वेन समाप्तकल्पीभूतयोर्द्वयोस्त्रयाणां वा वर्गाणा समकमागतेन(मागमनेन) साधारणक्षेत्रम् । तथा श्रुतार्थं निश्रा श्रुतनिश्रा, सापि च यथा प्राक् आचार्यसूत्रेऽभिहिता, तथात्रापि भाषितव्या । नवरमिदं तत्र निश्रायां नानात्वम्, तदेवाह-

[भा.१८५२]　　साधारणठिया उ, सुत्तत्थाइं परोप्परं गिह्ले ।
वारंवारेण तहिं जह आसा कंडूयंते उ ।।

वृ- ते सर्वे द्विवर्गास्त्रिवर्गा वा समाप्तकल्पाः समकमेकस्मिन् क्षेत्रे यदि स्थितास्ततः साधारणं तत् क्षेत्रम्, तस्मिन् साधारणे क्षेत्रे स्थिता, यदि यथा वारंवारेणाश्वाः परस्परं कण्डूयन्ति । एवं वारेण वारेण परस्परं सूत्रमर्थं वा गृह्णन्ति । यथाहमद्य तव पार्श्वे गृह्णामि । कल्ये त्वं (प्रतिस्त्वं) मम पार्श्वे गृहीष्यसि । अथवा पौरुषीप्रमाणेन मुहूर्तैर्वा वारकं कुर्वन्ति तदा यो यदा यस्य पार्श्वे गृह्णाति तस्य तावन्तं

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कालमाभाव्यमितरः सूत्रस्यार्थस्य वा प्रदाताऽपहरति ।।

[भा. १८५३] अह पुव्वट्ठिए पच्छा अन्नो एज्जाहि बहुसुतो खेत्ते ।
सो खेत्तुवसम्पन्नो पुरिमिल्लो खेत्तिओ तत्थ ।।

वृ- अथ पूर्वस्थिते क्षेत्रस्वामिनि गणावच्छेदके आचार्ये वा पश्चादन्यो बहुश्रुतस्तस्मिन् क्षेत्रे आगच्छति, तर्हि स तदनुमत्या तत्क्षेत्रमुपसम्पन्न इति तत्क्षेत्रे क्षेत्रिकः क्षेत्रस्वामी पूर्व एव, न पश्चात्तनः ।

[भा. १८५४] खेत्तितो जइ इच्छेज्जा सुत्तादि किंचि गिण्हिउं ।
सीसं जइ मेहावि पेसे, खेत्तं तु तस्सेव ।।

वृ- क्षेत्रिकः क्षेत्रस्वामी यदि पश्चादागतस्य समीपे किंचित् सूत्रादि गृहीतुमिच्छति, तत्र यदि शिष्यं मेघाविनं प्रेषयति, तर्हि क्षेत्रं तस्यैव पूर्वस्थितस्य, न पश्चादागतस्य ।।

[भा. १८५५] असती तव्विहसीसे अनिखित्त गणे उ वायए निसंकमति ।
अह वा अगीयत्थे निक्खिवई गुरुगा न य खेत्तं ।।

वृ- अथ तथाविधो मेघावी शिष्यो नास्ति, ततस्तद्विधे शिष्ये असति अविद्यमाने अनिक्षिप्ते स्वशिष्यस्य गीतार्थस्य गणे यदि सूत्रादि पश्चादागतस्य समीपे वाचयति, तर्हि तत्क्षेत्रं पश्चादागते वाचयति संक्रामति । अथागीतार्थे स्वशिष्ये गणं निक्षिपति, निक्षिप्य च पश्चात्सूत्रादि वाचयति तर्हि अगीतार्थे गणंनिक्षिपतस्तस्य प्रायश्चित्तं चत्वारो गुरुकाः । न च तस्य क्षेत्रं किन्तु सूत्रादिवाचयितुः पश्चादागतस्य ।।

[भा. १८५६] अह निखिवती गीते, होइ खेत्तं तु तो गणस्सेव ।
तस्स पुन अत्तलाभो, वायंते न निग्गतो जाव ।।

वृ- अथ गीते गीतार्थे शिष्ये गण निक्षिपति निक्षिप्य च पश्चादागतस्य समीपे सूत्रादि गृह्णाति, 'तोत्ति' ततः क्षेत्रं गणस्यैवाभवति न पाठयितुः पश्चादागतस्याचार्यस्य । अथ यदा गणमनिक्षिप्यागीतार्थे वा निक्षिप्य सूत्रादि गृह्णाति, तदा कियन्तं कालमाभाव्यं तत्क्षेत्रं पाठयितुरत आह । 'तस्सेत्यादि' तस्य पुनः, पाठयितुः पुनः, तस्मिन् क्षेत्रिके वाचयति आत्मलाभः आत्मीयत्वेन क्षेत्रस्य लंभनं तावत्, यावत् स ततो गच्छान्न निर्गतो भवति । किमुक्तं भवति यावत्तस्य समीपे अध्ययनार्थमवतिष्ठते तावत्तस्याध्यापयितुः पश्चादागतस्याभवति तत् क्षेत्रम्, यदपि च शिष्यादिकं तस्य सूत्रादि गृहीतुरुपातिष्ठति तदपि तस्याभवति । निर्गते च ततो गच्छत्तस्मिन् भूयस्तस्यैव पूर्वस्थितस्य क्षेत्रं संक्रामतीति ।

[भा. १८५७] आगंतुगो वि एवं, ठवेंतो खेत्तोवसंपयं लभति ।
साहारणे य दोण्हं, एसेव गमो य नायव्वो ।।

वृ- आगंतुकोऽपि एवं पूर्वोक्तेन प्रकारेण गच्छे स्थापयन् क्षेत्रोपसम्पदं लभते । इयमत्र भावना-आगन्तुकोऽपि यदि पूर्वस्थिते सूत्रादि गृह्णाति अन्यस्यागन्तुकस्य समीपे सूत्रादि जिघृक्षुं मेघाविनं शिष्यं प्रेषयति । यदि वा गीतार्थे गणं निक्षिप्य स्वयं वाचयति तदा तत् क्षेत्रं तस्यैव मूलागन्तुकस्य, अथ गणमनिक्षिप्यागीतार्थे वा गणं निक्षिप्य सूत्रादि गृह्णाति तदा ग्राहयितुः क्षेत्रम्, अगीतार्थस्य च गणं साधारणे क्षेत्रे एको यद्यपरस्य समीपे सूत्रादिकं गृहीतुकामः प्राज्ञं विनीतं शिष्यं प्रेषयति, गणं वा गीतार्थे निक्षिप्य स्वयं गृह्णाति, तदोभयोरपि साधारणम्, अथ गणमनिक्षिप्यागीतार्थे वा निक्षिप्य वाचयति तदाध्यापयितुः क्षेत्रं नेतरस्य, तदपि च तावद्यावत् स ततो गच्छान्न निर्गच्छति । निर्गते उभयोः साधारणम्, अगीतार्थस्य गणाध्यारोपे प्रायश्चित्तं चतुर्गुरुकम् ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१८५८] साहारणो उ भणितो इदानि पच्छाकडं तु वुच्छामि ।
सो दुविहो वोधव्वो, गिहत्थ सारुविओ चेव ।।

वृ- साधारणोऽभिहितः, इदानीं पश्चात्कृतं वक्ष्यामि । स च पश्चात्कृतो द्विविधस्तद्यथा-गृहस्थः सारुपिकश्च । गृहे गृहलिङ्गे तिष्ठतीति गुहस्थः । समानं रुपं सरुपं तेन चरतीति सारुपिकः ।।

अनयोरेय स्वरुपमभिधित्सुराह-

[भा.१८५९] असिहो ससिह गिहत्थो रयहरवज्जो उ होइ सारुवी ।
धारेइ निसिज्जं तु एगं ओलंबगं चेव ।।

वृ- गृहस्थः पश्चात्कृतो द्विविधोऽशिख सशिखश्च । तत्र यः केशान् धारयति स सशिखाकः । यस्तु मुण्डनेन तिष्ठिति स चाशिखाको भवति रजोहरवर्जः रजोहरणवर्जः, रजोहरणग्रहणं दण्डक-पात्रादीनामुपलक्षणम्, ततोऽयमर्थः-यः केवलं शिरसो मुण्डनमात्रं कारयति न च रजोहरण-दण्डकपात्रादिकं धरते सोऽशिखाक इति । यस्तु सारुपी सारुपिकः स एकां निपद्यामेकनिपद्योपेतं रजोहरणं अवलम्बकं दण्डकम्, उपलक्षणमेतत् पात्रादिकं च, धारयति शिरश्च मुण्डयति,

अत्राभवन(विधि)माह-

[भा.१८६०] गिहिलिंगं पडिवज्जइ, जो उ तद्दिवसमेव जो तं तु ।
उवसामेती अन्नो, तस्सेव ततो पुरा आसी ।।

वृ- यो व्रतं मुक्त्वा गृहिलिङ्गं प्रतिपन्नं योऽन्यः, उपलक्षणमेतत् मूलाचार्यो वा, तद्दिवसमेव उपशमयति पुनरपि व्रतग्रहणायाभिमुखीकरोति, येनैवोपशमितिस्तस्यैवाभवति, न मूलाचार्यस्यैव । उक्तं च-"पच्छाकडो गिहत्थीभूतो जइ तद्दिवसं चेव पव्वइ उ मिच्छइ जस्स सगासे इच्छइ तस्सेव सो" इति । एष विधिः पुरा आसीत्, सम्प्रति पुनर्लिङ्ग परित्यक्तेऽपि त्रिषु वर्षेणु गतेषु तदाभवनपर्यायः परिपूर्णो भवति, नारतः ।। किं कारणं केन वाचार्येणेवं मर्यादा स्थापितेति चेदत आह-

[भा.१८६१] इन्हि पुन जीवाणं उक्कडकलुसत्तणं वियाणित्ता ।
तो भद्दबाहुणा उ तेवरिसा ठाविया ठवणा ।।

वृ- इदानीं पुनर्जीवानामुत्कटं कलुषत्वं विज्ञाय ततो भद्रबाहुना त्रैवर्षिका त्रिवर्षप्रमाणा स्थापना मर्यादा स्थापिता, चारित्रतटाके संयमोदकपरिवहनरक्षणार्थ त्रैवार्षिकी मर्यादापाली कृतेति भावः ।। सम्प्रति त्रैवार्षिकामेब स्थापनायां विशेषमभिधित्सुरिदमाह-

[भा.१८६२] परलिंग निण्हवे वा सम्मद्दंसण जढे तु संकंते ।
तद्दिवसमेव इच्छा, सम्मत्तमुत्ते समा तिन्नि ।।

वृ- परलिङ्गं द्विधा-गृहिलिङ्गं परतीर्थिकालिङ्गं च । तत्रेह परतीर्थिकलिङ्गं गृह्यते तस्मिन् परतीर्थिकलिङ्गे निह्नवे वा त्यक्तसम्यग्दर्शने संक्रान्ते यस्य समीपे तद्दिवसमपीच्छा तस्य स आभवति । अयमत्र भावः स भग्नचारित्रपरिणामः सम्यग्दर्शनमपि परित्यज्य परिव्राजकादीनां निवानां मध्ये गतो यदि तद्दिवसमेव यस्य समीपे प्रव्रजितुमिच्छति ततः स तस्यैवाभवति न मूलाचार्यस्य । अथ सम्यक्त्वसहितः परलिङ्गादिषु गतस्ततस्तस्मिन् सम्यक्त्वयुते परलिङ्गादिगते मूलाचार्यमर्यादा तिस्त्रः समास्त्रीणि वर्षाणि, त्रिषु वर्षेषु पूर्णेषु पूर्वपर्यायस्तुट्यति ।।

[भा.१८६३] एमेव देसियम्मि वि, सभासिएणं तु समनुसिठंमि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उसन्नेसुवि एवं, अच्छाइन्ने न पुन एण्हि ।।

वृ- एवमेव अनेनैव प्रकारेण देशिकेऽपि सभाषिकेण समानभाषाव्यवहारिणा समनुशिष्टे ज्ञातव्यम् । किमुक्तं भवति ? द्रमिलान्ध्रादिदेशोद्भवो म्लेच्छप्राय आर्यभाषामजानानो यो विपरिणतः सन् त्यक्तसम्यक्त्वो गृहस्थीभूतः परिव्राजकादिषु निह्नवेषु ना मिलितो यदि केनापि सभाषिकेण समनुशिष्टः सन् प्रयावर्तते तर्हि तस्य समनुशासकस्याभवति, नान्यस्य । अथ ससम्यक्त्वः परलिङ्गादिषु गतस्तर्हि मूलाचार्यपर्यायपरिमाणं तिस्रः समाः, अवसन्नेषु अपि एवं पूर्वमासीत् । यथा अवसन्नीभूतं तद्दिवसमपि य उपशमयति स तस्याभवति इदानीं पुनः कषायेरत्याकीर्णे नेयं व्यवस्था किन्तु त्रीणि वर्षाणि ।। उक्तो गृहस्थः पश्चात्कृतः, सम्प्रति सारुपिकमधिकृत्याह-

[भा.१८६४] सारुवी जज्जीवं पुव्वायरियस्स जे य पव्वावे ।
अपव्वाविए सच्छंदो, इच्छाए जस्स सो देइ ।।

वृ- सारुपिको रजोहरणादिधारी स यावज्जीवं पूर्वाचार्यस्याभवति, न तु त्रिवर्षप्रमाणा तस्य मर्यादा, यानि च स सारुपिकः प्रव्राजयति मुण्डितानि करोति तान्यपि पूर्वाचार्यस्याभवन्ति, तेन मुण्डितत्वात्, यानि पुनस्तेन न मुण्डितानि किन्त्वद्यापि सशिखाकानि वर्तन्ते, तदायत्तानि च तान्यप्रव्राजितान्यधिकृत्य तस्य स्वच्छन्द आत्मेच्छा । तथा चाह-यस्येच्छया स ददाति तस्याभवन्ति नान्यस्येति ।।

एतच्चापुत्रादिषु द्रष्टव्यं पुत्रादीनि पुनः पूर्वाचार्यस्याभवन्ति ।।

[भा.१८६५] जो पुन गिहत्थमुंडो अहवा मुंडो उ तिण्ह वरिसाणं ।
आरेणं पव्वावे, सयं च पुव्वायरिए सव्वं ।।

वृ- यः पुनर्गृहस्थ इव मुण्डो गृहस्तमुण्डः, क्षुरेण मुण्ड इत्यर्थः, अथवा मुण्डो लोचने मुण्डः । एष द्विविधोऽपि मुण्डो गृहस्थत्वं करोति, न तु रजोहरणदण्डपात्रादि धारयति तेन सारुपिकाद्भिन्नः स त्रयाणां वर्षाणामारतोऽर्वाक् यानि प्रव्राजयति मुण्डितानि करोति तानि स्वयं च यावत्रीणि वर्षाणि न पूर्यन्ते तावत्सर्वं पूर्वाचार्यस्याभवति ।।

[भा.१८६६] अपव्वावित सच्छंदा तिण्हं उवरिं तु जाणियव्वा वे ।
अपव्वावियाणि जाणि य सोवि अ जसिच्छए तस्स ।।

वृ- यानि पुनस्त्रयाणां वर्षाणामारतो न प्रवाजितानि न मुण्डितानि कृतानि किन्तु सशिखाकानि वर्तन्ते तानि स्वच्छन्दात् यस्मै प्रयच्छति तस्याभवन्ति, त्रयाणां वर्षाणामुपरि पुनर्यानि प्रव्राजयति मुण्डितानि करोति यानि वा प्रवाजितानि सशिखाकानि तिष्ठन्ति सोऽपि च स्वयमात्मना यस्य सकाशे इच्छति प्रतिभासते तस्य समीपे प्रव्राजयति ।। प्रव्रजति च त्रिवर्षमर्यादाः परिपूर्णीभूतत्वात् ।।

[भा.१८६७] गंतूणं जइ बेती अहयं तुज्झं इमानि अन्नस्स ।
एयानि तुज्झ नाहं दोवी तुज्झं दुवेन्नस्स ।।

वृ- त्रिवर्षप्रमाणायां मर्यादायामतिक्रान्तायां पूर्वाचार्यस्य समीपं गत्वा यदि ब्रूते अहं युष्माकमन्तिके प्रव्रजिष्यामि यानि पुनरिमानी मम समीपे उपस्थितानि तान्यन्यस्यामुकस्य पार्श्वे प्रव्रजिष्यन्ति, अथवा एतानि युष्माकमहमन्यस्य, अथवा द्वावपि एतान्यहं च युष्माकं, यदि वा द्वावपि एतान्यहं चान्यस्य, तदा यदिच्छति तत्प्रमाणम् ।। तदेवाह-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

[भा.१८६८] छिन्नंमि उ परियाए उवठियंते हु पुच्छिउं विहिना ।
तस्सेव अनुमएणं पुव्वं दिसा पच्छिमा वावि(दी) ।।

वृ- छिन्ने पर्याये वर्षत्रयमर्यादायामतिक्रान्तायामित्यर्थः, तस्मिन् स्वयमुपतिष्ठति अन्यांश्चोपस्थापयति विधिना तं पृष्ट्वा तस्यैवोपतिष्ठतो अनुमतेनेच्छया पूर्वा दिक् पश्चिमा वा दीयते, किमुक्तं भवति यदि पूर्वाचार्यमिच्छति ततः पूर्वाचार्यस्याभवति, अथान्यं तर्ह्यन्यस्य, शेषतदुपस्थापितविषयेऽपि च तस्येच्छा प्रमाणम्, सा च प्रागेवोपदर्शिता, स यदि सम्यगुपशान्तः सन् स्वकमाचार्यमाश्रयते तर्हि स प्रव्राजनेन संगृहीतव्यः, यदि पुनर्न संगृह्णाति ततः प्रायश्चित्तं मासलघु, अन्यच्च तेनासंग्रहणे यदि तस्य श्रद्धाभंगो भवति । यदपि चान्यस्य समीपे दूरं गच्छन् पथि स्तेनश्वापदादिभ्योऽनर्थ प्राप्नोति, तन्निमित्तमपि तस्य प्रायश्चित्तम्, तस्मादवश्यं संगृहीतव्यः ।।

[भा.१८६९] संविग्गमुद्दिसंते पडिसेहं तस्स संथरे गुरुगा ।
किं अम्हं तु परेणं अहिकरणं जं तु तं तेसिं ।।

वृ- अथान्यस्य समीपे प्रव्रजन् स पूर्वाचार्यमात्मीयं संविग्नमुद्दिशति प्रकाशयति । तस्मिन् संविग्नमुद्दिशति यस्य समीपे प्रव्रजितुमिच्छति स यदि प्रतिषेधति यथा किमस्माकं परेण परकीयेन यत् येषामधिकरणं तत्तेषां भवत्विति, तस्य एवं प्रतिषेधतः प्रायश्चित्तं चत्वारो गुरुकाः, एतच्च संस्तरणे सति द्रष्टव्यम्, अथासंस्तरन् प्रतिषेधति, ततः शुद्धः । अथ स पूर्वाचार्यस्यैव पार्श्वे कस्माल्लिङ्गंन प्रतिपद्यते । उच्यते-(पुरुषा वा ते) आचार्या यदि वा यत्र यत्र ते पूर्वाचार्या विहरन्ति तत्र तत्र तस्य सागारिकं किमपि, अतिदूरे वा ते उपलभ्यन्ते, ग्लानो वा पूर्वाचार्यो जात इति ।।

[भा.१८७०] एवं खलु संविग्गे असंविग्गे वारणा न उद्दिसणा ।
अब्भूवगतो जं भणती पच्छ भणंते न से इच्छा ।।

वृ-एवमुक्तेन प्रकारेण संविग्ने पूर्वाचार्ये उद्दिश्यमाने खलु विधिरुक्तोऽथ स पूर्वाचार्यमात्मीयमसंविग्नमुद्दिशति तर्हि तेना सविग्ने पूर्वाचार्ये उद्दिश्यमाने तस्य वारणा प्रतिषेधः कर्तव्यो न दातव्या तस्य प्रव्रज्या गुरुनिन्दकत्वादिति भावः, न च स तं पूर्वाचार्यमसंविग्नमुद्देशयितव्यः एष भगवतां परमगुरुणामुपदेशः, । 'न उद्दिसणा' इत्यादि । अथ स ब्रूते नाहं संविग्नमसंविग्नं वा पूर्वाचार्यमुद्दिशामि किन्तु त्वमेव ममाचार्य इति तर्हि, यदि पूर्वाचार्यस्य नोद्देशना यं चाभ्युपगतस्तं प्रत्येवं भणति, ततः स प्रव्राजनीयः । अथ स प्रवाजितः सन् पश्चाद्वदेत् यथा पूर्वाचार्यस्याहं न युष्माकमिति तत आह-पश्चादेवं भणति तस्मिन् न 'से' तस्य इच्छा किन्तु यमभ्युपगतस्तस्यैव सः ।। एतदेव स्पष्टतरमाह-

[भा.१८७१) एमेव निच्छिऊण, उठंतो पच्छ तेसिमाउट्टो ।
इयरेहिं व रोसवितो, सच्छंद दिसं पुनो न लभे ।।

वृ- उपतिष्ठन् प्रव्रज्यां जिघृक्षुरेवमेव मे त्वमाचार्य इति निश्चित्य प्रव्रजितः सन् यः पश्चात्तेषां पूर्वाचार्याणां आत्मीयानामावृत्तो जायते, इतरैर्वा येषां समीपे प्रव्रजितस्तैर्वा रोषितः सन् अहं पूर्वाचार्यस्यैव न युष्माकमिति स एवं ब्रुवाणः पुनः स्वच्छन्ददिशं स्वेच्छया दिशं न लभते, किन्तु यमभ्युपगतस्तस्यैव स इति । यस्तु पश्चात्कृतत्वे न ज्ञातो, यस्य तु ज्ञातस्यापि पूर्वादिक्संग्रहणे भावो न ज्ञायते, तस्य लिङ्गदाने विधिमाह-

[भा.१८७२] अन्नातो परियाए पुन्ने न कहेज्ज जो समुट्ठंतो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लज्जाए मा व ग्धेच्छति मा व दिक्खिज्ज मे भयणा ।।

वृ- अज्ञातः सन् यः पर्याये पूर्णेऽपि समुपतिष्ठन् आत्मानं न कथयति यथाहममुकस्य पश्चात्कृत इति, कस्मान्न कथयति इति चेदत आह-लज्जया, यदि वा मा तत्पाक्षिकेण केनाप्यहं ग्रहीष्ये, अथवा मां पश्चात्कृतं ज्ञात्वा न दीक्षयेयुरिति भजनात् विकलपान्ना कथययि ।।

[भा.१८७३] नाते व जस्स भावो न नज्जए तस्स दिज्जए लिंगं ।
दिन्नंमि दिसिं नाहिति कालेन व सो सुणंतो वा ।।

वृ- ज्ञाते वा पश्चात्कृततया तस्मिन् प्रव्रज्यार्थमुपस्थि यस्य भावो न ज्ञायते केनापि कारणेन पूर्वाचार्यसमीपं न गत इति, तस्य ज्ञातस्याज्ञातस्य वा लिङ्गं दीयते । दत्ते च लिङ्गे स आत्मीयां दिशं कालेन पूर्वाचार्यलक्षणां ज्ञास्यति, स वा पूर्वाचार्यः कालेन परम्परया श्रृण्वन् तं ज्ञास्यति, ततो यस्य समीपे तस्य प्रतिभासते, तस्य समीपमुपगच्छतु ।। साम्प्रतमन्यं व्यवहारमुपदर्शयति-

[भा.१८७४] अहवा अन्नन्नकुला पडिभज्जिउकाम समणो समणी य ।
अनुसठायरि न ठिया करेंति वायंतिववहारं ।।

वृ- अथवेति व्यवहारस्य प्रकारान्तरोपदर्शने, श्रमणः श्रमणी चेति द्वावप्यन्यान्यकुलौ अन्यकुलः श्रमणोऽन्यकुला श्रमणी, प्रतिभङ्क्तुकामौ प्रतिपतितुकामौ स्वस्वाचार्येण च तौ प्रभूतमनुशिष्टौ परं न स्थितौ, तौ स्वस्वकुलममत्वेन वागन्तिकव्यवहारं वागेवान्तः परिसमाप्तिर्वागन्तस्तत्र भवो वागन्तिकः, स चासौ व्यवहारश्च तं कुरुतः तद्यथा-यान्यस्माकमपत्यानि जनिष्यन्ति तेषां मध्ये ये पुरुषास्ते सर्वे मम याः स्त्रियस्ताः सर्वाः तव, अथवा श्रमणीभूते ये पुरुषास्ते सर्वे मम, स्त्रियः सर्वास्तव, यदि चेदं भणति-सर्वाण्यपत्यानि तव, अथवा सर्वाण्यपत्यानि ममेति, तयोः संसारे स्थित्वा पुनः प्रव्रज्यां प्रत्युपस्थितयोर्यदेव वागन्तिकेन व्यवहारेण निश्चितं तदेव तयोराभवति ।।

[भा.१८७५] अह न कतो तो पच्छा तेसिं अब्भुठियाण ववहारो ।
गोणी आसू भासिस कुटुंबि खरएय खरिया य ।

वृ- अथ न कृतः पूर्व वागन्तिको व्यवहारः पश्चात्तयोः प्रव्रज्यायामभ्युत्थितयोः स्वस्वकुलममत्वेन व्यवहारो भण्डनमभूत, तत्र संयतिकुलसत्का गोदृष्टान्तम् उद्भामिकादृष्टान्तं खरखरिकादृष्टान्तं चान्तरान्तरोपन्यस्यन्ति । संयतकुलसत्का अश्वदृष्टान्तं कौटुम्बिकदृष्टान्तं च ।।

अथवेयमन्या दृष्टान्तपरिपाटी ।।

[भा.१८७६] गोणीणं संगिल्लं उब्भामइला य नीय परदेसं ।
तत्तोखेत्ते देवी रन्नो अभिसेचने चेव ।।

वृ- संयतीसमानकुलका गवां संगिल्लं समुदायं दृष्टान्ती कुर्वन्ति, तदनन्तरं संयतसकुलका या उद्भ्रामिका परदेशं नीता तां दृष्टान्ति कुर्वन्ति, ततः पुनरपि संयतीसकुलकाः क्षेत्रे बीजं, ततः संयतकुलका देवीं राज्ञोऽभिषेचनं चेवेति ।। तत्र भण्डने जाते यथा संयतीसकुलका गोदृष्टान्तं कुर्वन्ति तथा प्रतिपादयति-

[भा.१८७७] संजइइत्त भणंती संडेणन्नस्स जं तु गोणीए ।
जायति तं गोणिवइस्स होति एवम्ह एयाइं ।।

वृ- 'संजइइत्ता' संयतीसत्काः समानकुलका ब्रुवते अन्यस्य सत्केन षण्डेन यत् गोर्जायतेऽपत्यं

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

तत्सर्वं गोपतेर्गोस्वामिनो भवति, न षण्डस्वामिनः, एवमनेनैव दृष्टान्तेनास्माकमप्येतान्य-पत्यान्याभवन्ति, न युष्माकमिति।। एवमुक्ते-

[भा.१८७८] बेंतियरे अम्हं तू जह वडवाए उ अन्नआसेण ।
जं जायति मोल्लंमि अदिने तं आसियस्सेव ।।

वृ- इतरे संयतसमानकुलका ब्रुवते-अस्माकमेतान्यपत्यान्याभवन्ति, यथा मूल्ये अदत्ते यदन्येनान्यसत्केनाश्वेन वडवायां जायतेऽपत्यं तदश्विकस्यैव अश्वस्वामिन एव, कारणिकैरेवमेव व्यवहारनिश्चयादेवमेतान्यप्यस्माकमिति।। एवमुक्ते-

[भा.१८७९] जस्स महिला य जायति उब्भामइलाय तस्स तं होइ ।
संजइइत्त भणंती, इयरे बेंती इमं सुणसु ।।

वृ- यस्य महेलाया भार्याया उद्भ्रामिलायाः स्वैरिण्या जायते सुतः (स्वतः)परतश्च तस्य तत्सर्वमाभवति, एवमस्माकमपि इति 'संजइइत्ता' संयतीसमानकुलका भणन्ति।।

इतरे ब्रुवाते इदं वक्ष्यमाणं उद्भ्रामककौटुम्बिककृतं तत् श्रृणुत

[भा.१८८०] तेनं कुटुंबिएण उब्भामइलेण दोण्हवी दंडो ।
दिन्नो साचि य तस्सा जाया एवम्ह एयाइं ।।

वृ- येन स्वैरण्या अपत्यानि जनितानि तेन कुटुम्बिकेन उद्भामिलेन राजकुले गत्वा कथितम्-यथाहं देव! तस्याः सर्वभोगभरं वहाभि सा सोपि च तत् पतिर्मदीयेन भोगभरेण निर्यूढवान्, तस्मात्प्रसादं कृत्वा मदीयान्यपत्यानि दापयतेति, तत एवुक्ते राजा कुपितः, तथा भोगभरसंवाददर्शनत एवमिमावपन्याय-कारिणाविति द्वावपि सर्वस्योपहरणतो दण्डितबान् । तथा चाह । द्वयोरपि दण्डो दत्तो दापित इत्यर्थः, सा चापत्यापहरणतोऽनन्यगतिका सती तस्य जाता एवमस्प्राकमेतान्यपीति ।।

[भा.१८८१] पुनरवि य संजइत्ता बेंति खरियाए अन्नखरएण ।
जं जायति खरियाहिवतिस्स होति एवम्ह एयाई ।।

वृ- पुनरपि संयतीसत्का ब्रुवते, खरिकायां गर्दभ्यां अन्यखरकेण अन्यसत्केन गर्दभेन यत् जायते तत्सर्वं खरिकाधियतेर्भवति, एवमस्माकप्येतानीति।। तदेवं प्रथमा दृष्टान्तपरिपाटी भाविता ।।सम्प्रति द्वितीयायां विभावयिषुः प्रथमतो गोवर्गदृष्टान्तं भावयति-

[भा.१८८२] गोणीणं संगेल्लं नट्ठं अडवीए अन्नगोणेणं ।
जायाइं वत्थगाइं, गोणाहिवतीओ गेण्हंति ।।

वृ- गवां स्त्रीगवानां 'संगिल्लं' समुदायो नष्टोऽटव्यां पतितस्तत्र च तस्यान्यगवेन अन्यसत्केन पुंगवेन जातानि वत्सकानि वत्सकरुपाणि तानि गवेषणतः कथमपि गवां लाभे गवाधिपतयः स्त्रीगवीस्वामिनो गृह्णन्ति न पुंगवस्वामिनः । एमेतान्यप्यस्माकमिति।।

एवमुक्ते संयतसत्का उद्भ्रामिकादृष्टान्तं पूर्वोक्तमुपन्यस्यन्ति । तथा चाह-

[भा.१८८३] उब्भामिय पुव्वुत्ता अहवा नीया नु जा परविदेसं ।
तस्सेव नु सा भवती एवं अम्हं तु आभवती ।।

वृ- उद्भ्रामिका पुर्वमुक्ता यथा सापत्या तस्य जाता अथवा या परविदेशं नीता सा तस्यैवाभवति पश्चादपि नान्यस्य, एवमेतान्यपत्यान्येषा चास्माकमाभवतीति ।। एवमुक्ते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१८८४] इयरे भणंति वीयं तुब्भं तं नीयमन्नखेत्तं तु ।
तं होइ खेत्तियस्स एवं अम्हं तु एयाहं ।।

वृ- इतरे संयतीसत्का भणन्ति बीजं युष्मदीयं तत् किल क्षेत्रसादृश्यविप्रलम्भतः कथमपि वापकैरन्यत् क्षेत्रं नीतं अन्यत्र क्षेत्रे उप्तमित्यर्थः । तत् लोके क्षेत्रिकस्य भवति । एवमेतान्यपत्यान्य-स्माकमिति ।।संयतसत्का अत्र प्रत्युत्तरमाहुः-

[भा.१८८५] रन्नो धूयातो खलु न माउच्छंदाउ ताउ दिज्जंति ।
नवि पुत्तो अभिसिच्चइ तासिं च्छंदेन एवम्हं ।।

वृ- न खलु या राज्ञो दुहितरस्ता मातृच्छन्दतो मातृणामभिप्रायेण दीयन्ते, नापि पुत्रोऽभिषिच्यते तासां मातृणां छंदेनाभिप्रायेण किन्तु राज्ञः स्वाभिप्रायेणं ततो यथा राजा प्रधानमिति सर्व राज्ञ आयत्तमेवमत्रापि पुरुषः प्रधानमिति सर्व पुरुषस्यायत्तमतः सर्वमस्माकमाभवति ।। एवं व्यवहारे वर्तमाने श्रुतधर आचार्यो व्यवहारं छेत्तुकाम इदमाह-

[भा.१८८६] एमादि उत्तरोत्तर दिट्ठता बहुविहा न उ पमाणं ।
पुरिसोत्तरिओ धम्मो होइ पमाणं पवयणंमि ।।

वृ- एवमादय उत्तरोत्तरदृष्टान्ता बहुविधा अभिदीयमाना न प्रमाणम्, किन्तु प्रवचने पुरुषोत्तरिको धर्म इति पुरुषः प्रमाणम्, अतः सर्व पुरुषसत्का लभन्ते नेतरे इति

मू. (१०५) *गामानुगामं दुइज्जमाणे भिक्खू जं पुरतो कट्टु विहरइ, से आहच्च विसंभेज्जा, अत्थि याइं त्थ अन्ने केइ उवसंपज्जणारिहे, (कप्पइ) से उवसंपज्जियव्वे; सिया नत्थि याइं थ अन्ने केइ उवसंपज्जणारिहे, (तस्स) अप्पणो कप्पाए असम्मत्ते कप्पइ से एगराइयाए पडिमाए जन्नं जन्नं दिसं अन्ने साहम्मिया विहरंति तन्नं तन्नं दिसं उवलित्तए । नो से कप्पइ तत्थ विहारवत्तियं वत्थए. कप्पइ से तत्थ कारणवत्तियं वत्थए । तंसि च नं कारणंसि निट्ठियंसि परो वएज्जा- 'वसाहि अज्जो, एगरायं वा दुरायं वा !' एवं से कप्पइ एगरायं वा दुरायं वा वत्थए, नो से कप्पइ परं एगरायाओ वा दुरायाओ वा वत्थए । जं तत्थ परं एगरायाओ वा दुरायाओ वा वसइ, से संतरा छेए वा परिहारे वा ।।*

वृ- अथास्य सूत्रस्य कः सम्बधस्तत आह-

[भा.१८८७] आयरियउवज्झाएव (यंमि) अहिकिए अहिकिए य कालम्मि ।
निस्सोवसंपयत्ति य एगट्ठमयं तु संबंधो ।।

वृ- अधस्तनेष्वनन्तरसूत्रेष्वाचार्य उपाध्यायो वाधिकृतः कालो वा ऋतुबद्धो वर्षाकालश्चा-धिकृतस्तस्मिन्नधिकृते इदं सूत्रमापतितमत्राचार्यस्योपाध्यायस्य वा ऋतुबद्धे काले मरणस्याभिधानात् । अथवान्तरसूत्रे निश्राभिहिता, निश्रोपसम्पच्चेत्येकार्थमत्र चोपसम्पद्वक्ष्यते, ततोऽनन्तरमिदं सूत्रमुक्तमयं पूर्वसूत्रैः सह सम्बन्धः । पुनः प्रकारान्तरेण सम्बन्धमाह-

[भा.१८८८] अहवा एगयरम्मि नु आयरियगणिंमि वावि ।
आहच्च वीसुंभूते गच्छंति फड्डगं फड्डगा व गणं ।।

वृ- अथवेति प्रकारान्तरेति एकतरस्मिन्नाचार्ये गणिनि वा उपाध्याये आहच्च कदाचित् विष्वग्भूते कालं गते गच्छसत्काः स्पर्द्धकं गच्छन्ति स्पर्द्धका या गणं, ततो भिक्षुगमनप्रतिपादनार्थमिदं सूत्रम् ।। अनेन सम्बन्धेनापतितस्यास्य व्याख्या-ग्रामानुग्रामं ग्रामंग्राम ग्रामेण 'दूइज्जमाणे' गच्छन्, एतावता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋतुबद्धः कालो दर्शितो यं पुरतः कृत्वा प्रभुं कृत्वा इत्यर्थः । स नियमादाचार्य उपाध्यायो वाद्रष्टव्यो विहरति स आहच्च कदचित् 'वीसुंभेज्ञा' शरीराद्विष्वग् भवेत् कालगतो भवेत् । 'अत्थिया इत्थ' इत्यादि, अस्ति चात्र समुदायोऽन्यः कश्चित् आचार्यादुपाध्यायाद्वा व्यतिरिक्तो गणी प्रवर्तकः स्थविरो वृषभो वा उपसम्पदनार्हस्तत उपसम्पत्तव्यः । अथान्यो नास्ति कश्चिदत्रोपसम्पदनार्हस्तर्हि स आत्मनः कल्पनासामाप्त इति से तस्य कल्पते । एकरात्रिक्या प्रतिमया यत्र वसति तत्रैकरात्राभिग्रहेण 'जन्नं जन्नं' इत्यादि, यस्यां यस्यां दिशि अन्ये साधर्मिका विहरन्ति, तां तां दिशमुपलातुं, न पुनः 'स' तस्य कल्पते तत्रापान्तराले विहारप्रत्ययं वस्तुं, कल्पते 'स' तस्य कारणप्रत्ययं संघातादिकारणनिमित्तं वस्तुं, तस्मिंश्च कारणे निष्ठते यदि परो वदेत् वस आर्य ! ऐक्कात्रं द्विरात्रं वा एवं 'से' तस्य कल्पते एकरात्रं वा द्विरात्रं वा वाशब्दात् त्रिरात्रं वा वस्तुं, न 'स' तस्य कल्पते एकरात्रादिरात्राद्वा परं वस्तुं, यः (यं) तत्र एकरात्रात् द्विरात्राद्वा परं वसति तत्र 'स' तस्य स्वकृतादन्तरात् च्छेदः परिहारो वेति । अधुना निर्युक्तिविस्तरः । अत्रोपसम्पदनार्ह इत्युक्तम् । सा चोपसम्पद्द्विविधा -लौकिकी लोकोत्तरिकी वा । तथा चाह-

[भा.१८८९] लोगे य उत्तरंमी य, उवसंपय लोगिगी उ रायाई ।
रया वि होई दुविहो, सावेक्खो चेव निरवेक्खो ।।

वृ- उपसम्पद्द्विधा-लोके, उत्तरेच लोकोत्तरे । तत्र लौकिकी राजादौ । आदिशब्दात् युवराजादिपरिग्रहः । तथा च यदा राजा मृतो भवति, तदा युवराजमुपसम्पद्यन्ते, तं राजानं स्थापयन्तीत्यर्थः युवराजोऽन्यः स्थाप्यते । स च राजा भवति द्विविधः सापेक्षो निरपेक्षश्च सहापेक्षया सापेक्षः, तद्विपरीतो निरपेक्षः । तथा च प्रजाराज्याद्यपेक्षः सन् जीवन्नेव युवराजं स्थापयति निरपेक्षस्तु नैव ।।

अथ किं जीवन्नेव युवराजं स्थापयति । तत आह-

[भा.१८९०] जुवराजंमि उ ठविए, पयाउ बंधंति आयतिं तत्थ ।
नेव य कालगयंमी, खुब्भंति पडिवेसिय नरिंदा ।।

वृ- युवराजे राज्ञा साक्षाद्विद्यमानेन स्थापिते प्रजास्तत्र आयतिमागामिकालविषयां महतीमास्थां महतीमास्थां बध्नन्ति, नैव च सहसा कालगते राज्ञि प्रातिवेशिकनरेन्द्राः सीमातटवर्तिनः प्रत्यन्तराजानः क्षुभ्यन्ति । राज्यविलोडनाय संचलन्ति ।। उक्तः सापेक्षः संप्रति निरपेक्षमाह-

[भा.१८९१] पच्छन्नराय तेने आय परो दुविह होइ निक्खेवो ।
लोइय लोगुत्तरितो, लोगुत्तर थप्पियरे वोच्छं ।।

वृ- निरपेक्षो नाम यः प्रजानां राज्यस्य चायतिं नापेक्षेते, तस्मिन् कालगते स राजा मृतः प्रच्छन्नो ध्रियते । यथा अतीव राजा शरीरबाधितो वर्तते स च तावत् ध्रियते यावदन्यो निवेश्यते, स च कदाचित् स्तेनोऽपि । यथा निक्षेपणं निक्षेपः स द्विविधो द्विप्रकारस्तद्यथा-आत्मनः परतश्च । पुनरेकैको द्विधा-लौकिको लोकोत्तरिकश्च । तत्र लोकोत्तरिकः स्थाप्यः पश्चाद्वक्ष्ये इत्यर्थः इतरं लौकिकं प्रथम-गाथापादोपक्षिप्तं वक्ष्ये ।। प्रतिज्ञातमेव निर्वाहयति-

[भा.१८९२] निरवेक्खे कालगते, भिन्नरहस्सा तिगिच्छमच्चो य ।
अहि वास आसहिंडन, वज्झोति य मूलदेवो उ ।।

वृ- एको राजा निरपेक्षस्तस्य राज्ये मूलदेवश्चौरिकां करोति स कदाचिदारक्षकैः प्राप्तो राज्ञः पार्श्वे नीतो राज्ञा य स्तेन इति कृत्वा वध्य आज्ञप्तः । ततो राजा तत्क्षणमेव निजमावासस्थानमुपगतः क्षणमात्रेण च

सहसा कालगतः, तस्मिन्निरपेक्षे कालगते द्वौ भिन्नरहस्यौ राजा मृत इति रहस्यं द्वौ जाणितस्तद्यथा-चिकित्सको वैद्योऽमात्यश्च, राजा चानपत्यस्ततोऽश्वस्याधिवासना कृता सर्वत्र त्रिकचतुष्कचत्वरादिषु हिण्डाप्यते । कथं नाम राजलक्षणयुक्तं पुरुषं लभेमहि यं राजानं स्थापयाम इति । मूलदेवश्च यो बध्य आज्ञप्तः स तेनावकाशेन नीयमानो वर्तते ।।

[भा.१८९३] आसस्स पट्ठिदानं आनयनं हत्थचालणं रन्नो ।
अभिसेग भोइय परिभव तण जक्ख निवायणं आणा ।।

वृ- ततो अश्वेन तस्य मूलदेवस्य वध्यतया नीयमानस्य पृष्ट दत्तं, गाथायां स्त्रीत्वं प्राकृत्वात् प्राकृते हि लिंगं व्यभिचारि । ततो मूलदेवो यत्र राजा प्रच्छन्नो जवनिकान्तरितो ऽवतिष्ठते तत्रानीतस्ततो वैद्यकुमारामात्याभ्यां जवनिकाभ्यन्तरस्थिताभ्यां राज्ञो हस्त उपरिमुखो नीत्वा चालितः । एतत् राज्ञो हस्तवालनं । ततो वैद्यकुमारामात्याभ्यामुक्तं-कृता राज्ञानुज्ञा यथा मूलदेवं राजानमभिषिञ्चत, न शक्नोति वाचा वक्तुमिति । ततोऽभिषिक्तो मुलदेवो राज्ये नवरमसदृश इति कृत्वा केचिद्भोजिकाः परभिवमुत्पादयन्ति । न पुनः कुर्वन्ति विनयं । ततश्चिन्तयति मूलदवो, ममैते मूर्खतया परिभवं कुर्वते; परं किमिदानीमेते मूर्खतयैव कदाचित्स्वयमेवालमण्डलं जल्पिष्यन्ति तदानीं शासयिष्यामि । ततोऽन्यदिवसे आत्मनः शिरसि तृणशूकजातं कृत्वा आस्थानमण्डलिकायामुपविष्टः । ते च भोजिका मूर्खतया शनैः परस्परमुल्लपन्ति-अद्यापि नन्वेष चौरत्वं न मुञ्चति, अन्यथा कथमेतादृशस्य तृणशूकजातस्येदृशे भवने संभवो, नूनं तृणगृहादिषु चौरिकानिमित्तमतिगतस्ततः तृणशूकजातं शिरसि लग्नमिति । एतद्याकर्ण्य मूलदेवो रोषमुपागमत् ब्रूते य अस्ति कोपि नाम मच्चिन्ताकारी य एतान् शास्तीति, तत एवमुक्ते तत्पुण्यप्रभावतो राज्यदेवताधिष्ठितैर्निशितासिलताकैश्चित्रकर्मप्रतिहारैः केषांचित् शिरांसि लूनानि, शेषाः कृत प्राञ्चलयः आज्ञामभ्युपगमतवन्तः । तथा चाह 'भोइयपरिभवेगइ' त्यादि, भोजिकाः परिभवं कृतवन्तोऽन्यदामूलदेवस्तणात्ति तृणानि शीर्षे कृतवान् । ततस्तत्कोपावेशं दृष्ट्वा यक्षैरतिपातनं विनाशनं कृतम् शेषैराज्ञा प्रतीच्छिता ।। एतदेव सविशेषमाह-

[भा.१८९४] जक्खतिवातियसेसा सरणगया जेहिं तोसितो पुव्वं(व्वि) ।
ते कुव्वंती रन्नो अत्ताण परे य निक्खेवं ।।

वृ- यक्षातिपातितशेषाः शरणगता मूलदेवस्य शरणं प्रतिपन्नाः यैश्च पूर्व मूलदेवस्तोषितस्ते राज्ञ आत्मनः परस्य च निक्षेपमद्यप्रभृति युष्मदीया वयमेते वेति समर्पणं कुर्वन्ति ।। उक्तोऽनिरपेक्षो निरपेक्षश्च लोकोत्तरिको वक्तव्यस्तत्र प्रथमं सापेक्षमाह-

[भा.१८९५] पुव्वं आयतिबंधं, करेइ सावेक्खो गणहरे ठविए ।
अटविए पुव्वुत्ता, दोसा उ अनाहमादीया ।।

वृ- यो नामाचार्यः सापेक्षः स पूर्वमेव गणधरे स्थापिते साधूनामायतिबन्धं करोति यथायं युष्माकमाचार्य इत्यतेदाज्ञया वर्तितव्यमिति अथ न पूर्व गणधरं स्थापयति ततस्तस्मिन्नस्थापिते दोषाः पूर्वोक्ता अनाथादयो 'अनाहमो जाया' इत्यादिनाभिहिताः क्षिप्तादयो दोषा भवेयुः ।।

उक्तो लोकोत्तरिकः सापेक्षः, सम्प्रति निरपेक्षमाह-

[भा.१८९६] आसुक्कारोवरए अट्ठविते गणहरे इमा मेरा ।
चिलिमिलि हत्थाणुन्ना परिभव सुत्तत्थहावणया ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- आशुकारेण शूलादिनोपरतः कालगत आशुकारोपरतस्तस्मिन सत्याचार्ये अस्थापितेऽन्यस्मिन गणधरे इयं वक्ष्यमाणा मर्यादा। तामेवाह- 'चिलिमिली' त्यादि आशुकारोपरत आचार्यो जवनिकान्तरितः प्रच्छन्नो कार्यो चाचार्याणामतीवाशुमं शरीरं वाचापि वक्तुं न शर्कुवंतीति, ततो यो गणधरपदार्हस्तं जवनिकाबहिः स्थापयित्वा सूरयो भण्यन्तेको गणधरः स्थाप्यतामेवं चोक्ता जवनिकाभ्यन्तरस्था गीतार्था आचार्यहस्तं उपुर्यन्मुखं कृत्वा स्थाप्यमानगणधराभिमुखं दर्शयन्ति, वदान्ति च गणधरत्वमेतस्यानुज्ञातं परं वाचा वक्तुं न शक्नुवन्ति, एषा हस्तानुज्ञाः तत एतस्योपरि वासा निक्षिप्यन्ते स्थापित एष गणधर इति, पश्चात कालगता आचार्या इति प्रकाश्यन्ते। 'परिभव सुत्तत्थहावयणा' इति तो येऽभिनवस्थापित-स्याचार्यास्य परिभवोत्पादनबुद्धया आचार्योचितं विनयं न कुंर्वन्ति, तेषां सूत्रमर्थं वा स ह्रापयति न ददातीत्यर्थः ।। 'संप्रति आय परो दुविहो होई निक्खेवो, लोइय लोगुत्तरितो' इति व्याख्यानार्थमाह-

[भा.१८९७] दंडेन उ अनुसट्ठा, लोए लोगुत्तरे य अप्पाणं।
उवनिक्खिवंति सो पुन, लोइय लोगुत्तरे दुविहे ।।

वृ- लोके लोकोत्तरे च यथार्हं विनयमकुर्वंतो दण्डेनानुशिष्टा आत्मानमुपनिक्षिपन्ति। तत्र लौकिको दण्डः पूर्वमुक्तो मूलदेवेन भोजिकानां केषांचित कृतो, लोकोत्तरिकः सूत्रार्थापहरणं, इह नवे राज्ञीव नवे गणधरे स्थापिते निक्षेपरसो लोकस्य जायते। ततस्तत्फलाद्युपवर्ण्यते। निक्षेपस्य फलं लोके परिपालन, लोकोत्तरे ज्ञानादीनामभिवृद्धिः, स चोपनिक्षेपो द्विधा- लौकिको लोकोत्तरिकश्च। पुनरेकैको द्विधा-आत्मोपनिक्षेपः परोपरनिक्षेपश्च। तत्र लौकिक आत्मनिक्षेपो ये प्रगल्भास्ते आत्मनैवात्मानं राज्ञ उपनिक्षिपन्ति तिष्ठन्ति च चरणोपघातकारकाः प्रपन्नशरणाः, ये पुनरप्रगल्भास्ते ये राज्ञो वल्लभास्तैरात्मान-मुपनिक्षेपयन्ति, एष परोपनिक्षेपः।। लोकोत्तरिक आत्मनिक्षेपो गच्छवर्तिनां साधुनाम। तथा हि-ये गच्छेएव वर्तन्ते साधवस्ते आत्मानमात्मनैवाभिनवाचार्यस्योपनिक्षिपन्तिः परनिक्षेपः फड्डकगतानां, ते हि समागताः स्पर्द्धकपतिना निक्षिप्यन्ते यथा- एत अहं च युष्माकमिति।। इह 'अत्थि याइं थ अन्ने केई उपसंपज्जणारिहे' इत्याद्युक्तं, तत्र यद्यपि स गीतार्थस्तरुणः समर्थश्चेन्द्रियनोइन्द्रियाणां निग्रहं कर्तुं तथापि तेनान्यो गणो निश्रयितव्यो निश्रयस्य च परप्रत्ययनिमित्तं तत्रोपनिक्षेपः कर्तव्यः अत्र लौकिको दृष्टान्तस्तमेवाह-

[भा.१८९८] जह कोई वणिको ऊ धूयं सेट्ठिस्स हत्थे निक्खिविउं।
दिसिजत्ताए गतोत्ति कालगतो सो य सेट्ठीओ ।।

वृ- एको वणिक तस्य गृहे मारिरुत्थिता सर्वं गृहमुपच्छादितं। एका दुहिता तिष्ठति। परं स श्रेष्ठी निर्धन इति तां दुहितरं न परिणाययितुं समर्थस्ततो दिगयात्रां कर्तुमिच्छति। जानाति। चैतस्याः कन्यकायाः स्वभावं यथा समर्थात्मानमेषा संरक्षितुं, केवलमेका कन्यका महती गृहे तिष्ठन्ती दुष्टशीला लोकेन संभाव्येतेति मित्रश्रेष्ठिनो हस्ते तां निक्षिप्य मुक्त्वा वाणिज्येन दिगयात्रां गतः, तस्यापि च मित्रश्रेष्ठिनो गृहे मारिरभूत, ततः सोऽपि सकुटुम्बो विनाशमुपागमत। तथा चाह-स च श्रेष्ठी कालगतः। केवलमेका कन्यका स्थिता सा च मूलश्रेष्ठिदुहितुः सखी सा च ससखीकाप्यामात्नं संरक्षितुं क्षमा केवलं यद्नाप्रत्ययनिमित्तं राज्ञःसमीपमुपस्थिता। तथा चाह-

[भा.१८९९] सेट्ठिस्स तस्स धूया वणियसुयं धेतु रन्नो समुवगया।
अह यं एस सही मे पालेयव्या उ तुब्भेहिं ।।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वृ- तस्य मूलभूतस्य श्रेष्ठिनो दुहिता वणिकसुतां पितृमित्रवणिगदुहितरं गृहीत्वा राज्ञः 'समुपगता' समीपमुपगतापादेषु निपत्य विज्ञपयति। यथा-देव, युष्माभिर्निजदुहितारो रक्ष्यन्ते तथाहमेषा च मे सखी युष्माभिः पालयितव्या, आवयोरपि युष्मत्कन्यकात्वात।।

[भा.१९००] इय होउत्ति य भणिउं कन्नाअंतेउरंमि तुट्ठेण।
रन्ना पक्खित्ताओ, भणिया वाहरिउ पाला उ।।

वृ- इति एवं भवत्विति भणित्वा तुष्टेन राज्ञा ते द्वे अपि कन्येचान्तःपुरे प्रक्षिप्ता, भणिता च व्याहृत्य आकार्य पालापालका महत्तरिका।। किं भणितेत्यत आह-

[भा.१९०१] जह रक्खह मज्झ सुता तहेव एयातो देवि पालेह।
तीएवि ते ऊ पाले विन्नवियं विनीतकराणाए।।

वृ- यथा रक्षथ मम सुता कन्यकास्तथैव एते अपि द्वे मत्कन्यका प्रख्ये पालयथ। एवमुक्ते तयापि महत्तरिकया विनीतकरणया विज्ञप्तम देव। एते अतिपालयामि। एवमुक्तवा ते कन्येऽन्तःपुरं नीते। तत्र च मूलश्रेष्ठिदुहिता महत्तरिकां विज्ञपयित-

[भा.१९०२] जह कन्ना एयातो रक्खह एमेव रक्खह ममंपिः
जह चेव ममं रक्खह तह रक्खहिमं सहिं मज्झ।।

यथा एताः कन्या यूयं रक्षथ, एवमेव मामपि रक्षथ। यथा च मांरक्षय, तथेमां मम सखीमपि रक्षथ।।

[भा.१९०३] इय होउ अब्भुवगए अह तासिं तत्संवसंतीणं।
कालगया महत्तरिया जा कुणती रक्खणं तासिं।।

इत्येवं भवत्विति अभ्युपगते, तासां तत्र संवसन्तीनामथ कियत्कालातिक्रमेण या रक्षणं तासां करोति सा महत्तरिका कालगता।।

[भा.१९०४] सविकारातो दट्ठुं सेट्ठिसुया विन्नवेइ रायाणं।
मयहरिय दान निग्गह वणियागम रायविन्नवणं।।

वृ- महत्तरिकाकालगमनान्तरं ताः कन्यका सविकारा अभूवन। ततस्ताः सविकाराः श्रेष्ठिसुतया दृष्टा राजानं विज्ञपयति-अन्यमहत्तरिकां प्रयच्छत। दत्ता राज्ञा। तथा च महत्तरिकया 'निग्गहत्ति' कन्याः सविकारा उपलभ्य खरण्टिता। एवं तासां तिष्ठन्तीनां 'वणियागमत्ति' स देशान्तरगतो वणिक समागतः 'विन्नवणं' इति राज्ञो विज्ञपनमकार्षीत, यथा देव, नयामि निजपुत्रिकामिति।।

[भा.१९०५] पूएऊण विसज्जण, सरिसकुलदान दोण्हवी भोगो।
एमेव उत्तरंमि वि अवत्तराइंदिए हुवमा।।

वृ- ततः श्रेष्ठिकृतविज्ञप्तिकानन्तरंते द्वे अपि पूजयित्वा राज्ञा विसृष्टे सदृशकुले दानं विवाहिते इत्यर्थः, ततस्तयोर्द्वयोरपि विपुला भोगा दत्ताः। एवमेव अनेनैव प्रकारेण उत्तरेऽपि लोकोत्तरेऽपि अव्यक्तस्य रात्रिंदिवै रूपमा। इयमत्र भावना- यदि तावल्लौकिका अपि यशः- संरक्षणनिमित्तमात्मा-नमन्यत्रोपनिक्षिपन्ति, ततः सुतरां लोकोत्तरिकैः साधुभिः संयमयशःसंरक्षणनिमित्तमात्माऽन्यगणे निक्षेप्तव्यः। स चाव्यक्तो वयसा, ततो यावद्भिरहोरात्रैर्वयसा व्यक्तो भवति तावन्तं कालं तत्रान्यगणनिश्रायां तिष्ठति।। कथं पुनः आत्मानं गणं चोपनिक्षिपति तत आह-

[भा.१९०६] एते अहं च तुब्भं, वत्तीभूतो सयं तु धारेइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जसपव्वया उराला, मोक्खसुहं चेव उत्तरिए।।

वृ- एते मदीयाः साधवोऽहं युम्माकम, एवं चोपनिक्षेप्य तावत्तत्र तिष्ठति यावत व्यक्तो जायते, ततो व्यक्तीभूतः सन तस्मान्निर्गत्य स्वयंमेव गणं धारयति। एवं च कुर्वतस्य फलं, इह लोके उदारा यशःप्रत्ययाः, अवदातं यशोऽवदाताश्च लोके प्रत्ययाः संयमनैर्मविषयाः, परलोके फलं मोक्षसुखमौत्तरिके लोकोत्तरिके उपनिक्षेपे।। अथवा लौकिकस्य लोकोत्तरिकस्य य साक्षेपस्य पदस्थापनायोग्य विषयेयं परीक्षा-

[भा.१९०७] सावेक्खो पुन पुव्वं, परिक्खह जए धनो उ सुण्हाओ।
अनिययसहाव परिहावियभुतातच्चिया वुड्डा।।

वृ- सापेक्षः पुनः पूर्वपरीक्षते साधुन, यथा घनश्रेष्ठी स्नुषा अनियतस्वभावा। परीक्षितवान। कथमिति चेदुच्यते- रायगिहे नगरे धनो नाम सेट्ठी। तस्स चत्तारिं सुण्हातो। अन्नया सो चिंतेइ का मम सुण्हा घरं वुड्ढिं नोहिति। ततो अन्नया तासिं परिक्खणनिमित्तं सयणवग्गो निंतितो। भत्तोत्तरं सयलसयणसमक्खं सुण्हातो सद्दावेऊण पत्तेयं पत्तेयं पंचसालिकणा समप्पिया ए एसुरक्खिए करेह, यदा मग्गेहमि तया दायव्वा। ततो पढमाए "वुड्ढो एस न लज्जितो सयणसमक्खं पंचकणे समप्पेंतो, न किंवि जाणइ जया मग्गिहिती तया अन्ने दायव्वा" इति छुड्डिया। बिइयाए 'वुड्डसेसत्ति' भुक्ता। तइया ए आभरण करंडियाए सुरक्खीकया। चउत्थीए भाउयखेत्तेसु आरोविऊण वुड्ढिनीया जाया वरिसपणगेणमूडसंहस्सा। पुनो वि सेट्ठिना वरिसपनगानंतरं सयणवग्गं निमंतेऊण भुत्तुत्तरं सयणसमक्खं तातो सद्दाविया- तो ते मे पंच सालिकण समप्पेह। ततो पढमाए अन्नातो ठाणातो आणेऊण समप्पिया, सेठिया सवहसाविता भणिया ते चेव इसे पंच सालिकणा किं वा अन्ने, तीए कहियं ते मए तया चेव छुड्डिया, पुन अन्ने आणीया'। एवं बिइयाए वि, नवरं तीए भुत्ता कहिया। तइयाए ते चेव आनीया, भणियं 'आभरणकरंडियाए मए सुरक्खीकया'। चउत्थीए भणियं 'ताय सगडाणि समपिज्जंतु जेन तेपंच सालिकणा आनिज्जंते, ततो सेठिना विम्हिएण पुच्छियं, तीए कहियं जहावत्तं जाव जाया मुडसहस्सा। तओ परितुट्ठेण सेट्ठिणा भणियं- एतीज मज्झ पंच सालिकणा अतीव वुड्ढिं नोहितित्ति ह सा मम घरस्स सामिणी। तइया भंडाररक्खिया जीए भुत्ता सा महासनावावारे निजोइया, पढमा घरबाहिकम्मे। तथा चाह-प्रथमया परिहापिता, द्वितीयया भुक्तास्तृतीयया तावन्मात्रा घृताश्चतुर्थ्या 'वुड्ढत्ति' वर्धित्ताःएष दृष्टान्तः।।

सम्प्रति दार्ष्टान्तिक-योजनामाह-

[भा.१९०८] उमेसिवमतरंते य उज्झितं आगतो न खलु जोग्गो।
कितिकम्मभारभिक्खादिएसु भुत्ता यभुत्तीए।।

वृ- एवमाचार्येणापि परीक्षानिमिंत्त साधून समर्प्य देशदेशने शिष्या नियोक्तव्यास्तत्र योऽवमे दुर्भिक्षेऽशिवेवा साधून त्यक्तवाऽथवा येऽतरन्तोऽसहायाततानवा त्यक्तवा समागतः, स खलु न योग्यः। येनापि कृतकर्मसुपात्रलेपनादिव्यापारेषु, भारे उपध्युपकरणवाहनेन, भिक्षादिषु चात्मभुक्तया भुक्ता उपयोगं नीताः साधवो, न च सम्यक् पालिताः सोऽपि न योग्यः।।

[भा.१९०९] न य छुड्डिया न भुत्ता नेव य परिहावियान परिवूढा।
ततिएणं ते चेव उ समीव पच्छाणिया गुरुणो।।

वृ- तृतीयेन ये समर्पिताः साधवो गुरुणा, ते न छुड्डिया न दुर्भिक्षाशिवादिषु परित्यक्ताः, नापि भुक्ताः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवलमात्मोपयोगं नीताः,नापि परूषशिक्षाप्रदानादिना परिहापिताः परिहानिं नीताः नाप्यन्यान्यपरित्राजनेन परिवर्धिताः। किन्त्वे (वं) तावन्तो गुरुसमीपं प्रत्यानीताः।। चतुर्थमाह-

[भा.१९१०] उवसंपाविय पव्वाविया य अन्ने ये तेसि संगहिया।
एरिसए देइ गणं कामं तइयंपि पूएमो।।

वृ- येन बहव उपसम्पादिता उपसम्पदं ग्राहिता बहवः परित्राजिताश्च, अन्ये च तेषामुपसम्पादितानां परित्राजितानां च सम्बन्धिनः संगृहीतास्तेऽपिउपसम्पदं ग्राहयिष्यन्ते परित्राजयिष्यन्ते चेत्यर्थः, ईद्दशे चतुर्थे ददाति गणमाचार्य एकान्तयोग्यत्वात। न केवलमेतास्मिन, किन्तु काममतिशयेन तृतीयमपि पूजयामश्चतुर्थालाभे तमपि योग्यं प्रशंसाम इत्यर्थः।। तत्रात्मपरोपनिक्षेपयोजनामाह-

[भा.१९११] तम्मि गणे अभिसित्ते सेसगभिक्खूगणअप्प निक्खेवो।
जे पुन फड्डगवतिया आयपरे तेसि निक्खेवो।।

वृ- तस्मिन चतुर्थे तदभावे तृतीय वा गणे पदे अभिषिक्ते शेषकभिक्षूणां तद्गणान्तर्वर्तिनामात्म-निक्षेपो भवति। ये पुनः स्पर्धकपतयस्तेषामात्मतः परतश्च निक्षेपः, स्पर्धकपतीनामात्मतस्तदाश्रितानां परतः स्पर्धकपतिद्वारेण तेषामुपनिक्षेपभावात।।

एवमात्मपरोपनिक्षेपो निरपेक्षेऽपि कालगते द्दष्टव्यस्तथा चाह-

[भा.१९१२] एवं कालगते ठविह सेसाणआय निक्खेवो।
फड्डगवईयाणं पुनआयपरो होति निक्खेवो।।

वृ- एवं निरपेक्षे सहसा कालगते पूर्वप्रकारेणान्यस्मिन स्थापिते शेषाणां गणान्तर्वर्तिनात्मनिक्षेपो भवति। स्पर्धकपतिकानां त्वात्मपरोपनिक्षेपः, स्पर्धकपतीनामात्मतस्तदाश्रितानां परतो निक्षेप इत्यर्थः।।

[भा.१९१३] उवसंपज्जणअरिहे अविज्जमाणंमि होई गंतव्वं।
गमनंमि सुद्धसुद्धे चउभंगो होति नायव्वो।।

वृ- उपसम्पदनार्हे अविद्यमाने भवत्यन्यत्र गन्तव्यं। तत्र च गमने (शुद्धा) शुद्धपदे संयोगतश्चतुर्भङ्गी भवति ज्ञातव्याः तद्यथा-निर्गमने शुद्धो गमेन च शुद्ध इति प्रथमः, निर्गमने शुद्धो गमनेऽशुद्ध इति द्वितीयः, निर्गमनेऽशुद्धो गमने शुद्ध इति तृतीयः, निर्गमनेऽशुद्धो गमने चाशुद्ध इति चतुर्थः। गाथायां चउभङ्गो इति पुंस्त्वनिर्देशः प्राकृतत्वात।। तत्र प्रथमभङ्गाव्याख्यानार्थमाह-

[भा.१९१४] असतीए वायगस्स, जं वा तत्थत्थि तंमि गहियंमि।
संघाडोएगो वा दायव्वो असती एगागी।।

वृ- यः कालिकमुत्कालिकं द्दष्टिवादं वा वाचयति स नास्ति, ततस्तस्य वाचकस्याऽसत्यभावे, अथवायत्तत्रास्ति श्रुतं तत्सर्व गृहीतं ततस्तस्मिन्गृहीतेऽन्यसूत्राद्यर्थम, अन्यत्र व्रजति, तस्य च व्रजत एकः संघाटो दातव्यः। असति संघाटकाभावे एकाकी व्रजते।।

[भा.१९१५] अह सव्वेसिं तेसिं नत्थि अ अवसंपयारिहो अन्नो।
सव्वे घेत्तुं गमनं जतियमेत्ता व इच्छंति।।

वृ- अथ तेषां गच्छवर्तिनां साधूनां सर्वेषामान्य उपसम्पदार्हो नास्ति, ततः सर्वान गृहीत्वा गमनं कर्तव्यम। अथ सर्वे गन्तुं नेच्छांति, तर्हि यावन्मात्रा इच्छन्ति तावन्मात्रैः सह गन्तव्यम। एष निर्गमशुद्ध उच्यते।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.१९१६] एवं सुद्धे निग्गमे। वइयाइअप्पडिबज्झंतो।
संविग्गमनोन्नाहिं तेहिं वि दायव्वो संघाडो।।

वृ- एवं शुद्धे निर्गमे व्रजिकादिषु गोकुलादिष्वप्रतिबध्यमानः प्रतिबन्धमकुर्वन गच्छेत। तत्र यद्यपान्तराले संविग्नमनोज्ञाः सन्ति। ततस्तैः सह मिलित्वा गन्तव्यं, तैरपि च निर्गमनशुद्धत्वात ज्ञानाद्युपसम्पन्निमितं च चलितत्वादवश्यं संघाटो दातव्यः।। अथ यदा एकं द्वौ वा दिवसौ संघाटो न भवति व्याकुलत्वात, तदा किं कर्तव्यमत आह-

[भा.१९१७] एगंव दो व दिवसे, संघाडत्थं एसो पडिच्छिज्जा।
असती एगा (गी) उ जयणा उवही न उवहम्मे।।

वृ- एकं द्वौ दिवसौ स सङ्घटार्थं प्रतीक्षेत। असत्यभावे संघाटस्य एकाकी व्रजेत, तत्र च यतना कर्तव्या। सा च प्राक्कल्पाध्ययनेऽभिहिता। ततो उपधिर्नोपहन्यते, यतनया प्रवृत्तत्वात।। उपसंहारमाह-

[भा.१९१८] एसो पढमो भंगो एवं सेसा कमेण जोएज्जा।
आसन्नुज्जयठाणं गच्छे दारा य तत्थ इमे।।

वृ- एषोऽनन्तरोदितः प्रथमो भङ्ग। एवमुपदर्शितेन प्रकारेण शेषा अपि भङ्गका क्रमेण योक्तव्यास्तद्यथा-निर्गमनशुद्धः प्राग्वत, गमनाशुद्धो व्रजिकादिषु प्रतिबनधकारणात। निगर्मनाशुद्धो दोषाकीर्णतया निर्गमनात, गमनशुद्धो व्रजिकादिष्वप्रतबन्धांत निर्गमनाशुद्धो गमनाशुद्धश्च प्राग्वत। अथ प्रथमभङ्गवर्ती प्रशस्यः, कारणतो द्वितीयभङ्गवर्त्यपि। एवं च गच्छता तेन ये आसन्ना उद्यता उद्यतविहारिणस्तेषां स्थानं गच्छेत, तत्र च गतस्य परीक्षादिनिमित्तमिमानि द्वाराणि भवन्ति।। तान्येवाह-

[भा.१९१९] परिच्छहानि असती आगमनं निग्गमो असंविग्गे।
निवेयणजयणमि सढं दीहखद्धं पडिच्छंति।।

वृ- परीक्षा 'हानीति' हानिवृद्धिविषया कर्तव्या, यत्र ज्ञानादीनां हानिस्तत्र न वस्तव्यमन्यत्रवस्तव्य-मिति भावः। 'असतित्ति' यस्य समीपं गच्छोपसम्पन्नस्तस्मिन सापेक्षे निरपेक्षेवा कालगतत्वेनासति, योऽन्यः स्थापितस्तस्य सकाशे स्थाव्यम। तस्मिन्नपि सीदति यावत्कुलादिस्थविराणामागमनं तावत्प्रतीक्षणीयं, तैरपि प्रतिचोदने कृते सीदति निर्गमो विधेयः, गच्छता च संविग्नाभावे बहिर्वस्तव्यम-संविग्ने निवेदना कर्तव्या बहिर्वसत्यभावे तेष्वसंविग्नेषु नवरं यतना विधेया। तथाऽसंविग्नेषु यासं वसनं निसृष्टमनुज्ञातमेकरात्रमुत्कर्षतस्त्रीणि दिनानि, वर्षादिकारणतः पुनर्यतनया दीहखद्धमपि प्रचुरमपि दीर्घकालं प्रतीक्ष्यते। एष द्वारगाथासंक्षेपार्थः।।

साम्प्रतमेनामेव विवपीषुः प्रथमतः पारच्छहानिति द्वारमाह-

[भा.१९२०] पासत्थादिविरहितो, काहियमाईहि वा वि दोसेहिं।
संविग्गमपरितंतो साहम्मियवच्छलो जाउ।

वृ- अपान्तराले पार्श्वस्थादिविरहितः पार्श्वस्थादिसंसर्गिविप्रमुक्तः काथिकादिभिर्वा भावप्रधानोऽयं निर्देशः। काथिकत्वादिभिर्वा दोषैर्विप्रमुक्तस्तथा संविग्नोऽपरित्रान्तोऽपरिश्रान्तः सामाचार्यामिति गम्यते। तथा यः साधर्मिकवत्सलः प्रवचनलिङ्गसाधर्मिकवात्सल्यपरायणः सः।

[भा.१९२१] अब्भुज्जए सुठाणं, परिच्छिउं हीयमाणए मोत्तुं।
केसु पदेसुं हानी, वुड्ढी वा तं निसामेहि।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अभ्युद्यतानामुद्यतविहारिणां स्थानं परीक्ष्य, गाथायां सप्तमी षष्ठ्यर्थे, हीयमानकान् मुक्त्वा तिष्ठेत्। अथ केषु पदेषु हानिर्वृद्धिर्वा सूरिराह-तदेतत्कथ्यमानं निशामय।। तदेवाह-

[भा.१९२२] तवनियमसंजमाणं जहियं हानी न कप्पते तत्थ।
तिगवुड्ढी तिगसोही पंचविसुद्धी सुसिक्खा य।।

वृ- यत्रतपो नियमसंयमानां हानिस्तत्र न कल्पते वस्तुं, यत्र पुनस्त्रिकवृद्धिर्ज्ञानदर्शनचारित्रवृद्धिर्यत्र च त्रिकस्याहारोपधिशय्यारूपस्य शोधिर्यत्र च पञ्चानां पार्श्वस्थादिस्थानानां विशुद्धिस्तेष्वप्रवर्तनं यत्र च सुशिक्षाग्रहणे आसेवने च तत्र वस्तव्यम्।। साम्प्रतमेनामेव गाथां विवृणोति-

[भा.१९२३] बारसविहे तवे ऊ इंदियनोइंदिए य नियमे उ।
संजमसत्तरसविहे हानी जहियं तहिं न वसे।।

यत्र द्वादशविधे तपसि इन्द्रियविषये च नियमे, संयमे सप्तदशविधे हानिस्तत्र न वसेत्।।

[भा.१९२४] तवनियमसंजमाणं एएसिं चेव तिण्ह तिगवुड्ढी।
नाणादीन व तिण्हंतिगसुद्धी उग्गमादीणं।।

वृ- एतेषामेव त्रयाणां तपो-नियम-संयमानां वृद्धिस्त्रिकवृद्धिः, अथवा ज्ञानादीनां त्रयाणां वृद्धिस्त्रिकवृद्धिः। त्रयाणामुद्गमादीनामुपलक्षणमेदाहारादीनां वा त्रयाणां शुद्धिस्त्रिकशुद्धिः।।

[भा.१९२५] पासत्थे उसन्ने कुसील संसत्त तह अहाच्छंदे।
एएहिं जो विरहितो पंचविसुद्धो हवई सो उ।।

वृ- पार्श्वस्थो अवसन्नः कुशीलः संसक्तो यथाच्छन्द एते पञ्चापि प्राक् सप्रपञ्चप्ररूपिता एतैः स्थानैर्यो विरहितः स पञ्चविशुद्धो भवति। पञ्चविशुद्धावेव प्रकारान्तरमाह-

[भा.१९२६] पंच य महव्वयाइं अहवा वी नाण-दंसण-चरित्तं।
तव विनओ वि य पंच उ पंचविहुवसंपया वावि।।

वृ- काशब्दः प्रकारान्तरोपप्रदर्शने पञ्चमहाव्रतानि। अथवा ज्ञानं दर्शनं चारित्रं तपो विनय इति पञ्च, यदि वा पञ्चविधा ज्ञानदर्शनचारित्रतपोवैयावृत्यभेदतः पञ्चप्रकारा उपसम्पत् पञ्च तैः पञ्चभिर्विशुद्धः पञ्चविशुद्धः सुशिक्षमाह-

[भा.१९२७] सोमनसिक्खसुसिक्खा सा पुन आसेवने य गहणे य।
दुविहाए वि न हानी जत्थ य तहियं निवासो उ।।

वृ- शोभना शिक्षा सुशिक्षा। सा द्विविधा, तद्यथा-आसेवने ग्रहणे च। आसेवने प्रत्युपेक्षणादेः सामाचार्या ग्रहणमागमस्य एतस्यां द्विविधायामपि यत्र न हानिस्तत्र निवासः कल्पते कर्तुम्।।

[भा.१९२८] एएसु ठाणेसुं, सीयंते चोदन्ति आयरिया।
हावेंति उदासीना, न तं पसंसंति आयरिया।।

वृ- एतेषु स्थानेषु तपःप्रभृतिषु स्वयमाचार्या हीयमाना न दृश्यन्ते, शिष्यास्तु केचिसीदन्ति तान् सीदतो यत्राचार्याश्चोदयन्ति तं गच्छं निवासयोग्यतया आचार्याः प्रशंसन्ति। यत्र पुनराचार्या उदासीना मध्यस्थाः सामाचार हापयति उपेक्षन्ते न तं प्रशंसन्त्याचार्याः नासौ गच्छ उपसम्पदनीय इत्यर्थः। किंः कारणमत आह-

[भा.१९२९] आयरिय उवज्झाया नाणुन्नाया जिनेहिं सिप्पट्ठा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाणे चरणे जोगा वहाउ ते अनुन्नाया ।।

वृ- आचार्या उपाध्यायाश्च जिनैस्तीर्थकृद्भिर्न शिल्पार्थाः शिल्पशिक्षणनिमित्तमनुज्ञाताः कै कारणेः पुनरनुज्ञातास्तत आह-ज्ञाने चरणे च ये योगास्तेमाषावहाः प्रापका यतो भविष्यन्ति ततस्ते अनुज्ञाता ज्ञानचरणस्फातिनिमित्तमनुज्ञाता इत्यर्थः । अपि चेद्दशा आचार्या उपाध्याया अनुज्ञाताः-

[भा.१९३०] नाण चरणे निउत्ता जा पुव्व पुरूविया चरणसेढी ।
सुहसीलट्ठाणविजढे, निच्चं सिक्खावणा कुसला ।।

वृ- ज्ञाने एकग्रहणात्तज्ञातीयस्य ग्रहणमिति न्यायाद्दर्शने चारित्रे च नियुक्ताः सततोद्दतास्तथा। सुखशीलाः पार्श्वस्थादयः तेषां स्थानं श्रियते सेवन्ते तद्विजढे तद्रहिते, या पूर्व कल्पाध्ययने कृतिकर्मसूत्रे चरणश्रेणिः प्ररूपिता तवां स्थिताःतथा नित्यं सदा शिक्षापनायां ग्रहणशिक्षायामासेवनाशिक्षायां च ग्राहयितव्यायां कुशलाः समर्थाः ईद्दशां समीपमुपगम्योपसम्पत्तव्यम् ।।गतं परिच्छिहाणित्ति द्वारमिदानीमसतित्ति द्वारमाह-

[भा.१९३१] जेए वि पडिच्छित सो, कालगतो सो वि होइ आहच्च ।
सो विय सावेक्खो वा निरवेक्खो वा गुरू आसि ।।

वृ- येनापि स प्रतीच्छितो यस्य समीपे सशिष्यपरिवार उपसम्पन्न सोऽपि आहच्च कदाचित् कालगतो भवेत् सोऽपि च गूरूः कालगतः सापेक्षो वा आसीन्निरपेक्षो वा, तत्र यः सापेक्षः सोऽमुं विधिं करोति ।।

[भा.१९३२] सावेक्खो सीसगणं, संगहकारेइ आनुपुव्वीए ।
पडिच्छागव वेत्ति, एस वि याणे अह महल्लो ।।

वृ- सापेक्षः शिष्यगणं स्वदीक्षितशिष्यसमूहभिनवस्थापितस्य संग्रहमानुपूर्व्यानुपूर्वीकथनेन कारयति । यथा पूर्वं सुधर्मस्वामी गणधर आसीत् । ततस्तच्छिष्यो जम्बूस्वामी गणधर आसीत् । तस्यापि शिष्यः प्रभवः । एवं तावद्यावत् सम्प्रति वयमहमपि च । सम्प्रति महान् वृद्धीभूतस्ततो मयाऽमुको गणधरः स्थापितो वर्तते तस्याज्ञां कुर्यात् बैनयिकादिकं च, तथा ज्ञानदर्शनादि प्रतीच्छादिनिमित्तमागता स्तानपि ब्रूते-एष मम स्थाने विज्ञायेत, ममैवैतस्य सम्प्रति वैनयिकादिकं कर्तव्यमित्यर्थः । अत्रैवार्थे दृष्टान्तमाह-

[भा.१९३३] जह राया व कुमारं, रज्ने ठावेउमिच्छए जं तु ।
भड जोहे वेति तंग, सेवए तुब्भे कुमारंति ।।

[भा.१९३४] अह यं अतीमहल्लो, तेसिं वित्ती उ तेन दावे इ ।
सो पुन परिच्छिउणं, इमेण विहिणा उ ठावेइ ।।

वृ- यथा राजा यं कुमारं राज्ये स्थापयितुमिच्छति, तं प्रति भटान् योधांश्च ब्रूते । साम्प्रतमहमतीव महान् ततो यूयं सेवध्वममुकं कुमारमिति । एवं तानुक्त्वा तेषां वृत्तीस्तेन कुमारेण दापयति येन त तदनुरक्ता जायन्ते, । स पुनः कुमारोऽनेन वक्ष्यमाणेन विधिना परीक्ष्य राज्ये स्थाप्यते । तमेव विधिमाह-

[भा.१९३५] परमन्न भुंज सुणगा छड्डण दंडेन वारणं बितिए ।
भुंजइ देइय तइओ गस्स उ दानं न इयरेसिं ।।

वृ- राजा बहूनां कुमाराणां मध्ये कतरं कुमारं युवराज स्थापयामीति विचिन्तयन् परीक्षानिमित्तं तान् सर्वान् कुमारान् शब्दापयित्वा तेषां पृथक् पृथक् स्थाले परमान्नं पायसं परिवेषयति । परिवेष्य शृङ्खलाबद्धान् शुनकान् व्याघ्रकल्पान् कुमारान् प्रति मोचयति, । ते च शुनका वेगेन कुमारसमीप-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मागतास्तत्रैको राजपुत्रः शुनकभयेन पायसं परित्यज्य पलायितः। द्वितीयो राजपुत्रो दण्डेन तेषां शुनकानां वारणं करोतिमुंक्ते च न च किमति तेभ्यो ददाति, । तृतीयः पुनः स्वयं भुंक्ते शुनकेभ्योऽपि च स्वस्थालात् परस्थालाश्च ददाति । तस्य तृतीयस्य राजपुत्रस्य राजदानं, नेतरयोर्द्वयोः । किं कारणमिति चेदत आह–

[भा.१९३६] परबलेपोल्लिउ नासति, बितिउ दानं न देइ उ भडाणं।
न वि जुझंते तेऊ एए दोवी अनरिहाओ ।।

वृ- प्रथमो यदा परबलमागच्छति तदानेन परबलेन प्रेरितः सन् राज्यमपहाय नश्यति । द्वितीयो न भटानां सुभटानां किमपि ददाति न च ते भटा दानमृते परबले समागते युध्यन्ते । ततः समर्थस्यापि परबलेन प्रेरणमत एतौ द्वावप्यनर्हौ राज्यस्य ।।

[भा.१९३७] तइओ रक्खइकोसं देइ य भिच्चाण ते य जुझंति।
पालेयव्वे अरिहो रज्जंतो तस्स तो दिन्नं ।।

वृ- तृतीयः पुनः कुमारः कोशं भाण्डागारं रक्षति । मृत्यानां सुभटानां ददाति ततस्ये मृत्याः परवले समागते युध्यन्ते ततः पराः (रं) मग्नं परबलमपगच्छति । तदपगतौ च स्वराज्यसौख्यमतः स पालयितत्वो राज्येऽर्ह इति तत् राज्यं राज्ञातस्य दत्तम् । यथा भो लोका एष युवराजो युष्माभिरेश आसेवनीयः ।।

[भा.१९३८] अभिसित्तो सट्ठाणं अनुजाणे भडादि अहियदानं च।
वीसुंभिय आयरिए गच्छेवि तयानुरूवं तु ।।

वृ- एवं तस्मिन् युवराजे स्थापिते यदा राजा कालगतो भवति, तदा ते भटप्रभृतयस्तं युवराजं राजानमभिसिञ्चन्ति । अभिषिक्ते सति तस्मिन् सेवका उपस्थाप्य स्वं स्वमायोगस्थानं निवेदयन्ति । ततः सो अभिषिक्तो नवको राजा यत् पूर्वमायोगस्थानं तत्तस्मै अनुजानाति । अधिकं च तेषां भटादीनां दानं द्विपदादिदानं सुवर्णादिदानं ददाति, । एष दृष्टान्तोऽयमर्थोपनयः । विष्वग्मृते शरीरं पृथग्भूते मृते इत्यर्थः आचार्ये गच्छेऽपि तदनुरूपं तृतीयराज्यार्हकुमारानुरूपं आचार्य स्थापयन्ति । इमयत्र भावना-आचार्येण द्रव्यापदादिषु शिष्याः परीक्षणीयाः । तत्र योऽशक्तिको भीरूः स राजप्रद्वेषादिषु समुत्पन्नेषुगमपमहाय नश्यतीति प्रथमकुमार इव गुरुपदस्यार्हः । यः पुनरदाता सोऽदायकत्वेन संग्रहोपग्रहौ न करिष्यतीत्ययोग्यः । यस्त्वभीरूतया शुनकस्थानीयान् प्रत्यनीकान्वारयति दायकत्वेन च सङ्ग्रहोग्रहौ करोति, स योग्य इति गणधरपदे स्थापयितव्यः ।तस्मिंश्च स्थापिते कालेन विष्वग्भूतेआचार्ये साधवः कृतप्राञ्जलयस्तमुपतिष्ठन्ते । उपस्थाय च यो यस्य पूर्व नियोग आसीत् स तं तस्मै नवकाचार्याय कथयति । एतदेवाह-

[भा.१९३९] दुविहेण संगहेण, गच्छं संगिण्हए महाभागो ।
तो विन्नवेंति तेवी तं चेव ठाणयं अम्हं ।।

वृ- सोऽभिनवस्थापितो महाभागो गच्छं द्विविधेन संग्रहेण द्रव्यसंग्रहेण भावसंग्रहेण वस्त्रपात्रादिना भावसंग्रहेण ज्ञानादिना संगृह्णाति । एवं सगृह्णाति तस्मिन् ततस्तेऽपि साधवः कृतप्राञ्जलयः तं विज्ञपयन्ति । तथा तदेव स्वं स्वं स्थानमस्माकं प्रयच्छतेति ।।

अथ किं किं तेषां स्थानमिति तत्स्थान-निरूपणार्थमाह-

[भा.१९४०] उवगरण वालवुड्ढा, खमग गिलाणे य धम्मकहि वादी ।
गुरुचिंत वायणा पेसणासु कितिकम्मकरणाय ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एको ब्रूते-अहमुपकरणत्ति उपकरणोत्पादक आसं, अन्योऽहं बालवृद्धानां वैयावृत्यकरो, ऽपर क्षपकवैयावृत्यकरो, ऽन्यो ग्लाने इति ग्लानैयाहृतकरः अपरो धर्मकथा धर्मकथाव्यापारनियुक्तः, अन्यो वादी परवादिमथने नियुक्तः, गुरूचिंतत्ति अपरो ब्रूते-अहं गुरोर्यत्कर्त्तव्यं तत्र नियुक्तः, वायणत्ति अपरो हं वाचनाचार्यत्वे नियुक्त, अन्योऽहं प्रेषणे नियुक्तः, अपरो ब्रूतेऽहं कृतिकर्मकरणे विश्रामणे ।।

[भा.१९४१] एएसुं ठाणेसुं, जो आसि समुज्जओ अठविओवि ।
ठविओवि न विसीयइ,सठाविउमलं खलु परेसिं ।।

वृ- एते खलु उपकरणादिषु कृतकर्मपर्यवसानेषु स्थानेषु यः पूर्वस्थापितोऽपि गणधरपदे समुद्यत आसीत् ।सगणधरपदे स्थापितोऽप्येतषुस्थानेषु न विषीदति कृतकरणत्वात् । स इत्थंभूत एतेषु स्थानेषु परान्, गाथायां षष्ठी द्वितीयार्थे प्राकृतत्वात् सम्बन्धे वा, यथा भाषाणामश्रीयादित्यत्र स्थापयितुमलम् ।।

[भा.१९४२] एवं ठितो ठवेइ अप्पाण परस्स गोवि सो गावो ।
अट्टितो न ठवेइ, परं न य तं ठवियं चिरं होई ।।

वृ- एवं पूर्वं गणधरपदे अस्थापित एतेपूपकरणादिस्थानेषु स्थितः सन् आत्मनः परस्य चैतेषु स्थानेषु स्थापयति, स्थापयिता भवति; । गोवृष इव गाः स्वस्थाने, यः पुनः पूर्वमेतेषु स्थानेषु स्थितः सपरमुपलक्षणमेतत् । आत्मानं च न स्थापयति स्वयं तत्राव्यासत्वात् । न च तत्स्थापितं चिरं भवति, । कस्मादिति चेदुच्यते-स यदान्यान् उपकरणादिष्वनुद्यच्छतः शिक्षयति, । यथा सति बले किं यूयं स्वशक्त्या नोद्यच्छथानुद्यच्छंतो हि वैयावृत्त्यफलात् भ्रश्यथ, तदा ते चिन्तयेयुः व यदि वैयावृत्त्यफलमभविष्यत्ततरत्वमप्येतेषु स्थानेपूद्यस्यथा इति । अथवा वैयावृत्यफलं श्रद्दधाना अपि खग्गुडत्वेनैवं मन्यरेन् एवं जानन्तो यूयं किं पूर्वं नावर्तिध्वमिति ।।

सम्प्रति गो वृष इव गा इति दृष्टान्तं भावयति-

[भा.१९४३] पउरतणपाणियाइं, वणाइं रहियाइं खुड्डजंतूहिं ।
नेइ वि सो गोणीओ, जाणइ य उवट्ठकालं च ।।

वृ- वृषो बलीवर्दो गोधनानि प्रचुरतृणपानीयानि तथा क्षुद्रजन्तुभिः क्षुद्रप्राणिभीरहितानिनयति जानाति च, उपस्थानकालमभ्यागमबेलां ज्ञात्वा च स्वास्थानमानयति, ।एवमभिनवस्थापित आचार्यो गच्छं स्वस्वव्यापारे नियोजयन् परिपालयति । अत्रैव दृष्टान्तान्तरमाह-

[भा.१९४४] जह गयकुलसंभूतो, गिरिकंदर-विसमवडयदुग्गेसु ।
परिवहति अपरितंतो, नियसरीरुग्गते दंते ।।

वृ- यथा गजकुलसंभूतोऽनेन जात्यतामाह-गिरिकन्दरेषु गिरिगुहासु विषमकटकेषु विषमेषु गिरिपादेषु उग्रेषु वा परित्रान्तोऽश्रान्तः सन् निजशरीरोद्गतान् दंतान् परिवहति-

[भा.१९४५] इय पवयणभत्तिगतो, साहम्मियवच्छलो असढभावो ।
परिवहइ साहुवग्गं खेत्तविसमकालदुग्गेसु ।।

वृ- इति अनेन गजदृष्टान्तप्रकारेण । प्रवचनेभक्तिगतो गच्छवाहकत्वं प्रवचनभक्तिं मन्यमानः साधर्मिकवत्सलो लिङ्गप्रवचनाभ्यां ये साधर्मिकास्तद्वात्सल्यपरायणोऽशठभावोऽमायावी विषमेषु क्षेत्रेषु विषमेषु च कालेषु दुर्भिक्षमार्याद्युपद्रवव्रातसंकुलेषु दुर्गेषु च साधुवर्गं परिवहति तस्य समीपे स्थातव्यं ।।

गतमसतीति द्वारमिदानीमागमनद्वारमाह-

[भा.१९४६] जत्थ पविट्ठो जइ तेसु, उज्जया हो उपच्छ हावेंति।
सीसा आयरिओ वा, परिहानी तत्थिमा होइ।।

वृ- यत्र गच्छे सशिष्यपरिवारः प्रविष्टः सन् सूत्रार्थनामागमनं करोति तत्र यदि ते साधवः पूर्वं सुष्ठु उद्यता भूत्वा पश्चात्सामाचारीं हापयन्ति, आचार्यो वा पश्चात् परिहापयति तत्र हानिरियं वक्ष्यमाणा भवति ज्ञातव्या। तामेवाह-

[भा.१९४७] पडिलेह दिय तुयट्टण निक्खिव आयाण विनय सज्झाए।
आलोग ठवण मंडलि भासो गिहमत्त सेज्जतरे।।

वृ- पडिलेहित्ति उपकरणं न प्रत्युपेक्षन्ते तथ अम्लाना मार्गपरिश्रमरहिताश्च दिवा त्वग्वर्तनं कुर्वन्ति शेरते इत्यर्थः। निक्खिवत्ति दण्डादिकं निक्षिपन्तो न प्रत्युपेक्षन्ते न परिमार्जन्ति दोषैर्वा दुष्टं प्रत्युपेक्षणं परिमार्जनं वा कुर्वते, आयाणत्ति दण्डादिकमाददाना न प्रत्युपेक्षन्ते न प्रमार्जयन्ति दुःप्रत्युपेक्षणं दुःप्रमार्जनं वा कुर्वन्ति। विनयं कृतकर्मलक्षणं वाचनादिषु न कुर्वन्ति। सज्झाएत्ति स्वाध्यायो वा न क्रियते, मण्डली सामाचारीं वा न कुर्वन्ति, । आलोगत्ति संखडीं शरीरं वा प्रलोकन्ते, यदि वा आलोचना न क्रियते, अनालोचितं भुञ्जतेइत्यर्थः। ठवणत्ति स्थापनाकुलानि विशन्तिस्थापितं वा गृह्णन्ति। मंडलित्ति भोजनमण्डली समाचारीं हापयन्ति। भासत्ति भाषायामसमिति भाषन्ति(न्ते) एकग्रहणे जातीयग्रहणमिति न्यायात् शेषास्वपि समितिष्वसमिताः। गिहमत्तत्ति गृहिमात्रकेषु प(व)टलिकादिष्वानातं गृह्णन्ति। सेज्जायरेत्ति शय्यातरपिण्डं भुञ्जते।।

[भा.१९४८] एमायी सीयंते, वसभा चोयंति चिट्ठति ठियंमि।
असती थेरा गमनं, अच्छति ताहे पडिच्छंतो।।

वृ- एवमादिष्वादिशब्दादुदिपरिग्रहः सीदतः साधून् गुरुं वा वृषभाश्चोदयन्ति शिक्षयन्ति। तत्र यदि चोदितः साधुवर्गो गुरुर्वा तिष्ठति ततस्तस्मिन् स्थिते सोऽपि सशिष्यपरिवार आगन्तुकस्तिष्ठति। अस्ती इत्यादि असत् शिक्षायाः पुनः प्रत्यावर्तनस्य वा अभावो यदि ततो यावत् पाक्षिके चातुर्मासिके संवत्सरे वा कुलस्थविराणां सङ्घस्थविराणां वा गमनं भवति तावत्तत्प्रतीक्षमाणआस्तेतेषु कुलादिस्थविरेषु समागतेषु निवेदयति तथाप्यतिष्ठत्सु ततो निर्गमनम्। एतदेव व्याचिख्यासुः प्रथमतो वृषभचोदनं 'सप्रायश्चित्तमाह'-

[भा.१९४९] गुरू वसभ गीयगीते, अचोदेंति गुरूगमादि जालहुओ।
सारेइ सारवेई, खरमउएहिं जहा वत्थुं।।

वृ- वृषभः प्रतिपन्नगच्छाभारः स्वयं सारयति शिक्षयति। अथवा यो येनोपशाम्यति तं तेन सारापयति शिक्षापयति, । कथमित्याह- आचार्योपाध्यायवृषभस्थविरभिक्षुकाणां मध्ये यथा वस्तुस्त्वनतिक्रमेण खरमृदुभिर्वचनैः सारयति सारापयति वा। किमुक्तं भवति- यः खरेणसाध्यस्तं खरेण खरण्टयति, । मृदुसाध्यं मृदुभिर्वचनैः सारयति, । अन्यथा प्रायश्चित्तं तदेव पूर्वार्धेन दर्शयति, - गुरू इत्यादि यदि वृषभो गुरूमाचार्यमुपाध्यायं वा न प्रतिचोदयति, तदा चतुर्गुरूकं वृषभो वृषभं न प्रतिचोदयति चतुर्लघु, वृषभो गीतार्थं न प्रतिचोदयति मासलघु, । अक्षरयोजना त्वेवम् -गुरूवृषभगीतागीतान् चोदयति, । गुर्वादि चतुर्गुरू प्रभृति यावदन्ते लघुको मासः। अत्र पुनः सीदत्सु चत्वारो भङ्गास्तानेवाह-

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

[भा.१९५०]　　गच्छो गणीय सीयइ बिईन गणीउ तइए न वि गच्छो।
जत्थ गणी अवि सीयइ, सो पावतरो न उन गच्छो।।

वृ- गच्छः सीदति गणी चेति प्रथमः, गच्छःसीदति न गणीति द्वितीयः, न गच्छः सीदति किन्तु गणीति तृतीयः, न गच्छो नापि गणीतिचतुर्थः, । तथा चाह-द्वितीये भङ्गे गणी न सीदति, तृतीय न गच्छः, चतुर्थः चोदनमधिकृत्य शून्य इति नोपात्तः, । तत्राद्येषु त्रिषु भङ्गेषु मध्ये यत्र प्रथमतृतीये वा गणी स पापत्तरो यत्र पुनर्गच्छः सीदति । न गणी नासौ द्वितीयः पापतरः । किं कारणमिति चेदत आह-

[भा.१९५१]　　आयरिए जयमाणे, चोएउं जे सुहं हवइगच्छो।
तंमि उ विसीयमाणे, चोयणमियरे कहं गेण्हो (ण्हे)।।

आचार्ये यतमाने गच्छः सुखेन चोदयितुं शक्यमानो भवति, । आचार्यस्य प्रतिभयात् तस्मिन्नाचार्ये विषदिति चोदना शिक्षामितरे साधवः कथं गृह्णीयुः, नैव गृह्णीयुरितिभावः, आचार्यस्य प्रतिभयाभावादतः प्रथमतृतीयौ भङ्गौ पापतरौ, न द्वितीय इति।।

[भा.१९५२]　　आसन्नट्ठिएसु उज्जएसु जहति सहसा न तं गच्छं।
मा दूसेज्ज अइठे, दूरतरे वा पनासेज्जा।।

वृ- यद्यपिनाम आसन्ने प्रदेशे उद्यतविहारिणः स्थिता विद्यन्ते, तथा तेष्वासन्नस्थितेपूद्यतेषुसहसा न तं गच्छं जहाति परित्यजति । किं कारणमिति चेदत आह, - तन्मा अदुष्टान् दूषयेत् गच्छः । कि मुक्तं भवति? न विषीदन्ति तेऽपि सीदत्साधुसंसर्गतो मा विषीदेयुरिति येऽपि सीदन्ति तेऽतिदूरतरं प्रणश्येयुर्विषीदेयुः । तदेवं वृषभचोदनं भावितमिदानीं स्थविरागमनं भावयति-

[भा.१९५३]　　कुलथेरादी आगम चोदना जेसु विप्पमायंति।
चोदयति तेसु ठाणं, अठिएसु उ निग्गमो भणितो।।

वृ- वृषभशिक्षायाः प्रत्यावर्तनस्य वा अभावे पाक्षिके चातुर्मासिके सांवत्सरिके वा यावत् कुलस्थविराणां गणस्थविराणां सङ्घस्थविराणां वा आगमस्तावत् प्रतीक्षते, । कुलस्थविरादीनां चागमे तेषां निवेदना क्रियते, ततस्ते स्थविरा येषु स्थानेषु ये विप्रमाद्यन्ति, तेषु स्थानेषु तान् प्रतिचोदयन्ति । ते प्रतिचोदिता यदि स्थितास्ततस्तेषु स्थितेषु सत्सु स शिष्यपरिवारस्तत्रैव स्थानं करोति । स्थितेन च तेन द्विविधापि शिक्षा शिक्षणीया । अथ ते चोदिताः सन्तो न स्थितास्ततस्तेष्वस्थितेषु ततो गच्छान्निर्गमो भणितस्तीर्थकरगणधरैः ।। गतमागमद्वारम्, पतिते निर्गमिद्वारमतस्तदेव भावयति-

[भा.१९५४]　　कप्पमत्ते विहरइ,असमत्ते जत्थ हुंति आसन्ना।
साहिम्मि तहिं गच्छे, असतीए ताहिं दूरंपि।।

वृ- यदि आचारप्रकल्पः सुत्रतोऽर्थतश्च समाप्तो भवति । ततस्तस्मिन् कल्पे आचारप्रकल्पे समाप्ते स्वयंतथा विहारक्रमं विहरति । अथ नाद्यापि समाप्त आचारप्रकल्पस्तर्हि तस्मिन्नसमाप्ते यत्र यस्यां दिशि आसन्ना अनन्तरक्षेत्रवर्तिनः साधर्मिकाः संविग्नाः सांभोगिकास्तत्र गच्छेत् । अथासन्ना न विद्यन्ते तत आसन्नानामसत्यभावे दूरमपि गच्छेत् ।। कथं गच्छेदत आह-

[भा.१९५५]　　वइयादीए दोसे असंविग्गे या वि सो परिहरंतो।
के असंविग्गा खलु नियया दीवा मुनेयव्वा।।

वृ- व्रजिकादीन् दोषान् व्रजिका गोकुलं आदिशब्दात् स्वमातापितपर्वपरिचितपश्चात-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

परिचितकुलपरिग्गहस्तान् दोषान् इह व्रजिकादयः प्रतिबन्धदोषहेतुत्वात्। दोषा इत्युक्तास्तथाऽसंविग्नांश्चापि स परिहरन् गच्छेत्। अथ के खल्वसंविग्नाः सूरिराह- नित्यादयो नित्यवास्यादयस्ते ज्ञातव्याः। तेषामपि हरणे प्रवेशादौ प्रायश्चितविधिमाह-

[भा.१९५६] बिइयादीए अहच्छंद वज्जिए पविसदाण गहणे य। ·
लहुगा भुजंण गुरूगा संघडि मासो जं च न्नं।।

वृ- दूरमार्गे गच्छता अपान्तराले संविग्नसुमनोज्ञानां वसतौ वस्तव्यम्। तदभावे नैत्यिकादीनां संविग्ने च अमनोज्ञानां निवेद्यान्यस्यां वसतौ स्थावव्यम्। यदि पुनर्नैत्यिको नित्यवासी आदिशब्दात्पार्श्वस्थादिपरिग्रहस्तस्मिन् नैत्यादिके यथाच्छन्दवर्जिते प्रविशति यदि वा तेभ्यः किमपि भक्तादिकं ददाति, अथवा तेभ्यो गह्णाति तदा प्रवेशेन ग्रहणे दाने च प्रत्येक चत्वारो लघुका। भुंजणे गुरूगा इति। अथ तैः सह भुङ्क्ते तदा भोजने चत्वारो गूरूकाः। अथ नैत्यकादिसंघाटं याचित्वा तेन सह हिण्डते। ततः संघाटे हिण्डने लघुको मासः, जं चण्णमिति यच्च तेन संघाटकेन हिण्डमानोऽकल्पिकग्रहणतः तदास्वादनेन लाम्पट्यतः संविष्यते । तदपि च प्रायश्चित्तं प्राप्नोति तदेवं यथाच्छंदवर्तिते नैत्यकादौ प्रवेशादिषु प्रायश्चित्तमुक्तम्।। अधुना यथाच्छन्दे तदाह-

[भा.१९५७] एए चेव य गुरुगा पच्छित्ता होंति उ अहाच्छंदे।
अमणुन्नेसु मासो संभुजणे होंति चउगुरुगा ।।

वृ- अथामनोज्ञेषु संविग्नेषु प्रविशति, तदा प्रवेशे दाने ग्रहणे च प्रत्येकं लघुको मासः। अथ तैः सह भुङ्क्ते तदा चत्वारो गुरूकाः संघाटके लघुको मासः। यत एवमसंविग्नेषु प्रायश्चित्तानि तस्मादेतान् परिहरेत्। अथमार्गे संविग्ना न सन्ति ततः कारणवशतोऽसंविग्नेष्वपि गन्तव्यम्। (गतं) पतितमिदानीमसंविग्नद्वारं तेषु च गत्वा यत्कर्तव्यं तदाह- एतान्येव प्रायश्चित्तानि यथाच्छन्दे गुरुकानि भवन्ति तद्यथा- प्रवेशेदाने ग्रहणे भोजने च चत्वारो गुरुकाः। संघाटे गुरुको मासः।

[भा.१९५८] संविग्गेगंतरिया, पडिच्छ संघाडए असति एगो।
साहम्मिएसु जयणा तिन्नि दिनपडिच्छ सज्झाए;।।

वृ- संविग्नेन संविग्नगुणेनैकेनान्तरिता व्यवहिताः संविग्नैकान्तरिता असंविग्नास्तेषु कारणवशतो गन्तव्यम्। तत्र च भिक्षां निवसनं च कुर्वता यथा प्रथमोद्देशके परिहारिकस्य यतनोक्तातस्यापि द्रष्टव्या तैरपि असंविग्नैर्यदि स एकाकी तत एकाकिनः सतस्तस्य संघाटको दातव्यः। अथ योऽसौ द्वितीयको योग्यो दातव्यः, सोऽन्यत्र प्रेषणेन गतो वर्तते ततस्ते ब्रुयुरार्य! एकरात्रं द्विरात्रं त्रिरात्रं वा प्रतीक्षणीयम्। तत एतेन कारणेनोत्कर्षतः त्रिरात्रमपि प्रतीक्षते, असति संघाटके एक एकाकी व्रजेत्। तस्य च तथा व्रजतोऽपान्तराले यदि साधर्मिका भवन्ति । ततस्तन्मध्ये गत्वा वस्तव्यं कारणं च निवेदनीयं, निवेदिते कारणे तैः संघाटको दातव्यस्तदभावे ततो व्रजनीयमथ प्रतिपृच्छानिमित्तमेकं द्वि त्रीणि वा दिनानि यावत् यावत् प्रतीक्षापयेत्तत आह, स्वाध्याये स्वाध्यायनिमित्तं प्रतिपृच्छानिमित्तमित्यर्थः उत्कर्षतस्त्रीणि दिनानि प्रतीक्षेत एषा साधर्मिकेषु यतना । तदेवमसंविग्नद्वारमुक्तमिदानीं निवेदनाद्वारमाह—

[भा.१९५९] बहिगाम घरे सन्नी, सो वा सागारियं उवहिं अंतो।
ठाण निसेज्ज तुयट्टण गहियागहिएण जागरणा ।।

वृ- संविग्नसमनोज्ञानामभावे ग्रामस्य बहिर्नैत्यिकादीनां निवेद्य तिष्ठति, ग्रामस्य बहिः प्रत्यपायसंभवे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्रामस्यान्तः शून्यगृहे तत्रापि निवेदना कर्तव्या, शून्यगृहस्याभावे संज्ञीश्रावकस्तस्य गृहे वस्तव्यम् ।। स वा संज्ञी श्रावकः सागारिको ऽगारीकोऽगारीसहितः स्यात्तर्हि तस्य गृहस्य बहिरन्तवर्या या कुटी तत्र वस्तव्यम् ।। तस्य अप्यभावे अमनोज्ञेषु संविज्ञेषु वस्तव्यं, अमनोज्ञासंविग्नेषु वस्तव्यं, तेषामप्यभावे नित्यकादिष्वसंविग्नेषु बसति, तत्रेयं यतना स्थानमूर्ध्वस्थानं निषद्या उपवेशनं त्वग्वर्तनं दीर्घकायप्रसारणं तेषु गृहीतेनागहीतेन वा उपकरणेन जागरणं कर्तव्यम् । एष द्वारगाथासंक्षेपार्थः व्यासार्थं त्वभिधित्सुः प्रथमतो बहिर्ग्रामेति व्याख्यानयति–

[भा.१९६०] वसही समणुन्नासइ, गामबहिं ठाइ सो निवेदेउं ।
अनिवेदियंमि लहुओ, आणाइ विराधना चेव ।।

वृ- समनोज्ञानां संविज्ञानां वसतेरसत्यभावे ग्रामाद्बहिस्तिष्ठति, न पुनर्नैत्यिकादिष्वसंविग्नेषु प्रवेष्टव्यं, प्रागुक्तप्रायश्चित्तभावात्, स च बहिस्तिष्ठति । तेषां नैत्यिकादीनां वा संविग्नानां वा अमनोज्ञानां निवेद्य कथयित्वा, यदि पुनर्न निवेदयति ततोऽनिवेदिते प्रायश्चित्तं लघुको मासः, आज्ञादिविराधना, आदिग्रहणात् आत्मविराधना संयमविराधना च परिगृह्यते । तथा हि-इयं भगवदाज्ञा तेषां निवेद्य बहिर्वस्तव्यमनिवेदनायामाज्ञालोपः आत्मविराधनां संयमविराधनां चाह–

[भा.१९६१] गेलन्ने न काहिंती कोहेणं जं च पाविहिती तत्थ ।
तम्हा नु निवेएज्जा, जयणा एतेसि माएउ ।।

वृ- अनिवेदने सति स कदाचित् ग्लानो जायते ग्लान्ये सति नास्माकं किमपि तेन निवेदितमिति क्रोधेन न किमपि ग्लानकृत्यं करिष्यति । गृहस्थाश्च तं तथाभूतं ग्लानं दृष्ट्वा तेषां नैत्यिकादीनां निवेदयेयुर्यथा युष्मदीयो ग्लानोऽसंग्रहको वर्तते । ततस्ते ब्रूयुर्मन्येरन् वा एषोऽस्मदीयो न भवति । यदि भवेत्तदास्माकमुपाश्रये तिष्ठेन्, निवेदयेद्वा । एवं यत्र गलानत्वेन वा आरक्षकादिग्रहणं । तत्र यदनर्थं प्राप्स्यति संयमविराधनात्मकमात्मविराधनात्मकं वा तत्सर्वमनिवेदनानिमित्तं तस्मात्तेषामनया वक्ष्यमाणया यतनया निवेदयेत् । तामेव यतनामाह–

[भा.१९६२] तुब्भं अहेसि दारं उस्सूरोत्ति जुताए एवं तु ।
न य नज्जइ सत्थो वी, चलिहिइं किं केतियं वेलं ।।

वृ- यदाहमागतस्तदा युष्माकमुपाश्रयद्वारमुषितमासीत् । तत एवं मया विकल्पितमुत्सूरं वर्तते इति युतायां पृथग्भूतायां वसतावुषितः अपि च न ज्ञायते सार्थोऽपि किं कियतीं वेलां, सप्तम्यर्थे व्यातौ द्वितीया, कस्यां वेलायां चलिष्यति, ततः पृथगुपाश्रये स्थितः । अथ स वेलायामागतस्तत इदं वदेत्--

[भा.१९६३] साहु सगासे वसिउं अतिप्पियं मज्झ किं करेमित्ति ।
सत्थवसोहं भंते, गोसे मे वहेज्जह उदंतं ।।

वृ- साधुसकाशे साधुसमीपे च वस्तुं ममातिप्रियं परं भदन्त सार्थवशो ऽहं ततः किं करोमि तस्मात् गोसे प्रभाते मे उदन्तं वार्ता वहत ।

[भा.१९६४] एवं न उ दुरुस्से अह बाहिं होज्ज पच्चवायाउ ।
ताहे सुन्नह घरादिसु वसति निवेदितु तह चेव ।।

वृ- एवमनया यतनया निवेद्य न तु नैव ग्रामाद्बर्दूरं वसेत् किन्तु ग्रामस्य समीपे वसेदथ बहिः स्तेनादिकृताः प्रत्यवाया अनर्था भवेयुस्ततस्थथैव पूर्वोक्तप्रकारेणैव निवेद्य शून्यगृहादिषु वसति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदिशब्दात् श्रावकग्रहादिपरिग्रहः ।। एतदेव भावयति–

[भा.१९६५] अहणुव्वासि य सकवाड निव्विले निच्चले वसति सुन्नो ।
तस्सा सइ सन्निघिरे इत्थीरहिते वसेज्जा वा ।।

वृ- अधुना साम्प्रतमुद्वासितमधुनोद्वासितं सकपाटं कपाटसहितमन्यथा स्तेनादिप्रवेशसंभवात् निर्बिलं बिलरहितमन्यथा सर्पादिसंभवात् । निश्चलं न जराजीर्णतया पतितुं प्रवृत्तं अमीषां च चतुर्णां पदानां षोडशभङ्गः । तत्र प्रथमो भङ्गः शुद्धः शेषा अशुद्धास्तत आह-इत्थंभूते शून्ये शून्यगृहे वसति तस्य शून्यगृहस्यासत्यभावे संज्ञिगृहे श्रावकगृहे सोऽपि श्रावको द्विधा संभवति सस्त्रीकःस्त्रीरहितो वा । तत्र स्त्रीरहिते वसेत् ।

[भा.१९६६] सहिए वा अंतो बहि अंतो वीसु घरकुडीए वा ।
तस्सा सति निइयादिसु वसेज्जउ इमाए जयणाए ।।

वृ- स्त्रीरहितस्य श्रावकगृहस्याभावे सहिते वा स्त्रीसहिते वा श्रावकगृहे तस्य गृहस्यान्तर्बहिर्वा विविक्ते प्रदेशे वसेत् । अन्यथा प्रायश्चित्तं चतुर्गुरु । तस्याप्यभावे तस्य श्रावकगृहस्य बहिः पुरतः पृष्टतः पार्श्वतो वा यदि वान्तर्गृहस्य कुटी समस्ति तस्यां वसेत् । तस्यापि कुटीरकस्यासत्यभावे नैत्यिकादिष्वपि आदिशब्दात् पार्श्वस्थादिपरिग्रहोऽनया वक्ष्यमाणया यतनया वसेत् ।। एतावता मूलद्वारगाथोपन्यस्तं निवेदद्वारमगमत् । यतनाद्वारमापतितमिदानीं तामेव यतनामाह--

[भा.१९६७] निइयादि उवहि भत्ते, सेज्जा सुद्धाय उत्तरे मूले ।
संजइरहिए काले अकाल सज्झाए अभिक्खं च ।।

वृ- ये नैत्यिकादय उपधौ भक्ते शय्यायां च उत्तरगुणैर्मूलगुणैर्वा शुद्धाः । किमुक्तं भवति ? ये उत्तरगुणैर्मूलगुणैर्वा शुद्धां शय्यां गवेषयन्ति शुद्धं भक्तं शुद्धमुपधिं तेषु वसेत्, तत्रापि संयतीरहिते तदभावे संयतीसहितेऽपि । ताश्च संयत्यो द्विधा कालचारिण्योऽकालचारिणश्च तत्र याः पाक्षिकादिष्वागच्छन्ति ताः कालचारिण्यस्तद्व्यतिरेकेणागच्छन्त्योऽकालचारिण्यः स्वाध्यायनिमित्तम-भीक्ष्णं चशब्दात् भक्तपानं दातुं गृहीतुं वा कन्दर्पार्थं वा तत्राकालचारिणीषु बहवो दोषाः कालचारिणीष्वल्पतरा इति संयतीरहिताभावे कालचारिणीभिः संयतीभिः सहिते वस्तव्यम् ।। एतदेव सप्रपञ्चमभिधातुकाम आह–

[भा.१९६८] सिज्जुवहि भत्तसुद्धे, संजइ रहिए य भंग सोलसओ ।
संजइ अकालचारिणी सहिए बहुदोसला वसही ॥

वृ- शय्याशुद्ध उपधिशुद्धो भक्तशुद्धः संयतीरहित इति चतुर्षु पदेषु सप्रतिपक्षेषु भङ्गाः षोडश । तद्यथा-शय्याशुद्धः उपधिशुद्धः भक्तशुद्धः संयतीरहितइति प्रथमः । शय्याशुद्ध उपधिशुद्धो भक्तशुद्धः संयतीसहित इति द्वितीयः । ईत्यादिप्रस्तारश्च कार्यः, एतेषु च षोडशसु भङ्गेषु मध्ये यत्र यत्र संयत्यस्तत्र तत्र कालचारिणीभिः सहिते वस्तव्यम् । नाकालचारिणीभिर्यत आहसंयतिभिरकाल-चारिणीभिः सहिते 'बहुदोषला' बहुदोषा वसतिरिति आह-पूर्वमुपधिभक्तशय्यां शुद्धा इत्युक्तमिदानीं भङ्गचिन्तायां प्रथमतः शय्योक्ता । तत्र किं कारणमत आह–

[भा.१९६९] सागारितेनाहिम वासदोसा, दुसोहिया तत्थ उ होइ सेज्जा ।
वत्थन्न पाणाणिव तत्थ ठिच्चा, गिण्हंति जोगानुवभुंजते वा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- शय्यां विना मण्डल्यामुपविष्टायां सागरिकाः समं पतन्ति उपधिग्रहणाय स्तेना वा निपतन्ति हिमप्रपाते वर्षप्रपाते वा संयमात्मविराधनादोषाः । तथा तत्र तेषु शय्योपधिभक्तेषु मध्ये शय्या दुःखोधिता भवति । आहारोपधयः शुद्धाः सुखेन लभ्यन्ते । महता कष्टेन पुनः शुद्धा वसतिरिति भावः तथा तत्र शय्यायां स्थित्वा योग्यानि कल्पनीयानि वस्त्रान्नपानानि गृह्णन्त्युपभुञ्जते च । एतैः कारणैर्भङ्गचिन्तायां प्रथमतः शय्या कृता ॥ तथा-

[भा.१९७०] आहारोवहि सेज्जा, उत्तरमूले असुद्धसुद्धे य ।
अप्पतरदोसपुव्विं असतीए महतदोसे वि ॥

वृ- आहारोपधिशय्याभिः उत्तरगुणविषये वा मूलगुणविषये अशुद्धः शुद्ध इति भङ्गचिन्तायां ये षोडशभङ्गाः प्रागुक्तास्तेषु मध्ये पूर्वमल्पतरदोषे वस्तव्यम् । तस्यासति अभावे महादोषेऽपि ॥

अथ कस्मिन् भङ्गे अल्पतरा दोषा इति, अत आह-

[भा.१९७१] पढमासति बिइयंमिति, तहियं पुन गइ कालचारीसु ।
एमेव सेसएसु वि, उक्कमकरणंपि पूएमो ॥

वृ- सर्वेषां भङ्गानां मध्ये प्रथमभङ्गे सर्वाल्पतरा ये दोषा इति तत्र वस्तव्यम्, प्रथमस्यासति 'अभावे द्वितीयेऽपि, तत्र पुनस्तिष्ठति कालचारिणीषु संयतीषु, एवं शेषेष्वपि भङ्गेषु वसति । किमुक्तं भवति? येष्वप्यन्येषु भङ्गेषु संयतिसहितपदं तेष्वपि कालचारिणीभिः सहितेषु वस्तव्यं, नाकालचारिणीभिरिति । तथा (उत्) क्रमकरणमपि अकालचारिणीभिः सहितत्वमपि पूजयाम उपादेयतया प्रशंसामः, सर्वेषां भङ्गानां मध्ये कथमिति चेदुच्यते, यस्मिन् भङ्गे शय्याभक्तोपधयः समुदिया भङ्गत एकद्विका वा शुद्धास्तत्र यद्यकालचारिण्यो भक्तं पानं वा दत्वा गृहीत्वा तत्क्षणमेव व्रजन्ति न पुनरागच्छन्ति । स्वाध्यायं वा कृत्वा सकाले गच्छन्ति तत्र स्थातव्यं प्रायो दोषाभावादिति ॥ एतदेव स्पष्टतरमाह-

[भा.१९७२] सेज्जं सोहे उवहि, भत्तं सोहेइ संजती रहिते ।
पढमो, बितिउ संजइ सहिउ ता पुन कालचारीतो ॥

वृ- शय्यां शोधयति, उपधिं शोधयति, भक्तं शोधयति संयतीरहितः चेति प्रथमो भङ्गः, द्वितीयः संयतीसहितस्ताः पुनः संयत्यः कालचारिण्यो यदि स्युस्तदा वस्तव्यं, एवं शेषेष्वपि संयतीसहितेषु भङ्गेषु भावनीयम् । यथाकालचारिण्यः कथं स्युरित्यत आह-

[भा.१९७३] आयाण कंदप्पे वियाल उरालियं वसंतीणं ।
नियतादीच्छद्दसहा संजोएमो तहाच्छंदो ॥

वृ- भक्तपानादीनामादाने, उपलक्षणमेतत् दाने च, तथा कन्दर्पे कन्दर्पनिमित्तं, कन्दर्पग्रहणमुपलक्षणं स्वाध्यायनिमित्तं च, उरालिकं अतिशयेन स्फारप्रभूवेलामिति यावत्, वसन्तीनामकालचारिणीत्वं द्रष्टव्यम् । एवं नैत्यिकादीनां यः षड्दशधा षोडशप्रकारः संयोगः तत्र वस्तव्यम् किं सर्वत्र, नेत्याह- मुक्त्वा यथाच्छन्दानि । किमुक्तं भवति? तेषु सत्सु यथाच्छन्देषु न वस्तव्यं, तदभावे तत्रापि वसेत् ॥ सम्प्रत्येतेषु नैत्यिकादिषु संवासमधिकृत्य यतनामाह-

[भा.१९७४] ठिय, निसिय तुयट्टे वा गहियागहिए य जग्ग सुवणं वा ।
पासत्थादीनेवं, नियए मोत्तुं अपरिभुत्तो ॥

वृ- पार्श्वस्थानामुपाश्रयेषु गहियत्ति गृहीतोपकरणः स्थित ऊर्ध्वस्थितो वसेत्, यद्येवं स्थातुं न शक्नोति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो गृहीतोपकरणः एव निषद्योपगतो जाग्रत्तिष्ठेत्, तथाप्यशक्नुवन् गृहीतोपकरणः त्वगवृतो जाग्रदवतिष्ठेत्, अथ त्रिष्वप्येतेषु यदि कथमपि प्रचलया आशङ्का, तदा मा पात्रादिभङ्ग स्यादित्युपकरणं पार्श्वे निक्षिप्यागृहीतोपकरणो यथा समाधिस्थितो निषन्नस्त्वगवृतो वा जाग्रत्तिष्ठेत् । अथ जागरणं कर्तुं न शक्नोति तत आह-स्वपन् वा गृहीतोपकरणो ऽगृहीतोपकरणो वा यथासमाधिः कुर्यात् । एवं यतना पार्श्वस्थादीनां उपाश्रयेषु द्रष्टव्या । नैत्यिके नित्यवास्युपाश्रये नित्यवासीपरिभुक्तान् प्रदेशान् मुक्त्वा अपरिभुक्ते प्रदेशे उपकरणं निक्षिप्य यथासमाधि जाग्रत स्वपन् वा वसेत् ।।

[भा. १९७५] एमेव अहाच्छंदे, पडिहणणाऽझाण अज्झयणं कन्ना ।
ठाणठितो विनिसामे, सुण आहरणं च गहिएणं ।।

वृ- एवमेव पार्श्वस्थादिगतेनैवप्रकारेण यथाच्छन्देऽपि यतना कर्तव्या । नवरं यदि वा शक्तिरस्ति तर्हि प्रतिहननं कर्तव्यं यदा स स्वग्राहं मुञ्चति । अथ न विद्यते तादशी शक्तिस्तर्हि ध्यानं तथा ध्यायति, यथा तद्वचो न शृणोति । यदि वा 'अज्झयणति' यथाच्छन्दप्रज्ञापनाप्रवणं अध्ययनं परावर्तयति, यथा स ब्रूते-मा मां नाशयेति 'कन्न' त्ति तस्य यथा स्वच्छन्दं देशनां कुर्वतः कर्णौ निजौ स्थगयति येन देशनां न शृणोति दूरतरं वा तिष्ठति अथ दूरतरस्थानस्थितोऽपि तद्देशनां निशमयति न च निद्रां समागच्छति, ततः स यथाच्छन्दो वक्तव्यो यथा शृणु किमपि आहरणं ततो यत्तस्यापूर्वं तदाहरणं कथनीयम् । 'गहिएण' त्ति गृहितेनात्मीयोपकरणेन ।। एतदेव युक्त्या द्रढयति-

[भा. १९७६] जह कारणेनिगमणं दिठं एमेव सेसगा चउरो ।
ओमे असंथरंते आयारे वइयामादीहिं ।।

वृ- यथा कारणे कारणवशतो निगमनं निर्गतं दृष्टं, एवमेव तथाकारणवशतः शेषाणि अपि चत्वारि द्वाराण्यसंविग्ने निवेदना यतना इत्येवमादीनि यथा च आचारे आचारप्रकल्पेऽवमे दुर्भिक्षे व्रजिकादिभिरपि । आदिशब्दात्स्वज्ञात्यमनोज्ञासंविग्नपरिग्रहो व्रजेदित्युक्तमतः सोपपत्तिकेयं यतनेति सम्यक् श्रद्धेया । गतं यतनाद्वारम्, अधुना निसृष्टद्वारमाह-

[भा. १९७७] समणुन्नेसु वि वासो, एगनिसिं किमुत अन्नमोसन्ने ।
असढो पुन जयणाए अच्छेज्ज चिरंपि उ इमेहिं ।।

वृ- समनोज्ञेष्वपि अपान्तराले वा उत्सर्गत एकां निशां एकां रात्रिं कल्पते । किंपुनरन्येषु असांभोगिकेषु अवसन्नेषु । उपलक्षणमेतत् पार्श्वस्थादिषु वा, तत्र सुतरामेकरात्र्यधिकं न कल्पते । कारणवशतः पुनरुत्कर्षतस्त्रीणि दिनानि वसेत् ।। गतं निसृष्टद्वारमिदानीं दीहरवद्धं पडिच्छन्तीत्येतद्व्याख्यानार्थमाह- 'असढो' इत्यादि अशठः पुनः न केवलमुत्कर्षतस्त्रीणि दिनानि किन्तु चिरमपि प्रभूतकालमप्येभिः वक्ष्यमाणैः कारणैः यतनया तिष्ठेत् ।। तान्येव कारणान्याह-

[भा. १९७८] वासं, खंधार, नदी, तेना सावय वसेण सत्थस्स ।
एएहिं कारणेहिं अजयणजयणा नायव्वा ।।

वृ- वर्षं पतति, स्कन्धावारः कटकं तद्वा चलति, नदी गिरिनदी पूर्णा वर्तते, स्तेना अपान्तराले द्विविधाः शरीरापहारिणउपकरणापहारिणश्च, श्वापदाः सिंहादयः, सार्थस्य वा वशेन गच्छति सार्थश्च चिरमपि तिष्ठन् वर्तते । एतैः कारणैः चिरमप्यपान्तराले तिठति, तत्र अयतना यतना च ज्ञातव्याः तत्र यदि यतना कृता तदा न प्रायश्चित्तविषयः अथायतनामाचरितवान् तदा प्रायश्चित्ते लगति, उक्तः शुद्धस्याशुद्धगमनमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयो भङ्गः, सम्प्रति तृतीयचतुर्थभंगावाह ।।

[भा.१९७९] दोसा उ ततियभंगे, गाणं गणिया य गच्छभेदोय ।
सुयहानी कायवहो दोन्निवि दोसा भवे चरिमे ।।

वृ- दोषौ द्वौ तृतीयभङ्गे, अशुद्धस्य शुद्धगमनमित्येवलक्षणं, तद्यथा-'गाणं' गणिकता गणे गणे प्रविशतीत्येवं प्रवादलक्षणा [१] तथा गच्छभेदतश्च [२] तथाहि-तस्मिन् निर्गच्छत्यन्येऽप्येवमेव निर्गच्छन्ति ततो जायते गणविनाशः ।। चरमेऽप्यशुद्धस्याशुद्धगमनमित्येवंरूपे भङ्गे द्वौ दोषौ [अपिशब्दो भिन्नक्रमः स च यथास्थानं योजितः] श्रुतहानिः [१] कायवधश्च [२] निष्कारणं दोषबहुलतया निर्गमने ह्यन्यत्रापि नावकाश इति श्रुतहानिः [१] मार्गे च गमनतो गलानत्वादिभावतो वा कायवधः [२] ।।

तदेवं भावितमृतुबद्धविषयं सूत्रं, सम्प्रति वर्षावासविषयसूत्रमाह--

मू. (१०६) *वासावासं पज्जोसविओ भिक्खू य जं पुरओ कट्टु विहरइ आहच्च वीसम्भेज्जा, अत्थियाइं थ अन्ने केइ उवसंपज्जणारिहे, से उंवसंपज्जियव्वे; नत्थि याइं थ अन्ने केइ उवसंपज्जणारिहे, तस्स अप्पणो कप्पाए असमत्ते कप्पइ से एगराइयाण पडिमाए जन्नं जन्नं दिसं अन्ने साहम्मिया विहरन्ति तन्नं तन्नं दिसं उवलित्तए । नो से कप्पइ तत्थ विहारवत्तियं वत्थए कप्पइ से तत्थ कारणवत्तियं वत्थए । तंसि च नं कारणंसि निट्ठियंसि परोवएज्जा 'वसाहि अज्जो, एगरायं वा दुरायं वा! एवं से कप्पइ एगरायं वा दुरायं वा वत्थए; नो से कप्पइ परं एगरायाओ वा वत्थए । जं तत्थ परं एगरायाओ वा दुरायाओ वसइ, से संतरा छेए वा परिहारे वा ।।*

वृ- वर्षावासे पर्युषितभिक्षुर्य पुरतः कृत्वा विहरति आस्ते स कदाचित् विष्वग् भवेत् शरीरात्पृथग् भवेत् म्रियते इत्यर्थः, अस्ति चान्यः कश्चिदुपसम्पदनार्हः, स उपसम्पत्तव्यः; नास्ति वा तत्रान्यः कश्चिदुपसम्पदनार्हः तर्हि स आत्मनः कल्पे मा समाप्त इति से तस्य कल्पते एकरात्रिक्या प्रतिमया यत्र वसति तत्र एकरात्राभिग्रहेण । 'जन्नं जन्नं' इत्यादि यस्यां यस्यां दिशि सर्वे साधर्मिका विहरन्ति तां तां दिशमुपलातुं न पुनः से तस्य कल्पते, तत्रापान्तराले विहारप्रत्ययं वस्तुं, कल्पते से तस्य तत्र कारणप्रत्ययं संघाटादिकारणनिमित्तं वस्तुम्, तस्मिंश्च कारणे निष्ठिते यदि परो वदेत् वस आर्य एकरात्रं द्विरात्रं वा, वाशब्दात्त्रिरात्रं वा एवं से तस्य कल्पते एकरात्रं द्विरात्रं वा वाशब्दात्त्रिरात्रं वा वस्तुं, नो से तस्य कल्पते एकरात्राद् द्विरात्राद्वा परं वस्तुं । यत्तत्र एकरात्राद् द्विरात्राद्वा परं वसति, तत्र से तस्य स्वकृतादन्तरात् च्छेदः परिहारो वा । अत्र भाष्यप्रपञ्चः--

[भा.१९८०] एमेव य वासासु, भिक्खे वसहीए संकन्नाणत्तं ।
एगाह चउत्थादी, असती अन्नत्थ तत्थेव ।।

वृ- एवमेव ऋतुबद्धविषयसूत्रगतेनैव प्रकारेण वर्षासु सूत्रं भावनीयम् । नवरं भिक्षायां बसतौ शङ्कायां च नानात्वं तत्रान्यत्र गन्तव्यं एकाहेन चतुर्थेन वा आदिशब्दात् षष्ठेनाष्टमेन वा असति अन्यत्रगमने तत्रैव वर्षारात्रः कर्तव्यः एष द्वारगाथा संक्षेपार्थः ।।

साम्प्रतमेनामेव विवरीषुः प्रथमत एवंशब्दं व्याख्यानयति--

[भा.१९८१] अपरिणामे पिहब्भावे, एगत्ते, अवधारणे ।
एवं सद्दो उ एएसिं, एगत्ते उ इहं भवे ।।

वृ- एवंशब्दोऽपरीमाणे पृथग्भावे एकत्वे अवधारणे तत्रापरीमाणे यथा एवमन्येऽपीत्यादौ;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पृथग्भावे यथा वटात् पटः पृथक्, एवमाकाशास्तिकायाद्धर्मास्तिकायोऽपीति; एकत्वे यथायमेतद्गुण एवमेषोऽपि अत्र ह्येवं शब्दस्तयोरेकरूपतामभिद्योतयति, अवधारण यथा केनापि पृष्टमिदमित्थं भवति। इतरः प्राह-एवं इत्थमेवेति भावः एवमेवं शब्द एतेष्वर्थेषु वर्तते। पुनरेकत्वे भवति वर्त्तते। एकत्ववृत्तिमेव भावयति–

[भा.१९८२] एगत्तं उउबद्धे जहेव गमनंतु भंगचउरो य।
तह चेव य वसासुं नवरि इमं तत्थ नाणत्तं॥

वृ- एकत्वं तथा एवंशब्द प्रकाश्यमित्थं यथा ऋतुबद्धेऽन्यत्र गच्छान्तरे गमनं यथा च तत्र भङ्गाश्चत्वारः। शुद्धस्य शुद्धगमनमित्येवमादयः तथा च तेनैव प्रकारेण गमनं भङ्गचतुष्टयं च ज्ञातव्यं। नवरं केवलमिदं तत्र वर्षासु, भिक्षायां वसतौ शंकायां च नानात्वम्॥ तत्र भिक्षामधिकृत्याह--

[भा.१९८३] पउरन्न पानगमनं इहरा परिताव एसणाघातो।
खेत्तस य संकमणे गुरुगा लहुगा य आरुवणा॥

वृ- यो गच्छः प्रचुरान्नपाने स्थितः तत्र गन्तव्यं, इतरथा यदि पुनरप्रचुरान्नपाने गच्छे प्रविशति ततस्ते 'असंस्तरंतं' क्षुधा परिताप्यन्ते,। परितापनां वाऽसहमानैः एषणाघातः क्रियते, अनेषणीयमपि गृह्णीयुरित्यर्थः, अथासंस्तरन्तः क्षेत्रसंक्रमणं कुर्वन्ति, तदा प्रावृषि क्षेत्रस्य संक्रमणे आरोपणा प्रायश्चित्तं चत्वारो गुरुकाः,। वर्षारात्रे भाद्रपदाश्वयुग्मासद्वयलक्षणे चत्वारो लघुकाः॥

गतं भिक्षाद्वारमधुना वसतिद्वारमाह--

[भा.१९८४] वारग जग्गण दोसा सागारादी हवंति अन्नासु।
तेनादिसंक लोए भाविणमत्थं पवासंति व पासंति॥

वृ- यस्मिन् गच्छे वसतिः सङ्कटा तत्र नोपसंपत्तव्यं, यदि पुनरुपसम्पद्यते तत इमे दोषाः संकटायां हि वसतावमान्तास्ते वारकेण क्रमेण जागरणं कुर्युरिके जाग्रत्यन्ये स्वपन्ति, तदनन्तरं ते जाग्रत्यन्ये स्वपन्ति। एवं क्रमेण जागरणेऽजीर्णत्वादयो दोषाः अथ अन्यासु वसतिषु केचित्स्वपनाय व्रजन्ति तर्हि ये पाक् अभिशय्यायां सागरिकादयो दोषाः ते अत्रापि भवन्ति॥ गतं वसतिद्वारमिदानीं शङ्काद्वारमाहभिक्षाया अभावतो वसति सङ्कटत्वदोषतो वा ते क्षेत्रसंक्रमणं कुर्युस्तांश्च गच्छतो दृष्ट्वा लोकस्य स्तेनादिशंका उपजायते, यथा न कल्पते साधूनां गमनं तन्नूनमेते हेरिकाः स्तेना वा साधुवेषेणाहिण्डन्ते। अथवा भाविणमत्थं च पासंतित्ति एते भाविनमर्थं उत्पातरूपं, यदि वा न निष्पत्स्यते सस्यमित्येवंलक्षणं, ततोऽनागते नश्यति। तस्माद्द्वयमपि यत्नं कुर्मः। तदेव प्रचुरान्नपाने सङ्कटवसतिस्थिते च गच्छे प्रवेशे इमे दोषाः तस्माद्ये प्रचुरान्नपानग्रामे स्थिता ये च सावकाशायां वसतौ तत्रोपसम्पत्तव्यम्। तत्र चानया यतनया गन्तव्यं तामेवाह–

[भा.१९८५] आसन्नखेत्त भाविय खेत्तादपरोप्परं मिलंतेसु।
जा अठमं अभाविय मानं अडंतं बहूपासे॥

वृ- ये आसन्ने अनन्तरे क्षेत्रे स्थिता गच्छास्तत्र गन्तव्यं॥ असत्यनन्तरक्षेत्रे ये परक्षेत्रे स्थिता यैर्भिक्षादिनिमित्तमागच्छद्भिश्च परस्परं मिलद्भिः, गाथायां सप्तमी तृतीयार्थेऽपान्तराले पथि भाविता ग्रामास्तत्र गन्तव्यम् तेषामप्यभावे दूरेऽपि गम्यते॥ तत्र पुनर्भिक्षामहिण्डमानो गच्छति। किं कारणमत आह-'मानं अडंतं बहूपासे,' माणमिति वाक्यालङ्कारे, भिक्षामन्टतं बहुलोकोऽभावितः तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पश्यति । कृत्वा ततोऽभक्तार्थेन यावत् प्राप्यते षष्ठेन वा अष्टमेन वा तत्र गन्तव्यम् । आह-यद्यपि चतुर्थादिना गच्छति तथापि लोकः पश्यति, तत आह—

[भा.१९८६] पायं न 'रीयइ' जनो, वासे पडिवत्तिकोविदो जाय ।
असतोयबद्धे दूरे य अत्थए जा पभायंति ।।

वृ- प्रायः कर्षजनः क्षेत्राणां जलकर्दमाकुलतया शेषजनो मार्गस्थजलाविलत्वादिना दुर्गमतया वर्षे वर्षाकाले 'न' रीयते, न गच्छति, यश्चात्र प्रत्तिपतिकोविदः परप्रतिपादनकुशलस्तेन एवमादिषु विषयेऽनेकान्युत्तराणि जल्पितव्यानि । एतावता 'एगाह चउत्थादी' इत्यादि व्याख्यातम् इदानीं, 'मसती अन्नत्थ तत्थेव' इति व्याख्यानार्थमाह, 'असतोवबद्धे' इत्यादि पूर्वोक्तो विधिः सान्तरे वर्षेऽभिहितो यदि पुनरसकृत् अवबद्धं वा सततं वर्षं पतति यदि वा अतिदूरं गन्तव्यम् । नाष्टमेन प्राप्यते ततोऽसकृत् अवबद्धे वा वर्षे पतति दूरं गन्तव्ये तत्रैव वर्षारात्रं कृत्वा प्रभाते मेघकृतान्धकारापगमतः प्रभातकल्पे संवत्सरे याति । सूत्रम्—

मू. (१०७) *आयरियउवज्झाए गिलायमाणे अन्नयरं वएज्जा 'अज्जो, मामंसि नं कालगयंसि समाणंसि अयं समुक्कसियव्वे । से य समुक्कसणारिहे, समुक्कसियव्वे; से य नो समुक्कसणारिहे, नो समुक्कसियव्वे अत्थि याइं थ अन्ने केइ समुक्कसणारिहे, से समुक्कसियव्वे; नत्थि याइं थ अन्ने केइ समुक्कसणारिहे, से चेव समुक्कसिव्वे । तंसि च नं समुक्किइंसि परो वएज्जा 'दुस्समुक्किट्ठं ते, अज्जो; निक्खिवाहि !' तस्स णं निक्खवयाणस्स नत्थि केइ छेए वा परिहारे वा । जे साहम्मिया अहाकप्पेणं नो अब्भुठा विहरंति, सव्वेसिं तेसिं तप्पत्तियं छेए वा परिहारे वा ।*

वृ- अथास्य सूत्रस्य कः सम्बन्ध इत्याह—

[भा.१९८७] आयरियत्ते पगते 'अनुयत्तं' ते य 'कालकरणंमि ।
अत्थे सावेक्खो वा' वुत्तो इमतो वि सावेक्खो ।।

वृ- आचार्यत्वं पूर्वसूत्रेषु प्रकृतं अनुवर्तमानं च कालकरणं तत आचार्यत्वे प्रकृतेऽनुवर्तमानमेवाकालकरणे, इदमपि सूत्रमापतितमत्राप्याचार्यत्वस्य कालकरणस्य चाभिधास्यमानत्वात्, यदि वा पूर्वमर्थतः सापेक्ष 'उक्तोऽयमपि' चाधिकृतसूत्रेणाभिधीयमानः सापेक्ष इति सापेक्षत्वप्रकरणादनन्तरसूत्रादनन्तरमस्य सूत्रस्योपनिपातः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-आचार्य उपाध्यायो वा धातुक्षोभादिना ग्लायनन्यतरमुपाध्यायप्रवर्तिगणावच्छेदकगीतार्थ-भिक्षूणामन्यतमं सापेक्षः सन् वदेत्, आर्य मयि कालगते सति अयं समुत्कर्षयितव्य आचार्यपदे स्थापयितव्यः । स चेत्परीक्षया समुत्कर्षणार्हो भवति ततः समुत्कर्षयितव्यः । नो चेत्समुत्कर्षणार्हस्तर्हि नो समुत्कर्षयितव्यः । अथ योऽसौ पूर्वमाचार्येण समीक्षितः सोऽभ्युद्यतविहारमभ्युद्यतमरणं वा व्यवसितस्तत्राह-अस्ति चात्र गच्छेऽन्यः कश्चित्समुत्कर्षणार्हः स समुत्कर्षयितव्यः । अथ नास्ति कश्चिदन्यः समुत्कर्षणार्हस्तर्हि स एवाभ्यर्थ्यः समुत्कर्षयितव्यः । तस्मिंश्च समुत्कर्षिते परो गच्छो वदेत् समुत्कृष्टं ते तव हे आर्य तस्मान्निक्षिप, एवं तस्य निक्षिपतो नास्ति कश्चित् च्छेदः । परिहारो वा, उपलक्षणमेतदन्यत्तपो वा सप्तरात्रादिकं, ये पुनः साधर्मिकगच्छसाधवो यथाकल्पेन आवश्यकादिषु यथोक्तविनयकरणलक्षणेन नोत्थाय विहरन्ति । तेषां प्रत्येकंसर्वेषा तत्प्रत्ययं यथाकल्पानभ्युत्थानप्रत्ययच्छेदः परिहारः सप्तरात्रं वा तपः प्रायश्चित्तमिति सूत्रसंक्षेपार्थः । एनमेव भाष्यकृत् प्रपञ्चयन् प्रथमतो गिलायमाणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यस्यार्थं भावयति—

[भा.१९८८] अतिसंयेन रिठतो वा धातुक्खोभेन वा ध्रुवं मरणं ।
नाउं सावेक्खगणी, भणंति सुत्तंमि जं वृत्तं ।।

वृ- अतिशयेन श्रुतज्ञानातिशयादिना अरिष्टतो वा अरिष्टदर्शनतो वा धातुक्षोभेण वा ध्रुवं मरणं ज्ञात्वा सापेक्षा गच्छापेक्षोपेता गणिनो यत्सूत्रे उक्तमज्जो कालायंमीत्यादि तद्भणन्ति । साम्प्रतमन्यतरं 'वएज्जा' इत्यस्यार्थमाह—

[भा.१९८९] अन्नयर उवज्झायादिगा उ गीयत्थपंचमा पुरिसा ।
उक्कसण मानन तिय' एगट्ठं ठावणा चेव ।।

वृ- उपाध्यायादिका उपाध्यायाः प्रवर्ती गणावच्छेदको गणी गीतार्थश्च भिक्षुरित्येवंरूपा गीतार्थपञ्चमाः पुरुषास्तेषामन्यतमोऽन्यतरः, समुत्कर्षशब्दार्थमाह-उत्कर्षणं माननं स्थापना-आचार्यत्वस्थापनमित्यर्थः ।

[भा.१९९०] पुव्वं ठावेति गणे 'जीवंतो गणहरं जहा राया ।
कुमरे उ परिच्छित्ता' रज्जरिहं ठावए रज्जे ।।

वृ- पूर्वमेव जीवन्नाचार्यो यः शक्तिमानस्तं गणधरं गणे स्थापयति, यथा राजा कुमारान् परीक्ष्य यः शक्तिमत्तया राज्यार्हस्तं राज्ये स्थापयति, कथं परीक्ष्येत्यतः परीक्षाविधिमाह—

[भा.१९९१] दहिकुड अमच्च आनत्ती कुमारा अतिनने तहिं एको ।
पासे निरिक्खिऊणं असमंति पवेसणे रज्जं ।।

वृ- एगो राया बहुपुत्तो । सो चिंतेइ जो सत्तिमंतो तं रज्जे ठवेहामि । ततो कुमारे परिच्छिउमाढत्तो । आणत्ता पुरिसा दहिघडगे एगत्थ ओगासे ठवेह तिहिं ठवित्ता रन्नो निवेदियं । अमच्चो भणितो । वच्छ तुमं दहिघडाणं पासे अत्थाहि गतो अमच्चो । रन्ना ते कुमारा सद्दावित्ता भणिया वच्चह दहिघडमेक्केक्कं आनेह । ते गया अन्नं वहंतयं न पासंति । ततो ते अप्पासेंता सयं चेव दहिघडमेक्केक्कं घेतुसंपट्ठिया । एक्को कुमारो पासाणि निरिक्खेत्ता अन्नं वहंतयमपासंतो अमच्चं भणति गिण्ह दहिघडं । अमच्चो नेच्छइ । कुमारेण असिं उग्गिरिऊण भन्नइ 'जइ नेच्छसि सीसं ते पाडेमि' । अमच्चेण गहितो दहिघडो । कुमारो तं घेतुं गतो रायसमीवं । रन्नाह स सत्तिमंतोत्ति परिक्खिचा राजे ठविते ।। अक्षरयोजना त्वियम् दधिकुटा एकत्र राजपुरुषैः स्थापितास्तदनन्तरममात्यस्याज्ञप्तिः प्रदत्ता यथा घटानां पार्श्वे तिष्ठ । ततः कुमारा दधिघटानामानयने निरोपितास्तत्रैकः कुमारः पार्श्वान् निरीक्ष्यान्यमपश्यन् अमात्यस्योपरि असिरुद्गीरितस्ततो मन्त्रिणा दधिघटो गृहीतस्तेन दधिघटस्य प्रवेशने कुमारेण कारिते दृष्टे तस्य कुमारस्य राज्यं दत्तवान् । अत्रोपनयमाह—

[भा.१९९२] दसविहवेयावच्चे नियोग कुसलुज्जयाणमेवं तु ।
ठावेति सत्तिमंतं असत्तिमंते बहू दोसा ।।

वृ- एवमाचार्योऽपि दशविधवैयावृत्ये उद्यतानामुद्यतमतीनां साधूनां मध्ये कुसलत्ति यो यत्र कुशलस्तस्य तत्र नियोगं करोति तं तत्रनियोजयति यस्तं शक्तिमन्तं गणधरं स्थापयति । अशक्तिमति तुस्थाप्यमाने बहवो दोषाः केते इति चेदुच्यते-सोऽशक्तिमत्वेन न शक्नोति साधून् यथायोगं नियोक्तुं । तत आहारोपधिपरिहानिर्निर्जरातश्च ते परिभ्रश्यन्ति । अथाशुकारेण मरणतः पूर्वं न स्थापितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्यात्ततोऽस्यापिते गणधरे स काल्गतो न प्रकाशयितव्य इत्यादि पूर्वोक्तमवसातव्यम् ।

अथैव विधिशेषमाह–

[भा.१९९३] दोमादी गीयत्थे, पुव्वुत्तगमेण सति गणं विभए ।
मीसे व अनरिहे वा, अगीयत्थे वा भएज्जाहि ।।

वृ- आचार्येण शिष्या निर्मापितास्ते द्वयौ त्रयश्चत्वारो वा भवेयुस्तेषु द्वयादिषु गीतार्थेषु सति प्रभवति परिवारे पूर्वोक्तेन गमेन तृतीयो द्देशकोक्तेन प्रकारेण गणं विभजेत् । तेषु सर्वेष्वपि विभज्य पृथक्पृथग्गणो दातव्य इत्यर्थः । तथा मिश्राणामेतेषामाचार्यशिष्यानां मध्ये केचित् गीतार्थाः केचिदगीतार्थास्तानपि विभजेत् । किमुक्तं भवति । ये गीतार्थास्तान् गणधरपदस्थाप्यतया पृथक्कुर्यादितरांस्त्व-गीतार्थाननर्हतया अथवा यैरर्थो देशतो गृहीतो देशतो न गृहीतस्ते मिश्रास्तान्विभजेत् । एते मिश्रा अपि योग्या एते त्वयोग्या इति विभागेन स्थापयेत् । तथा ये शरीरेण जुङ्गिकतया सर्वथा गणधरपदानर्हास्तानपि विभजेत् । वाशब्दोऽपिशब्दार्थ एकान्तेनायोग्यतया पृथक् स्थापयेत् । अगीतार्थान् वा भजेत् । इयमत्र भावना-येऽगीतार्थानाचार्यलक्षणोपेतास्ताननर्हतया स्थापयति । ये पुनरगीतार्था अपि संभाव्य श्रुतसम्पद आचार्यलक्षणोपेतान् तान् योग्यतया पृथक् स्थापयति । सम्प्रति मिश्रपदव्याख्यानार्थमाह–

[भा.१९९४] गीयागीय मिस्सा अहवा अत्थस्स देसो गहितो न ।
तत्थ अगीयअनरिहा आयरिया तस्स होंती उ ।।

वृ- केचित् गीता गीतार्थाः केचिदगीतार्था एते मिश्रा अथवा अर्थस्य देशो यैर्गृहीतस्ते मिश्रास्तत्र ये अगीता आचार्या लक्षणपरिभ्रष्टाश्च ते आचार्यत्वस्यानर्हा भवन्ति ।। सम्प्रति 'से य समुक्कसणारिहे स समुक्कसियव्वो, नो समुक्कसिणारिहे नो समुक्कसियव्वे' इत्यस्य भावार्थमभिधित्सुः प्रथमतः पूर्वपक्षमुत्थापयति–

[भा.१९९५] कहमरिहोवि अनरिहो किंतु हु असमिक्खकारिणो थेरा ।
ठावेंति जं अनरिहं चोयग सुण कारणमिणं तु ।।

वृ- परो ब्रूते-कथं पूर्वमाचार्यो विद्यमानवेलायामर्होऽपि सन् पश्चादनर्हो जातो येनोच्यते स चेत्समुत्कर्षणार्हस्तर्हि समुत्कर्षयितव्यः । किन्तु वितर्के वितर्कयामि हु निश्चितमसमीक्षितकारिस्थविरा आसीरन् यदनर्हं स्थापयन्ति यथायं समुत्कर्षयितव्य इति । अत्र सूरिः प्राहचोदक ! शृणु कारणमिदं येन पूर्वमर्होऽपि पश्चादनर्हो जातः । तदेवकारणमधिधित्सुः द्वारगाथमाह–

[भा.१९९६] उप्पियण भीतसंदिसण, देसिए चेव फरुस संगहिए ।
वायगनिप्फावग, अन्नसीस इच्छा अहाकप्पो ।।

वृ- उप्पियणं मुहुः श्वसनं तत् द्वारं, भीतसन्देशनद्वारं, अदेशिकद्वारं, परुषद्वारं, एतानि चत्वार्यपि प्रस्तुतार्थविषयाणि, सङ्ग्रहद्वारं, वाचकनिष्पादकंद्वारं, अन्यशिष्यद्वारं, इच्छाद्वारं, यथाकल्पद्वारं, इत्येत्यानि सङ्ग्रहादीनि द्वाराणि । अत्थियाइं व अन्ने समुक्कसणारिहे इत्यादिसूत्रविषयाणि इति द्वारगाथासंक्षेपार्थः । सम्प्रति उप्पियणद्वारं विभावयिषुराह–

[भा.१९९७] सन्निसेज्जागयं दिस्सा सिस्सेहि परिवारियं ।
कोमुदीजोगजुत्तं व तारापरिवुडं ससिं ।।

[भा.१९९८] गिहत्थ परतित्थिहिं संसयत्थीहिं निच्चसो ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

सेविज्जंतं विहंगेहिं सरं वा कमलोज्जलं ।।

[भा.१९९९] खग्गूडे अनुसासंतं सद्धावंतं समुज्जए ।
गणस्स गिला कुव्वंतं संगहं विसए सए ।।

[भा.२०००] इंगियागारदक्खेहिं सया छंदानुवत्तिहिं ।
अविकडियनिद्देसं रायाणं व अनायगं ।।

वृ- सती नाम शोभना स्वकीया वा निषद्या वा तस्यां गतमुपविष्टं शिष्यैः परिवारितमित्थं भूतमुपमयति । कौमुदी कार्तिकीपौर्णमासी तद्योगयुक्तं तारापरिवृतं शशिनमिव । तथा गृहस्थैः परतीर्थिभिः संशयार्थिभिश्च साधुभिर्नित्यशः सर्वकालं सेव्यमानं । किमिवेत्यत आह- कमलोज्जलं कमलपरिमण्डितं सर इव विहगैः पक्षिभिः । तथा खग्गूडान् कुस्वभावात् अनुशासन्तं सम्यग् उद्यताः समुद्यतास्तान् श्रद्धापर्यन्तं तेषां महर्ती श्रद्धामुत्पादयन्तं तथा गणस्य गच्छस्य अगिलया निर्जरार्थमात्मोत्साहेन स्वके विषये आत्मीयया शक्त्या इत्यर्थः संग्रहं कुर्वन्तम् । तथा इङ्गिताकारदक्षैश्छन्दोनुवर्तिभिः सदा सर्वकालमविकटितनिर्देशमखण्डिताज्ञं राजानमिव अनायकमविद्यतेनायको यस्य स तथा तं चक्रवर्तिनमित्यर्थः । दृष्ट्वा कश्चिदगीतार्थ उत्पन्नगौरवो भवति -

[भा.२००१] उत्पन्न-गारवे एवं, गणित्ति परिकंखिओ ।
उप्पियंतं गणिंदिस्स अगीतो भासेइ इमं ।।

वृ- उत्पन्नमभिलषणीयतया जातं गौरवं यस्य स तथा एवमहमपि गणी भवामि गणिपदमवाप्य परिपालयामि । ततः शोभनं भवतीत्येवं परिकाङ्क्षितः परिकांक्षावान् गणिनमाचार्यमुप्पियन्तं मुहुर्मुहुः श्वसन्तं मर्तुकामलिङ्गं दृष्ट्वा कश्चिदगीतार्थः । कथमहं गणधरो भविष्यामीति विचिन्त्य यथा गच्छवर्तिनः साधवः शृण्वन्ति तथा मातृस्थानतः इदं वक्ष्यमाणं भाषते । तदेवाह—

[भा.२००२] अलम्मज्झ गणेणंति, तुब्भे जीवह मे चिरं ।
किमेयं तेहि पुट्ठो उदिव्वए मे गणो किल ।।

वृ- अलं पर्याप्तं मम गणेन यूयं मम पुण्योदयेन चिरं प्रभूतं कालं जीवय । ततस्ते गच्छवर्तिनः साधवस्तस्यागीतार्थवचनमाकर्ण्य तमगीतार्थं ब्रुवते ।। किमेतत्त्वं ब्रूषे, यथालं मम गणेन एवं तैः पृष्टः सन्ः सोऽगीतार्थो वक्ति । क्षमाश्रमणैः किल मे गणो दीयते । तत एवमुक्तं मयेति ।

अथवा उप्पियणद्वारस्यायमर्थः ।

[भा.२००३] अट्ठाविए व पुव्वंतु, गीयत्था उप्पियंतए ।
आमदाहामो एयस्स, संमतो एस अम्हवि, ।।

[भा.२००४] गीयत्थो य वयत्थो य, संपुन्नसहलक्खणे ।
सम्मतो एस सव्वेंसि साहू ते ट्ठावितो गणे ।।

वृ- वाशब्दः प्रकारान्तरद्योतेन । पूर्वमस्थापिते गणधरे म्रियमाण आचार्यः किल उप्पियत्तित्ति मुहुर्मुहुः श्वसिति । तं च तथाभूतं दृष्ट्वा गीतार्थश्चिन्तयति आचार्यस्य सा वाग् नास्ति यया ब्रूते यता अमुकं साधुं गणधरं स्थापयथ । मा भूत्सा वाणी वयमेव गच्छवर्तिनः साधुन् भणामः यथाचार्यैरमुको गणधर पदे सन्दिष्ट इति तथा चोपायं करिष्यामो यथा गच्छ साधूनाम कम्पनीयो भवति । एवं चिन्तयित्वा गच्छ साधवः श्रृण्वन्ति तथा ब्रूते-आमदाहामो एयस्सात्ति इच्छामः क्षमाश्रमणाश्च त्सायमुकस्य दास्यामो

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

गणधरपदमस्माकमप्येष सम्मतो यत एष गीतार्थो, वयस्यः, सम्पूर्णानि शुभानि लक्षणानि यस्यासौ ससम्पूर्णशुभलक्षकः तथा एष सर्वेषां साधूनां सम्मतस्ततस्ते त्वया गणे स्थापितः । एवमेतौ द्वौ प्रकारावुप्पियणद्वारे व्याख्यातौ । एतौ द्वावपि जनौ यदि पूर्वमाचार्येण समीक्षितौ यथानर्हाविति तदा न कश्चिदाचार्याणामसमीक्षितदोषः ।। गतमुप्पियणद्वारमधुना भीतसन्देशद्वारमाह-

[भा.२००५] असमाहिय मरणं ते, करेमि जइ मे गणं न देसि ।
इति गीते उ गीते, संदिसए गुरु तओ भीओ ।।

वृ- कश्चिदगीतार्थः पापीयान् प्रत्यासन्नमरणमाचार्यमवगम्य ब्रूते-याद मे मह्यं गणं न ददासि, ततस्तेऽसमाहितमरणं तथा करोमि वर्तमानसामीप्ये वर्तमानवद्वेति वचनात् प्राकृतत्वाद्‌भविष्यति वर्तमानात् ततोऽयमर्थः करिष्यामि यथा दीर्घकालं संसारं भ्रमसि । तत एवमुक्ते तस्य भीत आचार्यो गीतो गीतार्थो देशकालपुरुषौचित्यवेदनात् गीतार्थान् संदिशति यथा एतस्मै मया गणो दत्त इति गीतार्थाश्च विदितकारणा ब्रुवते-

[भा.२००६] आमं ति वोत्तुं गीयत्था जाणंता तं च कारणं ।
कयठे तं तु निग्गहे अतिसेसीय संवसे ।।

वृ- आमं इच्छाम इति उक्त्वा गीतार्थास्तत्कारणं जानन्तः कृतार्थे निर्यापिते आचार्ये तं दुष्टाभिप्रायं निर्गृह्णन्ति निष्काशयन्ति । एवमेषोऽनर्हो भवति । अथातिशेषेऽतिशयज्ञानी जानाति । यथा साम्प्रतमेष निर्दोषीभूतः । स वा तस्मात् स्थानात् गुरुजनसमक्षं प्रतिक्रान्तस्ततः संवास्यते ।। गतं भीतविदेशद्वारम् । इदानीमदेशिकद्वारमाह-

[भा.२००७] अरिहो व अनरिहो होइ, जो उ तेसिमदेसितो ।
तुल्लदेसीव फरुसो महुरो व असंगहो ।।

वृ- एक आचार्यस्तस्य पर्षत् कुडुक्का । तस्या मध्ये एक आचार्येण गणधरपदे समीहितोऽन्ये चाचार्यस्य शिष्याः सिन्धुदेशादिषु विहरन्ति । ते सिन्ध्वादिषु विहृत्याचार्यसमीपमागता एकं कुडुक्कमाचार्यसमीहितं मुक्त्वा अन्ये सर्वे कुडुकाः केचित्कालगताः केचित् प्रतिभग्नाः एवं स कुडुक्कदेशोद्‌भवः तेषां सैंधवादीनामनर्हो जातो, येन ते तस्य भिन्नदेशिकत्वादुल्लापं न परियच्छन्ति । अक्षरयोजना त्वेमर्होऽप्यनर्हो भवति यस्तेषां तत्कालभाविनां साधूनामदेशिको यथा सैंधवादीनां कुडुक्क इति ।। गतमदेशिकद्वारमधुना परुषद्वारमाह-तुल्लेदेसीव फरुसो तुल्य देशीयः पूर्वं समीहितो गणधरपदे स पश्चात् परुषभावो जातः परुषत्वाश्च प्रतिचोद्यमान आक्रोशति । आक्रोशांश्चासहमानाना-मुत्संखडादिकं कुर्वन् गच्छभेदं करोति । एवमेष पश्चादनर्हः ।। सम्प्रति अत्थियाइं अन्ने समुक्कसिणारिहे इत्यस्यार्थ विभावयिषुः संग्रहद्वारमाह-महुरो व असंगहो । यः पूर्व समीहितः स सत्यपि मधुरत्वे असंग्रहो न संग्रहशीलः । अन्यस्तु संग्रहशीलो मधुरश्च ततो यः संग्रहशीलः समुत्कर्षते नेतर इति ।। साम्प्रतमस्मिन्नेवार्थे वाचकनिष्पादकद्वारमाह-

[भा.२००८] वायंतगनिप्फायग चउरो भंगाउ पढमगो गज्झो ।
तइउ उ होइ सुन्नो, अन्नेण व सो वा वाएइ ।।

वृ- वाचको निष्पादक इति पदद्वयसंयोगतश्चत्वारो भङ्गास्तद्यथा-वाचयत्यपि निष्पादयत्यपीति प्रथमः । वाचयति न निष्पादयति द्वितीयः । न वाचयति निष्पादयति तृतीयः । न निष्पादयति चतुर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र सत्यपि पूर्वसमीहिते यः प्रथम भङ्गवर्ती स स्थाप्यते, नेतरो द्वितीयादिभङ्गवर्ती । तथा चाह-प्रथमको ग्राह्यः, द्वितीयभंगको न स्थाप्योऽनिष्पादकत्वात्, तृतीयस्तु शून्यो वाचनाया अभावे निष्पादकत्वायोगात् । यदि वा आत्मना न वाचयति अन्येन वाचयति तदा सोपि योग्यः । चतुर्थभङ्गिकस्तु सर्वथानर्ह एव ।। सांप्रतमधिकृत एवार्थेऽन्यशिष्यद्वारमाह-

[भा.२००९] असतीव अन्नसीस ठावेंति गणंमि जाव निम्मातो ।
एसो चेव अनरिहो, अहवावि इमो ससिस्सो वि ।।

वृ- आचार्या कालकर्तुकामा आत्मीयाः शिष्याः सर्वेऽप्यनिर्माता इति तेषां मध्ये गणधरपदयोग्ये एकस्मिन्नप्यसति अन्यस्य शिष्यं प्रातीच्छिकं गणे स्थापयन्ति, भणन्ति च यावन्मय शिष्यो निर्मातो निषन्नो भवति तावत्त्वं गणधरो निर्माते सति त्वया गणधरपदं निक्षेप्तव्यं यदि न निक्षिपति ततश्छेदः परिहारः सप्तरात्रं वा तपः प्रायश्चित्तं । एष समीक्षितोऽप्यनर्हो जातः । अथवायं स्वशिष्यो-ऽप्यनर्हस्तमेवाह-

[भा.२०१०] जो अनुमतो बहूणं गणहर अवियतो दुस्समुक्कठो ।
दोसा अनिक्खिवंते सेसा दोसं च पावेंति ।।

वृ- आचार्यैः कालं कुर्वद्भिर्ज्ञातो य एष मम शिष्यः सूत्रतोऽर्थतश्च निर्मात एतस्मादयं बहुभिर्भागैर्गणधरगुणैरभ्यधिको भविष्यति । केवलमिदानीमनिर्मातः ततो योऽसौ निर्मातः स आचार्यैरुच्यते यावदेतत्त्वं गणधर एतस्मिंस्तु निर्मापिते त्वया गणधरपदं निक्षेप्तव्यम् । यत एष तव पार्श्वाद्बहुभिर्भागैर्गच्छस्य प्रवचनस्य चोपग्रहकारी भविष्यति । तेन तथा प्रतिपन्नमाचार्याः कालगताः स च तेन निर्मापितो जातः समस्तस्यापि सङ्घस्य प्रीतिकरः । ततो यस्तेन निर्मापितो जातोऽनुमतो बहूनां स गणधरः स्थापनीयो, यस्त्ववियत्तोऽ प्रीतिकरः पूर्वस्थापितः स दुस्समुत्कृष्ट इति वक्तव्यो निक्षिपगणधरपदमेवमुक्तो यदि न निक्षिपति ततस्तस्मिन्ननिक्षिपति दोषाश्छेदं परिहारं सप्तरात्रं वा तपः प्राप्नोतीति भावः येऽपि च शेषास्तं भजन्ते, तेऽपि दोषं प्राप्नुवन्ति, च्छेदं परिहारं सप्तरात्रं वा तेऽपि प्राप्नुन्तीत्यर्थः । यदेतद्भणितमेतत्प्रसङ्गागतमयं पुनः स्फुटसूत्रेण निपातः

[भा.२०११] अब्भुज्जयमेगयरं व वसिय कामंपि होइ सुत्तं तु ।
ते बेंति कुणसु एक्कं, गीयं पच्छा जहिच्छाते ।।

वृ- आचार्येण कोऽपि स्वशिष्यः समीहितो यथायमाचार्यपदयोग्य इति, ततो गीतार्थाः संदिष्टा एष समुत्कर्षयितव्यः । स च कालगते आचार्ये ब्रूते-अहमभ्युद्यतविहारं जिनकल्पादिकमभ्युद्यतमरणं वा प्रतिपत्स्ये । तस्मिन्नभ्युद्यतमेकतरं विहारं मरणं वा व्यवसातुमनसि भवतिनिपततिसूत्रम्-''अत्थिया इत्य अन्ने केह समुक्कसणारिहे से समुक्कसियव्वे नत्थि याइ व केइ अन्ने समुक्कसणारिहे सो चेव समुक्कसियव्वे'' तस्मिन्नभ्युद्यत स्यैकतरंच्यवसातुकामे अस्ति चेदत्र गच्छेऽन्यः कश्चित्समुत्कर्षणा र्हस्तर्हि समुत्कर्षयित्वो नास्ति चेदत्र कश्चिदन्यः समुत्कर्षणा र्हस्ततः स एवमुक्तर्षयितव्यः । कथमिति चेदुच्यते-कीतार्था अभ्यर्थनापुरःसरं तं ब्रुवते यूयं गणधरपदं परिपालयन्त एकमस्माकं कंचन गीतं गीतार्थ कुरुत निर्मापयत । ततः पश्चात्स्मन्निर्मापिते ते भवतां यदिष्टं यत् प्रतिभासते तत्कुरुतेति भावःष । अत्रेच्छाद्वारावसरः एवमुक्ते तेन गणधपदं प्रतिपद्य कश्चनाप्येको निर्मापितः पश्चात्तस्य चित्तमजायत यथा अभ्युद्यतविहारात् गच्छपरिपालनं विपुलतरं निर्जराद्वारं तस्मात्परिपालयाम्यहमेव गच्छमिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा चाह–

[भा.२०१२] निम्माउण्णेगं इमंपि मे निज्झरए दारं तु ।
निक्खिवन निक्खेवामी इत्थं इतरे उ खुब्भंति ।।

वृ- स गणधरपदेस्थापितं एकं कंचनापि निर्माप्येदं चित्तमकार्षीत् । इदमपि गच्छपरिपालनं महत् निर्जराया द्वारं एवं व्यवसिते । तस्मिन् गच्छे गीतार्था ब्रवते निक्षिप गणधरपदं स प्राह न निक्षिपामि, किं त्विच्छामि गच्छं परिपालयितुमेवमुक्ते इतरे गच्छगीतार्थाः क्षुभ्यन्ति ते च क्षुभ्यन्तो यद् ब्रुवते तदाह-

[भा.२०१३] दुस्समुक्कट्ठं निक्खिन भणंते गुरुगा अनुठिहिंते य ।
एमेव अन्नसीसे निक्खिवणा गाहितं नवरं ।।

वृ- पूर्वं तव नेच्छितं गणधारणं पश्चादिदानीं यद्यपि रुचितं, तथापि न त्वस्माकं रोचसे दुःसमुत्कृष्टं खलु तव गणधरपदं तस्मान्निक्षिपेति । एवं भणति गच्छसाधुवर्गे प्रायश्चित्तं चत्वारो गुरुकाः । अनुठिहिंते य एमेवेत्यादि योऽसौ प्रातीच्छिकः स्थापितः स चेत् यावदद्यापि न निर्मापयति कथमपि शिष्यं तावद्यदि गच्छसाधवो भाषन्ते । निक्षिपत्वं गणधरपदमिति तदा तेषां तथा भाषमाणानां प्रायश्चित्तं चत्वारो गुरुकाः । अथ तस्मिन्नन्यशिष्ये निर्मापयितुमिष्यमाणे अनुतिष्ठति । अनिर्मापिते गणधरपदनिक्षेपणं करोति तदा तस्मिन्नन्यशिष्ये अनुतिष्ठति गणधरत्वं निक्षिपतः प्रतीच्छिकस्य प्रायश्चित्तमेव चत्वारो गुरुका इत्यर्थः, यथा गीतार्थत्वेन गच्छसाधवः सेविष्यन्ते तन्निमित्तमपि तस्य प्रायश्चित्तं, नवरं केवलं तस्मिन्नन्यशिष्ये ग्राहिते निर्मापिते गणधरपदनिक्षेपणा कर्त्तव्या । न च तत्र तां कुर्वतस्तस्य च्छेदः परिहारः सप्तरात्रं वा तपः । गतमिच्छाद्वारम् सम्प्रति यथाकल्पद्वारावसरस्तत्र ये गच्छसाधवस्तं स्वगच्छसाधुं प्रतीच्छिकं च पूर्वस्थापितं यथाकल्पेन नाभ्युत्तिष्ठति । यथाकल्पानभ्युत्थानमेवाह-

[भा.२०१४] आवस्सग सुत्तत्थे भत्ते आलोयणा उवठाणे; ।
पडिलेहा कितिकम्मं मत्तग संथारगतिगं च ।।

वृ- आवश्यके क्रियमाणे यो विनयस्तस्य आचार्यस्य कर्तव्यस्तं च न कुर्वन्ति । सूत्रमर्थ वा तस्य समीपे न गृह्णन्ते न भत्तति आचार्यप्रायोग्यं तस्य भक्तं न प्रयच्छन्ति । आलोयणत्ति तस्य पुरतो नालोचयन्ति । उवट्ठाणत्ति आचार्यवस्त्रकम्बलपात्रादिप्रत्युपेक्षणाय नोपतिष्ठन्ति । नापि कृतिकर्मवन्दनकमन्यद्वा कुर्वन्ति । नापि मात्रकत्रिकं तस्य ढौकयन्ति तिस्रः संस्तारकभूयस्ता अपि न प्रयच्छन्ति तेषामपि यथाकल्पमनभ्युत्तिष्ठतां प्रायश्चित्तं च्छेदः परिहारः सप्तरात्रं वा तप इति ।।

मू. (१०८) *आयरिय उवज्झाए उहायमाए अन्नयरं वएज्जा, जाव सव्वेसिं तप्पतियं च्छेए वा परिहारे वा ।।*

वृ- अत्र सम्बन्धमाह-

[भा.२०१५] गेलन्नंमि अहिगए अड्डायमाणे सियाउ उहाणं ।
भवजीविय मरणा वा संजमजीया इमं होति ।।

वृ- पूर्वमनन्तरसूत्रे ग्लानत्वमधिकृतं तस्मिंश्च ग्लानत्वे अतिष्ठति अनिवर्तमाने स्यात्कस्यचित् पीडामसहिष्णोरेव धावनमतोऽवधानप्रतिपादनामधिकृतसूत्रमथवा पूर्वसूत्रे भवजीवितमरणं ममंसिणं कालगयंसीत्यनेनोक्तं भवजीवितमरणा चावश्यं संयमजीवितमरणमपि भवति । संयमस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवितावधिकत्वात् ततो भवजीवितमरणात्प्राक्तनसूत्राभिहितात्तदनन्तरमिदं संयमजीवितान्मरणं प्रतिपाद्यते भवतीति तदर्थमिदं सूत्रमनेनसम्बन्धेनायातस्यास्य वाख्या-आचार्य उपाध्यायो वा मोहेन रोगेण वा अवधावन् उपाध्यायादिकानां गीतार्थपंचमानां पुरुषाणामन्यतमं वदेत् यावत्करणादेवं परिपूर्णपाठो द्रष्टव्यः ।। अज्ञो मर्मंसि नं ओहाविर्यंसि अयं समुक्कसियव्वो सेय समुक्कसणारिहे समुक्कसियव्वे सिया । से य नो समुक्कसिणारिहे नो समुक्कसियव्वे सिया, अत्थिथ इत्थ अन्नो केइ समुक्कसणारिहे सेसमुक्कसियव्वे, नत्थि या इत्थ अन्ने केइ समुक्कसणारिहे से चेव समुक्कसियव्वे तेसिं च णं सेसमुक्किट्ठंसि परो वएज्ञा दुस्समुक्किट्ठं ते अज्ञो निक्खिवाहि तस्स नं निक्खिवमाणस्स नत्थि केइ च्छेदं परिहारे वा ।। अस्य व्याख्या प्राग्वत् ।

अधुना निर्युक्तिवि स्तरः केन पुनः कारणेनासवावधावतीति चेदत आह-

[भा.२०१६] मोहेन वा रोगेन व ववहाणां भेसयां पयत्तेणं ।
धम्मकहाए निमित्ते अनाहसाला गवेसणाय ।।

वृ- अवधावनं मोहेन वा कामोद्रेकरुपेण रोगेण वा । तत्र मोहविषया यतना प्राक् तृतीयोद्देशकेऽभिहिता, यदि रोगेण ततो नावधातव्यम् । किन्तु प्रयत्नेन भेषजं दातव्यम् । तच्च धर्मकथानिमित्तेन चोत्पादनीयं तथाप्यलाभे अनाथशालातो गवेषणा भेषजस्य कर्तव्येति निर्युक्तिगाथायाः संक्षेपार्थः । एनामेव सम्प्रति भाष्यकृद्विवरीषरिदमाह-

[भा.२०१७] मोहेन पुव्वभणियं रोगेन करेंतिमाए जयणाए ।
आयरियकुलगणे वा संघेव कमेण पुव्वुत्तं ।।

वृ- यदि मोहेनावधावनं कर्तुमीहते तदा यत्पूर्व तृतीयोद्देशके मोहचिकित्साविषयं भणितं, तत्कर्तव्यमथ रोगेण तदानया वक्ष्यमाणया प्रथमतः प्रासुकेन तदलाबेनाप्रासुकेनापीत्येवंरुपया यतनया पूर्वोक्तं भेषजं प्रयत्नेन सम्पादनीयमित्यादिरुपं कुर्वन्ति । के ते कुर्वन्ति इति अत आचार्यः कुलं गणः सङ्घो वा कथमित्याह-क्रमेण परिपाटया । तामेव परिपाटीं कालनियमनपूर्विकामाह-

[भा.२०१८] छम्मासे आयरिओ, कुलं तु संवच्छराणि तिन्नि भवे ।
संवच्छरं गणो खलु, जावज्जीवं भवे संघो ।।

वृ- प्रथमत आचार्यः षण्मासान् यावत् चिकित्सां कारयति, तथाप्यप्रगुणीभूतं तं कुलस्य समर्पयति, ततः कुलं त्रीन् संवत्सरान् यावच्चिकित्सकं भवति, तथाप्यप्रगुणीभवने गणस्य-तदनन्तरं संवत्सरंयावत् गणः खलु चिकित्सां कारयति, तथाप्यनिवर्तितरोगे तं गणः सङ्घस्य समर्पयति, ततः सङ्घो यावज्ञीवं प्रासुकप्रत्यावतारेण तदभावे चाप्रासुकेनापि यावज्ञीवं चिकित्सको भवति । एतच्चोक्तं भक्तविवेकं कर्तुमशक्नुवतः, यः पुनर्भक्तविवेकं कतु शक्नोति, तेन प्रथमतोऽष्टादशमासान् चिकित्सा कारयितव्या, विरतिसहितस्य जीवितस्य पुनः संसारे दुःप्रापकत्वात्तदनन्तरं चेत्प्रगुणीभवति ततः सुन्दरमथ न भवति तर्हि भक्तविवेकः कर्तव्यः । अत्रैवादेशान्तरमाह-

[भा.२०१९] अहवा बिंइयादेसा गुरुवसभे भिक्खुमादि तेगच्छं ।
जत्थिय बारसवासा, तिच्छक्कसासा असुद्धेण ।।

वृ- अथवा द्वितीय आदेशो गुरुवसभौ च ते भिक्ष्वादौ च यथाक्रमं चिकित्सां कारयन्ति यावज्ञीवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशवर्षाणि त्रिषट्कमष्टादशमासान् कथमित्याह-अशुद्धेन अपिशब्दोऽत्र लुप्तो द्रष्टव्यः । प्रथमतः शुद्धेन तदभावे चाशुद्धेनापि तदनन्तरं मिक्ष्यादिना भक्तविवेकः कर्तव्यः । गुरुस्तु गच्छप्रवर्तक इति तस्य यावज्जीवं चिकित्सा, तत्र प्रथमादेशेन च भक्त विवेकं कर्तु शक्नुवन्तं प्रत्यष्टादशमासान् ।

कश्चिकित्साविधिस्तमभिधित्सुराह-

[भा.२०२०] पयत्तेण ओसहं से करिंति सुद्धेण उग्गभादीहिं ।
पणहानीए अलंभे, धम्मकहाहिं निमित्तेहिं ।।

वृ- प्रथमतः प्रयत्नेनोद्भामादिभिः शुद्धेन वस्तुजातेन से तस्यौषधं कुर्वन्ति, तदलाभे पञ्चपरिहान्यां यावच्चतुर्गुरुकेनाप्यशुद्धेनापि तथाप्यलाभे धर्मकथाभिस्तदौषधमुत्पादयन्ति, तथाप्यलाभे निमित्तैरपि ।।

[भा.२०२१] तहवि न लाभे असुद्धं बहि ठिय सालाहिवानुसठादी ।
नच्छंते बहिदानं सलिंग विसणेन उड्डाहो ।।

वृ- तथापिनिमित्तैरपि चेदशुद्धं न लभंते, ततोऽनाथशालाया आरोग्यशाला तस्या मध्ये न प्रविशन्ति, किन्तु बहिः स्थितास्त आरोग्यशालात औषधं गवेषयित्वा समानयन्ति । अथ ते शालानिवासिनो न प्रयच्छन्ति । अथ स्वलिङ्गेनापि तत्र कस्मान्न प्रविशन्ति तत आह स्वलिङ्गविसनेन स्वलिङ्गप्रवेशेन प्रवचनस्योड्डाहः नामी किमपि जानते । न चामीषां धर्मः श्रेयानतः क्वचिदपि किंचिदप्यलभमाना अनाथा इवात्र समागता इति प्रवचनस्योपधात एतदेव 'पणहाणीए अलंभ' इत्यादिकं विवरीषुरिद-माह-

[भा.२०२२] पनगादी जा गुरुगा, अलब्भमाणे बहिं तु पायोग्गे ।
बहिट्ठिय सालगवेसण तत्थ पभुस्सानुसट्ठादी ।।

वृ- पञ्चकादि परिहान्या पञ्चकादिप्रायश्चित्तमौषधोत्पादनाय तावदासेवनीयं यावच्चत्वारो गुरुकास्तथापि बहिः प्रायोग्ये औषधे अलभ्यमाने आरोग्यशालाया बहिःस्थिता औषधस्य गवेषणं कुर्वन्ते, तत्र तद्वास्तव्यानामदाने यः प्रभुरारोग्यशालाया अधिपतिस्तस्यानुशास्तिमादिशब्दाद्धर्मकथां निमित्तं च प्रयुज्यते ।

[भा.२०२३] असई अच्चियलिंगे पविसण पतिभाणवंत वसभाओ ।
जइ पडिवत्तियकुसला भासन्ति नियल्लगत्तं से ।।

वृ- निमितैरप्यलाभे अर्चितलिङ्गेन यत्तस्य पूजितं लिङ्गं, तेन लिङ्गेन रक्तपटादिरुपेण प्रवेशनं कुर्वन्ति । तेषु प्रविष्टेषु ये प्रतिभानवन्तः प्रतिवचनदानसमर्था वृषभास्ते स्वलिङ्गेन गत्वा प्रभुं भाषन्ते यथा-को युष्माकं सिद्धान्त एवमाभाष्य तत्र सिद्धान्तविषये प्रभूणा गृहीतलिङ्गैश्च सह परस्परमुल्लापं तथा कुर्वन्ति यथा उत्तरवादिनो वृषभा भवन्ति, अथवा यदि प्रतिपत्तिकुशलाः परप्रतिपादनदक्षा वृषभास्ततस्ते गत्वा स तस्य प्रभोर्निजकत्वात्मीयत्वं भावयन्ति । तत्रापि सिद्धान्तविषये तैः गृहीतलिङ्गैः सह परस्परमुल्लापं तथा कुर्वन्ति यथा स आवर्ज्यत इति ।

[भा.२०२४] अहव पडिवत्तिकुसला तो तेन समं करंति उल्लावं ।
पभवंतो वि य सो वी वसभेऊ उत्तरीकुणती ।।

वृ- अथवा ये प्रतिपत्तिकुशलाः परप्रतिवचनदानसमर्थास्ततस्ते गत्वा तेन प्रभुणा सह

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परस्परमुल्लापं तथा कुर्वन्ति गृहीतलिङ्गाश्च तथा तं भावयन्ति, तथा सोऽपि आसतां गृहीतलिङ्गा इत्यपिशब्दार्थः ।प्रभवन्नपि वृषभाननुत्तरीकरोति उत्तरवादिनः करोति, ततः स निरुत्तरीकृतः सन् यत् ब्रूते तदाह-

[भा.२०२५] तो भणइ कलहमित्ता तुब्भे मे वहेज्जह उदंतंति ।
ते वि य पडिसुणंती एवं एगाए छम्मासा ।।

वृ- ततः सिद्धान्तोल्लापे पराजितः सन् भणति यूयं मम कलहमित्राणि कलहानन्तरं यानि जातानि मित्राणि तानि कलहमित्राणि । ततो मे ममोदन्तं वहत । एवमुक्ते तेऽपि वृषभाः प्रतिशृण्वन्ति अभ्युपगच्छन्ति । तत एवं गत्यागतिभिस्तमतीवावर्ज्य षण्मासान् यावत् तत्र चिकित्सां कारयंति । एवमेकस्यामनाथशालायां षण्मासा एवं द्वितीयस्यां तृतीयस्यामपि च । तथा चाह

[भा.२०२६] छम्मासा छम्मासा बिइय तइयाए एव सालाए ।।
काऊ अट्ठारसऊ अपउणे ताहे विवेगो 'उ' ।।

वृ- एवमुक्तर्पकारेण द्वितीयस्यामनाथशालायां षण्मासा एवं तृतीयस्यामपीति सर्वसंकलनया अष्टादशमासान् चिकित्सां कारयित्वा प्रगुणीकरोति । अथ प्रगुणो न भवति ततस्तस्य भक्तविवेकः कर्तुमुचितः ।सम्प्रति प्रागुक्तं द्वितीयमादेशं स्पष्टयति,

[भा.२०२७] अहवा गुरुणो जावज्जीवं फासुय अप्फासुएण तेगिच्छं ।
वसभे बारसा वासा अठारस भिक्खुणो मासा ।।

वृ- गुरोराचार्यस्य यावज्जीवं चिकित्सां प्राशुकेनाप्राशुकेन वा कुर्वन्ति, सर्वस्यापि गच्छस्य तदधीनत्वात्, यथाशक्ति निरन्तरं सूत्रार्थनिर्णयप्रवृत्तेश्च ।। वृषभे द्वादशवर्षाणि चिकित्सा ततः परं शक्तौ भक्तविवेकः; एतावता कालेनान्यस्यापि समस्तगच्छभारोद्वहनसमर्थस्य वृषभस्योत्थानात् । अष्टादशमासा भिक्षोश्चिकित्सायां ततः परमसाध्यतया शक्तौ सत्यां भक्तविवेकस्यैव कर्तुमुचितत्वात् ।।

मू. (१०९) *आयरिय उवज्झाए सरेमाणे परं चउराय पंचरायाओ कप्पागं भिक्खुं नो उवट्ठावेइ कप्पाए अत्थि याइं से केइ माननिज्जे कप्पागे, नुत्थि याइं से केइ छेए वा परिहारे वा; नत्थि याइं से केइ माननिज्जे कप्पाए से संतरा छेए वा परिहारे वा ।।*

वृ- अस्य सूत्रस्य सम्बन्धमाह-

[भा.२०२८] उहाविय भग्गवते होइ उवट्ठा पुनो उवक्कंते ।
उक्कसणा वा पगया इमा वि अन्ना समुक्कसणा ।।

वृ- पूर्वमवधावित उक्तः स चेदवधावितो भग्नव्रतो ज़ायेत । भग्नव्रतश्च भूत्वा पुनरुपतिष्ठति । ततस्तस्मिन्नवधावितभग्नव्रते पुनरुपतिष्ठति भवत्युपस्थापना कर्तव्या, तत उपस्थापनाप्रतिपादनार्थमधिकृतं सूत्रं । अथवा पूर्वसूत्रे समुत्कर्षणा प्रकृता ।इयमप्यधिकृतसूत्रेणाभिधीयमानान्या समुत्कर्षणा स्थापनेत्यधिकृतसूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्य स्य व्याख्या-आचार्य उपाध्यायो वा स्मरन् अयमुपस्थापनार्ह इति जानानः परं चतू रात्रात् पञ्चरात्राद्वा कल्पाकं सूत्रतोऽर्थतश्च प्राप्तं भिक्षुं नोपस्थापयति ।तत्र यदि तस्मिन् कल्पाके सत्यस्ति से तस्य कल्पाकस्य कश्चित् माननीयः पिता भ्राता वा ज्येष्ठः स्वामी वा कल्पाको भावी पञ्चरात्रेण दशरात्रेण पञ्चदशरात्रेण वा ततो नास्ति से तस्य कश्चित् च्छेदः परिहारो वा, उपलक्षणमेतदन्यदपि ततः प्रायश्चित्तं माननीयेऽनुत्थापिते तस्योत्थापनाया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयोगात् । अथ नास्ति से तस्य कश्चित् माननीयः कल्पाको भावी । ततः से तस्याचार्यस्योपाध्यायस्य वा स्वकृतादन्तारात् च्छेदः परिहारो वा इयमत्र भावना अत्रादेशद्वयमेके प्राहुश्चतूरात्रान्परं यदि अन्यानि चत्वारि दिनानि नोपस्थापयति तत आचार्योपाध्यायस्य च प्रत्येकं प्रत्येकं प्रायश्चित्तं चतुर्गुरुकं चतुर्गुरुकम्, अथ ततोप्यन्यानि चत्वारि दिनानि लंघयति, ततः षट्लघुकं ततोऽप्यन्यानि चत्वारि दिनानी ततः षट्गुरुकं ततोऽप्यन्यानि यदि चत्वारि दिनानि ततश्चतुर्गुरुकच्छेदः ततः परमन्यानि चत्वारि दिनानी यदि तर्हि षट् लघुकः षट् लघुकच्छेदः ततोऽपि चेदन्यानि चत्वारि ततः षड् गुरुकः षड् गुरुकच्छेदः । ततः परमेकैकदिवसातिक्रमे मूलानवस्थाप्य पाराञ्चितानि, द्वितीयादेशवादिनः प्राहुः पञ्चरात्रात् परं यदि नोपस्थापयति ततश्चतुर्गुरुकं प्रायश्चित्तं, ततोऽपि परं यदि पञ्चदिनानि लङ्घयति ततः षड् लघुकं, ततः परमपि पञ्चरात्रादिक्रमे षड् गुरुकं, ततोऽपि परं यदि पञ्च दिनानि वाहयति ततश्चतुर्गुरुकश्चतुर्गुरुच्छेदस्ततः परमन्यानि चेद्दिनानि पञ्च ततः षड् लघुकः षड्लघुकच्छेदः । ततोऽपि पञ्चरात्रातिवाहनेन षट्गुरुकः षट्गुरुकच्छेदः । ततः परमेकैकदिवसातिवाहने मूलानवस्थाप्य पाराञ्चितानि । एष सूत्रसंक्षेपार्थः ।

अधुना भाष्यनिर्युक्तिविस्तरः । तत्र भाष्यकारः प्राह-

[भा.२०२९] संभरण उवट्ठावण तिन्नि उ पणगा हवंति उक्कोसा ।
माननिज्जे पितादी तु, तेसु सती च्छेद परिहारो ।।

वृ- संस्मरणमुपस्थापनाविषये यथा एष उपस्थापयितव्यो वर्तते इति । तत्र माननीये पित्रादौ सति कल्पाकस्यातिवाहने त्रयः पञ्चका भवन्त्युत्कर्षतः । किमुक्तं भवति, विवक्षिते भिक्षौ कल्पाके जाते सति यदि तस्य माननीयः पित्रादिरुपस्थाप्योऽस्ति परमद्यापि कल्पाको नोपजायते तर्हि स जघन्यतः पञ्चरात्रंप्रतीक्षाप्यते, मध्यमतो दशरात्रमुत्कर्षः पञ्चदशरात्रं, तथापि चेन्माननीयः कल्पाको नोपजायते, तर्हि स कल्पाको भिक्षुरुपस्थापनीयो नो चेदुत्थापयति तर्हि च्छेदः परिहारो वा प्रायश्चित्तं । अथ तस्य माननीयाः पित्रादयो न सन्ति, ततस्तेषामसत्यभावे यदि तं चतूरात्रमध्ये पञ्चरात्रमध्ये वा नोपस्थापयति तथापि तस्य प्रायश्चित्तं च्छेदः परिहारो वा च्छेदपरिहारग्रहणं सूचामात्रं तेनादेशद्वयेन प्रागुक्तः प्रायश्चित्तविधि द्रष्यव्यः ।।

[भा.२०३०] चिट्ठउ ता उठवणा, पुव्विं पव्वायणादिवत्तव्वा ।
अडयालपुच्छसुद्धे, भन्नति दुखं खु सामन्नं ।।

वृ- तिष्ठतु तावदुपस्थापना, पूर्व प्रव्राजनादिवक्तव्यता वक्तव्या । तत्र यथा पञ्चकल्पे निशीथे वाष्टचत्वारिंशत्पृच्छा शुद्धोऽभिहितस्तथा अष्टचत्वारिंशत् पृच्छा शुद्धे कृते तत्संमुखमिदं भण्यते । दुक्खं खु श्रामण्यं परिपालयितुम् । तथाहि-

[भा.२०३१] गोयर अचित्तभोयण, सज्झायमण्हाण भूमिसेज्जाती ।
अब्भुवगयंमि दिक्खा, दव्वादीसुं पसत्थेसुं ।।

वृ- यावज्जीवं गोचरचर्यया भिक्षामटित्वा अचित्तस्यैषणादिशुद्धस्य भोजनं कर्तव्यं, तदपि बालवृद्धशैक्षिकादिसंविभागेन, तथा चतुःकालं स्वाध्यायो विधातव्यः यावज्जीवं देशतः सर्वतश्चास्नानं । ऋतुबद्धे काले भूमौ शय्या आदिशद्वाद्वर्षारात्रे फलकादिषु शयनं, दिवसे न स्वप्तव्यं, रात्रौ तृतीये यामे निद्रामोभः । एवमुक्ते यद्यभ्युपगच्छति तत एतस्मिन्नभ्युपगते तस्य दीक्षाप्रवेशस्तेषु द्रव्यादिषु प्रशस्ते द्रव्ये शाल्यादिसंचयादौ प्रशस्ते क्षेत्रे गंभीरसानुनादादौ प्रशस्ते भावे प्रवर्धमानपरिणामादौ दातव्या ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२०३२] लग्गादिं च तुरंते अनुकूले दिज्जिए उ अहजायं ।
सयमेव तु थिरहत्थो गुरु जहन्नेन तिन्नट्ठा ।।

वृ- इहोत्सर्गतो लोचे कृते यताजाते च रजोहरणादिके समर्पिते पश्चात्त्रिःकृत्व सामायिकमुच्चार्यते, इत्येष विधिर्यदि पुनर्लग्नादिकंत्वरमाणं स्यात्ततोऽनुकूले लग्नादौ चादिशब्दात् मुहूर्तादिपरिग्रहः त्वरमाणेः शीघ्रं समापतति यथाज्ञातं सनिषद्यं रजोहरणमुखवस्त्रिकाग्रपूररूपं दीयते । उक्तं च । अहाजायं नाम सनिसेज्जं रयहरणं मुहपोत्तिया बालपज्जेय इति, ततो यदि गुरुः स्थिरहस्तो न कम्पते अङ्गगृह्णानस्य हस्तः तर्हि स स्वयमेव जधन्येन तिस्रोऽड्डअव्यवच्छिन्त्वा गृह्णाति समर्थः सर्व वा लोचं करोति-

[भा.२०३३] अन्नो वा थिरहत्थो सामाइयतिगुणमठगहणं च ।
तिगुणं पादक्खिणं नित्थारग गुरुगुणविवड्ढी ।।

वृ- आचार्यस्य स्थिरहस्तत्वाभावे अन्यो वा स्थिरहस्तः प्रव्राजयति समस्तं लोचं करोतीति भावः । तदनन्तरं गुरुः शोभने लग्नादौ प्राप्ते त्रिगुणं त्रीन् वारान् सामायिकमुच्चारयति । इयमत्र भावना-प्रथमतः प्रव्राजनीयमात्मनो वामपार्श्वे स्थापयित्वा चैत्यानि तेन सह वन्दन्ते ततः चतुर्विंशतिस्तवं चिन्तयित्वा नमस्कारेण पारयित्वा चतुर्विंशतिस्तवमाकृष्य त्रिकृत्वः सामायिकमुच्चारयति तदनन्तरसर्थग्रहणं स कारयितव्यः । सामायिकार्थस्तस्य व्याख्यायते इतिभावः । ततः सूत्रतोऽर्थतश्च गृहीतं सामायिकमिति तदनुज्ञानिमित्तं विधिना त्रिगुणं प्रादक्षिण्यं कार्यते । तत्र तृतीयस्यां प्रदक्षिणायामनुज्ञा क्रियते, यथा निस्तारको भव, गुरुगुणैर्विवृद्धिर्भवतु, वर्धस्वेत्यर्थः । एवं प्रव्राजनायां कृतायां यत्कर्तव्यं तदाह-

[भा.२०३४] फासुय आहारो से अनहिंडंतो य गाहए सिक्खं ।
तोहे उ उवठावण छज्जीवनियं तु पत्तस्स ।।

वृ- प्रव्रज्याप्रदानान्तरं से तस्य प्रासुक आहारोदीयते । स च भिक्षां न हिण्डाप्यते किं त्वहिण्डमान एव शिक्षां ग्रहणशिक्षामासेवनाशिक्षां च ग्राह्यते । ततः षड् जीवनिकां प्राप्तस्याधिगृहीतषट्-जीवनिकाध्ययनस्य उपस्थापना क्रियते । विपक्षे प्रायश्चित्तविधिमाह-

[भा.२०३५] अप्पत्ते अकहेत्ते अनहिगय अपरिच्छ अतिक्कमे पा से ।
एक्केको चउगुरुगा, चोयग सुत्तं तु कारणियं ।।

वृ- अप्राप्ते षड्जीवनिकां पर्यायं वा जधन्यतः षण्मासानुत्कर्षतो द्वादशसंवत्सराणि तथा अकथयित्वा जीवाजीवादीन् तथा अनधिगते जीवाजीवादौ तथा अपरीक्षायां परीक्षाया अभावे तथा से तस्य उपस्थापयितोऽतिक्रमे एकैकस्य व्रतस्य वारत्रयमनुच्चारणे एतेषु सर्वेषु प्रत्येकमेकैकस्मिन् प्रायश्चित्तं चत्वारो गुरुकाः । अथ सूत्रे पर्यायादिकं नोपात्तमिति तत्कथने कथं न सूत्रविरोधस्तत्राह-हे चोदक सुत्रमिदं कारणिकं पुरुषविशेषपात्रापेक्षमतः पर्यायाद्यनभिधानेऽपि न दोषः एनामेव गाथां वै तथा भाष्यकृद्विवृणोति ।

[भा.२०३६] अपत्ते सुएणं परियागमुवठावेंते चउ गुरुगा ।
आणादिणो य दोसा विराधना छण्हकायाणं ।।

वृ- श्रुतेन षड्जीवनिकापर्यन्तेनाप्राप्ते पर्यायं वा जघन्यादि भेदभिन्नमप्राप्ते उपस्थाप्यमाने उपस्थापयितुः प्रायश्चित्तं चत्वारो गुरुकाः, तपसा कालेन च गुरुवो, न केवलमेतत् । किन्त्वाज्ञा-अनवस्थामिथ्यात्वविराधनादोषास्तथा स उपस्थापितो भिक्षादौ किल कल्पिको भवति । ततस्तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिक्षादिप्रेषणे षण्णां कायानां विराधना अपरिज्ञानात् तथा-

[भा.२०३७] सुत्तत्थं कहइत्ता जीवाजीवेय बंधमोक्खं च ।
उवठावणे चउगुरुगा विराहणा जा भणिय पुव्वं ।।

वृ- सुत्रार्थं षड्जीवनिकायपर्यन्तं अकथयित्वा तथा जीवाजीवान् बन्धं मोक्षं चाकथयित्वा एवमेवोपस्थापने क्रियमाणे उपस्थापितुश्चत्वारो गुरुकास्तपो गुरवः प्रायश्चित्तं तथा या विराधना पूर्वम-प्राप्तद्वारे षण्णां जीवनिकायानामुक्ता साऽत्रापि द्रष्टव्या । ततस्तन्निष्पन्नमपि तस्य प्रायश्चित्त-मुपढौकते ।

[भा.२०३८] अनहिगयपुन्नपावं उवठावंतस्स चउ गुरु होंति ।
आणादिणो य दोसा मालाए होति दिठंतो ।।

वृ- अनधिगतपुण्यपापं सूत्रार्थकथनेऽप्यविज्ञातपुण्यपापमुपस्यापयतः प्रायश्चित्तं चत्वारो गुरवः कालगुरुका मासा भवन्ति, । आज्ञादयश्चानन्तराभिहिता दोषाः । अत्र मालाया दृष्टान्तो यथा स्थाणौ शूलाप्रक्षेपं वर्णसुगन्धपुष्पमालामारोपयतो वचनीयतादयो दोषाएवमत्राप्यनधिगतपुण्यपापे व्रतान्यारोपयत आज्ञादय इति ।

[भा.२०३९] उदउल्लादि परिच्छा अहिगय नाऊण तो व दन्ते ।
एक्केक्कं तिखुत्तो, जो न कुणइ तस्स चउ गुरुगा ।।

वृ- गोचरादि गतेन उदकार्द्रादिना परीक्षा कर्तव्या । वृषभेण तत्परीक्षानिमित्तं तेन सह गोचरगतेन उदकार्द्रेण हस्तेन मात्रकेण वा भिक्षा ग्राह्या । तत्र यदि स वारयति निषिद्धमेतत्कथं यूयमेव भिक्षाम-गृह्णीथ । ततो ज्ञायते एष परिणतसूत्रार्थोऽधिगतपुण्यपाये एवं शेषपरीक्षास्वपि भावनीयम् । तत उदकार्द्रादिपरीक्षाभिरधिगतपुण्यपापं ज्ञात्वा ततोऽनन्तरं व्रतानि गुरवो ददति । कथमित्याह-एकैकं व्रतं त्रिःकृत्वस्त्रीन वारान् । एवं यो न करोति तस्य चत्वारो गुरुका द्वाभ्यां लघवस्तपसा कालेन च प्रायश्चित्तं ।

अथ परीक्षामेव वैतन्येनाह-

[भा.२०४०] उच्चारादि अथंडिल वोसिर ठाणाइ वावि पुढवीए ।
नदिमादिदगसमीवे सागनि निक्खित्तं तेउंमि ।।

[भा.२०४१] वियणभिधारण वाए हरिए जह पुढवीए तसेसु च ।
एमेव गोयरगए होइ परिच्छा उ काएहिं ।।

वृ- उच्चारादिरादिशब्दात्प्रश्रवणादिपरिग्रहः अस्थण्डिले सचित्तपृथिवीकायात्मिके व्युत्सर्जनं यदि वा स्थानादि स्थानमुर्ध्वस्थानमादिशब्दान्निषदनादिपरिग्रहस्तत् पृथिव्यां पुथिवीकायस्योपरि कुरुते । तथाऽप्कायविषये नद्याद्युदकसमीपेऽत्रादिशब्दात्तडागादिपरिग्रहः । तथा तेजसि तेजस्कायविषये सनिक्षिप्ताग्नौ प्रदेशे गाथायां तु निक्षिप्तशब्दस्यान्यथापाठः प्राकृतत्वात् । उच्चारादेर्व्युत्सर्जनमिति सर्वत्र सम्बध्यते तथा वाते वातविषये व्यञ्जनस्य तालवृन्तस्याभिधारणं वातोदीरणाया अभिमुख्येन धारणं करोति । हरिते यता पृथिव्यां तथा वक्तव्यं हरितकायस्योपरि स्थानादि करोति यदिवोच्चारादि व्युत्सर्जनमिति । त्रसेष्वपि च पृथिव्यामिव वक्तव्यं । कीटिकानगराद्यतिप्रत्यासन्नमुच्चारादि स्थानादि वा करोतीति भावः । तत्र यदि वारयति तदा ज्ञायते सम्यक् परिणतोऽस्य धर्म इति योग्य उपस्थापनायाः एवमेव गोचरगतेऽपि, तस्मिन् कायैः पृथिव्यादिभिर्भवति परीक्षा कर्तव्या तद्यथा-सरजस्केनोदकार्द्रेण

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

वा हस्तक मात्रकेण वा भिक्षा ग्राह्यते इत्यादि परीक्षितस्य व्रतारोपणं कर्तव्यम् । तथा चाह—

[भा.२०४२] दव्वादि पसत्थ वया एक्केक्क तिगंति उवरिमं हेठा ।
दुविहा तिविहा य दिसा आयंबिल निव्विगइया वा ।।

वृ- द्रव्यादौ प्रशस्ते व्रतान्यारोपणीयानि । एकैकं व्रतं त्रिकं त्रिकृत्व उच्चारयेत्कथमित्याह-उवरिमं हेठा अधस्तान्मूलादारभ्य यावदुपरितनं पर्यन्तवर्तिसूत्रम् । इदमेकमुच्चारणमेवं त्रिन्वारान् दिग् निब्ध्यते । द्विविधा त्रिविधा वा तत्र साधोर्द्विविधा तद्यथा आचार्यस्योपाध्यायस्य च व्रतिन्यास्त्रिविधा । तद्यथा-आचार्यस्योपाध्यायस्य प्रवर्तिन्याश्च तथा उपस्थानानन्तरं तपः कार्यते । तच्च अभक्तार्थमाचाम्लं निर्विकृतिकमित्यादि । उक्तं च- जद्दिवसं उवठाविनो तद्दिवसं केसिं चि अभत्तट्ठो भवइ । केसिं चिं आयंबिलं केसिंचि निव्विगइयं इत्यादि । सम्प्रति माननीयपित्रादिविषये विधिशेषमाह—

[भा.२०४३] पियपुत्तखुडुथेरे खुडुगथेरे अपावमाणंमि ।।
सिक्खावणपन्नवणा दिठंतो दंडिमाईहिं ।।

वृ- द्वौ पितापुत्रौ प्रव्रजितौ । तौ यदि द्वावपि युगपत् प्राप्तौ तर्हि युगपदुपस्थाप्येते । अथ खुडुत्ति क्षुल्लकः पुत्रः सूत्रादिभिरप्राप्तः । थेरत्ति स्थविरः सूत्रादिभिः प्राप्तस्तर्हि स्थविरस्योपस्थापना विधेया । खुडुत्ति यदि पुनः क्षुल्लकः सूत्रादिभिः प्राप्तः स्थविरो नाद्यापि प्राप्तो भवति, तर्हि तस्मिन् स्थविरे सूत्रादिकमप्राप्नुवति यावदुपस्थापनादिवसः शुद्ध समागच्छति तावत्स्थविरस्य प्रयत्नेन शिक्षापना क्रियते आदरेण शिष्यत इत्यर्थः । तत्र यदि उपस्थापनादिवसः मर्यादया प्राप्तो भवति ततो द्वावपि युगपदुपस्थाप्येते । अथादरेण शिक्षमाणोऽपि न प्राप्तस्तदा स्थविरेणानुज्ञाते सति क्षुल्लक उपस्थाप्यते । अथ स्थविरो न मन्यते तदा प्रज्ञापना कर्तव्या । तस्यां च प्रज्ञापनायां क्रियमाणायां दृष्टान्तो दण्डिको ऽभिधातव्यः । दण्डिको राजा आदिशब्दादमात्यादिपरिग्रहः । स चेवम्-एगो राया रज्जपरिब्भठो सपुत्तोऽन्नरायाणमोलग्गिउमाढत्तो । सो राया पुत्रस्स तुठो तं से पुत्तं रज्जे ठविउमिच्छइ । किंसो पिया नानुजाणइ । एवं तव जइ पुत्तो महव्वयरज्जं पावित्ति किं न मन्नसि । एतदेव सविशेषमाह—

[भा.२०४४] थेरेण अनुन्नाए उवठनिच्छेवंठति पंचाहं ।
तिपणमनिच्छे उवरि वत्थुसहावेन जाहीयं ।।

वृ- स्थविरेणानुज्ञाते उपस्थापना क्षुल्लकस्य कर्तव्या । अथ स दण्डिकादिभिर्दृष्टान्तैः प्रज्ञाप्यमानोपि नेच्छति, । तथा पञ्चाहं पञ्चदिवसान् यावत् तिष्ठति । ततः पुनरपि प्रज्ञायते तथाप्यनिच्छानां पुनरपि पञ्चाहं तिष्ठन्ति । पुनः प्रज्ञाप्यते तथाप्यनिष्टौ भूयः पञ्चाहमवतिष्ठन्ते । एवं यदि त्रिपञ्चाहकालेन स्थविरः प्राप्तो भवति, तथा युगपदुपस्थापनातः परं स्थविरऽनिच्छत्यपि क्षुल्लक उपस्थाप्यते, । वत्थुसहावेण जाहीयमिति वस्तुनः स्वभावो वस्तुस्वभावः अहंकारी सन् अहं पुत्रस्यावमतरः करिष्येऽहमिति विचिन्त्य कदाचित् उन्निष्क्रामेत् गुरोः क्षुल्लकस्य चोपरि द्वेषं गच्छेत् । एवं स्वरूपे वस्तुस्वभावे ज्ञाते त्रयाणां पञ्चाहानामुपर्यपि स क्षुल्लकः प्रतीक्षाप्यते यावत्तेनाधीतमिति । अथ द्वेऽपि पिता पुत्रयुगले तदायं विधिः

[भा.२०४५] दो थेरखुडुथेरे खुडुग वोच्चत्थ मग्गणा होइ ।
रन्नो अमच्चमाई संजइ मज्झे महादेवी ।।

वृ- द्वौ स्थविरौ सपुत्रौ समं प्रव्रजितौ तत्र यदि द्वौ स्थविरौ प्राप्तौ न क्षुल्लकौ ततः स्थविरावुपस्थाप्येते । 'खुडुत्ति' अथ द्वावपि क्षुल्लकौ प्राप्तौ न स्थविरौ तदा पूर्ववत् प्रज्ञापनोत्कर्षतः पञ्चदशदिवसान्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्कर्तव्या । तथाप्यनिच्छायामुपेक्षा वस्तुस्वभावं ज्ञात्वा प्रतीक्षापणं थेरे 'खुदुत्ति' द्वौ स्थविरावेकश्च क्षुल्लकः सूत्रादिभिः प्राप्तोऽत्रोपस्थापना 'वोच्चत्थे' इत्यादि स्थविरक्षुल्लकस्य च विपर्ययस्ततो भवति मार्गणा कर्तव्या । सा चैवम्-द्वौ क्षुल्लकौ प्राप्तावेकश्च स्थविरः प्राप्त एको न प्राप्तस्तत्र यो न प्राप्तः स आचार्येण वृषभैर्वा प्रज्ञाप्यते । प्रज्ञापितः सन् यद्यनुजानाति तदा तत् क्षुल्लक उपस्थाप्यते तथाप्यनिच्छायां राजदृष्टान्तेन तथैव प्रज्ञापना । अयं चात्रविशेषः । सोऽप्राप्तस्थविरो भण्यते-एष तव पुत्रः परममेधावी सूत्रादिभिः प्राप्त इत्युपस्थाप्यतां, यदि पुनस्त्वं न मुत्कलयसि तदेतौ द्वावपि पितापुत्रौ रत्नाधिकौ भविष्यतस्तस्माद्विसर्जय एनमात्मीयं पुत्रमेषोऽपि तावद्भवतु रत्नाधिक इति । अतोऽपि परमनिच्छायामुपेक्षावस्तुस्वभावं ज्ञात्वा वा तत् क्षुल्लकस्य प्रतीक्षापणमिति । रन्नो य अमच्चाई इत्यादि पश्चार्धं राजा अमात्यश्च समकं प्रव्रजितौ समकमेव सूत्रादिभिः प्राप्तौ ततो युगपत्तौ द्वावप्युपस्थाप्येते । अथ राजा सूत्रादिभिः प्राप्तो नामात्यो राज्ञ उपस्थापना । अथामात्यः सूत्रादिभिः प्राप्तो न राजा ततो यावदुपस्थापनादिनमागच्छति तावदादरेण राजा शिक्ष्यते, ततो यदि प्राप्तो युगपदुपस्थापना । अथ तत्रापि राजा न प्राप्तस्तदा तेनानुज्ञाते अमात्य उपस्थाप्यते । अथ नेच्छति तदा पूर्ववत् दण्डिकदृष्टान्तेन राज्ञः प्रज्ञापना, तथापि चेन्नेच्छति ततः पञ्च दिवसान्यावदमात्यस्य प्रतीक्षापणं तथापि चेन्न प्राप्तो भूयः प्रज्ञापना । तत्राप्यनिच्छायां पुनः पञ्चदशाहमपि तथाप्यनिच्छायामुपेक्षा वस्तुस्वभावं वा ज्ञात्वामात्यस्य प्रतीक्षापणं । यदि वा वक्ष्यमाणोऽत्र विशेषो यथा वामात्यस्य राज्ञा सहोक्तमेवमादिग्रहणसूचितयोः श्रेष्ठिसार्थवाहयोरपि वक्तव्यमिति, 'संजइमज्झे महादेवीति' द्वयोर्मातादुहित्रोर्द्वयोर्मातादुहितृयुगलयो-र्महादेव्यमायत्योश्च सर्वमेव निरवशेषं वक्तव्यम् । सम्प्रति यदुक्तं 'वोच्चत्थमग्गणा होइ' इति तद् व्याख्यानार्थमाह—

[भा.२०४६] दो पत्त पियापुत्ता एगस्स पुत्त पत्त न उ थेरा ।
गहितोव सयं राइनितो होउ एस वि य ।।

वृ- द्वौ पितापुत्रा प्राप्तावेकस्य तु पितापुत्रयुगलस्य पुत्रः प्राप्तो न तु स्थविरः । स आचार्येण वृषभेण वा प्रज्ञापनां ग्राहितः स्वयं वितरत्यनुजानाति । तदा तत् क्षुल्लक उपस्थाप्यते । अथ नेच्छति तदा पूर्ववद्राजद्रष्टान्तेन प्रज्ञापना । अन्यच्चैतौ पितापुत्रौ रत्नाधिकौ भविष्यत एषोऽपि च तव पुत्रो यदि रात्निको रत्नाधिको भवति । भवतु नाम तव लाभ एष इति तथाप्यनिच्छायां पूर्ववदुपेक्षादि ।

[भा.२०४७] राया रायाणो वा दोन्नि वि समपत्त दोसु पासेसु ।
ईसरसेट्ठि अमच्चे निगमघडाकुल दुए खुड्डे ।।

वृ- एको राजा द्वितीयो राजराजानस्तौ समकं प्रव्रजितौ । अत्रापि यथा पितापुत्रयोर्वा प्रागुक्तं तथापि निरवशेषं वक्तव्यं केवलमवमेऽमात्यादिके सूत्रादिभिः प्राप्ते उपस्थाप्यमाने यदि राजादिरप्रीतिं करोति दारुणस्वभावतया ब्रूते वा किमपि परुषं तदा सोऽप्राप्तोऽपीतरैरमात्यादिभिः सममुपस्थाप्यते । अथवा 'रायत्ति' अत्रएको राजा तत्रसोऽमात्यादीनां सर्वेषां रत्नाधिकः कर्तव्यः 'रायाणोत्ति' यत्र पुनर्द्विप्रभृतयो राजानः समकं प्रव्रजिताः समकं च सूत्रादिभिः प्राप्तास्ते समरत्नाधिकाः कर्तव्या इत्युपस्थाप्यमाना द्वयोः पार्श्वयोः स्थाप्यन्ते ।। अत्रैवार्थे विशेषमाह—

[भा.२०४८] समगं तु अनेगेसुं पत्तेसुं अनभिजोगमावलिया ।
एगतो दुहतो ठविया समराइनिया जहासन्नं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- पूर्वं पितापुत्रादिसम्बन्धेनासम्बन्धेष्वनेकेषु राजसु समकं सूत्रादिभिः प्राप्तेष्वत एवैककालमुपस्थाप्यमानेषु, 'अनभिजोगत्ति' गुरुणा अन्येन वाभियोगो न कर्तव्यो यथा इतस्तिष्ठथ इतस्तिष्ठथेति । किन्त्वेकतः पार्श्वे द्विधातो वा द्वयोर्वा पार्श्वयोर्यथैव स्थिताः स्वस्वभावेन तेषामावलिका तथैव तिष्ठतु । तत्र यो यथा गुरोः प्रत्यासन्नः स तथा ज्येष्ठो ये तूभयोः समश्रेण्या स्थितास्ते समरत्नाधिकाः । इदानीं पूर्वगाथापश्चार्धव्याख्या-'ईसर इत्यादि' यथा द्विप्रभृतयो राजान उक्ता एवं द्विप्रभृतयः श्रेष्ठिनो द्विप्रभृतयोऽमात्या द्विप्रभृतयो निगमा वणिजः 'घडत्ति' गोष्ठी द्विप्रभृतयो गोष्ठ्यो यदि वा द्विप्रभुतयो गोष्ठिका 'कुलत्ति' यदि वा द्विप्रभृतयो महाकुला, द्विकग्रहणमुपलक्षणं तेन त्रिप्रभृतय इति द्रष्टव्यं । तथैव च व्याख्यातम् 'खुदुत्ति' क्षुल्लकाः समकं प्रव्राजिता इत्यर्थः । समकं सूत्रादिभिः प्राप्ताः समकं रत्नाधिकाः कर्तव्या । एतेषामेव मध्ये यः पूर्वं प्राप्तः स पूर्वमुपस्थाप्यते इति वृद्धसम्प्रदायः ।।

[भा.२०४९] ईसिं अन्नो अंतो वामे पासम्मि होइ आवलिया ।
अभिसरणंमि य वड्ढीओ सरणे सो व अन्नो वा ।।

वृ- तेषामुपस्थाप्यमानानामावलिका गुरोर्वामपार्श्वे गजदन्तवत् ईषदवनतस्य अवनतीभूय स्थितास्तत्र यदि से गुरुसमीपमग्रतोऽभिसरन्ति तदा गच्छस्य वृद्धिर्ज्ञातव्या । यथान्येऽपि बहवः प्रव्रजिष्यन्तीति । अथ पश्चात् बहिरपसरन्ति तदा स उपस्थाप्यमानोऽन्यो वा उन्निःक्रमिष्यति अपद्रविष्यति वेदितव्यं ज्ञातव्यमेवेति निमित्तकथनम् ।।

***मू. (११०)** आयरिय उवज्झाए असरणमाणे परं चउराय पंचरायातो कप्पागं भिक्खुं नो उवट्ठावेइ तं चेव भणियव्वं ।।*

वृ- अस्य व्याख्या प्राग्वत् । नवरं 'तं चेव भणियव्वं' इति वचनादेवं परिपूर्णः पाठो द्रष्टव्यः 'कप्पाए अत्थि याइं से केइ माननिज्जे कप्पागे, नत्थि याइं से केइ छेए वा परिहारे वा, नत्थि याइं से केइ माननिज्जे कप्पाए, से संतरा छेदे वा परिहारे वा ।। अस्यापि व्याख्या प्राग्वत् । तत्र यैः कारणैर्न स्मरति तान्युपदर्शयन्नाह--

[भा.२०५०] दप्पेण पमाएण व वक्खेवेण व गिलानतो वावि ।
एएहिं असरमाणे चउव्विहं होइ पच्छित्तं ।।

वृ- दर्पो निष्कारणोऽनादरस्तेन [१] प्रमादो विकथादीनां पञ्चानां प्रमादानामन्यतमस्तेन [२] व्याक्षेपेण सीवनादिना [३] ग्लान्यतः वा [४] एतैः कारणैरस्मरति प्रायश्चित्तमस्मरणनिमित्तं चतुर्विधमस्मरणकारणस्य दपदिश्चतुःप्रकारत्वात्तदेवमभिधित्सुः प्रथमतो दर्पतः प्रमादेन चाह--

[भा.२०५१] वायामवग्गनादिसु दप्पेण अनुठवेंति चउ गुरुगा ।
विकहादि पमाएण व चउ लहुगा होंति बोधव्वा ।।

वृ- व्यायामवल्गनादिषु व्यापृततया यो निःकारणेऽनादर उपस्थापनायाः स दर्प उच्यते । तेन दर्पेणानुपस्थापयति प्रायश्चित्तं चत्वारो गुरुकाः, विकथादिना अन्यतमेन प्रमादेनानुपस्थापयति चत्वारो लघुका भवन्ति बोद्धव्याः ।

[भा.२०५२] सिव्वणतुन्नणसज्झायज्झाणलेवादिदानकज्जेसु ।
वेक्खेवे होइ गुरुगो गेलन्नेनं तु मासलहु ।।

वृ- सीवनतूर्णनस्वध्यायध्यानपात्रलेपादिदानकार्यैर्गाथायां सप्तमी तृतीयार्थे यो व्याक्षेपस्तस्मिन् व्याक्षेपेऽनुपस्थापयति प्रायश्चित्तं भवति गुरुको मासो, ग्लान्येन त्वनुपस्थापयति मासलघु ।। सम्प्रति यैः कारणैः स्मरतोऽस्मरतश्चानुस्थापयतः प्रायश्चित्तं न भवति । तान्यभिधित्सुराह—

[भा.२०५३] धम्मकहा इड्ढिमतो वादे अच्चुक्कडे व गेलन्ने ।
बिइयं चरमपएसुं दोसुं पुरिमेसु तं नत्थि ।।

वृ- ऋद्धिमतो राज्ञो युवराजस्यामात्यादेर्वा प्रतिदिवसमागच्छतो धर्मकथा कथ्यते परप्रवादी वा कश्चनाप्युपस्थितः । स वादे निग्रहीतव्यः इति तन्निग्रहणाय विशेषतः शास्त्राभ्यासे तेन सह वादे वा दीयमाने यदि वा आचार्यस्यान्यस्य वा साधोर्यो वा उपस्थाप्यस्तस्य वा अत्युत्कटे ग्लानत्वे जाते व्याकुलीभूतः स्मरन्नस्मरन् वा यद्यपि नोपस्थापयति तथापि न तस्य प्रायश्चित्तं कारणतो व्याकुलीभवनात् । एतच्च प्रायश्चित्ताभावलक्षणं । द्वितीयपदमपवादपदं चरमपदयोर्द्वयो र्व्याक्षेपग्लानत्वलक्षण-योरवगन्तव्यम् । यथाहि-धर्मकथावादाभ्यां व्याक्षेप उक्तो ग्लानत्वपदेन च ग्लानत्वमिति पूर्वयोस्तु द्वयोः पदयोस्तत् अपवादपदं नास्ति एतच्चतुर्विधं प्रायश्चित्तमस्मरन् निमित्तमुक्तं स्मरणतस्तु चत् रात्रपञ्चरात्र्याद्यतिक्रमे यत् प्रायश्चित्तं तत् पूर्वसूत्रे इवात्रापि निरवशेषं द्रष्टव्यम् ।।

मू. (१११) *आयरिय उवज्झाए सरमाणे वा असरमाणे वा परं दसरायकप्पातो कप्पागं भिक्खुं नो उवट्ठावेति, कंप्पाए अत्थि याइं से केइ माननिज्जे कप्पाए, नत्थि याइं से केइ छेदेवा परिहारे वा; नत्थि याइं से केइ माणणिज्जे कप्पाए, संवच्छरं तस्स तप्पतियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्त वा उद्दिसित्तए वा ।।*

वृ- आचार्य उपाध्यायो वा स्मरन् अस्मरन् वा यदा स्मरति तदा न साधकं नक्षत्रादिकं यदा तु साधकं नक्षत्रादिकं, तदा बहु व्याक्षेपतो न स्मरति तत उक्तं स्मरन्वा अस्मरन्वा परं दशरात्रकल्पात् दशरात्रात्कालात्कल्पाकंभिक्षुं नोपस्थापयति । तत्र यदि तस्मिन् कल्पाके सति अस्ति से तस्य कल्पाकस्य कश्चिन्माननीयः पित्रादिर्भावीकल्पाकस्ततो नोपस्थापयति तर्हि नास्ति से तस्यानुपस्थापयतः कश्चित् छेदः परिहारो वा, अथ नास्ति से तस्य कल्पाकस्य कश्चिन्माननीयः पित्रादिर्भावीकल्पाकस्तर्हि-तस्यानुपस्थापयतः छेदः परिहारो वा, प्रथमादेशत इति वाक्यशेषो द्वितीयादेशेन पुनच्छेदेन परिहारतपसा वा अदम्यमानस्य तत्प्रत्ययमनुस्थापनाप्रत्ययं तस्य संवत्सरं यावन्न कल्पते आचार्यत्वमुपदेष्टु मनुज्ञातुं संवत्सरं यावत् गणो ध्रियते इति भावः । एष सूत्रसंक्षेपार्थः । व्यासार्थं तु भाष्यकृदभिधित्सुः प्रथमतो दशरात्रनिबन्धनमाह—

[भा.२०५४] सरमाणे पंच दिना असरणमाणेवि तत्तिया चेव ।
कालोत्ति व समओत्ति व अद्धा कप्पोति एगट्ठं ।।

वृ- स्मरत्यपि चउराय पंचरायातो इत्यनेन पञ्चदिनान्युक्तानि अस्मरत्यपि तावन्ति चैव पञ्च दिनानि चैवोक्तानि । इदं च स्मरणास्मरणमिश्रकसूत्रमतो दशरात्रात्कल्पादित्युक्तमत्रैव कल्पशब्दस्तद् व्याख्यानमाह । काल इति वा समय इति वा अद्धा इति वा कल्प इति वा एकार्थं, ततो दशरात्रकल्पादिति दशरात्रकालादिति द्रष्टव्यम् ।। सम्प्रति स्मरणास्मरणं भावयति—

[भा.२०५५] जाहे सुमरइ ताहे, असाहगं रिक्खलग्गदिनमादी ।
बहुविक्खेवंमि य गणे, सरियंपि पुनो वि विस्सरति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यदा स्मरति तदा असाधकमप्रयोजकमृक्षलग्नदिनादि आदिशब्दात् मुहूर्तादिपरिग्रहः । बहुव्याक्षेपे च गणे गच्छे स्मृतमपि पुनरपि विस्मरति । तत एवं स्मरणास्मरणसंभवः ।।

अत्रैव प्रायश्चित्तविधिं सविशेषमाह–

[भा.२०५६] दसदिवसे चउगुरुगा दसेव छल्लहु छग्गुरू चेव ।
ततो च्छेदो मूलं अनवट्ठप्पो य पारंची ।।

वृ- तस्मिन्नधिकृते कल्पाके जाते सति यदि स्मरणास्मणतो दशदिवसानतिक्रामति । ततस्तस्यानुपस्थापयतः प्रायश्चित्तं चत्वारो गुरुकास्ततः परमन्यानि दशैव चेत् दिनान्यतिवाहयति ततः षड् लघुकं, ततः परतोऽपि दिनदशकातिक्रमे षड् गुरुकं । ततो च्छेदोत्ति ततः परमेवं च्छेदस्त्रिधा वक्तव्यः । स चैवं । ततोऽपि परतो यद्यन्यानि दश दिनानि लङ्घयति तर्हि चतुर्गुरुकच्छेदः । ततोऽपि परतो दिनदशकातिक्रमे षड् लघुकच्छेदः, ततोऽन्यदशदिवसातिक्रमे षट् गुरुकच्छेदः । मूलं अनवट्ठोयं पारंचीति तत एकदिवसातिक्रमे मूलं ततोऽपि परमेकादिनातिक्रमे अनवस्थाप्यो भवति । ततोऽपि परमेकस्य दिवसस्यातिवाहने पाराञ्चिको जायते–

[भा.२०५७] एसादेसो पढमो बितिए तवसा अदम्ममानम्मि ।
उभयबलदुब्बले वा संवच्छरमादि साहरणं ।।

वृ- एष ऽनन्तरोदित आदेशः प्रथमो द्वितीये आदेशे पुनस्तपसा उपलक्षणमेतत् । च्छेदेन वा अदम्यमाने यदि वा उभयबलेन धृतिबलेन कायबलेन च उपलक्षणमेतदन्यतरैकबलेन वा तपसः च्छेदस्य वा दातुमशक्यतया संवत्सरं यावत् दिश आचार्यत्वस्य हरणम्–

[भा.२०५८] एते दो आदेसा, मीसगसुत्ते हवंति नायव्वा ।
पढमबिइएसुं पुन, सुत्ते इमं तु नाणत्तं ।।

वृ- एतावनन्तरोदितौ द्वावप्यादेशौ मिश्रकसूत्रे भवतो ज्ञातव्यौ । प्रथमद्वितीययोः पुनः सूत्रयोरिदमादेशविषयं प्रत्येकं नानात्वं । तदेवाह–

[भा.२०५९] चउरो पंच दिवसा चउ गुरू एव होति च्छेदोवि ।
ततो मूलं नवमं, चरमंपि य एगसरगं तु ।।

वृ- प्रथमे द्वितीये च सूत्रे प्रत्येकमिमावादेशौ प्रथम आदेशस्तस्मिन् विवक्षिते कल्पाके जाते सति यदि चतुरो दिवसानतिवाहयति, तदा चतुर्गुरुततो भूयो भूयश्चतुश्चतुर्दिनातिक्रमे षड् लघु षड् गुरुकं । एवं च्छेदोऽपि त्रिधा वक्तव्यः । तदनन्तरं मूलं नवममनवस्थाप्यम् । चरमं पाराञ्चितमेकसरकमेकैकदिनातिक्रमे वक्तव्यम् । द्वितीय आदेशः पञ्चदिवसात्तिक्रमे चतुर्गुरु । एवं पञ्च पञ्चात्क्रिमे षड् लघु षड् गुरुके । एवं च्छेदोऽपि पञ्च पञ्चदिनातिक्रमेण त्रिधा वक्तव्यस्ततो मूलं नवमं, चरमं च एकसरकमेकैकदिनातिक्रमेण भावार्थः प्रागेव सप्रपञ्चं भावितः । एतच्चोदेशद्वयं प्रथमसूत्रे द्वितीयसूत्रे च स्वस्थानेऽपि नोक्तं लाघवात् ।

मू. (११२) *भिक्खू य गणाओ अवकम्म अन्नं गणं उवसंपज्जित्ताणं विहरेज्जा, तं च केइ साहम्मिए पासित्ता वएज्जा, 'कं अज्जो उवसंपज्जित्ताणं विहरसि ?' जे तत्थ सव्वराइणीए तं वएज्जा । 'अह भंते ! कस्स कप्पाए ?' जे तत्थ बहुसुए तं वएज्जा । 'जं वा से भगवं वक्खति, तस्स आणाउववायवयणनिदेसे चिट्ठिस्सामि' ।।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अस्य सूत्रस्य सम्बन्धमाह—

[भा.२०६०] कीस गणो मे गुरुणो हितोत्ति इय भिक्खु अन्नहि गच्छे ।
गणहरणेण कलुसितो स एव भिक्खू व एव अन्नं ।।

वृ- पूर्वसूत्रे गणापहरणमुक्तं ततः 'कीस' किमिति गणो मे मम गुरोर्हत इति विचिन्त्य इति अस्मादेव गुर्वपमानलक्षणात्कारणाद् भिक्षुरन्यत्र गणान्तरे गच्छेत् । यदि वा यस्य गणोऽपहृतः स एव गणहरणेन कलुषितः सन् अन्यं गणंव्रजेत्ततोऽन्यगणोपसम्पत् प्रतिपादनार्थमधिकृतंसूत्रमिति सूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या--भिक्षुर्गणादपक्रम्य विशिष्टसूत्रार्थनिमित्तमन्यगणमुपसम्पद्य विहरेत् । तं चोद्भ्रामकभिक्षाचरप्रचुरे ग्रामे भिक्षार्थमटन्तं दृष्ट्वा कश्चित्साधर्मिको वदेत्-कमाचार्यमुपसम्पद्य त्वं विहरसि । एवं पृष्टः सन् यस्तत्र सर्वरत्नाधिको गीतार्थ आचार्यस्तं वदेत् तस्मिन्नुक्ते स परिकल्पयति । यमेष व्यपदिशति सोऽगीतार्थो, न चायमगीतार्थनिश्रया विहरति । ततो भूयः पृच्छति, अथ भदन्त कस्य कल्पेन, सूत्रेस्त्रीत्वं प्राकृतत्वात्, कस्य निश्रया त्वं विहरसि, एवमुक्ते यस्तत्र सर्वबहुश्रुतस्तं वदेत् तथा तस्य सर्वरत्नाधिकस्याचार्यस्यागीतार्थस्य यः शिष्यो गीतार्थः सूत्रार्थनिष्णातः समस्तस्यापि गच्छस्य तृप्तिकारी तन्निश्रयाहं विहरामीति वदेत् यं वा स भगवानाख्याति यथैतस्याज्ञा त्वया कर्तव्या । तस्याज्ञायामुपपाते समीपे वचननिदेशे च आदेशप्रतीच्छायां स्थास्यामीति सूत्रसंक्षेपार्थः ।

अधुना भाष्यकृत्सूत्रव्याख्यातुकामः प्रथमतः सूत्रविषयमुपदर्शयति—

[भा.२०६१] पव्वावितो अगीतेहिं अन्नेहिं गंतूण उभयनिम्मत्तो ।
आगम्म सेस साहण ततो य साहू गओ न्नत्थ ।।

वृ- कश्चिदगीतैरगीतार्थैराचार्यैः प्रव्राजितः, सोऽन्यत्र गणं गत्वा उभयतः सूत्रतोऽर्थतश्च निर्मातोऽभवत् । ततः स स्वगणे आगम्य शेषाणां गीतार्थानां साधूनां साधनं करोति सर्वानपि गीतार्थान् सूत्रार्थनिमित्तमितस्ततो विप्रसृतानाचार्यस्य समीपयानयति । समानीय च तेषां सूत्रार्थान् पूरयति । अन्यदा ततो गच्छात्कोऽपि साधुरन्यत्र गणान्तरे केनापि कार्येण गतः ।

[भा.२०६२] तत्थवि य अन्नसाहुं अटेति अहिज्जमाण साहूणं ।
बिंती मा पढ एवं, किं तिय अत्थो न हो एवं ।।

वृ- तत्रापि च गणान्तरेऽन्यं साधुमाचाराङ्गे 'अट्टे लोए परिजुन्ने' इति सूत्रे 'अटे' इति अधीयानं पठन्तं श्रुत्वा ब्रूते-मा पढ एवं । स प्राह-किमिति । इतरो ब्रूते-अर्थो न भवति विसंवदत्येवं यथा त्वं पठसि तस्मात् अट्टे इति द्विटकारको निर्देशोऽध्येतव्यः ।।

[भा.२०६३] अत्थो वि अत्थि एवं, आमं नमोक्कारमादिसव्वस्स ।
केरिस पुन अत्थोती बेति सुण सुत्तमट्टत्ति ।।

वृ- अधीयानः पृच्छति अर्थोऽपि ननु सूत्रस्यास्ति । इतरः प्राह-आममेवं न केवलमस्य सूत्रस्यार्थोऽस्ति किन्तु सर्वस्यापि नमस्कारादिकस्य सूत्रस्यास्ति । एवमुक्तोऽध्येता पृच्छति । कीदृशः पुनरस्य सूत्रस्यार्थ इति । इतरो ब्रूते शृणु प्रथमतो यथावस्थितं सूत्रं ततः पठति अट्टे इति । अट्टे लोए परिजुन्ने इति, एवं पठित्वास्य व्याख्यानमाह—

[भा.२०६४] अट्टे चउव्विहे खलु, दव्वे नदिमादि जत्थ तणकट्ठा ।
आवत्तंते पडिया, अहव सुवन्नादियावट्टे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- आर्तः खलु चतुर्विधस्तद्यथा-नामार्तः, स्थापनार्तः, द्रव्यार्तो, भावार्तश्च । तत्र नामस्थापने सुप्रतीते द्रव्यार्तोऽपि नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तो यत्र नद्यादेः प्रदेशे तृणकाष्ठानि पतितानि आवर्तन्ते । यद्य वा सुवर्णाद्यावर्तते स द्रष्टव्यः, आ सर्वतः परिभ्रमणेन रुतानि गतानि यत्र यो वा स आर्त इति व्युत्पत्तेः ।।

[भा.२०६५] अहवा अत्तीभूतो सचित्तादीहिं होइ दव्वंमि ।
भावे कोहादीहिं अभिभूतो होति अट्टो उ ।

वृ- अथवा सचित्तादिभिर्द्रव्यैरसंप्राप्तैः प्राप्तवियुक्तैर्वा य आर्त स द्रव्यार्तः द्रव्यैरार्तो द्रव्यार्त इति व्युत्पत्तेः । क्रोधादिभिराभिभूतो नोआगमतो भावार्तः, । तदेवमार्तशब्दार्थ उक्तः ।

सम्प्रति परिजीर्णशब्दार्थमाह—

[भा.२०६६] परिजुन्नो उ दरिद्दो दव्वे धनरयणसारपरिहीनो ।
भावे नाणादीहिं परिजुन्नो सव्वलोगो उ ।।

वृ- परिजीर्णोऽपि चतुर्विधस्तद्यथा-नामपरिजीर्णः, स्थापनापरिजीर्णो, द्रव्यपरिजीर्णो, भावपरिजीर्णश्च । तत्र नामस्थापने प्रतीते, द्रव्ये द्रव्यतः परिजीर्णो नोआगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्तो धनरत्नसारपरिहीनो दरिद्रो, भावे भावतः परिजीर्णो ज्ञानादिभिः परिहीन एष समस्तोऽपि लोकः ।

[भा.२०६७] एवं सिद्धे अट्ठे सो बेती, कत्थ भे अहीयंति ।।
अमुग सन्निसगासे-अहगंपी तत्थ वच्चामि ।।

वृ- एवमाचाराङ्गगतसूत्रस्यार्थे स्पष्टे कथिते स ब्रूते-कुत्र भे भवता त्वयाधीतमिति स प्राह- अमुकस्य सकाशे समीपे ततः सोऽध्येता चिन्तयति-अहमपि तत्र व्रजामि । एवं चिन्तयित्वा—

[भा.२०६८] सो तत्थ गतो ऽधिज्जति मिलितो सिज्झंतिएहिं उब्भामे ।
पुट्ठो सुत्तत्था ते सरंति निस्साए कं विहरे ।।

वृ- स तत्र गतो गत्वाऽध्येति, एतद्विषयमधिकृतं सूत्रमधुना सूत्रव्याख्यामाह ।। सोऽधीयानोऽन्यदा उद्भ्रामे उद्भ्रामकभिक्षानिमित्तं गतस्तत्र केचित्साधर्मिकाः केचिदन्यगच्छवर्तिनः साधवः सहाध्यायिनो मिलितास्तैः 'सज्झंति एहिं' ति सहाध्यायिभिः पृष्टस्ते तत्र सूत्रार्थाः सरन्ति निर्वहन्ति । तथा कं निश्राय आश्रित्य भवान् विहरति—

[भा.२०६९] अमुगं निसा अगीतो, विहरइ कप्पेण गीयसिस्ससस ।
अहमवि य तस्स कप्पा, जं वा भयवं उवदिसंति ।।

वृ- एवं पृष्टः सन् यस्तत्र सर्वरत्नाधिकोऽगीतोऽगीतार्थ आचार्यस्तं कथयति । यथा अमुकं निश्रयाहं विहरामि । एतावता 'जे तत्थ सव्वराइणिओ तं वएज्जा' इति व्याख्यातं, एवमुक्ते ते चिन्तयन्ति, यमेष प्राह सोऽगीतोऽगीतार्थस्ततो भूयः पृच्छंति, कस्य कल्पेन कस्य गीतार्थस्य निश्रया भवान् विहरति, एतेन 'अहं भंते कस्स कप्पाए' इति व्याख्यातं, स प्राह-यस्तत्र-बहुश्रुततया गीतार्थस्तस्य शिष्यस्य कल्पेन समस्तो गणो विश्यति, । अहमपि च तस्य कल्पात् विहरामि, यं भमवन्त उपदिशन्ति यथास्याज्ञा कर्तव्या तस्याज्ञोपपातवचननिर्देशेषु स्यास्यामि । एतेन 'जं च से भयवं अक्खाति' इत्यादि व्याख्यातं, इदमेव स्पष्टं भावयत्ति-

[भा.२०७०] रायनियस्स उ गणो, गीयत्थोमस्त विहरइ निस्सा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जो जेन होति महितो-तस्साणादी न हावेमि ।।

वृ- रात्निकस्य रत्नाधिकस्य गणो अवमस्य गीतार्यस्य निश्रया विहरति, अहमपि तन्निश्रया विहरामि । अपि च तस्मिन् गणे यो येन गुणेन तपःप्रभृतिना महितस्तस्याज्ञादि आज्ञासमीपभवनं वचननिर्देशं च न हापयामि सम्यक्करोमीति भावः ।

मू. (११३) *बहवे साहम्मिया इच्छेज्ञा एगयओ अभिनिचारियं चारए; कप्पइ नो ण्हं कप्पइ थेरे अनापुच्छित्ता एगयतो अभिनिचारियं चारए, जावण्हं कप्पइ ण्हं थेरे आपुच्छित्ता एगयतो अभिनिचारियं चारए । थेरा य से वियरेज्ञा एव ण्हं कप्पइ एगयओ अभिनिचारियं चारए; थेरा य से नो वियरेज्ञा एव ण्हं नो कप्पइ एगयओ अभिनिचारियं चारए । जं तत्थ थेरेहिं अविइन्ने एगयओ अभिनिचारियं चरन्ति से अंतरा छेए वा परिहारे वा ।।*

वृ- अथास्य सूत्रस्य सम्बन्धमाह-

[भा.२०७१] इति खलु आणा बलिया आणासारो य गच्छवासो उ ।
मोत्तु आनपाणुं सा कज्ञा सव्वहिं जोगे ।।

वृ- अनन्तरसूत्रे इदमुक्तम्, 'आणाउववायवयणनिद्देसे चिठिस्सामीति' तत इति एवमुक्तेन प्रकारेण खल्वाज्ञा गुरुणां बलिका बलवती आज्ञासारश्च गुर्वाज्ञाकारणप्रतिपत्तिसारश्च गच्छवास इत्यावेदितं । तत आनप्राणौ प्राणानौ मुक्त्वा सा गुर्वाजा सर्वत्र योगे व्यापारे कर्तव्येति । एतदर्थप्रतिपादनार्थं चाधिकृतं सूत्रमिति सूत्रसम्बन्धप्रकारान्तरेण सम्बन्धमाह-

[भा.२०७२] अहवा तदुभयहेउं, आईन्नो सो बहुस्सुय गणो उ ।
ओस्सूर भिक्खखेते चेइयाणं चारिया जोगो ।।

वृ- अथवेति प्रकारान्तरोपदर्शने स बहुश्रुतस्य गणस्तदुभयहेतोः सूत्रार्थतदुभयनिमित्तं बहुभिः प्रातीच्छिकैराकीर्णः समाकुलस्तथा तस्मिन् क्षेत्रे उत्सूरे भिक्षावेला चिरं च परिभ्रन्यते लभ्यते च रुक्षं भैक्षं ततः केचित् रुक्षेण दुर्बलीभूताः क्षपका वा दुर्बला अभवन् ग्लानोत्यिता वा सीदंति । एवं तेन क्षेत्रेण त्याजितानां केषांचित् चरिकायोगो भवति, ततश्चरिकायोगप्रतिपादनार्थमधिकृतं सूत्रमेवमनेन सम्बन्धेनायातस्यास्य व्याख्या । बहवस्त्रिप्रभृतिकाः सांभोगिका इच्छेयुरेकतः सहिता इत्यर्थः । अभिनिचरिका अभिमुख्येन नियता चरिका सूत्रोपदेशेन बहिर्व्रजिकादिषु दुर्बलानामाप्यायननिमित्तं पूर्वाहे काले समुत्कृष्टं समुदानं लब्धुं गमनं अभिनिचरिका तां चरितुं समाचरितुं कर्नमित्यार्थः एवमेतेषामिच्छतां कल्पते, नो ण्हमिति वाक्यालङ्कारे, स्थविरानाचार्याननापृच्छय एकतः संहितानामभिनिचारिकां चरितुं यदि पुनः स्थविरान् अनापृच्छय व्रजन्ति ततः पायश्चित्तं मासलघु स्वच्छन्दचारित्वात् यावद् ग्रहणादेवं परिपूर्णःपाठो द्रष्टव्यः ।। "कप्पतिण्हं थेरे आपुच्छित्ता एगयतो अभिनिचारियं चारए । थेरा य से वियरेज्ञा एव ण्हं कप्पेइ एगयतो अभिनिचारियं चारए; थेरा य से नो वियरेज्ञा एव ण्हं नो कप्पइ एगयतो अभिनिचारियं चारए । जे तत्थ थेरेहिं अवितिन्ने एगयतो अभिनिचारियं चरंति से अंतरा च्छेदे वा परिहारे वा ।।" अस्य व्याख्या-यत एवं स्वच्छन्दनचारितायां मासलघु तस्मान् कल्पते ण्हमिति पूर्वयत् स्थविरानापृच्छय एकतो अभिनिचारिकां चरितुं, आपृच्छायामपि कृतायां यदि स्थविरा वितरेयुरनुजानीयुरेन ण्हमिति प्राग्वत् कल्पते । अभिनिचारिकां चरितुं स्थविराश्च नवितरेयुर्नानुजानीयुः प्रत्यपायं पश्यन्तः प्रयोजनाभावतो वा ततो न कल्पते । एकतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिनिचारिकां चरितुं यत्पुनस्तत्र स्थविरैरवितीर्णेऽननुज्ञाते एकतोऽभिनिचारिकां चरन्ति । तन्निमित्तं से तेषां प्रत्येकमन्तरातं अन्तरा नाम तस्मात्स्यानादप्रतिक्रमणं च्छेदः परिहारो वा उपलक्षणमेतदन्यद्वा तपः- प्रायश्चित्तमिति–

मू. (११४) *चरियापविट्ठे भिक्खू० जाव चउरायपंचरायातो थेरा पासेज्ञा सच्चेव आलोयणा, सच्चेव पडिक्कमणा सच्चेव ओग्गहस्स पुव्वाणुन्नवणा चिट्ठति अहालंदमवि उग्गहे ।।*

वृ- चरिकानिमित्तं ये व्रजिकादिषु प्रविष्टास्तेषामेकतरं परिगृह्येदमुच्यते-चरिकाप्रविष्टो भिक्षुर्यावत् परिमाणावधारणे ततोऽयमर्थः । एकरात्रं द्विरात्रं चतुरात्रं पञ्चरात्रं यावत् व्याखानतो विशेषप्रतिपत्तिरिति द्वितीयं तृतीयमपि पञ्चाहं यावदिति द्रष्टव्यम् । स्थविरान् पश्येत् कुत्र पश्येदिति चेत् उच्यते- अभिनिचारिकां गन्तुमुत्कलापितेनाचार्येण यत्र सन्देशको दत्तस्तत्र स्थविरैः सह मिलितानां सैवालोचना तिष्ठति, या अन्यस्मात् गणादागतेनोपसम्पद्यमानेनवितीर्णा तदेव च प्रतिक्रमणं यदवसन्नादागत्य तस्मिन् गच्छे उपसम्पद्यमाने तस्मात् स्थानान् प्रतिक्रान्तं सैव चावग्रहस्य सैव पुर्वानुज्ञापना तिष्ठति । या अन्यस्मात् गणादागतेनोपसम्पद्यमानेन साधर्मिकाव्रहस्यानुज्ञापना कृता यथालन्दमपि यताकालमपि अपिशब्दोऽत्र संभावने न केलवं यथाकालं किन्तु चिरमपि-यथाकालं यावत्ततो गच्छात्तस्य भावो न विपरिणमति तावदवग्रहे अवग्रहस्य सैव पूर्वा अनुज्ञापना तिष्ठति । एतच्चान्तर्दीपकमतो यथालन्दमप्पालोचना प्रतिक्रमणं च द्रष्टव्यम् ।।

मू. (११५) *चरियापविट्ठे भिक्खू परं चउरायपञ्चरायाओ थेरे पासेज्ञा पुनो आलोएज्ञा पुनो पडिक्कमेज्ञा पुनो चेयपरिहारस्स उवट्ठाएज्ञा । भिक्खुभावस्स अट्ठाए दोच्चंपि ओग्गहे अनुन्नवेयव्वे सिया कप्पति से एवं वदित्तए अनुजाणह । भंते ! मिओग्गहं अहालंदं धुवं नितियं निच्छइयं, वेउट्टियं, तओ पच्छा कायसंफासं ।।*

वृ- चरिकाप्रविष्टो भिक्षुः परं चतूरात्राद्वा अत्रापि व्याख्यानतो विशेष प्रतिपत्तिस्त इदं द्रष्टव्यं यदि तस्य भावो विपरिणातो यथा कोऽत्र स्थास्यतीति ततश्चतू रात्रात् पञ्चरात्राद्वा आरतः परतो वा स्थविरान्पश्येत्पुनरपि च तस्य भावो जातो यथा तिष्ठाम्यत्र न चैवोपसम्पदा तथा प्रयमोपसम्पदीव पुनरालोचयत् । पुनः प्रतिक्रामेत् पुनः च्छेदस्य पहिरस्य वा उपतिष्ठेत् । किमुक्तं भवति ? विपरिणते अविपरिणते वा भावे यत् किञ्चिदापन्नः प्रायश्चितस्थानं तस्मिन् आलोचते य आचार्येण च्छेदः परिहारो वा निर्दिष्टस्तं सम्यक् श्रद्धाय तस्य करणार्थ अभ्युत्तिष्ठेत् ।। भिक्षुरुपपातस्य आज्ञाया अर्थाय पाठान्तरं भिक्षुभावस्य । भिक्षुत्वस्यार्थाय । मे यथावस्थितं भिक्षुत्वं भूयादित्येवमर्थः द्वितीयमपि वारम- वग्रहोऽनुज्ञातव्यः स्यात् । कथमित्याह-अनुजानीत । भदन्त परमकल्याणयोगिन् मितमेवमवग्रहग्रहणं गमनादीनामुपलक्षणं मितं गमनं । मितमवस्थानं मितस्थाननिषीदनत्वग्वर्तनादि अनुजानीत । यथालन्दं यथाकालध्रुवं यदवश्यं कर्तव्यं नियतं यावन्नावधावाभि तावदवश्यमहापनीयं । नित्यं यावत्सहायान्न लभे तावदवश्यमनुष्ठेयं । तथा व्यावृत्तं किमुक्तं भवति ? व्यावृत्य यद्वहुधा उपपातप्रतीच्छनं तत् अनुजानीत ततो गुरुणा अभ्युपगते कायस्य क्रमयुगललक्षणस्य शिरसा संस्पर्श करोति । अथवा कृतिकर्मादिष्वागमने निर्गमने चयः कायसंस्पर्शस्तमप्यनुजानीत । एवं नियट्टेवि दो गमा इति । एवममुना प्रकारेण यथा चरिकाप्रविष्टौ द्वौ गमावृक्तो द्वे सूत्रेऽभिहिते । तथा चरिकानिर्वत्तेपि द्वौ गमौ वक्तव्यौ । तौ चैवम्-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

मू. (११६) *चरिया नियट्टे भिक्खू जाव चउराय पंचरायातो थेरे पासेज्ञा सच्चेव आलोयणा सच्चेव पडिक्कमणा । सच्चेव उग्गहस्स पुव्वाणुन्नवणा चिट्ठति । अहालंदमवि उग्गहे ।*

मू. (११७) *चरिया नियट्टे भिक्खू परं चउराय पंचरायातो थेरे पासेज्ञा । पुनो आलोएज्ञा पुनो पडिक्कमेज्ञा पुनो च्छेयस्स परिहारस्य वा उवठाएज्ञ भिक्खुभावस्स अठाए । दोच्चंपि उग्गहं अनुन्नवेयव्वे सिया । अनुजाणह भंते मितोग्गहं अहालंदं धुवं निययं निच्छइयं वेउट्टियं ततो पच्छा कायसंफासं ।*

वृ- अस्य च सूत्रद्वयस्याप्यर्थः स एव यश्चरिकाप्रविष्टसूत्रद्वयस्य यद्येवं किमर्थमनयोरुपादानं चरिकाप्रविष्टभूत्राभ्यामेव गतार्थत्वात्तथा हि-यैव चरिकाप्रविष्टानां समाचारी सैव चरिकातो निवृत्तानामपीति, सत्यमेतत्, केवलमनुच्चारिते निवृत्तसूत्रद्वये यैव चरिकाप्रविष्टनां सामाचारी सैव चरिकातो निवृत्तानामपीति न लभ्यते । सूत्रे ऽनुपात्तत्वात् किन्त्वन्यत् किमपि कल्पेत ततः कल्पनान्तरं माभूदिति निवृतसूत्रद्वयमिति, सूत्रपञ्चकसंक्षेपार्थः ।सम्प्रति भाष्यकृद्विषमपदविवरणं चिकीर्षुः प्रथमतो यच्चरिकाप्रविष्टाद्यसूत्रेऽभिहितं जाव चउराया पंचरायातो थेरे पासेज्ञा इति तद्व्याख्यानार्थमाह-

[भा.२०७३] पंचाहग्गहणं पुन बलकरणं होइ पंचहिं दिनेहिं ।
एगदुगतिन्निपनगा आसज्ज बलं विभासाए ।।

वृ- सूत्रे जाव चउराय पंचरायाउ इत्यत्र यत् पंचाहग्रहणं पुनर्विशेषतः कृतमाचार्येण पुनःशब्दो विशेषे तत् पञ्चभिर्दिनैः बलकरणं भवतीति ज्ञापनार्थं । उक्तं च-एगपणगद्धमासं सठी पुन मनुयगोण-हत्थीणमिति । अथ पञ्चमिर्दिनैः कथमपि वलं न भवतीति ततो द्वितीयमपि पञ्चाहं यावत्तथा चाह-एक द्वित्रिपञ्चका दिवसानां बलमाश्रित्य विभाषया विकल्पेन एकं वा द्वौ वा त्रीन्वा यावदित्येवंरुपेण सूत्रे चेकं पञ्चारात्रग्रहणमुपलक्षणं व्याख्यानतो विशेषप्रतिपत्तिरतो न भाष्यसूत्रयोर्विरोधः ।

सम्प्रति सच्चेव आलोयणेत्यादि पदव्याख्यानार्थमाह—

[भा.२०७४] उपसंपज्ञमाणेण जा दत्ता लोयणा पुरा ।
अवसन्ने हि आगम्म, पडिक्कंतो उ भावतो ।।

[भा.२०७५] जा याणुन्नवणा पुव्वं, कया साहम्मि उग्गहे ।
संभावणाए सालंदं जा भावो अनुवत्तती ।।

वृ-या अन्यस्माद्गणादागतेनोपसम्पद्यमानेनालोचना पुरा दत्ता सैव तिष्ठति । यश्च पूर्वमवसन्नेभ्य आगम्य भावतः प्रतिक्रान्तस्तदेव प्रतिक्रमणं तिष्ठति । यावश्च पूर्वमन्यस्माद्गणादागतेन साधर्मिकावग्रहस्यानुज्ञापना कृता, सैव तिष्ठति । अहालन्दमवीत्यव योऽपिशब्दस्तस्यार्थः । सा न एषा च केवलं यावत् काल उक्तस्तावन्तं किन्तु चिरमपि कालं यावद्भावोऽधिकृतगच्छस्थापयितया-ऽनुवर्तते तावत्सैवावग्रहस्याज्ञापना तिष्ठति, यथालन्दमपि इत्यन्तर्दीपकं ततो यथालन्दमपि सैवालोचना तदेव च प्रतिक्रमणमपि द्रष्टव्यय् । अधुना द्वितीये चरिकाप्रविष्टसूत्रे यदुक्तं परं चउराय पंचरायातो इत्यादि तद्वयाख्यानार्थमाह-

[भा.२०७६] परंत्ति परिणते भावे परब्भूतो उ सो पुनो ।
नवोवसंपयाए व तत्था लोए पडिक्कमे ।।

वृ- परं चउराय पंचरायातो । इत्यत्र परमिति व्याख्यानतो विशेषप्रतिपत्तिस्ततोऽयमर्थः । परिणते गच्छान्मया निष्क्रमितव्यमित्येवं परिणते भावे अत एव गच्छात्परिभूतः सन् चतुरात्रात्यञ्चरात्राद्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परत आरतो वा स्थविरान् पश्येत् । भावश्च पुनर्गच्छावस्थायितया यदि प्रत्यावृत्तोऽजायत ततः स पूनर्भूयो नवोपसम्पदीव तत्प्रथमतयोपसम्पदीव तत्र तेषु स्थविरेषु पार्श्वे आलोचयेत् प्रतिक्रामेच्च ।।

[भा.२०७७] जइ पुन किंवावन्नो तत्थ उ आलोइउं उवठाति ।
विप्परिणयम्मि भाव, एमेव अविप्परिणयम्मि ।।

वृ- विपरिणते भावे यदि किञ्चित् प्रायश्चित्तस्थानमापन्नस्तत्र प्रथमत आलोचयितुमालोचनां दातुमाचार्याणामुपतिष्ठति । एवमेव अविपरिणतेऽपि द्रष्टव्यं । किमुक्तं भवति अविपरिणतेपि भावे यदि किञ्चिदापन्नः प्रायश्चित्तस्थानं, ततस्तत्राप्यालोचयितुमालोचनां दातुमाचार्याणामुपतिष्ठति, एवं ततो विपरिणते अविपरिणते वा भावे प्रायश्चित्तस्थानापतातावालोचिताक्यामाचार्याय च्छेदं परिहारं वा प्रयच्छन्ति तस्य श्रद्धापूर्वकं करणायाभ्युपतिष्ठति । भिक्खुभावस्स अट्ठाए इत्यत्र पाठान्तरं भिक्खु उववायस्स अट्ठाए इति तत्रोपपातशद्बव्याख्यानार्थमाह-

[भा.२०७८] उववाओ निद्देसो आणा विनओ य होंति एगट्ठा ।
तस्स ठाए पुनरवि मितोग्गहो वासगाणुन्ना ।।

वृ- उपपातो निर्देश आज्ञा विनय इत्येतानि भवन्त्येकार्थानि । ततोऽयमर्थो भिक्षुरुपपातस्य आज्ञाया अर्थाय करणाय द्वितीयमपि वारं मितावग्रहानुज्ञा किमुक्तं भवति । मित्रा वा सानुज्ञा एतेन मिंतावग्गहपदव्याख्यानं कृतं मितावग्रहणं सूत्रे मितगमनादीनामुपलक्षणमतस्तदुपदर्शयति ।

[भा.२०७९] मितगमन चेट्ठणतो मियभावमियं च भोयणं भंते ।
मज्झ धुवं अनुजाणह जाय धुवा गच्छमज्जाया ।।

वृ- मितं गमनं प्रयोजनवशतस्तस्य करणात् मितं चिठणत्ति अवस्थानं से तस्य यदि प्रवृत्ततया विश्रामनिमित्तं तस्य कियत्कालं भावात्, मितं भाषितं कार्ये समापतिते । तस्यावसरभावात् । मितं भोजनमेककुक्षिपूरणमात्रस्य भगवतानुज्ञातात् भदन्त परमकल्याण योगिन् ! मम ध्रुवमनुजानीत, या ध्रुवा गच्छमर्यादा तामप्यनुजानीत । इह ध्रुवं नियतं नैत्यिकमिति ते त्रयोऽप्येकार्थास्तथाप्यर्थभेदोऽस्ति । तत्र या ध्रुवा गच्छमर्यदित्यनेन ध्रुवशब्दार्थो व्याख्यातो ध्रुवमवश्यकरणीयमिति ।

सम्प्रति नियतनैश्चयिकशब्दव्याख्यानार्थमाह—

[भा.२०८०] निययं च तहावस्सं, अहमवि ओहायमादि जा मेरा ।
निच्चं जाव सहाए, न लभामि इहा वसे ताव ।।

वृ- यावदवधावनिका मर्यादा तावदहमपि नियतं न हापयिष्याम्यवश्यकरणीयं । किमुक्तं भवति । नियतमवधावनमर्यादातोवश्य महापनीयमिति तथा नित्यमिति कोऽर्थः यावत्सहायान्न लभे, तावदिहावसामीति सहायलाभमर्यादाकमावसनं यावदवश्यमनुष्ठेयं नित्यमित्यर्थः ।

अधुना वेउट्टियमित्यस्य भावार्थं कथयति—

[भा.२०८१] दिवसे दिवसे वेउट्टिया उ पक्खे य वंदनादीसु ।
पट्ठवणमादिएसु उववाय पडिच्छणा बहुहा ।।

वृ- दिवसे दिवसे प्रतिदिनमित्यर्थः । पक्षे पाक्षिकदिने । चशब्दाच्चातुर्मासिकदिने संवत्सरदिने च वन्दनादिषु आदिशब्दात् क्षामणादिपरिग्रहस्तथा प्रस्थापनादिषु स्वाध्यायप्रस्थापनादिष्वत्रा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिशब्दादुद्देशसमुद्देशादिपरिग्रहः ।यद्बहुधा अनेकप्रकारमुपपातप्रतिच्छन्नं तदनुजानीत ।

सम्प्रति कायसंफासमिति व्याख्यानार्थमाह–

[भा.२०८२] अब्भुवगए उ गुरुणा सिरेण संफुसति तस्स कमजुयलं ।
कितिकम्ममादिएसु य निंतमनिंते य जे फासा ॥

वृ- अनुज्ञापनायां कृतायां गुरुणाभ्युपगते हृष्टः सन् तस्य गुरोः क्रमयुगलमात्मीयेन शिरसा संस्पृशति प्रणमतीत्यर्थः । तदेवं ततः पश्चात्कायसंस्पर्शं कुरुते इति व्याख्यातमथवायमर्थस्ततः पश्चात् कायस्पर्शमनुज्ञापयति, तथा चाह-कृतिकर्मादिषु कृतिकर्मवन्दनकं विश्रामणादिकं वा आदि शब्दात् क्षामणादिपरिग्रहस्तेषु कर्तव्येष्वागच्छति गच्छति वा ये स्पर्शाः कायस्पर्शास्तान् अनुजानीतेति वाक्यशेषः ।सम्प्रति यत्पाठान्तरं भिक्षुभावस्येति तद्व्याख्यानार्थमाह–

[भा.२०८३] भिक्खूभावो सारण वारण पडिचोयणा जहा पुव्विं ।
तह चेव इयाणिं पी, निज्जुत्ती सुत्तफासे सा ॥

वृ- भिक्षुभावो नाम स्मारणा वारणा प्रतिचोदना । अत्र प्रतिचोदनाग्रहणं चोदनाया उपलक्षणं । तत्र विस्मृतेऽर्थे स्मारणा ऽनाचारस्य प्रतिषेधनं वारणा स्खलितस्य पुनः शिक्षणं चोदना पुनः पुनः स्खलितस्य निष्ठुरं शिक्षापणं प्रतिचोदना, एताभिर्यथावस्थितो भिक्षुभाव उपजायते । ततः कारणे कार्योपचारात् एष एव भिक्षुभाव इत्युक्तं तदर्थायेति किमुक्तं भवति [यथा पूर्वमताः स्मारणादय आसीरन् तदा इदानीमपि स्युरित्येवमर्थं तदेवं कृता विषमपदव्याख्या भाष्यकृता । साम्प्रतमेषा वक्ष्यमाणा सूत्रस्पर्शा सूत्रस्पर्शिका निर्युक्ति तामेव प्रथम साधर्मिकसूत्रविषयामाह–

[भा.२०८४] आकिन्नो सो गच्छो सुहदुक्ख पडिच्छएहिं सीसेहिं ।
दुब्बल खमगगिलाणे निग्गमसंदेसकरणे य ॥

वृ- बहवः साधर्मिका इच्छेयुरेकतो अभिनिचारिकां चरितुमित्युक्तं । तत्र पर आह केन कारणेन तेषां निर्गमिच्छा निर्युक्तिकृदाह-सुख-दुःखप्रतीच्छिकैः सुखदुःखार्थमुपसम्पन्नैः प्रतीच्छिकैः शिष्यैश्च स गच्छ आकीर्णः समाकुलः आकीर्णत्वेन च स नगरे स्थितोऽन्यत्र स्थितानामेषणीयभक्तपानासंभवात् । तत्र च तृतीयस्यां पौरुष्यां भिक्षावेला चिरं च हिण्डितव्यम् । धान्याम्लकूरादिकं च तत्र भैक्षं तत्र केचित्साधवो दुर्बला जाताः क्षपका अपि पारणके प्रायोग्यालाभतो दुर्बला अभवन् ग्लाना अप्यधुनोत्थिताः सीदन्ति ।एतैः कारणैः निर्गच्छन्तुमिच्छन्ति दृष्ट्वा चाचार्यं पृच्छन्ति ।तेना चाचार्येण तान् दुर्बलान् ज्ञात्वा ते मुत्कलनीया ये पुनः निष्कारणं गन्तुकामा आपृच्छन्ति ते न मुत्कलनीयाः । ये चानुज्ञाता व्रजतेति तेषामाचार्यः सन्देशं कथयति ।कथमित्याह–

[भा.२०८५] अहमवि एहामो त्ता अन्नत्थ इहेव मं मिलिज्जाह ।
अतिदुब्बले य नाउं विसज्जणा नत्थि इतरेसिं ॥

वृ- यत्र यूयं गमिष्यथ अहमपि इतः स्थानात् तत्र एष्यामि आगमिष्यामि, अथवा अन्यत्र मम सकाशे आगन्तव्यं । यदि वात्रैव मम यूयं मिलेयुर्यथा बा यैः सन्दिश्येत तथा तैः कर्तव्यम् । आचार्येणाप्यतिदुर्बलान् तान् ज्ञात्वा तेषां विसर्जना मुत्कलनं कर्तव्यम् ।इतरेषां निष्कारणं गन्तुमनसां विसर्जना नास्ति ।एतेन वितरणमवितरणं च सूत्रोपात्तं व्याख्यातम् ।

[भा.२०८६] तं चेव पुव्वभणियं, आपुच्छणमास दोव्वणा पुच्छा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवओग बहिं सुणणा साहू सन्नी गिहत्थेसु ।।

वृ- यदि निर्गन्तुमनसोऽनापृच्छ्या व्रजन्ति, तदा प्रायश्चित्तं मासलघु, । पृच्छायामपि कृतायां यदेव भणितं तदेवाधिकृत्य गमनकाले द्वितीयं वारमापृच्छा कर्तव्या । यदि पुनर्द्वितीयं वारं नापृच्छन्ति, तदापि प्रायश्चित्तं मासलघु । किं कारणं द्वितीयवारमापृच्छा कर्तव्येति चेदत आह-उवओगेत्यादि यदा पूर्वमापृष्टं तदाचार्योऽनुपयुक्त आसीत् पश्चादुपयुक्तो जात उपयुक्तेन च तत्राशिवादयो दोषा ज्ञाताः । अथ बहिं सुणणेत्ति पश्चादाचार्येण विचारादिनिमित्तं बहिर्निर्गतेन श्रुतम् । यथा तत्र बहवो दोषा इति । यदि वा साधुना केनापि संज्ञिना श्रावकेण गृहस्थेन वा मिथ्यादृष्टिना भद्रकेण कथितमाचार्याणां यथा तत्र बहवो दोषा इति तस्मात् द्वितीयवारमवश्यं प्रष्टव्यम् । पृच्छायां चकृतायां यद्यपि तत्र न केचनापि दोषा आचार्येण निर्ज्ञातास्तथापि तत्र क्षेत्रप्रत्युपेक्षकाः पूर्वं प्रेषणीयास्तथा चाह—

[भा.२०८७] नाऊण य निग्गमनं पडिलेहण सुलभदुल्लभं भिक्खं ।
जे य गुणा आपुच्छा, जे वि य दोसा अनापुच्छा ।।

वृ- तेषां साधूनां निर्गमनं ज्ञात्वाचार्येण साधुभिस्तस्य क्षेत्रस्य प्रतिलेखनं कारयितव्यम् । येन सुलभं दुर्लभं वा भैक्षं ज्ञायते । किं च ये गुणा द्वितीयवारमापृच्छायां भवन्ति, ते प्रतिलेखनेऽपि द्रष्टव्याः । येऽपि च दोषा द्वितीयवारमनापृच्छायां ते दोषा अप्रत्युपेक्षणेऽपि के ते इत्याह—

[भा.२०८८] पच्चंत सावयाई तेना दुभिक्ख तावसीतो य ।
नियग पदुट्ठुद्धाणा फेडणा हरियवन्नी य ।।

वृ- प्रत्यन्ताः सीमावर्तिनो म्लेच्छा लोकानामुपप्लवोत्पादनायोत्थिता वर्तन्ते स्वापदानि वा दुष्टानि व्याघ्रादीन्यपान्तराले । सम्प्रति स्तेना वा शरीरापहारिण उपध्यपहारिणो वा समंतत उत्थिताः, दुर्भिक्षं वा तत्र जातं, तापस्यो वा प्रचुरमोहास्तत्र भूयस्यो ब्रह्मचर्योपद्रवाय प्रभवन्ति, निजका वा अभिनवप्रव्रजितं साधुमुत्प्राव्राजयेयुः । प्रद्विषो वा तत्र कश्चिदुपस्थितः । उद्धाणति उद्वसितो वा स कदाचित् देशो भवेत् । फेडणत्ति, तत्र या वसतिः मागासीत् सा केनचिदपनीता स्यात् । हरितपन्नीति तत्र दुर्भिक्षप्रायमतः शाकादि हरितं बाहुल्येन भक्ष्यते तच्च साधूनामकारकमथवा हरितपन्नीति नाम तत्र देशे केषुचित् गृहेषु राज्ञो दण्डं दत्वा देवतायै वल्यर्थं पुरुषो मार्यते । स च प्रव्रजितादिर्भिक्षाप्रविष्टः सन् तस्य गृहस्योपरि आर्द्रवृक्षशाखचिह्नं क्रियते । तत्रागृहीतसङ्केतो विनश्यतीति । सम्प्रति चरिकाप्रविष्टादि सूत्राणां चतुर्णामपि सामान्यतो निर्युक्तिमाह—

[भा.२०८९] अन्नत्थ तत्थ विपरिणते य गेलन्ने होइ चउभंगे ।
फिडिया गयागतेसु यं अपुन्न पुन्नेसु वा दोच्चं ।।

वृ- अन्यत्र चरिकाप्रवेशे तत्र चरिकातो निवृत्तौ विपरिणते विपरिणामे जाते यदाभवति यच्च नाभवति तेषां तद्वक्तव्यमिति शेषः, । तथा ग्लान्ये ग्लानत्वे सति भवति चतुर्भङ्गी । तस्यां च चतुर्भंग्यामगवेषणादौ यदाभवति प्रायश्चित्तं तद्वाच्यमित्युपस्कारः । तथा स्फिटिता विपरिणतास्तेषां गतागतेषु आचार्यस्तेषां समीपं गतस्ते वा आचार्यस्य समीपमागता इत्येवं रूपेषु यावत्तं कालमधिकृतः तस्मिन् पूर्णे अपूर्णे वा यदि द्वितीयमपि वारमवग्रहमनुज्ञापयति । ततो यद्विपरिणतैर्लब्धं तदाचार्यो न लभते किन्तु यदा तेषां तथारूपं चित्तमजायत यथा द्वितीयमपि वारमवग्रहमनुज्ञापयामस्ततः प्रभृति यल्लब्धं तदाचार्यस्याभवति एष गाथार्थः ।। साम्प्रतमन्यत्र तत्र वा विपरिणते यत् आभाव्यं तदुपदर्शयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२०९०] अवरो परस्स निस्सं जइ खलु दुक्खिया करेज्जाहि ।
उवब्भंतरा सेहं लभन्ति गुरू पुन्ने न लभइ य ।।

वृ- यदि चरिकाप्रविष्टा यदि चरिकातो निवृत्ता विपरिणामे किमस्माकमाचार्येण वयमेव परस्परं सुखदुःखनिश्रां कुर्म इत्येवं रूपे जाते अपरः परस्य परस्परं सुखदुःखिताः खलु निश्रां कुर्युः । तदा यावानवधिकृतस्तस्याभ्यन्तरे तस्मिन्नपूर्णे पूर्णे वा यत् शैक्षग्रहणमुपलक्षणं शैक्षप्रभृतिकं सचित्तादिकमुत्पादयन्ति । तत्तेषामेव भवति, गुरुराचार्यः पुनर्न लभते चशब्दसूचितमर्थं हठेणेत्यादिना व्याख्यास्ये इति तदेवं तत्रान्यत्र विपरिणते इति भावितमिदानीं गेलन्ने होइ चउभंगो इति भावयति–

[भा.२०९१] गेलन्ने चउभंगो तेसिं अहवावि होज्ज आयरिए ।
दोण्हंपी होज्जाही अहव न होज्जाहि दोण्हंपि ।।

वृ- ग्लान्ये ग्लानत्वे चतुर्भङ्गी भवति । तद्यथा तेषां विपरिणतानां ग्लानो नाचार्यस्य इति प्रथमो भङ्गः । अथवा आचार्ये आचार्यस्य भवति ग्लानो न तेषामिति द्वितीयः । दोण्हंपि होज्जाहीति द्वयानां विपरिणतानामाचार्यस्य भवति ग्लान इति तृतीयः । अथवा द्वयानामपि न भवति ग्लान इति चतुर्थः । अत्र प्रायश्चित्तविधिमाह–

[भा.२०९२] आयरिए अपेसंते लहुओ अकरंते चउ गुरू होंति ।
परितावणादि दोसा तेसिं अप्पेसणे एवं ।।

वृ- प्रथमभङ्गे तेषां ग्लानो नाचार्यस्येत्येवंरूपे यद्याचार्यो गवेषणाय न कमपि साधुसंघाटं प्रेषयति तदा तस्मिन्नप्रेषयति प्रायश्चित्तं लघुको मासः, । अथ प्रेषणे कृते तैर्वा कथिते यदि ग्लानकृत्यं न किमपि करोति तदा तस्मिन्न कुर्वति चत्वारो गुरुका भवन्ति, । येऽपि चानागाढागाढपरितापनादयो दोषास्तन्निमित्तमपि चर्तुगुरुलघ्वादि चरमपर्यन्तं तस्य प्रायश्चित्तमापद्यते । द्वितीये भङ्गे आचार्यस्य ग्लानो न तेषामित्येयं रूपे तैरपि ग्लानस्य गवेषणाय साधुप्रेषणादि कर्तव्यम् । यदि पुनर्न कुर्वन्ति तदा तेषामप्यप्रेषणे उपलक्षणमेतदकरणे च एवमुक्तप्रकारेण प्रायश्चित्तमवसातव्यं, । तथा हि-यदि ते गवेषणाय साधुसंघाटं न प्रेषयन्ति तदा मासलघु । अथ कृतेऽपि प्रेषणे आचार्येण वा ज्ञापिते यदि ग्लानकृत्यं न कुर्वन्ति तदा चत्वारो गुरुकाः प्रायश्चित्तम्–

[भा.२०९३] अहवा दोण्हवि हुज्जा असंथरमाणे हि तहवि गवेसणया ।
तं चेव य पच्छित्तं असंथरंता भवे सुद्धा ।।

वृ- अथवा द्वयानामपि आचार्यस्य तेषां च प्रत्येकं ग्लानो भवेत् तथापि यदि संस्तरति ततः संस्तरद्भिः परस्परं ग्लानस्य गवेषणा कर्तव्या अथ न कुर्वन्ति तदा तदेव प्रायश्चित्तं तदनन्तरमुक्तं, । तथाहि- परस्परमप्रेषणा मासलघु ग्लानकृत्याकरणे चतुर्गुरुकं । अथ द्वयेऽपि प्रत्येकं न संस्तरति, द्वयानामपि च प्रत्येकं ग्लानस्तत आह-असंस्तरन्तो गवेषणाद्यकुर्वन्तोऽपि भवन्ति शुद्धा न प्रायश्चित्तविषयः । सम्प्रति गुरुपुन्ने न लभते येत्यत्र चशब्दसूचितमर्थमुपदर्शयति–

[भा.२०९४] हठेणं न गविठा अतरंत न तेय विप्परिणयाओ ।
तत्थवि न लहइ सेहे नु लभइ य कज्जे परिणया वी ।।

वृ- सुखदुःखोपसम्पन्नकाश्चरिकां गता अतरन्तो यदि कथमण्याचार्येण न गवेषिता अतरंतो न च ते विपरिणता यथा वयमतंरतो वर्तामहे तथाप्याचार्येण न गवेषितास्ततः किमस्माकमाचार्येणेति । तत्रापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृष्टेनागवेषणेऽपि आस्तां परस्परनिश्रायमित्यपिशब्दार्थः न लभते गुरुः शैक्षान् किमुक्तं भवति ते तथा विपरिणताः सन्तो यत्सचित्तादिकमुत्पादयन्ति तदाचार्यो न लभते । अथ कार्ये कस्मिन्नपि व्याकुलीभवनत आचार्येण तेऽतरन्तो न गवेषितास्तर्हि यद्यपि ते विपरिणता अपि यत्ते सचित्तादिकमुत्पादयन्ति । तत्ते न लभन्ते किन्तु लभते आचार्यः ।

[भा.२०९५] लध्धुं अविप्परिणते कहिंति भावंमि विप्परिणयम्मि ।
इति मायाए गुरु तु सचित्तादेसगुरुया वा ।।

वृ- यदि अविपरिणते भावे सचित्तादि लब्ध्वा विपरिणम्य कथयन्ति । इदं विपरिणते भावेऽस्माभिर्लब्धमिति, तदा मायया ते उपसंम्पदं लोपयन्तीति मायानिष्पन्नं प्रायश्चित्तं गुरुको मासः, अचित्ते समुत्पादिते तत्प्रत्ययमुपधिनिष्पन्नं प्रायश्चित्तं, सचित्ते समुत्पादिने तत्प्रत्ययं चतुर्गुरु-कमादेशान्तरेण प्रायश्चित्तमनवस्थाप्यम् । तत आचार्यो निष्कारणं यदि तान्न गवेषयति तदा तस्य प्रायश्चित्तं मासलघु-

[भा.२०९६] सुहदुक्खिया गविट्ठा सो चेव य उग्गहो य सीसा य ।
विप्परिणमंतु मा वा अगविठेसुं तु सो लभते ।।

वृ- ते सुखदुःखिताः सुखदुःखोपसम्पन्नका आचार्येण गवेषिताः । स एव चावग्रहो वर्ततेऽद्यापि विपरिणामाकथनात् ते शिष्या यदि विपरिणमन्ति यदि वा मा विपरिणमन्तु तथापि यत्तैरुत्पादितं सचित्तादि तदाचार्यो लभते, न पुनस्तत्तेषामिति । अथ न गवेषिता आचार्येण विपरिणताश्च ते ज्ञातास्ततस्तैरगवेषितैर्विपरिणतैश्च यल्लब्धं सचित्तादि तत्स आचार्यो न लभते किन्तु तत्तेषामेव ।।

[भा.२०९७] विप्परिणयंमि भावे, लद्धं अम्हेहिं बेंति जइ पुट्ठा ।
पच्छा पुनो वि जातो लभंति दोच्चं अनुन्नवणा ।।

वृ- यदि पुनस्ते पृष्टाः सन्तो ब्रुवते एतद्विपरिणते भावेऽस्माभिर्लब्धं तत्तेषामेव नाचार्यस्य । अथ पश्चात् पुनरपि भावो जातो द्वितीयमपि वारमवग्रहस्यानुज्ञापना कर्तव्या, । तदा तथारूपाद्भावात् जातादारतो यत्ते लभन्ते तदाचार्यस्य भवति न तेषामिति ।।

[भा.२०९८] आगयमनागयाणं उउबद्धे सो विही उ जो भणितो ।
अद्धाण सीसगामेवि एस विहीए ठिए विदेसं ।।

वृ- य एष अनन्तरमुक्तो विधिःस ऋतुबद्धे काले आगतानां चरिकातो निवृत्तानामनागतानां चरिकाप्रविष्टानामवसेयः एष पुनर्वक्ष्यमाणो विधिर्विदेशं प्रस्थिते उपलक्षणमेतत् स्वदेशेऽपि दूरं गन्तुकामे अध्वशीर्षकग्रामे स्थिते वेदितव्यस्तमेवाह-

[भा.२०९९] सत्थेणं सालंबं गयागयाण इह मग्गणा होइ ।
तत्थ नत्थ गिलाणे लहु गुरु लहुगा चरिम जाव ।।

वृ- सार्थेन सह विदेशं स्वदेशमपि वा दूरं गन्तुकामाः सालम्बं गता यथा यदि अध्वशीर्षकग्रामे परतो गमनाथ सार्थं लप्स्यामहे ततो यास्यामः । अथ न लप्स्यामहे तर्हि प्रत्येष्याम उदन्तं च परस्परं वक्ष्यामः एवं ये सार्थेन सहाध्वशीर्षकि ग्रामे गताः, ये च न गतास्तेषामिह आभवत्यनाभवति सचित्तादौ विषये मार्गणा वक्ष्यमाणा भवति, तथा तत्रान्यत्र च ग्लाने चतुर्भङ्गी भवति । तद्यथा-अन्यत्राध्वशीर्षके ग्रामस्थितानां ग्लानो न तत्राचार्यपार्श्वे इति प्रथमः, । आचार्यपार्श्वे न तेषामिति द्वितीयः, द्वयानामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पार्श्वे ग्लान इति तृतीयो, न द्वयानामपीति चतुर्थः । तत्र यद्याचार्यस्तेषां गवेषणं न करोति मासलघु, । अथ ज्ञातेऽपि ग्लाने तस्य कृत्यकरणाय न यत्नमाधत्ते, ततश्चतुर्गुरुकं, । यद्यानागाढपरितापनादिनिमित्तं चतुर्लघ्वादि यावच्चरमं पाराञ्चितं तदपि प्राप्नोति, । तदेवं प्रथमभङ्गे प्रागभिहितमपि प्रायश्चित्तं विनेयजनानुग्रहाय भूय उक्तमेवं द्वितीये तृतीयेऽपि भङ्गे वाच्यम् ।। सम्प्रत्याभवत्यनाभवति च सचित्तादौ विषये मार्गणां चिकीर्षुराह—

[भा.२१००] पुन्नेव अपुन्ने वा विपरिणएसु जाहो अनुन्नवणा ।
गुरुणावि हु कायव्वासंका लद्धे विपरिणते उ ।।

वृ- ये ते विदेशे स्वदेशेऽपि वा दूरंगन्तुकामाः सङ्केतं कृतवन्तो यदि वयमेतावद्भिर्दिवसैर्न प्रत्यागच्छमस्तदा ज्ञातव्यं गता इति । अन्यथा वेति तस्मिन्नवधौ पूर्णे अपूर्णे वा यदि ते विपरिणता जातास्ततः पुनरपि तैरवग्रहस्य द्वितीयं वारमनुज्ञापना कर्तव्या, । गुरुणापि या तेषु तथाविध-परिणतेष्वनुज्ञापना भवति, सा च प्रतिपत्तव्या यदि पुनरपूर्णेऽवधौ तेषां शैक्षः प्रत्युत्पन्नस्ततो जाताशङ्का यद्यपूर्णेऽवधावेष समुत्पन्न इति कथयिष्यते, तत आचार्यस्य भविष्यति; । तस्मादाचार्यस्य भा भूदिति प्रत्यागतास्ते आलोचयन्ति । पूर्णेसङ्केतकाले लब्धोऽयमस्माभिः शैक्ष इति तदा तेषां प्रायश्चित्तं मासगुरु, तस्मात्सत्यभूतेन भावेनालोचयितव्यम् ।। तथा पूर्णेऽवधौ शैक्षे लब्धे प्रत्यागत्य तथैवालोचयति गुरुणापि शङ्का न कर्तव्या । यथा अपरिपूर्णेऽप्यवधौ लब्धे शैक्षे शैक्षलोभेन विपरिणत इति सत्यभावेना-लोचनात्तद्य परभावोपलक्षकैरक्लेशेन ज्ञातव्यमिति, तदेवमुपसम्पन्नानां यद्वक्तव्यं तदुक्तमिदानी-मुपसंपद्यमानानधिकृत्याह —

[भा.२१०१] परिच्छनिमित्तं वा सब्भावेणं च बेति उ पडिच्छे ।
उवसंपज्जितुकामे, मज्झं तु अकारकं इहइं ।।

[भा.२१०२] अन्नं गवेसह खेत्तं, पाउग्गं जं च होइ सव्वेसिं ।
बालगिलानादीनं सुहसंथरणं महागणस्स ।।

वृ- परीक्षानिमित्तं वा सद्भावेन वा प्रतीच्छिकानुपसम्पत्तुकामान् गुरुर्ब्रूते आर्या इहास्मिन् क्षेत्रे मम अकारकं भक्तपानादि तस्मादन्यत् क्षेत्रं मम प्रायोग्यं पद्य भवति सर्वेषां वा ग्लानादीनां प्रायोग्यं यद्य महतो गणस्य सुखसंस्तरणं सुखेन निस्तारहेतुस्तत् गवेषयथ प्रतिलेखयथ ।।

[भा.२१०३] कयसज्झाया एते पुव्वं गहियंपि नासते अम्हं ।
खेत्तस्स अप्पडिलेहा अकारगा तो विसज्जेइ ।।

वृ- एवंसन्दिष्टाः सन्तो यदि तेषां भाषन्ते एते युष्माकं शिष्याः कृतस्वाध्यायास्तस्मादेतान् प्रेषयथ, अस्माकं पुनः क्षेत्रप्रत्युपेक्षणार्थं गतानां पूर्वगृहीतमपि नश्यति । एवमुक्त्वा यदि ते क्षेत्रस्याप्रत्युपेक्षका विनयवैयावृत्यादेरकारकाश्च ततस्तान् विसर्जयति ।

[भा.२१०४] सव्वं करिस्सामो ससत्तिजुत्तं, इच्चेवमिच्छंते पडिच्छिऊणं ।
निव्वेस बुद्धिए नयावि भुंजे, तं वा गिला पूरति तेसि इच्छं ।।

वृ- ये पुनः सन्दिष्टाः सन्तः एवं ब्रुवते यथा सर्वस्वशक्तियुक्तं स्वशक्त्युचितं करिष्यामस्तान्-एवमच्छितः प्रतीच्छेत् । प्रतीष्य च तान् न चापि नैव निर्देशबुद्धया कर्म मया पुराकृतमेयं वेदयितव्यमिति बुद्धया भुङ्क्ते परिभोगं नयति किन्तु स्वपरयोर्निर्जरा बुद्ध्या यया चेच्छया ते उपसम्पद्यन्ते तां चेच्छां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषामगिल्या निर्जराबुद्ध्या पूरयति न परोपरोधावित्तनिरोधेन । अथ तेषां प्रतीच्छिकानां कियन्तं कालं प्रतीच्छको भवति । तत्राह–

[भा.२१०५] निठिय महल्ल भिक्खे, कारण उवसग्गागारियपडिबंधो ।
पढमचरिगाइं मोत्तुं, निग्गम सेसेसु ववहारो ।।

वृ- निष्ठितं नाम येन कारणेनोपसंपन्नस्तत्सूत्रार्थलक्षणं कारणं निष्ठितं समाप्तं ततो निर्गच्छति, । महल्लत्ति महती सूत्रमण्डली भक्तमण्डली वा तत्र सूत्रमण्डल्यां चिरेणालापक आगच्छति भक्तमण्डल्यां महत्यां भागागतं तत्र यथान्ये साधवोऽध्यासते तथा तेनाप्यध्यासितव्यमनध्यासीतश्च निर्गच्छति, । तथा दुर्लभं तत्र क्षेत्रे भैक्षं तत्र यथान्ये साधवो यापयन्ति, तथा तेनापि प्रतीच्छितेन यापनीयम् यापनं चासहमानः कोऽपि निर्गच्छति । कारणमशिवादिकं तस्मिन् समुत्पन्ने सर्वैर्निर्गन्तव्यम् । उपसर्गा द्विविधा दंशमशकादयः स्वजनादयश्च, तत्र दंशमशकादिषूपसर्गेषु सर्वैर्निर्गन्तव्यं स्वजनादिकृतेषु तूपसर्गेषु गच्छसाधवो निर्गच्छन्ति वा न वा, प्रतीच्छितेन पुनरवश्यं निर्गन्तव्यमू । आगारीप्रतिबन्धो नाम यत्रागार्या विषये । आत्मपरोभयसमुत्था दोषास्तत्रावश्यं तेन निर्गन्तव्यम् । अत्र प्रथमं चरमं कारणं मुक्त्वा शेषेषु कारणेषु निर्गमे आभवद् व्यवहारः प्रायश्चित्तव्यवहारश्च स यथा भवतिं तावद्वक्ष्ये, ।

एतदेव व्याचिख्यासुराह–

[भा.२१०६] संमत्तंमि निग्गमो, तस्स होति इच्छाए ।
मंडलि महल्ल भिक्खे, जह अन्ने तह जावए ।।

वृ- यस्य श्रुतस्यार्थेनोपसम्पन्नस्तस्मिन् समाप्ते श्रुते तस्य निर्गम इच्छया भवति, यदि प्रतिभासते तर्हि तिष्ठति, नो चेन्निर्गच्छति; तथा महत्या भक्तमण्डल्यां दुर्लभे च भैक्षे यथान्ये साधवो यापयन्ति, तथा सोऽपि यापयेत् । यापनां चासहमानः कोऽपि गच्छेत् सूत्रमण्डल्यामपि चिरेणालापमागच्छन्तम-वेक्ष्यमाणस्त्वरया कोऽपि निर्गच्छति –

[भा.२१०७] कारणे असिवादिम्मि सव्वेसिं होइ निग्गमो ।
दंसमादी उवसग्गे सव्वेसिं एवमेव उ ।।

वृ- अशिवादौ कारणे समुत्थिते सर्वेषां भवति निर्गमः । एवमेव अनेनैव प्रकारेण दंशादिके दंशमशकादिके उपसर्गे समुपस्थिते एवमेव सर्वेषां भवति निर्गमः ।।

[भा.२१०८] नीयल्लएहि उवसग्गो, जइ गच्छंति नेतरे ।
निग्गच्छति ततो एगो, पडिबंधो वावि भावतो ।।

वृ- निजकैरपि स्वजनैरप्युपसर्गे क्रियमाणे यदि इतरे गच्छसाधवो न गच्छन्ति ततः स एक एकाकी प्रातीच्छिको निर्गच्छति । यदि वा भावतः स्वजनेषु महान् प्रतिबन्धस्ततो निर्गच्छति ।।

[भा.२१०९] आयपरोभयदोसेहिं जत्थं गारीए होज्ज पडिबंधो ।
तत्थ न संचिट्ठेज्जा, नियमेन उ निग्गमो तत्थ ।।

वृ- यत्रात्मपरोभयदोषैरगार्या उपरि भवेत् प्रतिबन्धस्तत्र न संतिष्ठेत् । किन्तु नियमतस्तत्थेति प्राकृतत्वात् तस्मादित्यर्थे तस्मात्स्थानान्निर्गमः ।

[भा.२११०] पढमचरिमेसु नुन्ना, निग्गम सेसेसु होइ ववहारो ।
पढम चरिमाण निग्गम, इमा इ जयणा तहिं होइ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- प्रथमे चरमे च कारणे नियमेन निर्गमे अनुज्ञा भवति, । शेषेषु कारणेष्वनाभोगतो निर्गमे भवत्याभवद्व्यवहारश्च तत्र प्रथमचरमानां प्रथमचरमकारणोपेतानां निर्गमे इयं वक्ष्यमाणा तत्र यतना भवति । तामेवाह–

[भा. २१११] सरमाणे उभए वी काउस्सग्गं तु काउ वच्चेज्जा ।
पण्हुट्ठे दोण्हवि ऊ आसन्नातो नियट्टेज्जा ।।

वृ- प्रथमे चरमे च कारणे समुपजाते उभयस्मिन्नप्याचार्ये प्रतीच्छके च विधिस्मरति च्छिन्नोपसंपदिति ज्ञापनार्थं कायोत्सर्गं कृत्वा स प्रातीच्छको व्रजेत् अथ प्रातीच्छिकस्य विस्मृतं ततः आचार्येण स्मारयितव्यं यथा कुरु च्छिन्नोपसंपन्निमित्तं कायोत्सर्गमिति अथानाभोगतो द्वयोरपि पण्हुट्ठमिति एकान्तेन विस्मृतं, ततो द्वयोरप्येकान्तेन विस्मृतावकृते कार्योत्सर्गे सम्प्रस्थितो यदासन्ने प्रदेशे स्मरति, तदासन्नात् निवर्तेत, निवृत्त्य च कायोत्सर्गो विधेयः ।।

[भा. २११२] दूरगएणं उ सरिए साहम्मि दट्ठु तस्सगासम्मि ।
काउस्सग्गं काउं जं लद्धं तं च पेसेइ ।।

वृ- अथ दूर गत्वा स्मृतवान् ततो दूरगतेन स्मृतेन साधर्मिकं दृष्ट्वा तस्य सकाशे समीपे कायोत्सर्गः करणीयः, सन्देशश्च प्रेषणीयः, आचार्यस्य यथा तदानीं युष्मत् समीपे कायोत्सर्गकरणं विस्मृतमिदानीममुकस्य साधर्मिकस्य समीपे कृतः कायोत्सर्ग इति कायोत्सर्गं च कृत्वा यदकृते कायोत्सर्गे सचित्तादिकमुत्पन्नं तत्प्रेषयति–

[भा. २११३] पढमचरमाण एसो निग्गमनविही समासतो भणितो ।
एत्तो मज्झिल्लाणं ववहारविहिं तु वुच्छामि ।।

वृ- प्रथमचरमानां प्रथमचरमकारणोपेतानां एव निर्गमविधिः समासतो भणितः । इत ऊर्ध्वं मध्यमानां मध्यमकारणोपेतानां व्यवहारविधिनाभवद्यवहारविधिं प्रायश्चित्तव्यवहारविधिं च वक्ष्यामि । प्रतिज्ञातमेव निर्वाहयति–

[भा. २११४] सज्झायभूमि वोलंते जोए छम्मास पाहुडे ।
सज्झाय भूमिदुविहा आगाढा चेव नागाढा ।।

वृ- स्वाध्यायभूमिं प्रतिपन्नः सन् तामनिक्षिप्य यो व्यतिक्रामति तस्मिन् आभवद्व्यवहार उच्यते । अथ स्वाध्यायभूमिरिति किमभिधीयते । उच्यते-प्राभृत्तं नाम यदिष्टः श्रुतस्कन्धस्तस्मिन् यो योगः स स्वाध्यायभूमिः स चामाढयोगमधिकृत्योत्सर्गतः षण्मासाः । एतदेव वैतन्येनाह-स्वाध्यायभूमिर्द्विविधा योगो द्विविध इत्यर्थः । आगाढा अनागाढा च–

[भा. २११५] जहन्नेन तिन्नि दिवसा अन्नागाढुक्कोस होइ बारस उ ।
एसा दिठीवाए महकप्पसुयम्मि बारसमा ।।

वृ- अनागाढा स्वाध्यायभूमिर्जघन्येन त्रयो दिवसा यथा नन्द्यादिकस्याध्ययनस्य उकर्त्षतो भवति द्वादशवर्षाणि । एषा द्वादशवर्षप्रमाणा उत्कृष्टा स्वाध्यायभूमिर्दृष्टिवादे सापि दुर्मेधसः प्रतिपत्तव्या, प्राज्ञस्य तु वर्षं, उक्तं च–

अनागाढो जहन्नेणं, तिन्नि दिवसा उक्कोसेण वरिसं ।
जहा दिठिवायस्स बारस वरिसाणि दुम्भेहस्सत्ति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महाकल्पश्रुते द्वादशवर्षाण्युत्कृष्टा स्वाध्यायभूमिः । अत्राभवद्व्यवहारमाह–

[भा.२११६] संकंतो य वहंतो काउस्सग्गं तु च्छिन्न उवसंपा ।
अकयम्मी उस्सग्गो जा पढती तं सुयक्खंधं ।।

वृ- योगं वहन् गणान्तरमन्यत्र संक्रामन् च्छिन्ना उपसम्पदिदानीमिति प्रतिपत्त्यर्थं कायोत्सर्गं कृत्वा व्रजेत् । अथ कथमपि तस्य विस्मृतं भवति तत आचार्येण स्मरयितव्यो यथा कुरु कायोत्सर्गमथ द्वयोरपि विस्मरणतः सोऽकृते कायोत्सर्गे याति, तर्हि यावत्सोऽन्यत्र गतोपि तं श्रुतस्कन्धं पठति ।।

[भा.२११७] ता लाभो उद्दिसणायरियस्स जइ वहइ वट्टमाणि से ।
अवहंतंमि उ लहुगा, एस विही होइ अनागाढे ।।

वृ- तावत् यत्किमपि स लभते सचित्तादिकं समस्तोऽपि लाभउद्देशनाचार्यस्य येनोद्दिष्टः स श्रुतस्कन्धस्तस्य पूर्वाचार्यस्याभवति, । केवलं यदि स पूर्वतन उद्देशनाचार्यः से तस्यान्यत्र गतस्य सतो वर्तमानां सारां वहति, अथ स तस्याकृतकायोत्सर्गस्य सतोऽन्यत्र गतस्य सारां न वहति । ततस्तस्मिन् सारामवहत्युद्देशनाचार्ये प्रायश्चित्तं चत्वारो लघुकाः । यच्च सचित्तादिकं स प्रातीच्छिको लभते तदपि न तस्या भवति, एषोऽनन्तरोदितो विधिर्भवत्यनागाढे योगे । सम्प्रत्यागाढे भिधित्सुरिदमाह–

[भा.२११८] आगाढो वि जहन्नो कप्पिगकप्पादि तिन्नहोरत्ता ।
उक्कोसो छम्मासे विवाहपन्नत्ति आगाढे ।।

वृ- आगाढोऽपि योगो जघन्यस्त्रयोऽहोरात्रा तथा कल्पिका कल्पिकादेरुत्कर्षत आगाढयोगे षण्मासान् यथा व्याख्याप्रज्ञप्तेः पञ्चमाङ्गस्य अत्राभवद्व्यवहारमाह–

[भा.२११९] तत्थवि काउस्सग्गं आयरियविसज्जियम्मि च्छिन्ना उ ।
संसरमसंसरं वा अकए लभंतो भूमीए ।।

वृ- अत्राप्यागाढयोगे पूर्णेऽपूर्णे वा आचार्येण यस्य सकाशे योगं प्रतिपन्नस्तेन सूरिणा विसर्जिता विसर्जने कृते च्छिन्ना उपसम्पदिति ज्ञापनार्थं संस्मरन् कायोत्सर्गं कुर्यात् । असंस्मरन् वा आचार्येण स्मरयितव्यः । तत्र भूमौ स्वाध्यायभूमावागाढे योगेऽपरिपूर्णे आचार्येण विसर्जितः । कृते कायोत्सर्गे यदि व्रजति तर्हि स व्रजन् यत्किमपि लभते सचित्तादिकं तत्तस्यैवाभवति, नोद्देशनाचार्यस्य, अथाकृते कायोत्सर्गे व्रजति । तर्हि यावदन्यत्र गतोऽपि तं श्रुतस्कन्धं पठति, सारां चोद्देशनाचार्यस्तस्य करोति, तावद्यत् किमपि स सचित्तादिकमुत्पादयति, तत्सर्वमुद्देशनाचार्यो लभते न पुनरितरः–

[भा.२१२०] तीरिय अकए उ गते जा अन्नं न पठए उ ता पुरिसे ।
आसन्नाओ नियत्तइ दूरगतो वावि अप्पाहे ।।

वृ- तीरि ते समाप्तिं नीते आगाढे योगे श्रुतस्कन्धे च भक्तिपुरस्सरमाचार्यादिक्षमणया तोषिते यदि कथमपि गमनवेलायामनाभोगतोऽकृते कायोत्सर्गे याति, तर्हि स गतः सन् यावदन्यं पठति पठितुमारभते, तावद्यत्किमपि लभते, तत्पूर्वस्याचार्यस्याभवति न तस्य, तस्य चास्मरणतोऽकृते कायोत्सर्गे गतस्येयं सामाचारी, यदि आसन्ने प्रदेशे गत्वा स्मृतं तत आसन्नान्निवर्तते । अथ दूरं गतेन स्मृतं तर्हि तत्र यं साधर्मिक पश्यति, तस्य समीपे कायोत्सर्गं तु कृत्वा अप्पाहेति संन्देशं कथयति, । यथा मया कृतोऽमुकस्य समीपे कायोत्सर्ग इति ।।

[भा.२१२१] अवितोसविते पाहुडे निंते च्छेदो पडिच्छे चउगुरुया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जोवि य तस्स उ लाभो तंपि य न लभे पडिच्छंतो ।।

वृ- प्राभृते श्रुतस्कन्धे अतोषिते समाप्त्यनन्तरं भक्तिबहुमानादिपुरस्सरमाचार्यादिक्षमणया तोषमनीते यदि निर्गच्छति तर्हि तस्मिन् प्रायश्चित्तच्छेदः, यश्च तं पाठयितुं प्रतीच्छति तस्मिन् प्रतीच्छके प्रायश्चित्तं चत्वारो गुरुकाः । योऽपि च तस्य निर्गतस्यान्यत्र प्रविष्टस्य लाभस्तमपि न लभते प्रतीच्छकः किमुक्तं भवति, । स तथा निर्गतो यत्किमप्युत्पादयति सचित्तादिकं तत्पूर्वतनस्याचार्यस्याभवति, न तु तस्य, नापि यस्तं पाठयति तस्य प्रतीच्छ्त इति तदेवं गच्छान्निर्गतानां विधिरुक्तः ।।

सम्प्रत्यनिर्गतानां तमभिधित्सुराह-

[भा.२१२२]　तत्थवि य अच्छमाणे गुरुलहुया सव्वभंगे जोगस्स ।
आगाढमनागाढे देसं भंगे उ गुरुलहुओ ।।

वृ- तत्रापि गच्छे तिष्ठन् यदि योगं वक्ष्यमाणप्रकारेण भनक्ति देशतः सर्वतो वा तदा तस्मिन् योगस्यागाढस्य सर्वतो भङ्गे प्रायश्चित्तं चत्वारो गुरुकाः । अनागाढस्य सर्वतो भङ्गे चत्वारो गुरूका : वा लघुकाः, तथा आगाढे आगाढस्य देशतो भङ्गे गुरुको मासोऽनागाढस्य देशतो भङ्गे लघुकः ।

अथ कथं देशतः सर्वतो वा योगस्य भङ्गस्तत आह-

[भा.२१२३]　आयंबिल न कुव्वइ भुंजति विगतीउ सव्वभंगो उ ।
चत्तारि पगारा पुन होंति इमे देसभंगंमि ।।

वृ- आयामाम्लं परिपाट्या समापतितं न करोति विकृतीर्वा । भुक्ते एष योगस्य सर्वभङ्ग देशभङ्गे पुनरिमे वक्ष्यमाणाश्चत्वारः प्रकारास्तानेवाह-

[भा.२१२४]　न करेति भुंजिऊणं करेइ काउं सयं च भुंजति ।
वीसज्जेह ममं तिय गुरुलहुमासो विसिठो उ ।।

वृ- आचार्येण संदिष्टो विकृतिग्रहणाय कार्योत्सर्गं कृत्वा विकृतीर्भुक्ष्व । तत्रैकोऽकृते कार्योत्सर्गे विकृतीर्भुङ्क्ते न च भुंक्त्वापि करोति कायोत्सर्गं तस्य प्रायश्चित्तं मासलघु तपसा कालेन च गुरुकं । तत्र तपसाऽष्टमादिना, कालेन ग्रीष्मादिना । अन्यस्तथा सन्दिष्टः सन् विकृतीर्भुङ्क्त्वा विकृतिग्रहणाय कायोत्सर्गं करोति तस्य प्रायश्चित्तं मासलघु तपसा गुरुकं कालतो लघु; काउं सयं च भुञ्जति । तृतीयस्तथा सन्दिष्टः सन् स्वयं कायोत्सर्गं कृत्वा विकृतीर्भुक्ते तस्य प्रायश्चित्तं मासलघु तच्च तपसा लघु चतुर्थादि भुञ्जेरहमिति तस्य मासलघु तपः कालाभ्यां लघु । तथा चाह चतुर्ष्वपि लघुमासो गुरु पुनर्यथायोगं तपः कालाभ्यां विशिष्टः सन् एवमनागाढे योगे देशभङ्गः । आगाढे पुनर्नास्त्यपरिपूर्णेऽनुज्ञा विसर्जनस्य न केवलमेतेषु चतुर्षु प्रकारेषु यथोक्तं प्रायश्चित्तं किं त्वाज्ञादयोऽपि दोषास्तथा चाह-

[भा.२१२५]　एक्केक्के आणादी विराधना होइ संजमायाए ।
अहवा कज्जे उ इमे दट्ठुं जोगं विसज्जेज्जा ।।

वृ- एकैकस्मिन् प्रकारे आज्ञादय आज्ञानवस्थामिथ्यात्वविराधनारुपा दोषास्तथा ग्लानत्वभावतो देवताच्छलनतो वा संयमस्यात्मनः च विराधना भवति । अथवा इमानि वक्ष्यमाणानि ग्लानत्वादीनि कार्याणि दृष्ट्वा योगं विसर्जयेत् । नास्ति तत्र देशतः सर्वतो वा भङ्गः तान्येव कारणान्याह-

[भा.२१२६]　दट्ठु विसज्जण जोगे गेलन्नवयमहामद्धाणे ।
आगाढे नवगवज्जण निक्कारण कारणे विगती ।।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

वृ- दृष्ट्वा ग्लानमतरन्तं वयत्ति व्रजिकायां विकृतिलाभं तथा महामहानिन्द्रमहादीत् अध्वानंविच्छन्नाध्वानमुपलक्षणमेतत् । अवमौदर्य राजप्रद्विष्टं च दृष्ट्वा योगो योगस्य विसर्जनं कर्तव्यं, तथा आगाढेविकृतिनवकस्य वर्जनं दशमायाः पक्करूपाया भजना तथा निष्कारणे योगं निक्षिप्य विकृतयो न कल्पन्ते । कारणे तु कल्पन्ते एष द्वारगाथासंक्षेपार्थः । सम्प्रत्येषा विवरीतव्या, तत्र प्रथमं ग्लानपदमधिकृत्याह-

[भा.२१२७] जोगे गेलन्नमि य आगाढियरे य होति चउ भंगो ।
पढमो उभयागाढो बितिओ तइओ य एक्केणं ।।

वृ- योगे ग्लानत्वे च प्रत्येकमागाढेनागाढे भवति चतुर्भङ्गी गाथायं पुंस्त्वनिर्देशः प्राकृतत्वात् । सा चैवमागाढो योग आगाढं ग्लानत्वं १ आगाढो योगोऽनागाढं ग्लानत्वं २, अनागाढो योग आगाढं ३, अनागाढो योगोऽनागाढं ग्लानत्वं ४ । तथा चाह प्रथमे भङ्गे उभयागाढं यस्मिन् स, तथा द्वितीय आगाढ आगाढयोगेन, तृतीय आगाढ आगाढग्लानत्वेनत्यर्थः, चतुर्थ उभयस्याप्यागाढस्याभावे ।

तत्र प्रथमधिकृत्याह-

[भा.२१२८] उभयम्मि वि आगाढे, दड्ढे लग्गएहि तिन्नि दिने ।
मक्खंति य ठायंते पज्जंते धरे दिना तिन्नि ।।

वृ- उभयस्मिन्नपि योगे ग्लानत्वे चागाढे तं प्रतिपन्नागाढयोगमागाढग्लानं दग्धेन पक पक्वान्नोद्धरितेन धृतेन तैलेन वा यदि वा पक्वेन शतपाकादिना तैलेन त्रीणि दिनानि म्रक्षयन्ति । तथाप्यतिष्ठति ग्लानत्वे यत्र पच्यते पक्वान्नं तत्र त्रीणि दिनानी यावत् नीत्वा नात्वा पर्यन्ते ध्रियते येन तद्गन्धेपुद्गलाध्रानत आप्पायना भवति ।

[भा.२१२९] जत्तियमेत्ते दिवसे, विगइं सेवइ न उद्दिसे तेसु ।
तहवि य अठायमाणे निक्खिवणं सव्वाहा जोगे ।।

वृ- यावन्मात्रान् दिवसान् दिवसेषु विकृतिमुक्तप्रकारेण सेवते, तेषु तावन्मात्रेषु सूत्रं नोद्दिशत् । तथापि च दिनत्रयं पर्यन्तधरणेनाप्यतिष्ठत्यनिवर्तमानग्लानत्वे सर्वथा योगो योगस्य निक्षेपणं कर्तव्यम् ।।

[भा.२१३०] जइ निक्खिप्पइ दिवसे, भूमीए तत्तिए उवरि वड्ढे ।
अपरिमियं तु देसो, भूमीए ततो परं कमसो ।।

वृ- यति यावत्प्रमाणान् मत्वा योगो निक्षिप्यते, तावन्मात्रान्दिवसान् भूमेः स्वाध्यायभूमेरुपरि वर्धयेत् । किमुक्तं भवति । यावत्ति पठिते स्थितः स्वाध्यायः स्वाध्यायभूमिस्तत्र यावतो दिवसान् वोढा योगो निक्षिप्यते यावतो दिवसान् भूयोऽपि योगमुत्क्षिप्य योगोद्वहनेन स्वाध्यायभूमेरुपर्येव-मेवातिवाहयेत् । अथ यस्मिन् दिने योगः प्रथममुत्क्षिप्तस्तस्य विस्मृतेर्दिवसपरिणाणं प्रतिनियतं कर्तुं न शक्यते, । तत आह परिमितं यदि दिवसपरिमाणं तत उद्देशो ग्राह्यः, स स्वाध्यायभूमेरुपर्येवमेन योगोदवहनेनातिवाह्यते, ततस्तावन्मात्रदिवसातिवाहनतःपरं क्रमशः सूत्रपाठानुसारेण वहेत् । गतः प्रथमभङ्गः । सम्प्रति द्वितीयभङ्गमधिकृत्याह–

[भा.२१३१] गेलण्णमनागाढे रसवति नेहोव्वरे असति पक्वा ।
तह विय अठायमाणे, आगाढतरं तु निक्खिवणा ।।

वृ- ग्लानत्वेऽनागाढे रसवत्यां शालनकादौ यः स्नेह उद्धरितः स म्रक्षणाय प्रदीयते तथाप्यसत्यतिष्ठति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ग्लानत्वे यानि शतपाकादिना पक्वानि धृततैलानि तानि म्रक्षणाय दातव्यानि, । तथाप्यतिष्ठति ग्लानत्वे ग्लानमागाढतरं ज्ञात्वा योगस्य सर्वथा निक्षेपणं कर्तव्यं, । गतो द्वितीयो भङ्गः । सम्प्रति तृतीयमाह—

[भा.२१३२] तिन्नि तिगेगंतरिए गेलन्नागाढ निक्खिवपरेणं ।
तिन्नि तिगा अंतरिया चउत्थवंते निक्खिवणा ।।

वृ- अनागाढेयोगे आगाढे ग्लानत्वे त्रीन् दिवसानां त्रिकान् एकान्तरिकान् कारयेत् । तथाप्यतिष्ठति ततः परेण योगस्य निक्षेपः कर्तव्यः, इयमत्र भावना-एकस्मिन् दिवसे विकृतिग्रहणाय कायोत्सर्गः कृतः, द्वितीये दिवसे पुनः कृतः कायोत्सर्ग एवं तृतीयेपि चतुर्थे दिवसे कृते निर्विकृतिकं पुनः पंचम षष्ठम सप्तमेषु कायोत्सर्गः तलो अष्टमे द्विवसे निर्विकृतिकं नवमे कायोत्सर्गः कृतेऽपि यदि न स्थितं ग्लानत्वं, ततो दशमे दिवसे योगनिक्षेपः । गतस्तृतीयोऽपि भङ्गः । सम्प्रति चतुर्थमाह-तिन्नि तिगा इत्यादि, त्रयस्त्रिकानथ दिवसा इत्यर्थः अन्तरिता एकान्तरिताश्चतुर्थे भङ्गे कर्तव्यास्तयाप्यतिष्ठति ग्लानत्वे योगस्य निक्षेपणम् । अत्रापीयं भावना-एकस्मिन् दिवसे कायोत्सर्गो द्वितीये दिवसे निर्विकृतिकं, तृतीये दिवसे कायोत्सर्गश्चतुर्थे निर्विकृतिकं, । एवमेकान्तरिते कायोत्सर्गविकृतिके नवदिवसान् यावत्कारयेत्तथाप्यतिष्ठति ग्लानत्वे दशमे दिवसे योगो निक्षिप्यते, यत्रापि प्रतिदिवसं ग्लानप्रयोगस्यालाभे तत्परिवासयितव्यं भवति, । तत्रापि योगो निक्षिप्यते, अथ कदाचित् क्षीरादिभिर्ग्लानस्य प्रयोजनमजायत, तदा स्वग्रामे तन्मार्गयितव्यं, असति स्वक्षेत्रे परग्रामादप्यानतेव्यं, तथाप्यसति क्षेत्राद्बहिरपि गत्वा समानेतव्यम् । अथ कदाचित्तत्राप्यलाभस्तर्हि व्रजिकामपि ग्लानं गमयेत् । पतितं द्वितीयं व्रजिकाद्वारं । तत्रेयं यतना-

[भा.२१३३] वइया अजोगि जोगीव अदढ अतरंगस्स दिज्जंते ।
निव्विगिकमाहारो, अंतरविगीतीए निक्खिवणं ।।

वृ- व्रजिकायां गोकुले गन्तुकामस्य अंतरंगस्सत्ति ग्लानस्य वा ग्लानत्वेन विना दुर्लभस्य द्वितीया दीयन्ते अयोगवाहिनस्तदबावे योगवाहिनो वा तत्राहारो निर्विकृतिकमन्तरा च कार्योत्सर्गः, अथ लभ्यते प्रतिदिवसं विकृतिस्तदा योगस्य निक्षेपणमत्रेयं भावना-ग्लानस्य दृढस्य वा व्रजिकागन्तुकामस्य द्वितीया [साधवो] दीयन्ते अयोगवाहिनः । अथ ते न सन्ति तदा अनागाढयोगवाहिनो दातव्यस्तत्र गता विकृतीः परिहरन्ति निर्विकृतिकमाहारमाहारयन्ति, अथ न लभ्यते दिने दिने निर्विकृतिकं तदान्तरान्तरा विकृतिग्रिहणाय कायोत्सर्ग कुर्वन्ति । अथ दिने दिने विकृतिरेव प्रायो लभ्यते नान्यत्तदा योगस्तेषां निक्षिप्यते । सम्प्रति निर्विकृतिकमाहारमाहारयतां विधिमाह-

[भा.२१३४] आयंबिलस्सऽलंभे चउत्थमेगंगयं च तक्कादि ।
असतेयरमागाढे निक्खिवनुद्देस तह चेव ।।

वृ- यद्याचाम्लवारके आचाम्लप्रायोग्यं न लभ्यते, तदा तद्वारकेऽभक्तार्थं कुर्वन्ति, अथ न शन्कुवन्त्यभक्तार्थं कर्तुं तदा एकाङ्गिकं तक्रमाहारयन्ति तक्रायामाम्लं कुर्वन्तीत्यर्थः, आदिशब्दात् एकाङ्गिकं काष्टमूलमाहारयतीति द्रष्टव्यम्, अथ सन्त्यनागाढयोगवाहिनो द्वितीयास्तत इतरे आगाढयोगवाहिनो द्वितीया दीयन्ते, तत्र यदि तेषां प्रायोग्यं लभ्यते, ततः सुन्दरमथ न लभ्यते, केवलं तत्र क्षीरादीनि लभ्यन्ते, तदा योगो निक्षिप्यते, निक्षेपानन्तरं च पुनरुद्देशस्तथैव यथाऽधस्ताद्भणितम्;

[भा.२१३५] जति निक्खिप्पइ दिवसे, भूमीए तत्तिए उवरिवड्ढे ।
अपरिमियं तु द्देसो, भूमीए तओ परं उ कमसो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गतं व्रजिकाद्वारमिदानीं महामहद्वारमाह–

[भा.२१३६] सक्कमहादीसु पमत्तं मा तं सुरा छले ठवणा ।
पीलिज्जंतु व अदढा इतरे उ वहंति न पढंति ।।

वृ- महामहः शक्रमहादय आदिशब्दात् सुग्रीष्मकमहादिपरिग्रहः । तिसु ठवणत्ति अनागाढ-योगप्रतिपन्नास्तेषां योगो निक्षिप्यते, किंकारणमितिचेदत आह मा तं प्रमत्तं सन्तं काचित् मिथादृष्टिर्देवता च्छलयेत् । अन्यच्च तेषु दिवसेषु विकृतयो लभ्यन्ते, ततो येऽदढा दुर्बलाः सन्ति तैर्विकृति परिभोगत अप्पायन्तामिति योगनिक्षेपणं ये पुनरितरे आगाढयोगवाहिनस्तेषां योगो न निक्षिप्यते, केवलमन्यत् नोद्दिशन्ति, नापि पठन्ति, गतं महामहद्वारमिदानीमध्वावमराजद्विष्टलक्षणं द्वारत्रयमाह-

[भा.२१३७] अद्धाणो मे जोगीणं एसियं सेसगाणा पनगादी ।
असतीए अनागाढे, निक्खिव सच्चासती इयरे ।।

वृ- अध्वनि ग्रमानुग्रामिके योगं वहन्ति । अथ च्छिन्नाध्वकं तदा यत् एपितं प्रासुकमित्यर्थः । तत् योगिनां योगवाहिना दीयते, शेषाणां पञ्चकादि दातव्यं, किमुक्तं भवति । शेषाः पञ्चकपरिहान्या पञ्चकादिषु यतन्ते, अथ सर्वे योगवाहिनो न संस्तरन्ति ते प्रासुकेन, तत आह असति सर्वेषां तेषां योगवाहिनां प्रासुके अनागाढयोगवाहिनां योगस्य निक्षेपः करणीयः । अथ सर्वथा तत्र प्रासुकं न लभ्यते तत आह-सर्वेषां प्रासुकस्यासत्यभावे इतरेऽप्यागाढयोगवाहिनो निक्षिप्यन्ते, एवमवमोदर्ये राजद्विष्टेऽपि च भावनीयं ।। साम्प्रतमागाढे नवकवर्जनमिति व्याख्यानार्थमाह-

[भा.२१३८] आगाढंमि च जोगे, विगती उ नव विवज्जणी उ ।
दसमाए होइ भयणा, सेसग भयणा वि इयरम्मि ।।

वृ- आगाढयोगे पक्कविकृतिव्यतिरेकेण शेषा नवापि विकृतयो विवर्जनीया दशम्याः पुनः पक्षविकृतेर्भवति भजना विकल्पना, आगाढं ग्लानत्वमधिकृत्य पूर्वप्रकारेण तस्याः सेवना भवति, शेषकालं नेति भावः । इतरस्मिन्नागाढयोगे शेषकाणामपि क्षीरादीनां विकृतीनां भजना विकल्पना आगाढग्लानस्यानागाढग्लानस्य चान्तरान्तरा विकृतिग्रहणाय कार्योत्सर्गस्यापि करणाभ्यनुज्ञातात् ।। सम्प्रति निक्कारणे कारणे विगती इति व्याख्यानयति-

[भा.२१३९] निक्कारेण न कप्पंति विगतीतो जोगवाहिणो ।
कप्पंति कारणे भोत्तुं अनुन्नाया गुरुहिओ ।।

वृ- योगवाहिन आगाढयोगवाहिनो वा निष्कारेण ग्लानत्वादिकारणाभावे विकृतयः पूर्वप्रकारेण भोक्तुं न कल्पन्ते, कारणे पुनरनुज्ञाता गुरुभि र्भोक्तुं कल्पन्ते । न च कारणे योगनिक्षेपेऽपि दोषस्तथा चाह–

[भा.२१४०] विगती कएण जोगं निक्खिवए दढदुब्बले ।
से भावतो अनिक्खित्ते निक्खंते वि य तंमि ओ ।।

वृ- यः संहननेन दढोपि सन् शरीरेण दुर्बल इति कृत्वा विकृतिकृते न भोगाय योगं निक्षिपति, से तस्य निक्षिप्तेपि तस्मिन् योगं भावतः स योगोऽनिक्षिप्त एव गुर्वाज्ञया निक्षेपणात् ।।

[भा.२१४१] विगति कएण जोगं निक्खिवे अद्दढेबले ।।
सभावतो अनिक्खित्ते, उववाएण गुरुण उ ।।

वृ- यो बली बलवानपि संहननेनाद्दढ इति कृत्वा विकृतिकृते न योगं निक्षिपति स योगस्तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावतोऽनिक्षिप्ते एव, कुतः ? इत्याह-गुरुणामुपपातेन आज्ञया उवसतो निद्देसो आणा विनओ होंति एगट्ठा इति वचनात् निक्षेपणादिति वाक्यशेषः । न च तथा योगस्य सर्वथा भंगो यत आह–

[भा.२१४२] सालंबो विगति जो उ आपुच्छित्ताण सेवए ।
स जोगे देसभंगो उ सव्वभंगो विवज्जए ।।

वृ- सालम्बो विकृतिभिः प्रीणितः सन् क्षिप्रं ज्ञानादि ग्रहीष्यामीत्यालम्बनसहितो यो गुरुमापृच्छ्य विकृतीः सेवते परिभुङ्क्ते, स योगे योगस्य देशभंगो भवति न सर्वभङ्गो विपर्यये आलम्बनाभावे गुर्वनापृच्छायां च सर्व भङ्गः । अथ साक्षाद्योगं निक्षिपति, न च सर्वभङ्ग इति का वाचो युक्तिरत्त आह-

[भा.२१४३] जह कारणे असुद्धं भुंजंतो न उ असंजतो होइ ।
तह कारणंमि जोगं, न खलु अजोगीय ठवेंतोवि ।।

वृ- यथा कारणे च्छिन्नाध्वकादावशुद्धमपि भुञ्जानो न तु नैवासंयतो भवति तथा कारणे दुर्बलत्वादिलक्षणे सति योगं स्थापनमपि खलु नैवायोगी भवति, ततो न सर्वभङ्गः ।

[भा.२१४४] अन्नो इमो पगारो सोपडिच्छियस्स उ अहिज्जमानस्स ।
माया नियडि य जुत्ते ववहारो सचित्तमादिम्मि ।।

वृ- प्रतीच्छकस्याधीयानस्यायं वक्ष्यमाणः प्रकारः तमेवोपदर्शयति । सचित्तादिकविषये यो मायानिकृतियुक्तो मायावञ्चनाभिप्रायो निकृतिस्तदनुरुप बहिराकाराच्छादनं ताभ्यां युक्त-स्तस्मिन् व्यवहार आभवद्व्यवहारः प्रायश्चित्तव्यवहारश्च भणनीयः, तमेवभिधित्सुराह-

[भा.२१४५] उप्पन्ने सचित्त जो उ निक्खिवे जोगं ।
सव्वेसि गुरुकुलाणं उवसंपज्ज लोपिया तेन ।।

वृ- उप्पन्ने उत्पन्ने सचित्ते उपलक्षणमेतदचित्ते वा यो योगं निक्षिपति, किमुक्तं भवति । यदा यदा तस्य सचित्तादिकमुत्पन्नं भवति, तदा तदा गुरुं विज्ञपयति । अस्ति किञ्चित्प्रयोजनं साधयितव्यमतो निक्षिपाभि योगमिति, एवं मायाबहुलतया यो योगं निक्षिपति, तेन पापीयसा सर्वेषां गुरुकुलानां श्रुतोपसम्पल्लोपिता ।

[भा.२१४६] बहिया य अनापुच्छा विहीयाए आपुच्छणाए मायाए ।
गुरुवयणे पच्छकडो, अब्भुवगमे तस्स इच्छाए ।।

वृ- बहिरुद्ग्रामकभिक्षाचार्या गतो यः सचित्तादिकमुत्पन्नं यस्य सकाशेऽधीते तमनापृच्छ्य निजाचार्याणां प्रेषयति, तेनापि सर्वगुरुकुलानां श्रुतोपसम्पल्लोपिता, अमीषां च त्रयाणामपि मायानिष्पन्नं प्रायश्चित्तं मासगुरु सचित्तविषयं जधन्यमध्यमोत्कृष्टोपधिनिष्पन्नं, गुरुवयणपच्छ-कडोति । ये ते त्रिभिः प्रकारैरपहृताः शिष्यास्ते कदाचित्स्नानादिषु समवसरणादौ मिलन्ति गुरुणा च पृष्टाः सन्तो यथावन्निवेदयन्ति, ततो व्यवहारे जाते स आचार्यवचनेन पश्चात् क्रियते पराजयते, तस्य सक्तं सर्वमाचार्यस्याभवतीत्यर्थः, । अब्भुवगमे तस्स इच्छा इदि यदि पुनस्तेन पराजितेनाभ्युपगमः क्रियते, यथा न सर्व मया सुन्दरं कृतं मिथ्यादुष्कृतं ममेति तदा तस्यैवमभ्युपगमे इच्छया करोतु मा वा तदुत्पादितसचित्ताद्यपहरणमिति ।। साम्प्रतमेतदेव गाथाद्वयोक्तं व्याख्यानयति-

[भा.२१४७] अहिज्जमाणे उ सचित्तं, उप्पन्नं तु जया भवे ।
जोगो निक्खिपत्तं भंते, कज्जं मे किंचि बेति उ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अधीयाने अधीयानस्य सतो यदा यदा सचित्तमुत्पन्नं भवति, तदा तदा गुरुसमीपं गत्वा ब्रूते,- भदन्त मम किञ्चित्कार्यप्रयोजनमस्ति भो निक्षिप्यतां योग इति । अधुना बहिया य अनापुच्छा इति व्याख्यानयति-

[भा.२१४८] बहियाय अनापुच्छा, उब्भामे लभिय सेहमादि तु ।
नेइ सयं पेसति वा, आसन्नठियाण उ गुरुणं ।।

वृ- बहिरुद्भामे उद्भामकाभिक्षायां गतः शैक्षकादि लब्ध्वा यस्य सकाशेऽधीते तमनापृच्छय आसन्नस्थितानामनन्तरक्षेत्रस्थितानां गुरुणां निजाचार्याणां स्वयं नयति, अन्यैर्वा स्वगुरुकुलसक्तैः प्रेषयति । विहिए आपुच्छणाए मायाए इति व्याख्यानार्थमाह—

[भा.२१४९] अहवुप्पन्ने सचित्तए मा मे एतअंच्छिती ।
मायाए आपुच्छइ नायविहिं गंतु मिच्छामि ।।

वृ- अथवेति मायायाः प्रकारान्तरोपदर्शने उत्पन्ने सचित्तादिके चिन्तयति मा मे ममेदं सचित्तादिकमुत्पन्नमेतैगुरुभिरंच्छिती इति अपह्रियतामिति मायया आपृच्छति ज्ञातिविधिस्वजन-वर्गं वन्दापयितुं गन्तुमिच्छामि ।

[भा.२१५०] पव्वावेउं तहियं नालमनालेय पत्थवे गुरुणो ।
आगंतुं च निवेयइ लद्धं मे नालवद्धंति ।।

वृ- तत्र गत्वा नालबन्धान् नालसम्बन्धान् अनालबद्धान्वा प्रव्राज्य गुरोः स्वाचार्यस्य प्रेषयति प्रेष्य च पुनरध्यापयितुः समीपे समागच्छति । समागत्य च निवेदयति । यथा मया लब्धा नालवद्धा इति तत्र प्रेषिताः ।

[भा.२१५१] ण्हाणादिसु इहरा वा दट्ठुं पुच्छा कया सि पव्वइया ।
अमुएण अमुयकाले इह पेसविया नीया वा वि ।।

वृ- ये ते त्रिभिः प्रकारैः अपहृताः शिष्यास्तान् जिनस्नानादिषु समवसरणे इतरथा अन्यत्र वा मिलितान् दृष्ट्वा आचार्येण पृच्छा कृता यथा कदा कथं वा प्रव्रजिता अभवन् ततस्ते तत्क्षेत्रं च कालं च पुरुषं कथयन्ति । यथामुकेनामुके काले इह अस्मिन् क्षेत्रे प्रव्राजितास्तथा एवमन्यैः सह प्रेषताः स्वयं वा तत्र नीता एवं निवेदिते व्यवहारो जातस्तस्मिंश्च व्यवहारे स पराजितस्तत आचार्येण यत्कर्तव्यं तदाह-

[भा.२१५२] सो उ पसंग नवत्था निवारणठाए हु अन्नो वि ।
काहिति एवं हो, गुरुयं आरोवणं देइ ।।

वृ- स आचार्यो मा एवं भूत्वाऽन्योऽप्येवं कार्षीदिति प्रसङ्गानवस्थानिवारणार्थं गुरुकमारोपणं मासगुरुप्रभृतिकं पूर्वोक्तं ददाति ।। अधुना अब्भुवगमे तस्स इच्छाए इति व्याख्यानयति-

[भा.२१५३] अब्भुवगयस्स सम्मं, तस्सं उ पणिवइय वच्छलो कोइ ।
वियरति तेच्चिय सेहे, एसेव य वत्थपत्तादी ।।

वृ- सत्यं मयाऽसुन्दरं कृतं तस्मान्मिथ्या मे दुष्कृतमिति सम्यगभ्युपगतस्य प्रतिपन्नस्य कोऽप्या-चार्यः प्रणिपतितवत्सलो ये शैक्षास्तेन दीक्षितास्तानेव वितरति प्रयच्छति । एवमेव वस्त्रपात्रादिकमपि तदुत्पादितं तस्यैव प्रयच्छति । उपसंहारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२१५४] एवं तु अहिज्जंते ववहारो अभिहितो समासेन ।
अभिधारेंते इणमो ववहारविहिं पवक्खामि ।।

वृ- एवमनेन प्रकारेण तुर्भिन्नक्रमः स चाग्रे योक्ष्यते । अधीयाने व्यवहारं समासेन संक्षेपेणाभिहितः । इमं पुनर्व्यवहारविधिमभिधारयति प्रवक्ष्यामि प्रतिज्ञातमेव निर्वाहयति-

[भा.२१५५] जं होति नालबद्धं घाडियनातीव जोव तहल्लं ।
भोएहि तिविमग्गंतो, विधं सेसेसु आयरितो ।।

वृ- यद्भवति नालबद्धं, वल्लीबद्धमित्यर्थः । सा च वल्ली द्विधा-अनन्तरा सान्तरा च । तत्रानन्तरा इमे-षड् जनास्तद्यथा-माता पिता भ्राता भगिनी पुत्रो दुहिता च ।

[भा.२१५६] वल्लीसंतअनंतर अनंतरा छज्जणा इमे हुंति ।
मायापिया भाया भगिनीपुत्तो य धूया य ।।

वृ- सान्तरा पुनरियं मातुर्माता १ पिता २ भ्राता ३ भगिनी च ४ तथा पितुः पिता १ माता २ भ्राता ३ भगिनी ४ च । तथा भ्रातुरपत्यं भ्रात्रीयो भ्रात्रीया वा, भगिन्या वा अपत्यं भागिनेयो भागिनेयी वा, पुत्रस्यापत्यं पौत्रः पौत्री वा, दुहितुरपत्यं दौहित्रो दौहित्री वा । उक्तं च--

माउम्मायाय पिया भाया भगिणीएय एव पिउणोपि ।
भाउ भगिणीए वच्चा, धूया पुत्ताण वि तहेव ।।

परंपरपल्लिया वा एसा । अन्येत्वाहुः-प्रपौत्रप्रपौत्री इत्यादिरपि परम्परवल्ली यावत्स्वाजन्य-स्वीकारः, घाडियनातीवत्ति यो वा घटितज्ञातिद्दष्टा भाषित इत्यर्थः यो वा तत्र नालबद्धे घटितज्ञातौ वा लाभः । एते ते अनन्तरोदिताश्चिहं विमार्गयन्तः सन्तोभिधारयन्तं यान्ति अभिधारयत आभाव्या भवन्ति शेषेषु पुनरनभिधारयत्स्वाचार्यः श्रुतगुरुस्वामी भवति । शेषा अनभिधारयन्तः श्रुतगुरोराभाव्या भवन्तित्यर्थः । उक्तं च--

जइते अभिधारयंती पडिच्छंते अपडिच्छगस्सेव ।
अह नो अभिधारंती सुयगुरुणो तो उ आभव्वा ।।

इयमत्र भावना-येनालबद्धा एव घटितज्ञातयो ये वा तैर्दीक्षितास्तैः सह सङ्केतःपुर्व कृतो यथा यूयममुकस्याचार्यस्य पार्श्वे व्रजताहं पुनः पश्चादागमिष्यामि । एवं संकेतं कृत्वा ते पूर्वमुपस्थापितास्ते चाभिधारयन्तो वर्तन्ते । यथाऽमुकोऽमुककाले समागमिष्यति । सोऽपि च पश्चादागतः सन् तथैव यदि निवेदयति चिह्नान्यपि च सर्वाण्यपिमिलन्ति तदा पूर्वमुपस्थापितात्तस्य सर्वे । उक्तं च-

संगारो पुव्वकतो, पच्छा पाडिछओ उ सो जातो ।
तेनं निवेदयव्वं उवठिया पुव्व सेहा से ।।

यदि पुनः कालतश्चिह्नैश्चविसंवादस्तदा गुरोराभाव्य इति, । एतदेव वैतत्येन व्याख्यानयन्नाह-

[भा.२१५७] उवसंपज्जे जत्थ उ, तत्थ पुठो भणातित्त ।
वयचिंधेहिं संगारं, वन्नसीएयनंतगं ।।

वृ- यत्रोपसम्पद्यते स पश्चात्तत्र तैः पृच्छयते, केन कारणेनत्वमागतोऽसि; 'स' प्रहा-सूत्रार्थानामर्थायोपसम्पत्तुमेवमुक्त्वा तेन सद्भावः कथनीयो यथा उपसम्पद्ये इति परिणामात् पूर्वकालमपि युष्माकं पार्श्वे ये नालबद्धा घटितज्ञातयस्तैदीक्षिता वा पूर्वमुपस्थितास्तेषां मया सङ्केतः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतो यथाहं पश्चात् शीते शीतकाले चशब्दादन्यस्मिन् वा काले उपसम्पत्स्ये । तेषां चैतावद्धय एवं भूतस्य शरीरस्य वर्ण इत्थंभूतं च शीतकालप्रायोग्यमनन्तकं वस्त्रमेवं वयसा चिह्नैश्च सङ्केतं स्पष्टयति । उक्तं च-

एवेइएहिं दिनेहिं तुज्झसगासं अवस्स एहामो ।
संगारो एव कातो चिंधानि य तेसि चिंधेइ ।।

अत्राभाव्यविधिमाह-

[भा.२१५८] नालबद्धाउ लब्भंते, जे य तमभिधारए ।
जे यावि चिंधकालेहिं संवयंति उवट्ठिया ।।

वृ- यदा तमुपसम्पत्स्यमानमभिधारयन्ति नालबद्धाः पूर्वोपस्थिता यथासोऽत्र सत्वरमुपसम्पत्स्यते, तदा ते नालबद्धास्तेन लभ्यन्ते, ये चापि घटितज्ञातयो नालबद्धादिदीक्षिताश्चिह्नैः कालेन च तेऽपि तस्याभवन्ति, विसंवदन्तस्तुगुरोरथ चिह्नैः संवादोऽस्ति, न कालतस्तथा हि यस्मिन् काले पूर्वमुपस्थिताः कथिता न ते तस्मिन् काले आयाताः, किन्तु कालान्तरे, सोऽपि च सङ्केतदिवसैर्नायातस्ततः स ते चापृच्छ्यन्ते । यत्र यदि केनापि कारणेन ग्लानत्वादिना स ते वा नायातास्तदास्ति तत्वतः कालसंवाद इति ते तस्याभाव्याः । एतदेवाह-

[भा.२१५९] अन्नकाले वि आयाया, कारणेण उ केणवि ।
ते वि तस्साभवंती उ विवरीयायरियस्स उ ।।

वृ- ये कारणेन ग्लानत्वादिना केनचित्पूर्वमुपस्थिता अन्यकालेऽपि यस्तेनोपसम्पद्यमानेन कालो निर्दिष्टस्तस्मादन्यस्मिन्नपि काल आयातास्तेऽपि तस्याभवन्ति, विपरीतास्तु कारणमन्तरेण कालविसंवादिन आचार्यस्याभाव्याः । उपलक्षणमेतत् । सोऽपि यदि कारणेन केनचिन्निर्दिष्टकालादन्यस्मिन् काले समायातस्तथापि तस्याभवन्ति विपरीतास्तु कारणमन्तरेणोपसम्पद्यमानविसंवादभाज आचार्यस्याभाव्याः ।

[भा.२१६०] विप्परिणयंमि भावे जइ भावो सिं पुनो वि उप्पन्नो ।
ते होंतायरियस्स उ अहिज्जमाणे य जो लाभो ।।

वृ- सङ्केतकारणादनन्तरं यदि तेषां पूर्वमुपस्थितानां भावो विपरिणतो यथा नामुकस्य पार्श्वे उपसम्पत्तव्यं तस्मिन् विपरिणते भावे पश्चात्पुनरपि केनापि कारणेन उपसम्पदनाभिप्राय उत्पन्नस्तदा ते पूर्वमुपस्थिता भवन्त्याचार्यस्य अधीयानेषु तेषु गाथायामेकवचनं प्रकृतत्वात्, प्राकृते हि वचनव्यत्ययोऽप्यस्ति । यो लाभः सोऽप्याचार्यस्य उपलक्षणव्याख्यानादेतदपि द्रष्टव्यं । सङ्केतकरणादूर्ध्वं यदि तस्य पश्चादु पसम्पद्यमानस्य भावो विपरिणतो पश्चात्पुनरपि कालान्तरेण जातस्तदा ते पूर्वोपस्थिता गुरोराभाव्या यश्च तेषां लाभः सोऽपि गुरुस्तथा च पश्चादुपसम्पद्यमानमधिकृत्य पञ्चकल्पेऽभिहितम् ।

कालेन य चिंधेहिं य, अविसंवादी हि तस्स गुरुणिहरा ।
कालंमि विसंवदिए, पुच्छिज्जइ किंतु आतोसि ।।
संगारय दिवसेहिं, जइ गेलन्नादि दीवए तो उ ।
तस्सेव व अहभावो विपरिणतो पच्छ पुनो जातो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो होइ गुरुस्सेव उ एवं सुयसंपदाए उ । जे यावि वत्थपायादी चिंधेहि संवयंति उ ।।
आ भवंती उ ते तस्सा विवरीयायरियस्स उ ।।

यान्यपि च वस्त्रपात्रादि चिह्नैः संवदन्ति यथाऽमुकस्य पार्श्वेऽमुकमीदृशाकृतिवस्त्रं पात्रं वा यत्तन्मदीयमित्यादि तान्यपि गाथायां पुस्त्वं प्राकृतत्वात् । तस्यां भवन्ति विपरीतानि तु चिह्नविसंवादभाञ्जि आचार्यस्य ।।

[भा.२१६१] आभवंताहिगारे उ वट्टंते तप्पसंगया ।
आभवंता इमे अन्ने सुहसीलादि आहिया ।।

वृ- आभवदधिकारे वर्तमाने तत्प्रसङ्गादाभवदधिकारप्रसङ्गादिमे वक्ष्यमाणा इमे आभवन्तः सुखशीलादयः सुखशीलादिप्रयुक्ता आख्याताः तानेव द्वारगाथया संगृह्णन आह–

[भा.२१६२] सहसीलनुकंपायाट्ठिए य संबंधि खमगगेलस्य ।
सचित्ते स सिहाओ पकट्टए धारए दिसा उ ।।

वृ- सुखशीलेन भावप्रधानोऽयं निर्देशः सुखशीलतयाऽनुकम्पया आत्मस्थितस्य सम्बन्धिनः स्वज्ञातेः क्षपकस्य ग्लानस्य वा ये प्रेषिता य श्च सचित्तेष्वपि अशिखाकोऽन्यस्य प्रेषित एतान् स्वकुलसम्बन्धी स्वगणसम्बन्धी वा प्रकर्षयति आकर्षयतीत्यर्थः । धारयति च दिशा वात्मीये इत्येषद्वारगाथासंक्षेपार्थः ।साम्प्रतमेनामेव विवरीषुः प्रथमतः सुखशीलद्वारमाह- -

[भा.२१६३] सुहसीलयाए पेसेइ कोइ दुक्खं खु सारवेउं जे ।
देइ व आयट्ठीणं सुहसीलो दुठसीलोत्ति ।।

वृ- दुःखं साधून् सारयितुमिति मन्यमानः कोऽपि सुखशीलतया कमपि साधुमन्यस्य प्रेषयति यदि वा कोऽपि सुखशील आत्मार्थिनामात्माश्रितानां दुःखशीलोऽयमिति प्रकाश्य ददाति ।

[भा.२१६४] तणुगंपि नेच्छए दुक्खं सुहमाकंखए सया ।
सुहसीलत्तए वावी, सायागारवनिस्सितो ।।

वृ- तनुकमपि स्तोकमपि नेच्छत्यात्मनो दुःखं किन्तु केवलं सदा सुखमाकांक्षति । ततः सुखशीलतया सातगौरवनिश्रितः स्वयं साधूनादत्ते सर्वे ते भवन्त्याचार्यस्याभाव्याः । गतं सुखशीलद्वारं ।

[भा.२१६५] एमेव असहायस्स देति कोइ अनुकंपयाए उ ।
नेच्छइ परमायट्ठी गच्छा निग्गंतु कामो वा ।।

[भा.२१६६] पेसये सो उ अन्नत्थ सिणेहा नयगस्स वा ।
खमए वेज्जवच्चठा देज्ज वा तहि कोइ तु ।।

वृ- एवमेव स्वसबन्धित्वादिकारणव्यतिरेकेणापि असहायस्य सतः कोऽप्यनुकम्पया ददाति । गतमनुकंपाद्वारमात्मस्थितद्वारमाह- - आत्मार्थी आत्माश्रितार्थी सन् परं नेच्छति ततः कमप्यात्मस्थितं करोति यदि वा गच्छन्निर्गन्तुकामः स आत्मार्थी अन्यत्र यस्य यास्यति तत्र कमपि साधुं प्रेषयति । गतमात्मास्थितद्वारं ।सम्बन्धिद्वारमाह-स्नेहात् ज्ञातस्य वा स्वजनस्य सोऽन्यत्र प्रेषयति । क्षपकद्वारमाह-तत्रान्यत्र वा प्रसिद्धक्षपके कोऽपि वैयावृत्त्यार्थं कमपि साधुं दद्यात्सम्प्रति ग्लानद्वारं सशिखाकद्वारं चाह-

[भा.२१६७] पेसेति गिलणस्स वा अहव गिलाणे सयं आचायंतो ।
पेसंतस्स असिहो ससिहो पुन पेसितो जस्स ।।

वृ- ग्लानस्य वा कोऽपि वैयावृत्त्यकरणाय प्रेषयति साधुं अथवा स्वयं ग्लानः सन् न शक्नुवत्कमपि शिष्यं करोति, सर्वेऽप्येते आचार्यस्याभाव्याः तथा यदि सशिखाकः परस्मै प्रेष्यते तर्हि स यस्य प्रेषितस्यस्यैवाभवति । अथाशिखाकः परस्मै प्रेरितस्तर्हि स प्रेषयितुरेवाभाव्यो न परस्य तथा चाह पेसंतस्स उ असिहो ससिहो पुन पेसितो जस्स । अत्र परः प्रश्नमाह–

[भा.२१६८] चोदेती कप्पंमी पुव्वं भणियं ति पेसितो जस्स ।
ससिहो वा असिहो वा असंथरे सो नु तस्सेव ।।

वृ- चोदयति प्रश्नं करोति ननु पूर्वकल्पे भणितं यस्य सशिखो वाऽशिखो वा प्रेषितः स तस्यैवासंस्तरणे सति भवति । ततः कथम त्राशिखाकः प्रेषयितुराभाव्योऽभिहित इति अत्रोत्तरमाह–

[भा.२१६९] भन्नइ पुव्वुत्तातो पच्छा वृत्तो विही भवे बलवं ।
कामं कप्पे भिहियं इह असिहं दाउ न लभति उ ।।

वृ- भण्यते अत्रोत्तरं दीयते पूर्वोत्काद्विधिः पश्चादुक्तो विधिर्बलवान् भवति ततो यद्यपि कामं कल्पेऽभिहितं तथापीहाशिखं दातुं न लभते । अन्यच्च–

[भा.२१७०] संविग्गाण विही एसो असंविग्गे न दिज्जए ।
कुलिव्वो वा गणिव्वो वा दिन्नं पि तं तु कठए ।।

वृ- एष दानविधिः संविग्नानां भणितो असंविग्ने असंविग्नस्य पुनः सर्वथा न दीयते न दातव्यः, । अथ कथमपि केनपि दत्तो भवतितर्हि तं दत्तमपि कुलसत्को वा गणसत्को वा कर्षयति ।।

[भा.२१७१] खित्तातीआउरे भीते अदिसत्थीव जं दए ।
सचित्तादि कुलादीओ भुज्जो तं परिकड्ढए ।।

वृ- क्षिप्रादिरादिशब्दात् हृस्तयक्षाविष्टादि परिग्रहः । आतुरो मरणचिह्नान्युपलभ्यात्याकुलो भीतः किमपि मे राजप्रद्विष्टादिकं करिष्यति न विद्म इति भयाकुलोऽअदिसत्थी वाधिकृतां दिशं मोक्षकामो यद्ददति परस्मै सचित्तादिकं तद्भूयः कुलादिरादिशब्दात् गणपरिग्रहः परिकर्षयति तदेतत् प्रतीच्छकानधिकृत्योक्तमधुना शिष्यानधिकृत्याह–

[भा.२१७२] नालबद्धे अनाले वा सीसंभि उ नत्थि मग्गणा ।
दोक्खरक्खरदिठंता, सव्वं आयरियस्स उ ।।

वृ- शिष्ये स्वदीक्षितेऽयं नालबद्धोऽयमनालबद्ध इति विषयविभागेन नास्तिमार्गणा किन्तु यत्ते शिष्या लभन्ते सचित्तादि तत्सर्वमाचायस्याभवति, केन दृष्टान्तेनेत्याह-द्व्यक्षरदृष्टान्तेन तद्व्यक्षरो दासः खरो गर्दभस्तद्दृष्टान्तात् दासेन मे खरः क्रीतो दासोऽपि मे इत्येवं लक्षणात् ।।

मू. (११८) *दो साहम्मिया एगतो विहरंति, तं जहा-सेहो रायनिए य तत्थ सेहतराए पलिच्छन्ने, रायनीए अपलिच्छन्ने सेहतराएणं राइनीए उवसंपज्जियव्वे, भिक्खोववायं च दलयइ कप्पागं ।।*

[भा.२१७३] चारियसुत्ते भिक्खू थेरो वि य अहिकतो इह तेसिं ।
दोण्ह वि विहरंतानं का मेरा लेसतो जोगो ।।

वृ- चरिकासूत्रे प्राक् भिक्षुः स्थविरश्चाधिकृतस्तत इहास्मिन् सूत्रे तयोर्द्वयोर्विहरतोः का मर्यादा व्यवस्थितिरित्यभिधीयते, एष लेशतः पूर्वसूत्रेण सहास्स सूत्रस्य योगः सम्बन्धः पुनः प्रकारान्तरेणाह–

[भा.२१७४] साहम्मियतणं वा अनुयत्तित्ति होति मे विसाहम्मी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवसंपयावहगया इहइं पुवसंपया तेसिं ।।

वृ- बहवे साहम्मिया इत्यत सूत्रात्साधर्मिकत्वमनुवर्तते वाशब्दः सम्बन्धस्य प्रकारान्तरतोपदर्शनार्थः इमावपि चाधिकृतमूत्रोपात्तौ शैक्षरत्नाधिको साधर्मिकौ ततः साधर्मिकप्रस्तावादधिकृतसूत्रोपनिपातः तृतीयप्रकारः । भिक्खूगणातो अवकम्म अन्नंगणं उवसंपज्जित्ताणं विहरेज्जा इत्यत उपसम्पत्प्रकृता वाशब्दः प्रागुवदिहाप्यस्मिन् सूत्रे तयोः शैक्षरत्नाधिकयोरुपसम्पदभिधीयते इत्यधिकृतसूत्रारंभ इत्येष सूत्रसम्धन्धः । अस्य व्याख्या द्वौ साधर्मिकौ समानगुरुकुलावेकतः सह तौ विहरतस्यद्यथा-शैक्षो रात्निकश्च तत्र यः शैक्षः सपरिच्छन्नः परिवारोपेतः, रात्निको रत्नाधिकोऽपरिच्छिन्नः परिवाररहित इत्यर्थः तत्र शैक्षतरकेण रत्नाधिक उपसम्पत्तव्यस्तथा शैक्षतरको रत्नाधिकस्य भिक्षामुपपातं च विनयादिकं च कल्पाकं कल्पनीयं ददाति एष सूत्रसंक्षेपार्थः । अधुना भाष्यविस्तरः –

[भा.२१७५] सेहम्मि पलिच्छन्ने उवसंपय दोण्हवी पलिच्छातो ।
वोवत्थे मासलहुओ कारण असई सभावो वा ।।

वृ- तौ द्वावपि जनौ सहाध्यायिनौ सब्रह्मचारिणौ । तत्र यः शैक्षतरकः सपरिच्छन्नो द्रव्यपरिच्छदोपेतः परिवारसहित इत्यर्थः । भावपरिच्छेदेन पुनर्द्वयोरपि परिच्छेदोऽस्ति । तत्र शैक्षे द्रव्यतः परिच्छन्ने सति तेन रत्नाधिकस्योपसम्पत् दातव्या । ततो जघन्यतः संघाटो रत्नाधिकस्स देव उत्कर्षतो बहवोऽपि दातव्याः तथा शैक्षकेण रत्नाधिकस्य पुरत आलोचनीयं रत्नाधिकेन शैक्षकस्य पुरतोऽन्यथा वोवत्थे विपर्यासे उभयोरपि प्रायश्चित्तं मासलघु । तथाकारेण ग्लानादिलक्षणे व्यापृततया द्वावेव तौ जनावित्यसति सहायस्याभावे न दद्यादपि सहायं, स्वभावो वा तस्यात्मीयकरणादिलक्षणस्ततो न ददाति सहायं, किन्त्वौचित्येन तस्य कृत्यं कारयति, । एष द्वारगाथा संक्षेपार्थः साम्प्रतमेनामेव विवरीषुः प्रथमतः पूर्वार्धं–

[भा.२१७६] सज्झंतिवासिणो दोवि भावेन नियमसो छन्नो ।
रायणिए उवसंपय सेहतरगेन कायव्वो ।।

वृ- तौ द्वावपि सहाध्यायिनावेकस्य गुरोरन्तेवासिनौ च द्वावपि भावेन ज्ञानादिना नियमसो नियमेनच्छन्नौ ज्ञानादिरूपभावपरिवारोपेतावित्यर्थः । द्रव्यपरिच्छेदेन पुनः शैक्षतरक एवोपेतस्तत्र शैक्षतरकेण रात्निको रत्नाधिकस्योपसम्पत्कर्त्तव्या । वोवत्थे मासलहुतो इत्यस्य व्याख्यानार्थमाह–

[भा.२१७७] आलोइयंमि सेहेन तस्स वियडे पहराइनितो ।
इति अकारणंमि लहुगो अवरोपरगव्वतो लहुगा ।।

वृ- प्रथमतः शैक्षतरकेण रत्नाधिकस्य पुरत आलोचनीयं, तेनालोचितः पश्चाद्रत्नाधिकस्तस्य शैक्षतरस्य पुरतो विकटयत्यालोचयति, एतच्चेतौ न कुरुतस्तत इति एतस्याकरणे द्वयोरपि प्रत्येकं लघुको मासः प्रायश्चित्तं, अवरोपरगव्वतो लहुगा इति यदि शैक्षतरको द्रव्यपरिच्छेदेनाहं परिच्छन्न इति गर्वतो रत्नाधिकस्य पुरतो नालोचयति तदा तस्यापि प्रायश्चित्तं चत्वारो लघुकाः एतदेवोपदेशद्वारेण स्पष्टयति ।

[भा.२१७८] एगस्स उ परीवारो बीइए रायनियत्तवादो य ।
इइ गव्वो न कायव्वो दायव्वो चेव संघाडो ।।

वृ- एकस्य परिवारोऽस्ति द्वितीये रात्निकत्ववादः, रत्नाधिकोऽयमिति प्रवाद इति एवं रूपो गर्वो द्वाभ्यामपि न कर्तव्यः । किन्तु परस्परमालोचयितव्यमन्यथा चतुर्लघुकप्रायश्चित्तापत्तेर्दातव्यश्च शैक्षतरकेण जघन्यतोऽपि रत्नाधिकस्य सङ्घाटः । सम्प्रति भिक्खोवायं च दलाति कप्पागमिति–

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

[भा.२१७९] पेहाभिक्ख किती उ करेंति सो आचिते पवाएति ।
न पहुव्वंत दोण्हवि गीलाणमादीसु च न देज्जा ।।

वृ- शैक्षतरस्य शिष्या रत्नाकिस्य सम्बन्धिनो वस्त्रादेः प्रेक्षां प्रतिलेखनां कुर्वन्ति, । तथा तद्योग्यांभिक्षामानयन्ति । कृतिकर्मविनयो विश्रामणा च तत् कुर्वन्ति, किमुक्तं भवति यदाज्ञापयति ततूकुर्वन्ति वाचनादिपरिश्रान्तस्य च विश्रमणमिति स चापि रत्नाधिकस्तान् प्रवाचयति सूत्रं पाठयत्यर्थं च श्रावयतीत्यर्थः ।कारणे असती इत्यस्य व्याख्यानमाह-न पहुप्पंते इत्यादि ते शैक्षतरशिष्या ग्लानादिषु प्रयोजनेषु व्यापृतास्ततो न प्रभवन्ति प्रपारयन्तिसाधव इति सहायं न दद्यात् । यदि वा द्वावेन तौ जनो ततः किं दीयतामिति न दद्यात् । अधुना सभावो वा इत्यस्य व्याख्यानमाह—

[भा.२१८०] अत्तीकरेज्जा खलु जोवि दिन्ने, एसोवि मज्झंति महंतमानी ।
न तस्स ते देइ बहिं तु नेनुं तत्थेव किच्चं पकरिंति जं से ।।

वृ- यो वितीर्णान् साधूनात्मीकुर्यात्, यश्चैषोऽपि शिक्षाधिपतिः शैक्षतरको ममेति महामानी, तस्य तान् साधून् बहिस्तस्मात् स्थानादन्यत्र विहारक्रमेण नेतुं न ददाति, । किन्तु यत्से तस्य कृत्यं करणीयं तत्रैव स्थितस्य सतः कुर्वन्ति अथवा—

[भा.२१८१] वारएण से देइ न य दावेइ वायणं ।
तहवि भेदमिठंत अविकारी उ कारए ।।

वृ- वारेण वारेण तस्य शुश्रूणकमेकैकं साधुं नियुङ्क्ते न च तस्मात्साधूनां वाचनां दापयति, मा स गणभेदं कार्षीरिति हेतोः । अथैवमपि दुस्वभावतया गणभेदं करोति तत आह—तथापिएवमपि क्रियमाणे गणभेदं कर्तुमिच्छति योऽविकारी दुर्भेदः साधु स्तेन तस्य कृत्यं कारयति—

मू. (११९) *दोसाहम्मिया एगयओ विहरंति तंजहा से हे य राइनीए य । तत्थराइनीए परिच्छन्ने, सेहतराए अपलिच्छन्ने इच्छा रायनीए सेहतरागंउवसं पज्जेज्जा, इच्छा नो उवसंपज्जेज्जा, इच्छा भिक्खोववायं दलयइ कप्पागं, इच्छा नो दलयइ कप्पागं ।।*

वृ- द्वौ साधर्मिकावेकतःसंहतौ विहरतस्तद्यथा शैक्षो रत्नाधिकश्च तत रात्निकः परिच्छन्नः परिवारोपेत इत्यर्थः ।शैक्षतरकोऽपरिच्छन्नः परिवाररहितस्तत्र रात्निके रत्नाधिकस्येच्छा यदि प्रतिभासते शैक्षतरकमुपसम्पद्यते । अथ नेच्छा न प्रतिभासते तर्हि नोपसम्पद्यते भिक्षामुपपातं च कल्पं यदीच्छा तर्हि ददाति । अथादातुमिच्छा तर्हि न ददाति । एष सूत्रसंक्षेपार्थः । अधुना भाष्यविस्तरः—

[भा.२१८२] रायनिय परिच्छन्ने उवसंप पलिच्छओ य इच्छाए ।
सुत्तत्थ कारणे पुन पलिच्छयं देंति आयरिया ।।

वृ- रात्निके रत्नाधिके द्रव्यतः परिच्छन्ने परिवारोपेते सति तेन शैक्षतरकस्य उपसम्पत् परिच्छदश्च इच्छया दातव्यः, । इयमत्र भावना-स यदि शैक्षतरकोऽवमरत्नाधिकस्तुल्यश्रुतो गुरुरत्नाधिकेन सह ततः स रत्नाधिकश्चिन्तयति । मा नूनमेतस्य भिक्षाहिण्डनव्याक्षेपेण च सूत्रार्था नश्येयुस्ततः संघाटं ददाति, । अथवा मा एष समानगुरुकुलवासी सहाध्यायी द्रव्ये परिच्छदेनापरिच्छदो भूयात्सहाध्यायान्ते वासिस्नेहतः संघाटं ददात्यालोचनां प्रयच्छति । अल्पश्रुतस्य तु परिच्छदमुपसम्पदं वा ददातीति । अथ स शैक्षतरको रत्नाधिकाद्बहुश्रुतस्तदा नियमत उपसम्पत्तव्यः, परिच्छदश्च तस्य दातव्यस्तथा चाह-सूत्रार्थकारणात्सूत्रार्थं गृहीतुकामाः पुनराचार्या उपसम्पद्यन्ते परिच्छदं च ददाति । एतदेव स्पष्टयति—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२१८३] सुत्तत्थं जइ गेण्हइ तो से देइ परिच्छदं ।
गहिएवि देइ संघाडे सा से नासेइ तं सुयं ।।

वृ- यदि स रत्नाधिकस्ततः सूत्रार्थं गृह्णाति ततः से तस्य ददाति परिच्छदं परिवारं गृहीतेऽपि सूत्रार्थे ददाति सङ्घाटं कस्मादित्याह मा से से तस्य भिक्षाटनव्याक्षेपतः प्रतिलेखनाव्याक्षेपतश्च तत् श्रुतं नश्येदिति हेतोः अबहुश्रुतादौ तु न ददाति इत्येतद्भावयति-

[भा.२१८४] अबहुस्सुते न देंती निरुवहते तरुणए य संघाडं ।
घेतुण जाव वच्चइ तत्थ य गोणीए दिठंतो ।।

वृ- अबहुश्रुतोऽल्पश्रुतो निरुपहतपञ्चेन्द्रियस्तरुणकश्च तस्मिन् सत्स्वपि साधुषु संघाटं न ददाति सहायान्न ददातीति भावः यो वा गीतार्थोपिसन् प्रदत्तान् सहायान्विपरिणम्य गृहीत्वा व्रजति, तस्यापि सत्स्वपि साधुषु सहायान्न ददाति तथा च तत्र दुष्टशीलतया गवा दृष्टान्तस्तमेव भावयति-

[भा.२१८५] साडगबद्धा गोणी जह तं घेत्तुं पलाति दुस्सीलो ।
इय विप्परिणामेंते न देज्ज संतेवि हु सहाए ।।

वृ- यथा कस्यापि गौः पलायिता ततः कथमपि लब्ध्वा सती तेन शाटकेन बद्धा यथा सा शाटकबद्धा दुःशीला गौस्तं शाटकं गृहीत्वा पलायते इति । एवममुना प्रकारेण यो विपरिणामयति सहायान् तस्मिन् विपरिणामयति सतोऽपि सहायान्न दद्यात् ।।

मू. (१२०) *दोभिक्खुणो एगयओ विहरंति नोण्हं कप्पइ अन्नमन्नस्स उवसंपज्जिताणं विहरित्तए, कप्पइण्हं अहाराइणियाए अन्नमन्न उवसंपज्जिताणं विहरत्तिए ।।*

मू. (१२१) *दोगणावच्छेइया....(जाव).... विहरित्तए ।*

मू. (१२२) *दोआयरिउवज्झाया... (जाव) विहरित्तए ।*

मू. (१२३) *बहवे भिक्खुणो... (जाव)....विहरित्तए ।*

मू. (१२४) *बहवेगणावच्छेइया (जाव) विहरित्तए ।*

मू. (१२५) *बहवेआयरियउवज्झाया (जाव) विहरित्तए ।*

मू. (१२६) *बहवे भिक्खुणो बहवे गणावच्छेइया बहवे आयरिय उवज्झाया (जाव) विहरित्तए ।*

वृ- 'दो भिक्खुणो एगतो विहरंति' इत्यादि सूत्र सप्तकं । अस्य सम्बन्धमाह-

[भा.२१८६] संखहिगारा तुल्लाधिगारिया एस लेसतो जोगो ।
आयरियस्स व सिस्सो भिक्खु अभिक्खु अह तु भिक्खू ।।

वृ- अनन्तरसूत्रे दोसाहम्मिया इत्यादिलक्षणे द्विकलक्षणा संख्याधिकृता । अत्रापि सैव दो भिक्खुणो इत्यादि वचनात्ततः संख्याधिकारात्तुल्याधिकारिता पूर्वसूत्रे रत्नाधिकपदेनाचार्य उपात्त आचार्यस्य च शिष्यो द्विधा भिक्षुरभिक्षुश्च । तत्र भिक्षुः प्रतीतोऽभिक्षुर्गणावच्छेदक उपाध्याय आचार्यो वा तत् आचार्यसूत्रात्प्रागुक्तादथानन्तरं भिक्षुसूत्रमुक्तं, शेषसूत्रसम्बन्धप्रतिपादनार्थमाह-

[भा.२१८७] एमेव सेसएसु वि गुणपरिवड्ढीए ठाणलंभो व ।
दुप्पभिइ खलु संख्या बहुआ पिंडो उ तेन परं ।।

वृ- एवमेव पूर्वोक्तप्रकारेणैव शेषयोरपि गणावच्छेदकाचार्यसूत्रयोः सम्बन्धः । तथाह्याचार्यस्य शिष्यो भिक्षुरभिक्षुश्च तत्र भिक्षुसूत्रमुक्तम् । तदनन्तरमभिक्षोर्गणावच्छेदकस्याचार्यस्य च सूत्रे अथ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणपरिवृद्ध्या स्थानलाभो भवति । तथा हि भिक्षुर्गगुणाधिकत्वेन गणावच्छेदकस्थानं लभते । गणावच्छेदको गुणाधिकतया आचार्योपाध्यायस्थानमतो भिक्षुसूत्रानन्तरं क्रमेण गणावच्छेदकाचार्योपाध्यायसूत्रे, तथा द्विप्रभृतिका खलु संख्या बहुका भवति, । ततो द्विसंख्या सूत्रत्रयानन्तरं बहुसंख्यासूत्रतःयं बहूनां च परस्परमुपसम्पन्नानां पिण्डो भवति तेन बहुसंख्यासूत्रत्रयात्परं पिण्डः पिण्डसूत्रमूक्तमिति, एवमनेन सम्बन्धजातेनायातस्यास्य सूत्रसप्तकस्य व्याख्या-; द्वौ भिक्षू एकतः संहतौ विहरतो नोण्हमिति वाक्यालङ्कारे कल्पते अन्योन्यमुपसम्पद्य विहर्तुं, कल्पते ण्हमिति पूर्ववत् । यथा रत्नाधिकतयाऽन्योन्यमुपसम्पद्य विहर्तुमेव. गणावच्छेदकसूत्रमाचार्योपाध्यायसूत्रं च भावनीयमेवं बहुसंख्यासूत्रत्रयं पिण्डसूत्रं चेति सूत्रसंक्षेपार्थः । सम्प्रत्याद्यभिक्षुसूत्र व्याख्यानार्थ माह -

[भा.२१८८] संभोइयाण दोण्हं, खेत्तादिपेहकारण गयाणं ।
पंथे समागयाणं भिक्खूण इमा भवे मेरा ।।

वृ- द्वावाचार्यावन्यस्मिन्नन्यस्मिन् क्षेत्रे स्थितौ, तौ च परस्परं सांभोगिको तयोः सांभोगिकयोः द्वयोराचार्ययो र्भिक्षवस्ताभ्यां प्रेषिताः क्षेत्रादिप्रेक्षाकारणगताः क्षेत्रप्रत्युपेक्षणार्थमादिशब्दादुपधिमार्गणार्थं गतास्ते च तथा गच्छन्तः पथि समागताः परस्परं मिलितास्तेषां चैकेन पथा गन्तवोयमतस्तेषां क्षेत्रादिप्रेक्षाकारणगतानां पथि समागतानां भिक्षूणां या मर्यादा सामाचरी सा इयं वक्ष्यमाणा भवति–

[भा.२१८९] भिक्खुस्स मासियं खलु पलिच्छणाणं च सेसगाणं तु ।
चउलहुग ऊपलिच्छन्ने तम्हा उवसंपया तेसिं ।।

वृ- यौ द्वौ भिक्षुस्पर्धकपती तयोः शैक्षतरकेण रत्नाधिकस्य पुरतः आलोचयितव्यः तेनालोचिते पश्चात् रत्नाधिकेनाशैक्षतरकस्य पुरत एमवकरणे भिक्षोः शैक्षस्य रत्नाधिकस्य प्रायश्चितं खलु मासिकं मासलघु, पलिच्छन्नणं चेत्यादि । एतद्बहुसंख्याविशिष्टस्य भिक्षुसूत्रस्य व्याख्यानं, परिच्छन्नानां जघन्यतोऽप्यात्मतृतीयाणां शेषकाणां चात्मद्वितीयानां यथोक्तवेध्यकरणे प्रायश्चित्तं मासलघु, । तत्र हि यद्येकोऽपरिच्छन्नस्तर्हि तेनान्य आत्मद्वितीय आत्मतृतीयो वा उपसम्पत्तव्यो नो चेदुपसम्पद्यते तर्हि तस्मिन्नपरिच्छन्नेऽनुपसंपद्यमाने प्रायश्चित्तं चत्वारो-लघुकास्तं चोपसम्पद्यमानं यो नोपसम्पदा प्रतीच्छति, तस्य मासलघु, यत एवं तस्मात्परस्परमुपसम्पत्तेषां भवति कर्तव्या, । एनामेव निर्युक्तिगाथां भाष्यकृत् व्याचिख्यासुः प्रथमतो भिक्खुस्स मासियं खल्वित्येतद्व्याख्यनयति--

[भा.२१९०] दो भिक्खू अगीयत्था, सीया एक्को व होज्ज उ अगीतो ।
रइनिय पलिच्छन्ने पुव्वं इयरेसु लहुलहुगा ।।

वृ- द्वौ भिक्षू अगीतार्थौ यदि वा द्वावपि गीतौ गीतार्थो तयोः परस्परस्यालोचनमन्यथा प्रायश्चित्तं मासलघु, । अथवा एको गीतार्थ एकश्च भवत्यगीतार्थः । तत्र रत्नाधिकेन परिच्छन्ने भावपरिच्छेदोपेते गीतार्थे इत्यर्थः । पूर्वमालोचयितव्यं पश्चादितरेष्वगीतार्थेषु रत्नाधिकेन एवं चेत्ते न कुर्वते तर्हि रत्नाधिकं प्रायश्चित्तं मासलघु, । इतरेषां चत्वारो लघुकाः । एनमेव गाथां विवरीषुः प्रथमतो दो भिक्खू अगीयत्था सीया इत्येतद्विवृणोति ।

[भा.२१९१] दोसु अगीयत्थेसु अहवा गीतेसु सेहतरो पुव्विं ।
जइ नालोयइ लहुओ । न विगडे इयरोवि जइ पच्छा ।।

वृ- द्वयोर्भिक्ष्वोरगीतार्थयोर्मध्ये यदि शैक्षतरः पूर्वं स्वाधिकस्य पुरतो नालोचयति तदा तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायश्चित्तं लघुको मासः इतरोऽपि रत्नाधिकोऽपि यदि पश्चात्तस्य शैक्षतरस्य पुरतो न विकटयति, तदा तस्यापि प्रायश्चित्तं मासलघु, । अथ यदि द्वावप्यगीतार्थौ तदा परस्परस्य विहारालोचनैव केवला, नापराधलोचनापि, अथ द्वावपिमीतार्थौ तदा परस्परविहारलोचना अपराधलोचना च अथैको गीतार्थो गीतार्थोऽपरश्चागीतार्थ स्तत्रालोचनाविधिमाह–

[भा.२१९२] रायणिए गीयत्थे, राइणिए चेव वियडणा पुव्विं ।
देइ विहारवियडणं, पच्छा राइनितो सेहे ।।

वृ- यदि रत्नाधिको गीतार्थ इतरोऽगीतार्थस्तर्हि गीतार्थे रत्नाधिके सति रत्नाधिके एव पूर्वं शैक्षतरेण विहारविकटना अपराधविकटना च दातव्या, । ततः पश्चात् रत्नाधिकः शैक्षतरकस्य विहारविकटना ददाति । अथ शैक्षतरको गीतार्थो रत्नाधिकस्त्वगीतार्थस्तत्राह–

[भा.२१९३] सेहतरगे वि पुव्वं गीयत्थे दिज्जए पगासणा ।
पच्छा गीयत्थो वि हु, ददाति आलोयणमगीतो ।।

वृ- यदि गीतार्थः शैक्षतरकस्तर्हि तस्मिन गीतार्थे शैक्षतरकेऽपि पूर्वं रत्नाधिकेन प्रकाशना विहारविकटना अपराधविकटना चेत्यर्थः दीयते, पश्चात् गीतार्थोऽपि सन् सशैक्षतरको हु निश्चितमगीके रत्नाधिके आलोचनां विहारलोचनां ददाति । न त्वपराधलोचनां । कस्मादित्याह–

[भा.२१९४] अवराह विहारपगासणा उ दोन्नि भवंति गीयत्थे ।
अवराहपयं मुत्तुं, पगासणं होतु अगीयत्थे ।।

वृ- अपराधप्रकाशना विहारप्रकाशना च एते द्वे अपि प्रकाशने भवतो गीतार्थे, गीतार्थे पुनरपराधपदं मुक्त्वा शेषस्य विहारस्य प्रकाशनं भवति विहारालोचना भवति, । नापराधालोचनेति भावः, अगीतार्थतया तस्यापराधलोचनानर्हत्वात् । सम्प्रत्युपसंहारमाह–

[भा.२१९५] भिक्खुस्सेगस्स गयं पलिच्छन्नाणं इयाणि वोच्छमि ।
दव्वपलिच्छाएणं-जहन्नेण अप्पतइयाणं ।।

वृ- भिक्खुस्स मासिर्य खल्वित्यनेन पदेन यदेकस्य भिक्षो र्वक्तुमुपक्रान्तं तत् गतं परिसमाप्तमिदानीं द्रव्यपरिच्छदेन परिच्छन्नानां जघन्येनातमतृतीयानां यद्वक्तव्यं वद्वक्ष्यामि । तदेवाह–

[भा.२१९६] तेसिं गीयत्थाण, अगीतमिस्साण एस चेव विही ।
एत्तो सेसाणंपि य वुच्छामि विहिं जहाकमसो ।।

वृ- तेषां परिच्छदेन परिच्छन्नानां बहूनां सर्वेषा गीतार्थानामथवा अगीतार्थानां यदि वा मिश्राणां केषांचित् गीतार्थानां केषांचिदगीतार्थानामित्यर्थः । एष एवानन्तरोदित एकभिक्षुगत आचार्याणां आलोचनाविषयो विधिरवसातव्यो व्यतिरेके च प्रायश्चित्तमपि नथैव, । अंते ऊर्ध्वं शेषाणामपि विधिं यथाक्रमशो यथाक्रमेण वक्ष्यामि । तत्र शेषशद्ववाच्यानुपदर्शयति–

[भा.२१९७] सेसा तू भन्नंती अप्पबितिया उ जे तहिं केइ ।
गीयत्थमगीयत्थे मीसे य विही उ सो चेव ।।

वृ- शेषानाम ते भण्यन्ते-यत्र तेषां बहूनां भिक्षुणां मध्ये केचिदात्मद्वितीयास्तस्मिन् शेष गीतार्थे अगीतार्थे मिश्रे च स एव पूर्वोक्तो विधिरालोचनाविषयस्तद्व्यतिरेके प्रायश्चित्तविधिश्चावसातव्यः ।

[भा.२१९८] संजोगा उ च सद्देण, अहिगया जह य एग दो चेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगो जइ नवि दोण्हिं, उवगच्छे चउ लहुतो से ।।

वृ- परिच्छिन्नानां चेत्यत्र चशब्देन संयोगा अधिकृताः सूचिता इत्यर्थः । तानेवोपदर्शयति-यथा चेति भंगोपप्रदर्शने, एकत एको भिक्षुरपरतो द्वौ । भिक्षू । तत्रैकेनात्मद्वितीय उपसम्पत्तव्यो, यदि पुनरेको न द्वावुपगच्छति न उपसम्पद्यते तदा से तस्य प्रायश्चित्तं चत्वारो लघुकाः ।

[भा.२१९९] पच्छा इतरे एगं जइ नवि उवगच्छ मासियं लहुयं ।
जत्थवि एगो तिन्नी, न उवगमे तत्थवी लहुगा ।।

वृ- एकस्मिन्नुपसपन्ने पश्चादितरावप्युपसम्पद्येते, यदि पुनरेकं तावितरौ पश्चान्नोप्यच्छेतां तदा तयोर्मासिकं प्रायश्चित्तं लघु यत्राऽपि भङ्गे एकत एको परत्र त्रयस्तत्र यदि परस्परमुक्तप्रकारेण नोपगमस्तदा प्रायश्चित्तं लघुकाः, । किमुक्तं भवति । यद्येकस्त्रीन्नोपगच्छति तदा तस्य प्रायश्चित्तं चत्वारो लघुकास्ते यदुपगच्छन्तं पश्चादितरे त्रयो नोपगच्छन्ति तर्हि तेषं प्रायश्चित्तं लघुको मासः ।

[भा.२२००] एमेव अप्पवीतो अप्पतईयं तु जइ न उवगच्छे ।
इयरेसि मासठहुयं एवमगीए य गीए य ।।

वृ- एवमेव अनेनैवानन्तरोदितेन प्रकारेणात्मद्वितीय आत्मतृतीय यदि नोपगच्छति तदा तस्य प्रायश्चित्तं चतुर्लघु । इतरश्चेत्यभ्युपगच्छन्तं नोपगच्छेत्तदा तस्य मासिकं लघु इतरेषामेक आत्म-तृतीयोऽपर आत्मचतुर्थ इत्योस्मादीनां परस्परमनुपगमे प्रायश्चित्तं मासंलघु, । एवमुक्तप्रकारेणागीते अगीतार्थानां च द्रष्टव्यं मिश्रानधिकृत्याह—

[भा.२२०१] मीसाण एगो गीतो, होंति अगीया उ दोण्हि तिन्निवि वा ।
एवं उवसंपज्जे ते उ अगीया इहर मासो ।।

वृ- मिश्राणां मध्ये एक एकाकी गीतो गीतार्थोऽपरेतु द्वौ वा भवन्त्यगीता अगीतार्थाः । तत्र तेऽगीता एकमुपसम्पद्येरन् । इतरथा चेन्नोपसम्पद्यन्ते तर्हि तेषां प्रायश्चित्तं लघुको मासः ।

[भा.२२०२] सोवि य जइ नवि इयरे तस्स वि मासो उ एव सव्वत्थ ।
उवसंपया उ तेसिं, भणिया अन्नेण निस्साए ।।

वृ- सोऽपि चैको यदि तान् इतरानुपसम्पद्यमानान् नोपसम्पद्यते, तदा तस्यापि प्रयश्चित्तं मासो लघुरेवमेक आत्मद्वितीयो गीतार्थोऽपर आत्मतृतीय आत्मचतुर्थः इत्यादौ सर्वत्र भावनीयमे-वमन्योन्यनिश्रया प्राग् द्वारगायायां तेषामुपसम्पत् भणिता उद्दिष्टा ।।

[भा.२२०३] अन्नोन्ननिस्सियाणं अगीयाणंपि उग्गहो तेसिं ।
गीयपरिग्गहियाणं इच्छाए तेसिमो होइ ।।

वृ- अन्योन्यनिश्रितानां तेषामगीतानामपि गीतापरिगृहीतानामवग्रहो भवति । अवग्रहो नाम आभवनव्यवहारः । स च द्विधा-इच्छया सूत्रोक्तश्च । तत्रेच्छया तेषामयं वक्ष्यमाणो भवति । तमेवाह-

[भा.२२०४] इच्छिय पडिच्छियाएण । खेत्ते वसहीए दोण्हवी लाभो ।
अत्थंते न होइ उग्गहो, निक्कारण कारणे दोण्हं ।।

वृ- इच्छाया अवग्रहो नाम इच्छित प्रतीच्छितेन इच्छा संजाताऽस्योति इच्छित्तं, प्रतीच्छा सञ्जातास्येति प्रतीच्छित्तं, । इच्छित्तं च तत् प्रतीच्छितं च इच्छितप्रतीच्छितं वाचा आभवन-व्यवहारस्थापना यथा यत्पथि तन्यते तदस्माकं यत्ग्रामे तत् युष्माकं यदि वा यत्सचित्तं तदस्माकं, यदचित्तं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् युष्माकमथवा या स्त्री व्रतग्रहणार्थमुपतिष्ठति । सा युष्माकं पुरुषो अस्माकं, । यद्वा बालो युष्माकं वृद्धोऽस्माकमथ वाथः सार्थेन सह व्रजतां लाभः, सोऽस्माकमसार्थे युष्माकं, यदि वा योयल्लभते तत्तस्यैव एवंभूतेनेच्छितप्रतीच्छितेन य आभवनव्यवहारः स इच्छयाऽवग्रह एष च प्रायः पथि गच्छतां भवति, । स्थानप्राप्तानां तु सूत्रोक्त आभवनव्यवहारस्ततस्तमुपदर्शयति-समकालं क्षेत्रे प्राप्तानामक्षेत्रे वा वसतिं प्राप्तानां द्वयानामपि लाभः साधारणः । अथ न क्षेत्रमक्षेत्रे वा वसतिं समकालं प्राप्ताः किन्तु विषमकालं तत आह-अच्छंते न होति इत्यादि यदि निष्कारणं स्थिता इति पश्चात् प्राप्तास्तदा नास्ति तेषामवग्रहः, किन्तु पूर्वप्राप्तानामेव । अथ कारणेन केनापि ग्लानप्रतिजागरणादिना स्थितास्ततः पश्चात्प्राप्तास्तर्हि भवति द्वयेषामपि साधारणोऽवग्रहः । एतदेव स्पष्टतरमुपदर्शयति-

[भा.२२०५] समयपत्ताणं तु साहारणं तु दोण्हंपि होति तं खेत्तं ।
विसमं पत्ताणं पुन, इमा उ तहिं मग्गणा होइ ।।

वृ- समकमेककालं प्राप्तानां द्वयानामपि तत्क्षेत्रं भवति साधारणं विषमं विषमकालं प्राप्तानां पुनरियं तत्रक्षेत्रे मार्गणा भवति । तामेव कुर्वन्नाह-

[भा.२२०६] पडियरए व गिलाणं सयं गिलाणाउरे व मंदगती ।
अपत्तस्स वि एएहि, उग्गहो दप्पतो नत्थि ।।

वृ- प्रतिचरति वा प्रतिजागर्ति ग्लानं वा यदि वा स्वयं ग्लान आतुरो वा यदि वा स्वभावान्मन्दगतिरेतैः कारणैरप्राप्तस्यापि समकालं पश्चात्प्राप्तस्यावग्रहो भवति । दर्पतो निष्कारणं स्थितानां पुनरवग्रहो नास्ति ।

[भा.२२०७] एमेव गणावच्छे पलिछन्नाणं विसेसगाणं तु ।
पलिच्छन्ने ववहारो, दुविहो वायंतिउ नाम ।।

वृ- यथा भिक्षोरेकस्य बहूनां परिच्छन्नानां शेषकाणां चोक्तमेव अनेनैव प्रकारेण एकस्मिन् गणावच्छेदे बहूनां परिच्छन्नानां जघन्यतोऽप्यात्मतृतीयानां शेषाणां च कारणवशत परिच्छन्नानामुपलक्षणमेतत् । परस्परमुपसन्मन्नानां चाभवनव्यवहारो द्विधा भवति, सूत्रोक्तो वागन्तिकश्च वाचा अन्तपरिच्छेदो वागन्तस्तेन निवृत्तो वागन्तिकस्तत्र वागन्तिको नाम वक्ष्यमाणस्तमेवाह-

[भा.२२०८] पहगामे चित्तऽचित्तं, थीपुरिसं बालवुड्ढसत्थादी ।
इच्छाए वा देंती जो जं लाभे भवे वितितो ।।

वृ- यत्पथि मार्गे लभ्यं तदस्माकं । यत् ग्रामे तत् युष्माकं, । यदि वा यत्सचित्तं तत् युष्माकमचितमस्माकमथवा स्त्री युषामाकं पुरुषोऽस्माकम् । अथवा बालोऽस्माकं वृद्धो युष्माकं, । यदि वा सत्थादी इति सार्थे लभ्यं तत् युष्माकमसार्थे अस्माकमथवा इच्छया ददाति । कथमित्याह-यो यल्लमते तत्तस्य भवति एष सूत्रोक्तादाभवनव्यवहारात् द्वितीयो वागन्तिक आभवनव्यवहारः क्षेत्रेप्राप्तानामक्षेत्रे वा वसतिं प्राप्तानां यः सूत्रोक्तआभवनव्यवहारः स भिक्षूणामित्र प्रतिपत्तव्यः ।

[भा.२२०९] समगीता गीतावा गीतत्थपरिग्गहाण सति कज्जे ।
असमत्ताण वि खेतं, अपहुपच्छा समत्तोवि ।।

वृ- स चाविशेषेणार्यो यदि वा द्वावप्यगीतार्थौ अथवा गीतार्थपरिगृहीता गीतार्थनिश्रां प्रतिपन्नाः समकमेककालं प्राप्तास्तेषां साधारणं क्षेत्रामाभवति, सति विद्यमाने कार्ये ग्लानप्रतिजागरणादिलक्षणे ये स्थिता अगीतार्था असमाप्ताश्च प्राप्तानां साधारणं क्षेत्रं, ये पुनरगीतार्था अपि असमाप्ता अपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वप्राप्तागीतार्थासमासाश्च निष्कारणं प्राक् स्थित्वा प्राप्ता स्तदा असमाप्तानामल्यगीतार्थानामपि च तत् क्षेत्रं पूर्व प्राप्तत्वान्नगीतार्थः समाप्तो पि च तस्य क्षेत्रस्य प्रभु निष्कारणं स्थित्वा पश्चात्प्राप्तत्वात् ।

[भा.२२१०] समपत्तकारणेणं खेत्ते वसहीए दोन्न वी लाभो ।
रायनिए होत्ति उग्गहो गीयत्थसमंमि दोण्हंपि ।।

वृ- समं समकमेककालं कारणेन पश्चाद्वा क्षेत्रेऽक्षेत्रे वा वसतौ वा प्राप्तयोर्द्वयोरपि लाभः साधारणः, । अत्र पुनर्यदि विशेषविवक्षा क्रियते, तदा यो रत्नाधिकस्तस्मिन्नवग्रहो भवति । यद्यपि नाम द्वयोरपि साधारणो लाभस्तथापि यथा संघाटकेन भिक्षां हिण्डबानयोरत्नाधिकस्य लाभो गण्यते, । एवमिहापि रत्नाधिकस्यावगृहः । अथैको गीतार्थः अपरोऽगीतार्थस्तत्र यदि रत्नाधिकोऽगीतार्थोऽवमरत्नाधिको गीतार्थस्ततोऽवमररत्नाधिकस्यावग्रहः । अथ द्वावपि समं गीतार्थौ तत आह समे गीतार्थे परस्मिन् समकं च प्राप्ते द्वयोरपि साधारणोऽवग्रहः, । तदेवं द्विसंख्याकगणावच्छेदकसूत्रमिति भावितमेवं द्विसंख्याकाचार्योपाध्यायसूत्रमपि भावनीयमिदानीं बहुत्वसूत्राणि पिण्डसूत्रं चातिदेसत आह-

[भा.२२११] एमेव बहूणंपी पिंडे नरोवग्गहस्स उ विभागो ।
किं कतिविहो कस्स कंमि व केवइयं वा भवे कालं ।।

वृ- एवमेव बहूनामपि भिक्षुप्रभृतीनां सूत्राणि भावनीयानि, । द्विकसूत्रापेक्षया बहुत्वसूत्राणामर्थतो नानात्वाभावात् । पिण्डे पिण्डक सूत्रस्यापि स एवार्थो नवरमत्रावग्रहस्य विभागो वक्ताव्यस्तमेवाह- किं कतिविधः तस्य वा कस्मिन् वा कियन्तुं वा कालं भवत्यवग्रहः । तत्र किमित्याद्यद्वारख्यानार्थमाह-

[भा.२२१२] किं उग्गहोत्ति भणिए, उग्गहो उ होत्ति चितादी ।
एक्केक्को पंचविहो देविंदानी मुणेयव्वे ।।

वृ- किमवग्रह इति भणिते पृष्टे सूरिराह-त्रिविधो भवत्यवग्रहश्चित्तादिः सचित्तोऽचित्तो मिश्रश्च । पुनरेकैकः कतिविध इति प्रश्नमुप जीव्याह एकैकः पंचविधः पंच देवेंद्रादि देवेंद्रावग्रहो राजावग्रहो मांडलिकावग्रहः शय्यातरावग्रहः साधर्मिकावग्रहश्च ।। गतं कतिविधद्वारमिदानीं कस्य न भवतीति-

[भा.२२१३] कस्स पुन उग्गहोत्ती परपासंडीण उग्गहो नत्थि ।
तिण्ही सन्ने संजति अगीते गीतएक्के वा ।।

वृ- कस्य पुनरवग्रहो भवतीति शिष्यप्रश्नामाशंक्योच्यते, परपाषण्डिनामवग्रहो नास्ति, । ये च निण्हवा ये ऽवसन्ना याश्च संयत्यो गीतार्थैरपरिगृहीता ये चागीतार्था गीतार्थानिश्रामनुपपन्नाश्च निष्कारणमेवैकाकी गीतार्थ एतेषां सर्वेषामप्यवग्रहो नास्ति, एतदेव सुव्यक्तमाह-

[भा.२२१४] उसन्नाण बहूण व गीतमगीताण उग्गहो नत्थि ।
सच्छंदियगीयाणं असमत्त अनीसगीए वि ।।

वृ- अवसन्नानां बहूनामपि गीतार्थानां चावग्रहो नास्ति । सच्छंदियगीयाणयत्ति ये गीतार्था अपि स्वच्छन्दिकाः स्वचछन्दतयैव एकाकिनो विहरन्ति, तेषामपि नास्त्यवग्रह, । तथा ये असमाप्ता असमाप्तकल्पाः यस्य च समुदायस्य न विद्यते गीतो गीतार्थ ईश स्तेषामपि नास्त्यवग्रहः ।।

[भा.२२१५] एवं ता सावेक्खे निरवेक्खाणंपि उग्गहो नत्थि ।
मुत्तूण अहालंदे तत्थ वि जे गच्छपडिवबद्धा ।।

वृ- एवं तावत्सापेक्षे जातावेकवचनं । सापेक्षिणामुक्तं सापेक्षानामस्थविराकल्पिकाः निरपेक्षा

जिनकल्पिकादयस्तेषामप्यवग्रहो नास्ति । किमविशेषेण सर्वेषां, नेत्याह-मुक्त्वा यथालब्दान् । तत्रापि गच्छप्रतिबद्धान् तेषामवगृहो भवति गच्छप्रतिबद्धत्वात्, अन्येषां तु सर्वेषामपि नास्ति ।।

[भा.२२१६] आसन्नतरा जे तत्थ, संजया सो व जत्थ निच्छरइ ।
तहियं देंतुवदेसं, आयपरं ते न इच्छंति ।।

वृ- तेषां गच्छनिर्गतानां जिनकल्पिकादीनां यो व्रतग्रहणार्थमुपतिष्ठति तं ते न प्रव्राजयन्ति । तथा कल्पत्वात् । किन्तु ये तत्रासन्नतराः संयताः स्थितास्तत्रोपदेशं ददति । यथा अमुकानां समीपे गत्वा प्रव्रजेति । अथवा जानन्ति श्रुतवलतो ये दूरे स्थितास्तत्र स एष निस्तरिष्यति । तदेतत् ज्ञात्वा यत्र स निस्तरति तत्रोपदेशं प्रयच्छन्ति परमार्थतः पुनस्ते आत्मपरमात्मगच्छपरगच्छविभागं नेच्छंति, स्थविरकल्पादुत्तीर्णत्वात्, ।।

[भा.२२१७] अगीय समण संजइ गीयत्थ परिग्गहाण खेत्तं तु ।
अपरिग्गहाण गुरुगा न लभति सीसेत्थ आयरिओ ।।

वृ- अगीतानामगीतार्थानां श्रमणानां च गीतार्थपरिग्रहाणां गीतार्थपरिगृहीतानां क्षेत्रमवग्रहो भवति, । इयमत्र भावना-येऽगीतार्था अपि साधवो गीतार्थपरिगृहीता विहरन्ति वा अपि संयत्यो गीतार्थ-परिगृहाणां गीतार्थपरिग्रहरहितानां विहरतां प्रायश्चित्तं चत्वारो गुरुका इत्येषां च संयतानां संयतीनां च गीतार्थाऽपरिगृहीतानां यः परिव्राजक आचार्यः सोऽत्र शिष्यान् स्वदीक्षितान् न लभते, परिगृहीततयैव तेषां दीक्षणात् ।

[भा.२२१८] गीयत्थागते गुरुणा असती एगानिएवि गीयत्थे ।
समोसरणे नत्थि उग्गहो, वसहीए उ मग्गण अक्खेते ।।

वृ- ये ते स्वयमगीतार्था गीतार्थाः परिग्रहरहिता वर्थन्ते यद्यन्यस्मिन् गीतार्थे आगते तस्योपसम्पदं न प्रतिपद्यन्ते, तदा तेषां प्रायश्चित्तं चत्वारो गुरुकाः, । अथान्यो गीतार्थ उपसम्पदार्हो नायातः कारणवशतः कथमप्येकाकी जातस्तस्य गीतार्थस्याशठस्य परिवाररहिततत्वेनैका किनोऽपि क्षेत्रमाभवति । गतं कस्येति द्वारमिदानीं कस्मिन्वेति द्वारमधिकृत्याह-यत्र यावन्ति दिनानि सङ्घस्य समवसरणं तत्र तावन्ति दिनान्यवग्रहो न भवति, । एवं जिनस्नानादिषु मिलितानां यावन्महिमा तावदवग्रहाभावः एतत्सर्वं समवसरणेनास्त्यवग्रह इत्यनेन सूचितमेवमक्षेत्रेवग्रहाभावः अक्षेत्रेऽपि वसतौ मार्गणाऽवग्रहस्य भवति । सा चैवमक्षेत्रे वसतिषु समकं स्थितानां साधारणं क्षेत्रं पश्चादागतानां तु न भवति-

[भा.२२१९] सेसं सकोसजोयण पुव्वग्गहियं तु जेण तस्सेव ।
समगोग्गह साहारं पच्छागतो होइ अक्खेत्ती ।।

वृ- शेषं क्षेत्रमवग्रहो भवति, तच्च प्रमाणतः सकोशयोजनं पञ्चगव्यूतानीत्यर्थः । तत्रापि येन पूर्वमवगृहीतं तस्यैव तत्क्षेत्रमावहति, न शेषस्य । अथ समकमेव तस्यावग्रहः कृतस्तत आह-साधारणं तदा तेषां क्षेत्रं यस्तु पश्चादागतः स भवत्यक्षेत्रो न तस्याभवति क्षेत्रमिति भावः ।

[भा.२२२०] अब्भागते कहं तो, उवसंपग्गो तहिं च ते सव्वे ।
संकंतो उवकहेंते, साहारणे तस्स जो भागो ।।

वृ- अन्यः कोऽप्याचार्यः कथयन् बहुश्रुतः पश्चादागत ते च पूर्वस्थिताः सर्वेऽपि तस्मिन्नागते कथयत्युपसम्पन्नाः तदा तस्मिन् कथयति सोऽवग्रहः संक्रान्तस्तस्याभाव्यं तत् क्षेत्रं जातमिति भावः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ समकप्राप्ततया साधारणे क्षेत्रे स्थितानां मध्ये एकः कश्चनापि तं पश्चादागतमन्यमाचार्यं बहुश्रुतमुपसम्पन्नस्तदा य स्तस्य भागः स तत्र कथयति सङ्क्रान्तः ।

[भा.२२२१] निक्खित्तगणाणं वा तेसिं वि य होइ तंतु खेत्तं तु ।
खेत्त भया वा कोई, माइठाणेण सुण एवं ।।

वृ- यदि क्षेत्रवतां शिष्य आगन्तुकमाचार्यमुपसम्पन्नो यदिवाचार्याः गणं शिष्ये गीतार्थे निक्षिप्य तमुपसम्पन्नास्तदा तेषामेव निक्षिप्तगणानां वाशाब्दादुपसम्पन्नस्तदेकशिष्याणां तत् क्षेत्रम् । किमुक्तं भवति ? यत्ततः क्षेत्रात्सचित्तादिकमुत्पद्यते तत्तेषामाभवति प्रवाचयन्नागन्तुवो न लभते । कोऽपि पुनर्मा ममागन्तुकस्य पार्श्वे शृण्वतः क्षेत्रं यायादिति क्षेत्रभयादेवं वक्ष्यमाणप्रकारेण मातृस्थानेन शृणोति तमेवं प्रकारमाह-

[भा.२२२२] कुड्डेण चिलिमिलीए व अंतरितो सुणइ कोइ मानेन ।
अहवा चंकम्मणीयं करेंतो पुच्छागमो तत्थ ।।

वृ- कुड्येन यदि वा चिलिमिलिन्या जवनिकान्तरितः सन् कोऽपि मानेन ममेदं क्षेत्रमाभवति तन्मा हस्तादुत्तरत्विति क्षेत्रगर्वेण शृणोति । अथ वा मानेनैव यथोक्तरुपेण चंक्रमणिकां कुर्वन् कोऽपि शृणोति, । तत्र यद्यपि स न शृणोति तथापि तत्र पृच्छागमो भवति, पृच्छा कर्तव्या भवति, ततः पृच्छा कर्तव्या भवति, ततः पृच्छातोऽपि तस्य तस्य भवति क्षेत्रं, । अथ कतिभिः पृच्छाभिः कियन्तं कालं तस्याभवति क्षेत्रमत आह-

[भा.२२२३] पुच्छाहिं तीहिं दिवसं, सत्तहिं पुच्छाहिं मासियं हरेइ ।
अहवा विसेसमन्नो इमो उ तहियं अहिज्जंते ।।

वृ- तिसृभिः पृच्छाभिरेकं दिवसं यावत् तत्क्षेत्रं हरति, पृच्छादिवसे यत्तस्मिन् क्षेत्रे सत्तादिकमुत्पद्यते तत् कथयन् लभते नेतर इति भावः । सप्तभिः पृच्छाभिः पुनर्मासिकं पृच्छादिवसादारभ्य मासं यावत्सचित्तादिकमपहरति । तदेवं खेत्तभया वा कोइ इत्यादि गाथा पश्चार्धं व्याख्यातमिदिनीं निक्खित्तगणाणं चेत्यादि पूर्वार्धं व्याख्यानयति । अथवाऽयं वक्ष्यमाणोऽन्यविशेषस्तस्मिन्नधीयापनेऽध्यापयतरि तमेवाह-

[भा.२२२४] जति निक्खिविऊणं गणं उवसंपाए हवावि सीसं तु ।
ता तेसिं चिय खेत्तं वाएतो लाभो खेत्तबहिं ।।

वृ- यदि गीतार्थे गणं निक्षिप्य तमागन्तुकमुपसम्पद्यते अथवा शिष्यं प्रेषयति तदातेषाभेव पूर्वस्थितानां तत्क्षेत्रमाभवति न तु वाचयतो वाचयति लाभस्तस्मात्क्षेत्राद्बहिः ।।

[भा.२२२५] अह बेती वायंतो लाभेन नत्थि हं ति वच्चामो ।
इयरे हिं य सो रुद्धो मा वच्चसु अम्ह साहारं ।।

वृ- अथ ब्रूते वाचयन् यथा नोऽस्माकमिह नास्ति लाभ इति व्रजाम एवमुक्ते इतरैः पूर्वस्थितैः स रुद्धो यथा मा व्रजत यूयं युष्माकमस्माकं च साधारणं क्षेत्रमिति । अथ साधारणेऽपि क्षेत्रे स्थिता न संस्तरंति तत्र विधिमाह-

[भा.२२२६] निग्गमने चउभंगो निद्धिय सुह कक्खयं जति करेंति ।
निद्धिय पहावितो वा रुद्धो पच्छा य वाघातो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथ साधारणे क्षेत्रे स्थितास्ते न संस्तरंति तर्हि निर्गन्तव्यम् । तत्र च निर्गमने चतुर्भङ्गी वक्तव्या गाथायां पुंस्त्वनिर्देशः प्राकृतत्वात् । तथा यस्य श्रुतस्कन्धस्य निमित्तमुपसम्पन्नास्तत् निष्ठितं तस्मिन्निष्ठिते समाप्ते भूयः क्षेत्रं साधारणं जातम् । तत्र यदि भूयः सुखदुःखतां कुर्वन्ति सुखदुःखनिमित्तमुपसम्पदं प्रतिपद्यन्ते तथा निष्ठिते श्रुतस्कन्धे यः प्रधावितः पुनरपि प्रतीच्छिकैः पश्चात् रुद्धो व्याघातो वाऽशिवादिभिः कारणैरुपजातस्तत्र यदाभाव्यं तद्वक्तव्यमिति द्वारगाथासमासार्थः ।।

[भा.२२२७] वत्थव्वनिंति नउ जे उ पाहुणा न इयरे वा ।
उभयं च नोभयं वा चउभयणा होति एवं तु ।।

वृ- यस्य ग्रामप्रधानस्य नगरप्रधानस्य वा नियोगेन तिष्ठन्ति साधवः स चतुर्धा तद्यथा-आगन्तुकभद्रको नामैको न वास्तव्यभद्रकः वास्तव्यभद्रको नामैको नागन्तुकभद्रः २, आगन्तुकभद्रको वास्तव्यभद्रकश्च ३, नागन्तुकभद्रको नापि वास्तव्यभद्रकः ४ । एतच्चतुभङ्गीवशादधिकृतापि चतुर्भङ्गी जाता । तद्यथा-प्रथमभङ्गवशात् वास्तव्या निर्गच्छन्ति न प्राधूर्णका, नियोक्तुरागन्तुभद्रकत्वात्, द्वितीयभङ्गवशात् प्राधूर्णका निर्गच्छिन्ति न इतरे वा द्वितीयभङ्गे नियोक्तुर्वास्तव्यभद्रकत्वा-च्चतुर्थभङ्गवशात् उभयं प्राधूर्णका वास्तव्याश्च निर्गच्छन्ति, । उभयानपि प्रतिनियोक्तुरभद्रत्वा-त्तृतीयभङ्गवशान्नोभयं वास्तव्या प्राधूर्णकाश्च निर्गच्छन्ति । उभयानपि प्रति तस्य भद्रकत्वात् । एवममुना प्रकारेण चतुर्भजना चतुर्भङ्गी भवति । तत्र प्रथमं भङ्गमधिकृत्य विशेषमाह-

[भा.२२२८] आगंतु भद्दगंमी पुव्वट्ठिया गंतु जइ पुनो एज्ञा ।
तंमि अपुन्ने मासे, संकमति पुनोवि सिं खेत्तं ।।

वृ- आगन्तुकभद्रके नियोक्तरि ये पूर्वस्थितास्ते वक्ष्यमाणचतुर्भागार्धभागगमनयतनया गच्छन्ति, तथाप्यसंस्तरणे सर्वात्मना गच्छन्ति । ते गत्वा यद्यपूर्ण एव मास तस्मिन् क्षेत्रे पुनरागच्छेयुस्तदा । सिं तेषां प्रत्यागतानां क्षेत्रं संक्रामति । तेषां तदाभाव्यं भवतीति भावः । कारणतो गत्वा पुनरपूर्ण एव मासे प्रत्यागमनात् । अथ साधारणमुभयेषां तत्क्षेत्रमासीत् । मा वद्यमु अम्ह साहारणमिति व्यवस्थाकरणात् तदा तेषां पुनः प्रत्यागतानां साधारणेन क्षेत्रं संक्रामति । द्वितीयं भङ्गमधिकृत्याह-

[भा.२२२९] वत्थव्वभद्दगंमी संघाडगजयण तहवि उ अलंभो ।
आगंतु नेति तउ अत्थति यो पवायगो नवरं ।।

वृ- वास्तव्यभद्रके योक्तरि तेषामागन्तुकानामसंस्तरतामियं यतना वास्तव्या आगन्तुकैः सममेकैकेन सङ्घाटेन भिक्षां हिण्डन्ते, । अथ तथाप्यलाभस्तर्हि निर्गच्छति, तत्रेयं भङ्गचतुष्टयेन यतना-आगन्तुकानां चतुर्भागो निर्गच्छति, न वास्तव्यानां १, वास्तव्यानां चतुर्भागो निर्गच्छति नागन्तुकानां २, वास्तव्यानामपि चतुर्भागा आगन्तुकानां च चतुर्भागः ३, उभयेषामपि चतुर्भागागमने चतुर्थः ४ । स चात्र शून्यो गमनमन्तरेणासंस्तरणात् । एवमप्यसंस्तरणेऽर्द्धार्द्धगमनेन यतना प्रथमभङ्गेऽपि द्रष्टव्या । स चात्रापि पूर्वप्रकारेण शून्यः । अथैवमपि न संस्तरति तत आगन्तुकाः सर्वे निर्गच्छन्ति । नवरमेकः प्रवाचकस्तिष्ठति येन वास्तव्यान् प्रवाचयति । अथ सोऽप्यसंस्तरणे स्वशिष्यैः सह गतस्ते च वास्तव्यास्तमुपसम्पन्ना यदि मावद्यह साहारणमिति व्यवस्थाकारणत उभयेषां साधारणं तत् क्षेत्रं ततो यदि गत्वा पुनरपि अपूर्णएव मासे तत्र क्षेत्रे प्रत्यागच्छन्ति । तदा कृतायामुपसम्पदि तेषामेव प्रत्यागतानां क्षेत्रमाभाव्यतया संक्रामति । यदिवा साधारणेन । साम्प्रतमनयोरेव भंग्योरभवनव्यवहारशेष उच्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र पतितं नियट्टि सुहदुक्खयं जति करेंतीति द्वारस्य व्याख्यानमाह-

[भा.२२३०] सुहदुक्खित्तो समत्ते वाएंतो निग्गएसु सीसेषु ।
वाइज्जंति वि तहा निग्गयसीसो समत्तंमि ।।

वृ- इदमुक्तमागन्तुकाः सर्वेऽपि निर्गच्छन्ति केवलमेव प्रवाचकोऽवतिष्ठते । तत्र यदि निर्गतेषु शिष्येषु वाचयन् प्रवाचकः समाप्ते श्रुते सुखदुःखितः सुखदुःक्खनिमित्तमुपसम्पदं ग्राहितस्तथा तस्य वाच्यमानस्य भवतितत्क्षेत्रम् ।इदं द्वितीयभङ्गमधिकृत्योक्तंप्रथमभङ्गमधिकृत्याह-तथा वाच्यमानोपि निर्गतः शिष्यः समाप्ते श्रुते वक्तव्यं । किमुक्तं भवति ? । यदि वाच्यमाजो निर्गतेषु शिष्येषु वाचनाग्रहणाय पश्चात् स्थितः ।समाप्ते श्रुतस्कन्धे वाचयता सुखदुःखनिमित्तमात्मोपसम्पदं ग्राहितस्तदा वाचयति आभवति क्षेत्रम् ।।

[भा.२२३१] दोण्हवि विनिग्गएसुं वाएंतो तत्थ खेत्तितो होति ।
तंमि सुए असमत्ते संमत्ते तस्सेव संकमति ।।

वृ- द्वयोरपि शिष्येषु विनिर्गतेषु तावेव द्वौ केवलौ तिष्ठतस्तत्र यावदद्यापि तत् श्रुतं न समाप्यते तावत्तस्मिन् श्रुतं असमाप्ते तत्र तयोर्द्वयोर्मध्ये वाचयन् क्षेत्रिको भवति ।समाप्तं पुनः श्रुतस्यैव पूर्वस्थितस्य तत्क्षेत्रं संक्रामति । अथ द्वावपि परस्परं सुखदुःखोपसम्पदं प्रतिपन्नो तदा साधारणं क्षेत्रमिति यो यल्लभ्यते तस्यतदा भवतीति ।

[भा.२२३२] संथरे दोवि न नेंती तेहि उववाइया उ जइ सीसा ।
लाभो नत्थि महंति य अहव मत्ते पधाविज्ञा ।।

वृ- संस्तरे संस्तरणा द्वयेऽपि पूर्वस्थिता आगन्तुकाश्च न निर्गच्छन्ति, तैश्च पूर्वस्थितै यदि बहवः शिष्या उपपादिता उत्पादितास्तदा स आगन्तुको नास्ति मम लाभ हति विचिन्त्य प्रधावेत् गच्छेत् । अथ ते निक्षिप्तगणास्तस्य समीपे वाचयन्ति तेषां शिष्या वा तत आह-अथवा समाप्ते श्रुते प्रधावेत् ।। सम्प्रति निट्ठयपट्ठाविओ वा रुद्धो पच्छाय वाघातो इत्येतद्व्याख्यानयति-

[भा.२२३३] जइ वायगो समत्तो मंतिउ पडिच्छिएहिं रुंभेज्ज ।
असिवादिकारणे वा न नेंते लाभो इमो होइ ।।

वृ- यदि समाप्ते श्रुते तत्क्षेत्रात् वाचको निर्गच्छन् प्रतीच्छिकैरुच्यते यथा मा निर्गच्छत यूयं, वयमद्यापि वाचयिष्याम इति यदि वा निर्गतो बहिरशिवादीनि कारणान्युपस्थितानि ततो व्याघात इति कृत्वा न निर्गच्छति, तदा तस्मिन् प्रतीच्छकैरवरोधनात् । पश्चाद्व्याधाताद्वा अनिर्गच्छति तस्यायमाभाव्यो लाभो भवति । तमेवाह-

[भा.२२३४] आयसमुत्थं लाभं, सीसपडिच्छएहिं सो लहइ रुद्धो ।
एवं च्छिन्नुववाए अच्छिन्ने सीसा गते दोण्हं ।।

वृ- स प्रातीच्छिकैर्गच्छन्नपरुद्धः सन् यत्स्वयं लभते, यच्च तस्य शिष्या यच्च तस्य प्रातीच्छिका वा लभन्ते, तत्सर्वमात्मसमुत्थं शिष्यप्रातीच्छकैर्वा समुत्पादितं लभते । एवमाभवनं च्छिन्ने समाप्ते उपपातहेतौ श्रुतस्कन्धादौ श्रुते द्दष्टव्यं, । अच्छिन्ने असमाप्ते श्रुतस्कन्धादौ यदि तस्य पठत आचार्यस्य शिष्या ग्रामन्तरगताः प्रत्यागताः तस्य च शिष्यो नियमात् गीतार्थो यस्य गण आरोपितस्तदा द्वयोरपि लाभः साधारणो गीतार्थे शिष्ये निक्षिप्तगणतया पठतोऽप्याचार्यस्य पाठयिता गच्छत् तेन प्रतिरुद्ध

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति पाठयितुरप्याभवनात् ।।

[भा.२२३५] एवं ता उउबद्धे, वासासु इमो दिही हवति तत्थ ।
खेत्त पडिलेहगा उ पयठिया तेन अन्नत्थं ।।

वृ- एवं तावत् ऋतुबद्धे काले-आभवनव्यवहारविधिरुक्तो वर्षासु वर्षाकाले पुनरयं वक्ष्यमाणो विधिर्भवति तमेवाह तत्थेत्यादि ।। द्वयोराचार्ययोः ऋतुबद्धे काले साधारणक्षेत्रस्थितयोरेकोऽपरस्यैकस्य पार्श्वे उपसम्पदं गृहीतवान् । वर्षारात्रश्च प्रत्यासन्नीभूतोऽन्यानि च क्षेत्राणि वर्षावासयोग्यानि तादृशानि प्रत्यासन्नानि न सन्ति, ततः उपसम्पन्न आचार्यस्तत्रेति तस्मिन्नेव आषाढमासिके क्षेत्रे वर्षावासं स्थितस्तेन च वाचनाचार्येणान्यत्र वर्षावासयोग्यस्य क्षेत्रस्य प्रतिलेखकाः प्रवर्तितास्तांश्च प्रवर्तयन्निदमवादीत् ।

[भा.२२३६] जा तुब्भे पेहेहा तावेतेसिं इमं तु सारेमि ।
तं च समत्ते तेसिं वा वासं च पबद्धमालग्गं ।।

वृ- यावत् यूयं क्षेत्रं प्रत्युपेक्ष्य समागच्छथ । तावदेतेषामाचार्याणामिदं श्रुतस्कन्धादिकं सारयामि सूत्रतोऽर्थतश्च गमयामि । तच्च श्रुतस्कन्धादिकं तेषां तथा अधीयानानां समाप्तमेतद्व्यवच्छिन्न-मित्युच्यते, । अत्रान्तरे च वर्ष प्रबद्धं प्रबन्धेन पतितुमालग्नं तेऽपि च क्षेत्रप्रत्युपेक्षकास्तत्रैव वर्षेण निरुद्धाः ।

[भा.२२३७] निग्गंतूण न तीरइ, चउमासे तत्थ लाभमायगयं ।
लभते वोच्छिन्नेवं कुव्वंति गिलाणगस्स विय ।।

वृ- यतः प्रबन्धेन वर्ष पतितुमारब्धं, च क्षेत्रप्रत्युपेक्षकाः समागच्छन् ततः समाप्तेऽपि श्रुते स वाचनाचार्यस्ततः क्षेत्रान्निर्गन्तुं न शक्नोति । अनिर्गतश्च तस्मिन् क्षेत्रे चतुरो वर्षारात्रमासान् यावदात्मगतं आत्मसमुत्थं लाभं लभते, । द्वितीयोऽप्यात्मसमुत्थस्य लाभस्य स्वामी एवं कुर्वते व्यवच्छिन्ने समाप्ते श्रुते अथवा गिलानस्स विय इति समाप्ते श्रुते वाचनाचार्यो ग्लानोऽभवत् ततो गन्तुमशक्तस्यापि च ग्लानस्यैवमाभवनव्यवहारो द्रष्टव्यः । उभयोरपि चतुरो वर्षामासानात्मसमुत्थो लाभ इत्यर्थः ।

[भा.२२३८] अह पुन अच्छिन्न सुए, ते आया बेंतिमे य तुब्भे तु ।
अम्हे खेत्तं देमो साहारणं तंमि एसिंतु ।।

वृ- अथ तत् श्रुतस्कन्धादिकमद्यापि न समाप्तं, ते च क्षेत्रप्रत्युपेक्षका, आयातास्ततो वाचनाचार्या आपृच्छन्ति वयं निर्गच्छामः । तत् इमे प्रतीच्छिका आचार्य ब्रुवते, मा यूयं निर्गच्छत, समाप्तेऽपि श्रुते युष्माकं वयं क्षेत्रं दास्यामः । एवमुक्ते तत्क्षेत्रमेतेषां द्वयानामपि साधारणं भवति । एष संस्तरणे विधिरसंस्तरणमधिकृत्याह-

[भा.२२३९] असंथरण निंत अनिंते चउभंगो होइ तत्थवि तहेव ।
एवं ता खेत्तेसुं, इणमन्ना मग्गणविहादी ।।

वृ- असंस्तरणे साधुषु निर्गच्छदनिर्गच्छत्सु चतुर्भङ्गी भवति । सा चैवम्-वास्तव्यानां चतुर्भगादिना प्रकारेण साधवो निर्गच्छन्ति न वाचनाचार्याणामिति प्रथमः, । वाचनाचार्याणां नेतरेषामिति द्वितीयः, । उभयेषामिति तृतीयः, । नोभयेषामिति चतुर्थः, । तत्रापि चतुर्भङ्ग्यामपि तथैवाभवनव्यवहारः । द्वयानामप्यात्मसमुत्थो लाभ इति भावस्तृतीयेभङ्गे यद्येकतर एकतरस्यापार्श्वे साध्वभावत उपसम्पद्यते, तत उपसम्पद्यमान लाभ इतरस्मिन् संक्रामति । अनुपसम्पन्नौ च द्वयोरपि साधारणं क्षेत्रं, । एवं तावत्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रे मार्गणा कृता । अयमन्यो मार्गणाविधिरादिशब्दात् दिग्वारणपरिग्रहः । गाथायां च स्त्रीत्वनिर्देशः प्राकृत्वात्तमेव मार्गणाविध्यादिकमाह-

[भा.२२४०] अद्धाणादिसु नट्ठा, अनुबद्धिया तहा उवट्ठविया ।
अगविट्ठा य गविट्ठा निप्फन्ना धारणदिसासु ।।

वृ- अध्वा मार्ग आदिशब्दादशिवावमौदर्यादिनिमित्तनिर्गमनपरिग्रहः तेष्वध्वादिषु नष्टाः साधवः । ते च द्विधा-उपस्थापिता अनुपस्थापिताश्च एकैके द्विधाचार्यस्य ते तेन गवेषिता अगवेषिताश्च । तत्र ये निष्पन्ना उपस्थापितास्ते निष्पन्ना एव न तेषां दिग्वारणं कर्तव्यमितरेषां यथाऽभवनं धारणं दिक्षु अध्यादिषु नष्टा इत्युक्तं तत्र यैः कारणैस्ते नष्टाः साधवस्तान्यभिधित्सुराह-

[भा.२२४१] संभममहंतसत्थे भिक्खायरिया गया व ते नट्ठा ।
सिग्घगती परिरएणव आउर तेनादिएसुं च ।।

वृ- संभ्रमो वनदवाग्निसंभ्रमादिकः तद्वशाद्गच्छात् स्फिटिता यदि वा महति सार्थे व्रजतां कोऽपि कुत्रापीति गच्छादपगता यदि वा भिक्षाचर्यानिमित्तं सार्थादपसृत्य व्रजिका पल्यादिषु गतास्ततो नष्टा । अथवा सार्थः शीघ्रगतिस्ते च मन्दगतः तत्सार्थात् गच्छात् परिभ्रष्टाः परिरएणवत्ति यदि वा नद्यादिषूत्तरीतव्यासु सार्थ ऋजुमार्गेणोत्तीर्ण इतरे साधवः परिरएण गत्वा स्तोकपानीये समुत्तरन्ति, चिन्तयन्ति च वयं सार्थे झटित्येव मिलिष्यामस्ते च तथा परिरएण गच्छन्तः सार्थात् स्फिटिता अथवा आतुराः प्रथमद्वितीयपरीषहाभ्यां जितास्तेतथा आतुराः सन्तोऽशुक्नुवन्तः सार्थात् परिभ्रष्टाः स्तेनाश्चोरा आदिशद्वात् परचक्रादिपरिग्रहस्तेषु स्तेनादिषु समापत्सु भयेन पलायमाना गच्छादवस्फिटिता एवमध्वादिषु साधवो नष्टा भवन्ति । अत्र मार्गणविधिं दिग्धारणविधिं चाह-

[भा.२२४२] गवेसउ मा व कयव्वया जे सव्वे व तेसिं तु दिसा पुरिल्ला ।
गवेसमाणो लभते नुबद्धे अणाढिया संगहिया उ जेणं ।।

वृ- ये कृतव्रता उपस्थापिता इत्यर्थः । तान् प्रव्राजनाचार्यो गवेषयतु वा मा वा, तथापि तेषां सैव दिक् पुरातनीया प्रव्राजनाचार्योऽशठभावेन गवेषयति, । न च लभते । तथापि तान् सुचिरेणापि कालेन लब्धान् स एव प्रव्राजनाचार्यो लभते, । अनाढिया संगहियाउ जेणमिति ये पुनरनादृतानादरपरेण गवेषितास्ते येन संगृहीतास्तस्यैव ते शिष्या इति स तेषामात्मीयां दिशं धारयति । अयमेव वृत्तबद्धोऽर्थोऽन्येनाचार्येण श्लोकेन बद्धस्तमेव श्लोकमाह-

[भा.२२४३] गवेसिए पुव्वदिसा अगविट्ठए उ पच्छिमा ।
अनुबद्ध विए एवं अभिधारेंते उ इणमन्ना ।।

वृ- अनुपस्थापिते नष्टे शिष्ये शिष्यवर्गे वा प्रव्राजनाचार्येण गेवषिते पूर्वदिक् प्रव्राजनाचार्यदिग् भवति, । अगवेषिते पश्चिमा दिक् । येन संगृहीतास्तस्य दिग् भवतीत्यर्थः । एवमनुपस्थापिते मार्गणा भवति, यः पुनरन्यक्षेत्रे गतानाचार्यानभिधारयन् व्रजति तत्रेयमन्या मार्गणा तामेवाह-

[भा.२२४४] अभिधारेंतो वच्चति वत्तअवत्तो व वत्त एगागी ।
जं लभति खेतवज्जं अभिधारेज्जंते तं सव्वं ।।

वृ- अन्यक्षेत्रगतानाचार्यान् अभिधारयन् व्रजति व्यक्तोऽव्यक्तो वा गीतार्थोऽगीतार्थो वा इत्यर्थः, ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र व्यकत एकाकी व्रजन् यत् लभते तत्सर्व क्षेत्रवर्ज क्षेत्रमेकाकिनो न भवतीति सत्प्रतिषेधः कृतः अभिधार्यमाणे यस्य समीपे गन्तव्यं तस्मिन् भवति ।तदभिधारणस्थितेन तेन तस्य लाभात् ।।

[भा.२२४५] अव्वत्ते ससहाये, परखेत्तविवज्जलाभो दोण्हंपि ।
सव्वो सो मग्गिल्ले जाव न निक्खिप्पए तत्थ ।।

वृ- अथाव्यक्तः ससहायस्तमभिधारयन् व्रजति तर्हि तस्मिन् अव्यक्ते सहाये व्रजति यः परक्षेत्र वर्जो यस्मिन् क्षेत्रे ते अभिसन्धार्यमाणा आचार्या वर्तन्ते तत् क्षेत्रवर्ज किल क्षेत्रवर्ज तेषामभिधार्यमाणानामाभाव्यमिति, तत्प्रतिषेधः ।यो द्वयोरपि लाभो व्यक्तव्य सहायानां च यो लाभ इत्यर्थः ।स सर्वः पूर्वस्याचार्यस्याभवति, स च तावद्यावत्तत्र न निक्षिप्यते ।।

[भा.२२४६] निक्खित्तनियत्ताणं खेत्तं वो लाभो होति वाएंते ।
तस्स वि य जाननीति लाभो सो ऊ व वाएंतो ।।

वृ- तमव्यक्तं तत्र निक्षिप्तं कृत्वा निवृत्ताः सहायास्तेषां क्षेत्रस्य पञ्चगव्यूततप्रमाणस्यान्तर्मध्ये यो लाभो भवति, स वाचयत्याभवति, तत्क्षेत्रेतस्य लाभस्य भावात् तस्यापि च निक्षिप्तस्य यावन्न निर्गच्छति तावद्यः कश्चनापि लाभः सोऽपि प्रवाचयति भवति, । सम्प्रति यस्तत्र क्षेत्रे स्थितः सन् गणं निक्षिप्योपसम्पन्नस्तस्य यत्सर्व न भणितं, तदिदानीं सिंहावलोकनन्यायेनाह-

[भा.२२४७] अहवा आयरिओ वी निक्खित्तगणागतो उ आउत्थं ।
वाएंते देइ लाभं, खेत्तीतो न उ न ईसो ।।

वृ- अथवेति प्रकारान्तरे । तच्च प्रकारान्तरमिदं-पूर्व शिष्यस्य वक्तव्यस्याव्यक्तस्य चोक्तमिदानीमाचार्यस्यैतत् क्षेत्रगतस्योच्यते, । आचार्योऽपि क्वचित् गीतार्थे शिष्ये निक्षिप्तगणो भूत्वा तत्रागतस्तत्रोपसम्पन्नः सन् यत्स्वयं लभते तमात्मोत्थं लाभं वाचयति तथा अथ तेन गणः स्वशिष्ये निक्षिप्तस्तस्य ततः स क्षेत्रस्याप्रभुरेवेति कुतस्तस्यात्मसमुत्यो लाभस्तत आह-यत् यस्मात् स क्षेत्रिकः क्षेत्रस्य प्रभुरासीत्तस्मान्न शक्यते वक्तुं तस्मिन् क्षेत्रे आत्मसमुत्थस्य लाभस्य न ईशः प्रभुरिति तदेवमुक्तो विधिः संयतानाम् ।।अधुना संयतीनां विधिमतिदेशत आह-

[भा.२२४८] आरब्भसुत्ता सरमाणगा तो जा पिंडसुत्तं इणमंतिमं तू ।
एमेव वच्चो खलु संजतीणं वोच्छिन्नमिसेसु अयं विसेसो ।।

वृ- सरमाणकान् आयरिय उवज्झाए सरमाणे इत्येवंरुपात्सूत्रादारभ्य यावदिह अन्तिमं पिण्डसूत्रं तेषु सुत्रेषु यथा संयतानां विधिरुक्त एवमेव खलु संयतीनामपि गीतार्थपरिगृहीतानां वाच्यः । केवलं व्यवच्छिन्ने मिश्रे वायं वक्ष्यमाणो विधिविशेषस्तमेवाह-

[भा.२२४९] वोच्छिन्ने उ उवरए गुरुम्मि गीयाण उग्गहो तासिं ।
दोण्ह बहूणं च पिंडए कुलिव्व मन्नं जयभिधारे ।।

वृ- व्यवच्छिन्नो नाम तासां गुरुरुपरतः कालगत इत्यर्थस्तस्मिन् गुरावुपरते यदि कुलिव्व मन्नंति कुलसक्तमन्यमाचार्यमभि धारयन्ति ततस्तासां द्वयोर्बहूनां वा पिण्डके समुदायेन स्थितानां गीतार्थानां सतीनां पिण्डकेन व्यवस्थितानामपि नावग्रहः ।संयतीनां स्वतन्त्रानामवग्रहा भावात् ।।

[भा.२२५०] मीसो उभयगणावच्छे उ तत्थ समणीण जो लाभो ।
सो खलु गणिणो नियमा पुव्वठिया जाव तत्थन्ना ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- मिश्रोनाम उभयगणावच्छेदकस्तत्र उभयगणावच्छेदके सति यः श्रमणीनां संयतीनां लाभः स खलु नियमात् ये पूर्वस्थितास्तत्र गणिनो यावदन्ये न गच्छन्ति तावत्तस्य गणिनो वेदितव्यः । सोऽन्येष्वाचार्येष्वागतेषु तेषामिति । तदेवं गतं कस्येति द्वारम् ।। सम्प्रति कियन्तं कालमवग्रह इति व्याख्यानार्थमाह-

[भा.२२५१] केयति काल उग्गहो तिविहो उउबद्धे १ वास २ वुड्ढे ३ य ।
मास चउमासं वासे गेलन्ने सोलमुक्कोसा ।।

वृ- कियन्तं कालमवग्रह इति शिष्येण प्रश्ने कृते सूरिराह-त्रिविधो भवति अवग्रहस्तद्यथा-ऋतुबद्धे वर्षे वर्षाकाले वुद्धवासे च । तत्र ऋतुबद्धे को उत्सर्गत एकं मासमवग्रहो वर्षे वर्षाकाले चतुरो मासान्, ग्लानत्वमधिकुत्योत्कर्षतः षोडश मासान् । अन्ये तु षोडश वर्षाणीत्याहुः ।।

[भा.२२५२] वुड्ढेस्स उ जो वासो वुड्ढिं व गतो उ कारणेणं तु ।
एसो उ वुड्ढवासो तस्स उ कालो इमो होइ ।।

वृ- वृद्धस्य जरसा परिणतस्य परिक्षीणजङ्घबलस्य वासतो वासो वुद्धवासः, अथवा वृद्धः कारणवशेन रोगेण वृद्धिं गतो वासो वृद्धवासः एष खलु वृद्धवासो वृद्धवासशद्धार्थस्तस्य तु वृद्धवासस्य कालोऽयं वक्ष्यमाणो जघन्यादिभिन्नो भवति तमेवाह—

[भा.२२५३] अंतो मुहुत्तकालं जहन्नमुक्कोस पुव्वकोडीओ ।
मोत्तुं गिहि परियागं जं जस्स व आउयं तित्थे ।।

वृ- वृद्धवासो जघन्येनान्तर्मुहूर्त कालं कथमिति चेदुच्यते-वुद्धवासबुद्ध्या स्थितस्यान्तर्मुहूर्तानन्तरं मरणभावादुत्कर्षतः पूर्वकोटीगृहिपर्यायं नववर्षलक्षणं मुक्त्वा नववर्षोना पूर्वकोटी इत्यर्थः, । कथमेतावान् कालो वृद्धवासस्य लभ्यते इति चेत् ? कोऽपि नववर्षप्रमाण एवं श्रमणो जातः । स च श्रामण्यपरिग्रहात्तदनन्तरमेव प्रतिकूलकर्मोदयवशतः क्षीणजङ्घाबलतया रोगेण वा विहर्तुमसमर्थो जातस्तत एकत्र वासो यथोक्तकालमानो भवति । इदं चोत्कर्षतो वृद्धवासकालपरिमाणं भगवत ऋषभस्वामिनस्तीर्थे शेषतीर्थकरतीर्थान्यधिकृत्याह-यस्य वा तीर्थकरस्य तीर्थे यत् उत्कृष्टमायुः प्रमाणं वर्षनवकहीनं तस्य तीर्थे तावान् उत्कृष्टो वृद्धवासकालः । तत्रयोऽसौ जरापरिणामेन वृद्धवासीभूतः स एतादृशः ।।

[भा.२२५४] कयाविज्जा चरियं लाघवेणं ततो तवो देसितो सिद्धिमग्गो ।
अहाविहि संजम पालइत्ता, दीहाऊणो वुड्ढ वाससस काले ।।

वृ- विद्यानाम सूत्रार्थतदुभयग्रहणं तत्कृत, तद्यथा-द्वादशवर्षाणि सूत्रग्रहणं कृतं । द्वादशवर्षाण्यर्थग्रहणं । तदनन्तरं चरितं देशदर्शनाय द्वादशवर्षाणि भ्रमणं कृतं, । तथा सदैव लाघवेन उपकरणलाघवादिना वर्तितं ययासं चतुर्थषष्ठादिरूपं नाना प्रकारं तपः तथा अनिगूहितबलवीर्येण देशदर्शनान्तरं द्वादशावर्षाण्यव्यवच्छित्तिं कुर्वता ज्ञानादिकः सिद्धिमार्गो देशितः सदैव च यथाविधिः श्रुतोपदेशेन सप्तदशविधः संयमः परिपालितः । तं सकलकालं संयमं यथाविधि पालयित्वा द्वादशवर्षाण्यव्यवच्छित्तिं कुर्वता यदि शिष्यो निष्पादितस्ततस्तं गणे स्थापयित्वा स्वयमभ्युद्यतविहारेण विहर्तव्यमिति भगवतामर्हतामुपदेशः, । अथ न कोऽपि शिष्यो निष्पन्नस्तर्हि गच्छः परिवर्द्धनीयः । यथा यद्यपि च निष्पन्नः कोऽपि शिष्यस्तथापि कश्चिदसमर्थो भवत्यभ्युद्यतविहारेण विहर्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽपि नाभ्युद्यतविहारं प्रतिपद्यते । तस्य शिष्यनिष्पत्त्यभावे नाभ्युद्यतविहारप्रतिपत्त्यशक्त्या वा गच्छं परिपालयतो दीर्घायुषो वृद्धवासस्य कालः ।। एनामेव गाथां व्याख्यानयति–

[भा.२२५५] सुत्तागमो बारससमा चारियं देसाण दरिसणं तु कया ।
उवकरण देह इंदिय तिविहं पुन लाघवं होइ ।।

वृ- विद्यानाम सूत्रागमः । स च द्वादशवर्षाणि यावत् तदुपलक्षणमेतदर्थागमोऽपि विद्या सोऽपि द्वादशवर्षाणि कृतः । तथा चरितं नाम देशानां दर्शनं तदपि द्वादश वर्षाणि कृतं । लाघवं पुनस्त्रिविधं भवति । तद्यथा-उपकरणलाघवं, देहलाघवं, इन्द्रियलाघवं च । तत्रो पकरणलाघवं नाम यद-तिरिक्तमुपकरणं न गृह्णाति, गृहीतं वारक्तद्विष्टः सन् सूत्रोक्त विधिना परिभुंक्ते, शरीरलाघवं-यन्नातिकृशो नातिस्थूलः शरीरेण, इन्द्रियलाघवं यदिन्द्रियाणि तस्य वशे वर्तन्ते ।।

[भा.२२५६] चउत्थ छठादि तवो कतो उ अव्वोच्छित्ताए होइ सिद्धिपहो ।
सुत्तविहीए संजमो वुड्डो अह दीहमाउं च ।।

वृ- तपश्चतुर्थषष्ठादिकं कृतं । तथा अव्यवच्छित्तौ क्रियमाणायां सिद्धिपथो मोक्षमार्गो देशितो भवति । तथा सूत्रविधिना संयमः परिपालितः स च जातो वृद्धोऽथ दीर्घमायुः ।।

[भा.२२५७] अब्भुज्जयमवएंतो अगीत सिस्सो व गच्छपडिबद्धो ।
अच्छति जुन्नमहल्लो कारणतो वा अजुन्नो वी ।।

वृ- अभ्युद्यतविहारमशक्नुवन् अगीताः शिष्याः अद्यापि यस्यासौ वा गच्छप्रतिबद्धो गच्छपरिपालनमप्रवृत्तः सन् जीर्णो महान् वृद्धवासे तिष्ठति । अजीर्णोऽपि वा तरुणोऽपि वा कारणतः क्षीणजङ्घाबलतया रोगादिना वा वृद्धवासमुपसेवते, ।। तदेव कारणजातं गाथाद्वयेनाह–

[भा.२२५८] जंघाबले च खीणे गेलन्ने सहाय ताव दुब्बल्ले ।
अहवावि उत्तमट्ठे निप्पत्ती चेव तरुणाणं ।।

[भा.२२५९] खेत्ताणं व अलंभे कय संलेहे य तरुणपडिकम्मे ।
एएहिं कारणेहिं, वुड्डावासं वियाणाहि ।।

वृ- जङ्घाबलं वा क्षीणं ग्लानत्वं वा तस्यान्यस्य वा जातं, असहायता वा समुत्पन्ना, दौर्बल्यं वा शरीरस्योपजातं । अथवा उत्तमार्थप्रतिपन्नोऽथवा तरुणानामात्मपरलक्षणानां निष्पत्तिः सूत्रतोऽर्थतश्च कर्तव्या, क्षेत्राणां वा संयमस्फीतिहेतूनामलाभः कृतः संलेखो वा प्रतिपन्नसंलेखनाको वर्तते । यदि वा तरुणस्य वा रोगविमुक्तस्य सतः प्रतिकर्मबलविवृद्धिकरणं समारब्धं ततो वृद्धवासस्तथा चाह-एतैः कारणै वृद्धावासं विजानीहि, । तत्र प्रथमे द्वारे जङ्घाबलं परिक्षीणमित्येवं रूपं कियत् क्षेत्रं कियता कालेन गन्तुमशक्नुवन् विहरणार्हो भवति, । कियद्वा अशक्नुवन् जङ्घाबलपरिक्षीणइत्येतत्प्रतिपादयति–

[भा.२२६०] दुन्निवि दाऊण दुवे सुत्तं दाऊण अत्थवज्जं च ।
दोन्नी दिवड्ढमेगं गाऊयं तीसु अनुकंपा ।।

वृ- द्वे पौरुष्यौ सूत्रपौरुषीमर्थपौरुषीं चेत्यर्थः । दत्वा यावद्भिक्षावेला भवति तावद्यो द्वे गव्यूते व्रजति, एष सपराक्रमो विहर्तुं सुत्तं दाऊण अत्थवज्जं चेति सूत्रं सूत्रपौरुषीं दत्वा अर्थवर्ज अर्थपौरुषीमदत्वा यो भिक्षावेलात अर्वाक् द्वे गव्यूते व्रजति सोऽपि पराक्रमो विहर्तुं चशब्दो-ऽनुक्तसमुच्चयार्थः । स चैतत्सूत्रं पौरुषीमर्थपौरुषीं वा दत्वा भिक्षावेलात आरतो यो द्वे गव्यूते याति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषोऽपि सपराक्रमो विहर्तुमिति, । एवमेतत्त्रयः प्रकारा गव्यूतद्वयेऽभिहिताः । एत एव त्रयः प्रकारा द्वार्द्धगव्यूते द्रष्टव्याः । एतेषु च त्रिष्वपि द्विकद्वार्धगव्यूतरूपेषु तस्यानुकम्पा विश्रामणादिरूपा वक्ष्यमाणा कर्तव्या ।। सम्प्रति चशब्दसूचितं तृतीयं प्रकारमुपदर्शयति—

[भा.२२६१] खेत्तेण अद्धजोयण कालेणं जाव भिक्खवेलाओ ।
खेत्तेणं कालेण य, जाणसु सपरक्कमं थेरं ।।

वृ- सूत्रपौरुषीमर्थपौरुषीं वा कृता कालतः प्रातर्वेलात आरभ्य यावभ्दिक्षावेला भवति, तावत् यः क्षेत्रतोऽर्धयोजनं गव्यूतद्वयप्रमाणं व्रजति, तं जानीत क्षेत्रतः । कालतश्च सपराक्रमं स्थविरं तदेवं गव्यूतद्वयविषये चशब्दः सूचितः तृतीयः प्रकारत्रयदर्शित एवं द्व्यर्द्धगव्यूतेऽपि च द्रष्टव्यस्तथा चैतदर्थाख्यापनार्थमेव गव्यूतविषयं तृतीयं प्रकारमाह—

[भा.२२६२] जो गाउयं समत्थो, सूरादारब्भ भिक्खवेलाओ ।
विहरउ एसो सपरक्कमो उ नो विहरे तेन परं ।।

वृ- यः सूरात्सूरोद्गमादारभ्य यावद्भिक्षावेला भवति तावत् गव्यूतं गन्तुं समर्थ एषोऽपि सपराक्रम इति विहरतु । ततः परं गव्यूतमिति तावता कालेन गन्तुमशक्नुवन् नो विहरेत्, । इदमुक्तं त्रिष्वपि गव्यूतद्वयादिष्वनुकम्पा कर्तव्येति । तत्र तामेवानुकम्पामाह—

[भा.२२६३] वीसामण उवगरणे, भत्ते पाने वलंवणे चेव ।
गाउय दिवड्ढदोसुं अनुकंपे सा तिसुं होइ ।।

वृ- अन्तरान्तरा यत्र विश्रामणार्थं तिष्ठति, तत्र विश्राम्यते उपकरणे उपकरणविषयोऽनुकम्पा कर्तव्या, यत्तस्योपकरणं तदन्ये वहन्ति, । यैश्च तस्य शीतं न भवति तादृशानि वस्त्राणि देयानि, । तथा भक्तं पानं च तत्प्रायोग्यं शुद्धं न लभ्यते । तदा पञ्चकपरिहान्या तदुत्पादनीयं, यत्र च विषमं तत्र बाहुप्रदानादिनाऽवलम्बनं कर्तव्यम् । च शब्दात्स तेन कालेनोद्यालनीयो यस्मिन्नुष्णादिभिर्न परिताप्यते एषानुकम्पा त्रिषु गव्यूतद्व्यर्धगव्यूतद्विगव्यूतेषु भवति ज्ञातव्या । अथवा त्रिष्वनुकम्पेति प्रकारान्तरेण व्याख्यानयति ।।

[भा.२२६४] अहवा आहारुवही सेज्जा अनुकंप एस तिविहा उ ।
पढमालिदानविस्सामणादि उवही य वोढव्वे ।।

वृ- अथवा आहारे उपधौ शय्यायां च । या अनुकम्पा एषा त्रिविधानुकम्पा भवति । तत्राहारे प्रथमालिकादानं, शय्यायां गतस्य विश्रामणादिमार्गे चोपधिर्वोढव्यः । साम्प्रतमपराक्रममाह—

[भा.२२६५] खेत्तेण अद्धगाउय कालेन य जाव भिक्खवेलाओ ।
खेत्तेण य जाणसु, अपरक्कमं थेरं ।।

वृ- यः कालगतः सूरोद्गमादारभ्य यावद्भिक्षावेला तावत् यः क्षेत्रतोऽर्धगव्यूतं याति तं क्षेत्रतः कालतश्च जानीतापराक्रमं स्थविरम् ।।

[भा.२२६६] अन्नो जस्स न जायइ दोसो देहस्स जाव मज्झण्हो सो ।
विहरइ सेसो, पुन अच्छति मा दोण्हवि किलेसो ।।

वृ- प्रातरारभ्य यावन्मध्याह्नस्तावत्तस्य गच्छतो देहस्यान्यो दोषो भ्रम्यादिलक्षणो नोपजायते स विहरति शेषः पुनस्तिष्ठति कस्मादित्याह-मा द्वयानामपि तस्य सहायानां च क्लेशो भूयादिति हेतोरन्यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषो न ज्ञायते इत्युक्तं । तत्रान्यं दोषमाह–

[भा.२२६७] भमो वा पित्तमुच्छा वा उद्धसासो व खुब्भति ।
गति विरए वि संतं मुच्छादिसु न रीयति ।।

वृ- यस्मिन् गति विरतेऽपि सति भ्रम आकस्मिकी भ्रमिः पित्तनिमित्ता मूर्च्छा उर्ध्वश्वासो वा क्षुभ्यति चलति । आदिशब्दात् शिरोव्यथादिपरिग्रहो न रीयते, न गच्छति न विहारक्रमं करोतीति भावः, तस्य चापराक्रमस्य वृद्धावासेन तिष्ठतः सहाया दातव्यास्तेषां परिमाणमाह–

[भा.२२६८] चउभागतिभागद्धे सव्वेसिं गच्छलो परीमाणं ।
संतासंतसतीए वुड्ढावासं वियाणाहि ।।

वृ- गच्छतो गच्छमधिकृत्य साधूनां परिमाणं कृत्वा सर्वेषां चतुर्भागस्त्रिभागोऽर्धं वा साहाय्यास्तस्य वृद्धावासप्रतिपन्नस्य दीयन्ते, । तत्र त्रिभागोऽर्द्धं वा दीयन्ते । संतासंतसतीए सद्भावेनासद्भावेन चेत्यर्थः । तत्र सद्भावे सन्ति साधवो भूयांसः केवलमगीतार्थास्ततस्ते सन्तोऽप्यसन्तः, । असद्भावो न सन्ति बहवः साधवः । एवं वृद्धावासं ससहायं जानीहि । ततो गच्छतः साधूनां परिमाणं ज्ञात्वा परिमाणं ज्ञात्वा सर्वेषां चतुर्भङ्गसहाया दातव्या इत्युक्तं ततो गच्छपरिमाणं जघन्यादिभेदत आह–

[भा.२२६९] अट्ठावीस जहन्नेण उक्कोसेण सयग्गसो ।
सहाया तस्स जेसिं तु उवट्ठाणा न जायति ।।

वृ- गच्छस्य परिमाणं जघन्यतोऽष्टाविंसतिरुत्कर्षतशताग्रशः शतादारभ्य यावद्द्वात्रिंशत् सहस्त्राणि तत्राष्टाविंशतिकस्य गच्छस्य चतुर्भागः सप्त एतावन्तः सहायास्तस्य दातव्याः यैरुपस्थापना उप सामीप्येन सर्वदावस्थानलक्षणेन तिष्ठन्त्यस्यामिति उपस्थापना शय्या अजादिपाठात् प्रत्ययः नित्यवसतिर्न जायते । इयमत्र भावना । प्रतिमासमन्यान्या वसतिर्न लभ्यते स चालाभो द्विधा-सदलाभोऽसदलाभश्च । तत्र सदलाभो नाम लभ्यन्ते वसतयः किन्त्वकल्पिका, असदलाभो मूलत एव न लभ्यन्ते वसतयः, । एवं सदलाभेनासदलाभेन वा प्रतिमासमन्यान्यवसत्यलाभे एकस्यामेव वसतौ जङ्घाबलपरिक्षीणो वसति । तस्य च सहाया अष्टाविंशतिकस्य गच्छस्य चतुर्भागमात्राः सप्त प्रदत्तास्ते ऋतुबद्धे काले एकं मासं स्थित्वा गच्छं व्रजन्ति, । अन्य सप्त सहाया स्थविरस्यागच्छति, तेऽपि द्वितीये मासे परिपूर्णे गतास्ततोऽन्ये सप्तागच्छन्ति तेऽपि तृतीयमासे पूर्णेगतास्ततोऽन्ये सप्त सहाया आयान्ति तेऽपि चतुर्थमासं स्थित्वा गच्छं व्रजन्ति, ये प्रथमे मासे सप्तागच्छन्ते भूयः समागच्छन्ति, एवं त्रिमासांतरितः सर्वेषां पुनर्वारको भवति एवं वारेण वारेणागमने तै र्नित्यवसति दोषः परिहती भवति, अथ सदभावेनाष्टाविंशते रूनो गच्छो वर्तते यावदेकविंशतिकस्तस्य त्रिभागे सप्त तेषां द्विमासांतरितो वारको भवति, तथैव सद्भावेन वा यदि चतुर्दशको गच्छो भवति तदा तेषामर्द्धेन सप्त तेषामेकमासान्तरितः पुनर्वारकः एवं प्रतिमासमन्योन्यवसत्यभावे वृद्धस्यैवैकस्य वृद्धावासो भवति न तु सहायानामथ सदभावेन असद्भावेन वा चतुर्दश गच्छे न सन्ति, तदा ते एव सप्तजना चिरकालमपि तिष्ठन्तो यतनया तं वृद्धं परिपालयन्ति । अमुमेवार्थमभिधित्सुराह–

[भा.२२७०] चत्तारिगा तिन्नि दोन्नि एक्को व होज्ज असतीए ।
संतासई अगीय ऊणाउ असंतउ असती ।।

वृ- चत्वारः सप्तका वारेण वारेण वृद्धपरिपालनाय प्रेषणीयाः । असति सदभावेनवाष्टाविंशतेरभावे

त्रयः सप्तका वारेण प्रेष्यास्तावतामप्यभावे द्वौ सप्तकौ वारेण पेष्यौ तयोरप्यभावे एकः सप्तकः सदावस्थायी तत्परिपालको भवेत् । सद्भावेनासद्भावेन वा असतीत्युक्तं तत्र सदभावं च व्याख्यानयति । सन्तासतासदभावो नाम यदगीतार्थाः ते हि सन्ति भूयांसः परं ते सन्तोऽप्यसन्तो वृद्धस्य सहायकार्येष्वसमर्थत्वात् । असंते उ असती असदभावः । स्वभावतोप्यूनाः । अथ कस्मात्सप्तसहायाः क्रियन्ते न न्यूना इत्याह–

[भा.२२७१] दो संघाडा भिक्खं एक्को बहि दोय गेण्हए थेरं ।
आलित्तादिसु जयणा इहरा परितापदाहादी ।।

वृ- द्वौ सङ्घाटौ भिक्षां हिण्डेते । एकोबहिर्वसतेस्तिष्ठति रक्षकः, द्वौ च स्थविरं गृह्णीत एवं सप्तसु सत्सु आदीप्तादिषु प्रदीपनादिषु यतना भवति । इतरथा परितापदाहादिकं वृद्धादेरुपजायते । अथ सदभावेना सदभावेन वा सप्तको गच्छो न विद्यते, किन्तु षष्ठादिकस्तदापि सर्वेऽपि वृद्धावासिका भवन्ति यतनया च तं परिपालयन्ति । तामेव यतनामाह–

[भा.२२७२] आहारे जयणा वुत्ता, तस्स जोगे य पाणए ।
निवाग मनुए चेव, छविताणेसणादिसु ।।

वृ- तस्य वृद्धस्य योग्ये आहारे पानके उपाश्रये निवाते छविस्त्राणं वस्त्रं तस्मिन्मृदुके च एषणीयानि तदलाभे पञ्चक परिहान्याप्युत्पादनीयानि यानि तदेवमुक्ताचतुर्विधा यतना ।।

सम्प्रति प्रकारान्तरेण चतुर्विधामेव यतनामाह–

[भा.२२७३] वुड्ढावासे जयणा खेत्ते काले वसहि संथारे ।
खेत्तंमि नवगमादी परिहाणी एक्कहिं वसइ ।।

वृ- वृद्धावासे यतना चतुर्विधा । तद्यथा-क्षेत्रे, काले, वसतौ, संस्तारे च । तत्र क्षेत्रे नवकोटिविभागः नवकमादिं कृत्वा एकैकविभागे परिहान्या तावद्वस्तव्यं यावदेकस्मिन्नपि भागे चिरकालं वसति, । इयमत्र भावना-क्षेत्रे नव भागान् करोति, । तत्रैकस्मिन् भागे वसतिं गृहीत्वा तस्मिन्नेव भागे संस्तारकभिक्षादीनि निर्दिशति, । शेषान्यष्टौ भागान्परिहरति । तांस्तु तावत्परिपूर्णो मार्गशीर्षस्ततो द्वितीये पोष मासे द्वितीये भागे वसत्यादि गृह्णाति, शेषानष्टौ भागान्परिहरति । एवं तृतीयादिषु विभागेषु माघादय आषाढान्ता मासा नेतव्याः । वर्षाकाले चतुरो मासान् नवमे भागे वसत्यादि गृह्णाति शेषानष्टौ भागान्परिहरति तथाविधभिक्षाद्यलाभे नव वसतयोऽष्टौ भिक्षादियोग्या भागाः परिकल्पनीयाः । वसत्यलाभे अष्टौ भागा वसतियोग्या नवभागा भिक्षादियोग्या, वसत्यलाभे भिक्षाद्यलाभे चाष्टौ वसति भागा अष्टौ भिक्षादिभागा एवं त्रिभिः प्रकारैरेकैकभागपरिहान्या तावत् ज्ञेयं यावदेकस्मिन् भागे वसति भिक्षादीनि च गृह्णाति ।

[भा.२२७४] भागे भागे मासं काले वी जाव एक्कहिं सव्वं ।
पुरिसेसुवि सत्तण्हं असतीए जाव एक्को उ ।।

वृ- ऋतुबद्धे काले भागे भागे मासं कुर्यात् । अलाभे च सति भिक्षादीनां च पूर्वप्रकारेणैकैक-परिहान्या तावद्यतेत यावत्कालेऽपि ऋतुबुद्धकालेऽपि सर्वं वसत्यादिकमेकस्मिन् भागे गृह्णीयात् पुरुषेष्वपि सहायभूतेषु चिन्तायां सप्तानामभावे एकैक परिहान्या तावद्यतना विधेया यावदेकोऽपि सहायो भवत्विति ।।

[भा.२२७५] पुव्वभणिया उ जयणा, वसही भिक्खे वियारमादी य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वे य होइ इहं, वुड्ढावासे वसंताणं ।।

वृ- पूर्वमोघनिर्युक्तौ कल्पाध्ययने वा या वसतौ भिक्षायां विचारादौ च यतना भणिता महता प्रबन्धेन, सैव चेह वृद्धवासे वसतां भवति ज्ञातव्या, । उक्ता क्षेत्रयतना ।। काल्यतनामाह–

[भा.२२७६] धीरा कालच्छेयं, करेंति अपरक्कमा तहिं थेरा ।
कालं वा विवरीयं करेंति तिविहा तहिं जयणा ।।

वृ- धीरा बुद्धिमन्तः संयमकरणोद्यता अप्रमादिनोऽपराक्रमा जङ्घा बलपरिहीनाः स्थविरास्तत्र वृद्धवासे कालच्छेदं कुर्वन्ति ऋतुबद्धे काले अष्टसु मासेषु प्रतिमासमन्यान्यवसतिभिक्षादिग्रहणतो वर्षासु चतुरो मासान् एकवसत्येकभागभिक्षादिग्रहणतस्तदभावे पूर्वोक्तयतना कालत्रुटिं कुर्वन्ति । तथा कालमविपरीतं च कुर्वन्ति । ऋतुबद्धे काले वर्षाकालकल्पं वर्षासु ऋतुबद्धकालकल्पं न कुर्वन्तीति भावः, तथा त्रिविधा यतना तत्र ऋतुबद्धे काले च कर्तव्या साम्प्रतं विपरीतमेव कालं –

[भा.२२७७] अव्विवरीतो नामं कालो उवठाण दोसपरिहरति ।
असती वसहीए पुन अव्विवरीओ उवठेवि ।।

वृ- अविपरीतो नाम कालः क्रियमाण एष यत् काले ऋतुबद्धे प्रतिमासमन्यान्यवसतिभिक्षादि ग्रहणत उपस्थान् दोषान् नित्यवासदोषान् परिहरति । असत्यभावे वसतेरुपलक्षणमेतत् । भिक्षाद्यभावे च उपस्थेऽपि एकस्यां वसतौ सततमवस्थितेऽपि यतना कर्तव्या; ।

[भा.२२७८] तिविहा जयणाहारे उवहीसेज्जासु होइ कायव्वा ।
उग्गमसुद्धानि तिवि असईए पणगपरिहाणी ।।

वृ- आहारे उपधौ शय्यासु च वसतिषु का यतनेत्यत आह-त्रीण्यपि प्रथमत उद्गमादिशुद्धानि उद्गमोत्पादनैषणाशुद्धानि गृहीतव्यानि तेषामसत्यभावे पञ्चकपरिहान्यापि समुत्पादनीयानि गता कालयतना ।। सम्प्रति वसतियतनामाह–

[भा.२२७९] सेलियकाणिट्टघरे पक्केट्टामेय पिंडदारुघरे ।
कटितं कडग तणघरे चोवत्थ होंति चउ गुरुगा ।।

वृ- शैलिकं नाम पाषाणेष्टकाभिः कृतं । काणिट्टत्ति लोहमय्य इष्टकास्ताभिः कृतं गृहं काणेष्टकागृहं, पक्के इति क्वेष्टकागृहं आमेय इति आमा अपक्कास्ताभिरिष्टकाभिः कृतं गृहमामेष्टकागृहं पिण्डदारु घरमिति गृह शब्दः प्रत्येकमभिसम्बध्यते । पिण्डगृहं च्चिकखल्लपिण्डैर्निष्पादितं, दारुगृहं करपत्रस्फाटितदारुफलमयगृहं, कटितं कडगति वंशदलनिर्मापितकटात्मकं गृहं कटकगृहं, तृणगृहं वृक्षादितृणमयं, एतेषां सति लाभे प्रथमं गृहीतव्यम् । तदभावे द्वितीयं एवं शेषाण्यपि भावनीयानि । यदि पुनः सति विपर्यस्तं कुर्यात् तदा विपर्यस्ते विपर्यासे प्रायश्चित्तं भवति चत्वारो गुरुकाः ।। तत्राद्येषु चतुर्षु गृहेषु यो गुणो भवति तमविधित्सुराह–

[भा.२२८०] कोटिमघरे वसंतो आलित्तमिव्वि न डज्झती तेन ।
सेलादीणं गहणं, रक्खत्ति य निवायवसही उ ।।

वृ- कोटिमुपरिबद्धभूमिकं गृहं तच्च शिलादिमयं तस्मिन् वसन् आदीप्तेऽपि प्रदीपनकेऽपि न दह्यते । तत्रग्नेः प्रवेशासंभवात्, तेन कारणेन शैलादीनां ग्रहणं । तथा रक्षति निवाता वसतिः शीतादिकमिति वा शैलादिग्रहणमकारि । उक्ता वसतियतना ।। सम्प्रति संस्तारक यतनामाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२२८१] थिरमउस्स असती अपडिहारिस्स चेव वच्चंति ।
बत्तीस जोयणाणि वि आरेण अलब्भमाणम्मि ।।

वृ- यो वसतौ यथा संस्तृतश्चम्पकपटोऽन्यो वा स्थिरमृदुकः संस्तारको अप्रतिहार्यः स गृहीतव्यः । तस्याभावे वसतेरेव सम्बन्धि य निवेशनं गृहं तस्यदानेतव्यस्तस्याप्यलाभे वाटकाद्बहिष्टो-ऽप्यानेतव्यस्तत्राप्यसति स्वग्रामे दूरन्तेऽपि तत्राप्यलाभे परग्रामादर्धकोशात्तथाप्यलाभे कोशादपि एवमर्धकोशवृद्ध्या तावद्गन्तव्यं याव दुत्कर्षतोऽपि द्वात्रिंशतो योजनेभ्योऽपि । तथा चाह-मृदुकस्याप्रतिहार्यस्य संस्तारकस्य वसत्यादावलाभेऽप्रतिहार्यस्यैव संस्तारकस्यानयनाय परग्रामे व्रजन्ति । तत्र च आरतोऽलभ्यमाने द्वात्रिंशति योजनान्यपि यावत् व्रजन्ति । एतदेव सुव्यक्तमाह—

[भा.२२८२] वसहि निवेसन साही दूरानयनंपि जो उ पाउग्गो ।
असतीए पाडिहारिय मंगलकरणंमि नीणंति ।।

वृ- वसतौ यथा संस्तृत स्थिरमृदुकः संस्तारको मृगणीयस्तदभावे निवेशने अप्रतिहार्ये गवेषणीयस्तत्राप्यलाभे साहीत्ति वाटके तत्राप्यलाभे यः प्रायोग्योऽप्रतीहार्यः संस्तारकस्तस्य दूरादपि द्वात्रिंशद्योजनप्रमाणानयनं कर्तव्यं, । एवमपि तथा रूपन्या प्रतिहार्यस्य संस्तारकस्या सति अलाभे प्रतिहार्ये मंगलकरणे मंगलकरणनिमित्तं ध्रियमाणं नीणयन्ति आनयन्ति एतदेव स्पष्टतरमाह—

[भा.२२८३] उगाली कणगं पुन मंगलबुद्धीए सारविज्जंतं ।
पुनरवि मंगलदिवसे अच्चियमहियं पवेसिंति ।।

वृ- उगालं फलकं नाम आर्यकप्रायकप्रभृतीनामावल्या समागतं चम्पकपटादिफलकं मंगलबुध्या सारविज्जंतं ध्रियमाणं, तथाहि-ते मङ्गलबुध्या तं फलकं धरन्ति । उत्सवादिषु च तं फलकं श्रीखण्डादिना अर्चयन्ति, । पुष्पादिभिर्महयन्ति न च कोऽपि तं फलकं परिभुङ्क्ते, एवं मङ्गलबुध्या साराप्यमानं साधवो याचन्ते । यथास्माकमाचार्याः स्थविरास्तेप्रामिदं फलकं प्रातिहार्यं समश्यत, अस्माकं विरतानां पूज्यास्ते देवानामपि पूज्याः । किं पुनर्युष्माकं ते एवमुक्ताः सन्तो ब्रूवते-सत्यं दद्मः केवलमुत्सवदिवसे आनेतव्यो येन वयं पूजयामस्ततः पुनरपिदास्यामः एव मुक्ते तं नीत्वा उत्सवदिवसे तस्यां पूजावेलायां प्रेषयंति, येना पक्कण उत्वक्कण दोषा न भवंति ततः पुनरपि तस्मिन् मंगल दिवसे अर्चितमहितं चंपकादिपट्टं कृतं वसतौ प्रवेशयंति—

[भा.२२८४] पुन्नंमि अप्पणंती अन्नस्स व वम्ढवासिणो देंति ।
मुत्तूण वुड्ढवासिं, आवज्जइ चउलहु सेसे ।।

वृ- पूर्वे वृद्धवासे कालगतत्वादिना यस्य सत्कश्चम्पकादिपट्ट स्तस्य तं समर्पयन्ति । अन्यस्य वा वृद्धवासिनो ददाति । वृद्धवासिनं मुक्त्वा यद्यन्यस्य शेषस्य समर्पयन्ति ततः शेषे शेषस्य समर्पणे तेषां प्रायश्चित्तमापद्यते चतुर्लघु इदृशस्य फलकस्यालाभे यदन्यत् अपरिशाटिफलकं तद प्रातिहार्यं मृगयन्ते । तदलाभे प्रातिहार्यमपि । एवं क्षेत्रकालवसतिसंस्तारकयतना कर्तव्या, । एकतरयतनाविभागासंभवे त्रिविभाग यतना कर्तव्या । तस्या अप्यसंभवे एकविभागापीति गतं जङ्घाबलं क्षीणमिति द्वारम् ।।

[भा.२२८५] पडियरति गिलाणं वा सयं गिलाणो वि तत्थवि तहेव ।
भाविय कुलेसु अत्थति असहाए रीयते दोसा ।।

वृ- प्रतिचरति ग्लानं, यदि वा स्वयं ग्लानो जातस्ततस्तस्य वृद्धवासो भवति । तत्रापि तथैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रकालवसतिसंस्तारकयतना द्रष्टव्या । गतं ग्लानद्वारम्, असहायताद्वारमाह-भावितकुलेषु संविग्नभावितेषु कुलेष्वसहायः सहायहीनस्तिष्ठति । यतस्तस्य रीयमाणस्य विहरतो बहवो दोषाः स्त्र्यादिभ्यः । गतमसहायद्वारम् ।। सम्प्रति दौर्बल्यद्वारमाह–

[भा.२२८६] उमादी तवसा वा अचइंतो दुब्बलोवि एमेव ।
संतासंतसतीए बल्करदव्वे य जयणा उ ।।

वृ- अवमं दुर्भिक्षं, आदिशब्दात् नगररोधादिपरिग्रहस्तत्रावमौदर्येण दुर्बलीभूतो न शक्नोति विहर्तुं तपसा वा क्षामीभूतः । कथमित्याह संतासंतसतीए-सदभावे न वासदभावेन वा । तत्रसदभावो लभ्यते, यथातृप्तिभक्ष्यं केवलमन्तं प्रान्तं तेन क्षामीभूतोऽसदभावो यथा तृप्ति भक्ष्यस्यैवाभावः स तथा क्षामीभूतो विहर्तुमशक्नुवन् । एवमेव क्षीणजङ्घाबलगतेन प्रकारेण तिष्ठति, । केवलं तेन बल्करद्रव्यैर्यतना कर्तव्या । प्रथमत उद्गमादिशुद्धं तदुत्पादनीयं । तदभावे पञ्चकपरिहान्यापि । ततो बलिकीभूतो विहरति । गतं दौर्वल्यद्वारम! ।। साम्प्रतमुत्तमार्थद्वारमाह–

[भा.२२८७] पडिवन्नउत्तमट्ठे, पडियरगा वा वसंति तन्निसा ।
आयपरे निप्पत्ती कुणमाणो वावि अच्छेज्जा ।।

वृ- प्रतिपन्न उत्तमार्थोऽनशनं येन स प्रतिपन्नोत्तमार्थः । स वा तस्य वा प्रतिचारकस्तन्निश्रा उत्तमार्थप्रतिपन्ननिश्रा मासातीतं वर्षाकालातीतं वा तिष्ठन्ति । यतमुत्तमार्थद्वारम् ।। अधुना तरुण निष्पत्तिद्वारमाह-आत्मनश्च परस्य च सूत्रार्थतदुभयेन निष्पत्तिं कुर्वन्वा वृद्धवासेन तिठेत् कियन्तं कालमत आह–

[भा.२२८८] संवच्छरं च झरए बारसवासाइ कालियसुयम्मि ।
सोलस य दिठिवाए एसो उक्कोसतो कालो ।।

वृ- संवत्सरं यावत् कालिकश्रुतं झरति परावर्तयति । ग्रहणे पुनः कालिकश्रुते कालिकश्रुतस्य लगन्ति द्वादशवर्षाणि । दृष्टिवादग्रहणमधिकृत्य षोडश वर्षाणि । एष एतावान् आत्मपरनिष्पत्तिमधिकृत्यैकत्रा-वस्थानस्योत्कृष्टतः कालः एतदेव सुव्यक्तमाह–

[भा.२२८९] बारसवासे गहिए उक्कालियं झरति वरसमेगंतु ।
सोलस न दिठिवाए गहणं झरणं दसदुवे य ।।

वृ- द्वादश वर्षाणि यावत् यत्परिपूर्णं गहीतं कालिकश्रुतं तत् वर्षमेकं झरति एकेन वर्षेण परावर्त्यते । ग्रहणमधिकृत्य दृष्टिवादे षोडश वर्षाणि लगन्ति । झरणमधिकृत्य पुनर्दश द्वे च द्वादश वर्षाणीत्यर्थः । ततो ग्रहणं झरणं वाधिकृत्य तावन्तं कालमेकत्रावतिष्ठते । अत्र पर आह–

[भा.२२९०] झरए य कालियसुए पुव्व गए जइ एत्तिउ कालो ।
आयारपकप्पनामे कालच्छेदे उ कयरेसिं ।।

वृ- कालिकश्रुते च पूर्वगते च श्रुते झरके च शब्दात् ग्राहके च यदि एतावान् कालो लगति तर्हि आचार प्रकल्पनाम्नि निशीथेऽध्ययने योऽसौ कालच्छेदः कृतो यथा ऋतुबद्धे मासमासितव्यं । वर्षासु चतुरो मासानिति स कतरेषां द्रष्टव्यः ? । सूरिराह–

[भा.२२९१] सुत्तत्थ तदुभएहिं जे उ सत्तमा महिड्डिया थेरा ।
एएसिं तु पकप्पे भणितो कालो निययसुत्ते ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- सूत्रार्थतदुभयैर्ये समासा महिर्धिकाः स्थविरा एतेषामाचारप्रकल्पे नैत्यिकसूत्रे भणितः कालो द्रष्टव्यः । न तु सूत्रार्थग्राहकाणामपि ग्रहणे झरणे च तावानुत्कृष्टः कालो तथा गलन् संभवति ।

[भा.२२९२] थेरे निस्सणेणं कारणजातेन एत्ति उ कालो ।
अज्जाणं पणगं पुन नवगग्गहणं तु सेसाणं ।।

वृ- स्थविरे जङ्घाबलपरिक्षीणे निश्रणेन निश्रया कारणजातेन आत्मपरनिष्पत्तिलक्षणेन जातेन कारणेन । एतावान् पूर्वोक्तप्रमाण एकत्र स्थाने उत्कृष्टकालो भवति आचार्याणाम्, आर्यिकानां पुनर्वृद्धवासमावसन्तीनां पञ्चकं क्षेत्रपञ्चकं भवति । तद्यथा-स बाह्ये क्षेत्रे द्वौ भागौ, बहि र्द्वौ भागावन्त एकैकस्मिंश्च क्षेत्रविभागे द्वौ द्वौ मासाववस्थानं । पञ्चमो वर्षरात्रयोग्यः क्षेत्रविभागः । शेषाणां साधूनां पुनः कारणवशत एकत्र स्थितानां नवकग्रहणं नवभिर्भागैः क्षेत्रकारणं । इह ये जङ्घाबलपरिक्षीणाः स्थविरास्तेषां समीपे आत्मपरनिष्पत्ति मिच्छतां यादृशाः सहाया दातव्याः तादृशानभिधित्सुराह–

[भा.२२९३] जे गेण्हिउं धारिउं च जोग्गा, थेराण ते दिंति सहायहेउ ।
गेण्हंति ते ठाणड्डिया सुहेणं, किच्चं च थेराण करेंति सव्वं ।।

वृ- सूत्रमर्थं च ये गृहीतुं धारयितुं च योग्यास्तान्सहायकान् स्थविराणां ददति । ततस्ते स्थानस्थिताः कालिकश्रुतं दृष्टिवादं वा सुखेन गृह्णन्ति, । कृत्यं च सर्वं स्थविराणां कुर्वन्ति, एवं तेषां ग्रहणे झरणे च पूर्वोक्त उत्कृष्टः काल एकत्रावस्थाने भवति । गतं तरुणनिष्पत्ति द्वारम् । । अधुना क्षेत्रालाभद्वारमाह–

[भा.२२९४] आसज्ज खेत्तकाले, बहुपाउग्गा न संति खेत्ता वा ।
निच्चं च विभत्ताणं, सच्छंदादी बहू दोसा ।।

वृ- आसद्य प्रतीत्य क्षेत्रकालौ । तद्यथा अन्येषु क्षेत्रेष्वशिवादीनि कारणानि, यदि नास्ति साम्प्रतमन्येषु क्षेत्रेषु तादृशः कालो येन संस्तरति । अथ बहु प्रायोग्यानि महागणप्रायोग्यानि न सन्ति क्षेत्राणि । यदि पुनर्महतो गणस्य विभागः क्रियते । ततो विभक्तानामद्याप्यपरिनिष्पन्नत्वेनागीतार्थानां नित्यमवश्यं स्वच्छन्दादयो दोषा भवन्ति । एतैः कारणै ऋतुबद्धातीतं वर्षातीतं च कालमेकक्षेत्रे यतनया तिष्ठन्ति । अधुना कृतसलेखद्वारं तरुणप्रतिकर्मद्वारं चाह–

[भा.२२९५] जह चेव उत्तमट्ठे कयं संलेहम्मि ठंति तह चेव ।
तरुण पडिकम्मं पुन रोगविमुक्के बलविवड्ढी ।।

वृ- यथा चैवं उत्तमार्थे प्रतिपन्ने तिष्ठन्ति तथा चैवं कृतसंलेखेऽपि तिष्ठन्ति । इयमत्र भावना-यथा प्रतिपन्नोत्तमार्थस्तत् प्रतिचारका वा तन्निश्रया एकत्र वसन्ति । एवं प्रतिपन्नसंलेखनास्तत्प्रति-चारकाश्चैतनिश्राएकत्रस्थाने वसन्ति । तरुणप्रतिकर्म नामरोग विमुक्तस्य सतस्तस्य बलविवृद्धिकरणं तन्निमित्तं मासातीतं वर्षातीतं च कालं तिष्ठन्ति ।।

[भा.२२९६] वूड्ढावासातीते, कालातीतेन उग्गहो तिविहो ।
आलंबणे विसुद्धे उग्गहो तक्कज्ज वुच्छेओ ।।

वृ- वृद्धवासातीते मरणेन । प्रतिभग्नतया वा । आरोगीभवनेन वा झरणेन वा वृद्धवासे अतीते कालेऽतीते ऋतुबृद्धे काले मासाधिके काले वर्षासु चतुर्मासाधिके अवग्रहस्त्रिविधोऽपि न भवति, सचित्तस्याचित्तस्य मिश्रस्य चे ग्रहणं न कल्पते इति भाव; । कुत इत्याह- आलम्बणे वृद्धवासलक्षणे विशुद्धे परिसमाप्ते यस्तत्कायभूतोऽवग्रहस्तस्यापि व्यवच्छेदो भवति । कारणाभावे कार्यस्याभावत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्तु मन्यते कालतीते विनावग्रहस्य व्यवच्छेदस्तं प्रति दृष्टान्तमाह—

[भा.२२९७] आगास कुच्छि पूरो, उग्गहपडिसेहियम्मि जो कालो ।
न हु होंति उग्गहो सो कालदुवे वा अनुन्नातो ।।

वृ- यथा कोऽपि पुरुषो बुभुक्षया पीडितः सन् चिन्तयति पूरयाम्युदरमाकाशेन येन मे बुभुक्षापगच्छति । स यथा आकाशस्य एवमव गृहे प्रतिषेधितो यः कालो वर्ततेऽस्मिन्नुत्पादितः सो उग्गहोऽवग्रहो न भवति प्रतिषिद्धकालाचीर्णत्वात् । अथवा प्रकारान्तरेण कालद्विकेऽनुज्ञातोऽवग्रहः ।

[भा.२२९८] गिह्माण चरिम मासो, जहिं कतो तत्थ जति पुनो वासं ।
ठायंति अन्नखेत्तासत्तीए दोसुंपि तो लाभो ।।

वृ- यत्र गीष्माणां उष्णकालस्य चरमपश्चादाषाढानामा मासः कृत स्तत्र यदि पुनरन्यक्षेत्रासति तथाविधान्यक्षेत्रभावतो वर्षं वर्षाकाले तिष्ठन्ति । ततो द्वयोरपि कालयोः ग्रीष्मचरममासे वर्षा चेत्यर्थः लाभो भवति एवं कारणतो द्वयोरपि कालयोः सचित्तादिलाभोऽनुज्ञात इत्यर्थः ।।

[भा.२२९९] एवमेव समतीते वासे तिन्नि दसगा उ उक्कोसा ।
वासनिमित्तट्ठियाणं उग्गहो छम्मास उक्कोसा ।।

वृ- एवमेव अनेनैव प्रकारेण वर्षे वर्षाकाले समतीते यदि मेघो वर्षति ततोऽन्यद्दिवसदशकं स्थीयते, तस्मिन्नपि समातिमुपगते यदि पुनवर्षति ततो द्वितीयदिवसदशकं स्थातव्यम्, तस्मिन्नप्यतीते पुनर्वृष्टौ तृतीयमपि दिवसदशकं तिष्ठति, एवं उत्कर्षतस्त्रीणि दिवसदशकानि वर्षा निमित्तस्थितानामुत्कृष्टतोऽवग्रहः षण्मासः षण्मासप्रमाणो भवति । तद्यथा एको ग्रीष्मचरममास श्चत्वारो वर्षाकालमासाः षष्ठो मार्गशीर्षो दिवसदशकत्रयलक्षण इति ।।

उद्देशक : ४ समाप्त

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहारसूत्रे चतुर्थोद्देशकस्य (भद्रबाहु स्वामि रचितानिर्युक्तियुक्तं) संघदासगणि विरचित्तं भाष्यं एवं मलयगिरि आचार्य विरचिता टीका परिसमाप्ता ।

उद्देशक - ५

उक्तश्चतुर्थ उद्देशकः, अधुना पञ्चमो वक्तव्यः तत्रेदमादिसूत्रकदम्बकम्-

मू. (१२७) *नो कप्पइ पवत्तिणीए अप्पबिइयाए हेमंतगिम्हासु चारए ।*

मू. (१२८) *कप्पइ पवत्तिणीए अप्पतइमाए हेमंतगिम्हासु चारए ।*

मू. (१२९) *नो कप्पइ गणावच्छेइणीए अप्पतइयाए हेमंतगिम्हासु चारए ।*

मू. (१३०) *कप्पइ गणावच्छेइणीए अप्पचउत्थाए हेमंतगिम्हासु चारए ।*

मू. (१३१) *नो कप्पइ पवत्तिणीए अप्पतइयाए वासावासं वत्थए ।*

मू. (१३२) *कप्पइ पवत्तिणीए अप्पचउत्थाए वासावासं वत्थए ।*

मू. (१३३) *नो कप्पइ गणावच्छेइणीए अप्पचउत्थाए वासावासं वत्थए ।*

मू. (१३४) *कप्पइ गणावच्छेइणीए अप्पपञ्चमाए वासावासं वत्थए ।*

मू. (१३५) *से गामंसि वा....जाव संनिवेसंसि वा रायहाणिंसि बहुणं पवत्तिणीणं अप्पतइयाण*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहूणं गणावच्छेइणीणं अप्पचउत्थाणं कप्पइ हेमंतगिम्हासु चरए अन्नमन्नं नीसाए ।

मू. (१३६) से गामंसि वा....जाव संनिवेसंसि वा बहूणं पवत्तिणीणं अप्पचउत्थाणं बहूण गणावच्छेइणीणं अप्पपञ्चमाणं कप्पइ वासावासं वत्थए अन्नमन्नं नीसाए ।

मू. (१३७) गामाणुगामं दूइज्जमाणा निग्गंथी य जं पुरओ काउं विहरेज्जा सा य आहच्च वीसम्भेज्जा. अत्थि याइंथ काइ अन्ना उवसंपज्जणारिहा, सा उवसंपज्जियव्वा, नत्थि याइंथ काइ अन्ना उवसंपज्जणारिहा, तीसे य अप्पणो कप्पाए असमत्तो एयं से कप्पइ एगराइयाए पडिमाए जन्नं जन्न दिसं अन्नाओ साहम्मिणीओ विहरन्ति तन्नं तन्नं दिसं० (जाव)...छेए वा परिहारे वा ।

मू. (१३८) वासावासं पज्जोसविया निग्गंथी...(जाव)..छेए वा परिहारे वा ।

मू. (१३९) पवत्तिणी य गिलायमाणी अन्नयरं वएज्जा 'मए णं अज्जो ! कालागणाए समानीए इय समुक्कसियव्वा' । सा य समुक्कसणारिहा सा स समुक्कसियव्वा सिया, सा य नो समुक्कसणारिहा नो समुक्कसियव्वा, अत्थि या इत्थ काइ अन्ना समुक्कसणारिहा सा समुक्कासियव्वा, नत्थि या इत्थ काइ अन्ना समुक्कसणारिहा सा चेव समुक्कसियव्वा, तंमि च नं समुक्कट्ठंसि परावएज्जा दुस्समुक्किट्ठं ते अज्जो निक्खिवाहि, तीसे निक्खेवमाणीए नत्थि कोइ छेए वा परिहारे वा, तं जासो साहम्मिणीओ अहाकप्पेणं नो उवट्ठायति तासिं सव्वासिं तप्पत्तियं जाव...छेए वा परिहारे वा ।

मू. (१४०) पवत्तिणा य ओहायमाणा...एगयरं वएज्जाममंसिणं अज्जो ! ओहायंसि एसा समुक्कसियव्वा सिया, सा समुक्कसणारिहा सा समुक्कसियव्वा सिया, सायनो जाव...छेए वा परिहारे वा ।

वृ- इत्यादि तावत्, यावद् अवधावनसूत्रम् । अर्थसम्बन्धप्रतिपादनार्थमाह-

[भा.२३००] उद्देसंमि चउत्थे जा मेरा वन्निया उ साहूणं ।
सा चेव पञ्चमे संजतीण गणणाए नाणत्तं ।।

वृ- चतुर्थे उद्देशके या मर्यादा वर्णिता साधूनां सैव पञ्चमे उद्देशे संयतीनां वर्ण्यते, केवलं गणनयां नानात्वम्, तदपि च सूत्रे साक्षादुक्तमिति प्रतीतम् । अतः प्रथमत एव संयतीसूत्रकदम्बकोपनिपातः ।।

[भा.२३०१] वुत्तमहया बहुत्तं पिंडगसुत्ते चउत्थ चरमंमि ।
अबहुत्ते पडिसेहं काउमणुन्ना बहुणं तु ।।

वृ- अथवा चतुर्थस्य उद्देशकस्य चरमे पिण्डकसूत्रे बहुत्वमुक्तम्, ततो बहुत्वप्रस्तावात् पञ्चमे उद्देशके संयतीनां अबहुत्वे प्रतिषेधं कृत्वा बहुनामनुज्ञा कृता, ननु बहुनामपि त्रिप्रभृतीनां विहारो न कल्पते, असमाप्तकल्पत्वात् । तथा हि-जघन्यतोऽपि ऋतुबद्धे काले संयतीनां सप्तकः समाप्तकल्पः, वर्षाकाले नवकः । ततः कथं नाधिकृतसूत्रकदम्बकविरोधः ? उच्यते, नैष दोषः, कारणवशतः सूत्रकदम्बकस्य प्रवृत्तेः ।। तान्येव कारणान्युपदर्शयति-

[भा.२३०२] संघयणे वाउलणा, छट्ठे अंगंमि, गमणमसिवादी ।
सागर जाते जयणा, उउबद्धालोयणा भणिया ।।

वृ- प्रवर्तिन्या गणावच्छेदिन्या वा उत्तमेन संहननेन, उपलक्षणमेतत्, उत्तमया च धृत्या, सूत्रमर्थश्च भूयान् गृहीतो गच्छे च व्याघातः १ । स च व्याकुलनावशात्तत उक्तं द्वितीयं कारणं व्याकुलना, सा च 'धम्मकहि महिएड्ढि' इत्यादिना प्रकारेण यथा प्राक् तृतीयोद्देशकेऽभिहिता तथैवात्रापि भावनीया, पुनरुक्तदोषभयात्तु नाभिधीयते, ततः सूत्रार्थस्मरणनिमित्तमात्मतृतीयायाः प्रवर्तिन्या आत्मचतुर्थायाश्च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गणावच्छेदिन्या गमनम् २ । तथा षष्ठेऽङ्गे ज्ञाताधर्मकथाख्ये बहवः सदृशा गमास्तथा च तत्रानेकाः कथानककोटयः सदृशपाठा विसदृशपाठास्त्वर्द्धचतुर्थाः कथानककोटयस्तदभिनवगृहीतं वर्तयते पुनः पुनरस्मृतं च विस्मृतिमुपयाति, ततस्तत्स्मकरणार्थमुक्तपरिवाराया अपि गमनम् ३ । तथा अशिवादिभिरशिवावमौदर्यादिभिरुक्तसंख्याकपरिवाराया गमनम् ४ । तथा षष्ठप्रभृतीन्यङ्गानि संयतीनां 'सागरत्ति', स्वयंभूरमणसागरतुल्यानि तानि अभिनवगृहीतानि परावर्तनीयानि सन्ति अपरावर्तितानि नश्यन्ति, ततस्तेषां परावर्तनाय यथोक्तसंख्याकपरिवाराया अपि गमनम्, तदेवमधिकृत-सूत्रकदम्बकप्रवृत्तौ कारणान्यभिहितानि ५ । अधुना शेषवक्तव्यतामाह- 'जातेत्ति' जातादिरुपः कल्पो वक्तव्यः, स च ऋतुबद्धे सप्तकः समाप्तकल्पः; तदूनोऽसमाप्तकल्पः, वर्षाकाले नवकः समाप्तकल्पस्तदूनोऽसमाप्तकल्पश्च, एकैको द्विधा-जातोऽजातश्च, गीतार्थोऽगीतार्थश्चेति; अत्र च भङ्गचतुष्टये प्रथमवर्जेषु शेषेषु त्रिषु भङ्गेषु प्राग्वत् यतना कर्तव्या ६ । तथा ऋतुबद्धे काले निरन्तरं साध्वीप्रेषणतोऽवलोकना कर्तव्या भणिता ७ । तदेवमभिहितानि कारणान्येतैः कारणैरायातस्यास्य सूत्रकदम्बकस्य व्याख्या, सा च तथैव ।। तथा चाह-

[भा.२३०३] जह भणिय चउत्थे, पंचमम्मि तहेवेविमं तु नाणत्तं ।
गमनत्थि मीस संबंधि वज्जए पूजिते लिंगे ।।

वृ- यथा चतुर्थे उद्देशके निर्ग्रन्थसूत्राणां व्याख्यानं भणितम्, तथा पञ्चमेऽपि उद्देशके निर्ग्रन्थीसूत्राणामपि वक्तव्यम्, नवरं इदं नानात्वम्, तदेवाह- 'इत्यादि-विष्वग्भूतायां प्रवर्तिन्यां गमनं सर्वाभिरार्यिकाभिराचार्यसमीपे कर्तव्यम् । तच्च स्त्रीभिः सह, तदभावे मिश्रैः स्त्रीपुरुषैः, तेषामप्यभावे सम्बन्धिपुरुषैः, एतेषामप्यभावे सम्बन्धवर्जितैरविकारिभिः पुरुषैः, अथ सप्रत्यपायाः पन्थानः तर्हि यत् पूजितं लिङ्गं तस्मिन् लिङ्गे गृहीते गमनम् ।। एतदेव सुव्यक्तमाह-

[भा.२३०४] वीसुं भियाय सव्वासिं गमनं अद्धद्ध जाव दोण्हेक्का ।
संबंधि इत्थिसत्थे भावितमविकारितेहिं वा ।।

वृ- विष्वग्भूतायां शरीरात्पृथग्भूतायां मृतायामित्यर्थः, प्रवर्तिन्यामाचार्यसमीपे सर्वाभिर्गन्तव्यम्, तत्र च गतानामाचार्येण प्रवर्तिनी स्थापयितव्या, यदि तरुणीनां सर्वासां पथि प्रत्यवायस्तर्हि अर्धायाः परिणितवयसस्ता व्रजन्ति, अथ सर्वास्तरुणप्रायाः कतिपयाः स्थविरास्ततो या मंदरुपास्तरुण्यो याश्च स्थविरास्ताः समुदायस्य चतुर्भागमात्रा व्रजन्ति, एवं तावद्वाच्यं यावत् द्वे जने (च, ते ?) गच्छतः, द्वयोरप्यसंभवे एका व्रजति । ताः पुनः केन सार्थेन सह व्रजन्ति, तत आह- 'सम्बन्धी' त्यादि सम्बन्धिना स्त्रीसार्थेन सह गन्तव्यम्, तदलोभेऽसम्बन्धिनापि स्त्रीसार्थेन, तस्याप्यलाभे पुरुषाये भाविताः सम्बन्धिनस्तैः समं व्रजेयुः, तेषामप्यलाभेऽसम्बन्धिनोऽपि येऽविकारिणः पुरुषास्तैः समम् । अथ सप्रत्यवायाः पन्थानः, तर्हि यत् यत्र देशे पूजितं लिङ्गं तेन गृहीतेन व्रजन्ति, एतच्च सुगमत्वान्न व्याख्यातम् ।। अत्र शिष्यः प्राह-यद्यप्याचार्येण प्रवर्तिनी स्थापयितव्या तर्हि ये एते द्वे सूत्रे ''पवत्तिणी गिलायमाणी वएज्ञा, मए नं कालगयाए इयं समुक्कसियव्वा'' इत्यादि, तथा ''पवत्तिणी ओहायमाणी वएज्ञा, मए नं ओहावियाए इयं समुक्कसियव्वा'' इत्यादि ते कथं नीयेते । तत आह-

[भा.२३०५] असिवादिएसु फिडिया कालगए वावि तंमि आयरिए ।
तिग थेरण य असती गिलाण ओहाणि सुत्ताओ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अशिवादिभिः कारणैः, गाथायां सप्तमी तृतीयार्थे प्राकृतत्वात्, यस्याचार्यस्य समीपे आसीरन् तस्मात् स्फिटिताः । ततः सा ग्लानीभूता अवधावनप्रेक्षिका वा यत्सुत्रऽभिहितं तद्वदति अन्यस्याचार्यस्य परिज्ञानकरणार्थि यथा एषा आर्हति तां प्रवर्त्तिनीं, स एव अन्य आचार्यः स्थापयति, यदि वा यस्याचार्यस्य समीपे ता अतिष्ठन् स कालगतः ततस्तस्मिन्नाचार्ये कालगते सा ग्लानीभूता अवधावनप्रेक्षिका वा अन्यस्याचार्यस्य परिज्ञानकरणार्थ सूत्राभिहितं वदति, 'तिग थेराण य असती' इतित्रिकं कुलगणसङ्घस्तस्य स्थविराः त्रिकस्थविरास्तेषामसति । किमुक्तं भवति ? कुलस्थविराणां गणस्थविराणां सङ्घस्थविराणां वा प्रत्यासन्नानामभावे एषार्हेति शेषस्थविरपरिज्ञानकरणाय यत्सूत्रऽभिहितं तद्वदति, ततो ग्लानावधावनसूत्रे उपपन्ने ।।

[भा.२३०६] साहिणम्मि वि थेरे पवत्तिणी चेव तं परिकहेइ ।
एसा पवत्तिणी भे जोगा गच्छे बहुमता य ।।

वृ- अथवा स्वाधीनेऽपि स्थविरे आचार्ये सा प्रवर्तिनी ग्लायन्ती अवधावनप्रक्षिका वा तां परिकथयति । यथा भे भगवन् एषा प्रवर्तिनी योग्या प्रवर्तिनीत्वस्यार्हा सूत्रार्थतदुभयनिष्णातत्वात्, गच्छे बहुमता ततो एवमपि ते सूत्रे उपपन्ने ।।

[भा.२३०७] अब्भुज्जयं विहारं परिव्वज्जिउकामे दुस्समुक्कट्ठं ।
जह होति समणाणं, भत्तपरिन्ना तहा तासिं ।।

वृ- यथा प्राक् श्रमणानामभ्युद्यतविहारं प्रतिपत्तुकामे दुःसमुत्कृष्टं भवति दुःसमुत्कृष्टं प्रतिपादितम्, तथा तासां श्रमणीना भक्तपरिज्ञां प्रतिपत्तुकामायां दुःसमुत्कृष्टं भावनीयम् ।।

मू. (१४१) *निग्गंथस्स नवडहरतरुणगस्स आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया, से य पुच्छियव्वे 'केण ते अज्जो ! कारणेणं, आयारपकप्पे नामं अज्झयणे परिब्भट्ठे, किं आबाहेणं उदाहु पमाएणं' ? वएज्जा 'नो आबाहेणं, पमाएणं,' जावज्जीवाए तस्स तप्पतियं नो कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा । से य वएज्जा 'आबाहेणं, नो पमाएणं.' से य 'संठवेस्सामीति' संठवेज्जा, एवं से कप्पइ आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए वा, से य संठवेस्सामीति नो संठवेज्जा, एवं से नो कप्पइ आयरित्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए धारेत्तए वा ।।*

वृ- नवडहरतरुणव्याख्यानं च प्रागुक्तमवसेयम् । 'ति वरिसो होइ नवो (व्रतपर्यायेणेति वाक्यशेषः), आसोलसगं तु (जन्मपर्यायेणेति गम्यते) डहरगं बेंति । तरुणो चत्ता सत्तरुण मज्झिमो थेरओ सेसो' आचार्यत्वं वा यावत्करणादुपाध्यायत्वं वा प्रवर्तित्वं स्थविरत्वं वेति परिग्रहः, शेषं तथैव ।। अत्राह शिष्यः- पुरुषोत्तमो धर्म इति पूर्वं निर्ग्रन्तसूत्रं वक्तव्यं, पश्चान्निर्ग्रन्थीसूत्रं, पूर्वत्र वाध्ययनद्वये पूर्वं निर्ग्रन्थसूत्राण्युक्तानि पश्चान्निर्ग्रन्थीसूत्राणि ।

मू. (१४२) *निग्गंथीएणं नवडहरतरुणियाए आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया, सा य पुच्छियव्वा 'केणं भे कारणेणं अज्जो ! आयारपकप्पे नामं अज्झयणे परिब्भट्ठे, किं आबाहेणं पमाएणं' ? सा य वएज्जा 'नो आबाहेणं, पमाएणं', जावज्जीवाए तीसे तप्पत्तियं नो कप्पइ पवत्तिनित्तं वा गणावच्छेइयित्तं वा उद्दिसित्तए वा धारेत्तए वा । सा य वएज्जा 'आबाहेण, नो पमाएणं', सा य 'संठवेस्सामीति' संठवेज्जा, एवं, से कप्पइ पवत्तिनित्तं वा गणावच्छेइयित्तं वा उद्दिसित्तए वा धारेत्तए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा, सा य संठवेस्सामीति' नो संठवेज्ञा, एवं से नो कप्पइ पवित्तिणित्तं वा गणावच्छेइयित्तं वा उद्दिसित्तए वा धारेत्तए वा ।।

वृ- 'निग्गंथीए नवडहरतरुणाए' इत्यादि सूत्रद्विकम् । अस्य व्याख्या-निर्ग्रन्थ्या नवडहरतरुण्या वक्ष्यमाणस्वरुपायाः आचारप्रकल्पो नामाध्ययनं परिभ्रष्टं स्यात्, सा च प्रष्टव्या, केन कारणेन आचारप्रकल्पो नामाध्ययनं परिभ्रष्टमभवत्, किमाबाधेन प्रमादेन वा, एवं पृष्टा सती सा, यदीति गम्यते, वदेत्, नाबाधेन किन्तु प्रमादेन, तर्हि यावज्जीवं तस्यास्तत्प्रत्ययं प्रमादतोऽध्ययननाशनप्रत्ययं न कल्पते प्रवर्तिनीत्वं वा गणावच्छेदिकात्वं उद्देष्टुं नापि तस्याः स्वयं धारयितुम् । अथ सा वदेत् आबाधेन नष्टं न तु प्रमादेन, सा च नष्टमध्ययनं संस्थापयामीत्युक्त्वा संस्थापेत्, एवं 'से' तस्याः कल्पते प्रवर्तिनीत्वं वा गणावच्छेदिकात्वं वा उद्देष्टुं अनुज्ञातं स्वयं धारयितुम् । अथ नष्टमध्ययनं संस्थापयिष्यामीत्युक्त्वा न संस्थापयेत् एवं तर्हि से तस्या न कल्पते प्रवर्तिनीत्वं गणावच्छेदिकात्वं वा उद्देष्टुं वा स्वयं धारयितुमिति; । अत्र तु केन कारणेन सूत्र विपर्ययः कृतः ।। सूरिराह-

[भा.२३०८] जइ वि य पुरिसादेसो पुव्वं तहवि विवज्ञओ जुत्तो ।
जेन समणीउ पगया पमायबहुला य अथिरा य ।।

वृ- यद्यपि च पुरुषोत्तमो धर्मः पूर्वत्र वाध्ययनद्वये पूर्वं पुरुषोदेशस्तथाप्यत्र विपर्ययो युक्तः । केन कारणेनेत्याह-येन कारणेन श्रमण्यः प्रकृतास्तथा प्रायः श्रमण्यः प्रमादबहुला अस्थिराश्च, न तु श्रमणाः, अध्ययनस्य च नाशः प्रायः प्रमादतस्ततः श्रमण्यधिकारादधिकृतसूत्रार्थस्थानत्वात् पूर्वं निर्ग्रन्थोसूत्रमुक्तम्, पश्चात् निर्ग्रन्थसूत्रम् । नवडहरतरुणीनां व्याख्यानमाह-

[भा.२३०९] ते वरिसा होइ नवा अठारसिया डहरिया होइ ।
तरुणी खलु जा जुवई चउरो दसगा य पुव्वुत्ता ।।

वृ- व्रतपर्यायेण यावत्त्रिवर्षा तावद्भवति नवा, जन्मपर्यायेण यावदष्टादशिका अष्टादशवर्षप्रमाणा तावद्भवति डहरिका, तरुणी खलु तावद्द्रष्टव्या यावद् युवतिः । अथवा पूर्वोक्तास्तृतीयोद्देशके नवडहरतरुणसूत्रे येऽभिहितास्तरुणस्य चत्वारो दशकाश्चत्वारिंशद्वर्षाणीत्यर्थः, ते अत्रापि तरुण्या द्रष्टव्याः ।।

[भा.२३१०] सा एय गुणोवेया सुत्तत्थेहिं पकप्पमज्झयणं ।
समहिज्जिया इलोयाअवि आगयानवसु या अन्ना ।।

वृ- सा नवडहरा तरुणी एतावद्गुणोपेता सूत्रार्थाभ्यां प्रकल्पनामकमध्ययनमधीता अधीतिनी ततःसा प्रवर्तिनीत्वस्य योग्या सूरिभिः संभाविसाधिता । अथ च तस्याः सूत्रतोऽर्थतश्चाचारप्रकल्पः परिभ्रष्टः स कथं ज्ञात इत्याह-इतश्चापि आगता अन्यगच्छादन्या साध्वी उपसम्पन्ना, सा विज्ञपयति ।।

[भा.२३११] अत्थेण मे पकप्पो समानितो न य जितो महंभंते ।
अमुगा मे संघाडं, ददतुं वुत्ता उ सा गणिणा ।।

वृ- हे भदन्त ! भगवन् ! अर्थेनार्थतो मम आचारप्रकल्पः समानीतः समाप्तिं नीतः, परं न च नैव मम स जितः परिचितोऽभूत्, ततोऽमुका, या प्रवर्तिनीत्वेन संभाविता, तां संघाटं पूज्या ददतु; एवं तया विज्ञापितेन गणिता आचार्येण सा उक्ता आर्य देहि एतस्याः संघाटम्-

[भा.२३१२] सा दाउं आढत्ता नवरि य नट्ठ न किंचि आगच्छे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एमेव मुणमुणंती चिट्ठति मुणिया य सा तीए ।।

वृ- सा संघाटं दातुं प्रवृत्ता, परावर्तयितुं व्याख्यातुं च प्रवृत्ता इत्यर्थः नवरं नष्टं तदध्ययनम्, न किमप्यागच्छति, केवलमेवमेव मुणमुणंती अव्यक्ताक्षरं किमपि ब्रुवन्ती तिष्ठति, ततः सा तया मुणिता यथा न किमप्येतस्या आगच्छति-

[भा.२३१३] पुनरवि साहति गणिणो सा नट्ठसुया दलाह मे अन्नं ।
अब्भक्खाणं पि सिया वाहिंतुं होइमा पुच्छा ।।

वृ- ततः सा पुनरपि गणिन आचार्यस्य कथयति, यथा सा नष्टश्रुता, तस्मात् ममान्यां सहायां ददतु, एवमुक्ते आचार्येण विचारयितव्यं-सत्यं किं परिभ्रष्टं तस्या अध्ययनं किं वा न, को जानाति, अभ्याख्यानमपि काचित् केनापि कारणेन प्रद्विष्टा सती दद्यात् । ततस्तां व्याहृत्य तस्या इयं वक्ष्यमाणा पृच्छाकर्तव्या ।। तामेवाह-

[भा.२३१४] दंडकगहनिक्खेवे आवसियाए निसीहिया ।
गुरुणं च अप्पनामे य भणसु आरोवणा काउ ।।

वृ- दण्डकस्य प्रत्युपेक्षाप्रमार्जनाव्यतिरेकेण ग्रहणे निक्षेपणे च, तथा आवशिक्या नैषिधिक्याश्चाकरणे, बहिः प्रदेशादागच्छता वसतेः प्रवेशे नमः क्षमाश्रमणेभ्यः इत्येवं गुरुणामप्रणामे च प्रणामाकरणे च का आरोपणा प्रायश्चित्तं भवति ।।

[भा.२३१५] पुट्ठ अनिव्वहंती किह नट्ठं वाहतो पमाएणं ।
साहेइ पमाएणं सो य पमादो इमो होइ ।।

वृ- सा एवं पृष्टा सती यदि न निर्वहति, न यथावस्थितमुत्तरं ददाति तदा सा तदा सा अनिर्वहन्ती भूयः प्रष्टव्या; कथं केन कारणेन ते नष्टमाचारप्रकल्पनामकमध्ययनं, किमाबाधात उत प्रमादेन ? तत्र यदि सा कथयति प्रमादेन, स च प्रमादोऽयं वक्ष्यमाणो भवति ।। तमेवाह-

[भा.२३१६] धम्मकह-निमित्तादी, उ पमातो तत्थ होति नायव्वो ।
मलयवइ मगहसेणातरंगवइयाइ धम्मकहा ।।

वृ- तत्र तस्यां संयत्यां धर्मकथानिमित्तादिकः, आदिशब्दात् ग्रहचरितादिपरिग्रहः, प्रमादो भवति ज्ञातव्यः, तत्र धर्मकथा मलयवती मगधसेना तरङ्गवती आदिशब्दात् वसुदेवहिण्ड्यादिपरिग्रहः, एताः कथा अधीयानाया विस्मृतिं गतं प्रकल्पनामकमध्ययनम् ।।

[भा.२३१७] गहचरियविज्जमंताचुन्ननिमित्तादिणा पमाएणं ।
नट्ठंमि संधयती असंधयंती व सा न लभे ।।

वृ- ग्रहचरितं ज्योतिष्कं, ससाधना विद्या, साधनरहितो मन्त्रः, चूर्णो योगचूर्णः निमित्तम-तीतादिभावकथनम्, आदिशब्दात् कुहकशास्त्रादिपरिग्रहः, इत्यादिना प्रमादेन इत्याद्यध्ययन-लक्षणेन प्रमादेन नष्टे प्रकल्पनाम्नि अध्ययने, यदि भूयः सा तत्संदधाति, यदि वा न संदधाति, तथापि सा सन्दधती असन्दधती वा यावज्जीवं गणं न लभते ।।

[भा.२३१८] जावज्जीतवं तु गणं इमेहिं नाएहिं लोगसिद्धेहिं ।
अतिपालवेज्जजोहे धणुगाई भग्गफलगेण ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यावज्जीवं गणं न लभते, एभिरजापालकवैद्ययोधैर्लोकसिद्धैर्ज्ञातैः तत्र योदे प्रमादाचरितं सम्यग् विदितं धनुरादिभिर्धनुर्भङ्गविभग्नं दृष्टं, जीवा च्छिन्नाविच्छिन्ना, काण्डान्यसञ्ज्ञितानि; न केवलमेतज्ज्ञातैः, किन्तु भग्नफलकेन सटित-पतित-मलयनवज्ञातेन तत्र प्रथममजापालकदृष्टान्तमाह-

[भा.२३१९] खेलंतेन उ अइया पणासिया जेण सो पुनो न लभे ।
सूलादि रुपा नट्ठा वि लहति एमेव उत्तरिए ।।

वृ- कोइ अयवालो वेयणएण अयातो रक्खई, तेन ततो वट्टगादिखेल्लणआदिहिं पमाएहिं नासिया, तो सो अन्नातो दवावितो भणइ, पुनो रक्खाभि न एरिसं काहामि, सो एवं भणंतो वि जावज्जीवं अन्नत्थ वि न लहति । अह सूलं से उद्दियं जरो वा अति आउरो आगतो, ततो नट्ठातो ताहे सो पुनो वि लभते रक्खिउं अक्षरगमनिका-येन खेलता वृत्तादिना क्रीडता अजिकाः प्रणाशिताः, स पुनर्न लभते, यावज्जीवमन्यत्राप्यजा रक्षितुम् । अथ शूलादिरुजा अत्रादिशब्दादत्यातुरज्वरादिपरिग्रहः, ता अजा नष्टास्ततः पुनरपि लभते ।। अधुना वैद्यज्ञातं भावयति-

[भा.२३२०] जति से सत्थं नट्ठं पेच्छह से सत्थकोसगं गंतु ।
हीरति कलंकिएसुं भोगो जूयादिदप्पेणं ।।

वृ- कोइ वेज्जो रन्ना कयवित्तीतो तेन जूयपमादेण विसयपमादेण वा वेज्जसत्थं नासियं सत्थकोसगाणि य पच्छण्णगादीणि कट्टकलंकियाणि, न निसीयइ, अन्नया रन्नो कज्जं जायं, सद्दावितो वेज्जो सो किरियोवदेसं न किंचि सक्केइ वोत्तुं । ततो रन्ना भणियं, किमेयं, ततो सो भणइ-मे पोत्थगा चोरेहिं हिया, पाडिपुच्छगंपि नत्थि, तो मम नट्ठं वेज्जसत्थं, नत्थि पुन मम अन्नो पमाओ जेण वेज्जसत्थं नासियं । ताहे रन्ना पुरिसा पेसिया । यदि से तस्य शास्त्रं नष्टं तर्हि 'से' तस्य यूयं गत्वा शास्त्रकोशकं प्रेक्षध्वं ततस्तैस्तद् ह्रियते राज्ञः समर्प्यते, दृष्टानि राज्ञा समस्तानि प्रतक्षणकप्रभृतीनि शास्त्राणि कट्टकलङ्कितानि, ततस्तेषु कलङ्कितेषु दृष्टेषु ज्ञातं यथा द्यूतादिदर्पेण द्यूतादिना प्रमादेन विनाशितं वैद्यशास्त्रं, ततो भोगच्छिन्नः पश्चादन्यत्र गत्वा वैद्यशास्त्रं पुनरप्युज्ज्वाल्य समागतो भूयोऽपि राज्ञः समीपे भोगान् याचते, स च याचमानोऽपि न लभते एवं लोकोत्तरेऽप्युपनयभावना प्राग्वत् कर्तव्या ।। योधदृष्टान्तभावनार्थमाह-

[भा.२३२१] चुक्को जइ सरवेही तहावि पुलोएह से सरे गंतु ।
अकलंक वा भग्गमभग्गाणि य धनूनि ।।

वृ- कोइ जोहो धनुव्वेयं अहिज्जंतो गुरुवएसेणं अब्भासेण य सो अपासंतो वि सद्देणं विंधति रन्ना कयपभूयवित्तिको कत्तो अन्नया तेन विसयपमाएण तं धणुव्वेयसत्थं, तं च अब्भासकरणं नासियं । अन्नया जुद्धकज्जे समावडिए न किंचि सक्केइ विंधिउं पराजिणिउं वा, रन्ना पुच्छितो, किमेयंति, सो भणइ-नत्थि मे पमादो, ताहे रन्ना भणियं, यदि नाम प्रमादाकरणत एषश्च स्वरवेधी चुक्को भुल्ल तथापि 'स' तस्य शरान् गत्वा प्रलोकयत, किं तत् शरजालमकलङ्कं सकलंकं वा, धनूंष्यपि तेषां भग्नान्यभग्नानि वा, दृष्टं शरजालं कलङ्कितं, धनूंषि च भग्नानि ततो ज्ञातं प्रमादतः सर्वं नष्टम् । कृतो वृत्तिव्यवच्छेदः सोऽन्यत्र गत्वा धनुर्वेदशास्त्रमुज्ज्वाल्य कृताभ्यासः पुनरागतो वृत्तिं याचमानोऽपि यावज्जीवं न लभते ।। एवं लोकोत्तरेऽप्युपनयः प्राग्वत् कर्तव्यः ।। फलकज्ञातमाह-

[भा.२३२२] फालहियस्य वि एवं जइ फलतो भग्गलुग्गो तो भोगो ।।
हीरति सव्वेसि विय न भोगोहारो भवे कज्जे ।।

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

वृ- कोइ अनेग वनफत्ति पत्त सागादि कलिए फलए केनावि निउत्तो, सो विसयपमाएणं जुयपमाएण वा न रक्खइ न य पाणिएणं पालेति, सो य फलहो लोगेण गोख्वेहि य उछ्डितो सुक्को य न किंचि ततो वनफलादि आगच्छइ, फलहसामिणा भणियं, किमियं सो भणइ-किं करोमि रक्खेमि ताव अहं नत्थि मे पमादो, ततो फलहसामिणा फलहो गवेसावितो । तथा चाह-फालकिकस्य फलकस्वामिन एवं पूर्वदृष्टान्तेषु राज्ञ इव फलगवेषणा चिन्ता जाता, यदि फलको भग्नलुग्नो भविष्यति, ततोऽस्य भोगो हरिष्यते । गाथायां वर्तमानसामीप्ये वर्तमानवद्वेति वचनतो भविष्यति वर्तमानः । कस्मात् हरिष्यते इत्याह कार्ये प्रयोजने समापतिते सर्वेषामपि कुटुम्बजनानां भोगाहारो न स्यादिति हेतोस्तत्र गवेषणे कृते फलको भग्नलुग्नो दृष्टः । भग्नो गोरुपादिभिर्विध्वंसनात्, लुग्नो जलसेचनाकरणतः ततस्तस्य वृत्तिश्छिन्ना । ततो नाहं भूय एवं करिष्यामीति याचमानोऽपि यावज्जीवं न लभते वृत्तिम् ।।

एवं लोकोत्तरेऽप्युपनयः कर्तव्यस्तमेवाह-

[भा.२३२३] एवं दप्पपनासिते न वि दिंति गणं पकप्पमज्झवणे ।
आवाहेणं नासिए गेलन्नादीण दलयंति ।।

वृ- एवं पूर्वोक्तदृष्टान्तप्रकारेण दर्प्पतो धर्मकथाध्ययनतः व्याकरणाध्ययनतो निमित्तशास्त्राद्यध्ययनतो वा इत्यर्थः । प्रणाशिते प्रकल्पनाम्न्यध्ययने यावज्जीवमाचार्यास्तस्या गणं न ददति । आवाधेन ग्लानत्वादिना पुनर्नाशिते भूयोऽप्युज्ज्वालिते दलयन्ति प्रयच्छन्ति ।। एतदेव भावयति-

[भा.२३२४] गेलन्ने असिवे वा उमोयरयिए रायदुट्ठे वा ।
एएहिं नासियंमी संधेमाणीए दिंति गणं ।।

वृ- ग्लानत्वे वा जाते ग्लानप्रतिजागरणे वा कृते, अशिवे वा समुपस्थिते, अवमौदर्य वा दुर्भिक्षे जाते भिक्षापरिभ्रमणतो राजद्विष्टे वा पलायनतो, यदि नष्टं प्रकल्पनामकध्ययनं, तत एतैः कारणैः नाशितेऽपि पुनः सन्दन्धत्या गणं ददति प्रयच्छन्ति । तदेवं निर्ग्रन्थीसूत्रं भावितमधुना निर्ग्रन्थसूत्रं विभावयिषुराह-

[भा.२३२५] एमेव य साहूणं, वागरणनिमित्तच्छंदकहमादी ।
बिइयं गिलाणतो मे अद्धाणे चेव थूभे य ।

वृ- एवमेव अनेनैव प्रकारेण, साधूनामपि सूत्रं भावनीयं, नवरं तत्र प्रमादो व्याकरणनिमितच्छन्दःकथाद्यधीयानस्य प्रतिपत्तव्यः द्वितीयमाबाधलक्षणं ततो ग्लाने ग्लानप्रतिजागरणे वा, अवमौदर्ये, अशिवादिकारणतोऽध्वनि वा गमने, स्तूपे वा द्रष्टव्यम् । इयमत्र भावना, यदि व्याकरणाध्ययनतो निमित्तशास्त्राध्ययनतश्छन्दःशास्त्राध्ययनतो धर्मकथाध्ययनतः, आदिशब्दाद्विधामन्त्रादिव्याक्षेपतो यदि प्रकल्पाध्ययनं नाशितं, तदा पश्चादुज्ज्वालितेऽपि यावज्जीवं तस्मै गणं सूरयो न प्रयच्छन्ति । अथ ग्लानत्वाद्याबाधतो नाशितं, तदा तस्मिन् पुनरुज्वालिते प्रयच्छन्ति प्रमाददोषाभावात् तत्र ग्लानत्वादिविषयआबाधः प्रतीतः । सम्प्रति स्तूपविषयमाह-

[भा.२३२६] महुरा खमगा य वनदेवय आउट आण विज्ञत्ति ।
किं मम असंजतीए अप्पत्तिय होहिती कज्जं ।।

[भा.२३२७] थूम वि उ घन भिच्छू विवाय छम्मास संघो को सत्तो ।
खमगुस्सग्गा कंपण खिंसण सुक्का कय पडागा ।।

वृ- मथुरायां नगर्यां कोऽपि क्षपक आतापयति, यस्यातापनां दृष्ट्वा देवता आदृता तमागत्य वन्दित्वा

ब्रूते, यन्मया कर्तव्यं तन्ममाज्ञापयेद्भावानिति । एवमुक्ते सा क्षपकेण भण्यते, किं मम कार्यमसंयत्या भविष्यति, ततस्तस्या देवताया अप्रीतिकमभूत् । अप्रीतिवत्या च तयोक्तमवश्यं तव मया कार्य भविष्यति, ततो देवतया सर्वरत्नमयः स्तूपो निर्मितः, तत्र भिक्षवो रक्तपटा उपस्थिताः अयमस्मदीयः स्तूपः, तैः समं संघस्य षण्मासान् विवादो जातः, ततः संघो ब्रूत-को नामात्रार्थे शक्तः, केनापि कथितं यथामुकः क्षपकः, ततः संगेन स भण्यते, -क्षपक कायोत्सर्गेण देवतामाकम्पय, ततः क्षपकस्य कायोत्सर्गकरणं देवताया आकम्पनम् सा आगता ब्रूते,-संदिशत किं करोमि क्षपकेण भणिता-तथा कुरुत यथा सङ्घस्य जयो भवति, ततो देवतया क्षपकस्य खिंसना कृता, यथा एतन्मया असंयत्या अपि कार्य जातं एवं खिंसित्वा सा ब्रूते-यूयं राज्ञः समीपं गत्वा ब्रूत, यदरिक्तपटानां स्तूप ततः कल्ये रक्ता पताका दृश्यतां, अथास्माकं तर्हि शुक्ला पताका, राज्ञा प्रतिपन्नमेवं भवतु, ततो राज्ञा प्रत्ययिकपुरुषैः स्तूपो रक्षापितः रात्रौ देवतया शुक्ला पताका कृता, प्रभाते दृष्टा स्तूपे शुक्ला पताका, जितं संघेन ।

मू. (१४३) *थेराणं थेरभूमिपत्ताणं आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया; कप्पइ तेसि संठवेत्ताण वा असंठवेत्ताण वा आयरियत्तं वा जाव गणावच्छेइयत्तं वा उद्दिसित्तए वा धारेत्तए व ।*

[भा.२३२८] एवं ताव पनट्ठे भिक्खुस्स गणो न दिज्जए सुत्ते ।
नट्ठसुए माहु गणं हरेज्ज थेरे अतो सुत्तं ।।

वृ- एवं उक्तेन प्रकारेण तावत्प्रनष्टे सूत्रे प्रकल्पनाम्न्यध्ययने भिक्षोर्गणो न दीयते । एवं स्थविरे आचार्ये नष्टश्रुते माहु निश्चितं गणं हरेदतः सूत्रं आह-अनेन सम्बन्धेनायातस्यास्य व्याख्या-स्थविराणां स्थविरभूमिं प्राप्तानामाचार्यपदप्राप्तानामाचारप्रकल्पो नामाध्ययनं परिभ्रष्टं स्यात् कल्पते तेषां सूत्रं संस्थापयतामसंस्थापयतां वा आचार्यत्वं वा यावत्करणादुपाध्यायत्वं इति परिग्रहः गणावच्छेदकत्वमुद्देष्टुं अनुज्ञातु जीर्णमहत्वकारणतः सूत्रधरणशकनात् एष सूत्रसंक्षेपार्थः ।। सम्प्रति भाष्यविस्तरः-

[भा.२३२९] सुत्ते अनिते लहुगा अत्थे अणिंते धारेंति चउ गुरुगा ।
सुत्तेण वायणा अत्थे सोही तो दोहणुन्नाया ।।

वृ- इदं सूत्रमापवादिकमुत्सर्गतः पुनः सूत्रे अनागच्छति यदि गणं धारयति तदा चत्वारो गुरुकाः आज्ञादयश्च दोषास्तस्मादुभयधरेण गणो धारयितव्यः । किं कारणमत आह-सूत्रेण आगच्छता वाचनां ददाति । अर्थेन आगच्छता प्रायश्चित्तस्थानमापन्नानां शोधिं करोति, तस्मात् द्वाभ्यामपि सम्पन्नो गणधारणेऽनुज्ञातः ।।

[भा.२३३०] अवि य विना सुत्तेणं ववहारे ऊ अपच्चतो होइ ।
तेन ऊभयधरो ऊ गणधारी सो अनुन्नातो ।।

वृ- अपि च विना सूत्रेण व्यवहारे क्रियमाणे अप्रत्ययो भवति । तस्माद्व्यवहारे अर्थनिर्देशं कुर्वता सूत्रमवश्यं उच्चारणीयं । यथा इदं सूत्रं । तस्मादयमेवात्र व्यवहारस्ततो भवति प्रत्ययस्तेन स गणधारी उभयधरोऽनुज्ञातः ।।

[भा.२३३१] असति कडजोगी पुन अत्थे ये तंमि कप्पति धारेउं ।
जुन्न महल्लो सुत्तं न तरति पच्चज्झुयारेउं ॥

वृ- उभयधरस्स असति अभावे यः कृतयोगी, कृतयोगी नाम यः पूर्वमुभयधर आसीत् नेदानीं, सोऽर्थे समागच्छति गणं धारयितुं कल्पते । अथ केन कारणेन तस्य सूत्रमनेशत् । अत आह-'जुन्नमहल्लो'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि । जीर्णो नामैको नो महान् यस्तरुणक एव सन् जरसा परिणतो जातः, नो जीर्णो महानिति द्वितीयः यो वृद्धोऽपि सन् दृढशरीरः, जीर्णोऽपि च महानपि च तृतीयः, नो जीर्णो नो महानिति चतुर्थः एष शून्यः। शेषाणां तु त्रयाणां एकतरो न शक्नोति प्रत्युज्वालयितुं अतः सूत्रं तस्य नश्यति ।।

[भा.२३३२] उभयधरंमि उ सीसे विज्जंते धारणा उ इच्छाए ।
मा परिभव नयनं वा गच्छे व अनिच्छमाणंमि ।।

वृ- उभयधरे सूत्रार्थधरे शिष्ये विद्यमाने स्वयं गणस्य धारणा इच्छया, स्वयं वा गणं धारयति तस्य वा शिष्यस्योभयधरस्य ददाति । स हि गणस्य शिष्यस्य वा भावं जानाति । यदि शिष्यस्य गणं दास्यामि तत एते मम परिभवं करिष्यन्ति, अथवा मां त्यक्त्वा गच्छमादाय गमिष्यति । यदि वा तमुभयधरं गणधरे स्थाप्यमानं गणो नेच्छति ततो मा परिभवं एते कार्षुर्नयनं वा मां त्यक्त्वाऽन्यत्र गच्छस्य कार्षीदिति हेतोरनिच्छति वा गणे तस्य गणं न ददाति किन्तु स्वयं धारयति । तत्र सूत्रमुतेनोभयसूत्रेण शिष्येण वाचयत्यर्थमात्मना ददाति, प्रागुक्तदोषाभावे तस्य गणं समर्पयति ।

मू. (१४४) *थेराणं थेरभूमिपत्ताणं आयारपकप्पे नामं अज्झयणे परिब्भट्ठे सिया; कप्पइ तेसि संनिसन्नाण वा संतुयट्टाण वा उत्ताणयाण वा पासिल्लयाण वा आयारपक्कं नामं अज्झयणं दोच्चंपि तच्चंपि पडिपुच्छित्तए वा पडिसारेत्तए ।*

वृ- थेराणं थेरभूमिपत्ताणं इत्यादि । स्थविराणां स्थविरभूमिं प्राप्तानामाचारप्रकल्पो नामाध्ययनं परिभ्रष्टं स्यात्कल्पते तेषां सन्निषिन्नानां वा निषद्यागतानां 'संतुयट्टाण' वेति सम्यक्त्वग्वर्तनेन स्थितानां उत्तानानां वा पासिल्लयाणवेत्ति पार्श्वतः संतिष्ठतां वा आचारप्रकल्पनामैकमध्ययनं द्वितीयमपि तृतीयमपि, आदिशब्दाच्चतुर्थमपि वारं प्रत्येष्टुं वा प्रतिसारयितुं वा अवमरत्नाधिकः प्रतिसारयति । स्थविराः प्रतीच्छन्ति । एष सूत्रसंक्षेपार्थः ।। अधुना भाष्यविस्तरः-

[भा.२३३३] एमेव वि इय सुत्तं कारणियं संति बले न हावेति ।
जं जत्थ उ कितिकम्मं निहाणसम ओमरायनिए ।।

वृ- यथा प्राक्तनं सूत्रं कारणियं संति बले न हावेति । स च प्रत्युज्ज्वालयन् सति विनयं न हापयति। अथ कोऽसौ विनयो यस्तेन सूत्रं प्रत्युज्वालयता सति बले न हापयितव्य इत्यत आह । जं जत्थ उ इत्यादि यत् कृतिकर्म वन्दकं यत्र सूत्रेऽर्थे वाधिकृतं तत्रावमरत्नाधिके निधानसमे सूत्रमर्थं च प्रत्युज्ज्वालयता तत् न हापयितव्यं । निधानसमे इति वदता निधानदृष्टान्तः सूचितः । स चैवं यथा महति क्षुल्लके वा निधाने उत्खनितव्ये तस्य तदनुरूपचारमुत्खानको यदि करोति ततस्तमुत्खनितुं शक्नोति । अथ न करोति तदनरूपमुपचारं तर्हि वृश्चिकाद्युपद्रवतो न शक्नोति । एवं यदि समरत्नाधिकेऽवमरत्नाधिके वा सूत्रमर्थं वा प्रत्युज्ज्वालयन् अपूर्वं वा पठन् तदनुरूपं विनयं न करोति, तदा निर्जरालाभस्तस्य नोपजायते, न च शास्त्रं स्थिरपरिचितं भवति, विभङ्गं वा तस्य ज्ञानं विनयभ्रंशितया प्रान्तदेवता कुर्यात्कलहं वा । एदवाभिधित्सुः प्रथमतः प्रायश्चित्तमाह-

[भा.२३३४] सुत्तमि य चउ लहुणा, अत्थंमि य चउ गुरुं च गव्वेण ।
कितिकम्ममकुव्वंतो पावति थेरो सति बलामि ।।

वृ- स्थविरः प्रत्युज्ज्वालयन्नपूर्वं पठित्वा सति बले यदि गर्वेण कृतिकर्म न करोति, तर्हि तत् अकुर्वन सूत्रे सूत्रविषये चतुरो लघुकान् प्राप्नोति, अर्थे चतुर्गुरुकम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२३३५] उवयारहीनमफलं होइ निहाणं करेइ वाणत्थं ।
इय निज्जराए लाभो न होइ विब्भंग वलहो वा ।।

वृ- यथा उपचारहीनं निधानं अफलं भवति नोत्खनितं शक्यते इति भावः, अनर्थं वा करोति, वृश्चिकाद्युपद्रवकरणात् इत्येवमनेनैव दृष्टान्तप्रकारेण कृतिकर्माकरणे निर्जराया लाभो न भवति, प्रान्तदेवता कोपवशाद्विभङ्गो वा तम्मेपजायेत कलहो वा ।।

[भा.२३३६] दूरत्थो वा पुच्छइ, अहवा निसिज्झाए सन्निसन्नो उ ।
अच्चासन्न निविट्ठुट्ठिए य चउभंगो बंधव्वो ।।

[भा.२३३७] अंजलि पणाम अकरणं वि प्पेक्खंते दिसाहोउड्ढमुहे ।
भासतं नुवउत्ते व हसंते पुच्छमाणे उ ।।

[भा.२३३८] एएसु उ सव्वेसु वि सुत्ते लहुतो उ अत्थे गुरुमासो ।
नाभीतोवरि लहुगा गुरुगमहो काप्यंकडुयणे ।।

वृ- दूरस्थितो वा पृच्छति अथवा निषद्यायां संनिषन्नः पृच्छति, शृणोतीति भावार्थः । यदि वा अन्त्यासन्न ऊरुणा ऊरुं संघृष्य शृणोति । निविष्टोत्थिते चतुर्भङ्गी बोद्धव्या, सा चैवं, निविष्टो निविष्टं पृच्छति, १ निविष्ट उत्थितं पृच्छति २, उत्थितो निविष्टं पृच्छति ३, उत्थित उत्थितं पृच्छति ४ ।। तथा अंजलेरकणम्, अर्थपरिसमाप्तौ प्रणामस्याकरणम्, तथा दिशोवि प्रेक्षमाणः पृच्छति, यदि वाऽधोमुख ऊर्ध्वमुखो वा शृणोति न गुर्वभिमुखः, अथवा येन तेन वा सह भाषमाणः शृणोति, अनुपयुक्तो वा शृणोति, हसित्वा पृच्छति ।। एतेषु सर्वेष्वपि स्थानेषु सूत्रे श्रूयमाणे प्रायश्चित्तं लघुको मासः, अर्थे गुरुमासः, । तथा नाभीत उपरि सूत्रं शृण्वतः कायकण्डूयने चत्वारो लघुकाः अर्थं शृण्वतश्चत्वारो गुरुकाः। नाभीतो ऽधस्तात् सूत्रश्रवणे कायकण्डूयने चत्वारो गुरुका, नवरं तपःकालयोरन्यतरेण गुरुकाः ।।

[भा.२३३९] तम्हा वज्जंतेनं ठाणाणेयाणि पंजलुक्कुडुणा ।
सोयव्व पयत्तेणं कितिकम्मं वा वि कायव्वं ।।

वृ- यस्मादेवमविनकरणे प्रायश्चित्तविधिः, तस्मादेतानि प्रागनन्तरमुपदर्शितानि स्थानानि वर्जयित्वा प्राञ्जलिना प्रकृताऽञ्जलिना उत्कुटुकेन प्रयत्नेनादरपरतया श्रोतव्यम्, कृतिकर्म चापि वन्दनमपि कर्तव्यम् । यद्यपि च वन्दनके नोपस्थितं वाचनाचार्योऽनुजानाति तथापि क्षमाश्रमणं दत्वा कृतप्राञ्जलिना श्रोतव्यम् ।।

[भा.२३४०] तेन वि धारेयव्वं पच्छावि य उट्ठिएण मंडलीतो ।
वेट्ठुट्ठनिसन्नस्स व सारेयव्वं हवति भूयो ।।

वृ- तेनापि श्रोत्रा यत् व्याख्यानमण्डल्यां सूत्रमण्डल्यां वा श्रुतं तत् मण्डलीत उत्थितेन पश्चादपि धारयितव्यम्, तस्य च धारयत उपविष्टस्य ऊर्ध्वस्थितस्य निषन्नस्य वा क्वचित् स्खलनतो तेनापि वाचनाचार्येण भूयो भवति स्मारयितव्यं गमयितव्यम् ।।

[भा.२३४१] अह से रोगो न होज्ज तहि भासंत एगपासंमि ।
सन्निसन्नो तुयट्टो वा अत्थई अनुग्गह पवत्तो ।।

वृ- अथ से तस्य स्थविरस्य रोगो न भवेत्तर्हि व्याख्यानमंडल्या उत्थितो भाषमाणस्य अनुभाषमाणस्य चिन्तापयत इत्यर्थः, एकपार्श्वे तत्सेवाबुद्धया संनिषन्नः सम्यग् निषद्यागतस्त्वग्वर्तितो वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाषमाणस्यानुग्रहप्रवृत्तस्तिष्ठति ।। पर आह

[भा.२३४२] थेरस्स तस्स किं तू एद्दहेणं किलेसकरणेण ।
भन्नइ एगुत्तुवयोग सद्धजणणं च तरुणाणं ।।

वृ- अथ तस्य स्थविरस्य जीर्णमहतः किमेतावन्मात्रेण क्लेशकरणेन । सूरिराह भण्यते, अत्रोत्तरं दीयते एवमाचारतस्तस्य सूत्रार्थाभ्यां सह एकत्वोपयोगोपयुक्तस्य तु सूत्रार्थाः सम्यग् लगन्ति तथा तरुणानां च श्रद्धाजननं कृतं भवति, तथा हि व्याख्यानमण्डल्या उत्थितमपि निजमाचार्यं जीर्णमहान्तमेवं विनयं कुर्वन्तं दृष्ट्वा चिन्तयन्ति । यद्यस्माकमाचार्यो जीर्णमहानप्येवं श्रुतस्य विनयं करोति ततोऽस्माभिस्तरुणैः सुतरां कर्तव्यः ।। आह-शिष्यो यथा जीर्णमहत आचार्यस्यानुर्गहः क्रियते यथानुभाषमाणस्य एकपार्श्वे सन्निषन्नस्त्वगृवर्तितो वा तष्ठितु । एवमन्यस्यापि क्रियते ? क्रियते इति ब्रूमस्तथा चाह-

[भा.२३४३] सो उ गणी अगणी वा अनुभास्संतस्स सुणति पासंमि ।
न वएइ जुन्नदेहो होउ बद्धासणो सुचिरं ।।

वृ- स जीर्णो महान् गणी आचार्य उपाध्यायो गणावच्छेदको वा अगणी वा अन्यो यः स्थाननियुक्तः सोऽनुभाषमाणस्य चिन्तापयत एकस्मिन् पार्श्वे सन्निषन्नस्त्वग्वर्तितो वा शृणोति, यतो न शक्नोति जीर्णदेही बद्धासनो भवितुं सुचिरं कालम् ।

मू. (१४५) *जे निग्गंथा निग्गंथीओ य संभोइया सिया, नो ण्हं कप्पइ अन्नमन्नस्स अंतिए आलोएत्तए। अत्थि या इत्थ केइ आलोयणारिहे; कप्पइ से तेसिं अंतिए आलोएत्तए; नत्थि वा इत्थ केइ आलोयणारिहे, एव ण्हं कप्पइ अनमन्नस्स अंतिए आलोएत्तए ।*

[भा.२३४४] थेरो अरिहो आलोयणाए आयारकप्पितो जोग्गो ।
सा य न हइ विवक्खे नेव सपक्खे अगीएसु ।।

वृ- स्थविरः पूर्वसूत्रेऽभिहितः, स च आलोचनाया अर्हः, सोऽपि च योग्य आलोचनाया भवति आचारकल्पिक आचारप्रकल्पाभिधानाध्ययनधारी तत एवं सति सा आलोचना न विपक्षे नापि सपक्षे अगीतेष्वगीतार्थेषु भवति, तत्र संयताः संयतीनां विपक्षः, संयत्यः संयतानाम् सपक्षः, संयताः संयतानां संयत्यः संयतीनाम् ।। तत्र विपक्षे सपक्षे चाऽगीतार्थेष्वालोचनाप्रतिषेधार्थमधिकृतं सूत्रम् अनेन सम्बन्धेनायातस्यास्य व्याख्या-ये निर्ग्रन्था निर्ग्रन्थ्यो वा सांभोगिकाः स्युस्तेषां, नो ण्हं व्याक्यालङ्कारे, कल्पतेऽन्योन्यस्य परस्परस्यान्तिके आलोचयितुमगीतार्थत्वात् । अस्ति चेदत्र कश्चिदालोचनार्ह एवं सति कल्पते अन्योन्यस्यान्तिके आलोचयितुम्, एष सूत्रसंक्षेपार्थः ।। अधुना भाष्यविस्तरः-

[भा.२३४५] संभोइत्ति भणिते संभोगा च्छव्विहो उ आदीए ।
भेदप्पभेदतो वि य नेगविहो होति नायव्वो ।।

वृ- संभोइत्ति इति भणिते संभोगो विचार्यते, तत्रादौ संभोगः षड्विधो भवति । प्रभेदतोऽपि च, एकैकस्य भेदस्य प्रभेदतः पुनरनेकविधो भवति ।। तत्र प्रथमतः षड्विधमाह-

[भा.२३४६] ओह अभिग्गह दानग्गहणे अनुपालनाए उववाए ।
संवासंमि य छट्ठो संभोगविही मुणेयव्वो ।।

वृ- ओघे उपध्यादौ अभिग्रहे दानग्रहे अनुपालनायामुपपाते । एवमेते पञ्च संभोगा भवन्ति, षष्ठः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संभोगविधिः संवासे ज्ञातव्यः ।। तत्र यथोद्देशं निर्देश इति न्यायात् प्रथमत ओघसंभोगविधिमाह-

[भा.२३४७] ओघो पुन बारसहा उवधिमादि कमेण बोधव्वो ।
कायव्व परूवणया एतेसिं आनुपुव्वीए ।।

[भा.२३४८] उवहि सुय भत्तपाने अंजलिपग्गहेइ य ।
दावणा य निकाए य अब्भुट्ठाणेत्ति आवरे ।।

[भा.२३४९] कीकम्मस्स य करणे वेयावच्चकरणे इय ।
समोसरण सन्निसेज्जा कहाए य पबंधणा ।।

वृ- ओघसंभोगो द्वादशप्रकारः, तद्यथा-उपधिविषयः १, श्रुतविषयः २, भक्तपानविषयः ३, अञ्जलीग्रहविषयः ४, दवणाए त्ति दापना शय्याहारोपधिस्वाध्यायशिष्यगणानां प्रदापनं तद्विषयः ५, निकाय त्ति निकाचो निकाचनं च्छदनं निमंत्रणमित्येकार्थास्तद्विषयः ६, अब्भुट्ठाणेत्ति आवरे अपरेऽभ्युत्थानविषयः ७, कीकम्मस्स य इत्यादि कृतिकर्म वन्दनकं तत्करणविषयः ८, वैयावृत्यकरणविषयः ९, समवसरणविषयः १०, सन्निपद्याविषयः ११, कथाप्रबन्धनविषयश्च १२ तत्रोपधिसंभोगः षट्प्रकारस्तथा चाह-

[भा.२३५०] उवहिस्स य छ भेया उग्गम १ उप्पायणे २ सणासुद्धे ३ ।
परिकम्मणं ४ परिहरणा ५ संजोगो ६ छट्ठओ होइ ।।

वृ- उपधेः उपधिसंभोगस्य षड् भेदा भवन्ति तद्यथा-उद्गमशुद्धः १, उत्पादनाशुद्धः २, एषणाशुद्धश्च ३, परिकर्मणासंभोगः ४, परिहरणासंभोगः ५, संयोगविषय षष्ठसंभोगः ६, तत्र यत्सांभोगिकस्सांभोगिकेण सममाधाकर्मादिभिः षोडशभिरुद्गमदोषैः शुद्धमुपधिमुत्पादयति एष उद्गमशुद्ध उपधिसंभोगः, अथाशुद्धमुत्पादयति तर्हि येन दोषेणाशुद्धमुत्पादयति तन्निष्पन्नं प्रायश्चित्तमापद्यते, तत्रापीयं व्यवस्था-अशुद्धग्राही सांभोगिकशिष्यमाणः सती मे प्रतिचोदनेति मन्यमानो मिथ्यादुष्कृतपुरस्सरं न पुनरेवं करिष्यामीति ब्रुवाणः प्रत्यावर्त्तते, तदा यत्प्रायश्चित्तमापन्नस्तद्दत्वा संभोग्यते। एवं द्वितीयवारं तृतीयवारमपि, चतुर्थवेलायां त्वावर्त्तस्यापि न संभोगः । अथ निष्कारणे अन्यसांभोगिकेण समं शुद्धमशुद्धं वोपधिमुत्पादयति तर्हि सोऽपि यदि शिक्षमाणः व्यावर्त्तते ततः संभोगविषयी क्रियते, अन्यथा प्रथमवेलायामपि तस्य विसंभोगः, एवं द्वितीयतृतीयवारमपि, चतुर्थवारमावर्तस्यापि नियमतो विसंभोगः । वारत्रयेऽपि तस्य प्रायश्चितं मासलघु कारणे त्वन्यसांभोगिकेणापि सममुपधिमुत्पादयन् शुद्धः । एवं पार्श्वस्थादिभिर्गृहिभिर्यथाच्छन्दैश्च सह वेदतव्यिम् । प्रायश्चित्तविधिरिपतिथैव, नवरं यथाच्छन्दे मासगुरु चतुर्गुरुकमित्यपरे, योऽपि पार्श्वस्थादेः सङ्घाटकं प्रयच्छिति, तस्यापि मास लघु ।तथा संयतीभिः संविग्नाभिरसंविग्नाभिर्वा सांभोगिकीभिरसांभोगिकीभिर्वा सममुद्गमेन शुद्धमशुद्धं चोपधिमुत्पादयतश्चतुर्गुरुकम् एतावत् एतत् पुरुषवर्गेऽभिहितं संयतीवर्गेऽपि द्रष्टव्यम् [१] एवं षोडशभिरुत्पादनादोषैर्दशभिरेषणादोषैः सांभोगिकेन सममुपधिमुत्पादयन् शुद्धः, विपर्यासे प्रायश्चित्तविधिः पूर्ववत् [२, ३] परिकम्मणत्ति परिकर्मणा नाम यदुपधिमुचितप्रमाणकरणतः संयतप्रायोग्यं करोति अत्र भङ्गाश्चत्वारस्तद्यथा-परिकर्मणा कारणे विधिना १, कारणेऽविधिना २, निष्कारणे विधिना ३, निष्कारणेऽविधिना ४ । अत्र प्रथमभङ्ग शुद्धः, द्वितीये मासलघु तपोगुरु, तृतीये मासलघु कालगुरुकं, चतुर्थे मासालघु द्वाभ्यां गुरु, संवङ्गिरन्यसांभोगिकैः समं चतुर्थेष्वपभिङ्गेषु मासलघु,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रापि द्वितीयादिषु भङ्गेषु पूर्ववत् तपःकालविशिष्टता गृहस्थैः पार्श्वस्थादिभिः समं प्रत्येकं चतुर्लघुकम्, यथाच्छन्दैः समं चतुर्गुरुकम्, अत्रापि द्वितीयादिषु भङ्गेषु प्राग्वत् तपःकालविशिष्टता । तथा सांभोगिकीनां संयतीनामुपधिं विधिना संयतीप्रायोग्यं गणधरः परिकर्मयन् ददानश्च परिशुद्धः, अविधिना परिकर्मयतश्चतुर्गुरु, पार्श्वस्थादिसंयतीनां गृहस्थानां च कारणे विधिनेत्यादि भङ्गचतुष्टये प्रत्येकं चतुर्गुरु, द्वितीयादिषु भङ्गेषु तपःकालविशिष्टता प्राग्वत् [४] ।

तथापरिहरणा नाम परिभोगस्तत्रापि भङ्गचतुष्टयम्-कारणे विधिना १, काणेऽविधिना २, निष्कारणे विधिना ३, निष्कारणेऽविधिना ४ । तत्र प्रथमभङ्गे सांभोगिकैः सममुपकरणं परिभुञ्जानः शुद्धः, शेषेषु द्वितीयादिषु भङ्गेषु मासलघु तपःकालविशिष्टमं, असांभोगिकैः सममुपकरणं परिभुञ्जानस्य चतुर्ष्वपि भङ्गेषु मासलघु, द्वितीयादिषु तपःकालविशिष्टता, पार्श्वस्थादिभिर्गृहस्थादिभिश्च सममुपभुञ्जानस्य भङ्गचतुष्टयेऽपि प्रत्येकं चतुर्लघु, यथाच्छन्दैः संयतीभिर्गृहस्थाभिश्चतुर्गुरु, उभयत्रापि द्वितीयादिषु भङ्गेषु तपःकालविशिष्टता [५] संयोगो द्वयादिपदानां मीलनं, तत्र भङ्गाः षड्विंशतिस्तद्यथा-दश द्विकसंयोगाः, दश त्रिकसंयोगाः, पञ्च चतुष्कसंयोगाः, एकः पञ्चसंगः । तत्र दश द्विकसंयोगा इमे-सांभोगिकः सांभोगिकेन सममुद्गमेनोत्पादनया च शुद्धमुपधिमुत्पादयतीति प्रथमः, उद्गमेनैषणया च द्वितीयः, उद्गमेन शुद्धमुत्पादयति परिकर्मयति चेति तृतीयः, उद्गमेन शुद्धमुत्पादयति परिहरति चेति चतुर्थः, एते चत्वारोऽपि भङ्गा उद्गमपदममुञ्चता लब्धाः, एवमुंत्पदनापदामोचनेन लभ्यन्ते त्रय, एषणापदामोचनेन द्वौ, परिकर्मणापरिहरणापदयोरेकः । दश त्रिकसंयोगा इमे-भोगिकः सांभोगिकेन सममुद्गमेनोत्पादनया एषणया च सुद्धमुत्पादयतीति प्रथमः, उद्गमेनोत्पादनया च शुद्धमुत्पादयति परकिर्मयति चेति द्वितीयः, उद्गमेनोत्पादनया च शुद्धमुत्पादयति परिहरति चेति तृतीयः, इत्याद्युपयुज्य वक्तव्यम् । एवं पञ्च चतुष्कसंयोगाः, एकः पञ्चकसंयोगश्च वक्तव्यः । एतेषु च षड्विंशतिभङ्गेषु सांभोगिकेन समं शुद्धः, असांभोगिकादिभिः सममसांभोगिकादिविषयं द्वयासंयोगनिष्पन्नं प्रायश्चित्तं तद्यथा-उद्गमनिष्पन्नमुत्पादनानिष्पन्नमित्यादि ।। उक्त उपधिसंयोगः, सम्प्रति श्रुतसंभोगादीनतिदेशत आह-

[भा.२३५१] एवं जहा निसीहे पंचम उद्देसए समक्खाउ ।
संभोगविही सव्वो, तहेव इहयं पवित्तव्वो ।।

वृ- एवं उक्तेन प्रकारेण यथा निशीथे निशीथाध्ययने पञ्चम उद्देशके सवंश्रुतादिसंयोगनिष्पन्नं प्रायश्चित्तविषयं संभोगविधिः समाख्यातस्तथैवेहापि वक्तव्यः । स च ग्रन्थगौरवभयान्न शक्यते लिखितुमिति तत एवावधारणीयः ।। एष च संभोगविधिः पूर्वमस्मिन्नर्धभरते सर्वसंविग्नानामेकरूप आसीत् । पश्चात्कालदोषत इमे सांभोगिका इमेत्वसांभोगिका इत प्रवृत्तम् । किं कारणमिति चेदत आह-

[भा.२३५२] अगडे भाउय-तिल-तंदुल य सरक्खे य गोणि असिवे य ।
अविनठे संभोगे सव्वे संभोइया आसी ।।

वृ- पूर्वमनिवष्टे संभोगे सर्वे संविग्नाः सांभोगिका आसीरन्, पश्चात्तु कालवैगुण्यतः सांभोगिकासांभोगिकविभागः । तत्र दृष्टान्तोऽवटो गाथायां जातावेकवचनमेवमुत्तरत्रापि १ तथा द्वौ भ्रातरौ २ तिलाः ३ तन्दुलाः ४ सरजस्काः ५ गोवर्गश्चाशिवविषयः ६ ।। तत्रावटदृष्टातभावनार्थमाह-

[भा.२३५३] आगंतु-तदुत्थेण व दोसेन विनट्ठे कूवे तो पुच्छा ।
कउ आनीयं उदयं अविनट्ठे नासि सा पुच्छा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एगस्स नगरस्स एक्कीए दिसाए बहवे महुरोदगा कूवा । तत्थ केइ आगंतुगेन तया विसाइणा दोसेन केईतदुत्थेण खारलोणविसपाणियसिरासंभवरूपेण विना । तत्थ केसु वि कूवेसु पाणियं पिज्जमाणं कुट्ठाइणा सरीरसंदूसणकरं हवइ, केई जीवंतकरा भवंति, केइ ण्हाणाय मणाइसु अविरुद्धा, केइ ण्हाणाइसु विरुद्धा, तत्थ बहुजणो एयद्दोसदुठे ते नाउं आणिए पाणिए पुच्छइ, कउ आणियं । तत्थ जइ निद्दोसं तो परिभुंजंति, अह सदोसं तो वज्जंति । तत्थ वजिइ जाणं तेन सदोसमाणियं, ताह सो तओ फेडिज्जइ तज्जिज्जइ य । अह अयाणं तेनमाणियं तो वारिज्जइ मा पुनो आणिज्जासि । अक्षरगमनिका त्ववम्-आगन्तुकेन तदुत्थेन वा दोषेण कूपे कूपसंघाते विनष्टे सति ततस्तदनन्तरं यतस्ततोवा समानीते उदके लोकस्य पृच्छा प्रावर्तत, कुत आनीतमिदमुकमिति । अविनष्टे कूपसंघाते नासीत् सा पृच्छा । एष दृष्टान्तोऽयमर्थोपनयः-अविनष्टे संभोगे न सांभोगिकपरीक्षा आसीत्; अधुना दुःमानुभावतः केचित् चारित्रशरीरोत्तरगुणदूषका अभवन्, केचित् चारित्रजीवितव्यपरोपकाः, केचित् संस्पर्शपरिभोगिनः, केचित् संस्पर्शतोऽपि विवर्जिताः, ततः परीक्षा [१] ।। अधुना भ्रातृदृष्टान्तमाह-

[भा.२३५४] भोइकुलसेवि भाउय दुस्सीलेगे तु जायतो पुच्छा ।
एमेव सेसएसु वि होइ विभासा तिलाईसु ।।

वृ- द्वौ भ्रातरौ भोजिकुलसेवकौ राजकुले अभ्यर्हितसेवकौ सर्वत्रावारितप्रसरौ, तयोः कनिष्टोऽन्तःपुरे कृतानाचारो जातस्ततो राज्ञा प्रवेशो निवारितः । ज्येष्टोऽपि च राज्ञोऽकथिते प्रवेशं न लभते, प्रतिहारेण तु कथिते राज्ञा पृच्छ्यते, क आगतो ज्येष्ठः कनिष्टो वा, तत्र ज्येष्ठ इति कथिते स प्रवेश्यते । इतं पु पृच्छा पूर्वं नासीत् । कालक्रमेण त्वेकस्मिन् कनिष्टे दुःशीले जाते प्रावर्तत । उपनयभावना प्राग्वत् [२] तिलादिदृष्टान्तानाह-एमेवत्यादि, एवमेवानेनैव प्रकारेण शेषेष्वपि तिलादिषु दृष्टान्तेषु भवति विभाषा व्याख्यानं कर्तव्यम् । तच्चेदम् । पूर्वं सर्वेष्वपि आपणेषु अपूतिकास्तिला अदुष्टजन्मानस्तन्दुला विक्रयाय प्रसार्यन्ते स्म । कालदोषत एकेन वणिजा निकृतिबहुलेन पूतिकास्तिलाः प्रसारिताः । अपरेण तु दुष्टजन्मानस्तन्दुलास्ततो लोकस्य पृच्छा प्रावर्तत, कीदृशास्त्वापणे तन्दुलाः । कीदृशा वा तिला इति पूर्वं नासीत् । उपनयः प्राग्वत् [३-४] ।। तथा एकसिमन्नगरे एकस्यां दिशि बहूनि देवकुलानि तेषु सर्वेषु सरजस्का वसन्ति सुशीलास्तान् सर्वानपि भूयान् जनो निर्विशेषं पूजयति, श्चात्केषुचिद्देवकुलेषु दुःशीला जातास्ततो निमन्त्रणवेलायां पृच्छा प्रवृत्ता कतमान्निमन्त्रयामि, पूर्वं त्वेवंरूपा पृच्छा नासीत् । उपनयः प्राग्वत् [४] ।। तथा एकस्मिन् ग्रामे महान् गोवर्गः । स कदाचिदशिवेन गृहीतस्ततस्तस्मात् ग्रामादीनीतासु गोषु लोकस्य पृच्छा अभवन् कुतो ग्रामादानीता कस्य वा गोवर्गस्येयमिति, पूर्वं तु नासीत् [६] ।। एवमत्रापि विनष्टे सभोगे संभोगिकः परीक्ष्य संभोज्यते । तथा चाह-

[भा.२३५५] साहम्मिय वइधम्मिय निधरिसभाणे तहेव कूवे य ।
गावी पुक्खरिणीया नीयल्लग सेव आगमने ।।

वृ- सधर्मता समानशीलधर्मता तां सम्यक्परीक्षया ज्ञात्वा संभुञ्जते, विधर्मता विगतधर्मशीलता तां ज्ञात्वा परिवर्जयंति । यथा सुवर्णं निघर्षे निकषोपले परीक्ष्य यदि युक्तं ज्ञायते ततः प्रतिगृह्यते, अन्यथा तु परित्यज्यते । एवमज्ञातशीलोऽपि भाजनेन परीक्षणीयः । यदि भाजनस्य तलमघृष्टमुपकरणं वा विधिना सीवितं तत आलएण विहारेणमित्यादिवचनतः साधर्मिको ज्ञेयः शेषस्तु वैधर्मिकः । यथा वा कूपे यदि वा गोषु यथा वा पुष्करिणी यथा यो निजकस्य भ्रातुः सेवकस्यागमने परीक्ष्य तथात्रापि परीक्ष्य च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संभोगविसंभोगौ । उक्तः सप्रपञ्चः संभोगः । सम्प्रति येनाधिकारस्तमभिधित्सुरिदमाह-

[भा. २३५६] एएसिं कयरेणं संभोगेण तु होइ संभोगी ।
समणाणं समणीतो भन्नइ अनुपालणाए ओ ।।

वृ- एतेषामनन्तरोदितानां संभोगानां मध्ये कतरेण संभोगेण संभोगिन्य श्रमणानां श्रमण्यो भवन्ति । सूरिराह-भण्यते अनुपालनया अनुपालनारूपेण संभोगेन [संभोगः] । तदेवमुक्तसंभोगे ।

[भा. २३५७] आलोयणा सपक्खे परपक्खे चउगुरुं च आणादी ।
भिन्नकहादि विराधन दट्ठूण व भावसंबंधो ।।

वृ- आलोचना सपक्षे दातव्या । तद्यथा-निर्ग्रन्थो निर्ग्रन्थस्य पुरत आलोचयति निर्ग्रन्थी निर्ग्रन्थ्याः पुरतो, यदि पुनर्विपक्ष आलोचयति यथा निर्ग्रंथो निर्ग्रन्थ्याः पुरतो, निर्ग्रन्थी वा निर्ग्रन्थस्य, तदा प्रायश्चित्तं चतुर्गुरुकं । न केवलं प्रायश्चित्तं चतुर्गुरुकं किन्त्वाज्ञादयश्च दोषाश्चशब्दो भिन्नक्रमः । स च तथैव योजितः कस्मादेवमत आह- 'भिन्नकहादि' इत्यादि चतुर्थव्रतातिचारमालोचयन्त्याः संयत्या भिन्नकथादोषो भवति । चतुर्थव्रतातिचारकथनस्तस्याः कदाचिदालोचनाधारस्य भावभेदो भवतीत्यर्थः। आदिशब्दात् धृष्टीभूता सा याञ्चामपि कुर्यादिति परिग्रहः । एवं सति शीलविराधना । 'दट्ठूण व भावसंबंधो' दृष्टिविकारेण मुखविकारेण वा स वा सा वा भावं दृष्ट्वा मामिच्छतीति अभिप्रायं ज्ञात्वा सम्बन्धो घटना स्यात् ।। एतदेव व्याख्यानयति-

[भा. २३५८] मूलगुसु चउअथे विगडंझंते विराधना हुज्रा ।
निच्छक्क दिट्ठिमुहरागतो य भावं वियाणंति ।।

वृ- मूलगुणेषु मध्ये चतुर्थे मूलगुणातिचारे विकटमाने आलोच्यमाने विराधना शीलस्य भिन्नकथादिना प्रागुक्तस्वरूपेण भवति । तथा निच्छक्का घृष्टा सती याञ्चां कुर्यात्, तथा दृष्टिरागतो मुखरागतो वा परस्य भावं विजानीतो यथा मामेष एषा वा इच्छतीति ततो घटना स्यात् । न केवलमेते विपक्षे आलोचायां दोषाः किन्त्विमेऽपि तानेवाह-

[भा. २३५९] अप्पच्चय निब्भयया पेल्लणया जइपगासणे दोसा ।
वयणी वि होइ गम्मा निथए दोसे पगासंति ।।

[भा. २३६०] वंदत वा उठे वा गच्छो तह लहुसगत्तनाणगणे ।
विगडिंत पंजलिउडं दट्ठूणुड्डाह कुवियट्ठ ।।

वृ- यतः संयत्याः पुरतः प्रकाशने आलोचनायामिमे दोषाः । तद्यथा-अप्रत्ययः किमेषा वराकी जानातीत्यवज्ञातो यत्किमपि सा प्रायश्चित्तं ददाति तत्र विश्वासाभावः । तथा भूयोऽपराधकरणे गुरुर्गरीयांसं दण्डं दास्यतीति महत्याशंका संयतीनां तु पुरुषस्य न भयमिति निर्भयता तद्भावाच्च भूयो भूयोऽपराधकरणप्रवृत्तिः । तथा पेल्लणयेति यदि महत् प्रायश्चित्तं ददाति ततः संयतो ब्रूते-न भवत्येतत्प्रायश्चित्तं किन्त्विदमित्येवं प्रायश्चित्तस्य प्रेरणा ।। तथा व्रतिन्यपि यदि संयतस्य पुरत आलोचयति ततः सा निजकान् दोषान् प्रकाशयन्ती गम्या भवति । यथा एकवारं तावदिदमाचरितं, भूयोऽपि सम्प्रति मया सह समाचर्यतां पश्चात्प्रायश्चित्तं दास्यते इति । द्वितीयगाथा सम्प्रदायात् व्याख्येया । यद्येवं तर्हि कथं पूर्वमार्यिकाः च्छेदश्रुतमधीयेरन्, कथं वालोचना दद्युत्तरमाह-

[भा. २३६१] ततो जाव अज्ररक्खिय आगमववहारिणो वियाणित्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न भविस्सति दोसोत्ति तो वायंती उ च्छेदसुयं ।।

वृ- यावदार्यरक्षितास्तावदागमव्यवहारिणोऽभूवन् । ते चागमव्यवहारबलेन विज्ञाय यथा एतस्याश्छेदश्रुतवाचनायां दोषो न भविष्यतीति संयतीमपि च्छेदश्रुतं वाचयन्ति स्म ।।

[भा.२३६२]　　आरेणागमरहिया मा विद्दाहिंति तो न वाएंति ।
तेन कहं कुव्वंतं सोहिं तु अयाणमानीतो ।।

वृ- आर्यरक्षितादारात् आगमरहितास्ततस्ते मा च्छेदश्रुताध्ययनतः संयत्यो विद्रास्यन्ति विनक्ष्यन्तीति हेतोर्च्छेदश्रुतानि संयतीर्न वाचयन्तीति अत्राह-तेन श्रुताध्ययनाभावेन कथं ताः संयत्योऽजानानाः शोधिं कुर्वन्तु । अत्राचार्य आह-

[भा.२३६३]　　तो जाव अज्जरक्खिय सट्ठाणे पगासयंसु वइणीतो ।
असतीए विवक्खंमि वि एमेव य होंति समणा वि ।।

वृ- यतः पूर्वमागमव्यवहारिणः स्युः च्छेदश्रुतं च संयत्योऽधीयेरन् ततो यावदार्यरक्षितास्तावत् व्रतिन्यः स्वस्थाने स्वपक्षे संयतीनां प्रकाशने प्रकाशनामकार्षुः । स्वपक्षाभावेऽपि विपक्षेऽप्यालोचितवत्यः श्रमण्यः । एवमेव श्रमणा अपि भवन्ति ज्ञातव्याः किमुक्तं भवति ? श्रमणा अपि सपक्षे आलोचितवन्तः । तदलाभे विपक्षेऽपि श्रमणीनां पार्श्वे इत्यर्थः दोषाभावात्, आगमव्यवहारव्यवहारिभिर्हि दोषाभावमवबुध्य च्छेदश्रुतवाचना संयतीनां दत्ता नान्यथेति, आर्यरक्षितादारतः पुनः श्रमणानामेव समीपे आलोचयंति श्रमण्योऽपि श्रमणानामगमव्यवहारच्छेदाद् । अत्रैव परमतमाशंक्य दूषयति ।।

[भा.२३६४]　　मेहुणवज्जं आरेण केइ समणेसु ता पगासंति ।
तं न जुज्जइ जम्हा लहुसगदोसा सपक्खे वि ।।

वृ- आर्यरक्षितादारतः श्रमणेषु श्रमणानां पार्श्वे ताः श्रमण्यः प्रकाशयन्त्यालोचयन्ति मैथुनवर्जं, मैथुनं पुनः श्रमण्यः श्रमणीनामेव सकाशे शालोचयन्ति इति केचिद् व्याचक्षते, तत्तु न युज्यते यस्माल्लघुस्वकदोषाः सपक्षेऽपि किमुक्तं भवति ? श्रमण्योऽपि स्वकलघुदोषतस्तुच्छत्वरूपस्वकदोषपरिश्रिवित्वं कुर्युः परिभवं वा समुत्पादयेयुः । तस्मान्मैथुनमपि श्रमणानामेवान्तिके विकटनीयम् ।

[भा.२३६५]　　असती कडजोगी पुन मुत्तूणं संकियाइं ठाणाइं ।
आइन्ने धुवकम्मिय तरुणी थेरस्स दिट्ठिपहे ।।

वृ- आर्यरक्षितकालेऽपि यदि संयत्या मूलगुणापराध आलोचयितव्यस्तर्हि संयत्याः सकाशे आलोच्यते । तस्यासति अभावे यः कृतयोगी सूत्रतोऽर्थतश्च च्छेदग्रन्थधरः स्थविरस्तस्य समीपे आलोचयति । नवरं शङ्कितानि स्थानानि वक्ष्यमाणानि शून्यगृहादीनि मुक्त्वा किन्त्वाचीर्णे उचिते प्रदेशे आलोचयितव्यम् । यत्र ध्रुवकर्मिको दृष्टिपथे वर्तते दृष्ट्या पश्यति, न तु शृणोति, तत्र नवनिकान्तरिता आलोचयति । तरुणी थेरस्सेत्येष तृतीयभङ्ग उपात्तः । स च शेषभङ्गानां त्रयाणामप्युपलक्षणं ते चेमे स्थविरा स्थविरस्यालोचयति । स्थविरा तरुणस्यालोचयति । तरुणी स्थविरस्यालोचयति । तरुणी तरुणस्य ।। यदुक्तं मुक्त्वा शङ्कितानि स्थानानि, सम्प्रति तान्येवोपदर्शयति-

[भा.२३६६]　　सुन्नघर देउलज्जाणरन्नपत्थन्नुवस्सयस्संतो ।
एयविवज्जे ठायंति तिन्नि चउरो हवा पञ्च ।।

वृ- शून्यगृहं देवकुलं उद्यानमरण्यं प्रच्छन्नं च स्थानं तथा उपाश्रयस्यान्तर्मध्ये एतद्विवर्जे

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

एतद्विरहिते प्रदेसे आलोचना निमित्तं तिष्ठन्ति । ते च जघन्यतस्त्रयो यदि वा चत्वारोऽथवा पञ्च । ते च त्रिप्रभृतयो वक्ष्यमाणभङ्गकानुसारेण प्रतिपत्तव्याः । भङ्गकानेवाह-

[भा.२३६७] थेरतरुणेसु भंगा चउरो सव्वत्थ परिहरेदिट्ठिं ।
दोण्हं पुन तरुणाणं थेरे थेरी य पच्चुरसं ।।

वृ- स्थविरतरुणेषु भङ्गाश्चत्वारस्ते च प्रागेवोपदर्शिताः । स्थविरः स्थविरस्यालोचयतीत्यादि । तत्र यदि जवनिकाया अवकाशो नास्ति ततः सर्वत्र चतुर्ष्वपि भङ्गेषु दृष्टिं परिहरेत् । भूमिगतदृष्टिका सती आलोचयेत् । यथा आलोचनार्हः शृणोति, तत्र चतुर्थभङ्गे द्वयोस्तरुणयोः स्थविरः स्थविरा च प्रत्युरसमिति प्रत्यासन्नौ सहायौ दीयेते, येन परस्परं तौ दृष्टिं न बध्नीतो नापि मुखविकारं कुरुतः । एवमस्मिन् चतुर्थे भङ्गे चत्वारो भवन्ति ।।

[भा.२३६८] थेरो पुन असहायो निग्गंथी थेरिया वि ससहाया ।
सरिसवयं च विवज्जे असती पंचमं कुज्जा ।।

वृ- तृतीयभङ्गे पुनः स्थविरोऽसहायोऽपि भवतु, तरुण्याः पुनः स्थविरा सहाया दीयते । द्वितीयभङ्गे निर्ग्रन्थी स्थविरापि ससहाया कर्तव्या । तरुणस्यालोचनार्हस्य सहायोऽस्तु वा न वा न कश्चिद्दोषः । एवं च तृतीये द्वितीये च भङ्गे त्रय जना भवन्ति । तथा सदृशवयो नियमतः सहायानां विवर्जयेत् तदसंभवे सदृशवया अपि भवेत् । तत्र प्रथमभङ्गे चतुर्थभङ्गे वा सदृशवयः सहायसंभवे पञ्चमे क्षुल्लकं क्षुल्लकां वा पटुकां कुर्यात् ।।

[भा.२३६९] ईसिं अन्नोयत्ता ठिया [ठविया] उ आलोयए विवक्खंमि ।
सरिपक्खे उक्कुडुओ पंजलिविट्ठो वणुन्नातो ।।

वृ- विपक्षे श्रमणस्य समीपे श्रमणी आलोचयति । ईषदवनता ऊर्ध्वस्थिता । सादृशपक्षे पुनः श्रमणः श्रमणस्य पार्श्वे पुनरुत्कुटुकः कृतप्राञ्जलिरालोचयति । अथ सोऽर्शोव्याधिपीडितः ततोऽनुज्ञापनां कृत्वा अनुज्ञातः सन् निषद्यायामुपविष्ट आलोचयति ।।

[भा.२३७०] दिट्ठीए होंति गुरुगा सविकाराउ सरत्ति सा भणिया ।
तस्स विवड्ढिते रागे तिगिच्छ जयणाए कायव्वा ।।

वृ- यो दष्ट्या दृष्टिं बध्नाति, तस्य दृष्टौ सविकारायां भवन्ति प्रायश्चित्तता चत्वारो गुरुकाः, तत्र ये ते द्वितीयका दत्तास्ते यदि एकतरं सविकारं पश्यन्ति तत आलोचनातोऽपसारयन्ति यथाऽपसरतापसरत यूयं, न किमप्यालोचनया प्रयोजनमिति । अथ सा निर्ग्रन्थी स्वभावत एवोरालशरीरा सविकारा दृष्ट्वा अपसरेत्ति भणिता सती अपसृता तथापि तस्यालोचनाचार्यस्य यदि तस्या उपरि विवर्द्धितो रागस्तर्हि तस्मिन् सति यतनया चिकित्सा कर्तव्या । तामेव यतनामाह-

[भा.२३७१] अन्नेहिं पगारेहिं जाहे नियत्तेउ सो न तीरति उ ।
घेत्तूणाभरणाइ तिगच्छ जयणाए कायव्वा ।।

वृ- यदा अन्यैः प्रकारैस्तं भावं निवर्तयितुं न शक्नोति तदा तस्याः संयत्या आभरणानि वस्त्राणि गृहीत्वा यतनया चिकित्सा कर्तव्या । एनामेवाह-

[भा.२३७२] जारिसिसिवएहिं ठिया तारिसएहिं तमस्सती वरिया ।
संभलि विनोयकेयण वेलयणं चिहुरगंडेहिं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यादृशैः सिवयैर्वस्त्रैः प्रावृत्तैः सा संयती उपविष्टा दृष्टा तादृशैर्वस्त्रैस्तमो ऽन्धकारमस्या अस्तीति तमस्विनी रात्रिस्तस्यां तरुणसाधुर्वरितः प्रावृत्तः क्रियते । ततः संभलिति दूती प्रेष्यते । ततो विनाविनृको नरविहीनो यत्र को निवासो गृहं इत्यर्थः, तत्र केतनं संकेतनं सङ्केतो दीयते, दत्वा च स तत्र स्थितस्तावत्तिष्ठति, यावत् स तरुणसाधुः संयतीनेपथ्योपेत आगच्छति, तस्मिन्नागते चिहुरेषु केशेषु गंडयोश्च विलपनं क्रीडनं करोति, तत्र यद्येतावता शुक्रनिपातस्तिष्ठति, तर्हि सुंदरं, अथ न तिष्ठति तर्हि स संयतीनेपथ्योऽपसार्यते । प्रकारान्तरमारभ्यते । तदेव प्रकारान्तरमाह-

[भा.२३७३] अहवा वि सिद्धपुत्तिं पुव्वं गमेऊन तीय सिवएहि ।
आवरिय कालियाए सुन्नागारादि संमेला ।।

वृ- अथवेति प्रकारान्तरद्योतने पूर्वं सिद्धपुत्रीं गमयित्वा तस्याः संयत्याः सिवयैरावृत्य कालिकायां रात्रौ शून्यगृहादिषु तया सहतस्य संमेलः सङ्गमः कर्तव्यः । सम्प्रति यादृशा उत्सर्गत आलोचनार्हास्तादृशानभिधित्सुराह-

[भा.२३७४] गीयत्था कयकरणा पोढा, परिणामिया य गंभीरा ।
चिरदिक्खिया य वुड्ढा जईण आलोयणा जोगा ।।

वृ- गीतार्थाः सूत्रार्थतदुभयनिष्णातत्वात्, कृतकरणा अनेकवारमालोचनायां सहायीभवनात्, प्रौढाः समर्थाः सूत्रतोऽर्थतश्च प्रायश्चित्तदाने पश्चात्कर्तुमशक्यत्वात्, परिणामिका नापरिणामिका अतिपरिणामिका वा, गंभीरा महत्यप्यालोचकस्य दोषे श्रुते अपरिश्राविणः, चिरदीक्षिताः प्रभूतकं प्रव्रजिता, वृद्धाः श्रुतेन पर्यायेण वयसा च महान्त, एवंभूता यतीनां साधूनामुपलक्षणमेतत् संयतीनां वालोचनायोग्याः ।

मू. (१४६) *जे निग्गंथा य निग्गंथीओ य संभोइया सिया, नो ण्हं कप्पइ अन्नमन्नेणं वेयावच्चं कारवेत्तए । अत्थि या इत्थ ण्हं केइ वेयावच्चकरे, कप्पइ ण्हं तेनं वेयावच्चं करावेत्तए; नत्थि याइ ण्हं केइ वेयावच्चकरे, एव ण्हं कप्पइ अन्नमन्नेणं वेयावच्चं कारवेत्तए ।*

वृ- ये निर्ग्रन्था निर्ग्रन्थ्यश्च सांभोगिकास्तेषां नो, ण्हमिति वाक्यालङ्कारे, कल्पते अन्योन्यस्य वैयावृत्त्यं कारयितुं, अस्ति कश्चित् वैयावृत्यकरस्ततः कल्पते तं वैयावृत्यं कारयितुं, नास्ति कचित् वैयावृत्यकरः एवं सति कल्पते अन्योन्यस्य वैयावृत्यं कारयितुमिति सूत्रसंक्षेपार्थः ।। अधुना भाष्यविस्तरः-

[भा.२३७५] आलोयणाए दोसा वेयावच्चे वि हुंति तह चेव ।
नवरं पुन नाणत्तं, बितियपदे होइ कायव्वं ।।

वृ- ये एव विपक्षे आलोचयतां दोषा उक्ताः परस्परं वैयावृत्येऽपि त एव दोषा भवन्ति । ये चाभ्यधिकास्तेऽनन्तरगाथायां वक्ष्यन्ते, नवरं पुनर्नानात्वं द्वीतयपदे अपवादपदे भवति कर्तव्यं । तत्राभ्यधिकान् अभिधित्सुराह-

[भा.२३७६] उउभयमाणसुदेहिं देहसहावानुलोमभुज्जेहिं ।
कढिणहियियाण वि मणं वंकंत अचिरेण कइयविया ।।

वृ- ऋतौ ऋतौ यैर्भज्यमानैः सेव्यमानैर्भज सेवायामिति वचनात् सुखं जन्यते तानि ऋतुभज्यमानसुखानि तैस्तथा देहः शरीरं तस्य स्वो भावः स्वरूपं देहस्वभावस्यानुलोमान्यकूलानि यानि तैर्वैयावृत्त्यं कुर्वत्यः संयत्यो ये संयतीभिरानीतं भुञ्जते तेषां कठिहृदयानामपि धृतिबलिष्टानामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयमात्मनोऽचिरेण कालेण वक्तव्यंति बा[व्या]धयन्तीत्यर्थः ।कथंभूता इत्याह-केतविक्यः कैतवेन कपटेनान्यन्मनस्यन्यद्वाचि इत्यादिलक्षणेन निवृत्ताः कैतविक्यः, सम्प्रति द्वितीयपदे विपक्षेऽपि वैयावृत्त्ये करणे युक्तिमुपन्यस्यति ।।

[भा.२३७७] जहा चेव य बितियपदे लभंति आलोयणं तु जयणाए ।
एमेव य बिइयपदे वेयावच्चं तु अन्नोन्नं ।।

वृ- यथा चैव द्वितीयपदेऽपवादपदे विपक्षेपि यतनया संयत्यः श्रमणानां पार्श्वे आलोचनां ददति । एवमेव द्वितीयपदेऽपि अन्योन्यस्मिन् परस्परवैयावृत्यमपि कुर्वन्ति ।तदेव द्वितीयपदमाह-

[भा.२३७८] भिक्खू मयण च्छेवग एएहिं गणो उ होज्ज आवन्नो ।
वायपराइउ वा से संखडिकरणं च विच्छिन्नं ।।

वृ- भिक्षूपासकः कोऽपि विषमिश्रं भोजनं ददाति, मदनं मदनकोद्रवकूरं वा प्रतिलाभयेत् । च्छेवगत्ति मारिर्वा सकलस्यापि साधुगणस्योपस्थिता एतैः कारणैर्गण आपन्नो विपन्नो भवति । तत्र प्रथमतो भिक्षुपासकस्य प्रतिनिविष्टस्य विषमिश्रभोजनदानं भावयति । कोऽप्युपासको भिक्षूपासको बहुजनमध्ये वादे पराजितस्ततः स प्रतिनिविष्टो जातः । स च कैतवेनाचार्याणां समी सम्यगुपस्थितः कथय मे भगवन्नार्हतं धर्ममाचार्येण कथितस्ततः स कैतवेन ब्रूते । अद्यप्रभृति ममार्हतो धर्मो मया युष्मत्समीपे गृहीत एवमुक्त्वा आचार्यान् विज्ञपयति । यथा मया भिक्षूणामर्थाय विस्तीर्णं संखडिकरणं कृतं प्रभूतं परमान्नमुपस्कृतं कारितमित्यर्थः । तन्मा असंयतास्ते भुञ्जीरन्निति साधूनां प्रयच्छामि । अुगृहीत मां यूयमिति ।। एवमुक्ते साधवश्चिन्तयन्ति-सत्यमेतत् यदेवं ब्रूते ततो गृह्णीम इति । ततस्तेषु गतेषु तस्मिन् परमान्ने विषं क्षिप्तं साधूनां पर्याप्तं दत्तं । तच्च साधुभिराहारितं तेन सर्वे पतिता यदि वा तत्प्रदत्तं मदनकोद्रवकूरं भुक्त्वा पतिताः एतदेवाह-

[भा.२३७९] कतियवयधम्मकहाए वेति भिक्खुगाणट्ठा ।
परमन्नमुवक्खडियं मा जाउ असंजओति मुहाइं ।।

[भा.२३८०] तं कुणह उग्गहं मे साहुजोग्गेण एसणिज्जेण्णं ।
पडिलाभणा विसेणं पडिया पडिती य सव्वेसिं ।।

वृ- कैतवेन धर्मकथायां कथितायामावृत्तो ब्रूते मया भिक्षुकाणामर्थाय परमान्नमुपस्कृतं कारितं तन्मा असंयतमुखानि यातु तस्मात् कुरुत मे साधुयोग्येनैषणीयेनानुग्रहमेवमुक्ते गतेषु साधुषु ये पापीयसा बिषेण विषमिश्रेण परमान्नेन प्रतिलाभना कृता यदि वा मदनकोद्रवकूरेण सा वसत्यागतानां साधूनां मुखेषु पतिता ततः सर्वेषां पतितिर्मरणमभूत् ।

[भा.२३८१] आयंबिलखमगासइ लद्धाण चरंतएण उ विसेण ।
बिइयपदे जयणाए कुणमाणि इमाउ निद्दोसा ।।

वृ- न च तत्र कोऽपि क्षपक आचाम्लो वा आसीत् यो विषादुद्धरति ततः क्षपकानामाचमाम्लानां वासत्यभावे तेषां च साधूनां चरता संचरिष्णुना विषेण लब्धां मृतानामित्यर्थः । मार्या वा समुपस्थितया मृतानां द्वितीयपदे इयं संयती यतनया वैयावृत्त्यं कुर्वाणा निर्दोषा ।

कीदृशी पुनर्वैयावृत्यकरणे योग्येत्यत आह-

[भा.२३८२] संबंधिनी गीयत्था ववसाया थिरत्तणे कयकरणा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिरपव्वइया य बहुस्सुया परिणामिया जाव ।।

[भा.२३८३] गंभीरा मद्दविया मियवादी अप्पकोउहल्ला य ।
साहुं गिलाणगं खलु पडिजागति एरिसी अज्ञा ।।

वृ- या आर्या ग्लानस्य प्रतिजाग्रमाणस्य भगिन्यादिनात्रकेण सम्बन्धिनी, तथा गीतार्था एषणीयानेषणीयविधौ सम्यक् कुशला तथा व्यवसायिनी, या च स्थिरत्वे वर्तते स्थिरा इत्यर्थः तथा कृतकरणा, चिरपव्वइया, बहुश्रुता, तथा या परिणामिकी, गंभीरा, मार्दविता संजातमार्दवा, मितवादिनी, अल्पकुतूहला, ईदृशी आर्या गणाभावे ग्लानं खलु प्रतिजागर्ति । सम्प्रति व्यवसायिन्यादि -

[भा.२३८४] ववसायी कायव्वे थिरा उ जा संजमम्मि होइ दढा ।
कयकरणजीए बहुसो वेयावच्चा कया कुसला ।।

वृ- या कर्तव्ये व्यवसायाधिकारिणी नालस्येनोपहता तिष्ठति साध्यवसायिनी सा संयमे भवति दृढा सा स्थिरा यया बहुशो वैयावृत्यानि कृतानि सा कृतकरणा कुशला इत्यर्थः ।

[भा.२३८५] चिरपव्वइय समाणं तिण्हवरिं बहुस्सुया पकप्पधरी ।
परिणामिय परिणामं जा जाणइ पोग्गलाणं तु ।।

वृ- चिरप्रव्रजिता नाम या तिसृणां समानां वर्षाणामुपरि, या प्रकल्पधरी सा बहुश्रुता, तया पुनः पुद्गलानां विचित्रं परिणामं जानाति सा परिणामिकी ।।

[भा.२३८६] काउं न उत्तुणई, गंभीरा, मद्दविअ विम्हइया ।
कज्जे परिम्मियभास मियवादी होइ अज्ञा उ ।।

वृ- या वैयावृत्यं कृत्वा न उत्तुणइ गर्वबुद्धया न प्रकाशयति सा गंभीरा, मर्दविनी अविस्मयिता, तथा कार्ये परिमितभाषिणी मितवादिनी ।

[भा.२३८७] कक्खंत गुज्झादी न निरक्खे अप्पकोउहल्ला य ।
एरिसिगुणसंपन्ना, साहूकरणे भवे जोग्गा ।।

वृ- या कक्षान्तरे गुह्यादीनि न निरीक्षते सा भवत्यल्पकुतूहला ईदृशगुणसम्पन्ना साधुकरणे साधुवैयावृत्यकरणे भवत्यार्या योग्या, सम्प्रति वैयावृत्यकरणविधानमाह ।

[भा.२३८८] पडिपुच्छिऊण विज्ञे, दुल्लभ दव्वंमि होइ जयणाओ ।
विसघाई खलु कणगं, निहि जोणीपाहुडे सड्ढे ।।

वृ- प्रतिपृच्छ्य वैद्यान् यदि दुर्लभद्रव्येण प्रयोजनं जातं, ततस्तस्मिन् उत्पाद्ये भवति वक्ष्यमाणा यतना तामेवाह- विसघाई इत्यादि विषघाति खलु कनकं विषेण चोपहताः साधवस्तिष्ठन्ति । ततः सुवर्णेन प्रयोजनं जातं । तत्र यदि ज्ञानमयेन निधिर्निखातो ज्ञायते । तर्हि तमुत्खन्य यावता प्रयोजनं तावद्गृह्णाति, शेषं तथैव स्थापयति । अथ निधिपरिज्ञा नास्ति, तर्हि योनिप्राभृतोक्तेन प्रकारेणोत्पादयेत् । अथ योनिप्राभृतमपि नास्ति तर्हि श्राद्धान् श्रावकान् याचते ।।

[भा.२३८९] असतीए अन्नलिंगं तं पि जयणाए होइ कायव्वं ।
गहणे पन्नवणे वा, आगाढे हंसमादीवि ।।

वृ- अथ श्राद्धा अपि तादृशा न सन्ति, ये सुवर्णं याचितं ददति, ततस्तेषां श्राद्धानामसति अभावे आत्मना ग्रहणाय प्रज्ञापनाय च तत्रान्यदर्चितं लिंगं तदपि यतनया कर्तव्यं । सा चेयं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वमगारस्त्रीलिङ्गेनोत्पादयति । तथाप्यनुत्पत्तावर्चितलिङ्गेन तेनाप्युत्पादनाशक्तौ हंसादि वा यन्त्रमयं कृत्वा तेनोत्पादयेत् । यथा कोक्कासो यंत्रमयान् कापोतान् कृत्वा शालिमुत्पादितवान् । एवं तावन्निर्ग्रन्थी निर्ग्रन्थस्य वैयावृत्त्यं करोत्येवं संयतोऽपि संयत्या ग्लानाया वैयावृत्त्यं करोति-

मू. (१४७) *निग्गंथं च नं राओ वा वियाले वा दिहपट्ठो लूसेज्ञा; इत्थी वा पुरिसस्स ओमावेज्ञा पुरिसो वा इत्थीए ओमावेज्ञा । एवं से कप्पइ, एवं से चिट्ठइ, परिहारं च से न पाउणइ-एस कप्पे थेर कप्पियाण एवं से नो कप्पइ, एवं से नो चिट्ठइ, परिहारं च नो पाउणइ-एस कप्पे जिणकप्पियाणंत्ति बेमि ।।*

[भा. २३९०] पडिसिद्धमणुन्नायं वेयावच्चं इमं खलु दुपक्खे ।
स चेवय समणुन्ना, इहंपि कप्पेसु नाणत्तं ।।

वृ- अनन्तरसूत्रे विपक्षे वैयावृत्त्यकरणं प्रतिषिद्धं । तच्चैदमं-वैयावृत्त्यं खलु पुनर्द्विपक्षे परपक्षे चेत्यर्थः । सूत्रेणैवानुज्ञानात् । अत्थियाइण्ह केई वेयावच्चकरे कप्पतिण्हं वेयावच्चं करावित्तए इति वचनात् । सा च समनुज्ञा वैयावृत्त्य समनुज्ञा इहापि अस्मिन्नपि सूत्रेऽभिधीयते । केवलं कल्पयोन-नात्वमधिकमित्येष सूत्रसम्बन्धः । पुनः प्रकारान्तरेण सम्बन्धमाह-

[भा. २३९१] अत्थेण व आगाढं, भणिउ इहमवि या होइ आगाढं ।
अहवा अतिप्पसत्तं तेन निवारेइ जिनकप्पे ।।

वृ- वा शब्दः पक्षान्द्योतने पूर्वसूत्रेऽर्थेऽनागाढं भणितं सूचितं, तथा चागाढे प्रयोजने समुत्पन्ने संयती संयतस्यवैयावृत्त्यं कुर्वती समनुज्ञाता नान्यथा, । इहपि च भवत्यागाढं प्रयोजनमधिकृत्य वैयावृत्त्यकरणमिति सम्बन्धः । अथवातिप्रसक्तं खलु वैयावृत्त्यकरणं, तेन जिनकल्पे निवारयति ।।

[भा. २३९२] सुत्तम्मि कढियम्मि वोच्चत्थ करेंति चउगुरू होंति ।
आणादिणो य दोसा विराधना जा भणिय पुव्विं ।।

वृ- सर्वत्रापि सूत्रे कर्षिते उच्चारिते सति सम्बन्धः । तथा श्रमणैः श्रमणस्य वैयावृत्त्यं कर्तव्यं, श्रमणीभिः श्रमण्या यपिनर्विपर्यासं करोति, तर्हि विपर्यासं कुर्वीत प्रायश्चित्तं चत्वारो गुरुका, न केवलं प्रायश्चित्तमाज्ञादयश्चाज्ञानवस्थामिथ्यात्वविराधनारूपाश्च दोषास्तथा या पूर्वं वैयावृत्त्यसूत्रे भणिता विराधना शीलविराधना सा अत्रापि द्रष्टव्या । सुत्तंमि कढियंमीत्येतदेव प्रपञ्चयति-

[भा. २३९३] संबंधो दरिसिज्जइ उस्सुत्तो खलु न विज्ञते अत्थो ।
उच्चारितछिन्नपदे विग्गहिए चेव अत्थो उ ।।

वृ- सूत्रे उच्चारिते सति सम्बन्धोऽनन्तरसूत्रादिभिः सह दर्शते यतः सम्बन्धोऽर्थतो भवति । वर्णानां स्वतः सम्बन्धाभावात् । स चार्थः खलु उत्सूत्रः सूत्ररहितो न विद्यते, सम्बन्धे चोपदर्शिते उच्चारितसूत्रस्य च्छिन्नानि पदानि कर्तव्यानि, पदच्छेदोविधातव्य इत्यर्थः । ततो यानि पदानि विग्रहभाञ्जि तेषु विग्रह उपदर्शनीयः । विग्रहीते च सूत्रतोऽर्थो व्याख्येयः ।

[भा. २३९४] अकखेवो पुन कीरइ, कत्थइ विना वि तस्सिद्धी ।
जत्थ अवायनिदरिसणं एसेव उ होइ अक्खेवो ।।

वृ- आक्षेपः पुनः क्वचित् क्रियते । यथा किं कारणं परपक्षे वैयावृत्त्यं न क्रियते । कुत्रचित् पुनर्विनाप्याक्षेपं तत्सिद्धिराक्षेपसिद्धिः । कथमित्याह-यत्रापायनिदर्शनमपायप्रकटनमेष एव भवत्याक्षेपः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आक्षेपहेतुकत्वात् । न खल्वाक्षेपसूचामन्तरेणापाय प्रदर्शनं विपक्षे भवतीति परिभावनीयमेतत्सं-प्रत्याक्षेपप्रसिद्धी एव वैविक्त्येनाह ।

[भा.२३९५] किं कारणं न कप्पइ अक्खेवो दोसदरिसणं सिद्धी ।
लोए वेदे समए विरुद्धसेवादयो नाया ।।

वृ- किं कारणं विपक्षे वैयावृत्त्यं न कल्पते इत्याक्षेपः । विपक्षे दोषदर्शनं सिद्धि प्रसिद्धिः । अत्रार्थे लोके वेदे समये च विरुद्धसेवादयो ज्ञातानि । किमुक्तं भवति ? यथा लोके वेदे समये च विरुद्धसेवयामकल्पिकसेवायां च दोषोपदर्शनं तदकरणेप्रसिद्धिरेवमिहापि विपक्षे वैयावृत्त्यकरणे-ऽपायदर्शनमेव तदकरणे प्रसिद्धिः ।

[भा.२३९६] तम्हा सपक्खकरणे परिहरिया पुव्ववन्निया दोसा ।
कप्पे छठुद्देसे, तह चेव इहंपि दठव्वा ।।

वृ- यस्मादेव विपक्षे वैयावत्त्यकरणे प्रायश्चित्तादयो दोषास्तस्मात्सपक्षे वैयावृत्यं कर्तव्यं । सपक्षवैयावृत्त्यकरणे च ये पूर्ववर्णिता दोषास्ते यथा कल्पाध्ययने षष्ठोद्देशे परिहृतास्तथा चेव इहापि द्रष्टव्याः । अत्र पर प्रश्नमाह-

[भा.२३९७] चोएती परकरणं, नेच्छामो दोसपरिहरणहेउं ।
किं पुन भेसज्जगणो घेतव्वो गिलाण रक्खठा ।।

वृ- चोदयति प्रश्नयति शिष्यः परकरणे परपक्षे वैयावृत्त्यकरणं दोषपरिहरणहेतोर्दोषपरिहरणनिमित्तं नेच्छामः । किं पुनः केवलं भैषज्यगणः औषधसमूहो ग्लानरक्षार्थं गृहीतव्यः । अत्रैव विपक्षे दोषमाह-

[भा.२३९८] पुव्वं तु अग्गहिपहिं दूरा जा ओसहाइं आणंति ।
तावत्तो उ गिलाणो, दिठंतो दंडियाईहिं ।।

वृ- पूर्वमगृहीतेषुभैषजेषुगाथायांतृतीया सप्तम्यर्थेप्राकृतत्वात् । यावदार्याद्दूरादौषधान्यानयन्ति, तावत् ग्लानस्य आगाढादि परितापना भवति । तदभावे च स परमार्थतस्त्यक्तो भवति, । अत्रार्थे च दृष्टान्तो दण्डिकादिभिस्तमेवविभावयिषुराह ।।

[भा.२३९९] उवट्ठियंमि संगामे, रन्नो बलसमागमो ।
एगो वेज्जोत्थ वारेई, न तुब्भे जुद्धकोविया ।।

[भा.२४००] घेप्पतुं ओसहाइं वणपट्टामक्खणाणि विविहाणि ।
सो बेइ अमंगलाइं मा कुणह अनागयं चेव ।।

वृ- द्वयोर्दण्डिकयोरुपस्थिते सङ्ग्रामे लिलिते च द्वयोर्बले द्वयोरपि राज्ञो वैद्या उपस्थिता । तत्र एको दण्डिको वैद्यानत्र संग्रामप्रस्थाने उपस्थितान् वारयति । न यूयं युद्धकोविदास्ततः किं युष्मामिः संग्रामे कर्तव्यमेवमुक्त ते वैद्याः प्राहुर्यद्यपि न वयं युद्धकोविदास्तथापिप्रहारव्रणितेष्वस्माकं वैद्यक्रियोपयोगिनी तस्माद्वयमागच्छामो गृह्यन्तां चौषधानि व्रणपट्टा विविधानि चानेकप्रकाराणि च म्रक्षणानि । एवमुक्ते स दण्डिको ब्रवीति-मा कुरुतानागतमेवामङ्गलानि तस्मान्निवर्तध्वं यूयमिति ।

[भा.२४०१] किं घेत्तव्वं रणे जोग्गं, पुच्छिया इतरेण ते ।
भणंति वणतिल्लाइं घयदव्वोसहाणि य ।।

वृ- इतरेण द्वितीयेन दण्डिकेन ते आत्मीया वैद्याः पृष्टाः । किं रणे संग्रामे योग्यं गृहीतव्यं, । एवमुक्तास्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणन्ति । व्रणसंरोहकानितैलानिव्रणतैलानि तथा तिजीर्णघृतं द्रव्यौषधानिच यैरौषधैः संयोजितैस्तैलं घृतं वातिपच्यते । व्रणसंरोहकंचूर्णोवाव्रणसंरोहणायभवतितानिद्रव्यौषधानिततोराज्ञापुरुषाःसन्दिष्टा यद्वैधैरुपदिष्टं तत्सर्वं गृहीतम् ।

[भा.२४०२] भग्गसिंव्वियसंसित्ता वणा वेज्जेहि जस्स ।
सो पारगो उ संगामे, पडिवक्खो विवज्जए ।।

वृ- ततः संग्रामे वर्त्तमाने यस्य राज्ञो ये पुरुषा मुद्गरादिप्रहारहतास्तेषां प्रहारा वैद्यैरौषधैर्भग्ना ये च व्रणितास्तेषां व्रणाः सीवतिस्ते औषधैः संसिक्ता । एवं व्रणिताः प्रहारिता द्वितीय दिवसे युद्धसमर्था जाताः एवं द्वितीयदिवसे तृतीयदिवसे ऽपि कृतम् । एवं स राजा वैद्योपदेशनौषधसंग्रहतः संग्रामे पारगो अभूत्, प्रतिपक्षे विपर्ययो जित इत्यर्थः । एष दृष्टान्तोऽयमर्थोपनयः ।।

[भा.२४०३] एवमेवासपेज्जाइ खज्जलेज्जाणि जेसिओ ।
भेसिज्जाइं सहीनाइं पारगा ते समाहीए ।।

वृ- एवमेव दण्डिकदृष्टान्तगतेन प्रकारेण येषामाचार्याणां भैषजानि असत्ति अशनरूपाणि, पेयानि पानकरूपाणि, खाद्यानि खादिमरूपाणि, लेह्यानि च स्वादिमानि ते आत्मनो गच्छस्य च समाधेः पारगा भवन्ति । ये पुनरौषधानां न संग्रहीतारस्ते समाधेरपारगाः । प्रकारान्तरेण दण्डिकदृष्टान्तमाह-

[भा.२४०४] अहवा राया दुविहो आयभिसित्तो पराभिसित्तो य ।
आयभिसित्तो भरहो तस्स उ पुत्तो परेणं तु ।।

वृ- अथवेति प्रकारान्तरद्योतने राजा द्विविधो भवति । तद्यथा-आत्माभिषिक्तः, पराभिषिक्तश्च आत्मनैध निजबलेन राज्येऽभिषिक्तः आत्माभिषिक्तः, परेणाभिषिक्तः पराभिषिक्तः । तत्रात्माभिषिक्तो भरतश्चक्रवर्ती तस्य पुत्र आदित्ययशाः पराभिषिक्तः ।

[भा.२४०५] बलवाहणकोसा य बुद्धी उप्पत्तियादीया ।
साहगो उभयोवेता सेसा तिन्नि असाहगा ।।

वृ- बलंहस्त्यादि,वाहनानियानानिकोशोभाण्डागारंतथाबुद्धिरौत्पत्यादिकाः । अत्रभङ्गाश्चत्वारः- एको बलवाहनादि समग्रो नो बुद्धि समग्रः १ एको नो बलवाहनादिसमग्रः किन्तु बुद्धिसमेतः २, एको बलवाहनादिसमेतोऽपि बुद्धिसमेतोऽपि ३, एको नो बलवाहनादिसमेतो नापि बुद्धिबलोपेतः ४ । एषु चतुर्षु भङ्गेषु मध्ये य उभयोपेतो बलवाहनादि समेतो बुद्धिसमेतश्चेत्यर्थः स राज्यस्य साधकः शेषास्त्रयोऽसाधकाः । एष दृष्टान्तोऽयमर्थोपनयः ।।

[भा.२४०६] बलवाहणत्थहीनो बुद्धिहीनो न रक्खए रज्जं ।
इय सुत्तत्थाविहीणो ओसहहीना उ गच्छंतु ।।

वृ- यथा बलेने वाहनैरर्थेन च हीनो बुद्धिहीनश्च राजा राज्यं न रक्षति, एवमाचार्योऽपि सूत्रार्थविहीनो औषधविहीनश्च गच्छं न रक्षति ।।

[भा.२४०७] आयपराभिसित्तेण जम्हा आयरिएणओ ।
उसहमादीणि चओ कायव्वो चोयती सीसो ।।

वृ- तस्मादाचार्येणआत्माभिषिक्तेनश्रुतकेवलिनाइतरेणचपराभिषिक्तेनऔषधादिनिचयःकर्त्तव्य इति शिष्यश्चोदयति-

[भा.२४०८] सीसेणाभिहिते एवं बेइ आयरिओ ततो ।
वदतो गुरुगा तुब्भं आणादीया विराहना ।।

वृ- एवं शिष्येणाभिहिते तत आचार्यो ब्रूते-एवं वदतस्तव प्रायश्चित्तं चत्वारो गुरुकाः आज्ञादयश्च दोषा विराधना सूत्रस्य । एतदेव भावयति-

[भा.२४०९] दिट्ठंतसरिसं काउं अप्पाणपरं च केइ नासंति ।
ओसहमादीनि चओ कायव्वो जहेव राईणं ।।

वृ- केचित्तव सदृशा दृष्टान्तसदृशं दण्डिकसदृशमात्मानं परं च कृत्वा नाशयन्ति । यथा औषधादीनिचयः कर्त्तव्यो यथा राज्ञामिति एतदेवातिप्रसङ्गापादनेन दूषयति-

[भा.२४१०] कोसकोट्ठारदाराणि पदातीमादीयं बलं ।
एवं मनुयपालाणं किंतु तुज्झंपि रोयइ ।।

वृ- कोशकोष्टागारदाराः पदात्यादिकं बलमेतन्मनुष्यपालानां भवति तदेतत् किन्तु तवापि रोचते । एतदपि द्रष्टान्तबलेन गृह्यतामिति भावः ।

[भा.२४११] जावि ओसहमादीणं निचयो सोवि अक्खमो ।
न संचये सुहं अत्थि इह लोए परत्थ य ।।

वृ- योऽप्यौषधानां निचयः सोऽपि सुखोत्पादनायाक्षमः । यतो न संचये सुखमस्ति इहलोके तदुत्पादनतद्रक्षणतन्नाशे दुःखसंभवात् । परत्र च परलोके च सुखं नास्ति परिग्रहधरणतः कुगतिप्रपातात्

[भा.२४१२] आदि सुत्तस्स विरोधो समणचित्तागिहीण अनुकंपा ।
पुव्वायरिय अन्नाणी अणवत्था वंत मिच्छत्तं ।।

वृ- आदिसूत्रस्य दशवैकालिकस्य विरोधस्तथा एवं ब्रुवाणो भवान् परिग्रहे साधून्नियुक्ते तन्नियोगाच्च ते त्यक्तास्था गृहिणामनुकम्पा अनुग्रहस्त्यक्तः साधूनां स्वत एवस्वत भैषजादेः संभवात् । तथा ये पूर्वाचार्याःसन्निधिंप्रतिषिद्धवन्तस्तेअज्ञानी कृताः सन्निधिर्भवता गुणोपदर्शनात् अनवस्था चैवं प्रसज्यते । सन्निधिरिव भवताऽन्येनान्यस्यापि ग्रहणप्रसक्ते स्तथा चान्तप्रतिसेवनं भवतः समापतितं प्रतिषिद्धस्यापि संचयस्य पुनर्ग्रहणात् तथा मिथ्यात्वं मिथ्यावादित्वमनुषज्यते । यथावादमकरणात् निष्परिग्रहा वयमित्यभिधाय परिग्रहधारणात् । एनामेव गाथां व्याचिख्यासुः प्रथमतः सूत्रस्य विरोधमुपदर्शयति-

[भा.२४१३] जं वुत्तमसनपानं खाइमं साइमं तहा ।
संचयं तु न कुव्वेज्जा एयं दायंविरोहियं ।।

वृ- यत् दशवैकालिके उक्तमशनं पानं खादिमं तथा संचयं न कुर्यात् तथा च तन्द्ग्रन्थः- असनं पानगं चेव खाइमं साइमं तहा । जे भिक्खू सन्निहिं कुज्जा, गिही पव्वइए न से ।। इति तदिदानीं विरोधितं विरोधमापादितं सन्निधिरिदानीं त्वयाभ्युपगतत्वात् ।।

[भा.२४१४] परिग्गहेनिजुज्जंता परिचत्ता उ संजया ।
भारादिमाइया दोसा पेहापेहकयाइया ।।

वृ- संयताः परिग्रहे नियुज्यमानाः परित्यक्ताः संसारे पातनात् । किं चान्यत् । इहलोके भारादयो भारवहनादयो दोषा आदिशब्दात् कायक्लेश सूत्रार्थहान्यादिदोषपरिग्रहस्तथाप्रेक्षादिकाश्च तथाहि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि सर्वं प्रत्युपेक्षते ततः सूत्रार्थपरिमन्थः । अथ न प्रत्युपेक्षते तर्हि संसक्तिभाव आदिशब्दात्तत्परितापनादिदोषपरिग्रहः ।।

[भा.२४१५] अहवा तप्पडिबद्धा य अत्थंते नियायादयो ।
अनुग्गहो गिहत्थाणं सयावि ताण होइ ओ ।।

वृ- अथवा तत्प्रतिबन्धादौषधनिचयप्रतिबन्धात्तिष्ठन्ति सदावस्थायितया न तु विहारक्रमं कुर्वन्ति;। तथा च सति नैत्यिकादयो नैत्यिको नित्यवासी, आदिशब्दात् पार्श्वस्थादि परिग्रहः । तदादयो दोषाः प्रसज्रंति, । गतं समणा चत्ता इति द्वारमधुनागिहीण अनुकंपेति व्याख्यानयति, । गृहस्थानां सदा साधूनां भेषजादि प्रयच्छतामनुग्रही भवति स इदानीं परित्यक्तः । साधूनां स्वत एव तन्निचयभावात् ।।

[भा.२४१६] पडिसिद्धा संनिही, जोहिं पुव्वायरिएहिं तेविओ ।
अन्नाणीउ कया एवं, अनवत्थापसंगतो ।।

वृ- यैः पूर्वाचार्यैः प्रतिषिद्धः सन्निधिस्तेऽपि त्वयैवं ब्रुवता अज्ञानी कृताः । अनवस्थाद्वारमाह-अनवस्थाप्रसङ्गता यथा त्वयौषधसंचयः कृतस्तथान्येऽन्यस्यापि करिष्यन्तीति प्रसङ्गतः सर्वस्याप्यनवस्था, वांतद्वारं चाह-

[भा.२४१७] वंतं निसेवियं होइ गिण्हंता संचयं पुनो ।
मिच्छत्तं न जहावादी न तहाकारी भवंति उ ।।

वृ- संचयं त्यक्त्वा पुनः संग्रहतो वांतं निषेवितं भवति, तथा मिथ्यात्वं न यथावादिन उत्सूत्रप्ररूपणात्

[भा.२४१८] एए अन्ने य जम्हा दोसा हुंति सवित्थरा ।
तम्हा तोसहमादीणं संचयं तु न कुव्वए ।।

वृ- यस्मादेतेऽनन्तरोदिता अन्ये च दोषाः सविस्तरा भवन्ति । तस्मादौषधादीनां संचयं न कुर्यात् ।

[भा.२४१९] जइ दोसा भवंतेते किं खु घेत्तव्वयं ततो ।
समाहिसंघावणट्ठाए भन्नती सुण तो इतो ।।

वृ- यद्येते अनन्तरोदिता दोषा भवन्ति ततः किं खु समाधिस्थापनाय गृहीतव्यम् ? आचार्य आह-भण्यते अत्रोत्तरं दीयते तदेव तावदितोऽनन्तरमुच्यमानं श्रृणु तदेवाह-

[भा.२४२०] नियमा विज्जागहणं कायव्वं होइ दुविहदव्वं च ।
संजोगदिट्ठपाढी असती गिहि अन्नतित्थीहिं ।।

वृ- यथा विद्ययाऽपमार्जनं क्रियते तस्या अन्यासां च विद्यानामाचार्येण नियमात् ग्रहणं कर्त्तव्यम्, तथा यदि कारणतच्छिन्नमण्डपे स्थातव्यं भवति, ततो दीर्घपृष्टविषविघाताय द्विविधं द्रव्यं गृहीतव्यं । तच्चाग्रे वक्ष्यते, । तस्मादार्यः संयोगदृष्टपाठी भवेत् । अनेकान् संयोगान् व्यापार्यमाणान् यो दृष्टवान् यश्च तत् पाठं पठितवान् स संयोगदृष्टपाठी । अथ स्वयं संयोगदृष्टपाठी न भवति तर्हि तस्यासति गृहिभिः कार्यते विचिकित्सा, तेषामप्यसत्यन्यतीर्थिभिर्यदुक्तं द्विविधं द्रव्यं गृहीतव्यं, तदभिधित्सुराह-

[भा.२४२१] चित्तमचित्तपरित्तम, नंतसंजोइणं च इतरं च ।
थावरजंगमजलजं, थलजं चेमादि दुविहं तु ।।

वृ- द्विविधं द्रव्यं-सचित्तमचित्तं वा, । यदि वा परीत्मनन्तकायिकं । अथवा सांयोगिकमनेक सांयोगनिष्पन्नमितरदसांयोगिकं, । अथवा स्थावरं जङ्गमं प्रत्युपन्ने कार्यं यदि स्थावरद्रव्यप्रयोगतः कथमपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुणो न भवति, तदा अनन्यगत्या जंगमांगं द्रव्यं प्रयुज्यते, । अथवान्यथा द्विविधं द्रव्यं जलजं थलजं च, । एवमादि द्विविधं द्रव्यं ग्रहीतव्यम्, । इयं चिकित्सा दीर्घपृष्टविषविघातायाभिहिता ।

[भा.२४२२] जह चेव दीहपट्ठे, विद्यामता य दुविहदव्वा य ।
एमेव सेसएसुवि विज्ञा दव्वा य रोगेसु ।।

वृ- यथा चैव दीर्घष्टदंशे विद्यामन्त्रा द्विविधानि च द्रव्याणि ग्रीहतव्यानि । एवमेव शेषेष्वपि रोगेषु विद्याद्रव्याणि च ग्राह्याणि ।

[भा.२४२३] संजोगदिट्ठपाठी, न धरेंतंमि चउ गुरू हूंति ।
आणादिणो य दोसा, विराधना इमेहिं ठाणेहिं ।।

वृ- आचार्येण स्वयं संयोगदृष्टपाठिना भवितव्यं । यदि पुनः सति शक्तिसंभवे संयोगदृष्टिपाठं न धरति, तर्हि तस्मिन्नधरति । प्रायश्चित्तं चत्वारो गुरुकाः । न केवलं प्रायश्चित्तं, किन्त्वाज्ञादयश्च दोषास्तथा विराधना एभिर्वक्ष्यमाणैः स्थानैः । तान्येवाह-

[भा.२४२४] उप्पण्णे गेलन्, जो गणधारी नजाणइ तिगिच्छं ।
दीसंततो विनासो, सुहदुक्खी तेन उचत्ता ।।

वृ- उत्पन्ने ग्लानत्वे यो गणधारी चिकित्सां न जानाति, तस्या पश्यतः सतो ग्लानस्य विनाश इति, तेन सुखदुःखिनः सुख-दुःखोपसम्पन्नकाः स्वशिष्याः प्रीतच्छकाश्च परित्यक्ताः, कथं पश्यतः सतो ग्लानस्य शेषकाणा च विनाश इत्यत आह-

[भा.२४२५] आउरत्तेण कायाणं, विसकुंभादिघायए ।
डाहे छेज्जे य जे अन्ने, भवंति समुवद्दवा ।।

[भा.२४२६] एते पावइ दोसा, अनागयं अग्गहियाय विज्ञाए ।
असमाही सुयलंभं केवललंभं तु चुक्केज्ञा ।।

वृ- कस्यापि साधोर्विषकुम्भो लूता आदिशब्दाद्दाहादिपरिग्रहस्तस्मिन्नुत्थिते आतुरत्वेनाकुलत्वेन विषकुंभादिघाताय कायानामुदकादीनामुपद्रवं कुर्यात् । तथा हि विषकुंभे दाहे वा समुपस्थिते आकुलीभूतः सन् तं शीतलेमोदकेन सिञ्चेत्, सचित्तेन वा कर्दमेन लिम्पेत् । तथा दाघे च्छेदे च येऽन्ये भवन्ति समुपद्रवा एतान् दोषाननागतगृहीतायां विद्यायां प्राप्नोति, तथा तीव्रायां वेदनायामनुपशान्तायामसमाधिना असमाधिमरणेन म्रियेत, तथा च सति दीर्घसंसारमनुपरिवर्तते, चिरं च यदि जीवति, तर्हि भूयांसं श्रुतलाभं प्राप्नुयात्, केवलज्ञानं चोत्पादयेत् । तथा-

[भा.२४२७] इह लोगियाण परलोगियाण लद्धीण फेडितो होइ ।
इहलोगामोसादी परलोगे अनुत्तरादीया ।।

वृ- असमाधिमरणेन मरणतः सह ऐहलौकिकीनां पारलौकिकीनां च लब्धीनां स स्फेटितस्त्याजितो भवति । तव इहलोके ऐहलौकिक्यो लब्धय आमर्षादय आमषौषध्यादयः परलोके पारलौकिक्यो-ऽनुत्तरादय अनुत्तरा अनुत्तरा लवसत्तमा देवा आदिशब्दात् सुकुलप्रत्यायातिश्रुतलाभादिपरिग्रहः; ।।

[भा.२४२८] असमाहीमरणेणं एवं सव्वासि फेडितो होइ ।
जह आउगपरिहीना देवा लवसत्तमा जाया ।।

वृ- एवममुना प्रकारेण सर्वासामैहिकीनां पारत्रिकीनां च लब्धीनामसमाधिमरणेन स्फेटितो भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा आयुष्कपरिहीना देवा लवसप्तमा जाता, आयुष्कपरिहान्या सिद्धिलाभतो भ्रष्टा यथा देवा लवसप्तमा जाता इत्यर्थः । सम्प्रति लवसप्तमदेवस्वरूपमाह-

[भा.२४२९] सत्तलवा जइ आउं पहुप्पमाणं ततो उ सिज्झंतो ।
तत्तियमेत्तं न हु ततो ते लवसत्तमा जाया ।।

वृ- यदि सप्तलवाः कालविशेषा आयुः प्रभवन् स्यात् सप्तलवप्रमाणं यद्यायुः प्राप्येतेत्यर्थः ततः सिद्धेयुः परंतद् आयुस्तावन्मात्रंन हु नैवाभवत् ततस्ते लवसप्तमा देवा जाता लवे सप्तमे सिद्धिरभविष्यत् यदि तावदायुर्भवेद्येषां ते लवसप्तमा नाम नाम्नैकार्थे समासो बहुलमिति समासः । के ते लवसप्तमा इत्याह-

[भा.२४३०] सव्वट्ठसिद्धिनामे उक्कोसट्ठिईय विजयमादीसु ।
एगावसेसगब्भा भवंति लवसत्तमा देवा ।।

वृ- ये देवाः सर्वार्थसिद्धिनामके महाविमाने ये च विजयादिषूत्कृष्टस्थितय एकोऽवशेषो गर्भो येषां ते एकावएषगर्भास्ते भवन्ति लवसप्तमाः । उपसंहारमाह-

[भा.२४३१] तम्हा उ सपक्खेणं कायव्व गिलाणगस्स तेगिच्छं ।
विवक्खेण न कारेज्जा एवं उदितंमि चोदेति ।।

वृ- यस्माद्विपक्षे दोषास्तस्मात्सपक्षेण ग्लानस्य चिकित्साकर्म कर्तव्यं विपक्षे पुनर्न कारयेतं तदेवं सम्बन्धस्ततः सूत्रव्याख्यालक्षणं तदन्याक्षेपपरिहारौ तत्प्रसक्त्याऽन्यदपि चाभिहितं सम्प्रति सूत्रव्याख्या क्रियते- निर्ग्रन्थश्चशब्दान्निर्ग्रन्थी च रात्रौ वा विकाले वा दीर्घपृष्टः सर्पो लूषयेत् दशेत् । तत्र स्त्री वा पुरुषस्य हस्तेन तं विषमपमार्जयेत्, पुरुषो वा स्त्रिया हस्तेन एवं से तस्य स्थविरकल्पस्य कल्पते । स्थविरकल्पकस्यापवादबहुलत्वादेवं चामुना प्रकारेणापवादमासेवमानस्य से तस्य तिष्ठति पर्यायो न पुनः स्थविरकल्पात्परिभ्रश्यति, तेन च्छेदादयः प्रायश्चित्तविशेषास्तस्य न सन्ति परिहारं च तपो न प्राप्नोति । कारणेन यतनया प्रवृत्तेरेष कल्पः स्थविरकल्पिकानां । एवममुना प्रकारेण सपक्षेण विपक्षेण वा वैयावृत्यकारापणं से तस्य जिनकल्पिकस्य न कल्पते । केवलोत्सर्गप्रवृत्तत्तस्येति भावः । एवमपवादसेवनेन से तस्य जिनकल्पपर्यायो न तिष्ठति, जिनकल्पात् पततीत्यर्थः । परिहारं च तपोविशेषं न परिपालयति एष कल्पो जिनकलपिकानां, एवं सूत्रे व्यवस्थिते यदाचार्येण प्रागुदितं सपक्षेण वैयावृत्यं कारयितव्यम् न परपक्षेणेति तत्र चोदयति ब्रूते परः । यदुच्यते तदाह-

[भा.२४३२] सुत्तंमि अनुन्नायं इह पुन अत्थतो निसेहेह ।
कायव्व सपक्खेणं चोयग सुत्तं तु कारणियं ।।

वृ- सूत्रे सपक्षेणेति वैयावृत्यकारापणमनुज्ञातं इह इदानीं इ पादपूरणे पुनरर्थतो यूयं परपक्षेण वैयावृत्यकारापणं निषेधयत् कर्तव्यम् सपक्षेणेति वचनात् ततः सूत्रभवद्व्याख्यानयोर्विरोधः । अत्राचार्य आह- न विरोधो, यतो हे चोदक सूत्रमिदं कारणिकं कारणापेत्रम् । तदेव कारणमाह-

[भा.२४३३] विज्ज सपक्खाणसती गिहि परतित्थीउ तिविह संबंधी ।
एमेव असंबंधी असोयवादेतरा सव्वे ।।

वृ- सपक्षाणां वैद्यानामसति अभावे गृही पिता भ्राता स्वजनो वा स्थविरादिभेदतस्त्रिविधो यः सम्बन्धी स वैयावृत्यं कारणीयः । तदभावेऽसम्बन्धी स्थविरमध्यमतरुणभेदतस्त्रिभेदः पूर्वपूर्वालाभे उत्तरोत्तरः कारणीयः, तस्याभावे परतीर्थिकः पितृभ्रातादिः संबन्धेन संबंधी स्थविरादिभेदतस्त्रिभेदः पूर्वपूर्वालाभे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तरोत्तरः कारणीयः तस्याप्लाभे असम्बन्ध्यपि स्थविरादिभेदतस्त्रिविध उक्तक्रमेण कारयितव्यः । एते सर्वेऽपि द्विधा-अशौचवादा इतरे च । तत्र प्रथमतः सर्वत्राप्यशौचवादः कारयितव्यस्तदसंभवे इतरोऽपि ।।

[भा.२४३४] एएसिं असतीए गिहि गिणि परतित्थिगी तिविहभेया ।
एएसिं असतीए समणी तिविहा करेइ जयणाए ।।

वृ- एतेषां प्राग्गाथानिर्दिष्टानां सर्वेषामसति अभावे गृहस्था माता भगिनी तदभावे स्वजनाः स्थविरमध्यमतरुणभेदतस्त्रिविधाः पूर्वपूर्वालाभे उत्तरोत्तरा कारयितव्या । तदभावे असम्बन्धिनी स्थविरादिभेदतस्त्रिप्रकारा पूर्वपूर्वालाभे उत्तरोत्तरा यतनया करोति, तामेव यतनामाह-

[भा.२४३५] दूती अद्दाए अंतेउरे य दब्भेया ।
वियणे य तालवंटे चवेडतो मज्ज्रणा जयणा ।।

वृ- काचति द्यूतविद्या भवति । तया च द्यूतविद्यया यो द्यूत आगच्छति, तस्य दंशस्थानमपमार्ज्यते । तेनेतरस्य दंशस्थानमुपशाम्यति । अद्दाएत्ति अपरा आदर्शविद्या तया आतुरआदर्शे प्रतिबिम्बितोऽपमार्ज्यते आतुरः प्रगुणो जायते । अन्या विद्या वस्त्रविषया भवति तया परिजपितेन वस्त्रेण वा प्रमृज्यमानः आतुरः प्रगुणो भवति । अपरा विद्यान्तःपुरे आन्तःपुरिकी विद्या भवति यया आतुरस्य नाम गृहीत्वा आत्मनो अङ्गमपमार्जयति, आतुरश्च प्रगुणो जायते सा आन्तःपुरिकी । अन्या दर्भे दर्भविषया भवति विद्या यया दर्भैरपमृज्यमान आतुरः प्रगुणो भवति । वियणेयत्ति व्यञ्जनविषया विद्या यया व्यञ्जनमभिमन्त्र्य तेनातुरोऽमृज्यमानः स्वस्थो भवति, सा व्यञ्जनविद्या । एवं तालवृन्तविद्यापि भावनीया । चपेटा चापेटीविद्या, यया अन्यस्य चपेटायां दीयमानायामातुरः स्वस्थी भवति, सा चापेटी । तत्र पूर्वं त्या विद्ययापमार्जनं कर्तव्यमं । तदभो आदर्शिक्या । एवं तावद्यावदन्ते चापेटया । एषा अपमार्जनायतना एतदेव स्पष्टतरमाह-

[भा.२४३६] दूयस्सोमाइज्जइ य सती अद्दागपरजवित्ताणं ।
परिजवियं वत्थं वा पाउज्जइ तेन वोमाए ।।

[भा.२४३७] एवं दब्भादीसुं असंफुसंतो य हत्थेण ।
चापेडीविज्जाएवउमाएवेडयं दिंतो ।।

वृ- दूत्या विद्यया दूतस्यागतस्यांगमप्रमार्ज्यते, तस्या विद्याया असति आदर्शे सङ्क्रान्तमातुरप्रतिबिम्बं परिजप्यातुरः प्रगुणी कर्तव्यः । तदभावे वस्त्रं प्रावार्यते, तेन वा परिजप्तिन वस्त्रेणातुरोऽप्रमार्जतेएवं दर्भादिभिः परिदर्भविद्यादिभहिस्तेनासंस्पृशन्नपमार्जयेत् । चापेटया वा विद्यया अन्यस्य चपेटां दददन्योपमाजयेत् ।

[भा.२४३८] एसेव गमो नियमा निग्गंथीणंपि होइ नायव्वो ।
विज्जादी मुत्तूणं अकुसलकुसले य करणं च ।।

वृ- एष एवानन्तरोदितो यतनागमो नियमात् निर्ग्रन्थीनामपि ज्ञातव्यः । तदा निर्ग्रन्थीनां विद्यादि न दातव्यं मुक्त्वा पूर्वगृहीतमसाधनं मन्त्रं स हि कदाचिद्दीयेत न कश्चिद्दोषः । तथा यदि निर्ग्रन्थोऽकुशलो भवति निर्ग्रन्थी च कशला तत्र करणं निर्ग्रन्थ्या निर्ग्रन्थी कारयेदित्यर्थः । विद्यादी मुत्तूणमिति ।

[भा.२४३९] मंतो हविज्ज कोई विज्जा उ ससाहणा न दायव्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुच्छा गारवकरणं पुव्वाहीया उ करेज्जा ।।

वृ- तस्याः स्याद्गौरवमात्मनोऽतिशयेन कुर्यात् या तु पूर्वाधीता पूर्वगृहीता विद्या सा प्रागुक्तयतना क्रमेण कुर्यात् ।।

[भा.२४४०] अज्जाणं गेलन्ने संथरमाणे सयं तु कायव्वं ।
वोच्चत्थमास चउरो लहु गुरुगा थेरए तरुणे ।।

वृ- आर्यिका यदि ग्लानप्रयोजने स्वयं समर्थास्ततः स्वयमेव ताः कुर्वन्ति । एवं निर्ग्रन्था अपभिवनीयाः । यदि पुनर्विपर्यासः क्रियते, यथा निर्ग्रन्थानां ग्लानत्व संस्तरति निर्ग्रन्थ्यो यदि कुर्वन्ति, निर्ग्रन्थीनां वा यदि निर्ग्रन्था इततिदा तस्मिन् विपर्यासे स्थविरे कारके प्रायश्चित्तं चत्वारो लघुकाः, तरुणे चत्वारो गुरुकाः । सम्प्रति कल्पे नानात्वं भावयति-

[भा.२४४१] जिनकप्पिए न कप्पइ दप्पेणं अजयणाह थेराण ।
कप्पइ य कारणम्मी जयणाए गच्छे स साविक्खो ।।

वृ- जिनकल्पिके स्वपक्षेण परपक्षेण वा वैयावृत्यकारापणं न कल्पते, तथा कल्पत्वात् । स्थविराणां स्थविरकल्पिकानां पुनदर्पेण निष्कारणमयतनया च-न कल्पते ।। कारणे यतनया पुनः कल्पते यतो गच्छे स सापेक्ष इति ।।

[भा.२४४२] चिट्ठइपरियातो सै तेन च्छेदाइया न पावेंति ।
परिहारं च न पावेइं परिहार तवोत्ति एगट्ठं ।।

वृ- यतः से तस्य पर्यायस्तिष्ठति तेन कारणेन च्छेदादिकास्तस्य न प्राप्नुवन्ति न भवन्तीत्यर्थः । परिहारमपि च न प्राप्नोति कारणे यतनया कारापणात् परिहारस्तप इत्येकार्थम् ।।

<u>उद्देशकः-५ समाप्तः</u>

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहारसूत्रे पञ्चमोद्देशकस्य (भद्रबाहु स्वामि रचिता निर्युक्ति युक्तं) संघदास गणि विरचितं भाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

उद्देशकः-६

वृ- व्याख्यातः पञ्चमोद्देशकः । सम्प्रति षष्ठो व्याख्येयः । तस्येदमादि सूत्रम्-

मू. (१४८) *भिक्खू य इच्छेजा नाय-विहिं एत्तए, नो से कप्पइ थेरे अनापुच्छित्ता नायविहिं एत्तए, कप्पइ से थेरे आपुच्छित्ता नायविहिं एत्तए । थेरा य से वियरेज्जा, एवं से कप्पइ नायविहिं एत्तए, थेरा य से नो वियरेज्जा, एवं से नो कप्पइ नायविहिं एत्तए । जं तत्थ थेरेहिं अविइन्ने नायविहिं एइ, से सन्तरा छेए वा परिहारे वा । नो से कप्पइ अप्पसुयस्स अप्पागमस्स एगाणियस्स नायविहिं एत्तए; कप्पइ से जे तत्थ बहुस्सुए बज्झागमे तेनसिद्धं नायविहिं एत्तए । तस्स तत्थ पुव्वागमनेनं पुव्वाउत्ते चाउलोदने कप्पइ पडिगाहेत्तए; से जे तत्थ पुव्वागमणेणं पच्छाउत्ते चाउलोदने, नो से कप्पइ पडिगाहेत्तए ।*

[भा.२४४३] च्छेयणदाहनिमित्तं मंडलिडक्के च देहगेलन्ने ।
पाउग्गो सहहेउं नायविहिं सुत्तसंबंधो ।।

वृ- सर्पेण दष्टः सर्पदंशस्थानस्य च्छेदननिमित्तं वा ज्ञातविधिं गन्तुमिच्छति । अथवा मण्डलिसर्पेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दष्टस्ततो दीर्घ ग्लानत्वं जातं, तस्मिन् सति प्रायोग्यौषधहेतोर्ज्ञातविधौ गमनं भवति । ततस्तत्प्रतिपादनार्थमेव सूत्रारम्भ इति सूत्रसम्बन्धः । अथवायं सम्बन्धः ।।

[भा.२४४४] गेलन्नमहिकयं वा, गिलाणहेउं इमो वि आरंभो ।
आगाढं च तदुत्तं, सहनीयतरं इमं होंति ।।

वृ- वा शब्दः प्रकारान्तरद्योतने । ग्लानत्वमनन्तरसूत्रेऽधिकृतमयमपि च सूत्रारम्भो ग्लानहेतुरिति सूत्रसम्बन्धः । केवलं यदि अनन्तरसूत्रे उक्तं ग्लानत्वं तदागाढं कालक्षेपासहनात् । इदं त्वधिकृतसूत्रसूचितंसहनीयतरंज्ञातविधिं गन्तुंशक्तत्वादिति एवमनेन सम्बन्धेनायातस्यास्य व्याख्या-भिक्षुश्च शब्दात् भिक्षुकी च इच्छेत् ज्ञातविधिं स्वजनभेदमागन्तुं तस्य न कल्पते स्थविरान् अनापृच्छ्य ज्ञातविधिमागन्तुं यावत्करणादेवंपरिपूर्णपाठः । 'कप्पति थेरा आपुच्छित्ता नयाविहिं एत्तए थेरा य से वियरेज्जा । एवं से कप्पइ नायविहिं एत्तए जं तत्थ थेरेहिं अवितिन्ने नायविहिं एइ से अंतरा वा परिहारे वा ।।' इदं प्राग्वत् । नो से कप्पइ इत्यादि न से तस्य कल्पते, । अल्पश्रुतस्यागीतार्थस्य अल्पागमस्य बहिः शास्त्रेष्वति परिचयस्याविद्यमाननिजागमस्य एकाकिनो ज्ञातविधिमागन्तुं, कल्पते से तस्य यः सूत्रगच्छे बहुश्रुतसूत्रापेक्षया बह्वागमार्थापेक्षया तेन सार्धं ज्ञातविधिमागन्तुं । तत्रनमिति वाक्यालङ्कारे । तस्य ज्ञातविधिमागतस्य पश्चादागमनेन आगमनात् पश्चात् यः पूर्वायुक्तश्चाउलोदनः पूर्वायुक्त इति केचित् व्याचक्षते । आगमनात्पूर्व तुल्यमारब्धो रन्धनाया अपरे व्याचक्षते गमनात्पूर्व पाकाय समीहितमेतन् मतद्वयमप्यसंगतमारब्धे समीहिते च पुनः प्रक्षेपसंभवात्तस्मात्पूर्वायुक्त इति किमुक्तं भवति आगमनात्पूर्वे गृहस्थैः स्वभावेन रध्यमानः स तन्दुलौदनो भिलिङ्गसूपो नाम सस्नेहसूपः कल्पते प्रतिग्रहीतुं योऽसो तत्र पूर्वागमनेन पूर्वमागताः साधव इति हेतोः पश्चादायुक्तप्रवृत्तस्तंदलौदनो भिलिंगसूपो वा नासौ कल्पते प्रतिग्रहीतुम् । एष सूत्रसंक्षेपार्थः ।

अत्र भाष्यकारो ज्ञातविधिपदं व्याख्यानयति ।।

[भा.२४४५] अम्मापितिसंबंधो पुव्वं पच्छा व संथुया जे तु ।
एसो खलु नायविहि नेगा भेया य एक्केक्के ।।

वृ- मातृद्वारेण पितृद्वारेण च यः सम्बन्ध एष ज्ञातविधिः । अथवा ये पूर्व संस्तुता मातापित्रादयो ये च पश्चात्संस्तुताः श्वश्रूश्वशूरादय एष समस्तोऽपि ज्ञातविधिरेकैकस्मिंश्च मातृद्वारे पितृद्वारे वा यदि वा पूर्वसंस्तुते पश्चात्संस्तुते वानेके भेदाः अनेन विधिशब्दो भेदवाची व्याख्यातः । अधुना निर्युक्तिविस्तरः-

[भा.२४४६] नायविहिगमने लहुगा आणाइविराहसंजमायाए ।
संजमविराधना खलु उग्गमदोसो तहिं हुज्जा ।।

वृ- निष्कारणे विधिनापि ज्ञातविधौ गन्तुं न कल्पते, यदि विधिनापि निष्कारणे ज्ञातविधौ गमनं करोति, तर्हि प्रायश्चित्तं चत्वारो लघुकाः । तथा आज्ञादयो दोषास्तथा संयमे आत्मनि च विराधना तत्र संयमविराधना यतस्तत्र खलु निश्चितमुद्गमदोषा आधाकर्मादयो भवेयुः ।। कथमुद्गमदोषा भवेयुरत आह-

[भा.२४४७] दुल्लभलाभा समणा नीया नीहेण आहकम्मादी ।
चिर आगयस्स कुज्जा, उग्गमदोसं तु एगयरं ।।

वृ- दुर्लमलाभाः खलु श्रमणाः, । तथा महता स्नेहेनास्माकं वन्दापनाय नीता निर्गतास्तत-श्चिरादागतस्य आत्मस्वजनस्य तस्य प्राधूर्णकत्वकरणायोद्गमदोषमाधाकर्मादिकमेकतरं कुर्यात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२४४८] इति संयमंभि एसा विराहना होइमा उ आयाए ।
छगलगसेनावतिकलुण रयणथालेय एमादी ।।

वृ- इत्येवममुना प्रकारेण एषानन्तरोदिता संयमे विराधना भवति । आत्मविराधना पुनरियं वक्ष्यमाणा छागदृष्टान्तेन सेनापतौ मृते समागते करुणरोदने रत्नस्थाले रत्नभूते स्थाले ढौकिते एवमादौ । तत्र यथा च्छागदृष्टान्तेनाभिसमीहिते सेनापतौ मते तस्मिन्नागते आत्मविराधना भवति तथा-

[भा.२४४९] जह रन्ने सूयस्सा मंसं मज्जारएण अक्खिउं ।
सो अद्दन्नो मंसं मग्गइ इणमो य तत्थातो ।।

[भा.२४५०] कट्टुहुंडपट्टलीए गलबद्धाए उ छगलतो तत्थ ।
सूपेण य सोवहिंतो थक्के आतोत्ति नाऊणं ।।

वृ- यथा राज्ञसूपस्य सूपकारस्य मांसंमार्जारेणाक्षिप्तं नीतं, ततः सूपकारो भीतोऽर्दनो जातो मांसं मृगयते । तस्मिंश्च मृगयमाणे तत्र महानसेऽयमतर्कितः कडुमागडपोट्टलिकया गलबद्धया युक्तश्छाग आयातः सन् सूपेन सूपकारेण मारितः । थक्के प्रस्तावे आयात इति ज्ञात्वा एष दृष्टान्तः । साम्प्रतमुपनयमाह

[भा.२४५१] एवं अद्दन्नाइं ताइं मग्गंति तं समंतेन ।
सो य तहिं संपत्तो ववरोवितो संजमातेहिं ।।

वृ- एवं सूपकार इव तस्य साधोर्ये स्वजनास्तेषां सेनापतिर्मृतस्ततस्तानि स्वजनरुपाणि मानुषाणि अद्दन्नाइं इति असत्यानि तं श्रमणीभूतं सेनापतिभ्रातरमात्मीयं समं ततो मृगयन्ते । स च मृग्यमाणस्तत्रैव सम्प्राप्तस्ततस्तं ससमुपस्थिताः स्वजना वयं परिभूता भविष्यामो न च त्वयि नाथे विद्यमाने परिभवोऽस्माकं युक्तस्तस्मात् कुरु प्रसादमित्येवं तैरुपसर्ग्यमाणः संयमात् व्यपरोपितः ।।

[भा.२४५२] सेनावती मतो ऊ भायपिया वा वि तस्स जो आसि ।
अणो य नत्थि अरिहो नवरि इमो तत्थ संपन्नो ।।

वृ- सेनापतिर्मृतस्तस्य यो भ्राता पिता वा आसीत् सोऽपि मृतोऽन्यश्च तस्मिन् गृहेऽर्हो योग्यः सेनापतित्वस्य नास्ति नवरमयमेव योग्यः । स च तत्र संप्राप्तः ।।

[भा.२४५३] तो कलुणं कंदंता बिंति अनाहा वयं विना तुमए ।
मा य इमा सेनावतिलच्छी संकामउ अन्नं ।।

वृ- ततस्तत्सम्प्राप्त्यनन्तरं ते स्वजनाः करुणं क्रन्दतो ब्रुवते वयमनाथास्त्वया विना इयं च प्रत्यक्षत उपलभ्यमाना सेनापतिलक्ष्मीरन्यं पुरुषान्तरं मा संक्रामतु ।।

[भा.२४५४] तं च कुलस्स पहाणं बलिविरिए तुज्झहीणमयं च ।
पच्छावि पुनो धम्मं काहिसि देता पसीयाहि ।।

वृ- त्वं च कुलस्यास्य समस्तस्यापि प्रमाणं । एतच्च बलं हस्त्यादि वीर्यमान्तरोत्साहः समस्तस्यापि कुलस्य तवाधीनं पश्चादपि त्वं धर्मं करिष्यसि ।। सम्प्रति पदे प्रार्थये तावत् यावत् सेनापतिपद-प्रतिप्रत्या प्रसीद-

[भा.२४५५] एवं कारुणेणं इड्ढीए उ लोभितो ततो तेहिं ।
ववरोविज्जइ ताहिं संजमजीयातो सो तेहिं ।।

वृ- एवमुपदर्शितेन प्रकारेण कारुण्येन ऋद्धया च तैः स्वजनैः स लोभितो लोभं ग्राहितस्ततो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोभग्राहणानन्तरं स तैः संयमजीविताद्व्यपरोप्यते तदेवं करुणद्वारं व्याख्यातमथ रत्नस्थालद्वारमाह-

[भा.२४५६] अविभव अविरेगेण विनिग्गतो पच्छ इड्ढिमं जातं ।
थालं वत्थूण पुनं उवणंती गेणिहमं तंति ।।

वृ- कदाचित् स व्रती अविभवेन विभवाभावेन दारिद्रेणत्यर्थः, । रिक्थं (क्तं) च पूर्वपुरुषोपार्जितं विरेक्तं स्वजनैस्तदा नेष्टं ततो अविरेकेण च रोषेण गृहान्निर्गत्य प्रव्रजितोऽभवत् । पश्चाच्च स स्वजनवर्गो भ्रात्रादिक ऋद्धिमान् जातस्ततो वस्तूनां रत्नानां पूर्णं भृतं स्थालं तस्यगतस्योपनयन्ति । यता गृहाण रत्नस्थालमेलदिति ।।

[भा.२४५७] तस्स वि दट्ठूण तयं अहं लोभकली ततो उ समुद्दिणो ।
वोरवितो संजमातो एए दोसा हवंति तहिं ।।

वृ- तस्यापि साधोस्तत् रत्नभृतं स्थालं दृष्ट्वा अथानन्तरं ततो रत्नभृतस्थालदर्शनात् लोभकलिः समुदीर्णः सम्यक् उदयप्राप्तस्ततस्तेन संयमात् व्यपरोपितः । एतेदोषास्तत्र ज्ञातविधिगमने दोषा भवन्ति-

[भा.२४५८] अहवा न होज्ज एते अने दोसा हवंति तत्थ इमे ।
जेहिं तु संजमातो चालिज्जइ सुठितो ठियतो ।।

वृ- अथवा एते अनन्तरोदिता दोषो न भवेयुरन्ये इमे वक्ष्यमाणास्तत्र ज्ञातविधिगमने दोषा भवन्ति । यैः सुस्थितोऽपि स्थितकः सन् संयमाच्चाल्ते के ते दोषा इत्यतस्तत्संसूचकं द्वारगाथाद्वयमाह-

[भा.२४५९] अक्कंदठाणे ससुरे उवरए पेल्लणाए उवस्सग्गे ।
पंथे रोवणभवएउहावण अम्ह कम्मपरा ६ घातो ७ ।।

[भा.२४६०] अनुलोमे ८ अभियोग ९ विसे १० सयं च ससुरेणं ।
पंतवण बंधरंभण, तं वा ते वाऽति वायाति ११ ।।

वृ- आक्रन्दस्थानद्वारं प्रथमं । द्वितीयं स्वसुरेणापवरके क्षिप्त इति द्वारं, तृतीयं प्रेरणाद्वारं, चतुर्थमुपसर्गद्वारं, पञ्चमं पथिरोदनं भृतके भार्या इति द्वारं, षष्टमं अपभ्राजनाद्वारं यथाऽस्माकमेष कर्मकर आसीत्, सप्तमं च्छागघातद्वारं अष्टममनुलोभद्वारं, नवममभियोग्यद्वारं, दशमं विषद्वारं । स्वयं श्वशुरेण प्रान्तापणबन्धरोधनं क्रियते ततः स कोपात्तश्वशुरं निपातयेत्, विनाशयेत् वा, स्वशुरप्रभृतयस्तं साधुमतिपातयेयुरित्येकादशं द्वारमिति द्वारगाथाद्वयसमासार्थः ।। साम्प्रतमेतदवे विवरीषुराह-

[भा.२४६१] दीसंतोवि हु नीया पव्वयहियंपि संपकप्पंति ।
कलुणकिवणाणि किं पुन, कुणमाणा एगसेज्जाए ।।

वृ- सेनापतौ मृते स तत्र ज्ञातविधौ गतस्तत्र दृश्यमाना अपि निजकाः पर्वतहृदयमपि पर्वतसदृशमानसमपि साधुं संयमात् स प्रकम्पयन्ति । सम्यगन्तर्लीनीभूय प्रकर्षेण च्यावयन्ति किं पुनरेकस्यां शय्यायां वसतौ करुण-कृपणानि रोदनानि कुर्वाणास्तानि कुर्वाणाः सुतरां संयमाद् भ्रंशयंति ।।

[भा.२४६२] अक्कंदठाणदितो तेसिं सोच्चा उ नायगादीणं ।
पुव्वावरत्तरोवण जाय अनाहा वए कोवि ।।

वृ- सोधिकृतः साधुर्यत्र ते ज्ञात्वा क्रंदंति तस्मिनाक्रंदस्थाने स्थितः पूर्वरात्रेऽपररात्रे च रोदनं तेषां 'ज्ञातकादीनां' करुणकृपणं यथा जात वयमनाथा भविष्यामः, सर्वेषां परिभवास्पदमिति श्रुत्वा कश्चित् व्रजेत् प्रव्रज्यां मुञ्चेदित्यर्थः गतमाक्रंदस्थानद्वारमधुना 'ससुरउवरए' इत्यादिद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२४६३] महिलाए समं छोढुं ससुरेणं ढक्कितो उ उवरए ।
नायविहिमायगं वा पेल्ले उब्भामगसगाए ।।

वृ- तस्य साधोः श्वशुरकस्तं तत्र समायातं साधुं दृष्ट्वा निजदुहितरं सर्वालङ्कारभूषितां कारयेत् । कारयित्वा च वन्दापनाय भिक्षार्थं वा समागतः तेन श्वसुरकेण महेलया भार्यया सममपवरके क्षिप्त्वा अपवरको ढंक्कितः स्थगितद्वारकृतः, तत्र चोपसर्गमाणः कश्चिदुत्प्रव्रजेत् ।। प्रेरणाद्वारमाह- ज्ञातविधिमागतं सन्तं साधुं दृष्ट्वा स्वजनवर्गस्तस्य स्वकीयया उद्भ्रामिकया भार्यया प्रेरयेत् संयमात् च्यावयेत् ।। गतं प्रेरणद्वारं । साम्प्रतं चतुर्थमुपसर्गद्वारं प्रतिपिपादयिषुरिदमाह-

[भा.२४६४] मोहुम्मायकराइं उवसग्गाइं करेइ से विहरे ।
भज्जा जेहिं तरुवि वाएणं भज्जते सज्जं ।।

वृ- भार्या से तस्य स्वजनविधिं गतस्य सा विरहे मोहोन्मादकरान् उपसर्गान् आलिंङ्गनादीन् तान् करोति । यैस्तरुरिव वातेन भिद्यते सद्यः ।। सम्प्रति 'पान्थ रोवण भइए' इति द्वारव्याख्यानमाह-

[भा.२४६५] कइएण सभावेन य भयगुत्तो पहंमि पंतावे ।
हियंयं अमुंडियं मे भएवं पंतारए कुवितो ।।

वृ- साधुर्ज्ञातिविधिं गतस्तत्र च लज्जया भिक्षां न हिण्डते, तत् उद्भ्रामक भिक्षार्यया 'गतस्तेषां ज्ञातानां क्षेत्रं पथि तत्र कैतवेन वा स्वभावेन वा तस्य भार्या भृतकेन समं क्षेत्रं गता तत्र सभृतकः कैतवन स्वभावेन वा कर्मणि ।।

[भा.२४६६] कम्महतो पव्वइतो भयतो एसम्ह आसि मा वंदा ।
उब्भामए वोहे च्छागघायंतस्स सा देइ ।।

वृ- कदाचित् स प्रव्रजितः कर्मकर आसीत्ततस्तं बहुजनो दृष्ट्वा ब्रूयात् एषोऽस्माकं भृतक आसीत् कर्महतः कर्मभग्नः सन् प्रव्रजितः तस्मान्मा वंदिषत ।। छागधातद्वारमाह उदभ्रामके उदभ्रामकि-भिक्षाचर्यागतेऽधिकृते भृतकरुपे साधौ वोद्रे मूर्खे तस्य भृतकस्य सा भृत्या छागघातं ददाति कुपिता सति छागमिव तं घातयतीत्यर्थः ।। अधुना अनुलोमोपसर्गद्वारमाह-

[भा.२४६७] मा च्छिज्जउ कुलतंतू धणमोत्तारं तु जणयमेगसुयं ।
वत्थन्नमादिएहिं अभियोग्गेउं च तं नेति ।।

वृ- तस्य ज्ञातविधिगतस्य साधोर्ज्ञातिविधिरेवं ब्रूयात् मा च्छिद्यतां च्छेदं यायात् कुलतन्तुः कुलसन्तानस्तस्माद्धनरक्षकमेकं सुतं प्रसादं कृत्वा जनय पश्चात् गृह्णीथाः, । एवमुक्तः सन् कश्चित् उत्प्रव्रजेत् ।। अधुना अभियोग्यद्वारमाह वस्त्रान्नादिकैरादिशब्दात् खादिमस्वादिमादिविशेष-परिग्रहस्तैरभियोज्य वशीकृत्य स्वजनस्तात्मसमीपं नयति ।। विषद्वारमाह

[भा.२४६८] नेच्छंति देवरा मे जीवंते इमंमि इति विसंदिज्जा ।
अन्नेण वंदावेज्जा ससुरो वा से करेइ इमं ।।

वृ- तं ज्ञातविधिं गतं साधुं दृष्ट्वा तद्भार्येदं विचिन्तयेत् । अस्मिन् जीवति मां देवरा भोग्यतया नेच्छंति तस्मान् मारयामि केनाप्युयेनैनमिति विचिन्त्य स्वयं वा विषं दद्यादन्येन वा दापयेत् 'सयं व' स्वयं श्वशुरेणमित्यादिद्वारमाहतस्य साधोः श्वशुरो वा स्वयमिदं कुर्यात्किं तदित्याह-

[भा.२४६९] पंतवण बंधरोहं तस्सवि नीयल्लगा व खुब्भेज्जा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा कसाय त्ति ऊ सेवति तिवाएज्ज एक्कतरं ।।

वृ- श्वशुरस्तं दृष्ट्वा कुप्येत यथैतेन मम दुहिता जीवच्छल्पी जाता ततः कोपात्तस्य साधो प्रान्तापणं प्रहारदानं बन्धनं वा निगडादिभिः रोधं वा गृहान्निर्गत्य नगराद्वा अनिर्गमनं कुर्यात् कारयेद्वा तस्यापि च साधोर्निजका आत्मीयास्तमेनामवस्थां प्राप्तं दृष्ट्वा ज्ञात्वा वा क्षुभ्येयुः क्षोभाद्व श्वशुराद्यन्यतममतिपातयेत् ।। अत्र प्रायश्चित्तविधिमाह-

[भा.२४७०] एक्कंमि दोसु तीसु व मूल नवट्ठो तहेव पारंची ।

अह सो अतिवाइज्जइ पावइ पारंचियं ठाणं ।।

वृ-एकस्मिन्नतिपातिते मूलप्रायश्चित्तभाग् भवति । द्वयोरतिपातितयोरनवस्थाप्य स्त्रिष्वतिपातितेषु पाराञ्ची । अथ स एवातिपात्यते साधुस्तर्हि स यदि कथमपि जीवति ततः पाराञ्चितं स्थानं प्राप्नोति ।

[भा.२४७१] अहवा वि धम्मसड्ढा साधू तेसिं घरें न गेण्हंती ।

उग्गमदोसा उभया ताहे नीया भणंति इमं ।।

वृ- अथवेति प्रकारान्तरेण दोषकथनोद्योतने साधवो धर्मश्रद्धा उद्गमदोषादिभयात्तेषां गृहे न किमपि गृह्णन्ति । ततस्ते निजाः स्वजना इदं भणन्ति । किं तदित्याह-

[भा.२४७२] अम्हं अनिच्छमाणो आगमने लज्जणं कूणति एसो ।

उहावाण हिंडंतो अणे लोगो वणं भणति ।।

वृ- अस्माकं गृहे किमप्यनिच्छन् एष आगमने लज्जनमयशस्कारं करोति यतोऽस्मिन् प्रतिगृहमन्यत्र भिक्षां हिण्डमानेन महती नूनमस्माकमपभ्राजना लोको वान्य इदं भणति । किं तदित्याह-

[भा.२४७३] नीयल्लस्स वि भत्तं न तरह दाउंति तुब्भे किवणत्ति ।

गेहे भुंजसु वुत्ते भणाति नो कप्पियं भुंजे ।।

वृ- तं साधुं भिक्षामटन्तं दृष्ट्वा केचिदन्ये स्वजनान् प्रति ब्रूयुः-यथा यूयं कृपणा निजकस्याप्येकस्य प्राधूर्णकागतस्य भक्तं दातुं न शक्नुथ ततस्ते एवमुक्ताः सन्तः साधुसमीपमागत्य ब्रुवते । यावन्ति दिनानि यूयमत्र तिष्ठत तावन्मान्यत्र भिक्षामटत किन्तु गृहे भुङ्क्ष्व । अन्यत्र भिक्षाटने हि महत्यस्माकमपभ्राजना स एवमुक्तः साधुर्भणति युष्मद्गृहे न भुञ्जे यतोऽहं कल्पिकं भुञ्जे युष्मद्गृहे चोद्गमादिदोषाशङ्का । एवमुक्ते स्वजनाः प्राहुः-

[भा.२४७४] किंतंति खीरमादी ददामो दिन्ने य भाति भज्जातो ।

बेंति सुते जावंते पडिया नेकरा बहु पुत्ता ।।

वृ- किं तत् कल्पिकं यत्त्वं भुंक्षे । ततः साधवो यानि युष्माकं यथाप्रवृत्तानि क्षीरादीनि क्षीरदधिधृतगुडादीनि ततस्ते आहुरेतानि यथा प्रवृत्तानि दास्यामः, गाथायां र्त्तमानसामीप्ये वर्तमानवद्वेति वचनात्, तं दातुं प्रवृत्तास्ततो दत्ते क्षीरादिके भ्रातृभार्याः सुतान् क्षीरादीनि याचमानान् प्रति ब्रुवते । हे पुत्रा बहवोऽस्माकं कराः पतितास्तानेवाह-

[भा.२४७५] दहिधयगुलतेल्लकरा तक्ककरा चेव पाडिया अम्हं ।

रायकरपल्लियाणं समणकरा दुक्करा वोढुं ।।

वृ- दधिकर धृतकर गुलकर तैलकरास्तथा तक्रकराश्चास्माकं पातिताः श्रमणैः राजकरा अपि ब्रहवोऽस्माकमावतन् तैः सदैव प्रेरिता वयं वर्तामिहे, परं राजकरप्रेरितानामस्माकमयं श्रमणकरो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुष्करो वोढुमिति प्रभूतसर्वापहरणात् ।।

[भा.२४७६] एए अने य तहिं नायविही गमने होंति दोसाओ ।
तम्हा उ न गंतव्वं कारणजाते भवे गमनं ।।

वृ- एते अनन्तरोहिता अन्ये चानुक्तास्तत्र ज्ञातविधिगमने दोषा भवन्ति, तस्मात् ज्ञातविधौ न गन्तव्यम् । एष उत्सर्गः, कारणे पुनर्ग्लानत्वादिलक्षणे जाते पुनरपवादतो गमनं भवेत् । तहेवाह-

[भा.२४७७] गेलणकारणेणं पाउग्गा सति तहिं तु गंतव्वं ।
जे उ समत्थुवसग्गे सहिउं ते जंति जयणाए ।।

वृ- ग्लानत्वकारणेनान्यत्र प्रायोग्यस्यौषधादेरसत्यभावे उपलक्षणमेतत् वैद्याभावे च तत्र गन्तव्यम् । तत्र वैद्यस्य प्रायोग्यस्यौषधस्याशनादेश्च प्राप्यमाणत्वात्तत्र ये उसर्गान् सोढुं समर्था ये च परिश्रमेण न गृह्यन्ते यतनया वक्ष्यमाणया यान्ति गच्छन्ति तामेव यतनामाह-

[भा.२४७८] बहिय अणापुच्छाए लहुगा लहुगो य दोव्वणा पुच्छा ।
आयरियस्स व लहुगा अपरिच्छिय पेसवं तस्स ।।

वृ- अत्रेदं सूत्रं पतति, । 'नो से कप्पति थेरे य(?)नापुच्छा नायविहिं एतए' इत्यादि । तत्र यदि बहिः स्थविराणामनापृच्छ्या व्रजति ततस्तस्य प्रायश्चित्तं चत्वारो लघुकाः स्थविरानापृच्छ्य तैर्विसर्जितो यदि द्वितीयं स्थविरान् अनापृच्छय व्रजति । ततो द्वितीयानापृच्छायां मासलघु, आचार्योऽपि यद्यपरीक्षितान्प्रेषयति ततस्तस्या परीक्षितान् प्रेक्षयतश्चत्वारो लघुकाः प्रायश्चित्तं

[भा.२४७९] तम्हा परिच्छियव्वो सज्झाए चेव भिक्खभावे य ।
थिरमथिरजाणणठा सो उ उवाएहिमेहिं तु ।।

वृ- यत एवमपरीक्षितप्रेक्षण प्रायश्चित्तं, तस्मात् स्थिरज्ञानार्थस्वाध्याये भिक्षिभावे च परीक्षितव्यः । स च एभिर्वक्ष्यमाणैरुपायैस्तानेवाह-

[भा.२४८०] चरणकरणस्स सारो भिक्खायरिया तहेव सज्झाओ ।
एत्थ परितम्ममाणं तं जाणसु मंदसंविग्गं ।।

वृ- चरणं व्रतश्रमणधर्मादि उक्तं च ।। वयसमणधम्मसंजमवेयावच्चं च बंभगुत्तीतो । नाणादितियं तवो कोहनिग्गहाइइ चरणमेयं ।। करणं पिण्डविशुद्ध्यादि । उक्तं च-पिंडविसोही समिति भावणपडिमा य इंदियनिरोहो । पडिलेहणगुत्तीतो अभिग्गहा चेव करणं तु ।। तस्य चरणकरणस्य सारो भिक्षाचर्या स्वाध्यायश्च । ततोऽत्र भिक्षाचर्यायां स्वाध्याये च परिताम्यति । क्लेशं मन्यन्ते तं जानीत मन्दसंविग्नम् ।

[भा.२४८१] चरणकरणस्स सारो भिक्खायरिया तहेव सज्झाओ ।
एत्थओ उज्जममाणं तं जाणसु तं जाणसु तिव्वसंविग्गं ।।

वृ- चरणकरणस्य सारो भिक्षाचर्या तथैव स्वाध्यायस्ततोऽत्र भिक्षाचर्यादावुद्यच्छति तं जानीत तीव्रसंविग्नं तदेवं स्थिरास्थिरपरीज्ञानार्थं परीक्षोक्ता । सम्प्रति किमेष उपसर्ग सहिष्णुः किंवानेति ।

[भा.२४८२] कइएण य सभावेण य अन्नस्स च साहसे कहिज्जंते ।
मायपितिभायभगिणी भज्जपुत्तादिएसुं तु ।।

व- यथा स शृणोति तथा कैतवेन स्वभावेन वा अन्यस्य साधोर्मातापितृभ्रातृभगिनीभार्यापुत्रादिषु विषये साध्वसं कथ्यते केन प्रकारेणेत्यत आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२४८३] सिरकोट्टण कलुषाणि य कुणमाणाइं तु पायवडियाइं ।
अमुएण न गणियाइं जो जंपति निप्पिवासोत्ति ।।

वृ- मातापित्रादीनि शिरःकुटनकरुणरोदनभाषणानि कुर्वाणांनि पादपतितानि वामुकेन न गणितानि । एवं साध्वसे कथ्यमाने यो जल्पति अतीव खलु निप्पिपासो घोरहृदयो न वर्तते तेन सह वक्तुमपीति ।.

[भा.२४८४] सो भावतो पडिबद्धो अप्पडिबद्धो वएज्ज जा एवं ।
सोइहिति कित्तिया तू नीया जे आसि संसारे ।।

वृ- स भावतः स्वज्ञातेषु प्रतिबद्धो ज्ञातव्यो न शक्तः स सोहमुपसर्गानिति, यस्तु तथा साध्वसे कथ्यमाने एवं ब्रूते संसारे सर्वजीवाः सर्वेषां पुत्रत्वादिकमुपगतास्ते आसीरन् संसारेऽनन्ते निजास्तान् कियतः स शोचयिष्यति । किं वा मातापित्रादिभिः शोचितैर्ये संसारहेतावसंयमे पातयन्ति स ज्ञातव्यो भावतः स्वजनेष्वप्रतिबद्धः समर्थः सोढुमुपसर्गानिति ।।

[भा.२४८५] मुहरागमादिएहि य तेसि नाऊण रागवेरग्गं ।
नाऊण थिरं ताहे ससहायं पेसवेंति ततो ।।

वृ- तस्य ज्ञातविधिजिगमिषोः शोभनो मुखरागः स ज्ञायते स्वजनेषु भावतः प्रतिबद्धउपसर्गान् न सहिष्णुश्च यस्य तु न तथाविधो मुखरागः केवलं विरागः स्पष्टो लक्ष्यते स ज्ञेयो भावतः स्वज्ञातिष्वप्रतिबद्धः सहिष्णुश्चोपसर्गान् । एवं मुखरागादिभिस्तेषां ज्ञातविधिं गन्तुमिच्छतां रागं वैराग्यं च ज्ञात्वा तथा स्थिरमुपलक्षणमेतदस्थिरं च ज्ञात्वा ततः स्थिरं भावतः स्वजनेष्वप्रबिद्धं ससहायं सूरयः प्रेषयन्ति साम्प्रतमल्पश्रुताल्पागमपदव्याख्यानार्थमाह-

[भा.२४८६] अबहुस्सुत्तो अगीतो बाहिरसत्थेहिं विरिहितो इयरो ।
तव्विवरीए गच्छे तारिसगसहायसहितो वा ।।

वृ- अल्पश्रुतो नामाबहुश्रुतः स चागीतार्थ उच्यते । इतरो अल्पागमो यो बाह्यो बाह्य-शास्त्रैर्विरहितः । एतादृशो न गच्छेत् । स्वजनविधौ किन्तु तद्विपरीतो बहुश्रुतो बह्वागमश्च यदि वा स्वयमल्पश्रुतोऽल्पागमो वा तादृशहायसहितो बहुश्रुतबह्वागमसहायसहितो गच्छेत् ।

[भा.२४८७] धम्मकही वादीहि य तवस्सि गीएहिं संपरिवुडो उ ।
निमित्तएहि य तहा, गच्छइ सो अप्पच्छट्ठो उ ।।

वृ- धर्मकथाभिर्द्वित्रिप्रभृतिभिर्वादकुशलैस्तपस्विभिः षष्ठाष्टमादितपःकारिभिर्गीतार्थैः सूत्रार्थतदुभयनिष्णातैर्नैमित्तिकैश्च संपरिवृतो गच्छेत् । अथ धर्मकथ्यादयो वहवो न सन्नित ततो जघन्यतोऽप्येकैकधर्मकथ्यादिसहाय आत्मषष्ठो व्रजेतत्र प्रवेशविधिमाह-

[भा.२४८८] पत्ताणवेलपविसण अह पुन पत्ता पगे हविज्जाहि ।
तं बाहिं ठावेउ वनसहिं मग्गंति अन्नत्थ ।।

[भा.२४८९] पडिवत्तिकुसलेहिं सहितो ताहे उ वच्चए तहियं ।
वासपडिग्गहगमनं नातिसिनेहासणग्गहणं ।।

वृ- यदि वेलायां भिक्षावेलायां स्थानं प्रातास्तर्हि समकालमेव सर्वेषां प्रवेशनमथ पुनः प्रगे प्रभात एव प्राप्ता भवेयुस्तदा तं स्वजनवन्तं बहिः स्थापयित्वा वसतिमन्यत्र गृह्णन्ति । अन्यत्र वसतौ गृहीतायां प्रतिपत्तिकुशलैः सहितस्ततो बहिः स्थानात् तत्र वसतौ व्रजति तत्र तावदावासो यावद्भिक्षावेला

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

ततःपतद्ग्रं गृहीत्वा गमनं विधेयं । तत्र यदि प्राप्तायां भिक्षावेलायां पतद्ग्रहं गृहीत्वा व्रजन्ति । तत्कालमेव गृह्णन्ति भक्तादिकमथ भिक्षावेलायामप्राप्तायां तत्र पतद्ग्रहं गृहीत्वा व्रजन्ति । निमन्त्रयन्ति च ते तदा तत्क्षणमेव यल्लभन्ते तद्गृह्णन्ति । अथ मुहूर्तानुगु(ग)ण्यतः कृतभिक्षाकास्तत्र गतास्तर्हि तत्र पतद्गृहं न नयन्ति, तत्र च गत्वा नातिस्नेहः स्वज्ञातानां दर्शनीयो यदि पुनः अतिस्नेहं दर्शयति ततोऽनुरक्तोऽस्माकमिति ज्ञात्वा ते उपसर्गयेयुः, । तथा तत्र गतेनासनपरिग्रहः कर्तव्यो न पुनरेवं चिन्तनीयम् ।। आसंदीपलियंकेसु मंचमासालएसु वा । अनायरियमज्झाणं आसइ त्तु सइत्तुवा ।। आसनपरिग्रहाभावे ह्यपभ्राजना भवति तस्मादासने उपवेष्टव्यम् ।।

[भा.२४९०] सयमेव उ धम्मकहा सासग पंतेय निम्मुहे कुणति ।
अपडुप्पणणेय तहिं कहेइ तल्लद्धितो अणणो ।।

वृ- यदि स स्वज्ञातिक साधुर्धर्मकथायां कुशलः प्रान्तांश्चनिरुत्तरान् कर्तुं समर्थस्ततः स्वयमेव तस्य धर्मकथा कथनीया भवति, अथ सोऽप्रत्युत्पन्नो नागमिकः प्रतिपत्त्यकुशलो वा तदा तस्मिन्नप्रत्युत्पन्नेऽन्यस्तल्लब्धिको धर्मकथालब्धिसम्पन्नः प्रत्युत्तरदानलब्धिसम्पन्नश्च कथयति-

[भा.२४९१] मलिया य पीढमद्दा पव्वज्ञा एय थिरनिमित्तं तु ।
थावच्चापुत्तेणं आहरणं तत्थ कायव्वं ।।

वृ- ताहे पीढसमुद्दा मुहपियजंपगाते पव्वज्ञाओ । भावणा वयणाणि भणिज्ञा तणपडिवत्तिकुसलेणं कहएणं मलिया मद्दिया भवन्तीति चूर्णिः । पीठमर्दानाम मुखप्रियजल्पाः स्थिरीकरणनिमित्तं तत्र धर्मकथायां स्थापत्यापुत्रेण ज्ञाताधर्मकथाप्रसिद्धेनाहरणं कर्तव्यम् ।।

[भा.२४९२] कहिए व अकहिए वा जाननहेउं अयंति भत्तघरं ।
पुत्ताउत्तं तहिय पच्छाउत्तं व जं तत्थ ।।

वृ- धर्मे कथिते अकाथिते वा भिक्षाग्रहणवेलायामुद्गमादिशुद्धिज्ञानार्थं भक्तगृहं महानसं प्रविशन्ति । प्रविश्य च यत्तत्र पूर्वायुक्तं पूर्वप्रवृत्तमुपस्क्रियमाणं पश्चादायुक्तं यत्तेषु साधुष्वागतेषु तन्निमित्तमुपस्क्रियमाणं तत्परिभावयन्ति । पूर्वायुक्तमित्यत्र व्याख्यानद्वयं परमतेन दर्शयति-

[भा.२४९३] पुव्वाउत्तारुहिए केसिंचि समीहियं तु जं तत्थ ।
एए न होंति दोण्णि वि पुव्वपवत्तं तु जं तत्थ ।।

वृ- केचित् व्याचक्षते पूर्वायुक्तं नाम चुल्ल्यां पाकार्थमारोपितं केषाचित्पुनरिदं व्याख्यानं यत् तत्र समीहितं पाकाय ढौकितं एतौ द्वावप्यादेशौ प्रमाणं न भवतस्तस्मादिदं व्याख्यानं यत्तत्र गृहस्थानां पूर्वप्रवृत्तमुपस्क्रियमाणं तत्पूर्वायुक्तमिति ।। अथ कस्मादिरदादेशद्वयं न प्रमाणमत आह-

[भा.२४९४] पुव्वारुहिते ते समीहिए य किछिब्भइ न खलु अणं ।
तम्हा खलु जं उचियं तं तु पमाणं न इत्तरं तु ।।

वृ- पूर्वं चुल्यामारोपिते समीहिते वा किं न क्षिप्यते खलु अन्यत् क्षिप्यते इति भावः । तस्मात्खलु यदुचितं व्याख्यानं तत्प्रमाणं नेतरत् परकीयमादेशद्वयम्-

[भा.२४९५] बालग पुच्छादीहि य नाउं आयरमनायरेहिं च ।
जं जोग्गं तं गेण्हइ दव्वं पमाणं च जं तत्थ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- बालकपृच्छादिभिरादिशब्दात् बालकोल्लापादिश्च पिण्डनिर्युक्तिप्रसिद्धैस्तथा आदरानादराभ्यां च योग्यमयोग्यं ज्ञात्वा यत्तत्र च योग्य श्रमणप्रायोग्यं प्रतिभाति तद्गृह्णाति । वरवृषभः द्रव्यप्रमाणं च जानीयात् । कियत् कुटुम्बमन्यद्वा भोजकं कयद्वाराद्धमित्येवं यद्यावत् प्रायोग्यं प्रतिभासते तावत् गृह्णीयात् । सम्प्रत्येतदेव सविशेषतरमाह-

[भा.२४९६] दव्वपमाणगणणा खारिया फोडियातहेव अद्धाय ।
संविग्ग एगठाणा अणेगसाहूसु पन्नरस ।।

वृ- द्रव्यं प्रमाणं नाम द्रव्याणां गणना यथा एतावन्तोऽत्रौदनभेदा एतावन्ति च शाकविधानानि । इयंतश्च खाद्यविशेषा एतावन्ति च द्रक्षापानकादीनि पानकानि तथा क्षारितानि नाम यानि लवणखरण्टितानि शालनकान्यास्तानानीत्यर्थः । फोडितंजीरकहिंगुधूपवासितं एतत्सर्वं ज्ञातव्यं, (तथा अश्राकालो भिक्षाया ज्ञातव्यो अन्यथा अवष्वक(ष्क)णादयो दोषाः स्युः, तथा संविग्रा एकस्थाना एकसंघाटात्मकाः प्रविशंति, ततः कल्पते, अनेकसाधुषु अनेकेषु साधुसंघाटकेषु प्रविशत्सु न कल्पते यतस्तत्रनियमादाधाकर्मरहिता उद्देशिकादयः पंचदशदोषाः एतदेव विवरीषुः प्रथमतो द्रव्यप्रमाणमाह-

[भा.२४९७] सत्तविहमोयणो खलु शालीवीही य कोद्दवजवे य ।
गोहुमरालग आरण कूर खज्जा य अनेगविहा ।।

वृ- सप्तविधो मकारोऽलाक्षणिकओदनः कूरस्तद्यथा- १ शालि कलमशाल्यादिकूरः, २ व्रीहि सामान्यतन्दुलौदनः ३ कोद्रवकूरो ४ वयकूरः गोधूमकूरो ६ लाककूरः ७ अकृष्टपच्यारण्यव्रीहिकूरश्च खाद्यानि चानेकविधानि ।।

[भा.२४९८] सागविहाणाय तहा खारियमादीणि वंजणाइं च ।
खंडादिपाणगाणि य नाउं तेसिं तु परिमाणं ।।

वृ- शाकविधानानि प्राजमनकानि क्षारितादीनि आदिशब्दात् स्फोटितपरिग्रहो व्यञ्जनानि तथा खण्डादिपानकानि आदिशब्दात् द्राक्षादिपरिग्रहः । तेषामोदनादीनां परिमाणं ज्ञात्वा किमित्याह-

[भा.२४९९] परिमियभत्तगदाणे दसुवक्खडियंमि एगभत्तठो ।
अपरिमिते आरेण वि गेण्हइ एवं तु जं जोग्गं ।।

वृ- परिमितभक्तकदाने परिमितानां भक्तकदाने परिमितानां भक्तकर्मभिर्दातव्यमिति निश्चये यावद्दशानां योग्यमुपस्कृतं तावत्येकभक्तार्थो ग्राह्यः । एकयोग्यं तत्र भक्तं ग्राह्यमिति भावः । अपरिमिते अपरिमितभक्तकदाने दशानामारतोऽपि नवानामष्टानां वा योग्यं यदुपस्कृतं तत्रैवं स्थान-परिणामचिन्ताव्यतिरेकेण यत् योग्यं तद्यावत्पर्याप्तं गृह्णाति ।।

[भा.२५००] अद्धा य जाणियव्वा इहरा उ सक्कणादयो दोसा ।
संविग्गे संघाडो एगो इयरेसु न विसंति ।।

वृ- अद्धा भिक्षावेला ज्ञातव्या, । इतन्था अवष्वष्कणादयो दोषा भवेयुस्तथा संविग्गे संविग्नानामेकः संघाटो यत्र प्रविशति तत्र गन्तव्यम् । इतरेषु यत्र बहवः संघाटकाः प्रविशन्ति, तत्र न गच्छन्ति ।।

[भा.२५०१] तहियं गिलाणगस्सा अहागडाई हवंति सव्वाइं ।
अब्भंगसिरावेहो अपाणच्छेयावणेज्ञाइं ।.

वृ- यदि स्वजनानां सम्बन्धी कोऽपि ग्लानो वर्तते तस्य चिकित्सां वैद्यः करोति यदि वा वैद्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधुस्वजनानां स्वजनोऽन्यस्य कस्यापि ग्लानस्य क्रियां करोति । ततस्तत्र ग्लानो ज्ञातविधिं नीयते । यतस्तत्र ग्लानस्याभ्यङ्गं शिरावेधोऽपानमपानकर्म च्छेदेनापनीयानि छेदापनीयानि । एतानि सर्वाणि यथा कृतानि पुरःकर्मपश्चात्कर्मरहितानि भवन्ति । एतदेव स्पष्टं भावयति-

[भा.२५०२] जइ नीयाण गिलाणो नीओ विज्जो व कुणइ अनस्स ।
तत्थ हु न पच्छकम्मं जायइ अब्भंगमादीसु ।।

वृ- यदि निजकानां सम्बन्धी ग्लानो वैद्यो वा निजकोऽन्यस्य कस्यापि ग्लानस्य कुरुते चिकित्सां, तत्र हु निश्चितं न पश्चात्कर्माभ्यङ्गादिषु जायते, कथं न जायते इत्याह-

[भा.२५०३] पुव्वं च मंगलठा उप्पेउं जइ करेइ गिहियाणं ।
सिरवेधबत्थिकम्माइएसु न उ पच्छकम्मेयं ।।

वृ- पूर्वं यदि मङ्गलार्थं साधुं उप्पेउं देशीपदमेतत् । अभ्यङ्गथ पश्चाद् गृहिकाणां गृहस्थानां करोत्यभ्यङ्गमेतत्पश्चात्कर्म न भवति । एवं शिरावेधवस्तिकर्मादिष्वपि पूर्वं साधौ कृत्वा पश्चाद् गृहस्थेषु क्रियमाणेषु न पश्चात्कर्म ।।

[भा.२५०४] अत्तठा उवनीया ओसहमादी हवंति ते चेव ।
पच्छाहारो य तेहिं अहाकडो होइ साहुस्स ।।

वृ- आत्मार्थं यान्युपनीतानि औषधादीनि गृहस्थैस्तान्येव साधोरपि भवन्ति । पथ्याहारेऽपि च तत्र साधोर्यथाकृतो भवति ततो न पश्चात्कर्म ।।

[भा.२५०५] अगिलाणे उ गिहिम्मी पुव्वुत्ताए करेंति जयणाए ।
अनत्थपुन अलंभे नायविहिं नेति अतरंतं ।।

वृ- यदि निजकानां सम्बन्धी न कश्चित् ग्लानो नापि निजको वैद्योऽन्यस्य चिकित्सां करोति, तदा गृहिणि गृहस्थे अग्लानेऽन्यत्र पूर्वोक्तया यतनया पर्व कल्पाध्ययने ग्लानसूत्रे चिकित्सा यतनोक्ता, तया चिकित्सां कुर्वन्ति । तथान्यत्रौषधानां लाभो नास्ति, तत आह-अन्यत्र पुनरौषधानामलाभे ज्ञातविधिमनन्तरं तं ग्लानं नयन्ति, । तदेवं ग्लानविधिरप्युक्तः ।।

[भा.२५०६] अहुणा उ लाभचिन्ता, तत्थगयाणं इमा हवइ तेसिं ।
जइ सव्वेगायरियस्स, होंतितो मग्गणा नत्थि ।।

वृ- अधुना तेषां तत्र गतानां ज्ञातविधौ गतानामियं लाभचिन्ता भवति । यदि ते धर्मकथ्यादयः सर्वेऽप्येकस्याचार्यस्य भवन्ति, तर्हि नास्ति मार्गणा सर्वमाचार्यस्याभवतीति भावः ।।

[भा.२५०७] संतासंतसतीए, अह अणगणाबिइज्जगानीया ।
तत्थ इम मग्गणा ऊ आभव्वे होइ नायव्वा ।।

वृ- सदभावो नाम सन्तिसाधवः, परं न धर्मकथादिषु कुशला असद्भावो मूलत एव न सन्ति साधव एवं सदभावेनासदभावेन वा येऽन्यगणसक्ता द्वितीयका नीतास्तेषामियमाभाव्ये मार्गणा भवति ।

[भा.२५०८] जं सो उवसामेइ तन्निसाए य आगया जे उ ।
ते सव्वे आयरितो, लभते पव्वावगो तस्स ।।

वृ- स ज्ञातविधिमागतः स तु यमुपशमयति प्रव्रज्यापरिणामं ग्राहयति, ये च तन्निश्रया तस्य ज्ञातिविधिमागतस्य निश्रया स्वजनोऽयमस्माकमिति बुद्धया तत्समीपमागतास्तान् सर्वान् यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञातविधिं द्रष्टुमागतस्तस्य साधोर्यः प्रव्राजक आचार्यः स लभते ।

[भा.२५०९] जे पुन अहभावेणं धम्मकही सुंदरोत्ति वा सोउं ।
आउवसामिय तेहिं, तेसिं चिय ते हवंती उ ।।

वृ- ये पुनर्यथाभावेन यदि वा ये सुन्दरो धर्मकथीति श्रोतुमागताः सन्तस्तैर्धर्मकथ्याभिरुपशामिताः प्रव्रज्यापरिणामं ग्राहितास्ते तेषामेव भवन्ति ।।

[भा.२५१०] अनेहिं कारणेहिं व, गच्छंताणं तु जयण(णा)एसेव ।
ववहारो सेहस्स य ताइं च इमाइं कज्जाइं ।।

वृ- आस्तां स्वजनवन्दापनाय ग्लानप्रयोजनेन वा ज्ञातविधिगतानां यतना प्रागुक्ता भवति । अन्यैर्वा कारणैर्वक्ष्यमाणैर्ज्ञातविधिं गच्छतामेषैवानन्तरोदिता यतना । एष एव च शैक्षस्य विषयेऽनन्तरोदितआभवनव्यवहारः तानि चान्यानि कार्याणि कारणानि इमानि तान्येवाह-

[भा.२५११] तवसोसिय अप्पायण उमेव असंथरंत गच्छेज्जा ।
रमणिज्जं वा खेत्तं कालज्जोग्गं तु गच्छस्स ।।

वृ- तपसा विकृष्टेन शोषितस्तपःशोषितः, स्वजनाश्च प्रचुरदानास्तत आप्यायननिमित्तं सपरिवारो ज्ञातविधिं व्रजेत् । अथवा अवमं दुर्भिक्षं जातं तत्रासंस्तरन्तो ज्ञातविधिं गच्छेयुः । रमणीयं वा तत्क्षेत्रं गच्छस्य त्रिकालयोग्यं ततो गच्छन्ति । त्रिकालयोग्यतामेव भावयति ।।

[भा.२५१२] वासे निचिक्खिल्लं सीयलदव उसमेव गिम्हासु ।
सिसिरे य घननिवाया वसही तह घठमठा य ।।

वृ- वर्षे वर्षाकाले निश्चिक्खिल्लं कर्दमाभावः ग्रीष्मकाले प्रचुरं शीतलं द्रवं लभ्यते । शिशिरे शीतकाले घनमतिशयेन निवाता वसतिर्लभ्यते घृष्टा मृष्टा च ।

[भा.२५१३] छिनमंडवं च तयं सपक्खपरपक्खविरहितो माणं ।
पत्तेय उग्गत्तिय, काऊणं तत्थ गच्छेज्जा ।।

वृ- यदन्यत् क्षेत्रं गन्तव्यं तत् च्छिन्नमंडवं यत्र तु स्वजनाः सन्ति, तत्स्वपक्षपरपक्षकृतापमानविरहितं गाथायामपमानशब्दस्यान्यथोपनिपातः प्राकृतत्वात्प्रत्येकं ग्लानबालादीनामवग्रह उपष्टम्भश्च जायते इति कृत्वा इति हेतोः तत्र ज्ञातिविधौ गच्छेत् ।।

[भा.२५१४] उवदेसं काहामि य धम्मं गाहिस्स पव्वयाविस्सं ।
सड्ढाणि व वुग्गाहे भिच्छगमादी ततो गच्छे ।।

वृ- धर्मोपदेशं वा स्वजनानां करिष्यामि यदि वा धर्मं श्रावकधर्म ग्राहयिष्यामि । अथवा ते निष्क्रमितुकामा वर्तन्ते । ततः प्रव्राजयिष्यामि दानश्रद्धानि वा तानि कुलानि भिक्षुकादिर्व्युद्ग्राहयेत् । तत एतैः कारणैर्ज्ञातविधिं गच्छेत् ।

मू. (१४९) *आयरिय उवज्झायस्स गणंसि पंच अइसेसा पन्नत्ता, तं जहा-आयरिय उवज्झाए अंतो उवस्सयस्स पाए निगिज्झिय निगिज्झिय पप्फोडेमाणे वा पमज्जेमाणे वा नो अइक्कमइ, आयरिय उवज्झाए अंतो उवस्सयस्स उच्चारपासवणं विगिंचमाणे वा विसोहेमाणे वा नो अइक्कमइ, आयरिय उवज्झाए पभू वेयावडियं इच्छा करेज्जा इच्छा नो करेज्जा, आयरिय उवज्झाए अंतोउवस्सयस्स एगरायं वा दुरायं वा वसमाणे नो अइक्कमइ; आयरिय उवज्झाए पभू वेयावडियं इच्छा करेज्जा इच्छा नो करेज्जा, आयरिय*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवज्झाए अंतोउवस्स यस्स एगरायं वा दुरायं वा वसमाणे नो अइक्कमइ; आयरिय उवज्झाए बाहि उवस्सयस्स एगरायं वा दुरायं वा वसमाणे नो अइक्कमइ ।

[भा.२५१५] अतिसेसियदव्वठा नायविधिं वयति बहुसुतो ।
नेगा य अतिसया बहुसुयस्स उ एसो उ पस्सेसो ।।

वृ- अतिशेषितानामतिशयितानां ग्लानप्रायोग्याणां शतपाकादीनां द्रव्याणामर्थाय बहुश्रुतः सन् ज्ञातविधिं व्रजति इति पूर्वसूत्रे प्रतिपादितमस्मिंश्च सूत्रे बहुश्रुतस्य सतो अनेके अतिशया इति प्रतिपाद्यमित्येष सूत्रस्य प्रश्लेषसम्बन्धः प्रकारान्तरेण सम्बन्धमाह-

[भा.२५१६] अन्नो वि अत्थि जोगो असाहुदिठीहिं हीरमाननं ।
वायादतिसयजुत्ता, तहियं गंतुं नियत्तंति ।।

वृ- अन्योऽपि पूर्वसूत्रेण सहास्य सूत्रस्य योगः सम्बन्धोऽस्ति तमेवाह-असाधुद्दष्टिभिः परतीर्थिकद्दष्टिभिः ह्रियमाणानां स्वजनानां वादाद्यतिशययुक्तास्तत्र ज्ञातविधिस्थाने गत्वा ते कुदृष्टयस्तेषां निवर्तयन्ति । इति प्रागुक्तं वुग्गाहे भिच्छुक्कमादी इति वचनात् ते चातिशयाऽत्रापि प्रतिपाद्यन्ते इति भवति सम्बधः पुनः प्रकारान्तरेणाह-

[भा.२५१७] पुनरवि भणइ जोगो, नायविधिं गंतु पडिनियत्तस्स ।
वसहिं विसतो सुत्तं संसाहिउमागते वा वि ।।

वृ- पुनरपि प्रकारान्तरेण भण्यते-योगो ज्ञातविधिं वन्दापनाय गत्वा प्रतिनिवृत्तस्य परतीर्थिकं वा वादोपस्थितं संसाध्य निर्जित्यागतस्य वसतिं विशतोऽधिककृतं सूत्रमुपतिष्ठते । अधिकृतसूत्रार्थ उपढौकते तत एतदर्थं ज्ञातविधिसूनन्तरमस्य सूत्रस्योपनिपातः कृतः, एभिः सम्बन्धैरायातस्यास्य व्याख्या-आचार्यश्च उपाध्यायश्च आचार्योपाध्यायः स हि केषांचिदाचार्यः केषांचिदुपाध्यायः तत एवमुक्तं यावता पुनः सनियमादाचार्य एव तस्य गणे गणमध्ये पञ्च अतिशेषा अतिशयाः प्रज्ञप्तास्तद्यथा-आचार्योपाध्यायानां उपाश्रयस्यान्तर्मध्ये पादान् निगृह्य निगह्य तथा पादा यतनया प्रस्फोटयितव्याः । यथा धूलिः कस्यापि क्षपकादेर्न लगति । एवं शिक्षयित्वा शिक्षयित्व प्रस्फोटयतः प्रस्फोटको नातिक्रमति । एष एकोऽतिशयः । तथा आचार्योपाध्यायान् उपाश्रयस्यान्तरुच्चारं प्रश्रवणं वा विगिञ्चयतो व्युत्सृजतो विशोधक उच्चारादिपरिष्टापको नातिक्रामति । एष द्वितीयस्तथा आचार्योपाध्यायः प्रचुरतो वैयावृत्यामिच्छया कारयेत् । न बलाभियोगत आणा बलाभियोगा निग्गंथाणं न कप्पए काउमिति वचनात् । एष तृतीयस्तथाचायोपाध्याय उपाश्यस्यान्तर्मध्ये एकरात्रं वा द्विरात्रं वा वसन् नातिक्रामति । नातिचारभाग् भवति एष चतुर्थः, । आचार्योपाध्याय उपाश्रयाद्बहिरेकरात्रं वा वसन् नानिक्रामति ।

[भा.२५१८] बहि अंतो विवच्चासो पणगं सागारि चिठइ मुहुत्तं ।
बिइयपयं विच्छिणे निरुद्धवसहीए जयणाए ।।

वृ- बहिरन्तश्च यदि विपर्यासो बहिरस्फोट्यांतः प्रस्फोटनरूपस्तदा पंचकरात्रिंदिवं प्रायश्चित्तम् अथ बहिः सागारिको वर्त्तते ततस्तिष्ठति मुहूर्त्तं, व्याख्यानतो विशेषप्रतिपत्तिरंतर्मुहूर्त्तमित्यर्थः, अथैतावत्कालेन सागारिको नापयाति तर्हि द्वितीयपदमपवादपदमाश्रीयते बहिः पादाप्रस्फोटनेऽप्यन्तर्वसतेः प्रविश्यते । तत्र विस्तीर्ण उपाश्रये अपरिभोगे प्रदेशे आचार्यपादाः प्रस्फोटयितव्या, निरुद्धायां संकटायां वसतौ यत्राचार्यसत्कवेण्टकाद्यवकाशस्तत्र यतनया यथा न कस्यापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धूलिर्लगतीत्येवंरूपया प्रस्फोटयितव्याः । एष द्वारगाथासंक्षेपार्थः साम्प्रतमेनामेव विवरीपुरिदमाह-

[भा.२५१९] बाहिं अपमज्जंते पणगं गणिणो उ सेसए मासो ।
अप्पडिलेहदुपेहा पुव्वुत्ता सत्तभंगा उ ।।

वृ- आचार्यः कुलादिकार्येण निर्गतः प्रत्यागत उत्सर्गेण तावद्वसतेर्बहिरेव पादान् प्रस्फोटयति प्रत्युप्रेक्षते प्रमार्जयति चेत्यर्थः । यदि पुनर्निष्कारणं बहिः पादान् न स्फोटयति, तदा बहिरप्रमार्जने गणिन आचार्यस्य प्रायश्चित्तं पञ्चकं शेषकेसाधौ बहिः पादान् (अ)प्रमार्जयतिलघुको मासः प्रायश्चित्तं, तस्मात् बहिः पादान् प्रस्फोटयान्तः प्रस्फोटयान्तः प्रवेष्टव्यं, । तच्च प्रस्फोटनं विधिना कर्त्तव्यं, । स चायं विधिः प्रत्युपेक्षते ततः प्रमार्जयति, । अविधिः पुनरयं न प्रत्युपेक्षते न प्रमार्जयति ? न प्रत्युपेक्षते प्रमार्जयति २ प्रत्युपेक्षते न प्रमार्जयति ३ प्रत्युपेक्षते प्रमार्जयति ३ प्रत्युपेक्षते प्रमार्जयति च ४ । अत्राद्येषु त्रिषु भङ्गेषु प्रत्येकं प्रायश्चित्तं मासिकं चतुर्थे भङ्गे भङ्गाश्चत्वारस्तद्यथा दुःप्रत्युपेक्षते दुःप्रमार्जयति १, दुःप्रत्युपेक्षते सुप्रमार्जयति २, सुप्रत्युपेक्षते दुःप्रमार्जयति ३, सुप्रत्युपेक्षते सुप्रमार्जयति ४ । अत्र च चतुर्थो भङ्गः शुद्धः शेषेपु त्रिषु भङ्गेषु प्रत्येकं प्रायश्चित्तं पञ्चरात्रिंदिवं । एतदेवाहअप्रेक्षणे उपलक्षणमेतत् । अप्रमार्जने च तथा दुःप्रेक्षायामत्राप्युपलक्षणव्याख्यानमिति दुःप्रमार्जनायां च पूर्वोक्ताः कल्पाध्ययनोक्ताः सप्त भङ्गाः । तत्र चोक्तः प्रायश्चित्तविधिः-

[भा.२५२०] बहिअंतो विवज्जासो पनगं सागारिए असंतंमि ।
सागारियंमि उ चले, अच्छंति मुहुत्तगं थेरा ।।

वृ- यदि सागारिके अथ सागारिको बहिस्तिठति सोऽपि चलश्चलो नाम मुहूर्तमात्रेण गन्ता तस्मिन् सागारिके चले तिष्ठति मुहूर्तकमल्पार्थे कप्रत्ययोऽल्पं मुहूर्तं । किमुक्तं भवति ? सप्ततालमात्रं सप्तपदातिक्रमणमात्रं वा कालं स्थविरास्तिष्ठन्ति ।।

[भा.२५२१] थिरवक्खित्ते सागारिए अनुवउत्तो पमज्जिउं पविसे ।
निव्विक्खित्तुवउत्ते अंतो उ पमज्जणा ताहे ।।

वृ- स्थिरो नाम यस्तत्रावस्थायी ध्रुवकर्मिको व्याक्षिप्तः कर्मणि कर्तव्ये व्याकुलस्तद्विपरीतो-ऽव्याक्षिप्तः उपयुक्त आचार्यान् दृष्ट्या निरीक्षमाणस्तद्विपरीतोऽनुपयुक्तः । तत्र स्थिरे व्याक्षिप्ते-ऽनुपयुक्ते सागारिके विद्यमाने बहिः पादान् प्रमार्ज्य प्रविशेत्, स्थिरेनिर्व्याक्षिप्ते उपयुक्तेः बहिः सागारिके सति वसतेरन्तः प्रमार्जना पादानां, । अथाचार्यस्य पादाः किं स्वयमेवाचार्येण प्रस्फोटयितव्या उतान्येन साधुना तत आह-

[भा.२५२२] आभिगाहियस्स असती तस्सेव रओहरेन अन्नयरे ।
पाउंछणुन्निए नव पुस्संति य अनन्नभुत्तेणं ।।

वृ- केनापि साधुना अभिग्रहो गृहीतो वर्त्तते । यथा मया आचार्यस्य बहिर्निर्गतस्य प्रत्यागतस्य पादाः प्रस्फोटमितव्या इति, यद्यस्ति तर्हि तेन प्रमार्जनायोपस्थातव्यम् तत्र चाचार्येणात्मीयं रजोहरणं तस्य समर्पयितव्यं पादप्रमार्जनाय, ततः स आभिग्रहिकस्तेनाचार्यसक्तेन रजोहरणेन आचार्यस्य पादान् प्रमार्जयति, । अथवा यदन्यदौर्णिकं पादप्रोञ्छनकमन्येन साधुना पादप्रमार्जनेनापरिभुक्तं तेनाचार्यस्य पादान् प्रस्फोटयति । अथाभिग्रहिको न विद्यते । तत आभिग्रहिकस्यासत्यभावे अन्यतरस्तस्यैवाचार्यस्य रजोहरणेन औणिकेन वा पादप्रोञ्छनकेनानन्यभुक्तेन पादान् पुंसयति । यदि पुनरव्यापृता अपि

निष्कारणमाचार्यस्य पादान्न प्रमार्जयति तदा मासलघु, अथात्मीयेन रजोहरणेन पादप्रोञ्छनेन वा अन्यपादप्रमार्जनतः परिभुक्तेन प्रमार्जयंति, तदापि मासलघु । यदि बहिर्सवतेः सागारिकस्तिष्ठतीत्याचार्यस्य पादा न प्रस्फोटितास्तर्हि वसतेरन्तः प्रविष्टस्य प्रस्फोटनीयास्तत्रायं विधिः-

[भा.२५२३] विपुलाए अपरिभोगे अप्पणउवासए व चिट्ठस्स ।
एमेव भिक्खुयस्स वि नवरिं बाहिं चिरयरं तु ।।

वृ- यदि विपुला वसतिस्तर्हि तस्यां विपुलायां वसतावपरिभोगे अवकाशे आचार्येण स्थित्वा पादाः प्रस्फोटयितव्याः, । अथ संकटा वसतिस्तर्हि आचार्यस्य आत्मीयो वेण्टकाद्यवकाशस्तत्र ऐर्यापथिकी प्रतिक्रम्योपविष्टस्य पादाः प्रमार्जनीयास्ते च कुशलेन साधुना तथा प्रमार्जनीया यथाऽन्ये साधवो धूल्या न भ्रियन्ते यथा आचयस्योक्तमेव भिक्षोरपि द्रष्टव्यं, नवरं बहिर्वसतेः सागरिकस्तिष्ठति । ततश्चिरतरमपि कालं प्रतीक्षेत, यावच्चलः सागारिको व्यतिक्रामति यदि पुनर्भिक्षु वसतेर्बहिः सागारिकाभावेऽपि पादान् (अ) प्रस्फोट्य वसतेरन्तः प्रविशति तदा तस्य प्रायश्चित्तं मासलघु ।

[भा.२५२४] निगिज्झ पमज्जाही अभणंतस्सेव मासियं गुरुणो ।
पासरए खमगादी चोयगकज्जा गते दोसा ।।

वृ- यदि बहिः सागारिक इति कृत्वा वसतेरन्तः पादाः स्फोटयितव्याः । ततः सङ्कटायां वसतौ पादान् प्रमार्जयितुमुपस्थितं साधुमाचार्यो ब्रूते-आर्य निगृह्य पादान् प्रमार्जय । किमुक्तं भवति । तथा यतनया पादान् प्रमार्जय । यथा पादधूल्या न कोऽपि साधुर्भ्रियते । अथैवं न ब्रूते तत एवमभणतो गुरोः प्रायश्चित्तं मासलघु, । अथ पादरसा क्षपकादयः खरंट्येरन् । तथा च सति वक्ष्यमाणा दोषाः । अत्र चोदक आह-आचार्यः कस्माद्बहिर्गच्छति । सूरिराह-कार्यागते कार्येषु समापतितेष्वगते दोषास्तस्माद्गच्छति । अधुना पायरए खमगादी इत्येतद्व्याख्यानयति-

[भा.२५२५] तवसोसितो व खमगो इड्ढिमावुड्ढो कोधितो वावि ।
मा भंडण खमगा इति सुत्तनिगिज्झ जयणाए ।।

वृ- तपसा शोषितस्तपःशोषित क्षपकः तस्य त्वल्पेऽप्यपराधे द्वेषोजायते ततः स आचार्यपादप्रमार्जनधूल्या विकीर्णः कुपितो भवेत्कुपितश्च सन् भंडनं कृत्वा अन्यत्र गच्छेप्रविशेत् प्रतिभज्यते वा, अथवा कोपि ऋद्धिमान् वृद्धो राजादिः प्रव्रजितः सपादधूल्याऽवकीर्णोरुष्टः सन् भंडनादि कुर्यात्, कोधितो नाम शैक्षकः प्रव्रजितः सोपि रुष्टः प्रतिभज्येत तस्मात् क्षपकादि मा भंडनं कार्षीदिति सूत्रे निगिज्झ निगिज्झ निगिज्झेत्युक्तमस्याप्ययमर्थो यतनयेति ।।सम्प्रति चोयगे कज्जागते दोसा इति-

[भा.२५२६] थाणे कुप्पते खमगो किं चेव गुरुस्स निग्गमो भणितो ।
भणइ कुलगणकज्जे चेइयगमनं च पव्वेसु ।।

वृ- स्थाने कुप्यति क्षपकस्तथाहि स पादधूल्यावकीर्यते ततो मा कोपं कार्षीत् किंञ्चिद्गुरोराचार्यस्य निर्गमः । केन कारणेन भणितस्तत्कारणमेव नास्ति येन कारणेन बहिराचार्यय निर्गमनं, आचार्य आह-भण्यते-अत्रोत्तरं दीयते कुलकार्ये गणकार्ये उपलक्षणमेतत् । संघकार्ये च बहुविधे समापतिते तथा पर्वसु पाक्षिकादिषु चैत्यानां सर्वेषामपि नमनमवश्यं कर्तव्यमिति हेतोश्चाचार्यस्य वसतिर्बहिर्गमनं-

[भा.२५२७] जति एवं निग्गमणे भणाति तो वाहि चिट्ठिए पुच्छे ।
वुच्चति वहि अच्छंते वा चोयग गुरुणो इमे दोसा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- चोदको भणति-यदि एवं कुलादिकार्यनिमित्तमाचार्यस्य निर्गमनं ततो निर्गमने सति प्रत्यागतो यदि वसतेर्बहिः सागारिकस्ततो तावद्वहिस्तिष्ठतु, यावच्चलसागारिको व्युत्क्रान्तो भवति, । तत बहिरेव पादान् प्रस्फोट्य वसतेरन्तः प्रविशतु, । एवं च सति क्षपकादिदोषाः परित्यक्ता भवन्ति, । आचार्य आह उच्यते-उत्तरं भण्यते । हे चोदक गुरोराचार्यस्य वसतेर्बहिस्तिष्ठत इमे वक्ष्यमाणा बहवो दोषास्तानेवाह-

[भा.२५२८] तगहुण्हावि अभाविए वुड्ढा वा अच्छमाण पुच्छादी ।
विनए गिलाणमादी, साहु सन्नी पडिच्छंती ।।

वृ- कुलादिकार्येण निर्गते आचार्य उष्णेनाभाविते तृष्णा जायते । ततस्तृष्णाभिभूतो वसतिमागतो यदि बहिर्वसतेः प्रतीक्षते यावत्सागारिकोऽपगच्छति । तावत्तृष्णया उष्णेन आदिशब्दादनागाढा-गाढपरितापनापरिग्रहः पीडिते मूर्च्छा जायते आदिशब्दात् वसतिं प्रविष्टः सन् प्रचुरं पानीयमा-पिबतस्ततो भक्ताजीर्णतया ग्लानत्वं भवेदित्यादि परिग्रहस्तथा वृद्धा उपलक्षणमेतत् । बालशैक्षाऽ-सहादयश्चाचार्ये तिष्ठति प्रीतक्ष्यन्तेते च प्रतीक्ष्यमाणाः प्रथमद्वितीयपरीषहाभ्यां पीडिता मूर्च्छाद्याप्नुवन्ति तथा ग्लाना आदिशब्दात् क्षपकादिपरिहग्रहस्ते विनयेन प्रतीक्षमाणाः भोजन मकुर्वन्त औषधादिकं च गुरुणा विना अलभमाना गाढतरं ग्लात्वाद्याप्नुवन्ति । यथा साधवः केचित् प्राघूर्णका गन्तुमनसः तथा संज्ञिनः श्रावका अष्टम्यादिषु कृताभक्ताः पारणके भिक्षायामदत्तायां अपारयन्त आचार्या प्रतीक्ष्यमाणास्तिष्ठन्ति । तत्र साधूनां दिवसो गरीयान् चटति तत्र चोष्णादि परितापनादोषः, संज्ञिनां चान्तरायमित्येष गाथासंक्षेपार्थः । साम्प्रतमेनामेव विवरीषुः प्रथमतः तण्हुण्हादि भाविए इति ।

[भा.२५२९] तिण्हुण्हभावियस्स पडिस्समाणस्स पुच्छमादीया ।
खद्धादियणगिलाणे सुत्तत्थविराहधना चेव ।।

वृ- आचार्यःस्वरूपत उष्णेनाभावितः क्वचित् प्रयोजनवशतो वहिर्निर्गमनात् ततः कुलादिकार्येषु निर्गतस्तृष्णाभिभूतो वसतिमागतोऽपि यदि सागारिकमपगच्छन्तं यावत्प्रतीक्षते, ततः प्रतीक्षमाणस्य तृष्णया उष्णेन च तापितस्य मूर्च्छादयो भवन्ति । आदि शब्दादागाढादिपरितापनापरिग्रहस्तथा वसतिं प्रविष्टेऽतीव तृष्णाभिभूतः खद्दस्य चतुरस्य पानीयस्यादानं ग्रहणं कुर्यात्, । प्रचुरं पानीयं पिबेदित्यर्थः । ततो भक्ताणतया ग्लानो भवेत्, तस्मिंश्च ग्लाने सूत्रार्थपरिहानिर्विराधना च तस्याचार्यस्य स्यात् । ग्लानत्वेनाचार्यो म्रियेतेति भावः, । अथवा सूत्रार्थपरिहान्या अजानतां साधूनां ज्ञानादिविराधना स्यात्,। सूत्रार्थभावतोऽजानन्तेः साधवा ज्ञानादिविराधनां कुर्युरिति भावः । अधुना वुड्ढाचेति व्याख्यानार्थमाह-

[भा.२५३०] वुड्ढासाहुसेहादी खमगो वा पारणंमि भुक्खुत्तो ।
अच्छइ पडिच्छमाणो, न भुंजए लोइयमदिट्ठं ।।

वृ- वृद्धा वयोवृद्धा असहाः प्रथमद्वितीयपरीषहान् सोढुमसमर्थास्तथा शैक्षका आदिशब्दात् ग्लानाश्चाचार्य प्रतीक्षमाणास्तिष्ठन्ति, ते च तथा तिष्ठन्तस्तृडादिभिः पीडिता मूर्च्छाद्याप्नुवन्ति ग्लानस्य च गाढतरं ग्लानत्वमुपजायते, । यदि पुनरागतमात्र एव वसतौ प्रविशति, ततो यथायोगं वृद्धादिनामकालहीनं सम्पाद्यते इति, न कश्चिद्दोषः । अधुना विनये गिलाणादी इत्येतद्वयाख्यानयति-खमगो वा इत्यादि क्षपको वा कोऽपि विकृष्टेन तपसा क्लान्तो विनयेन पारणके बुभुक्षार्तः प्रतिक्ष्यमाणस्तिष्ठति । न पुन भुर्क्ते अद्यापि नालोचितमाचार्येण च न दृष्टमिति कृत्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२५३१] परितावा अंतराया दोसा हुंति अभुंजणे ।
भुंजणे अविणादीया दोसा तत्थ भवंति य ।।

वृ- एवं क्षपकस्य विकृष्टतपसा क्लान्तस्य प्रतीक्षणेनाभोजने महान् परितापो भवति, अन्तरायं चोपजायते । अथ भुङ्क्ते तर्हि भोजने तत्राविनयादयो ऽविनयः प्रतीत आदिशब्दाद दृष्टानालोचित-भोजने अदत्तादानदोषपरिग्रहो दोषा भवन्ति ग्लानमधिकृत्याह-

[भा.२५३२] गिलानस्सोसहादी उ न देंति गुरुणो विणा ।
ऊनाहियं व देज्जाहि, तस्स वेलातिगच्छति ।।

वृ- ग्लानस्यौषधादिकं साधवो गुरुणा विना न ददाति, आदिशब्दात् भोजनपरिग्रहः, यदि वा ऊनमधिकं वा दद्युस्तस्य च ग्लानस्याचार्यं प्रतीक्षमाणस्य वेला तिगच्छति सम्प्रति साधूसन्नी इति-

[भा.२५३३] पाहुणमागंतुमना वंदिय जो तेसि उण्हसंतावो ।
पारग पाडिच्छंते सड्ढे वा अंतरायं तु ।।

वृ- प्राघूर्णकाः केचित्साधव आगतास्ते गन्तुमनसस्ते यद्याचार्यमवन्दित्वा अनापृच्छया गच्छन्ति,। ततोऽविनयादयो दोषास्ततः प्रतीक्षमाणास्तिष्ठन्ति आचार्य श्चिरेण वसतिं प्रविष्टस्तावद्दिवस आसमन्तत्तसोऽभवत् ततो गुरुं वन्दित्वा व्रजतां य उष्णसन्तापस्तेषां स आचार्यनिमित्तकस्तथा श्राद्धेऽष्टम्यादिषु पर्वसु कृताभक्ते पानके आचार्यं प्रतीक्षमाणे अन्तरायं कृतं भवति । उपसंहारमाह-

[भा.२५३४] जम्हा एते दोसा तम्हा गुरुणा न चिठियव्वं तु ।
भिक्खूण चिट्ठियव्वं तस्स न किं दोस होंतेए ।।

वृ- यस्मादे दोषास्तस्मात् गुरुणा न वसेतर्बहिः स्थिरं स्थातव्यं, । भिक्षुणा पुनश्चिरमपि स्थातव्यं यावद्यलः सागारिकोऽपयाति ततो बहिः पादान् प्रमृज्यान्तर्वसतेः प्रवेष्टव्यम् । अत्र चोदक आह-तस्य भिक्षः किमेते अनन्तरोदिता दोषा न भवन्ति ? । आचार्य आह-

[भा.२५३५] अनेगबहुनिग्गमणे अब्भुट्ठण भाविया य हिंडंता ।
दसविहवेयावच्चे सग्गामे बहिं च वायामो ।।

[भा.२५३६] सी उण्ह सहाभिक्खु न य हानी वायणादिया तेसिं ।
गुरुणो पुन ते नत्थी तेन पमज्जंतो खेयन्नो ।।

वृ- अनेकैः कारणैः बहून् वारान् निर्गमनं बहुनिर्गमनं तस्मिन् तथा गुर्वादीनामभ्युत्थाने आसनप्रदानादौ च तथा भिक्षार्थं हिंडमाना भाविता व्यायामितशरीराः यदुक्तमनैकैः बहुवारं निर्गमनं, तत्र कारणान्याह दशविधवैयावृत्त्यनिमित्तं । स्वग्रामे बहिः परग्रामे ऽनेकवारमनेकधा व्यायामोऽभवत् । तथा शीतोष्णसहा भिक्षवो न च तेषां भिक्षूणां वाचनादिका वाचनादिविषया हानिर्गुरोः पुनस्तेऽनेकवारमनेकबहुनिर्गमनादयो न सन्ति । ततस्तृष्णाद्यध्यासितुमसहिष्णव आचार्या-वसते र्बहिः सांगारिके तिष्ठति लघुवसतेरन्तः प्रविशन्ति, । ततः खेदज्ञेन कुशलेन पादान् प्रमार्जयन्ति ।

[भा.२५३७] धुवकम्मियं व नाउं कज्जेणणेण वा अनतिपातिं ।
अव्वक्खित्ताउत्तं न उदिक्खति बाहिभिक्खूवि ।।

वृ- वसतेर्बहिः सागारिकं ध्रुवकमिकं वा लोहकारादिकमन्येन वा कार्येणान्यमपि सागारिक-मनतिपातितमगच्छन्तं तथा अव्याक्षिप्तमायुक्तं च ज्ञात्वा भिक्षुरपि बहिर्नोदीक्षते न प्रतीक्षते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किन्तु वसतिं प्रविश्यात्मीय अवकाशे यतनयात्मनः पादौ प्रमार्जयेत् । प्रथमोऽतिशयो गतः ।

[भा.२५३८]　　बहिगमने चउगुरुगा आणादी वाणिएय मिच्छत्तं ।
पडियरणमनाभोगे खरिमुहमरुए तिरिक्खादी ॥

वृ- आचार्यो यदि विचारभूमिं बहिर्गच्छति ततः प्रायश्चित्तं चत्वारो गुरुका आज्ञादयश्च दोषाः, । तथा वाणिएय मिच्छत्तमिति वणिजि अभ्युत्थानं पूर्वं कृतं भवति पश्चादकुर्वति केषांचिन्मिथ्यात्वमुपजायते । इयमत्र भावना आचार्यं संज्ञाभूमिं व्रजन्तं ततः प्रत्यागच्छन्तं च दृष्ट्वा वणिजो निजनिजापणे स्थिता अभ्युत्थानं कृतवन्तस्तं च तथा वणिज्ञां बहुमानेनाभ्युत्थानं दृष्ट्वा केचिदन्ये मन्यन्ते गुणवानेष आचार्यो येन वणिज्ञ एवमनेमभ्युपतिष्ठन्ति । तस्मादस्माकमपि पूज्य इति तेऽपि पूजयन्ति यदा त्वाचार्यः कदाचित् द्वौ वारौ संज्ञाभूमिं व्रजति तदा चतुरो वारान् गमने प्रत्यागमने चोत्थातव्यम् । ते चालस्यं मन्यमाना अभ्युत्थातव्यं भविष्यतीति कृत्वा आचार्यं दृष्ट्वाऽन्यतो मुखं कुर्वन्ति । तांश्च तथा कुर्वतो दृष्ट्वा अन्ये चिन्तयन्ति । नूनमेष प्रमादी जातो ज्ञातोऽपि गुणवानपि यदीदृशः पतति तर्हि न किञ्चिदिति ते मिथ्यात्वं गच्छन्ति । तथा आचार्यं लोकेन पूज्यमानं दृष्ट्वा मरुके बाह्मणस्य मारणबुद्धया प्रतिचरणं भवति । ततः संज्ञाभूमिं गतं विजने प्रदेशे मारयेत् । तथा खरमुखीं नपुंसकी दासीं वा प्रापयित्वा उड्डाहं कुर्यात् । अनाभोगेन वा वनगहने प्रविष्टे तिर्यगादौ च गर्दभ्यादौ कुलटादौ च प्रविष्टायामात्मपरोभयसमुत्थां दोषा एष गाथासंक्षेपार्थः ॥ सम्प्रति वाणिए य मिच्छत्तमित्येतद्विभावंयिपुराह-

[भा.२५३९]　　सुयवंतंमि परिवारवं च वणियंतरावनुट्ठाणे ।
दुट्ठाणनिग्गिमंमि य हाणी य परमुहावणा ॥

वृ- संज्ञाभूमिं व्रजति ततः प्रत्यागच्छति वा तस्मिंचार्ये श्रुतवानेष परिवारवांश्चेति मन्यमाना अन्तरा निजनिजापणेषु स्थिता वणिजोऽभ्युत्थानं कृतवन्तः । तेषां चोत्थाने लोकस्य च भूयान् बहुमान आसीत्। कदाचिदाचार्यो द्वौ वारौ संज्ञाभूमिं व्रजेत् ततो द्विस्थाननिर्गमने चतुरो वारान् गच्छति प्रत्यागच्छति चोत्थातव्यं ततस्ते आलस्यं मन्यमाना अभ्त्थानस्य हानिं कुर्वन्ति । ते च हानिमभ्युत्थानस्य चिकीर्षवोऽभ्युत्थातव्यं भविष्यतीति कृत्वा तमाचार्यं दृष्ट्वा परमुखा भवन्ति । अन्यतो मुखं कुर्वन्तीति भावः । अथवा अवर्णः स्यात्तथाहि द्वौ वारौ संज्ञाभूमिं व्रजन्तमाचार्यं दृष्ट्वा ते वदन्ति । नूनमेष आचार्यो द्वौ त्रीन् वारान् समुद्दिशति तेन द्वौ वारौ संज्ञाभूमिं याति ॥

[भा.२५४०]　　गुणवं तु जतो वणिया पूयं तन्नेव सन्नया तंमि ।
पडियत्ति अनुठाणे दुविहनियत्ती अभिमुहाणं ॥

वृ- वणिजां बहुमानेनाभ्युत्थानं दृष्ट्वा केचिदन्ये चिन्तयन्ति । गुणवानाचार्यो यतो वणिजः पूजयन्ति। एवं चिन्तयित्वा तेऽप्यन्ये तस्मिन्नाचार्ये सन्नता भवन्ति । वारद्वयं संज्ञाभूमिगमने वणिजामनुत्थाने ते चिन्तयन्ति । नूनमेष आचार्यः पतितः । कथमन्यथा वणिजः पूर्वमभ्युत्थानं कृतवन्तो नेदानीं कुर्वन्ति, तथा च सति तेषामभिमुखाणां द्विविधा निवृत्तिस्तथा ये श्रावकत्वं गृहीतुकामा ये च तस्य समीपे प्रव्रजितुकामास्ते चिन्तयंति ।यद्येषोपि प्रधानो ज्ञात्वा कुशीलत्वं प्रतिपद्यते तर्हि नूनं सर्वं जिनवचनमसारमिति मन्यमानाः श्रावकत्वात् व्रतग्रहणाद्वा प्रतिनिवर्तन्ते मिथ्यात्वं गच्छन्ति । सम्प्रति पडियरणमणाभोगे इत्यादि व्याख्यानमाह-

[भा.२५४१]　　आउज्जोत्तिवलोगे पडियरिउच्छिन्ने मारुए मरुगो ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

खरियमुह संढगं वा लोभेउ तिरिक्खसंगहणं ।।

वृ- गुणवानाचार्य इति कृत्वा सर्वो लोक आचार्यस्यावृत्तोऽभवत् प्रणतोऽभूत्धिग्जातीयानां च केषाञ्चित् पापीयसां तथा पूजामाचार्यस्य दृष्ट्वा महामत्सरस्ततो मात्सर्येण संज्ञाभूमिगतमाचार्यं प्रतिचर्य च्छन्ने प्रदेश मरुको ब्राह्मणः कोऽपि जीवितादृध्यपरोप्य गर्तादिषु प्रच्छन्ने प्रदेशे स्थगयेत् । तथा खरिकामुखीं दासीं नपुंसकं वा प्रलोभ्य तत्र प्रेष्य संग्रहं कुर्यात् । तथा मैथुनमेष सेवमानो गृहीतस्ततः उड्डाहः स्यात्तथाऽनाभोगेनाचार्यो वनादि गुपिलमवकाशं संज्ञाव्युत्सर्जनाय प्रविष्टः स्यात्तत्र च तिरिक्खत्ति तिर्यग्योनिका गर्दभ्यादिका पूर्वगता पश्चाद्वा प्रविष्टा भवेत् । तां च केचित्प्रत्यनीका दृष्ट्वा उड्डाहं कुर्युः । मूलगाथायां यदुक्तं तिरिक्खादीति । तत्रादिशब्दव्याख्यानार्थमाह-

[भा. २५४२] आदिग्गहणाउब्भामिगा व तहा अन्नतित्थिगा वावि ।
अहवा वि अन्नदोसा हवंति सेवादिमादीया ।।

वृ- आदिग्रहणात् उद्भामिका कुलटा तथाअन्यतीर्थिकी वा परिगृह्यते । सा तस्मिन् गहने पूर्वगता पश्चाद्वा प्रविष्टा भवेत् । तऊवात्मपरोभयसमुत्था दोषाः संग्रहणादयश्च प्रागुक्ताः । अथवा इमे वक्ष्यमाणा अन्ये वाद्यादयो दोषा भवन्ति तानेव संजिघृक्षुर्द्वारगाथामाह-

[भा.२५४३] वादी दंडियमादी सुत्तत्थाणं व गच्छपरिहानी ।
आवस्सगदिट्ठंतो कुमार अकरेंते करेंतेय ।।

वृ- वादि दण्डिकादयो वादिदण्डिकादिविषया बहवो दोषास्तथा सूत्रार्थानां गच्छस्य च परिहानिः । अथवा सूत्रार्थानां परिहानिर्गच्छे च ज्ञानादीनां परिहानिस्तथा आवश्यकं उच्चारावश्यकं कुवन् अकुर्वश्च कुमारो दृष्टान्तः एष द्वारगाथासंक्षेपार्थः ।। साम्प्रतमेनामेव विवरीषुः प्रथमतो वादिद्वारमाह-

[भा.२५४४] सन्नागतोत्ति सिट्ठे भयातिसारोत्ति बेति परिवादी ।
मा होहिरिसिवज्झा वच्चामि अलं विवाएण ।।

वृ- कोऽपि परप्रवादी बहुश्रुतमाचार्यं लोकपूजितं श्रुत्वा तेन समं वादं करिष्यामीत्यागतो भवेत् । आचार्यश्चसंज्ञाभूमिं तदा गतस्तेन चागतेन वसतौ पृष्टंक्व आचार्याः ? साधुभिः कथितमाचार्याः संज्ञाभूमिं गताः एवं श्रुत्वा स परप्रवादी ब्रूयात् स मम भयेन पलायित्तो यदि वा मम भयेनात्तसारो जातः । अथवा मा भविष्यत्येषां हत्येति व्रजामि अलं पर्याप्तं विवादेन । अधुना दंडियमादिति व्याख्यानयति-

[भा.२५४५] चंदगवेज्झासरिसं आगमनं रायइड्ढिमंताणं ।
पव्वज्जसागभड्ड इच्चादिगुणाण परिहानी ।।

वृ- यथा इन्द्रपुरे इन्द्रदत्तस्स राज्ञः सुतेन कथमपि पुत्तलिकाक्षिचन्द्रकस्य वेधः कृतस्तत् सदृशं राज्ञऋद्धिमतां वान्येषामाचार्यसमीपे आगमनं आचार्ये च संज्ञाभूमिं गते दण्डिकादिरागतो भवेत् । ततः संज्ञाभूमिं गतश्चाचार्य इति श्रुत्वा प्रतिवर्तते यदि पुनः संज्ञाभूमिं न गता आचार्या भवेयुस्ततो धर्मं श्रुत्वा कदाचित्ते प्रव्रज्यां गृह्णीयुः । प्रव्रजितेषु च राजादिषु महती प्रवचनप्रभावना तथा श्रावकत्वं केचित्कदाचित्प्रतिपद्येरन् । यथा भद्रका वा भवेयुस्तथा च चैत्यसाधूनां महानुपग्रहः । संज्ञाभूमिगमने चैतेषां गुणानां हानिः । सम्प्रत सुत्तत्थाणं च गच्छे परिहाणी इत्येतद्व्याख्यानार्थमाह-

[भा.२५४६] सुत्तत्थे परिहानी वीयारं गंतु जा पुनो एइ ।
तत्थेव य वोसरणे सुत्तत्थेसुं न सीयंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- विचारं विचारभूमिं गत्वा यावत् तावत्सूत्रार्थपरिहानिः । इयमत्र भावना-संज्ञाभूमिर्दूरे भवेत्सूत्रपौरुष्यामर्थपौरुष्यां चार्धकृतायां आचार्यः संज्ञावान् जातस्ततो गतः संज्ञाभूमिं ततः उद्घाटायां पौरुष्यामर्धपौरुष्यां कालवेलायां समागतस्ततः सूत्रार्थपरिहानिः । तदभावाच्च शिष्याः प्रतीच्छिकाश्चान्यं गणं व्रजन्ति, ततो गच्छस्यापि परिहानिस्तत्रैव पुनरुपाश्रये संज्ञाया व्युत्सर्जने सूत्रार्थेषु साधवो न सीदन्ति । अत्र चावश्यकं कुर्वन्नकुर्वन् कुमारो दृष्टान्तस्तमेव भावयति-

[भा.२५४७] तीरगए ववहारे खीरगते होंति तदिह उट्ठाणे ।
कोसस्स हानि परचमुपेल्लण रजस्स अपसत्थे ।।

वृ- कुमारस्यास्थाने समुपविष्टस्यार्थिनः प्रत्यर्थिनश्च व्यवहारेणोपस्थितास्तेषां चोत्तरोत्तरेण व्यवहरतां व्यवहारस्तीरं गतः, । परं नाद्यापि समाप्तिमुपयाति । तस्मिंश्चासमाप्ते व्यवहारे सति राजकुमारः संज्ञावान् जातस्तत उत्थाय संज्ञाभूमिं गतः । स च यावन्नायाति तावदर्थिनः प्रत्यर्थिनश्च क्षीरोदक-संयोगादिवदेकीभूतास्ततो राजकुमारस्य प्रत्यागतस्य ते ब्रुवते वयं परस्परं सुस्थीभूताः । एवं सदा कुर्वन् समस्तादपि लक्षादिप्रमाणान् दण्डाय पदात्परिभ्रष्टस्ततः कोशस्य हानिर्जाता । तां च ज्ञात्वा परचमूः परबलमागतं तया च राज्यस्य प्रेरणमेषोऽप्रशस्ते दृष्टान्तः । प्रथस्ते पुनर्दृष्टान्तः स्वयं भावनीयः। स चायं-प्रथमत एवावश्यकमुच्चारादेः कृत्वा आस्थाने समुपविशति उपविष्टो यदि संज्ञावान् भवति । ततः प्रच्छन्ने प्रदेशे व्युत्सृजति । एवं तस्य कुर्वतः प्रभूतं प्रभूततरं दण्डाय पदं जातं । तथा च सति कोशस्यमही वृद्धिस्ततः परबलस्य प्रेरणं राज्यान्तरसंग्रहः । एष दृष्टान्तोऽयमर्थोपनयः । य आचार्यो बहिः संज्ञाभूमिं व्रजति, तस्य प्रागुक्तप्रकारेण सूत्रार्थपरिहानिस्तत्परिहान्या गच्छस्यापि परिहानिः शिष्याणां प्रातीच्छिकानां चान्यत्र गणान्तरे गमनात् । यस्तु तत्रैवोपाश्रये व्युत्सृजति तस्य न किञ्चिदपि परिहीयते इति सर्वं सुस्थं । एतदेवाह-

[भा.२५४८] वेलं सुत्तत्थाणं न भंजए दंडियादिकहणं वा ।
पच्छण्णअमयकोसे पुच्छा पुन साहणा विनए ।।

वृ- यथा बहिर्निगन्तव्यमेवं ग्रामादीनामन्तरेऽपि सूत्रार्थानामपरिहानिनिमित्तं दण्डिकादीनामागतानां धर्मकथाया अविघ्ननिमित्तं च संज्ञा व्युत्सृजनाय न गन्तव्यं किन्तूपाश्रस्यान्तर्व्युत्सृजनीयम् । येन सूत्रार्थ वेलायां न भनक्ति । नापि दण्डिकादीनामागतनां धर्मकथनं विघ्नयति । पूर्वमेव चोपयोगः कर्तव्यः । किं मम संज्ञा भवेन्न वा तत्र यदि शङ्का तदा कृतावश्यकेन सुत्रपौरुष्यामर्थपौरुष्यां च सूत्रार्थ-प्रदानायोवेष्टव्यम् । तत्रापि न तावदासितव्यं यावदवश्यमुत्थेयं भवति । किन्त्वग्रे अत्रार्थे निदर्शनमेक आचार्य आवश्यकं शोधयित्वा तिष्ठति, । दण्डिकश्च धर्मश्रवणार्थमागत आचार्येण धर्मकथा प्रारब्धा। स च धर्मकथाक्षिप्तो राजकुमारो धर्मं शृण्वन्नभीक्ष्णमभीक्ष्णं कायिकी व्युत्सृजनायोत्तिष्ठति । आचार्यस्य च प्रच्छन्नो भृतकोशः समर्प्यते । प्रच्छन्नं कायिकी मात्रकं साधवः समर्पयन्ति । तत्र कायिकीः व्युत्सृजति । ततो विनये लोकोत्तरिके बलवति गङ्गः पृच्छा आचार्यस्य कथनमेतदेव विभावयिषुरिदमाह-

[भा.२५४९] निद्धाहारो वि अहं असइं उठेमि न 'स' कहयंतो ।
पासगतो मन्ने मत्तं तत्थंतरिय पणामेइ ।।

वृ- राजा चिन्तयति ममास्ति स्निग्ध आहारस्तथापि कायिकी व्युत्सर्गाय पुनः पुनुत्तिष्ठामि । आचार्यस्तु कथयन् रुक्षाहरोऽपि कायिकी व्युत्सर्गाय नोत्तिष्ठति नूनं मन्ये य एष आचार्यस्य पार्श्वे स्थितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षुल्लकः स ततू कायिकी मात्रं प्रच्छन्नं वस्त्रान्तरितं प्रणयति समर्पयति । तत्र कायिकीमाचार्यो व्युत्सृजति। एतच्च यदि पृच्छयते तर्ह्यविनयः कृतो भवति तस्मादुपायेन पृच्छामीति विचिन्त्येदं पृच्छति-

[भा.२५५०] विनओ उत्तरिओत्ति य वलितो गंगाकतो मुही वहति ।
पुव्वमुही अचलंतो भणति निवं आगितिजुत्तोवि ।।

वृ- राजा सूरिमापृच्छति-भगवन् । किं लौकिको विनयो बलीयान् अथ लोकोत्तरिकः । आचार्येणोक्तमयमर्थः परीक्ष्यतां परमेवं ज्ञायते । लोकोत्तरिको विनयो बलीयान् । तत्र परीक्षा कर्तुमारब्धा । आचार्येणोक्तं यस्तव दृष्टप्रत्ययोऽयं चाकृत्या त्वं जानासि न एष विनयभ्रंशी तं प्रेषय, यथा कुतोमुखी गंगा वहतीति ज्ञात्वा निवेदय । ततो राजा य आकृतिमान् यश्च दृष्टप्रत्ययस्तं प्रेषयति व्रज कुतोमुखी गङ्गा वहति । सोऽचलन् तत्रैव स्थितो नृपं भणति-यथा पूर्वाभिमुखी गङ्गा वहति लोकोऽप्यन्य एतत् जानाति । तत आचार्यो ब्रूते । मम शिष्यानां मध्ये यं त्वं विषमकरचरण-नाशादिभिर्विषमं जानासि । उक्तं च -

विषमसमैर्विषमसमा विषमैर्विषमाः समैः समाचाराः ।
करचरणवदननाशाकर्णोष्ठनिरीक्षणैः पुरुषाः ।।

विषमत्वाच्च विषम एव विनयभ्रंशं करिष्यतीति तं प्रेषयः ।।

[भा.२५५१] रन्ना पयंसितो एस अविनीयदंसणो समणो ।
पच्चागय उस्सग्गं, काउं आलोयए गुरुणो ।।

वृ- एवमाचार्येणोक्ते राज्ञा यो विषमकरचरणादिना अविनीतदर्शनः श्रमणः स प्रदर्शित एषः व्रजतु कया दिशा गङ्गा वहतीति आचार्येण स प्रेषितः स आचार्यानापृच्छय तत्र गत्वा ततः प्रत्यागत्य ऐर्यापथिक्या कायोत्सर्गं कृत्वा गुरोः पुरत आलोचयति । कथमित्याह-

[भा.२५५२] आदिच्चदिसालोयणतरंगतणमाइयाय पुव्वमुही ।
मा होज्ज दिसामोहो पुट्ठोवि जणो तहेवाह ।।

वृ- भगवन् युष्मत्पादानापृच्छ्याहं गङ्गातटं गतस्तत्र च गत्वा सूर्यं निर्ध्यातवानु यतः आदित्याद् दिग्विभागः सम्यक् ज्ञायते । एवमादित्यदिगालोचनं कृतं । तथा तरंगैस्तृणादीनि पूर्वाभिमुखाण्युह्यमानानि; तत्र कदाचिद् दिग्मोहोऽपि स्यात्ततो मा भूद्दिग्मोह इत्यन्योऽपि जनस्त्रिःसंख्याकः पृष्टः सोऽपि तथैवाह । यथा पूर्वाभिमुखी गंगा वहतीति । एतच्च राज्ञा प्रत्ययिकप्रच्छन्नपुरुषैः परिभावोऽपि, तं तैरपि तथैव कथितं । ततो राजा प्राह-

[भा.२५५३] वहबंधच्छेयमारणनिविव्सयधणवहारलोगम्मि ।
भवदंडो उत्तरितो उच्छहमानस्स तो बलितो ।।

वृ- लोके योऽस्माकमाज्ञां भनक्ति तस्य वधं लकुटादिप्रहारैस्ताडनं, बन्धं निगडादिभिश्छेदं कर्णच्छेदादिकं केषांचित् मारणविनाशनमपरेषां निर्विषयकरणमन्येषां धनापहारं कुर्मः । तथा केचिदस्माकमाज्ञां भञ्जन्ति, लोकोत्तरेषु पुनराज्ञां भञ्जतामेतानि भयानि [न] सन्ति तथापि परेण प्रयत्नेन लोकोत्तरिका आज्ञां कुर्वन्ति । तत्किं कारणमाचार्यमाह-भवदण्डो इत्यादि । पश्चार्धं यस्तीर्थकरगणधरादीनामाज्ञां भनक्ति तस्य परभवे हस्तच्छेदनादीनि भवंति । एष लोकोत्तरे भवदण्डः अस्माद्भीतस्य साधोरुत्सहमानस्य स्वशक्त्यनिगूहस्यनिगूहनेनोद्यमं कुर्वतो विनयो बलीयान् । एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकोत्तरिको विनयो बलिकः । अत्रैवापवादमाह-

[भा.२५५४] बितियपयं असतीए अन्नाए उवस्सय व सागारो ।
न पवत्तति संते वी जे य समत्था समं तेहिं ।।

[भा.२५५५] कुप्पहादीनिग्गमणं नातिगभीरे अपच्चवायंमि ।
वोसरियं मि य गुरुणा निसिरंति महंतदण्डधरा ।।

वृ- द्वितीयपदमपवादपदमधिकृत्य संज्ञाभूमिमाचार्यो व्रजेत् । तदेव द्वितीयपदमाह-उपाश्रयश्च पश्चात्कृते संज्ञाभूमिर्नास्ति । ततस्तस्या असति बहिर्व्रजेत् । अन्नाएत्ति यत्र न ज्ञायते । एष आचार्यस्तत्रापि बहिर्व्रजेत् । अथवा उपाश्रये सागारिको विद्यते ततो बहिर्याति, कस्यापि पुनरुपाश्रयस्य पश्चात्कृते विद्यमानेऽपि संज्ञा न प्रवर्तते सोऽपि बहिर्याति । एतैः कारणैर्बहिर्गमने जाते ये समर्थास्तरुणाः साधवः तैः समं याति । तत्र यानि कुपथादीनि कुरथ्यादीनि तैर्गन्तव्यं तैर्गच्छतोऽपि प्रायः पूर्वोक्ता दोषा न भवन्ति, ।तत्रापि यन्नातिगंभीरं नातिविषमप्रत्यवायं प्रत्यवायविरहितं तत्राचार्यः संज्ञां व्युत्सृजति येषां च सहायानां हस्ते महान्तो दण्डकास्ते महादण्डधराश्चतसृष्वपि दिक्षु संरक्षणपरायणास्तिष्ठिन्ति । व्युत्सृष्टे च गुरुणा पुरीषे ते महादण्डधरा वनस्तरन्ति कस्मादेवं रक्षा क्रियते इति चेत् कुलस्य तदायत्तत्वात् । उक्तं च जंमि कुलं आयत्तं तं पुरिसं आयरेण रक्खाहि ।। इत्यादि कथं पुनः स रक्षितव्य-

[भा.२५५६] जह राया तोसलिओ मणिपडिमा रक्खए पयत्तेण ।
तह होइ रक्खियव्वो सिरिधरसरिसो उ आयरितो ।।

वृ- यथा राजा तौसलिको मणिप्रतिमे च प्रयत्नेन रक्षति तथा भवत्याचार्यो रक्षितव्यो यतः श्रीगृहसदृश एष आचार्य अथ के ते प्रतिमे इत्यत आह-

[भा.२५५७] पडिमुप्पत्ती वणिए उदही उप्पातो उ वायणं भीतो ।
रयणदुगे जिनपडिमा करेमि जइ उत्तरे विग्घं ।।

[भा.२५५८] उप्पाउवसमउत्तरणमविग्घं एक्कपडिमकरणं वा ।
देवयच्छंदेन ततो जाया बितीए वि पडिमातो ।।

वृ- प्रतिमायारुत्पत्तिर्वक्तव्या सा चैवमेकस्य वणिज समुद्रं प्रवहणेनावगाढस्योत्पात उपस्थितस्ततः स वणिक् भीतः सन् औपयाचितिकं करोति । यथा यदेतदौत्पादिकमुपशाम्यति अविघ्नेनोत्तरामि च ततोऽनयोर्द्वयोर्मणिरत्नयोर्द्धे मणिमय्यौ जिनप्रतिमे कारयिष्यामि । एवमौपयाचितिके कृते देवतानुभावेनोत्पातिकमुपशान्तमविध्नं समुद्रोत्तरणमभूत् । स चोत्तीर्णः सन् लोभेन एकस्मिन्मणिरत्ने एकां जिनप्रतिमां कारयति । ततो देवतया द्वितीयेपि मणिरत्ने द्वितीया जिनप्रतिमा कारिता । तथा चाह-देवताच्छन्देन ततो जाता द्वितीयेऽपि मणिरत्नप्रतिमा ।।

[भा.२५५९] तो भत्तीए वणितो सुस्ससइ ता परेण जत्तेणं ।
ता दीवएणपडिमा, दीसंति हरा उ रयणाइं ।।

वृ- ततः प्रतिमाद्वयकारापणानन्तरं ते प्रतिमे वणिग् भक्त्या परेण यत्नेन शुश्रूषते । ततस्तयोश्च प्रतिमयोरिदं प्रातिहार्यं ते प्रतिमे यावद्दीपकः पार्श्वे ध्रियते तावद्दीपकेन हेतुना प्रतिमे दृश्येते । इतरथा दीपकाभावे सप्रकाशेऽपि प्रकाशे मणिरत्ने दृश्येते ।।

[भा.२५६०] सोऊण पाडिहेरं राया घेत्तूण सिरिहरे छुहति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मंगलभत्तीए ततो पूएति परेण जत्तेण ।।

वृ- इदमनन्तरोदितं प्रातिहार्यं राजा तौसलिकः श्रुत्वा ते प्रतिमे स्वयमेवात्मीयश्रीगृहके भाण्डागारे क्षिपति मुञ्चति । ततो मङ्गलबुद्ध्या भक्त्या च परेण पूजयति । यस्मिंश्च दिवसे ते प्रतिमे श्रीगृहमानीते ततः प्रभृति राज्ञः कोशादिषु वृद्धिरुपजाता । आह-श्रीगृहसदृश आचार्य इत्युक्तं तत एवं दृष्टान्तभावना कृता उच्यते-

[भा.२५६१] मंगलभत्ती अहिया उप्पज्जइ तारिसंमि दव्वंमि ।
रयणग्गहणं तेनं रयणब्भूते तहायरीतो ।।

वृ- श्रीगृहे द्रविणं रक्षणीयं मणिमयप्रतिमयोः पुनर्द्रविणमप्यतिप्रभूतमस्ति मङ्गलबुद्धिश्च तत्रापि परमतीर्थकरभक्तिश्चेति प्रयत्नेन रक्षणे त्रीणि कारणानि । तथा चाह-मङ्गलं मङ्गलबुद्धिर्भक्तिश्चाधिका तादृशे द्रव्ये समुत्पद्यते ततो रत्नग्रहणं यथा ते रत्नप्रतिमे कारणत्रयवशाद्विशिष्टेन प्रयत्नेन रक्ष्येते शुभ्ष्येते च तथा शिष्यैराचार्यः प्रयत्नेन रक्षणीयः शुश्रूषणीयश्च । अथैवमाचार्ये रक्षिते शुश्रूषिते च को गुण इत्यत आह ।

[भा.२५६२] पूयंति य रक्खंति य सीसा सव्वे गणिं सया पयया ।
इह परलोए य गुणा हवंति तप्पूयणे जम्हा ।।

वृ- गणिनमाचार्यं शिष्याः सर्वे सदा प्रयताःप्रयत्नपराःपूजयन्ति शुश्रूषन्ते च यस्मात्तत्पूजने आचार्यपूजने इहलोके परलोके च गुणा भवन्ति । इहलोके सूत्रार्थतदुभयानि परलोके सूत्रार्थाभ्यामधी-ताभ्यां ज्ञानादिमोक्षमार्गप्रसाधनं अथवा पारलौकिकागुणा आयरिए वेयावच्चं करेमाने महानिज्जरे महापज्जवसाणे भवति । इत्येवमादयः गतो द्वितीयोऽतिशयः । सम्प्रति तृतीयं इच्छापहूवेयावडियं -कारेज्जा इत्येवं रुपमतिशयमभिधित्सुराह-

[भा.२५६३] जेनाहारो उ गणी स बालवुड्ढस्स होइ गच्छस्स ।
तो अतिसेसपभुत्तं इमेहिं दारेहिं तस्स भवे ।।

वृ- येन कारणेन गणी आचार्यः स बालवृद्धस्य गच्छस्याधारस्ततस्तस्य भवत्यतिशेषप्रभुत्वं अतिशायिप्रभुत्वं तच्चैभिर्वक्ष्यमाणैर्द्वारैरवगन्तव्यम् ।।

[भा.२५६४] तित्थयरपवयणे निज्जराय सावेक्खभत्तवोच्छेदो ।
एएहिं कारणेहिं अतिसेसा होंति आयरिए ।।

वृ- आचार्यस्तीर्थकरानुकारी तथा सूत्रतोऽर्थतश्चाधीती प्रवचने तथा तस्य वैयावृत्त्यकरणे महती निर्जरा भवति, । तथा शिष्याः प्रातीच्छिकाश्चात्मानुग्रहबुद्ध्या सुरेर्वैयावृत्त्यं कुर्वन्तः सापेक्षा भवन्ति, । सापेक्षाणां च भूयान् ज्ञानादिलाभो महती निर्जरा इतरे त्वकुर्वन्तो निरपेक्षास्तेषांस महान् संसार-स्तथा भक्तावाचार्यस्य क्रियमाणायां सकलस्यापि गच्छस्यानुग्रहकरणात्तीर्थस्याव्यवच्छेदः कृतो भवति । एतैः कारणैराचार्यस्य सूत्रोक्ता अतिशेषा भवन्त्यन्ये वक्ष्यमाणा इति द्वारगाथासंक्षेपार्थः ।।

[भा.२५६५] देविंदचक्कवट्टी मंडलिया ईसरा तलवरा य ।
अभिगच्छंति जिणंदे तो गोयरियं न हिंडंति ।।

वृ- जिनेन्द्रान् भगवत उत्पन्ने ज्ञाने देवेन्द्राः शक्रप्रभृतयश्चवर्तिन उपलक्षणमेतत् यथायोगं वासुदेवा बलभद्राश्च तथा मण्डलिकाः कतिपयमण्डलप्रभव ईश्वरास्तलवराश्चाभिगच्छन्ति ततस्ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोचरचर्या न हिंडंते ।।

[भा.२५६६] संखादीया कोडी सुराण निच्चं जिणे उवासंति ।
संसयवागरणाणि य मणसा वयसा च पुच्छंते ।।

वृ-संख्यातीताः सुराणां कोट्यो नित्यं सर्वकालं जिनान् तीर्थकृत उपासते । तथा सततं वचसा च पृच्छति सुरादिके मनसा वचसा च संशयव्याकरणानि करोति । ततो भिक्षां न हिण्डन्ते ।

[भा.२५६७] उप्पननाणा जह नो अडंती चोत्तीसबुद्धातिसया जिणिंदा ।
एवं गणी अट्ठगुणोववेतो सत्था व नो हिंडइ इड्ढिमं तु ।।

वृ- यथा उत्पन्ने ज्ञाने जिनेन्द्राश्चतुस्त्रिंशत् बुद्धातिशयाः सर्वज्ञातिशया देहसौगन्धादयो येषां ते यथा भिक्षां न हिण्डंते । एवं तीर्थकरदृष्टान्तेन गणी आचार्योऽष्टगुणोपेतोऽष्टविधगणिसम्पदुपेतः शास्ता इव तीर्थकर इव ऋद्धिमान् न हिण्डते ।।

[भा.२५६८] गुरू हिंडणंमि गुरुगा वसभे लहुयाऽनिवारयतस्स ।
गीतागीते गुरूलहु आणातया बहुदोसा ।।

वृ- आचार्य भिक्षामहामीति व्यवसितं यदि वृषभो न निवारयति तथा तस्यानिवारयतः प्रायश्चित्तं चत्वारो लघुकाः । अथ वृषभेवा निवारितोऽपि न तिष्ठति तर्हि वृषभः शुद्ध आचार्यस्य प्रायश्चित्तं चत्वारो गुरूकाः तथा गीतार्थो भिक्षुश्चेन्न गमने प्रत्येकं चतुर्गुरू आज्ञादयश्च दोषा इमे च वक्ष्यमाणा बहवो दोषास्तानेवाह-

[भा.२५६९] वाते पित्ते गणालोए कायकिलेसे अचिंतया मेढी ।
अकारगे वाले गणचिंता वा इड्ढिणो ।।

वृ- भिक्षामटतो वातो वातप्रकोपो भवति । तथा अत्युष्णरितापनात् पित्तमुद्रिक्तीभवति तथा गणस्य गच्छस्य भिक्षाटनपरिश्रमत आलोकः कर्त्तव्यो न भवति, तथा भिक्षाटने कायक्लेशो भवति तस्माच्च सूत्रार्थपरिहानिस्तथा सूत्रार्थयोरचिन्ता भवति । तथा मेढीभूत आचार्यस्तस्मिन् भिक्षामटति शिष्याणामात्मद्वारभावतः प्राघूर्णकादीनां वात्सल्यकरणाभावः, तथा अकारकं चेत् द्रव्य लभते तस्यभोजने ग्लानत्वमभोजने परिस्थापनिकादोषः । तथा भिमटतो व्यालश्चादिरुपतिष्ठति तत्र चात्मविराधना तथा भिक्षाटने दोषा एष द्वारगाथासंक्षेपार्थः । साम्प्रतमेनामेव विवरीषुराह-

[भा.२५७०] भारेण वेयणाए हिंडंते उच्चनीयसासो वा ।
बाहुकडिवायगहणं विसमाकारेण सूलं वा ।।

वृ- भारेण भक्तभृतभाजनभरेण वेदना भवति । तथा कोऽपि ग्रामो गिरौ निविष्टो भवेत् । तत्र च कानिचित् गृहाण्युच्चस्थाने कानिचित् नीचस्थाने तानि भारेण वेदनायां सत्यां हिण्डमानस्य श्वासो भवति । तथा बाहोः कटेश्च वातेन ग्रहणं भवति, तथा ग्रामे विषमाकारेण व्यवस्थिते यत्र तत्र वा तिर्यक् शरीरं कृत्वा गच्छतः शूलं वा भवेत् ।।

[भा.२५७१] अच्चुण्हतावितोन्नखद्धदवावियणे च्छड्डुणाईया ।
अप्पियणे असमाही गेलन्ने सुत्तभंगादी ।।

वृ- तथा अत्युष्णेन परिपितः सन् खद्धं प्रचुरद्रवं पानीयमतितृषित आददीतः । तथा समुद्दिष्टोऽपि तथा परितापभावतः पुनः पुनः पानीयमामपिबेत् । तथा चाहारः पानीयेन प्लावितः सन् न जीर्येत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अजरणाच्च च्छर्दनं वमनं भवेत् । आदिशब्दादाहाररुचिर्नोपजायते । अथ पानीयं प्रभूतं न पिबति ततोऽसमाधिः आहाररुचौ च पुनर्भोजने ग्लानत्वं ग्लानत्वे च सूत्रभङ्गः । सूत्रपौरुषीभङ्गः । आदिशब्दादर्थपौरुषीभङ्गश्च गतं वातद्वारमधुना पित्तद्वारमाह-

[भा.२५७२] बहिया य पित्तमुच्छा पडणं उण्हेण वावि वसहीए ।
आदियणे छड्डुणादी सो चेव य पोरिसीभङ्गे ।।

वृ- उष्णेन परितापितस्य पित्तप्रकृतेर्बहिः प्रित्तमूर्च्छावशतः पतनं भवेत् । तथा च सति भक्तभृतभाजनसहितस्य महानुड्डाहः वसतौ वा पित्तमूर्च्छावशतः पतनं । तत्र प्रभूतजलपानं समुद्देशानन्तरमपि प्रचुरजलादानं तथा च सति त एव चर्छ्दनादयः प्रागुक्ता दोषाः स एव च सूत्र-पौरुष्याश्च भङ्गः ।। गतं पित्तद्वारधुना गणालोकद्वारमाह-

[भा.२५७३] आलोगो तिन्निवारे, गोणीण जहा तहेव गच्छेवि ।
नंठ न नाहिति निथट्टीहसोही निसिज्जं च ।।

वृ- यथा गोपालस्तिसृषु वेलासु गवमालोकं करोति, । तद्यथा-प्राक् प्रसरंतीनां मध्याह्ने च्छायासु स्थितानां विकालवेलायां गृहं प्रत्यागच्छन्तीनां यदि न करोति तदा न जानाति का विनष्टा का वा गतेति । एवमाचार्येणापि तिसृषु वेलासु गच्छेऽप्यालोकः कर्तव्यः । तद्यथा-प्रातर्मध्याह्ने विकालवेलायां च तत्र यदि प्रातरावश्यके कृते गणालोकं न करोति, तदा मासलघु । भिक्षावेलायां द्वितीयं वारं गणालोकमकुर्वतो मासलघु, । तृतीयं वारं विकालवेलायामप्यकुर्वतो मासलघु, तत्राचार्यो यदि भिक्षां नाटति तदा तिसृषु वेलासु गणालोकं कर्तुं शक्नोति, भिक्षामटन् कथं कुर्यात् । गणालोके पुनरकृते नष्ट इत्येव न ज्ञास्यते, । तथा भिक्षाचर्यागमने कः सन्निवृत्तः को वा नेति केन ज्ञायते, । तथा गणालोकेऽ-क्रियमाणे को दीर्घं कालं भिक्षाचर्यं करोति, को वा नेति केन ज्ञायते, । तथा भिक्षामटत्याचार्ये भिक्षाचर्यात् आगतानामालोचनायां कः शोधिं करोति, । तथा भिक्षां हिण्डमाने सूरौ कोऽपि गृहनिषद्यां वाहयत्येतन्न ज्ञायते ।।

[भा.२५७४] मा आवस्सयहानी, करेज्ज भक्खिलसा व अच्छेज्जा ।
तेनति संज्झालगं सिस्साण करेइ अच्छंतो ।।

वृ- भिक्षामटत्याचार्यो येऽवश्यं कर्तव्या योगास्तेषां यः प्रमादतो हानिं करोति । स न ज्ञायते । तथा आचार्य एवास्माकं भिक्षामानेष्यति इति केचित् भिक्षालसा वसावेव तिष्ठेयुर्नभिक्षामटेयुर्यत एवं गणालोकेऽक्रियमाणे इमे [अमी] दोषास्तस्मात्तिसृष्वपि सन्ध्यासु शिष्याणामालोकस्तिष्ठन् भिक्षामहिण्डमानः करोति गतं गणालोकद्वारमधुना कायक्लेशद्वारमाह-

[भा.२५७५] हिंडंतो उच्चा[व्वा]तो सुत्तत्थाणं च गच्छपरिहानी ।
नासेहिति हिंडंतो सुत्तं अत्थं आरेगेणं ।।

वृ- हिण्डमानः पुनर्भिक्षां महान् कायक्लेश इति उच्चातोत्ति परिश्रान्तो भवति परिश्रान्तत्वात् सूत्रमर्थं च दातुमसमर्थ इति शिष्येषु प्रातीच्छिकेषु च सूत्रार्थानां परिहानिस्ततो गच्छस्यापि परिहानिः, शिष्याणां प्रातीच्छिकानां चान्यत्रान्यत्र गणान्तरे संक्रमात् । तथा हिण्डमानः सूत्रमर्थं चारेकेणा-क्षेपेणात्मनोऽपि नाशयिष्यति गतं कायक्लेशद्वारमिदानीं चिन्ताद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२५७६] जा आससिउं भुंजइ भुत्तो खेयंव जाव परिणेई ।
ताव गतो सो दिवसो, नट्ठसती दाहिती किं व ।।

वृ- यावद्भिक्षामटित्वा क्षणमात्रमाश्वास्य भुंक्ते भुक्तोऽपि च खेयंत्ति भिक्षाऽटनपरिश्रमं यावत् प्रतिनयति स्फेटयति, तावद्दिवसः सकलोऽपि गतस्ततो नास्ति सा वेला यत्र सूत्रस्यार्थस्य वा चिन्तां करोति । अचिन्तितं च विस्मृतिमुपयाति, ततो नष्टस्मतिः । किं दास्यति न किमपीति भावः, । वाशब्दो दूषणसमुच्चये । एतदेव सुव्यक्तं भावयति-

[भा.२५७७] रेगो नत्थि दिवसतो रत्तिंपि न जग्गते समुव्वातो ।
न य अगुणेउं दिज्जइ जइ दिज्जइ संकितो दुहातो ।।

वृ- नास्ति रेको विविक्तो अवसरो दिवसमध्ये यत्र सूत्रमर्थं वा चिन्तयति । रात्रावपि समुद्वान्तः सम्यक् परिश्रान्तो न जागर्त्ति । न च सूत्रमर्थं वा अगुणयित्वा दीयते । यदि पुनर्दीयते तर्हि द्वधितः सूत्रतोऽर्थतश्च शङ्कितो भवति । गतं चिन्ताद्वारमधुना मेढिकाद्वारमाह-

[भा.२५७८] मेढीभूते बाहिं भुंजण आदेसमाइ आगमनं ।
विनए गिलाणमादी अच्छंतो मेढिसंदेसा ।।

वृ- आचार्यः सर्वस्यापि गच्छस्य मेढिभूतः मेढिरिति वा आधार इति वा चक्षुरिति वा एकार्थः । स चेद्भिक्षां गच्छति, ततः साधूनां वसतेर्बहिर्यद्दच्छाया भोजनं स्यादेतदनन्तरमेव भावयिष्यते । तत एवं ज्ञायते कोचिदादेशा प्राघूर्णकाः आगच्छेयुरादिशब्दात्केचिदलब्धिका लब्धिपरिहीनास्ततः तेषामादेशानामागमनं ज्ञात्वा कः प्राघूर्णकानां विश्रामणं सन्देशं वा कुर्यात् । को वा लब्धिशब्दात् बालवृद्धासहानां च कः सन्देशप्रदानेन चिन्तां कुर्यात् । तिष्ठति भिक्षामनटत्याचार्ये तस्य मेढेः सन्देशादादिशात् सर्वमादेशादेः सुस्थं भवति । सम्प्रति यदुक्तं बाहिभुञ्जत्ति तद्भावयति-

[भा.२५७९] आलोयदायणं वा कस्स करे हा मुगं च छंदेमो ।
आयरिए य अडंते को आत्थिउ मुच्छहे अन्नो ।।

वृ- शिष्याः प्रातीच्छिकाश्च भिक्षां प्रविष्टाश्चिन्तयन्ति । सूरिरपि भिक्षार्थं निर्गतो भविष्यति, ततो वयं प्रतिश्रयं गत्वा कस्य पुरत आलोचयिष्यामः कस्य वा भक्तं पानं वा दर्शयिष्यामः । कं चान्यं साधुं तत्र गताः च्छन्दयामो निमन्त्रयामो यतो भिक्षामटत्याचार्ये कोऽन्यः साधुः स्थातुमुत्सहते, । सर्वोऽपि भिक्षां यातीति भावः । तथा हि-सर्वे साधवो भिक्षामटत्याचार्ये चिन्तयन्ति । यदि स्वयमाचार्यो भिक्षां हिण्डते कास्माकं शक्तिः पश्चात्स्थातुं वयमपि यास्यामः । एवं सर्वस्यापि गमने निमन्त्रणापि कस्य स्यादिति विचिन्त्य बहिरेव समुद्दिश्य वसतावागच्छेयुरिति गतं मेढिद्वारमिदानीमकारकद्वारमाह-

[भा.२५८०] नानिते अकारगमी दव्वे पडिसेहणा हवति दुक्खं ।
रायनिमंतणगहणे सणक्खिववावारणा दुक्खं ।।

वृ- भिक्षामटत आचार्यस्य यदकारकं तस्य तत् भिक्षार्थं निष्काशितं तस्मिन् अकारकं द्रव्ये भिक्षार्थं निष्काशिते प्रतिषेधनं ममैतदकारकमन्यद्देहीति वक्तुं लज्जातो भवति दुःखं, यदि पुनर्लज्जां मुक्त्वा भणति तदानन्तरवक्ष्यमाणगाथाद्वयोक्ता दोषास्तथा भिक्षामटन्नाचार्यो राज्ञा मत्तवारणकस्थितेन दृष्टस्ततः आकारयित्वा भणितो मम गृहे भिक्षां गृह्णीत । स प्राह न कल्पते राजपिण्ड इति, एवं निमन्त्रणानन्तरमग्रहणे राज्ञा भणयते-साधो किं तव पतन्द्रहे समस्ति । ततो दर्शितेऽन्तप्रान्तादिके वासिदौ च राजा तत् दृष्ट्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खिंसनं कुर्यात् । तथा आचार्योऽलब्धिको भवेत् । स चेत् ग्लानादिनिमित्तं शिष्यान् प्रातीच्छिकांश्च व्यापारयेत् यथा ग्लानादीनां योग्यमानयत ते चालब्धिकं ज्ञात्वा परिभवमुत्पादयन्तिति तषां व्यापारणे दुःमेवगाथासमासाथः ।साम्प्रतमेनामेव विवरीषुर्लज्ञां मुक्त्वा अकारकद्रव्यप्रतिषेधने ये दोषास्तानेवाह-

[भा.२५८१] जेणेव कारणेणं सीसमिणं गुंडियं भदंतेन ।
वयण घरवासिनी विहु न मुंडिया ते कहिं जीहा ।।

वृ- येनैव कारणेन हेतुना भदन्तेन गुरुणा तवशीर्षमिदं मुण्डितं, तेनैव कारणेन तव जिह्वापि वदनगृहवासिनी ममैतदकारकमन्यद्देहीति ब्रुवाणा कथं न मुण्डिता, येनैवं न भाषते तथा,

[भा.२५८२] गयमागयंमि लोए सीसावि तहेव तस्स गच्छंति ।
सयमेव दुट्ठ जिब्भो सिसे विनइस्सति केन ॥

वृ- गतागमोयं स्वभावतो लोकः पितृस्वभावं पुत्रोऽनुकरोतीति भावः । ततो गतागमेऽस्मिन् लोके यथाचार्यो गच्छति चेष्टते शिष्या अपि तस्य तथैव गच्छन्ति वर्तन्ते । तं च स्वयमेवेत्थं दुष्टजिह्वस्ततः केन प्रकारेण शिष्यान्विनेष्यति शिक्षयिष्यति नैवं कथं च नेति भावस्तस्तेऽपि भविष्यन्तीति ।

[भा.२५८३] पडिसेहं तमजोग्गं अन्नस्सवि दुल्लहं हवइ भिक्खं ।
सद्धा भंग चियत्तं जिब्भादोसो अवन्नो य ।।

वृ- अयोग्यमकारकं प्रतिषिध्यमानं महान्तमपगुणं करोति । किं तमित्याह-कोऽसावपगुण इत्याह-अन्यस्यापि साधोर्दुर्लभं भवति भैक्षं, नैते यद्वा तद्वा गृह्णन्तीत्यदानात् । तथा अकारकस्य प्रतिषेधने कस्या अपमिहत्याः श्रद्धाया भङ्गः ।अपरस्यापि अचियत्तमप्रीतिस्ततस्तद्वशादवर्णो जिह्वादोष उत्पद्यते सम्प्रति यदुक्तं राजनिमन्त्रणाग्रहणे खिंसनमिति तत्र तदेव खिंसनमाह-

[भा.२५८४] पुव्विं अदत्तदाना अकोविया इह उ संकिलिस्संति ।
काऊण अंतरायं नेच्छंतिट्ठंवि दिज्जंतं ।।

वृ- आन्तप्रान्तादौ वासितादौ च दर्शिते राजा प्राह-पूर्वमदत्तदाना यूयं तत इहाकोविदा अतत्वज्ञा सन्तः क्लिश्यन्ति । तथा च राजपिण्डे इत्यन्तरायं कृत्वा इष्टमपि दीयमानं भवन्तो नेच्छन्ति ।

[भा.२५८५] गहण पडिसेए भुंजण अभुंजणे चेव मासियं लहुयं ।
अमणुन्न अलंभे वा खिंसिज्ज व सेहमादीया ।।

वृ- अकारकस्य ग्रहणे सति यद्यन्यैः साधुभिः प्रतिषिध्यमानोऽपि भुङ्क्ते तदा ग्लानत्वमथ न भुङ्क्ते तदा अभोजने पारिष्ठापनिकादोषस्तत्र च प्रायश्त्तिं मासिकं लघु, तथा यद्याचार्योऽलब्धिकस्तदा अमनोज्ञलाभे मनोज्ञालाभे वा शैक्षकादयः खिंसेयुर्न किमपि क्वापि गतो लभतेऽतिरिक्त मेतस्या-चार्यत्वं ।।

[भा.२५८६] वावारिया गिलाणादियाण गेण्हए जोग्गंति ते तओ बेंति ।
तुब्भे कीस न गेण्हह हिंडंता ऊ सयं चेव ।।

वृ- आचार्यो लब्धिहीनः सन् शिष्यान् प्रातीच्छिकांश्च व्यापारयेत् । यथा ग्लानादीनां ग्लानप्राघूर्णकप्रभृतीनां योग्यं गृह्णीत तत एवं ते व्यापारिताः सन्तो ब्रुवते । यूयं स्वयमेव हिण्डमाना ग्लानादिप्रायोग्यं कस्मान्न गृह्णीत ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२५८७]　　एवाणाए परिभवो बेंति दीसति य पाडिरूवं भे ।
आनेह जाणमाणा, खिंसंति एवमादीहिं ।।

वृ- एवमुपदर्शितेन प्रकारेण आज्ञायाः परिभव उत्पाद्यते, यथा यदि यूयं प्रायोग्यं न लभध्वे कथं वयं लप्स्यामहे । एवमुक्ते यद्याचार्यो ब्रूते-आर्या उद्यमेन किं न लभ्यते । तत एवमुक्ते रुष्टा ब्रुवते-दृश्यते खलु भे भवतां प्रतिहार्यसातिशयमाचार्यत्वं स्यवमेवं जानन्तः कस्मान्नानयत एवमादिरुच्चावचैर्वचनैः खिंसंति हीलयंति ।।गतकारकद्वारं, व्यालद्वारमाह-

[भा.२५८८]　　वालो य साणमादी दिट्ठंतो तत्थ होति छत्तेण ।
लोभे य आभिओगे विसे य इत्थीकए वावि ।।

वृ- भिक्षामटतो व्यालः श्वप्रभृतिकः कदाचिल्लगति तदा महत्यपभ्राजना तत्र च दृष्टान्तश्छत्रेण यथा च्छत्रमुपरि ध्रियमाणं शोभते अधःपतितं तु न किमपि एवमाचार्योऽपि बहुभिः परिवारितो गच्छन् शोभते । तथा भिक्षाटनप्रवृत्तस्तु श्वादिपरिगृहीतो न किमपि तथा प्रतिरूपवानाचार्यो भवतीति लोभेन, गाथायां सप्तमी तृतीयार्थे, ऽभियोगो वशीकरणं स्त्रीकृतं स्यात्, विषं वा केनचित् प्रद्विष्टेन दीयते,

[भा.२५८९]　　मोएउं असमत्था बद्धं रुद्धं नच्चणं कुसिया ।
जुवति कमणिज्ञरूवो सो पुन सव्वेवितो सत्तो ।।

वृ- युवतिः कमनीयरूपतया अलीकदोषसंभावनया अन्यथा बद्ध रुद्धं वा नर्तकं नटानां नायकं कुसिता मोचयितुमसमर्थास्तेषां तादृक् शक्त्यभावात्स पुनर्युवतिकमनीयरूपस्तान् कुसितान् सर्वानपि केनापि दोषेण बद्धान् रुद्धान् वा मोचयितुं शक्तस्ततो यथा स प्रयत्नेन रक्ष्यते, एवमाचार्योऽपि रक्षणीयोऽन्यथा दोषस्तथा चाह-

[भा.२५९०]　　एमेवायरियस्स वि दोसा पडिरूववं च सो होइ ।
दिज्ञ विस भिक्खुवासो अभिजोग्ग वसीकरणमादी ।।

वृ- एवमेव नर्तनस्येवाचार्यस्याप्यपरक्षितस्य दोषा भवन्ति, तथाहि सोऽपि प्रतिरूपवान् भवति, ततः कोऽपि भिक्षूपासको जिनप्रवचनप्रभावनामसहिष्णुर्विषं दद्यात् । स्त्री वा काचिद्रूप-लुब्धा आभियोग्यं कुर्यात् वशीकरणादि वा प्रयुञ्जीत । यस्मादेते दोषास्तस्मात् प्रयत्नतो रक्षणीयो-ऽन्यथा तदभावे गणस्याप्यभावापत्तिस्तथा चाह-

[भा.२५९१]　　नच्चणहीना व नडा नायगहीना व रूपिणी वावि ।
चक्कं च तुंबहीनं न हवति एवं गणो गणिणा ।।

वृ- यथा नर्तनहीना नटा, यथा नायकहीना रूपवती स्त्री, यथा च चक्रं तुम्बहीनं न भवति, एवं गणिनाचार्येण विना गणोऽपि न भवति ।। तदेवं व्याल द्वारमिदानीं गणचिन्ता द्वारमाह-

[भा.२५९२]　　लाभालाभद्धानि अकारके वा वुड्ढमादेसे ।
सेहक्खवए न नाहिति अच्छंतो नाहिति सव्वे ॥

वृ- केन पर्याप्तं लब्धं केन वा न लब्धमिति न ज्ञास्यति स्वयं भिक्षाटने परिश्रान्तत्वात् । तथा अध्वनि मार्गे ये परिश्रान्ताः समागमनप्राघूर्णकाः तेषामिदमकारकमिदं वा कारकं तथा बालान् वृद्धान् पूर्वागतांश्चादेशान् प्राघूर्णकान् तथा शैक्षान् क्षप कांश्च करणीयसारा करणतया न ज्ञास्यति । स्वयं भिक्षापरिश्रमणपरिश्रान्तत्वात् तिष्ठन् पुनः सर्वान् यथौचित्येन ज्ञास्यति परिश्रमाभावात् ।।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

गतं गणचिन्ताद्वारमधुना वादिद्वारमाह-

[भा.२५९३] सोऊण गतं खिंसति पडिच्छउव्वाय वादि पेल्लई ।
अच्छंति सत्थचित्तेन होंति दोसा तवादिया ।।

वृ- भिक्षामटितुं प्रवृत्ते आचार्ये वादी कोपि समागसतस्तेन साधव उक्ताः क आचार्यः ? । साधुभिरुक्तम्-भिक्षाटनाय गतस्ततः स भिक्षार्थं गतं श्रुत्वा खिंसति हीलयति, ।एतावत्तस्य पाण्डित्यं स स्वयं भिक्षामटति ततः क्षणमात्रंप्रतीक्षितः स चाचार्य उद्भ्रान्तः परिश्रान्तः समागतस्तं समागतं दृष्ट्वा वादी प्रेरयति । स च परिश्रान्तत्वात् उत्तरं दातुमसमर्थस्तिष्ठति । पुनः स्वस्थचित्ते दोषास्तापादयः । आदिशब्दात् तृषादिपरिग्रहो न भवति तथा च सति न वादिना तस्य प्रेरणं किन्तु जय इति वादी समागतो भिक्षार्थं गत इति श्रुत्वा यदवादीत्तदुपदर्शयति-

[भा.२५९४] पागडियं माहप्पं, विन्नाणं चेव सुट्ठु ते गुरुणो ।
जइ सोवि जाणमाणो न वि तुब्भ मनाढितो होंता ।।

वृ- भिक्षार्थं गत इति ब्रुवाणैर्भवद्भिः सुष्ठु अतिशयेन माहात्म्यं गरिमलक्षणं विज्ञानं च प्रकटितं । यदि सोऽपि ज्ञाता भवति न वै युष्माकमनादृतो भवेत् ।। अधुना पडिच्छिउव्वाय वादि पेल्लेइ इति-

[भा.२५९५] न वि उत्तराणि पासइ पासणियाणं च होंति परिभूतो ।
सेहादि भत्तगावि य दट्ठुं अमुहं परिणमंति ।।

वृ- स भिक्षाटनपरिश्रान्तः सन् नवि नैव उत्तराणि पश्यति परिश्रमेण बुद्धेः संव्यापादनात्तथा च सति स प्राश्निकानामपि सभ्यानामपि परिभूतो भवति ततो ये शैक्षकादयो ये च भद्रकादयस्ते तममुखं निरुत्तरं दृष्ट्वा परिणमन्ति विपरिणामं भजन्ते । भिक्षार्थमनटने पुनरिमे गुणाः ।।

[भा.२५९५] सुत्तत्थाणं गुणणं विज्जामंता निमित्तजोगाणं ।
वीसत्थे पइरक्खे परिजिणइ रहस्ससुत्ते य ।।

वृ- सूत्रार्थानां तथा विद्यानां मन्त्राणां निमित्तशास्त्राणां योगशास्त्राणां च गुणनं परावर्तनं भवति तथा विश्वस्तः सन् प्रतिरिक्ते विविक्ते प्रदेशे रहस्यसूत्राणि परिजयति । अत्यन्तस्वभ्यस्तानि करोति तस्मान्न भिक्षार्थमटितव्यमाचार्येण गतं वादिद्वारमिदानीमृद्धिमद्वारमाह-

[भा.२५९६] रन्नावि दुवक्खरतो ठवितो सव्वस्स उत्तमो होति ।
गच्छं वियाइरितो सव्वस्सवि उत्तमो होइ ।।

वृ- राज्ञा द्व्यक्षरको दासो यद्यपि जात्या हीनस्तथापि संस्थापितः सन् सर्वस्याप्युत्तमो भवति उत्तमत्वाच्च यथा न कश्चन प्रेषणेन हिण्डाप्यते सोऽप्येवं यथा, तथा गच्छेऽप्याचार्यः सर्वस्याप्युत्तमो भवतीति स सुतरां भिक्षां न हिण्डापयितव्यः ।।

[भा.२५९७] रयामच्च पुरोहिय सेट्ठी सेणावतीतलवरा य ।
अभिगच्छंत्तायरिए तहियं च इमं उदाहरणं ।।

वृ- यथा तीर्थकरश्छद्मस्थकाले हिण्डमानोऽप्युत्पन्नेज्ञाने देवेन्द्राद्यभिगमान्न हिण्डते, एवमाचार्यानपि आचार्य एव स्थापितान् राजा अमात्यः पुरोहितः श्रेष्टी सेनापतितलवराश्चाभिगच्छन्ति ततस्तेऽपि भिक्षां न हिण्डन्ते । अन्यथा दोषस्तत्र वेदमुदाहरणं तदेवाह-

[भा.२५९८] सोऊण य उवसंतो अमच्चो रण्णो तं निवेदेइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रायावि बितियदिवसे तइए अमच्ची य देवी य ।।

वृ- राज्ञो अमात्य आचार्यसमीपे धर्म श्रुत्वा उपशान्तः स च राज्ञस्तकमाचार्यं निवेदयति । यथा गुणवानतीवाचार्योऽमुकप्रदेशे तिष्ठति, ततो द्वितीयदिवसे राज्ञा अमात्येन सहागतः । स धर्मं श्रुत्वा परितुष्ट आगतो निजाग्रमहिष्याः परिकथयति । अमात्येनाप्यात्मीयभार्यायाः कथितं, ततोऽमात्यी देवी च तृतीयदिवसे धर्मश्रवणाय समागता आचार्यो भिक्षार्थं गतस्ततः ।।

[भा.२५९९] साउ पडिच्छिऊण गया अहवा पडिच्छिन्ने खिंसां ।
हिंडंति होंति दोसाकरेण पडिवत्ति कुसलेहिं ।।

वृ- भिक्षार्थं गत इति श्रुत्वा ते हीलयित्वा गते, अथवा क्षणमात्रं प्रतीक्ष्य हीलयन्त्यौ गते, यदि वा यावदाचार्य आगच्छति, तावत्प्रतीक्ष्यमाणे हीलयतः अथवा प्रस्विन्नशरीर परिगलतप्रस्वेदमागतं दृष्ट्वा खिंसतो यदि वा क्लमेन सुष्ठुकृतं न वदनं नवासोमं कथयतो वा परिश्रमेण न सुष्ठु वचनविनिर्गमस्तत उत्थिते हीलयतो यथा पिएडोलक इवैष भिक्षामटति किमाचार्यत्वमेतस्य । एते भिक्षां हिण्डमाने दोषाः । यदि पुनः कारणे वक्ष्यमाणे भिक्षार्थं गतो भवेत् राजादयश्च तत्रागतास्ते च पृच्छेयुः क्व गत आचार्यस्तत्र ये प्रतिपत्तिकुशलास्तैर्नेदं वक्तव्यं भिक्षार्थं गत इतचित्यवन्दनमित्तं गत इति यदि ते राजादय आचार्यमागच्छन्तं प्रतीक्षेरन् तदा येऽतीव दक्षा गीतार्थास्तेषां सुन्दरं पानकं प्रथमाकिं च सुन्दरं कल्पं चोलपट्टं च गृहीत्वांचार्यसमीपे गत्वा आचार्यस्य कथयन्ति । तत आचार्यो मुखहस्तपादादि-प्रक्षाल्यप्रथमालिकां पानकं च कृत्वा कल्पं प्रावृत्य पात्राण्यन्यस्य समर्प्य तादृशवेषो वसतावानीयते यथाऽनाख्यातोऽपि राजादि भिर्ज्ञायते एष आचार्य इति । ततो वसतिं प्राप्तस्य पादप्रोञ्छनं पादप्रमार्जनार्थमादाय साधव उपतिष्ठन्ति । पादप्रमार्जनान्तरं वसतेरंतरवसतेरंतः प्रविश्य पूर्वरचितायां निसद्यायामुपविशति, उपविष्टस्य च चरणकल्पकरणाय कोपि साधुरुपढौकते, चरणप्रक्षालनानन्तरं सर्वे साधवः पुरतः पार्श्वतः पृष्टतो वा किंकरभूतास्तिष्ठन्ति यथा राजा चकितस्तिष्ठति । एतदेवाह ।

[भा.२६०१] कारणे भिक्खस्स गते वि कज्जं अन्नं निवस्स साहित्ता ।
निज्जोग नयण पढमा कमादि धुवणं मणून्नाई ।।

वृ- कारणे वक्ष्यमाणे लक्षणे समापतिते भैक्षस्य गतेऽप्याचार्ये नृपस्यान्यत्कार्यं कथयित्वा प्रथमालिकादेर्निर्योगस्य नयनं, ततः क्रमादि प्रक्षालनं ततो मनोज्ञप्रथमालिकादिकरणम् ।।

[भा.२६०२] कयकुरुकय आसत्थो पविसइ पुव्वरइयनिसेज्जाए ।
पयया य होंति सीसा जह चकितो होइ राया वि ।।

वृ- कृतकुरुकचः कृतकुल आस्वस्थः प्रविशति । प्रविश्य च पूर्वरचितायां निषद्यायामुपविशति । ततः पादप्रक्षालनसमीपोपवेशनप्रयतास्तथा भवन्ति यथा राजापि चकितो जायते । अत्र परः प्रश्नमाह-

[भा.२६०३] सीसा य परिचत्ता चोदगवयणं कुटुंबिज्झामणया ।
दिट्ठंतो दंडिएणं सावेक्खे चेव निरवेक्खे ।।

वृ- चोदकवचनमाचार्यं रक्षयित्वा शिष्या भिक्षायां प्रेषितास्तर्हि ते त्यक्ता, आचार्य आह-अत्र कुटुम्बिगृहपदीपनदृष्टान्तः । सापेक्षनिरपेक्षे चाचार्ये । एष द्वारगाथाक्षरार्थः । साम्प्रत्येनामेव विवरीषुः प्रथमतः सीसाय परिचत्ता इति भावयति-

[भा.२६०४] वायादीया दोसा गुरुस्स इतरेसि किं न ते होंति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रक्खय सिस्सच्चाए हिंडणतुल्ले समताया ।।

वृ- वातादयो दोषा गुरोर्भवन्ति । इतरेषां साधुनां किं ते न भवन्तिभवन्त्येवेति भावः । ततो हिण्डते हिण्डनदोषे तुल्ये आत्मनो रक्षा क्रियते । शिष्याणां च त्याग इत्यसमता नेदं समंजसमित्यर्थः । अन्यच्च-

[भा.२६०५] दसविहवेयावच्चे निच्चं अब्भुट्ठिया असढभावा ।
ने दानि परिवन्ना अनुञ्ञमंताण दणडो य ।।

वृ- दशविधि आचार्यादिभेदतो दशप्रकारे वैयावृत्त्ये नित्यं सर्वकालमशठभावाः सन्तो अभ्युत्थितास्ते सम्प्रति वातादिदोषान्पश्यद्भिरपि भिक्षाटने प्रेष्यमाणपरित्यक्ताः तथा दशविधवैयावृत्त्येनोद्यच्छन्ति ततस्तेषामनुद्यच्छतामाचार्यादिवैयावृत्त्यकरणे यथार्हं प्रायश्चित्तं दण्डो दीयते । तदेवं 'सीसाय परिचत्ता' इति भावितमिदानीं कुटुंम्बिका पणयेति दृष्टान्तं भावयति ।

[भा.२६०६] वड्ढि धन्नसुभरियं कोट्ठागारे डज्झंते कुटुंबस्स ।
किं अम्ह मुहा देई केई तहिय न अल्लीणा ।।

वृ- एक कौटुम्बिकः स कर्षकाणां कारणे समुत्पन्ने वृद्धया कालान्तररूपया धान्यं ददाति । तया च वृद्धया कौटुंबिकस्य कोष्ठागाराणि धान्यस्य सुभृतानि जातानि । अन्यदा च तस्यैकं कोष्ठागारं वृद्धिधान्यसुभृतं वह्निना प्रदीप्तेन दह्यते । तत्केचित्कर्षका विध्यायननिमित्तं तत्र प्रदह्यमाने कोष्ठागारे न समागता किमेष कौटुमिबकोऽस्माकं मुधा ददाति येन वयं विध्यापनार्थमभ्युद्यता भवामः ।।

[भा.२६०७] एयस्स पभावेणं जीवा अम्हेति एव नाऊणं ।
अणे उ समल्लीणा विज्झविए तेसि सो तुट्ठो ।।

वृ- अन्ये कर्षका एतस्य कौटुम्बिकस्य प्रभावेन वयं जीवन्ति स्म जीवा अचप्रत्ययः जीविता इत्यथः एवं ज्ञात्वा समालीनास्तत्र समागता विध्यापनाय च प्रवृत्तास्ततो विध्यापिते कोष्टागारे सा कौटुम्बिकस्तेषां तुष्टः किमकार्षीदित्यत आह-

[भा.२६०८] जे उ सहायगत्तं करेसु तेसिं अवड्ढियं दिन्नं ।
दिड्ढंति न दिन्नियरे अकासगा दुक्खजीविया ।।

वृ- ये तु विध्यापने सहायत्वमकार्षुस्तेषामवृद्धिकं कालान्तररहितं धान्यं दत्तं, इतरेषां तु सहायत्वमकृतवतां दग्धमित्युत्तरं विधायन दत्तंततस्ते कर्षकाः सन्तो दुःखजीविनो जाताः ।

[भा.२६०९] आयरियकुटुंबी वा सामाणिया भवे साहू ।
वाबाह अगनितुल्ला सुत्तत्था जाण धन्नं तु ।।

वृ- आचार्यः कुटुम्बीकः कुटुम्बितुल्य इत्यर्थः । सामान्य कर्षक स्थानीयाः साधवः आचार्यस्य भिक्षाटने वातादिव्याबाधाग्नितुल्या, सूत्रार्थान् जानीहि धान्यं धान्य तुल्यान् ।

[भा.२६१०] एमेव विनीयाणं करेंति सुतत्थ संगहं थेरा ।
होवेंति उदासीने किलेस भागी य संसारे ॥

वृ- कौटुम्बिकदृष्टान्तप्रकारेण ये विनीतास्तेषां स्थविरा आचार्या सूत्रार्थसंग्रहं कुर्वन्ति सूत्रार्थान् प्रयच्छन्ति, यत्र उदासीनः तत्र हायन्तीति न प्रयच्छन्तीति भावः । स चोदासीनो वर्तमानो न केवलं सूत्रार्थयोग्यो भवेत्, क्लेशभागी च संसारे जायते । गतं ध्यापनद्वारं सम्प्रति दण्डिकदृष्टान्तं-

[भा.२६११] उप्पन्नकारणे पुन जइ सयमेव सहसा गुरू हिंडे ।

अप्पाणगच्छमुभयं परिचयती तत्थिमं नायं ।।

वृ- उत्पन्नेऽपि कारणे वक्ष्यमाणलक्षणे यदि सहसा स्वयमेव गुरुर्भिक्षां हिंडते तर्हि स गुरुरात्मानं गच्छमुभयं च परित्यजति । तत्र चेदं वक्ष्यमाणज्ञातमुदाहरण । तदेवाह -

[भा.२६१२] सोउं परबलमायं सहसा एक्कागिओ उ जो राया ।
निग्गच्छति सो चयती अप्पाणं रज्जमुभयं च ।।

वृ- यो निरपेक्षो राज्ये परबलमागतं श्रुत्वा बलवाहनान्यमेलयित्वा सहसा एकाकी परबलस्य संमुखो निगच्छति, स आत्मानं राज्यमुभयं च त्यजति, बलवाहव्यतिरेकेण युद्धारंभे मरणभावात् । एवमाचार्योऽपि निरपेक्षः समुत्पन्नेऽपि कारणे सहसा भिक्षामटन्नात्मानं गच्छमुभयं च परित्यजति ।

[भा.२६१३] सावेक्खो पुन राया कुमारमादीहि परबलं क्खविया ।
अजिए सयंपि जुज्झइ उवमा एसेव गच्छेवि ।।

वृ- सापेक्षः पुना राजा प्रथमं कुमारादीन् युद्धाय प्रेषयति ततः कुमारादिभिः परबलं क्षपयित्वा यदा कुमारैर्न परिजीयते परबलं, तदा तस्मिन्नजिते स्वयमपि राजा युध्यते । एवा एवोपमा गच्छेऽपि द्रष्टव्या । आचार्योऽपि पूर्वं यतनां करोति तथापि असंस्तरणे स्वयमपि हिण्डते एव चात्मानं गच्छमुभयं च निस्तारयतीति भावः ।। सम्प्रति यैः कारणैराचार्येण भिक्षार्थमटितव्यं तानि कारणान्याह-

[भा.२६१४] अद्धाणकक्खडासति गेलणादेसमाईएसु च ।
संथरमाणे भइतो हिंडेज्ज असंथरंतंमि ।।

वृ- अध्वानं प्रपन्नः सार्थेन सममाचार्यो गच्छंस्तत्र चासंस्तरणे यदि सार्थिका आचार्यस्य गौरवेण प्रयच्छन्ति, ततः स्वयमेव आचार्यो हिण्डते, एवं कर्कशेऽपि क्षेत्रे भावनीयं, तथा असति सहायानामभावे को भिक्षामानीय ददाति स्वयं हिण्डते । तथा ग्लाना बह्वस्ततस्तेषां सर्वेषामपि गचछसाधवः प्रायोग्यमुत्पादयितुशक्ता अथवा ग्लानप्रायोग्यमन्यः कोऽपि न लभते तत आचार्यो हिण्डते । एवमादेशाः प्राघूर्णिका आदिशब्दात् बालवृद्धासहपरिग्रहस्तेष्वपि भावनीयं । एतेषु विषयेष्वसंस्तरति गचछे नियमाचादार्यो कुर्वन् हिण्डते । शेषकाले नेत्यर्थः । एष द्वारगाथा संक्षेपार्थः ।। अत्र यदुक्तं संस्तरणे न हिण्डते इति तत्र संस्तरणं त्रिविधं-जघन्यं मध्यममृत्कृष्टं च तत्र जघन्यमधिकृत्याह-

[भा.२६१५] पंचवि आयरियादी अच्छंते जहन्नए वि संथरणे ।
एवं संथरंते सयमेव गणी अडति गामे ।।

वृ- जघन्येऽपि वक्ष्यमाणस्वरूपे संस्तरणे पञ्चाप्याचार्योपाध्यायप्रवर्तिस्थविरगणावच्छेदिनस्तिष्ठन्ति । जघन्येऽपीत्यपिशब्दः संभाने । स चैतत् संभावयति यदि तावत् जघन्येऽपि संस्तरणे पञ्चाप्याचार्यादयस्तिष्ठन्ति । ततो मध्यमे उत्कृष्टे संस्तरणे नियमात् पञ्चभिरपि स्थातव्यं । एवमपि जघन्येनापि संस्तरणेनासंस्तरति गचछे स्वयमेव गणी आचार्यो ग्रामे भिक्षामटति । स च प्रतिलोमपरिपाट्या पर्यन्ते तथा हि-जघन्येनापि संस्तरणेनासंस्तरति प्रथमं गणावच्छेदको हिण्डते, तथाप्यसंस्तरणे स्थविरो हिण्डते, एवमप्यसंस्तरणे प्रवर्त्यपि तथाप्यसंस्तरणे उपाध्यायोऽपि, तथापि चेन्न संस्तरति गच्छस्तत आचार्योऽपि तत्र प्रथमत उत्कृष्टसंस्तरणमाह-

[भा.२६१६] मंडलगयंमि सूरे उत्तिणा जाव पठवणवेला ।
ता एंति भुत्ता सन्नागया च उक्कोससंथरणे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- नभोमण्डलस्य मध्यगते सूर्ये मध्याह्ने इत्यर्थः । भिक्षार्थमवतीर्णास्ततः पर्याप्तं हिंडित्वा यावत् तृतीयपौरुष्या आदौ स्वाध्यायप्रस्थापनवेला तावत्सन्निवर्तते । एतावदुत्कृष्टं संस्तअनुवा तृतीयपौरुष्या आदौ स्वाध्यायप्रस्थापनावेला तावत्सन्निवर्तन्ते । एतदुत्कृष्टं संस्तरणम् । मध्यमं जघन्यं चाह-

[भा. २६१७]　सणातो आगयाणं च पोरिसी मज्झिमं हवंति एयं ।
विसुयावियमत्तदिणे समतित्थं ते जहणं तु ।।

वृ- मध्याह्नादारभ्य भिक्षार्थमवतीर्णानां पर्याप्तं हिण्डित्वा वसतावागतानां भुक्तानां संज्ञातः संज्ञाभूमीत आगतानां यदि चतुर्थी पौरुषी अवगाहते एतत् मध्यमं संस्तरणं भवति मध्याह्नादारभ्य भिक्षामटित्वा भुक्त्व संज्ञाभूमीतः प्रत्यागत्यमात्रेषु चतुर्थी पौरुषी अवगाहते एतत् मध्यमं संस्तरणं भवति, । मध्याह्नादारभ्य भिक्षामटित्वा भुक्त्वा संज्ञाभूमीतः आगतानां यदि विसूयादिएसु विशोधितेषु सूरास्तमयेन दिनं समतिक्रामति जघन्यं संस्तरणवसातव्यं, तदेवमुक्तं जघन्यादिभेदभिन्नं संस्तरणभिदानीमध्वादिद्वारव्याख्यानार्थमाह-

[भा. २६१८]　अद्धाणे असंथरणे अकोवियाणं विकरणपलंबे ।
एमेव कक्खडंमि वि असतित्ति सहायगा नत्थि ।।

वृ- अध्वनि सार्थेन समं व्रजतामसंस्तरणे भिक्षार्थमाचायो हिण्डते, अथवा ते सहाया अकोविदाः सार्थे च प्रलम्बान्यविकरणकृतान्यखण्डीकृतानि लभ्यन्ते । ततः आचार्यः स्वयमेव हिण्डमानस्तानि विकरणानि कृत्वा सन्निवर्तते अथवा ददतामुपदेशं ददाति विकरणानि कृत्वा ददध्वमिति । एवमकोविदानां सहायानां भावे प्रलम्बविकरणनिमित्तमाचार्यो गच्छति । एवमेव कर्कशेपि क्षेत्रे भिक्षार्थं गमनमाचार्यस्य भवति । तत्राप्यसंस्तरणे अकोविदसहायभावे प्रलम्बविकरणाय वा गच्छतीति । तथा असतित्ति नाम सहायका न सन्ति ततः स्वयमेव भिक्षामटति ।।

[भा. २६१९]　बहुया तत्थ अतरंता अहव गिलाणस्स सो परं लहति ।
एमेव य आदेस सेसेसु विभासबुद्धीए ।।

वृ- बहवस्तत्र गच्छे अतरन्तो ग्लानास्ततः सर्वेषां गच्छसाधवः प्रायोग्यमुत्पादयितुमशक्ता अथवा ग्लानस्य परं प्रायोग्यमन्यो न लभते किन्तु स एवाचार्यस्ततः स हिण्डते । एवमेवादेशेषु प्राघूर्णकं शेषेषु च बालवृद्धासहेषु विभाषा विविधं भाषणं स्वबुद्धया कर्त्तव्यं । तच्चैवं-यद्यादेशादयो बहवः सर्वेषां साधवः कर्तुं न शक्नुवन्ति । यदि वा स एवादेशादिप्रायोग्यं लभते नान्यः कोऽपि ततः स हिण्डते सम्प्रति संथरमाणे भइओ इति व्याख्यानयति-

[भा. २६२०]　अब्भुज्जयपरिकम्मं कुणमाणं जा गणं न वोसिरिति ।
ताव सयं सो हिंडइ इति भयणा संथरंतंमि ।।

वृ- अभ्युद्यतविहारपरिकर्म कुर्वन् यावत् गणं न व्युत्सृजति तावत्स्वयं स आचार्यो हिण्डते, इत्येषा भजना संस्तरति गच्छे-

[भा. २६२१]　अद्धाणादिसु वेहं सुहसीलत्तेण जो करेज्जाहि ।
गुरुगा य जं च जत्थ व सव्वपयत्तेण कायव्वं ॥

वृ- अध्वादिषु अध्वकर्कशादिष्वसंस्तरति गच्छे सुखशीलत्त्वेन सुखमाकांक्षमाण आचार्योऽहमित्यालम्बनमाधाय य उपेक्षामाचार्यः करोति भिक्षां न हिण्डते इत्यर्थः । तस्य प्रायश्चित्तं

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

चत्वारो गुरुकाः; । यद्य यत्र वा अनागाढपरितापनादि साधवः प्राप्नुवन्ति तन्निष्पन्नमपि तस्य प्रायश्चित्तं, तस्मात्सर्वं प्रयत्नेनाध्वादिष्वसंस्तरणे भिक्षाटनं कर्त्तव्यम् । साम्प्रतमसंस्तरणयतनामाह-

[भा.२६२२] असती पडिलोमं सग्गामे गमणदाणसड्ढेसु ।
पेसेति बितियदिवसे आवज्जइ मासियं गुरुयं ।।

वृ- असति अवमौदर्यादिना गच्छसंस्तरणाभावे प्रतिलोमं गणावच्छेदकादारभ्य प्रतिकूल गमनमवसातव्यं । तद्यथा-प्रतिवृषभादिरसंस्तरणे गणावच्छेदकोऽपि प्रतिवृषभादिभिः सह हिंण्डते तथाप्यसंस्तरणे स्थविरोपि तथाप्यसंस्तरणे प्रवर्तकोपि तथाप्यसंस्तरणे उपाध्यायोपि तथा चेन्न संस्तरति तदा स्वग्रामे दानश्रद्धेषु कुलेष्वाचार्यस्य गमनं भवति, तथापि चेदसंस्तरणं तत आचार्यो अन्यान्यपि गृहाणि, तथा केनापि साधुना कस्मिंश्च कुले ग्लानप्रायोग्यं किमपि द्रव्यं याचितं, परं न लब्धमथ च तत् द्रव्यं तस्मिन् गृहे प्रभूलमस्ति अन्यत्र च न विद्यते, तत्र यदि द्वितीये दिवसे तस्मिन् कुले येन न लब्धं तमेवाचार्यः प्रेषयति ततो गुरुकं मासिकं प्रायश्चित्तमापद्यते तस्मात् तस्मिन् कुले प्रतिलोमं प्रेषयितव्यस्तद्यथा-प्रथमं गणावच्छेदकः प्रेष्यस्तेनालब्धे स्थविरस्तेनाप्यलब्धे प्रवर्तकस्तेनाप्यलब्धे उपाध्यायस्तेनाप्यलब्धे स्वयमाचार्यो व्रजति । यदि वा स गृहप्रभुर्यस्य गौरवं करोति स प्रेषयितव्यः । साम्प्रतमेनामेव गाथां विवरीपुः प्रथमतो गाथापूर्वार्धं भावयति-

[भा.२६२३] गणावच्छेदओ पुव्वं ठवणकुलेसुं च हिंडइ सगामे ।
एवं थेर पवित्ती अभिसेय गुरुय पडिलोमं ।

वृ- पूर्वं गणावच्छेदकः स्वग्रामे स्थापनाकुलेषु हिण्डते । एवं गणावच्छेदादारभ्य प्रतिलोमं वक्तव्यं, तद्यथा- असंस्तरणे स्थविरोऽपि हिण्डते, तथाप्यसंस्तरणे प्रवर्त्यपि, तथाप्यसंस्तरणे अभिषेक उपाध्यायस्तथापि संस्तरणाभावे गुरुरपि ।। अधुना पेसेति बितियदिसे इत्यादि भावयति-

[भा.२५२४] उभासिय पडिसिद्धं तं चेव तत्थ पठवेज्जा उ ।
पडिलोमं गणिमादी गोरवं जत्थ वा कुणति ।।

वृ- केनापि साधुना ग्लानप्रायोग्यं किमपि द्रव्यं कस्मिंश्चित् कुले अवभाषितं याचितमित्यर्थः, तद्य गृहे प्रभुणा प्रतिषिद्धमन्यत्र तत् द्रव्यं नास्ति, किन्तु तस्मिन्नेव गृहे । ततो द्वितीयदिवसे तत्र कुले न तमेव प्रेषयेत् । किन्तु प्रतिलोमं गण्यादिं गणावच्छेदप्रभृतिकं यथोक्तं प्राक् । यत्र वा गृहप्रभुर्गौरवं करोति तं वा प्रेषयेत् ।

[भा.२६२५] तित्थगरत्ति समत्तं अहुणा पावयण निज्जरा चेव ।
वच्चंति दोवि समगं दुवालसंगं पवयणं ।।

वृ- तीर्थकर इति द्वारं समाप्तम् । अधुना प्रवचनं निर्जरा चेति द्वे अपि द्वारे समकमेककालं व्रजतस्तत्र प्रवचनं नाम द्वादशाङ्गं गणिपिटकम् ।

[भा.२६२६] तं तु अहिज्जंताणं वेयावच्चे उ निज्जरा तेसिं ।
कस्स भवे केरिसिया सुत्तत्थे जहोत्तरं बलिया ।।

वृ- तत्तु द्वादशाङ्गं गणिपिटकमधीयानानां वैयावृत्त्ये क्रियमाणे तेषां वैयावृत्त्यकराणां महती निर्जरा भवति, उक्तं च-आयरियं वेयावच्चं करेमाणे महानिज्जरे महापज्जवसाने भवति, इत्यादि अत्र महानिर्जरस्तदावरणीयस्य कर्मणः क्षयकरणात् महापर्यवसानः पुनरन्यनवकर्मबंधाभावात् । अत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिष्यःप्राह अस्य कीदृशी निर्जरा भवति? आचार्यःप्राह सूत्रे अर्थे च यथोत्तरं बलिका।

[भा.२६२७] सुत्तावासगमादी चोद्दसपुव्वीण तह जिनानं च।
भावे सुद्धमसुद्धे सुत्तत्थे मंडली चेव॥

वृ- सूत्रमावश्यकादि यावच्चतुर्दशपूर्वाणि, एतद्धराणां यथोत्तरं महत्तरा निर्जरा एवमर्थेपि भावनीयं, तथा जिनानामप्यवधिजिनप्रभृतीनां यथोक्तं बलिका निर्जरा इयमत्रभावना- एक आवश्यकसूत्रधरस्य वैयावृत्यं करोति। अपरो दशवैकालिकश्रुतधरवैयावृत्यकरस्तस्यावश्यकसूत्रधरवैयावृत्यकरान् महती निर्जरा। एवमधस्तनाधस्तनश्रुतधरवैयावृत्त्यकरादुपर्युपरितर श्रुतधरवैयावृत्यकरो यथोत्तरं महानिर्जरस्तावदवसेयो यावत्रयोदशपूर्वधरवैयावृत्यकराच्चतुर्दशपूर्वधरवैयावृत्त्यकरो महानिर्जरः। एवमर्थेऽपि भावनीयम्। तदभयचिन्तायां सूत्रवैयावृत्त्यकरादर्थवैयावृत्त्यकरो महर्धिको नवरं निशीथकल्पव्यवहारार्थधराणां वैयावृत्यकरात् कालिकश्रुतवैयावृत्त्यकरो महानिर्जरः। तथा श्रुतज्ञानिवैयावृत्त्यकरः तथा भावः परिणामस्तस्मिन् शुद्धेऽशुद्धे च तदनुसारेण निर्जरा प्रवर्तते। तथा सूत्रार्थे युगपच्चिन्त्यमाने यथोत्तरं बलिका तथा मण्डलीकसूत्रार्थवधिकृत्य विचारणीया इहाचार्यः प्रस्तुतमधिकृत्य वैयावृत्त्यकरणे महती निर्जरा। तामेवाह-

[भा.२६२८] पावयणी खलु जम्हा, आयरितो तेन तस्स कुणमाणो।
महतीए निज्जराएं वट्टति साहू दसविहंमि॥

वृ- प्रावचनी प्रावचनिकः खलु यस्मादाचार्यस्तेन तस्य वैयावृत्त्यं कुर्वन् साधुर्महत्यां निर्जरायां वर्तते। एवं दशविधेऽपि वैयावृत्त्ये महानिर्जराकत्वं भावनीयं, सम्प्रति यदुक्तं भावे शुद्धेऽशुद्धे च तदनु सारतो निजरा भवतीति। तत्र शुद्धाभावो व्यवहारतः शुद्धवस्तुप्रभावाद्भवतीति प्रतिपिपादयिषुराह-

[भा.२६२९] जारिसगं जं वत्थुं, सुयं च तिण्हं व ओहिमादीणं।
तारिसतो च्चियभावो उपज्जति वत्थुतो जम्हा॥

वृ- यादृशं यद्वस्तु प्रतिमादिकं यस्य यावच्च श्रुतं त्रयाणां चावध्यादीनां स्वस्थाने ये विशेषास्तस्माद्वस्तुनः श्रुताद्विशेषाद्वा तादृशान् भावः परिणामो व्यवहारतः तादृश उत्पद्यते तदनुसारेण च निर्जरा, ततः पूर्वं श्रुतचिन्तायां अर्थचिन्तायां वा तथा जिनानां च यथोत्तरं वलिका निर्जरोक्ता तथा चैतमेव व्यवहारनयं प्रतिपिपादयिषुराह-

[भा.२६३०] गुणभूइठे दव्वंमि जेन मत्ताहियत्तणं भावे।
इति वत्थुतो इच्छति ववहारो निज्जरं विउलं॥

वृ- येन यतो गुणभूयिष्ठं द्रव्यं ततस्तस्मिन् येन कारणेन मात्राधिकत्वं भावे परिणामे भवतीति अस्मात् कारणात् वस्तुनः प्रतिमाश्रुतादेर्यथोत्तरं गुणभूयिष्टात् विपुलां निर्जरामिच्छति व्यवहारो व्यवहारनयः। एतदेव स्पष्टतरं भावयति-

[भा.२६३१] लक्खणजुत्ता पडिमा पासादी या समत्तलंकारा।
पल्हायति जह वयणं तह निज्जरमो वियाणाहि॥

वृ- या जिनप्रतिमा लक्षणयुक्ताः प्रसादी मनः प्रसादकरणं समस्तालङ्कारा तां पश्यतो यथैव मनः प्रह्लादते तथा निर्जरां विजानीहि। यद्यधिकं मनः प्रल्हत्तिस्ततो महती निर्जरा, मन्दमनःप्रल्हत्तौ तु मंदेतिभावः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२६३२] सुयव्वं अतिसयसुत्तो सुहोचितो तवि तव गुणजुत्तो ।
जो सो मनप्पसातो जायइ सो निज्जरं कुणति ।।

वृ- श्रुतवानेष अत्राप्यनेके भेदास्तथाऽतिशययुक्तोऽवध्याद्यतिशयोपेतोऽत्राप्यवध्यादिविषये बहवस्तरतमविशेषाः सुखोचितोऽपि तपसि स बाह्याभ्यन्तरे गुणे ज्ञानादौ उद्युक्तस्तपोगुणोद्यत इत्येवं योऽसौ यादृशो मनःप्रसादो मनःप्रसत्तिपरिणामो जायते स तादशीं निर्जरां करोतित स्माद्वस्तुतो निर्जरेति व्यवहारनयः । तदेवमुक्तं व्यवहारनयमतमधुना निश्चनयमतमाह ।

[भा.२६३३] निच्छयतो पुन अप्पे, जस्स वत्थुंमि जायते भावो ।
तत्तो सो निज्जरगो, जिन गोयम सीह आहरणं ।।

वृ- निश्चयतः पुनरल्पेऽपि महागुणगुणतराद्धीनगुणेऽपि वस्तुनि यस्य जायते तीव्रः शुभो भावस्तस्मान्महागुणतरविषयभावयुक्तात् स हीनगुणविषयतीव्रशुभभावो निर्जरको महानिर्जरतरः सद्भावस्यातितीव्रशुभत्वात् । अत्र जिनगौतमसिंहजीवआहरणं । तच्चैवं "तिविट्ठत्तणे भयवया वद्धमानसामिणा सीहो विहतो अद्धितिं करइ 'खुड्डुलगेण निहतोमित्ति' परिभवात्, गोयमेणं सारहित्तनेन मनुसासितमा अद्धितिंकरेह । तुमं पसुसीहो नरसीहेन मारियस्स तुज्झ को परिभवो, एवंसो अनुसासिज्जंतो मतो । ततो संसारं भमिऊण भयवतो वद्धमानसामिस्स चरमतित्थगरभवे रायगिहे नयरे कविलस्स बंभणघरे वड्डुतो जातो । सो अनया समोसरणे आगतो भयवंतं दट्ठुण धम्मधम्मेइ । ततो भयवया गोयमसामी पेसितो जहा उवसामेह । ततो गतो अनुसासितो य । जहा एस महप्पा तित्थंकरो, एयंमि जो पडिनिविसति सो दुग्गइं जाति । एवं सो उवसामितो तस्स दिक्खा गोयमसामिना दिन्ना" एतदेवाह-

[भा.२६३४] सीहो तिविट्ठ निहतो भमिउं रायगिहं कविल बड्डुगत्ति ।
जिनवरकहणमनुवसम गोयमोवसम दिक्खा य ।।

वृ- सिंहस्त्रिपृष्टेन निहतः स संसारं भ्रमित्वा राजगृहे कपिलस्य ब्राह्मणस्य बटुकोऽभूत् । जिनस्य वीरस्य कथनं तथापि तस्यानुपशमो, गौतमेन चानुशासने कृतेऽभूदुपशमो दीक्षा च अत्र भगवदपेक्षया हीनगुणेऽपि गौतमे तस्य गुरुपरिणामोऽ जायतेति महती निर्जराऽभवदिति ।।

[भा.२६३५] सुत्ते अत्थे तदुभए पुव्वं भणिया जहोत्तरं बलिया ।
मंडलिए पुन भयणा, जइ जाणइ तत्थ भूयत्थं ।।

वृ- सूत्रेऽर्थे तदुभयस्मिन् स्वस्थाने निर्जरा पूर्वं यथोत्तरं बलिका बलवती भणिता । सम्प्रति पुनः सूत्रार्थतदुभयेषु युगपश्चिन्त्यमानेषु यथोत्तरं निर्जरा बलवती साम्प्रतं मंडली चेवत्ति व्याख्यानार्थमाह मंडलीए पुन इत्यादि मंडल्यां पुनर्भजना विकल्पना यदि जानाति, तत्र मंडल्यां भूतार्थं सद्भूतमर्थं तदा स महानिर्जर इयमत्र भावना मण्डल्यां पठन्ति पाठयन्ति च तत्रावश्यकादिपठतां यथोत्तरं पाठितो बलिकाः । अथ जानाति वैयावृत्यकरो यथाधस्तनसूत्रपाठको ज्ञानादिभिर्गुणैरधिकतरस्ततो-ऽधस्तनश्रुतपाठकस्य वैयावृत्यकरणे महती निर्जरा, ददतां मध्ये य उरितनश्रुतवाचकः स ज्ञानादिभिरधिकतर इति तद्वैयावृत्यकरणे महती निर्जरा । अथ जानाति वैयावृत्यकरोऽधस्तनः श्रुतवाचको ज्ञानादि-भिरधिकतरस्ततोऽधस्तनश्रुतवाचकस्य वैयावृत्यकरणे बलवती निर्जरा वाचकप्रातीच्छिकानां मध्ये यो वाचकस्तद्वैयावृत्यकरणे महती निर्जरा, । अथ वैयावृत्यकरो जानात्येषप्रातीच्छिक आचार्यो वाच्यते तत् प्रत्युज्वालनमात्रं यावत् सर्वमेतस्यायाति सूत्रतोऽर्थतश्चाधिकतरं इति तदा तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतीच्छिकस्य वैयावृत्यकृतौ महती निर्जरा, इह सूत्रेऽर्थे तदुभये च यथोत्तरं बलवती निर्जरेत्युक्तं तत्र यथोत्तरं निर्जराया बलवत्तां भावयति-

[भा.२६३६]　अत्थो उ महिड्ढितो कडकरणेणं घरस्स निप्पती ।
अब्भुट्ठाणे गुरुगा रण्णोपीणेय देवीया ।।

वृ- सूत्रात् केवलात् अर्थाद्वा स सूत्रार्थो महर्द्धिकः किं कारणमिति चेत् उच्यते । अत्र कृतकरणेन । गृहस्य निष्पत्तिर्दृष्टान्तः । इतश्च सूत्रादर्थः ससूत्रो महर्द्धिकः, सूत्रमण्डल्याचार्यादयः प्राघूर्णकप्रभृतीनामभ्युत्थानं कुर्वन्ति । अर्थ मण्डल्यां पुनर्यस्य समीपेऽनुयोगं श्रुतवान् तमेकं मुक्त्वाऽन्यस्य दीक्षागुरोरप्यभ्युत्थाने चत्वारो गुरुकाः प्रायश्चित्तं । ततः सूत्रार्थो राज्ञः शातवाहनस्य याने निगमने दृष्टान्तः । एष गाथाक्षरार्थः । साम्प्रतमेनामेव विवरीषुः कृतकरणेन गृहस्य निष्पत्तिरिति दृष्टान्तं भावयति-

[भा.२६३७]　आराहितो नरवती तिहिं उ पुरिसेहिं तेसिं संदिसति ।
अमुगपुरे सयसहस्सं घरं च एएसि दायव्वं ।

[भा.२६३८]　पट्टगं घेत्तूण गतो उंडियबितियो उ तइओ उभयं ।
निष्फलगा दोन्नि तहिं मुद्दा पट्टो य सफलो उ ।।

वृ- एको नरपतिस्त्रिभिः पुरुषैराधितः ततः परितुष्टः सन्नरपतिस्तेषां प्रत्येकं संदिशति । यथा-अमुकपुरे सुन्दरं गृहं शतसहस्रं च दीनाराणामित्येषां प्रत्येकंदातव्यमिति । तत्रैकोऽमुं संदेशं पट्टके गृहीत्वा लेखयित्वा गतो, द्वितीय उंडि मुद्रां गृहीत्वागतस्तृतीय उभयं पट्टके लिखापयित्वा गतस्तत्र येन पट्टके लेखापितं यथामुकपुरे सुन्दरं गृहं शतसहस्रं च दीनाराणां न तूपरि मुद्रा दापिता । येन पट्टकव्यतिरेकेण मुद्राप्रतिबिम्बमात्रं गृहीतंतौ द्वावपि निष्फलौ जातौ । तथाहि-ते त्रयोऽपि तन्नगरंगतास्तत्र आयुक्तस्तस्य समीपमुपागताः पट्टकं मुद्रामुभयं च दर्शयन्ति । तत्रायुक्तेन प्रथमो भणितो मुद्रां न पश्यामि कथं च दामि, द्वितीयो भणितो जानामि राज्ञो मुद्रां न पुनर्जानामि राज्ञः सन्देसं किं दातव्यमिति, । एवं तौ निष्फलौ जातौ । यस्य तु तृतीयस्य मुद्रा पट्टकश्च स सफलस्तस्यायुक्तेन यथाज्ञसदानात् एष दृष्टान्तः

[भा.२६३९]　एवं पट्टगसरिसं सुत्तं अत्थो य उंडियत्थाणे ।
उस्सगववायत्थो उभयसरित्थो य तेन बली ।।

वृ- एवममुना प्रकारेण पट्टकसदृशं पट्टकस्थानीयं सूत्रं, उंडिका मुद्रा ततः स्थानीयोऽर्थः उत्सर्गापवादस्थ उभयसदृशस्तेन बली । तस्योभयस्य भावात् ।

[भा.२६४०]　सुत्तस्समंडलीए नियमा उठंति आयरियमादी ।
मुत्तूण पवायंतं न उ अत्थे दिक्खाण गुरुंपि ।।

वृ- सूत्रमण्डल्यां वाचयंत आचार्यादय आचार्योपाध्यायप्रभृतयः प्राघूर्णकादीनामागच्छतां सर्वेषामपि नियमादुत्तिष्ठन्ति अभ्युत्थानं कुर्वन्ति । अर्थमण्डल्यां पुनरुपविष्टः सन् यस्य समीपेऽनुयोगः श्रुतस्तमेकं प्रवाचयन्तं मुक्त्वान्यं दीक्षणगुरुमपि नाभ्युत्तिष्ठति यदाभ्युतिष्ठति तदा तस्य प्रायश्चित्तं चत्वारो गुरुकाः, श्रोतारोऽपि यद्याचार्येऽनभ्युत्तिष्ठत्यभ्युत्तिष्ठन्ति तदा तेषामपि प्रायश्चित्तं चतुर्गुरुकं, यदि पुनर्यस्य समीपेऽनयोगं श्रुतवान् तस्य नाभ्युत्तिष्ठति तर्हि तदापि तस्य चतुर्गुरुकम् । अत्र दृष्टान्तो राज्ञो याने देवी तं भावयति-

[भा.२६४१]　पतिलीलं करेमाणी नोठिया सालवाहणं ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

पुहवी नाम सा देवी सो य रुठो तहिं निवो ।।

वृ- राज्ञः सातवाहनस्य पृथिवी नामाग्रमहिषी । अन्यदा सा क्वापि निर्गते राज्ञि शेषाभिरन्तपुरिकाभिर्देवीभिः संपरिवृता शातवाहनवेषमादाय राज्ञ आस्थानिकायामुपविष्टा पतिलीलाविलम्बमानाऽवतिष्ठते । राजा प्रत्यागतः प्रविष्टस्तस्मिन् प्रदेशे । सा च पतिलीलां कुर्वती पृथिवी नाम देवी शातवाहनं राजानमायान्तमपि दृष्ट्वा नोत्थिता । तस्यानुत्थाने शेषा अपि देव्यो नाभ्युत्थितवत्यस्ततः स नृपो राजा तत्र रुष्टो ब्रूते-त्वं तावन्महादेवी, ततो महादेवी वाते नाभ्युत्थिता एताः किं त्वया वारिता यन्नाभ्युत्थानमकार्षुस्ततो न सुन्दरमेतदिति ।।

[भा.२६४२] ततो णं आह सा देवी अत्थाणीए तवाणहा ।
दासावि सामियं पत्तं नोठंति अवि पत्थिवं ।।

वृ- ततो राज्ञोक्तानन्तरं सा पृथिवीनाम देवी राजानमाह । तवास्थानिकायामुपविष्टा दासा अपि नाथाः सम्पूर्णगुणा अपि पार्थिवमपि स्वामिनमागच्छन्तं नाभ्युत्तिष्ठन्ति, तवास्थानिकायाः प्रभाव एव-

[भा.२६४३] तं वा वि गुरुणो मोत्तुं न वि उठेसि कस्सइ ।
न ते लीला कया होंती उठंती हं स तोसितो ।।

वृ- त्वमप्यस्यामास्थानिकायामुपविष्टो गुरूनमुक्त्वा नान्यस्य कस्यापि महीयसोऽप्युत्तिष्ठसि । अहमपि तवास्थानिकायां त्वदीयां लीलां धरन्ती समुपविष्टा । ततो न सपरिवाराभ्युत्थिता । यदि पुनस्ते तव लीला न कृतास्यात्ततोऽहमभ्युत्तिष्ठेयमित्येवं राजा देव्या तोषितः । एवमत्रापि तीर्थकरस्थानीय आचार्योऽर्थमण्डल्यामुपविष्टः सन् न कस्याप्यभ्युत्तिष्ठति अमुमेवार्थं गौतमदृष्टान्तेन दृढयति-

[भा.२६४४] कहंतो गोयमो अत्थं, मोत्तं तु तित्थगरं सयं ।
नवि उठेइ अन्नस्स तग्गयं चेव गम्मति ।।

वृ- न खलु भगवान् गौतमो अर्थं कथयन् स्वकमात्मीयं तीर्थकरं मुक्त्वा अन्यस्य कस्यापि उत्तिष्ठति । अभ्युत्थानं कृतवान्, तद्गतं चेदां सर्वैरपि गम्यते । तदनुष्ठितं सर्वमिदानीमनुष्ठीयते । ततोऽर्थं कथयन् न कस्याप्युत्तिष्ठति ।। सम्प्रति श्रवणविधिमाह-

[भा.२६४५] सोयव्वे उ विही इणमो अवक्खेवादि होइ नायव्वो ।
विक्खेवम्मि य दोसा आणादीया मुणेयव्वा ।।

वृ- श्रोतव्ये पुनरयं विधिरव्याक्षेपादिर्भवति ज्ञातव्य आदशिब्दाद्विकथादिपरिग्रहः । व्याक्षेपे पुनराज्ञादय आज्ञानवस्थामिथ्यात्वविराधनारूपदोषा ज्ञातव्याः, । अत एवाभ्युत्थानमपि न क्रियते; तस्मिन् सति व्याक्षेपादिसंभवात्तथा चैतदर्थमेव द्वारगाथाद्वयमाह-

[भा.२६४६] काउस्सग्गे विक्खेवया य विकहा विसोत्तिया पयतो ।
उवनय वाउलणादि य अक्खेवो चेव आहरणे ।।

[भा.२६४७] आरोवणा परूवण उग्गह तह निज्जरा य वाउलणा ।
एएहिं कारणेहिं अब्भुट्ठाणं तु पडिकुट्ठं ।।

वृ- अनुयोगारंभनिमित्तं कायोत्सर्गे कृते एतैः कारणैरभ्युत्थानं प्रतिकुष्टं निराकृतं, कैः कारणैरत आह-विक्खेवया य इति व्याक्षेपस्य व्याक्षेपशब्दस्य भावः प्रवृत्तिनिमित्तं व्याक्षेपता व्याक्षेप इत्यर्थः । अभ्युत्थाने क्रियमाणे व्याक्षेपो भवति, व्याक्षेपाच्च विकथा चतुर्विधा प्रवर्तते । तत् प्रवृत्तौ चेन्द्रियैर्मनसा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विश्रोतसिका संयमस्थानप्लावनमिति भावः, तस्मादभ्युत्थानकुर्वन् प्रयतः शृणुयात् । प्रयतो नाम कृताञ्जलिप्रग्रहो दृष्ट्वा सूरिमुखारविन्दमवेक्षमाणो बुध्युयुक्तस्तथाभ्युत्थाने क्रियमाणे उपनयस्य विषये व्याकुलता, उपनयः कस्याप्यर्थेन क्रियते अन्यथा वा क्रियेत येन उपनयग्रहणमुपलक्षणं तेन यत् ग्रहणं ज्ञातं तत् व्याकुलनात् भ्रश्यति पृच्छा वा कर्तुमारब्धा विस्मृतिमुपयाति, कालो व्याख्यानस्य त्रुट्यतीति तथा निरन्तरमविच्छेदेन भाषमाणस्य शृण्वतो महानाक्षेपस्तीव्रशुपरिणामरूपो जायते । अभ्युत्थाने तद्वयाघातस्तद्यथा च सति शुभपरिणामाभावतो येऽवध्यादिलाभः संभाव्यते तस्य विनाशोऽत्रार्थे चाहरणं ज्ञातं वक्तव्यं । तथा आरोपणायाः प्रायश्चित्तस्य प्ररूपणे क्रियमाणेऽभ्युत्थाने व्याघातो भवति, व्याघाताच्च सम्यगवग्रहो ग्रहणं न भवति, । न खलु व्याक्षिप्तोऽवग्रहीतुं शक्नोति किं त्वव्याक्षिप्त इति प्रतीतमेतत् । तथाभ्युत्थाने क्रियमाणे व्याकुलता ततः सम्यक् श्रुतोपयोगो न भवति । तदभावाच्च ज्ञानावरणीयस्य कर्मणो न निर्जरा । एतैः कारणैरभ्युत्थानं प्रतिकुष्टं । साम्प्रतमेतदेव गाथाद्वयं विवरीषुः प्रथमतः काउस्सग्गे विक्खेवया य इति भावयति-

[भा.२६४८] उच्चारियाए नंदीए विक्खेवे गुरुतो भवे ।
अप्पसत्थे पसत्थे च दिट्ठंतो हत्थिलावका ।।

वृ- अनुयोगारंभार्थं कायोत्सर्गं कृते नन्द्यां ज्ञानपञ्चकरूपायामुच्चारितायामभ्युत्थानेनान्येन वा प्रकारेण यो व्याक्षेपं करोति, तस्य प्रायश्चित्तं गुरुको मासः । तस्माद्वयाक्षेप न कर्तव्यः । अत्राप्रशस्ते व्याक्षेपकरणे प्रशस्ते च व्याक्षेपाकरणे दृष्टान्तो हस्तिलावकाः हस्ती च शालीनां लावकाश्च हस्तिलावकास्तत्राप्रशस्ते प्रतिपादयति-

[भा.२६४९] जह सालिं लुणावेंतो कोई अत्थारिएहिं उ ।
सेयं हत्थिं तु दावेइ धाविया ते य मग्गओ ।।

[भा.२६५०] न लुओ अह साली उवेक्खेवेण तेन उ ।
वक्खेवेयराणं तु पोरिसी एव भज्जइ ।।

वृ- यथा कोऽपि कुटुम्बी निजे क्षेत्रे अत्थारिएहिं तु ये मूल्यप्रदानेन शालिलवनाय कर्मकराः क्षेत्रे क्षिप्यन्ते ते अस्तारिकास्तैर्लावयन् कथमपि सप्ताङ्गप्रतिष्ठितं श्वेतमारण्यहस्तिनमागतं दृष्ट्वा दर्शयति । तद्दर्शिते च ते हस्तिनो मार्गतः पृष्टो धाविताः आगतैरपि हस्तिनो रूपेणाक्षिप्तैर्हस्तिरूपं वर्णयद्भिः तेन व्याक्षेपेणाथ शालिर्नलूना एवमिहापि अभ्युत्थानेन व्याक्षेपे रतानां पौरुषीभङ्गो भवति । व्याख्यानं पुनर्न किमपि याति, तस्माद्वयाक्षेपो न विधेयः । प्रशस्ते व्याक्षेपाकरणे दृष्टान्तः स्वयं भावनीयः स चैवम्- एकः कौटुम्बिकः शालिक्षेत्रं लावयति । तस्य सत्कया दास्या शालिलुनंत्या सप्ताङ्गप्रतिष्ठितः श्वेतोवनहस्ती चरन् दृष्टो, दास्या ज्ञातं यदि शालिलावकानां कथयिष्यामि ततो हस्तिनं दृष्ट्वा हस्तिनो रूपेणाक्षिप्ता हस्तिनो रूपं वर्णयन्त आसिष्यन्ते एष च हस्ती दिनेऽस्मिन्नवकाशे दृश्यते . ततः शालिर्न लविष्यते यदा तु शालिः परिपूर्णो लूनो भवेत् तदा सा दासी स्वामिनः शालिलावकानां चाकथयत् । ततस्तैरुक्तं किं तदा नाख्यातं दासी प्राह शालिलवितव्यव्याघातो भविष्यतीति हेतोस्तत एवमुक्ते कौटुम्बिकः परितुष्टः, तेन च परितुष्टेन मस्तकप्रक्षालनतो दासी अदासकृता । एवमिहापि व्याक्षेपो करणीयस्तथा च सति भगवदाज्ञापरिपालनतः कर्मक्षयेण त्रिलोकमस्तकस्थो भवति सम्प्रति विकथादिपदव्याख्यानार्थमाह-

[भा.२६५१] विकथा चउव्विहा वुत्ता, इंदिएहिं विसोत्तिया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंजलीपग्गहो चेव दिट्ठीबुध्धुजुत्तया ।।

वृ- विकथा स्त्रीकथादिभेदाच्चतुर्विधोक्ता, विश्रोतसिका इन्द्रियैरुपलक्षणमेतत् मनसा वाचा प्रयतता अञ्जलिप्रग्रहो गुरुमुखे दृष्टिर्बुद्ध्युपयुक्तता च उपनयव्याकुलतेति व्याख्यानयति-

[भा.२६५२] तस्स ते वणेतो सो उ अन्नहा वोवणिज्जइ ।
नायं वाकरणे वा वि पुच्छा अद्धा च भस्सइ ।।

वृ- अभ्युत्थानेनान्येन वा व्याकुलतायां स दर्शित उपनयो नश्यति, विस्मृतिं याति यदि वा व्याकुलतयाऽन्यथोपनीयते ज्ञातं वा व्याकरणं वा पृच्छा वा कर्तुमारब्धा अद्धा वा पौरुषीलक्षणा भ्रश्यति । आक्षेपव्याख्यानार्थमाह-

[भा.२६५३] भासतो सावओ वावि तिव्वसंजायमानसो ।
लभंतो ओहिलंभादी जहा मुंडिवगो मुनी ।।

वृ- निरन्तरमविच्छेदेन भाषकः श्रावको वा उत्तरोत्तरविशिष्टार्थावगाहनस्तीव्रसंजातमानसो जातपरमाक्षेपो यद्यभ्युत्थानेन व्याक्षेपो नाभविष्यत्ततोऽवधिलाभादिकमलपस्यत । यथा मुडिम्बको मुनिस्तथा सुहिडिम्बक आचार्यः परमकाष्टीभूते शुभध्याने प्रवृत्तो अवध्यादिलब्धिमलप्स्यत यदि तस्य पुष्पमित्रेण ध्यानविघ्नोनाकरिष्यत । परं सर्वसाधुसाध्वीप्रभृत्यत्याकुलमभवदिति तेन ध्यानव्याघातः कृतः । अधुना आरोवणा परूवणेति व्याख्यानार्थमाह-

[भा.२६५४] आरोवणमक्खेवं व दाउकामो तहिं तु आयरितो ।
वाउलणाए फिटइ उ घेतुमणो न उ गेण्हे ।।

वृ- आरोपणां प्रायश्चित्तं तत्रार्थं मण्डल्यामाचार्यो दातुकामः प्ररूपयितुकाम इति तात्पर्यार्थः यद्यभ्युत्थानं करोति, ततो व्याकुलतया स्फिटति, व्याकुलेनैव प्रायश्चित्तप्ररुपणा तिष्ठतीति भावस्तथा-ऽवग्रहीतुमना अभ्युत्थानेन व्याकुलनातो नावगृह्णाति ।

[भा.२६५५] एगग्गो उ गिण्हइ विक्खप्पंतस्स विस्सुतिं जाइ ।
इंदपुरइंददत्ते, अज्जुणतेने य दिठंता ।।

वृ- एकाग्रः सन् अवगृह्णाति, अभ्युत्थानेन पुनर्व्याक्षिप्यमानस्यावगृहीतमपि विस्मृतिं याति, कुतोऽनवगृहीतार्थावग्रहणं व्याक्षेपाद्यविस्मृतिगमने इन्द्रपुरे पत्तने इन्द्रदत्तस्य राज्ञः सुताः दृष्टान्तः । तथा च तेषां कला अभ्यस्यतां प्रमादविकथादिव्याक्षेपान्न किमप्यवगृहीतमभूत् । यद्यपि किञ्चिदवगृहीतं, तदपि विस्मृतिमुपगतमत एव तै राधावेधो न कर्तुं शक्तिः । तथा अर्जुनस्तेनश्च दृष्टान्तः । तथा हि-सोऽर्जुनकः स्तेनोऽगडदत्तेन सह युष्यमानो न कथमप्यगडदत्तेन पराजेतुं शक्यते, । ततो निजभार्यातीवरूपवती सर्वालङ्कारभूषिता रथस्य तुण्डे निवेशिता, ततः स्त्रीरुपदर्शनव्याक्षेपात् युद्धकरणं विस्मृतिमुपगतमिति सोऽगडदत्तेन विनाशितः । एवमिहापि व्याक्षेपात् श्रुतोपयोगप्राणविनाशमाप्नोति ।

[भा.२६५६] एए चेव य दोसा अब्भुठाणे वि होंति नायव्वा ।
नवरं अब्भुठाणं, इमेहिं तीहिं कारणेहिं तु ।।

वृ- यस्मात् श्रवणे कर्तव्ये व्याक्षेपादिषु क्रियमाणेष्वेतेऽनन्तरोक्ता दोषास्तस्माद्व्याक्षेपादिरहितैः श्रोतव्यं, । एते एव च व्याक्षेपायो दोषा अभ्युत्थानेऽपि क्रियमाणे भवन्ति, । तस्मादभ्युत्थानमपि न कर्तव्यं, । नवरमभ्युत्थानमेभिर्वक्ष्यमाणैस्त्रिभिः कारणैः कर्तव्यम् । तान्येवाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२६५७] पगयसमत्ते काले अज्झयणुद्देस अंगसुयक्खंधे ।
एएहिं कारणेहिं अब्भुठाणं तु अनुयोगो ।।

वृ- प्रकृते सम्पाते तथा काले समाप्तेऽध्ययनोद्देशांगश्रुतस्कन्धेषु वा समाप्तेषु यदि प्राघूर्णकाद्यागमनं भवति तदेतैः कारणैरभ्युत्थानमनुयोगो भवति, । तत्र कालोऽध्ययनादिकं च प्रतीतं न प्रकृतप्रतिपादनार्थमाह-

[भा.२६५८] कप्पंमि दोणि पगया पलंबसुत्तं च मासकप्पे, य ।
दो चेव य ववहारे पढमे दसमे य जे भणिया ।।

वृ- कल्पे कल्पाध्ययने द्वे प्रकृते । तद्यथा-प्रलम्बसूत्रं मासकल्पश्च । मासकल्पसूत्रं तु व्यवहारे द्वे प्रकृते ये भणिते प्रथमे दशमे चोद्देशके । तत्र प्रथमे आरोपणासूत्रं दशमे पञ्चविधव्यवहारसूत्रम् । न केवलमेतदेव प्रकृतं किन्त्वन्यदपि तथा चाह-

[भा.२६५९] पेढियातो य सव्वातो चूलियातो तहेव य ।
निज्जुत्तीकप्पनामस्स ववहारस्स तहेव य ।।

वृ- सर्वाः प्रकल्पकल्पादिगताः पीठिकास्तथा सर्वाश्चूलिकास्तथा कल्पनाम्नो व्यवहारस्य च तथा चैवेति वचनादन्येषां च दशवैकालिकप्रभृतीनां च निर्युक्तयः प्रकृतानि । अत्रैवादेशान्तरमाह-

[भा.२६६०] अनोवि य आएसो, जो रायनिंतो य तत्थ सोयव्वे ।
अनुयोगधम्मयाए किइकम्मं तस्स कायव्वं ।।

वृ- अन्योऽपि चादेशो मतान्तरं तत्र श्रोतव्ये यो रात्निको रत्नाधिकोऽनुभाषक इत्यर्थः । तस्य नन्द्यामुच्चारितायामनुयोगधर्मतया कृतिकर्म वन्दनं कर्तव्यं, । तथा-

[भा.२६६१] केवलिमादी चोद्दसदसनवपुव्वी य उठणिज्जो उ ।
जे तिहि ऊनतरगा समाणे अगुरुं न उठंति ।।

वृ- अर्थमपि कथयता समागच्छन् केवली अभ्युत्थातव्यः । आदिशब्दान्मनःपर्यवज्ञानी अवधिज्ञानी च परिगृह्यते, तथा ये तेभ्यो नवपूर्वधरादिभ्य ऊनतरास्तैः पूर्वधरादिरभ्युत्थानीयः, तथाहि कथको यदि कालिक श्रुतधारी तर्हि तेनार्थमपि कथयता नवपूर्वीदशपूर्वी चतुर्दशपूर्वी वाभ्युत्थातव्यो नवपूर्विणा दशपूर्वी । दशपूर्विणा चतुर्दशपूर्वी इति । तथा यदि समगच्छन् समानः समानश्रुतोऽगुरुश्च तदा तं नाभ्युत्तिष्ठति । तदेवं प्रवचने निर्जरा चेति द्वारद्वयं गतमिदानीं सापेक्षद्वारमाह-

[भा.२६६२] सावेक्खे निरवेक्खे गच्छे दिठंतो गामसगडेणं ।
राउलकज्जनिउत्तं जहा गामेणं कयं सगडं ॥

[भा.२६६३] अस्सामिबुद्धियाए पडियं सडियं व निखक्खत्ति ।
रन्नाणत्ते दंडो सयं व सीयंति कज्जेसु ।।

वृ- आचार्यस्य शिष्यैः प्रतीच्छिकैश्च सर्वं कर्तव्यं, ते च तथा कुर्वन्तः सापेक्षा उच्यन्ते, ये तु न कुर्वन्ति, ते निरपेक्षास्तत्र सापेक्षे निरपेक्षे च गच्छे दृष्टान्तो ग्रामशकटेन, । तद्यथा-एकस्मिन् ग्रामे ग्रामेण ग्रामेयकैः पुरुषैः राजकुलकार्यनियुक्तं शकटमेकं कृतं । ततो यत्ते राजकुलेनाज्ञाप्यन्ते धान्यं घृतघटादि वा नेतव्यं आनेतव्यं वा तस्मिन् शकटे आरोप्यानयन्ति नयन्ति वा, तथा नास्य कश्चित्स्वामीत्यस्वामि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बुद्ध्यात्मनोऽपि कार्याणि तेन कुर्वन्ति । अस्वामिबुद्ध्यैव पतितं शटितं वा तस्य शकटस्य नापि रक्षन्ति, ततः कालेन गच्छता तत्भग्नं, अन्यदा राजकुलेन ते आज्ञप्ता धान्यमानय, तैः शकटाभावान्नानीतं, तदाज्ञाभङ्गोऽकारीति तेषां दण्डः कृतः, । कार्येषु च समापतितेषु स्वयं ते सीदंतो दृश्यते ।

[भा.२६६४] एवं न करेंति सीसा, काहींति पडिच्छियति काऊणं ।
ते वि य सीसत्ति ततो, हिंडणपेहादिसुसिग्गो ।

वृ- एवं ग्रामेयकदृष्टान्त-प्रकारेण शिष्याः प्रातीच्छिकाः करिष्यन्तीति कृत्वा न कुर्वन्तीति, तेऽपि च प्रातिच्छिकाः शिष्याः करिष्यन्तीति बुद्ध्या न कुर्वते । ततः सीदन्नाचार्यः स्वयं भिक्षामटति । स्वयं चोपकरणप्रेक्षादिकं विधत्ते इति हिण्डना प्रेक्षादौ च सिग्रः परिश्रान्तः तेषां च शिष्यप्रतीच्छिकानां दण्डः प्रायश्चित्तं दीर्घसंसारिता, वा, तदेवं निरपेक्षे दृष्टान्तः । सम्प्रति सापेक्षे भावयति-

[भा.२६६५] बितिएहिं उसारवियं, सगडं रन्ना य उक्कराय कया ।
इय जे करेंति गुरुणो निज्जरलाभो य कित्तीय ।

वृ- अपरस्मिन् ग्रामे द्वितीयके ग्रामेयकै राजकुलकार्यनियुक्तं शकटं कृतं, तेन राजकीयं धान्यधृतघटाद्यानयन्ति नयन्ति च, । तच्च शकटं तैः सम्यक् सारापितं, ततो न कदाचिदाज्ञाभङ्गः कृत इति परितुष्टेन राज्ञा ते उत्कराः करविहीनाः कृताः । एष दृष्टान्तोऽयमर्थोपनय इति एवमुक्तेन प्रकारेण शिष्याः प्रातीच्छिकाश्चात्मानुग्रहबुद्ध्या ये गुरोःकृत्यं कुर्वन्ति तेषां महती निर्जरा भूयात् ज्ञानादिलाभः कीर्तिश्च । गतं सापेक्षद्वारं । सम्प्रति भक्त्यव्यवच्छेदद्वारमाह-

[भा.२६६६] दव्वे भावे भत्ती, दव्वे गणिया उ दुति जाराणं ।
भावंमि सीसवग्गो, करोति भत्तिं सुयधरस्स ।।

वृ- आचार्यस्य भक्तौ क्रियमाणायां तीर्थस्याव्यच्छेदो । भक्तावक्रियमाणायां तु तीर्थव्यवच्छेदः । सा च भक्तिर्द्विधा द्रव्ये भाव च । तत्र यन्नाम गणिका भुजङ्गानां भक्तिं कुर्वन्ति, दुतयो वा जाराणां, सा द्रव्ये द्रव्यभक्तिर्भावे भावविषया भक्तिःपुनरियं यत् शिष्यवर्गः श्रुतधरस्य भक्तिं करोति, । यद्यपि चान्योऽपि गुरोर्भक्तिं करोति, । तथा ममापि निर्जरा स्यादित्यात्मानुग्रहबुद्ध्यान्येनापि भक्तिः कर्तव्येति लोहार्यगौतमदृष्टान्तेन भावयति-

[भा.२६६७] जइवि य लोहसमाणे गेणहइ खीणंतराइणो उच्छं ।
तहवि य गोयमसामी पारणए गिण्हए गुरुणो ।।

वृ- यद्यपि च लोहसमानो लोहार्यः क्षीणान्तरायस्य भगवतो वर्धमानस्वामिनः सदैवोच्छमेषणीयभक्तादिकं गृह्णाति तस्य भगवद्वैयावृत्यकरत्वात् । उक्तं च-

धन्नो सो लोहज्ञो खंति खमाएवरलोहसरिवन्नो ।
जस्स जिनो पक्षातो इच्छइ पानीहिंभुत्तुं जे ।।

तथापि गौतमस्वामी स्वपारणके गुरोर्वर्धमानसवामिनो योग्यं गृह्णाति । एवमन्येनाप्यवैयावृत्यकरभावेऽपि यथायोग्यं गुरोः कर्तव्यं । तदेवं भक्तिर्व्याख्याता अधुना तस्यां क्रियमाणायां यथा तीर्थस्याव्यवच्छेदो भवति, तथा भावयति-

[भा.२६६८] गुरुअनुकंपाए पुन, गच्छो अनुकंपितो महाभागो ।
गच्छानुकंपयाए, अव्वोच्छित्ती कया तित्थो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- गुरोरनुकम्पया अनुग्रहेण गच्छो महाभागे महाचिन्त्यशक्तिरनुकम्पितो गृहीतो भवति, । गच्छानुकम्पया चाव्यवच्छित्तिस्तीर्थस्य कृता ।।

[भा.२६६९] किह तेन न होइ कयं वेयावच्चं दसविहं जेण ।
तस्स पओत्ता अनुकंपितो उ थेरो थिरसभावो ।।

वृ- कथं तेन दशविधं वैयावृत्यं न कृतं ? येन स्थविर आचार्यः स्थिरस्वभावोऽनुत्सुकस्तस्य दशविधस्य वैयावृत्यप्रयोक्ता ऽनुकम्पितोऽनुगृहीतस्तत्करणे कृतं तेन दशविधमपि वैयावृत्यं, तत्प्ररुपणायास्तदधीनत्वादिति भावः, ।तदेवमव्यवच्छेदऽपिभावितोऽधुना अतिसेसा पञ्च आयरिए-

[भा.२६७०] अन्नेवि अत्थि भणिया, अतिसेसा पंच होंति आयरिए ।
जो अन्नस्स न कीरइ, न यातिचारो असतिसेसो ।।

वृ- आतिशेषाः पञ्च भवन्त्याचार्ये इत्यनेन वचनेनान्येऽप्यतिशयाः पञ्चार्थतो भणितास्सन्ति यः पञ्चानामन्यतरोऽप्यन्यस्यानाचार्यस्य न क्रियते, न च शेषेऽनाचार्ये पञ्चानामेकरस्मिन्नप्यतिशये असति अक्रियमाणेऽतीचारः, ।आचार्यस्य तु पञ्चाप्यतिशयाः कर्तव्याः ।पञ्चानामेकतरस्मिन्नप्यतिशयेअसति अक्रियमाणे अतीचारः ।तानेव पञ्चातिशयानाह-

[भा.२६७१] भत्ते पाने धुव्वण पसंसणा हत्थपाय सोए य ।
आयरिए अतिसेसा अनातिसेसा अनायरिए ।।

वृ- उत्कृष्टं भक्तमुत्कृष्टं पानं, मलिनोपधिधावनं, प्रशंसनं हस्तपादशौचं च । एते पञ्चातिशेषा अतिशया आचार्ये, त्वनतिशया अनाचार्ये एते न कर्तव्या इति भावः ।सम्प्रति भक्तादिव्याख्या-

[भा.२६७२] कालसहावानुमयं भत्तं पानं च अच्चितं खेत्ते ।
मलिन मलिना य जाया, चोलादी तस्स धोवंति ।।

वृ- यत्कालानुमतं स्वभावानुमतं च कालानुकूलं स्वभावानुकूलं चेत्यर्थः, । भक्तमाचार्यस्य प्रदेयमितिप्रथमोऽतिशयः, तथा यत् यत्र क्षेत्रेऽर्चितं पानीयं तत्सम्पाद्यमाचार्यस्येति द्वितीयोऽतिशयः, । तथा चोलादीनि मलिनमलिनानि जातानि तस्याचार्यस्य प्रक्षाल्यन्ते, । किं कारणमिति चेदत आह-

[भा.२६७३] परवादीण अगम्मो नेव अवण्णं करिंति सुयसेहा ।
जह अकहितो वि नज्जइ, एस गणी उज्ञपरिहीनो ।।

वृ- यथा परवादिनामगम्यो भवति, यथा च शुचिशैक्षाश्श्रोक्षशिष्याः अवज्ञां न कुर्वते, यथा चाकथितोऽपि ज्ञायते एष गणी आचार्यस्तथानुद्यमसौन्दर्यं तत्परिहीनो मलिनमलिनवस्त्रस्तत्र प्रक्षालनेन कर्तव्यो, न च विभूषादोषप्रसक्तिर्यत आह-

[भा.२६७४] जह उवगरणं सुज्झइ, परिहारमाणो अमुच्छितो साहू ।
तव खलु विसुद्धभावो, विसुद्धवासान परिभोगो ।।

वृ- यथा साधुरुपकरणं धर्मोपरकरणममूर्च्छितः सन् परिहरन् परिभोगयन् शुद्धयते न परिग्रहदोषेण लिप्यते अभूर्च्छितत्वात्तथाचार्येऽपि विशुद्धवाससां परिभोगे विशुद्धभावः सन् शुद्ध्यतीति एष तृतीयोऽतिशयः ।।सम्प्रति प्रशंसनमाह-

[भा.२६७५] गंभीरो मद्दवितो अब्भुवगय वच्छलो सिवो सोमो ।
विच्छिनकुलुप्पनो, दाया कयन्नुतो सुयवं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२६७६] खंतादिगुणोवेओ, पहाणनाणतवसंजमावसहो ।
एमाइ संतगुरुणवि कत्थणं संसणातिसये ।।

वृ- गंभीरोऽपरश्रावी, मार्दवितो मार्दवोपेतस्तथाभ्युपगतस्य शिष्यस्य प्रातीच्छिकस्य वत्सलो यथोचितवात्सल्यकारी, तथा शिवोऽनुपद्रवस्तथा सोमः शांताकृतिः तथा विस्तीर्णकुलोत्पन्नो दाता कृतज्ञः श्रुतवान् तथा क्षान्त्यादिगुणोपेतः ज्ञानप्रधानतपः संयमानामावसथो गृहं एवमादीनां सतां गुरुणां गुणानां विकथनं श्लाघनमेव चतुर्थः प्रशंसनातिशयः । अधुना प्रशंसनस्य फलमाह-

[भा.२६७७] संतगुणकित्तणया अवणवादीन चेव पडिघातो ।
अविहोज्ज संसईणं पुच्छाभिगमे दुविहं लाभो ।।

वृ- सद्गुणोत्कीर्तनायां महती निर्जरा भवति । तथा सद्गुणकीर्तनाया अवर्णवादिनां प्रतिघातः कृतो भवति, अपि भवेदयं महान् गुणो गुणो गुणवन्तमाचार्यं श्रुत्वा बहूनां राजेश्वरतलवरप्रभृतीनां संशयिनां पृच्छार्थमभिगमो भवति । पृच्छानिमित्तमाचार्यसमीपमागच्छन्ति आगताश्च धर्मं श्रुत्वा अगारधर्ममनगारधर्मं वा प्रतिपद्यन्ते इति द्विविधो लाभः पञ्चमातिशयप्रतिपादनार्थमाह-

[भा.२६७८] करचरण नयन दसणाइ धावणं पंचमो उ अतिसेसो ।
आयरियस्स उ सययं, कायव्वो होति नियमेन ।।

वृ- करचरणनयनदशनादि प्रक्षालनं पञ्चमोऽतिशयः । सततमाचार्यस्य नियमेन भवति कर्तव्यः । अत्र पर आह-

[भा.२६७९] मुहनयनदंतपायादि धोवणे को गुणोत्ति ते बुद्धी ।
अग्गि मतिवाणिपडुया तो होइ अनोतप्पया चेव ।।

वृ- मुखनयनदंतपादादिधोवने को गुण इति एषा ते बुद्धिः स्यात् । अत्रोच्यते-मुखदन्तादिप्रक्षालने-ऽग्निपटुता जाठराग्निप्राबल्यं, मतिपटुतावाक्पटुता च नयनपादादि प्रक्षालने अनोत्तप्पया अलज्जनीयशरीरता भवति । एष गुणो मुखादिप्रक्षालेन । एते पञ्चातिशयाः । पञ्च उपलक्षणमन्यदपि यथायोगमाचार्यस्य कर्तव्यम् ।। तथा चाह-

[भा.२६८०] असढस्स जेन जोगाण संधणं जह उ होइ थेरस्स ।
तं तं करेंति तस्स उ जह से जोगा न हायंति ।।

वृ- यथा स्थविरस्याशठस्य सतो येन येन क्रियमाणेन योगानां सन्धानं भवति तत्तस्याचार्यस्य साधवः कुर्वन्ति, । तथा से तस्याचार्यस्य योगा न हीयन्ते न हानिमुपगच्छन्ति ।।

[भा.२६८१] एए पुन अतिसेसे उवजीवेयावि कोवि दढदेहो ।
निदरिसणं एत्थ भवे अज्जसमुद्दा य मंगू अ ।।

वृ- एतान् पुनरतिशयान् कोऽप्याचार्यो दृढदेहः सन् नोपजीवति यस्तु दृढदेहः सोऽशठो भूत्वा उपजीवति न तु तैरतिशयैर्गर्वं करोति हर्षं वा मनसि मन्यते, त्र निदर्शनं भवन्त्यार्यसमुद्रा मंग्वाचार्याश्च ।

[भा.२६८२] अज्जसमुद्दा दुब्बलकिति(त)कम्मा तिन्नि तस्स कीरंति ।
सुतत्थ पोरिसि समुट्ठियाण तइयं तु चरमाए ।।

वृ- आर्यसमुद्राः सूरयो दुर्बलाः दुर्बलशरीरास्ततस्तेऽतिशयानुपजीवितवन्तोऽनुपजीवने योगसन्धानकरणाशक्तेस्तथा च तस्य प्रतिदिवसं त्रीणि कृतकर्माणि विश्रामणारूपाणि क्रियन्ते । तद्यथा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वे सूत्रार्थपौरुषी समुपस्थितानां तृतीयं कर्म चरमायां पौरुष्यामियमत्र भावना-सूत्रपौरुषी समाप्त्यनन्तरं यावत् निषद्या क्रियते तावत् प्रथमा विश्रामणा द्वितीयार्थपौरुषी समाप्त्यनन्तरं तृतीया चरमपौरुषी पर्यन्ते कालप्रतिक्रमणानन्तरम् ।।

[भा.२६८३] सड्ढकुलेसु य तेसिं दोच्चंगादी उ वीसु घेप्पंति ।
मंगुस्स न किइकम्मं न य वीसुं घीप्पए किं चि ।।

वृ- श्राद्धकुलेषु भक्तेषु तेषामाचार्यसमुद्राणामाचार्याणां योग्यानि कूरादीनि द्वितीयाङ्गादौ मात्रकादौ विष्वक् गृह्यन्ते । आर्यमङ्गोः पुनराचार्यस्य न कृतिकर्म क्रियते नापि तद्योग्यं पौद्गलादि किञ्चित् विष्वक् मात्रके गृह्यते । किंतु यदपि श्राद्धकुलेष्वतिभक्तेषूत्कृष्टं लभ्यते । तदपि गृहीत्वा ज्ञातोञ्चपतद्गृहे क्षिप्यते । विष्वगानीतमपि न भुङ्क्ते तौ च द्वावप्याचार्यौ विहरन्तावन्यदा सोपारके गतौ । तत्र च द्वौ श्रावकावेकः शाकटिकोऽपरो वैकटिको वैकटिको नाम सुरासन्धानकारी । तौ च द्वावपि श्रावकावार्यसमुद्राचार्याणां योग्यमतिशायि पौद्गलिकप्रभृतिकं विष्वङमात्रके गृह्यमाणमार्यमङ्गूनां पुनर्योग्यमेकस्मिन्नेव पतद्गृहे गृह्यमाणं पश्यतो दृष्ट्वाचार्यमङ्गुसमीपमागच्छतः ।

[भा.२६८४] बेंति ततो नं सड्ढा तुज्झ व वीसुं न घेप्पए कीस ।
ततो बेंति अज्ञमंगू तुब्भे च्चिय इत्थ दिट्ठंतो ।।

वृ- ततः समीपागमनान्तरं तौ श्रावकौ ब्रुवाते किन्नार्यसमुद्राणामिव युष्माकमपि विष्वग् प्रायोग्यं गृह्यते । ततो ब्रुवन्त्यार्यमङ्गव आचार्या अत्रार्थे यूयमेव दृष्टान्ताः । कथमित्याह-

[भा.२६८५] जा भंडि दुब्बला ऊ तुं तुज्झे बंधहा पयत्तेण ।
नवि बंधह बलिया ऊ दुब्बलबलिए व कुंडीवि ।।

वृ- अहो शाकटिक! या तव भण्डी गन्त्री दुर्बला तां यूयं प्रयत्नेन बध्नीश । ततः सा वहति पुनरबध्वा वाह्यते तदा विनश्यति, । या पुनर्बलिका तां नैव बध्नीय बन्धनव्यतिरेकेणापि तस्या वहनात् वैकटिकां प्रतिब्रुवते-भो वैकटिक! या तव कुण्डी दुर्बला तां वंशदलैर्बध्वा तत्र मद्यं संधत्थ । या तु बलिका कुण्डी तस्या बन्धमकृत्वापि तत्र सन्धानं कुरुथ । दुब्बलबलिए व कुंडी वि एवं कुंड्यपि दुर्बला बलिका च भण्डीवत् वक्तव्या उक्तो दृष्टान्तः । साम्प्रतमुपनयमाह ।।

[भा.२६८६] एवं अज्ञसमुद्दा दुब्बलभंडीवा संठवणयाए ।
धारंति सरीरं तू बलि भंडी सरिसग वयं तु ।।

वृ- एवमुक्तेन प्रकारेण दुर्बलभंडी दुर्बलगन्त्रीवात्मीयं शरीरं संस्थापनया धारयन्ति नेतरथा ततस्तेषां योग्यं विष्वक् मात्रके गृह्यते, वयं तु बलिकभण्डीसदृशास्ततो न शरीरस्य संस्थापनापेक्षामाह-

[भा.२६८७] निप्पडिकम्मो वि अहं जोगाण तरामि संधणं काउं ।
नेच्छामि य बितियंगे वीसुं इति बेंति ते मंगू ।।

वृ- निःप्रतिकर्मापि योगानां सन्धानं कर्तुं शक्नोमि ततो नेच्छामि द्वितीयेऽङ्गमात्रके विष्वक् गृह्यमाणमिति ते मङ्ग्वाचार्या ब्रुवते ।।

[भा.२६८८] न तरंति तेन विना अज्ञसमुद्दा उ तेन वीसं तु ।
इय अतिसेसायरिए सेसा पंतेन लाटेंति ।।

वृ- आर्यसमुद्राः पुनराचार्यास्तेन विष्वक् प्रायोग्यग्रहणेन विना योगानां सन्धानं कर्तुं न शक्नुवन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन तत्प्रायोग्यं विष्वक् गृह्यते । एवं शेषाणामपि इत्यस्मात् कारणात् अतिशेषा अतिशया आचार्ये भवन्ति, शेषाः पुनः साधवः प्रान्तेन-लाटयन्ति । आत्मानं यापयन्ति । गतस्तृतीयोऽतिशयः ।।सम्प्रति चतुर्थ पञ्चमं चातिशयं अंतो उवसयस्स एगरायं वा दुरायं वा इत्यादि लक्षणं विभावयिषुरिदमाह-

[भा.२६८९] अंतो बहिं च विसुं वसमाणो मासियं तु भिक्खुस्स ।
संजम आयविराधन सुन्ने असुभोदओ होइ ।।

वृ- यदि भिक्षुरुपाश्रयस्यान्तरपवरके विष्वक् वसति, यदि वा बहिरुपाश्रयात् शून्यगृहादिषु तदा तस्य प्रायश्चित्तं मासिकं लघु न केवलमिदं प्रायश्चित्तं किन्तु दोषाश्च । तानेवाह-अन्तर्वहिर्वा शून्ये स्थाने वसतोऽशुभोदयोऽशुभकर्मोदयो भवति । तद्भावाच्चात्मविराधना संयमविराधना च । एनामेव भावयति-

[भा.२६९०] तब्भावुवयोगेणं रहिए कम्मादि संजमे भेदो ।
मेरावलंबिया मे वेहानिसमादि निव्वेदो ।।

वृ- तस्य भावस्तद्भावः । पुंवेद इत्यर्थः । तस्मिन्नुपयोगस्तद्भावोपयोगेन विजने स्थाने वर्तमानः सहायरहितो हस्तकर्मादि कुर्यात् । एवं संयमे संयमस्य भेदो विराधना । तथा कोऽप्यतिप्रबलपुंवेदो-दयपीडित एव चिन्तयेत् । यथा-मया मर्यादा सकलजनसमक्षं गुरुपादसमीपेऽवलम्बिताः । सम्प्रति चाहमतिपीडित आसितुं न शक्नोमि ततो निर्वेदात् वैहानसमुक्तलम्बनमादिशब्दादन्यद्वा आत्मधाता-दिकमाचरेत् । एषात्मविराधना तस्माद्बहिरंतर्वा एकाकिना न स्थातव्यम्, आह यदि संयमान्निर्गतभावस्त-तस्तस्य सहाया अपि किं करिष्यन्ति तत आह-

[भा.२६९१] जइवि य निग्गयभावो तहवि य रक्खिज्जए स अन्नेहिं ।
वंसकडिल्लच्छिन्नो वि वेनुतो पावए न महिं ।।

वृ- यद्यपि च स संयमान्निर्गतभावस्तथापि सोऽन्यैर्हस्तकर्मादि वैहानसादि वा समाचरन् रक्षते । अत्रैवार्थे प्रतिवस्तूपमामाह-वंयकडिले वंश-गहने च्छिन्नोपि वेणुको वंशो महीं न प्राप्नोति । अन्यैरन्यैर्वंशै रपान्तराले स्खलितत्वात्, । एवं संयमभावान्निर्गतोऽपि शेषसाधुभिः सर्वथा पतन् रक्ष्यते तदेतद्भि-क्षोरुक्तमिदानीं गणावच्छेदकाचार्ययोराह ।।

[भा.२६९२] वीसु वसंते दप्पा गणि आयरिए य होंति एमेव ।
सुत्तं पुन कारणियं भिक्खुस्सवि कारणेणुन्ना ।।

वृ- विष्वग् दर्पात् कारणमन्तरेण गणिनि गणावच्छेदके आचार्ये च एवमेव भिक्षोरवि च प्रायश्चित्तं संयमात्मविराधने च भवतः, यद्येव तर्हि सूत्रमनवकाशमत आह-सूत्रं पुनः कारणिकं कारणमधिकृत्य प्रवृत्तं, ततो नानवकाशं, न केवलं गणावच्छेदकाचार्ययोः कारणे वसतेरन्तर्बहिर्वा वसनमनुज्ञातं किन्तु भिक्षोरपि कारणे बहिरन्तर्वा वसनस्यानुज्ञा । अथ किं तत्कारणं यदधिकृत्य सूत्रं प्रवृत्तमत आह-

[भा.२६९३] विज्जाणं परिवाडी पव्वे पव्वे य देंति आयरिया ।
मासद्धमासियाणं पव्वं पुन होइ मज्झं तु ।।

वृ- आचार्याः पर्वणि पर्वणि विद्यानां परिपाटीर्ददति, । विद्याः परावर्तन्ते इति भावः । अथ पर्व किमुच्यते तत आह-मासार्धमासयोर्मध्यं नः पर्व भवति, । एतदेवाह-

[भा.२६९४] पक्खस्स अठमी खलु मासस्स य पक्खिअं मुणेयव्वं ।
अन्नंपि होइ पव्वं उवरागो चंदसूराणं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अर्धमासस्य पक्षात्मकस्य मध्यमष्टमी सा खलु पर्व, । मासस्य मध्यं पाक्षिकं पक्षेण निर्वृत्तं ज्ञातव्यं, । तच्च कृष्णचतुर्दशीरुपमवसातव्यं, । तत्र प्रायो विद्यासाधनोपचारभावता बहुलादिका मासा इति वचनाच्च न केवलमेतदेव पर्व किन्त्वन्यदपि पर्व भवति, । यत्रोपरागो ग्रहणं चन्द्रसूर्ययोः एतेषु च पर्वसु विद्यासाधनप्रवृत्तेर्यद्येवं तत एकरात्रग्रहणं, । तत आह-

[भा.२६९५] चाउद्दसी गहो होइ कोइ अहवावि सोलसिग्गहणं ।
वत्तं तु अनज्ञंते होइ दुरायं तिरायं वा ।।

वृ- कोपि विद्याया ग्रहश्चतुर्दश्यां भवति, अथवा षोडश्यां शुक्लपक्षप्रतिपदि विद्याया ग्रहणं । किमुक्तं भवति कोऽपि विद्याया ग्रहश्चतुर्दश्यां कृतः कोऽपि प्रतिपदि क्रियते इत्येवं त्रिरात्रवसनमथवैकेन दिवसेन व्यक्तमज्ञायमाने विद्याग्रहणाय भवति द्विरात्रं त्रिरात्रं वा विष्वग् वसनमिति यदुक्तं सूत्रे- तिरायं वेति ।

[भा.२६९६] वा सद्देण चिरं पी महपानादिसु सो उ अच्छेज्जा ।
उयविए भरहम्मी जह राया चक्कवट्टादी ।।

वृ- वाशब्देनेदं सूच्यते चिरमपि कालं महाप्राणादिषु ध्यानेषु स तिष्ठेत्, स हि यावन्नाद्यापि विशिष्टलाभो भवति, तावन्न निवर्त्तते ध्यानादत्रैव दृष्टातमाह-यथा राजा चक्रवर्त्यादिरादिशब्दाद्वासुदेवपरिग्रहः उयविए प्रसाधिते अर्धभरते वा निवर्तते, यावदवध्यादिलाभो न भवतीति, ।

अथ महाप्राणध्याने कः कियन्तं कालमुत्कर्षतस्तिष्ठतीति प्रतिपादनार्थमाह-

[भा.२६९७] बारसवासा भरहाहिवस्स, छच्चेव वासुदेवाणं ।
तिन्निय मंडलियस्स छम्मासा पागयजनस्स ।।

वृ- महाप्राणध्यानमुत्कर्षतो भरताधिपस्य चक्रवर्तिनो द्वादशवर्षाणि यावद्भवति, षट् वर्षाणि यावद्वासुदेवानां बलदेवानामित्यर्थः । त्रीणि वर्षाणि माण्डलिकस्य षण्मासान् यावत् प्राकृतजनस्य ।।

[भा.२६९८] जे जत्थ अहिगया खलु अस्सादद्धक्खमाइया रन्ना ।
तेसि भरणंसि ऊने भुंजति भोए अदंडादी ।।

वृ- ये अस्सादद्धक्खमाइया महाश्वपत्यादयो यत्राश्वभरादौ राज्ञा अधिकृता व्यापारिताः स तेषामश्वादीनां भरणे ऊने सति भोगान् अदंडाक्षतिदण्डादिरहितान् भुङ्क्ते न तस्य तथा भोगान् भुञ्जानस्य दण्डोऽपराधो वाऽद्याप्यश्वादिभरणाभावात् एष दृष्टान्त उक्तः । सम्प्रति दार्ष्टान्तिकयोजनामाह-

[भा.२६९९] इयपुव्वगयाधीते बाहु सनामेव तं मिणेपिच्छ ।
पिय इत्ति व अत्थपए मिणइत्ति व दोवि अविरुद्धा ।।

वृ- इत्येवममुना दृष्टान्तप्रकारेण पूर्वगते अधीते बाहु स नामे भद्रबाहुरिव पूर्वगतं पश्चान्महापानध्यानबलेन मिनोति निः-शेषमात्मेच्छया तावन्ननिवर्तते ततश्चिरकालमपि वसति, तस्य न कोऽप्यपराधः प्रायश्चित्तदण्डो वा सम्प्रति महापानशब्दस्य व्युत्पत्तिमाह-पिवतीति वा मिनोतीति वेत द्वावपि शब्दावेतावविरुद्धौ तत्वत एकार्थावित्यर्थः । तत एवं व्युत्पत्तिः-पिबति अर्थपदानि यत्रस्थितस्तत्पानं, महच्च तत्पानं च महापानमिति ।।

[भा.२७००] वा अंतो गणी व गणो विक्खेवो मा हु होज्ज अग्गहणं ।
वसते हि परिखित्तो उ अत्थेन कारणे तेहिं ।।

वृ- अन्तर्गणी गणो वा वाशब्दादेवं बहिरपि । इयमत्र भावना-यद्याचार्यो वसतेरन्तस्ततो गणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहिर्वसति, गणो अंतस्तत आचार्यो बहिः । किं कारणमाचार्यो गणश्च विष्वक् वसति तत आह- 'विक्खेवो' इत्यादि, आचार्यस्य विद्यादिगुणयत्तो व्याक्षेपो माभूत्, अग्रहणमिति अयोग्यानां कर्णाभ्यटनतो विद्यादीनां संग्रहणं भूयात् । एताभ्यां कारणाभ्यां वृषभैः परिक्षिप्तोऽन्तर्बहिर्वा विष्वग् आचार्यो वसति;

मू. (१५०) *गणावच्छेइयस्स नं गणंसिं दो अइसेसा पन्नत्ता, तं जहागणावच्छेइए अंतो उवस्सयस्स एगरायं वा दुरायं वा वसमाणे नो अइक्कमइ, गणावच्छेइए बाहिं उवस्सयस्स एगरायं वा दुरायं वा वसमाणे नो अइक्कमइ ।*

वृ- गणाच्छेदकस्य गणे गणमध्ये द्वावतिशयौ भवतस्तद्यथा गणावच्छेदक उपाश्रयस्यान्त एकरात्रं वा वसन् नातिक्रामति नातीचारभाग् भवति, । तथा गणावच्छेदको बहिरुपाश्रयादेकरात्रं वा वसन् नातिक्रामति । एतौ द्वावप्यतिशयौ सूत्रोक्तौ गणावच्छेदकस्य तस्य द्रष्टव्यौ यो नियमादाचार्यो भविष्यति, यः पुनर्गणावच्छेदकत्वे वर्तमान आचार्यपदस्यानर्हस्तस्यैतौ द्वावप्यतिशयौ न कल्पेते,

[भा.२७०१] पंचेते अतिसेसा आयरिए होंति दोन्नि उ गणस्स ।
भिक्खुस्स कारणंमि उ अतिसेसा पचंवी भणिया ।।

वृ- एते अनन्तरसूत्रोदिताः पञ्चातिशया आचार्ये भवन्ति । द्वौ गणिनो गणावच्छदेकस्य, भिक्षोः पुनः कारणेपंचाप्यतिशया भणिताः । एतदेवाह-

[भा.२७०२] जे सुत्ते अतिसेसा, आयरि अत्थतो व जे भणिया ।
ते कज्जे जयसेवी, भिक्खूवि न बाउसी भवति ।।

वृ- ये अतिशेषाः आचार्ये आचार्यसूत्रे साक्षादभिहिता, ये चान्ये पञ्चार्थतो भणितास्तान् दशाप्यतिशयान् कार्ये कारणे समागते कज्जंति वा कारणंति वा एगठमितिवचनात् । जयसेवीति यतनया सेवमानो भिक्षुरपि न बकुशी भवति, । न वकुशत्वदोषेण गृह्यते इति भावः । किं तत्कार्यमत आह-

[भा.२७०३] बाला सहमतरंतं सुइवादिपप्प इड्डिवुड्ढं वा ।
दसविभइयतिसेसा भिक्खुस्स जहक्कमं कज्जे ।।

वृ- बालमसहमतरन्तं ग्लानं शुचिवादिनं ऋद्धिवृद्धं वा प्राप्य दशाप्यतिशेषा भिक्षोः कार्य समापतिते यथाक्रमे भाजिता विकल्पिता भवन्तीतिभावः । तथा हि वालस्य हस्तपादादयः प्रक्षाल्यन्ते, अन्येतिशया यथासंभवं क्रियन्ते । तस्य असहो नामासमर्थस्तस्यापि यथाप्रयोगमतिशयाः क्रियन्तयथाऽतरन् ग्लानः शुचिवादी शौचप्रधानः शिष्यः ऋद्धिवृद्धो राजादि प्रव्रजित इत्येषामपि दशाप्यतिशा यथा योगं विधेयाः-

मू. (१५१) *से गामंसि वा जाव रायहाणिंसि वा एगवगडाए एगदुवाराए एगनिक्खमणपवेसाए नो कप्पइ बहूणं अगडसुयाणं एगयओ वत्थए । अत्थि याइण्हं केइ आयारपकप्पधरे, नत्थि याइण्हं केइ छेए वा परिहारे वा; नत्थि याइण्हं केइ आयारकप्पधरे से संतरा छेए वा परिहारे वा ।*

[भा.२७०४] कप्पति गणिणो वासो बहिया एगस्स अतिपसंगेन ।
मा अगडसुया वीसुं वसेज्ज अह सुत्तसंबंधो ।।

वृ- कल्पते गणिनो गणावच्छेदिनो वासो वहिर्वहिरकस्यैकाकिनः इति श्रुत्वा मा अतिप्रसङ्गेनाकृतश्रुता अपि विष्वक् वसेयुस्ततस्तेषां विष्वक्वासप्रतिषेधार्थमिदं सूत्रमित्येष सूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या सेशब्दोऽथ शब्दार्थः ग्रामे वा नगरे वा यावत्करणात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खेडंसि वा कव्वडंसि वा इत्यादिपरिग्रहः । राजधान्यां वा एगवगडाए एगो वगडः परिक्षेपो यस्या सा एकवगडा तस्यां तथा एकस्मिन् प्रदेशे निष्क्रमणप्रवेशो यस्याः सा एकनिष्क्रमणप्रवेशे तस्यां न कल्पते बहूनामकृतश्रुतानामगीतर्थानामित्यर्थः । एकत एवास्यां वसतौ वस्तुं अस्ति चात्र एतेषां मध्ये आचारप्रकल्पधरस्तर्हि नास्त्यमीषां कश्चिच्छेदः परिहारो वा शब्दादन्यदपि प्रायश्चित्तमथ नास्ति कश्चिदत्र एतेषां मध्ये आचारप्रकल्पधरस्तर्हि से तेषामन्तरा तस्मात्स्थानादिप्रतिक्रमणालक्षणाच्छेदः परिहारो वा ।

[भा.२७०५] एगंमि वी असंते न कप्पती कप्पती य संतंमि ।
उउबद्धे वासासु य गीयत्थो देसिए चेव ।।

वृ- एतेषां बहूनामकृतश्रुतानामेकतो वसतामेकस्मिन्नपि गीतार्थेऽसत्यविद्यमाने ऋतुबद्धे वर्षासु च वस्तुं न कल्पते । यदि वसति तत् ऋतुबद्धे काले प्रायश्चित्तं मासलघु वर्षाकाले चतुर्लघुकं । अथैकोऽप्यस्ति गीतार्थस्तर्हि तस्मिन् ऋतुबद्धे वर्षासु च वस्तुं कल्पते, न तत्र प्रायश्चित्तमिति भावः । किं कारणं गीतार्थेन सह संवसतां न प्रायश्चित्तमत आह-गीतार्थो देशक एव भवति । इयमत्र भावना-यथा केचित् पुरुषा अटव्यां विप्रनष्टाः, केनचिद्देशकेन दृष्टास्तेमणिता मा इतो व्रजन्तोऽटवीं प्रविशताहं भवतो निस्तारयामि, । ततस्तेन ऋजुकेन पथा नगरं प्रापिता, एवं गीतार्थोऽपि मोक्षपथविप्रनष्टानां मोक्षपथप्रदर्शक इति तेन सह संवसतां सतां कालद्वयेऽपि नास्ति प्रायश्चित्तमिति ।।

[भा.२७०६] किह पुन होज्ज बहुनामगडसुयाणं तु एगतो वासो ।
होज्ञा हि कक्खडंमि खेत्ते अरसादि चइयाणं ।।

वृ- कथं केन कारणेन पुनर्बहूनामकृतश्रुतानामेकत्र वासो भवेत्, । सूरिराह-कर्कश क्षेत्रे अरसादित्याजितानां भवेदेकत्र वासः । तथाहि-ते साधवो महति गच्छे वर्तमाना नगरे रुक्षेरसविरसादिभिराहारै र्निर्भिर्त्सिताः सम्प्रधारयन्ति कियच्चिरं वयं रुक्षाहारैर्योगं संस्तरणं कर्तुं शक्नुमस्तस्माद्गच्छाम एवं चिन्तयित्वा गच्छादपक्रामन्ति । एवमेतेषामकृतश्रुतानां बहूनामेकत्र वासः-

[भा.२७०७] चइयाण य सामत्थं संघयणजुयाणमाउलाणं पि ।
उउवासे लहुलहुगा सुत्तमगीयाणमानादी ।।

वृ- अरसविरसादिभिराहारैस्त्याजितानामाकुलानां संहननयुतानामपि अपिशब्दो भिन्नक्रमत्वादत्र योजित एवं सामत्थं पर्यालोचनं भवति । यथा कियन्तं कालं वयं रुक्षाहाराः स्थास्यामस्तस्मादपक्रमामो गच्छादिति, एवं चिन्तयित्वा यदि ऋतुबद्धे काले वसन्ति तदा प्रायश्चित्तं मासलघु वर्षाकाले चतुर्लघुकं । एतेनागीतार्थानां विषयेऽधिकृतं सूत्रं न केवलमधिकृतं प्रायश्चित्तं किन्त्वाज्ञादयश्च तानेव मिथ्यात्वादीन् दोषान् द्वारगाथया संजिधृक्षुराह-

[भा.२७०८] मिच्छत्तसोहिसागारियाइ गेलन्ने अहव कालगए ।
अद्धाणउमसंभम भए य रुद्धे य उ सरिए ।।

वृ- तेषामगीतार्थानां मतिभेदादिना मिथ्यात्वं स्यात्, तथा शोधिस्तैर्न ज्ञायते, तथा स सागारिकायां वसतौ ये दोषाः परिहार्यास्तेषामपरिज्ञानं अथवा ग्लानत्वे अथवा कालगते अध्वनि मार्गे अवमे अवमौदर्ये अग्न्यादिसंभ्रमे बोधिकम्लेच्छस्तेन भये अकालवर्षेण रुद्धे तथा अपसृते पथि गच्छतां कस्मिंश्चित् मन्दगतित्वात् स्फिटिते या यतना तां न जानन्ति । एष द्वारगाथासंक्षेपार्थः ।।साम्प्रतमेनामेव विवरीषुः-

[भा.२७०९] मतिभेया १ पुव्वोग्गह २ संसग्गीए य ३ अभिनिवेसेनं ४ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गोविंदे य ५ जमाली १ सावग २ तवन्निए ३ गोठे ।।

वृ- कस्यापि मतिभेदात् मिथ्यात्वं स्यात्, कस्यापि पूर्वव्युद्ग्राहात् कस्यापि संसर्ग्या कस्यचिदभिनिवेशेन, । अत्रार्थे निदर्शनान्याह-गोविंदे य इत्यादि, अत्र गोविन्दजमालिशब्दयोर्व्यत्ययेनोपन्यासो गाथानुलोम्यात्परमार्थतः पुनरेवं पाठः जमालिर्गोविन्दश्रावकः तवनियः श्रावकभिक्षुर्गोष्टि गोष्टामाहिल एतानि यथाक्रमं निदर्शनानि तथा चाह-

[भा.२७१०] मतिभेएण जमाली, पुव्वग्गहिएण होइ गोविंदो ।
संसग्गि सावग भिक्खू गोठामाहिलअभिनिवेसे ।।

वृ- मतिभेदेन मिथ्याद्दष्टिर्जायते यथा जमालिः पूर्वगृहीतेन भवति मिथ्याद्दष्टिर्यथा गोविन्दः । संसर्ग्या यथा श्रावकभिक्षुरभिनिवेशेन यथा गोष्टामाहिल एतानि च निदर्शनानि सुप्रतीतानीति न कथ्यन्ते ।।

गतं मिथ्त्वद्वारमधुना शोधिद्वारं सागारिकं द्वारे चाह-

[भा.२७११] आवन्नमणावण्णे सोहिं न वियंति ऊनमहियं वा ।
जे य वसहि य दोसा परिहरति न ते अयानंतो ।।

वृ- अकृतश्रुता आलोचिते परेण एष प्रायश्चित्तं प्राप्तो न वेति न जानन्ति अजानन्तश्चापन्नेऽनापन्ने वा प्रायश्चित्तं शोधिं नैव ददति यदि वा ऊनामधिकां वा ददाति । गतं शोधिद्वारमधुना सागारिकाद्वारमाह-ये च वसतौ दोषास्तानजानन्नकृतश्रुतो न परिहरति सम्प्रति ग्लानत्वादिद्वारचतुष्टमाह-

[भा.२७१२] गेलन्ने वोव्वच्छं कतेंति नयविधिं वियानंति ।
अद्धाणमडंति सया जयाण न याणे व उमेवि ।।

वृ- ग्लानत्वेऽज्ञानतो विपर्यासं कुर्वन्ति अनागाढे आगाढकृत्यमागाढे नागाढकृत्यमुभयत्रापि प्रायश्चित्तं चतुर्गुरुकं । गतं ग्लानद्वारमथ कालगतद्वारमा-न च मृतस्य विधिं बन्धनच्छेदनादिकं परिष्ठापनाविधिं वा जानन्ति मृतस्योपधिरुपहत इति त्यज्यते । सम्प्रत्यध्वद्वारमाह-अध्वानं पन्थानमजानतः सदा सर्वकालं रात्रौ दिवसे वाऽटन्ति न च कारणतो रात्रावपि गमने यतनां जानन्ति । एवमवमेऽपि अवमौदर्येपि वक्तव्यं । तत्रापि यतनां न जानन्तीति भावः संभ्रमादिद्वारकदम्बकमाह-

[भा.२७१३] अगनादिसंभमेसु य बोहिगमेच्छादिएसु य भएसु ।
रायदुट्ठादीसु य विराहगाजयण अयानंता ।।

वृ- अग्न्यादिसंभमेसु तथा बोधिकास्तेना म्लेच्छाः प्रतीता आदिशद्वात्परचक्रादिपरिग्रहः । तदादिकेषु राजद्विष्टादिषु च भयेषु राजद्विष्टं राजप्रद्वेषः । आदिशब्दादशिवादिपरिग्रहस्तथा भिक्षाचर्यां गतेऽकाल-वर्षतो नदीपूरेणावरुद्धे पथि सह व्रजतां मन्दगतित्वादपसृते यतनामजानन्तः संयमात्मविराधका भवति ।

[भा.२७१४] संभम नदि रुद्धस्स वि उन्निक्खंतस्स अहव फिडियस्स ।
उसरियसहायस्स व छड्डेउ बहिं उवहतोत्ति ।।

वृ- अग्न्यादिसंभ्रमवशादेकाकिनस्तथा नदीनिरुद्धस्य उन्निःक्रान्तस्य अथवा मन्दगतित्वात्सार्थात् स्फिटितस्य अपसृतसहाया यस्य वा अपगतसहायस्य उपधिमुपहत इति कृत्वा च्छर्दयति त्यजत्ये-बहुश्रुतः ।

[भा.२७१५] एएण कारणेणं अगडसुयाणं बहूणवि न कप्पो ।
बितिए य रायदुट्ठे असिवोमगुरूण संदेसा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एतेनानन्तरोदितेन कारणेनाकृतश्रुतानां बहूनामप्येकत्र वासो न कल्पे द्वितीयपदे पुनः कल्पते क्केत्याह-राजद्विष्टेऽवमौदर्ये गुरुणां सन्देशाच तथाहि राजप्रद्वेषवशादेकाकी आत्मद्वितीय आत्मतृतीयो वा भवेत् । एवमशिवेऽवमौदर्ये च भावनीयं । तथा गुरोः सन्देशवशादागाढकारणे गीतार्थानामभावे अगीतार्था अपि व्रजन्ति इति ।

[भा.२७१६] तह नाणादीनट्ठाए एएसिं गीतो दिज्ञएक्केक्को ।
असती एगागी वा फिडिया वा जाव न मिलंति ।।

वृ- तथा ज्ञानादीनामर्थाय ज्ञाननिमित्तं दर्शननिमित्तं चारित्रनिमित्तं वैयावृत्त्यकरणनिमित्तं वा चलितानां तेषां गीतार्थानामभावे अगीतार्था अपि गच्छन्ति । स्पर्धकपतौ वा कालगत आचार्यसमीपमथ सार्थात् मन्दगतितया स्फिटिता यावन्नाद्यापि मिलन्ति । तावदेकत्र बहूनामकृतश्रुतानामपि वासो न विरुध्यते ।।

[भा.२७१७] एगाहिगमद्धाणे अंतरा तत्थ होज्ज वाघातो ।
तेनच्छेज्ञातत्थ वि सेहस्स नियल्लगा बेंति ।।

[भा.२७१८] ततो वि पलाविज्जइ गीयत्थ विइज्जगं तु दाऊणं ।
असतीए संगारो कीरइ अमुगत्थं मिलियव्वं ।।

वृ- कोऽपि साधुः गीतार्थाभावे आचार्येण क्वचित् प्रयोजने प्रेषितो भणितश्चाद्यैव प्रत्यागन्तव्यमिति एवमेकाहगसे एकदिनगमागमे अध्वनि अन्तरा अपान्तराले तत्र व्याघातो भवेत् । तेन कारणेन स यत्र प्रेषितस्तत्रैवासीत् न प्रत्यागच्छति, । अथ चैतस्य स्वज्ञातय उत्प्रव्राजननिमित्तमाचार्यसमीपं गता अपश्यन्तः सर्वतः समन्तात् निरीक्षन्ते, निरीक्षमाणाश्च तत्र गता यत्र स गतस्तिष्ठति । ततो येषां समीपे स प्रेषितस्तत्साधुभिर्ज्ञातं यथा शैक्षस्य निजकाः समायातास्तिष्ठन्ति । ते च ब्रुवते वयमात्मीयमुत्प्रव्राजयिष्यामस्ततः स ततोऽपि स्थानात् द्वितीयं गीतार्थं दत्वा पलाय्यते दूरं, यत्रतन्निजकानां गतिविषयो नास्ति, असति गीतार्थे अगीतार्थोऽपि सहायो दीयते, तेषां च सङ्केतः क्रियते, यथाऽमुकप्रदेशे मिलितव्यमगीतार्थस्यापि सहायस्याभावे एकाक्यपि प्रेष्यति । तत्रापि सङ्केतः कर्तव्य एवमकाकिनस्त्रिप्रभृतीनां वा बहूनामृतुबद्धे वर्षासु च वासो भवति ।।

[भा.२७१९] रायदुट्ठादीसु व सव्वेसुं चेव होइ संगारो ।
ण्हाणादिवओसरणे, गीयत्थ विइज्जगं मग्गे ।।

[भा.२७२०] असती एगागी उ निब्बंधे वा बहूण अगीयाणं ।
सामायारीकहणं मा बहिभावं निरुंभंति ।।

वृ- राजद्विष्टादिषु राजद्विष्टाशिवावमौदर्यसंभ्रमादिषु सर्वेषु भवति सङ्केतः कर्तव्यः, । तथा स्नानादिनिमित्तं जिनप्रतिमास्नानरथनिर्याणादिनिमित्तं समवसरणं भूयसामाचार्यादीनां मिलनं भविष्यतीति समवसरणे श्रुते कोऽप्याचार्यसमीपमागतय द्वितीयं गीतार्थं मार्गयति, । तस्य द्वितीयो गीतार्थो दातव्यः, असति अविद्यमाने गीतार्थे, अविद्यमानता च द्विधा । सदभावेनासदभावेन वा, सदभावो नाम सन्ति गीतार्थाः परं ग्लानादिप्रयोजनव्यापृता, असदभावो मूलत एव गीतार्था न सन्ति तत्र सदभावेन असदभावेन वा अविद्यमाने गीतार्थे स प्रतिषेधनीयो यथा नास्ति द्वितीयो गीतार्थः । अथ स निर्बन्धं करोति तर्हि स एकाकी प्रेष्यते । यदि वा बहवोऽगीतार्थाः सहाया दीयन्ते बहूनामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्नानदर्शनादिनिमित्तं गमनेच्छाभावात् । तेषां च बहूनामगीतार्थानां या पथि सामाचारी या च समवसरणे प्रविष्टानां तस्याः कथनं अथ कस्मात्ते निर्बन्धेऽपि कृते मुत्कल्यन्ते, तत आह-मा निरुध्यमाना बहिर्भावं व्रजेयुरिति कृत्वा ।

मू. (१५२) *से गामंसि वा जाव रायहाणिंसि वा अभिनिव्वगडाए अभिनिदुवाराए अभिनिक्खमणपवेसणाए नो कप्पइ बहूणं वि अगडसुयाणं एगयओ वत्थए, अत्थि याइ ण्हं केइ आयारपकप्पधरे जे तत्तिय रयणिं संवसइ नत्थि या इत्थ केइ छेए वा परिहारे वा; नत्थिया इत्थ केइ आयारपकप्पधरे, जे तत्तिय रयणिं संवसइ सव्वेसिं तेसिं तप्पत्तियं छेए वा परिहारे वा ।*

[भा.२७२१] अन्ने गामे वासं नाऊण निवारिय अगीयाणं ।
सग्गामे मा वीसुं वसेज्ज अगडा अयं लेसो ।।

वृ- अन्यस्मिन् ग्रामे अगीतार्थानां वासं निवारितं ज्ञात्वा मा स्वग्रामे विष्वगपि वासः कल्पते इति मन्यमाना अृता अकृतश्रुताः स्वग्रामे विष्वक् वसेयुरतस्तस्मिन्निषेधार्थमिदं सूत्रमित्ययं सूत्रसम्बन्धलेशः । अथवाऽयमन्यः सम्बन्धः-

[भा.२७२२] अगडसुया वाहिकया समागमो एस होइ दोण्हंपि ।
सच्छंद अनिस्सिया वा निस्सियजयणा विहं भणिया ।।

वृ- अनन्तरसूत्रेऽकृतश्रुता अधिकृता अस्मिन्नपि सूत्रे ते एवाकृतश्रुताः प्रोच्यन्ते, इत्येष द्वयोरपि सूत्रयोः समागमः सम्पर्कः । अथवाऽधस्तनानन्तरसूत्रे स्वच्छन्दतोऽनिश्रितो उक्ताः । अस्मिन् पुनर्गीतार्थनिश्रितानां यतना भणिता, । अनेन सम्बन्धेनायातस्यास्य व्याख्या-'से गामंसि वा' इत्यादि पूर्ववत् । नवरमभिनिव्वगडाए अभि प्रत्येकं नियतो वगड परिक्षेपो यस्यां सा अभिनिव्वगडा तस्यां पृथक् परिक्षेपायामित्यर्थः । तथा अभि प्रत्येकं नियतं द्वारं यस्याः सा तथा तस्यां तथा अभि प्रत्येकं निष्क्रमणप्रवेशौ निष्क्रमणप्रवेशस्थानं यस्याः सा तथा तस्यां वसतौ बहूनामकृतश्रुतानामेकतो वस्तुमस्ति चात्र कश्चिदाचारप्रकल्पधरो यस्तृतीयां रजनीं गत्वा तैः समं वसति । तर्हि तेषामापन्नः समापन्नो नास्ति कश्चित् च्छेदः परिहारो वा, नास्ति कश्चिदाचारप्रकल्पधरो यस्तृतीयां रजनिं गत्वा तैः समं वसति तर्हि तेषां सर्वेषामपि तत्प्रत्ययमगीतार्थ सह सम्बन्धिनः प्रत्ययं च्छेदः परिहारो वा एष सूत्रसंक्षेपार्थः -

[भा.२७२३] गामे उवस्सए वा अभिनिव्वगडाए दोस ते चेव ।
नवरं पुन नाणत्तं तइ दिवसे गीयसंवसणा ।।

वृ- ग्रामे वा एकस्मिन्नुपाश्रये विष्वक् अभिनिवगडायां पृथक् परिक्षेपायामुपलक्षणमेतत् पृथक् द्वारायं पृथक् निष्क्रमणप्रवेशायां । येऽनन्तरसूत्रे मिथ्यात्वादयो दोषा उक्तास्ते एवान्यूनातिरिक्ता द्रष्टव्याः । नवरं पूनर्नानात्वमिदमस्मिन् सूत्रे यदि गीतार्थनिश्रया वसति तर्हि तृतीयदिवसे गीतसंवसनं गीतार्थेन सह संवसनं कर्तव्यमाचार्यस्तृतीयदिवसे तेषां शोधिनिमित्तं गीतार्थमेकं प्रेषयत्येवं च तेषां नास्ति प्रायश्चित्तं । अत्र पर आह-

[भा.२७२४] एवं पि भवे दोसा दोसु दिवसेसु जे भणिय पुव्विं ।
कारणियं पुन वसही असती भिक्खोभए जयणा ।।

वृ- ननु यदि तृतीयेदिवसे गीतार्थेन सह संवसनमेवमपि ये पूर्वं भणिता मिथ्त्वादयो दोषास्ते द्वयोर्दिवसयो र्भवन्ति । आचार्य आह-सत्यमेतत्; केवलमिदं सूत्रं कारणिकं, कारणवशप्रवृत्तमतो न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोषः किं पुनस्तत्कारणमत आह- 'वसही असती' इत्यादि, वसतिरेकत्र सर्वेषां न विद्यते यदि वा भिक्षा सर्वेषामेकत्र न भवति । अथवोभयमेकत्र सर्वेषां न संभवति तत एतेषां त्रयाणां कारणानामन्यतमेन कारणेन पृथक् पृथक् वसन्ति । तत्र च यतना कर्तव्या यतनया च संवसां प्रायश्चित्ताभावः तामेवाह-

[भा.२७२५] संकिठा वसहीए निवेसणस्संतो अन्नवसहीए ।
असती वाडगंतो तस्स असती होज्ञ दूरे वा ।।

वृ- स्वग्रामे संक्लिष्टायामतिसङ्कटायां वसतौ सर्वेषामेकत्र स्थानं न भवति । तदा एकनिवेशनस्यान्तः पृथगन्यस्यां वसतौ स्थातव्यमसत्येकनिवेशनस्यान्तरन्यस्या वसतेरभावे वाटकस्यान्तः पृथगन्यस्यां वसतौ वसन्ति । अथवा वाटकस्याप्यन्तः पृथगन्या वसतिर्न लभ्यते तदा वाटकस्यबहिर्हस्तशताभ्यन्तरे पृथगन्या वसतिर्गवेषणीया । तस्य हस्तशतस्याभ्यन्तरे वसतेरभावे दूरेऽपि वसतिरन्या स्यात्; । तत्र हस्तशताभ्यन्तरं यावत् यतनाविधिमाह—

[भा.२७२६] वीसुंपि वसंताणं दोनि वि आवासगा सह गुरुहि ।
दूरे पोरिसि भंगे उग्घाडा गंतु विगडंति ।।

वृ- निवेशनपाटकहस्तशताभ्यन्तरे विष्वगपि वसतामेष विधिर्दिवसे दिवसे द्वे अप्यावश्यके प्रभातिकवैकालिकप्रतिक्रमणलक्षणे सह गुरुभिः कर्तव्ये । भिक्षामप्यटित्वा ततः संनिवृत्ता आचार्यस्य समीपे समागत्यालोचयन्ति । अथ हस्तशतस्यवहिर्वसतिर्लब्धा तर्हि गुरुसमीपे चतुर्थपौरुष्यामालोचनां कृत्वा वैकालिकमावश्यकं स्वकीयायां वसतौ कुर्वन्ति । ततः प्रातरप्यावश्यकं तत्र कृत्वा गुरुमसमीपमागत्य प्रत्याख्यानां गृह्णन्ति दूरे इत्यादि यदि पूनर्दूरे अन्यस्मिन् ग्रामे स्थिता भवेयुस्ततो यदि गुरुसकाशमागच्छातां पौरुषीभङ्गस्तत उद्घाटायां पौरुष्यामागत्याचार्यसमीपे आलोचयन्ति प्रत्याख्यानं च गृह्णन्ति पूर्वार्धिका एतत् दूरे स्थितानामविशेषेणोक्तम् अधुना विशेषमभिधित्सुराह-

[भा.२७२७] गीयसहाया उ गया आलोयण तस्संतिय गुरुणं ।
अगडा पुन पत्तेयं आलोयंती गुरुसगासे ।।

वृ- तत्र यदि तेषां दूरस्थितानां कोऽपि गीतार्थः सहायोऽस्ति तर्हि ते गीतसहाया गीतार्थसहाया दूरे गताः सन्तस्तस्य गीतार्थस्य पुरत आलोचयन्ति । स पुनर्गीतार्थ उद्घाटायां पौरुष्यां गुरुणां समीपमागत्य कथयति, अथ नास्ति कोपि तेषं गीतर्थसहायस्तर्हि ते केवला अकृतश्रुता उद्घाटायां पौरुष्यां गुरुसकाशे समागत्य प्रत्येकं प्रत्येकमालोचयन्ति ।

[भा.२७२८] एताण य जंताण य पोरिसिभंगो गुरुवयेती ।
थेरेअजंगमंभिव मज्झण्हे वावि आलोए ।।

वृ- यदि दूरे वसतिर्लब्धा उद्घाटायां च पौरुष्यामागच्छतां गच्छतां च पौरुषीभङ्गस्ततो गुरवः स्वयं तेषामकृतश्रुतानां समीपं व्रजन्ति, । आचार्यो वृद्धत्वेन ग्लानत्वेन वा गन्तुं न शक्तस्ततः स्थविरे अजङ्गमे वाचार्ये ते अकृतश्रुता मध्यान्हे गुरुसमीपमागत्यालोचयन्ति ।

[भा.२७२९] एवंपिदुल्लहाए पडिवसहठिया न एंति पतिदिवसं ।
समणुण दढधिइ य अ तरुणेय बहिया विसज्जंति ।।

वृ- एवमपि अनेनापि दुर्लभायां वसतौ दूरे प्रतिवृषभस्थिता न प्रतिदिवसं गुरुसमपमागच्छन्ति, अर्थादापन्नं द्वितीये दिवसे आलोचका आगच्छन्ति, । अथ कीदृशास्ते प्रतिवृषभा यानाचार्यः प्रेषयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत् आह-समणुन्नेत्यादि । समनोज्ञानामपि येषां परस्परं प्रतिस्तान् समनोज्ञानद्दढधृतीन् अतरुणान् मध्यमवयसो बहिः प्रतिवृषभानाचार्या विसर्जयन्ति, । तदेवं वसत्यलाभे यतनोक्ता ।

[भा.२७३०] दुल्लभभिक्खे जतिउं, सग्गामुब्भाम पल्लिया सुं च ।
अतिखेय पोरसिवहे न वावि ठायंति तो वीसुं ।।

वृ- दुर्लभे भैक्षे यदि स्वग्रामे उद्भ्रामकभिक्षाचारप्रत्यासन्नग्रामे पल्लिकादिसु वसन्ति, तथापि यतित्वापि नास्ति संस्तरणं, अथवा अतिशयेन महता कालक्षेपेण यदि पर्याप्तं कथमपि लभ्यते । पौरुषीवधेन द्वितीयचतुर्थपौरुषीभङ्गेन ततो विष्वक् अन्यक्षेत्रेऽपि गीतार्थाभावेनाकृतश्रुता अपि तिष्ठन्ति, । ते च विष्वक् क्षेत्रेषु तथा तिष्ठन्ति यथा आचार्ये स्पर्द्धकेन सह त्रीणि स्पर्धकानि भवन्ति ।।

[भा.२७३१] उभयस्स अलंभंमिवि गीता सति वीसु ठंति अगडसुया ।
दुसु तीसु व ठाणेसुं पतिदिवसालोय आयरिओ ।।

वृ- उभयस्य वसते भैक्षस्य वाऽलाभे गीतार्थस्याभावेऽकृतश्रुता अपि विष्वक् तिष्ठन्ति । कथमित्याह-द्विषु त्रिषु वा स्थानेष्वाचार्यस्थानेन सहोत्कर्षवस्त्रिषु स्थानेषु इत्यर्थः, । तत्र भिक्षाऽलाभे उभयालाभे वा विष्वक् स्थितानां प्रतिदिवसमाचार्यास्तेषामन्तिकं गत्वा तानालोकते, । प्रतिपृच्छादिदानेन तेषां सारं करोतीत्यर्थः । किंकारणमाचार्येण प्रतिदिवसं तेषां समीपे गन्तव्यमत आह-

[भा.२७३२] सयरा भवंति अनवेक्खणाए जइ भिन्नवायणा लोए ।
पडिपुच्छ सोहिचोयण तम्हा उ गुरु सया वयइ ।।

वृ- भिन्नप्रवहणाः स्वैरिणो भवन्ति । एव तेऽपि स्वैरिणो जायन्ते, तस्मात् प्रतिपृच्छाशोधि-शिक्षादिदानाय गुरुः सदा तेषामन्तिकं व्रजति, । तस्य पुनराचार्यस्य तेषां समीपं व्रजतस्तैर्यत्कर्तव्यं -

[भा.२७३३] तण्हाइयस्य पानं जोग्गाहारं च नेइ पव्वोणि ।
कितिकम्मं च करेंती मा जुन्न रहो व्व सीएज्जा ।।

वृ- येषां समीपमाचार्यो गच्छति, ते आचार्यस्य पव्वोणिं सम्मुखं तृष्णायितस्यातिशेषतृषितस्य योग्यं पानं पानीयं योग्यमाहारं च प्रथमालिकानिमित्तं नयन्ति । कृतिकर्म च विश्रामणां कुर्वन्ति, नान्यथा जीर्णरथ इव स सीदेत् । अथ तस्याचार्यस्य नित्यसहायो न विद्यते तत आह-

[भा.२७३४] असती निच्चसहाये गेण्हइ पारंपरेण अनोअणे ।
ते चिय अनेहिं समं तं मेलेउं नियत्तंते ।।

वृ- असति अविद्यमाने नित्यसहाये अविस्थतसहाये यः सकलदिवसाचार्येण सह हिण्डते, ततः पारम्पर्येणान्यानन्यान् सहायान् गृह्णाति । तद्यथा-एके साधवस्तावन्नयन्ति यावत् द्वितीयं स्पर्धकं, ततस्ते तैः समं मेलयित्वा प्रतिनिवर्तन्ते, ततोऽप्यन्ये साधवस्तावन्नयन्ति यावत्तृतीयं स्पर्धकं । ततस्तेऽपि तैः सह मेलयित्वा प्रतिनिवर्तन्ते, । तानि च स्पर्धकान्याचार्यस्पर्धकेन सह त्रीणि स्पर्धकानि भवन्ति ।। अथ कथमाचार्य एकदिवसेन त्रयाणामकृतश्रुतस्पर्धकानां शोधिं करोति तत आह-

[भा.२७३५] एगत्थ वसितो संतो तेसिं दाऊण पोरसिं ।
मज्झण्हे बितियं गंतुं भोत्तुं तत्थावरं वए ।।

वृ- आत्मीये स्पर्धके उषितः सन् आचार्यस्तत्र पौरुषीं दत्वा मध्याह्ने द्वितीयं स्पर्धकं गच्छति, । तत्र गत्वा भुंक्त्वा शोधिं च कृत्वा, तदनन्तरमपरं तृतीयं स्पर्धकं व्रजति, । तत आलोचनादिशोधिं कृत्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रैव वसति ।।

[भा.२७३६] एवमेगेन दिवसेन सोहिं कुणति तिण्हवी ।
पडिपुच्छगं तु बलवं आह सुत्तमवत्थयं ।।

वृ- एवमेकेन दिवसेनाचार्यस्त्रयाणामपि स्पर्धकानां शोधिं करोति, यसि प्रतिपृच्छां प्रत्येकं पृच्छां सारं कर्तुं गंतुं बलवान् । -यद्येवं तर्हि तइयं रयणिं संवसतित्ति तदिदानीमपार्थकमवकाशाभावात् ।

[भा.२७३७] सुत्तनिवातो थेरेकलाव काउं तिहेण वा सोहिं ।
बितियपयं च गिलाणे कलाव काऊण आगमनं ।।

वृ- आचार्यः प्राह-अधिकृतस्य सूत्रस्य निपातोऽवकाशं स्थविरे, तथाहि यद्याचार्यः स्थविरतया दुर्बलत्वेन वा प्रतिदिवसं त्रिषु स्पर्धकेषु शोधिं कर्तुं न शक्नोति, । तत एकैकस्मिन् स्पर्धके तृतीयां रात्रिं वसति तथा चाह-आचार्यस्य प्रतिदिवसमनागमने त्र्यहेण वापराधान् कलां कृत्वा पिण्डयित्वा शोधिमाचार्यस्य समीपे कुर्वन्ति, ।तथा हि एकसस्मिन् स्पर्धके उषित्वा तत्र पौरुषी दत्वा द्वितीये स्पर्धके समायाति, तत्रैव च वसति, यत्र वसति तत्रत्यास्तत्रत्याः साधवो येऽपराधाऽभवन् ते एकत्र पिण्डयित्वा आचार्यस्य पुरत आलोचयन्ति, । आचार्यस्तु शोधिं ददात्यप्रमादार्थं चोपदेशं ग्रयच्छति, । अत्रापि द्वितीयपदमाह-द्वितीयपदमपवादं पदं ग्लाने सत्याचार्ये अपराधान् कलापं कृत्वा पिण्डयित्वा इत्यर्थः स्पर्धकाः साधूनामागमनमाचार्यसमीपे । इयमत्र भावना-यद्याचार्यो ग्लानत्वेनातिवृद्धत्वेनाजङ्गमो न शक्नोति तेषां समीपमागन्तुं, तदा इतरे स्पर्द्धकद्वयसाधवो यथा मयूरः स्वपिच्छान् कलापयति, एकत्र पिण्डयति । एवमपराधान् एकत्र पिण्डयित्वा हृदये सम्यगवधार्य गुरुसमीपमागत्यालोचयन्ति । आलोचितेषु च तेषु अपराधेषु यदि प्रायश्चित्तं दातव्यं भवति, तदा प्रायश्चित्तमाचार्यो दत्वा प्रमादा-भावार्थमुपदेशं च दत्वा विसर्जयति । एतदेव सविस्तरमाह-

[भा.२७३८] एवं अगडसुयाणं वीसुठियाणं तु तीसु गामेसु ।
लहुया असंथरंते तेसिअनिंताण वा लहुओ ।।

वृ- सर्वेषां यद्याचार्येण समं नास्ति क्षेत्रं यत्र वसतिः संस्तरणं च भवति अथवास्ति वसतिः संस्तरणं न विद्यते, यदि वास्ति संस्तरणं न पूनर्वसतिः । एवमेतैः कारणैस्त्रिषु विष्वक् ग्रामेषु विष्वक् स्थिता अकृतश्रुतास्तेषामसंस्तरणे तथा स्थितानां यद्याचार्यो द्वयोरितरयोः स्पर्धकयोः प्रतिदिवसं सारां न करोति तदा प्रायश्चित्तं चत्वारो लघुकाः । स्पर्धकसाधवो यद्याचार्यमनागच्छंतं न गवेषयन्ति तदा तेषामप्यनागच्छतां मासलघुः ।

[भा.२७३९] एगदिन एक्केक्के तिड्डाणत्थाण दुब्बलो वसति ।
अह सो अजंगमो च्चिय ताहे इयरे तहिं एंति ।।

वृ- अथ ग्लानत्वेन वृद्धत्वेन दुर्बलतया न प्रतिदिवसं त्रिषु स्पधकेष्वागन्तुं शक्नोति तदा स दुर्बलआचार्यसन्निस्थानं स्थानं स्पर्धकानामेकैकस्मिन् स्पधके एकैकं दिवसं वसति । यथा च वसति तथा प्रागेवोक्तम् । अथ स आचार्योऽतिवृद्धत्वेन ग्लानत्वेनाजङ्गमो जातस्तत इतरे स्पर्धकद्वय-साधवस्तत्राचार्यसमीपे आगच्छन्ति तेषामपि विधिर्मूलगाथायामुक्तः । अथवा तत्रान्यः प्रकारस्तमेवाहः

[भा.२७४०] एइ व पडिच्छए व मेहावि कलावकाउमवराधे ।
अतिदूरे पुन वइए पक्खे मासे परतरे वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यस्तेषां स्पर्धकः साधूनां मध्ये कोऽपि साधुर्मेधावी । सर्वेषां साधूनामपराधान् हृदये धारयितुमलं तेन स्पर्धकसाधव आलोचयन्ति, । तद्यथा-स तेषामपराधपदानि कलापं कृत्वा हृदये संपिण्ड्याचार्य-समीपमागत्यालोचयति । तान्याचार्यः श्रुत्वा यदापन्नाः प्रायश्चित्तं ततो यत् येनापन्नं प्रायश्चित्तं तमेनमित्थं वाहयेदिति भणित्वा प्रेषयति । सोऽपि च साधुस्तेषां तत्कथयति प्रायश्चित्तं च तेऽपि साधवस्तद्वहन्ति । पडिच्छए वत्ति अथवा आचार्य आत्मीयान् स्पर्धकान् विनिर्गत्य येन प्रदेशेन इतरौ स्पर्धकावा-गच्छतस्तस्मिन् प्रदेशेऽन्तरा प्रतीक्षमाणस्तिष्ठति । तत्र स्पर्धकसाधव आगच्छन्ति । एको वा मेघावी अत्राप्यालोचनादिकं तथैव अइदूरे इत्यादि यद्यतिदूरे स्थितास्ततदा पञ्चमे पञ्चमे दिवसे यदि वा पक्षेण पक्षेण अथवा मासेन मासेन परतरे वेति परतरेणवा द्व्यर्धमासादिना समागच्छन्ति । आगत्य चाचार्यादिसमीपे शोधिं कुर्वन्ति ।।

मू. (१५३) *से गामंसिवा जाव.. रायहाणिंसि वा अभिनिव्वगडाए अभिनिदुवाराए अभिनिक्ख-मणपवेसणाए नो कप्पइ बहुसुयस्स बब्भागमस्स भिक्खुस्स वत्थए, किमङ्गंपुनं अप्पागमस्स अप्पसुयस्स ।*

[भा.२७४१] अगडसुयाण न कप्पइ वीसुं मा अइप्पसंगतोसुयवं ।
एगानितो वसेज्ञा निकायणं चेव पुरिमाणं ।।

वृ- अनन्तरसूत्रे अकृतश्रुतानां न कल्पते विष्वग् वास इति श्रुत्वा मातिप्रसङ्गतः श्रुतवानेकाकी वसेदित्येवमर्थमिदं सूत्रं तथा निकाचनं च नियमश्च पूर्वाणामकृतश्रुतानां कृतमनेन सूत्रेण । तथा हि यदि कृतश्रुतस्यापि न कल्पते एकाकिनो वासः किमङ्गपुनरकृतश्रुतस्य तस्य सुतरामेकाकिनो न कल्पते वास इत्येष सूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्याअथ ग्रामे वा नगरे वा यावद्राजधान्यां वा अभिनिव्वगडायामभिनिद्वारायामभिनिष्क्रमणप्रवेशायामेतेषां त्रयाणामपि पदानां व्याख्यानं पूर्ववत् न कल्पते बहुश्रुतस्य सूत्रापेक्षया एकाकिनो भिक्षोर्वस्तुं किमङ्गपुनरल्पागमस्याल्पश्रुतस्येति सूत्रसंक्षेपार्थः । सम्प्रति भाष्यविस्तरः-

[भा.२७४२] अंतो वा बहिं वा अभिनिविगडाए द्वायमाणस्स ।
गीयत्थे मासलहुं गुरुतो मासो अगीतत्थे ।।

वृ- अन्तरुपाश्रयस्याभिनिव्विगडायां पृथक् परिक्षेपायां वसतौ यथा एकस्यां वलभ्यां विष्वगपवरके बहिरुपाश्रयस्याभिनिर्विगडायामन्यस्मिन् प्रतिश्रये यदि गीतार्थो भिक्षुर्वसति तदा तस्य तत्र तिष्ठतो गीतार्थस्य प्रायश्चित्तं मासलघु अगीतार्थस्य गुरुको मासः । साम्प्रतमन्तर्बहिर्वा गृहस्य या अभिनिर्विगडा तस्याः प्रकारानाह-

[भा.२७४३] अंतो निवेसणस्स सोहीमादीव जाव सग्गामो ।
धरवगडाए सुत्तं एमेव य सेस वगडासु ।।

वृ- निवेशनस्यगृहस्यान्तरभिनिर्विगडा अथवा निवेशनाद्बहिरन्या वसतिरभिनिर्विगडा तस्यां मुख्यतो द्रष्टव्यम् । एवमेव शेषवगडा निवेशनाद्बहिरभिनिर्विगडाप्रकारेषु वा तद्य गीतार्थानामगीतार्थानां भिक्षूणामेकाकिनां वसतां प्रायश्चित्तं तदेव प्रागुक्तं । केवलं प्रायश्चित्तं किन्त्वन्येऽपि च दोषास्तथा चाह —

[भा.२७४४] आणादिणो य दोसा विराधना होइ संजमायाए ।
लज्जाभयगोरवधम्मसद्धरक्खा चउद्धा य ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अन्तर्निविशनस्याभिनिर्विगडायां घसतौ तिष्ठत आज्ञादयो दोषास्तथा संयमविराधना आत्मविराधना च एते यथा प्राक् चतुर्थपञ्चमातिशये भाविते तथा भावनीये, यदि पुनरनभिनिर्विगडायां वसतौ वसति तदा पापं कर्तुमिच्छतो लज्जातो भयतो गौरवतो धर्मश्रद्धातो वा रक्षा चतुर्विधा स्यात् । किमुक्तं वनत्यनिभिनिर्विगडायां वसतौ वसन् संयमविराधनारूपमात्मविरा धनारूपं वा पापं लज्जादिभ्यो न कुर्यादपि तत्र प्रथमतो लज्जाद्वारं भावयति--

[भा.२७४५] लज्जणिज्जो उ होहामि लज्जए वा समायरं ।
कुलागमतपस्सी वा सपक्खपरपक्खतो ।।

वृ- यद्यहं हस्तकर्माद्यन्यद्वा पापं समाचरिष्यामि तल्लज्जनीयो भविष्यामि । लज्जितश्च कथं कुलस्य गणस्य सङ्घस्य आगमज्ञस्य वा तपस्विनो वा स्वपक्षस्य श्रावकादेः परपक्षस्य परतीर्थिकादिरूपस्य मुखं दर्शयिष्यामि । अथवा तत्पापमाचरन् कुलागमतपस्विस्वपक्षपरपक्षेभ्यो लज्जते, यथाहमेवमाचरन् कथमात्मीयं मुखं तेषां दर्शयिष्यामि एवं लज्जातः पापं न करोति; ।। सम्प्रति भयद्वारभावनार्थमाह--

[भा.२७४६] असिलोगस्स वा वाया जो अतिसंकति कम्मसं ।
तहावि साहु तं जम्हा जसो वणो य संजमो ।।

वृ- अश्लोकस्य वा अवर्णस्य वा वादात् प्रवादात् यः कर्म अशुभासेवनारूपमतिशयेन शङ्कते । अपकीर्त्यवादभयान्न कुरुते इत्यर्थस्तथापि तस्य तत् अशुभकर्मानाचरणं साधुर्यस्मात्तेन यशोभिकांक्षितं यशो वर्णसंयम इत्येकार्थम् । जसोत्ति वा संजमोत्ति वा वणोत्ति वा एगट्ठमिति वचनात्, ततः परमार्थतः संयमोऽपेक्षित इति तदा नाचरणं श्रेयः ।। सम्प्रति यशः संयम इत्येकार्थतया भगवद्वचनमुपदर्शयति--

[भा.२७४७] जसं समुवजीवंति जे नरा वित्तमत्तणो ।
अलेस्सा तत्थ सिज्झंति सलेसाउ विभासिया ।।

वृ- ये नरा मनुष्या वृत्तमात्मन इच्छंति, ते यशः समुपजीवन्ति, इत्येतद्व्याख्याप्रज्ञप्तौ राशियुग्मे शते भणितं, । तथा च तद्ग्रन्थः-मनुस्साणं भंते किं भंते आयजसं उवजीवति । आत्मसंयममित्यर्थः । आय अजसं उवजीवन्ति । आत्मा संयममित्यादि । एवं यशः संयमावेकार्थावुक्तौ । तत्र ये अलेश्याः शैलेशीप्रतिपन्नास्ते नियमात्सिद्ध्यन्ति । सलेश्याः पुनर्विभाषिता विकल्पिताः केचित्सिद्ध्यन्ति केचिन्न सिध्यन्तीत्यर्थः । तत्र ये भव्यास्ते सिध्यन्ति, । तत्राहमशुभं कर्म समाचरन्नभव्यो भविष्यामीति भयतो नाशुभकर्म समासेवते ।।

[भा.२७४८] दाहिंति गुरुदंडं जइ नाहिंति तत्ततो ।
तं च वोढुं न चाइ संघायमादीय लोगतो ।।

वृ- यदि परस्त्र्यादिकं सेविष्ये, ततो यदि गुरवस्त्वतो ज्ञास्यन्ति तदा दण्डं प्रायश्चित्तमुग्रं दास्यन्ति, । तथोग्रं प्रायश्चित्तं वोढुमहं न शक्ष्ये नापि लोकतः परयुवतिभर्त्रादिलक्षणात् घातादिकं घातवधादिकं सोढुं शक्ष्ये इति भयतो नासेवते अशुभं कर्म, गतं भयद्वारम् । अधुना गौरवद्वारमाह--

[भा.२७४९] जोहं सइर कहासुंपि च कामि गुरुसन्निहो ।
सोहं कहमुपासिस्संतमनायरदूसितो ।।

वृ- योऽहं स्वैरकथास्वपि गुरुसन्निधौ गौरवेण चकास्मि सोऽहमनाचारदूषितस्तं गुरुं कथमुपासिष्ये,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनाचारदूषिततया तथारूपगौरवभयात् ।।

[भा.२७५०] लोए लोउत्तरे चेव गुरवो मज्झ संमता ।
मा हु मज्झावराधेन होज्ज तेसिं लहुत्तया ।।

वृ- मम गुरवो लोके लोकोत्तरेऽपि च सम्मताः ततो ममापराधेन मा तेषां लघुता भूयात् । तथा

[भा.२७५१] माननिज्जो उ सव्वस्स नामे कोइ न पूयए ।
तणाण लहुतरो होहं इति वज्जेति पावगं ।।

वृ- अहं सर्वस्यापि माननीयो न मां कश्चिन्न पूजयति, । यदि पुनरधुना पापमाचरिष्यामि ततस्तृणेभ्यो-ऽपि लघुतरो भविष्यामीति हेतोः पापं मैथुनासेवनादिकं वर्जयति गतं गौरवद्वारमधुना धर्मश्रद्धारमाह-

[भा.२७५२] आयसक्खियमेवेह पावगं परिवज्जए ।
अप्पेव दुट्ठसंकप्पं रक्खा सा खलु धम्मतो ।।

वृ- यः पापं कमात्मसाक्षिकमेव वर्जयति, स परमार्थतो धर्माधिकारीत्येवं मन्यमानस्य अपि संभावनायां दुष्टसंकल्पस्य रक्षामूलत एवानुत्थानमुत्थितस्य विफलीकरणं वा सा खलु धर्मतो भवति । धर्मश्रद्धाया एव महत्फलमुपदर्शयति-

[भा.२७५३] निस्सग्गुस्सग्गकारी य सव्वतो च्छिन्नबंधनो ।
एगो वा परिसाए वा अप्पाणं सो भिरक्खइ ।।

वृ- यस्तीव्रधर्मश्रद्धाभावतो निसर्गत एव स्वभावत एव उत्सर्गकारी सर्वतश्छिन्नबन्धन सर्वत्र ममत्वरहित इत्यर्थः । स एको वा एकाकि वा पर्षदि वा व्यवस्थित आत्मानमभिरक्षति । तदेवमनभिनि-र्विगडायां वसतौ बसतो लज्जादीनि संयमविराधनारक्षकाण्युक्तानि । अभिनिर्विगडायां पुनर्वसतः शुभोऽशुभो वा मनःपरिमाण उपजायते तथा चाह-

[भा.२७५४] मनपरिणामो वीयी सुभासुभो कंटएण दिट्ठंतो ।
खिप्पं करणं जह लंखियव्वं तहियं इमं होइ ।।

वृ- यथा गङ्गादीनां नदीनां वा तेनानन्तरानन्तरमनेका वीचय उत्पद्यन्ते । एवं जीवस्यान्योन्य-मनःपरिणाम उपजायते स च द्विधा-शुभाऽशुभश्च दृष्टान्तः कंटकेन वृश्चिकलांगूलेन यथा वा लंखिकायाः भिप्रं करणं तथैवेदं भवति एवं जीवस्य शुभोऽशुभश्च परिणामः क्षणेनोपजायते क्षणेन वाऽपैति इत्यर्थः ।

[भा.२७५५] परिणामाणवत्थाणं सति मोहे उ देहिणं ।
तस्सेव उ अभावेणं जायते एगभावया ।।

वृ- मनः परिणामानामनवस्थानं देहिनां प्राणिनां सति विद्यमाने मोहे भवति । तस्यैव तु मोहस्याभावेन जायते एकभावता मनःपरिणामस्य एकरूपता । तदेवं मनःपरिणामो वीचिरूपो व्याख्यातः ।।

[भा.२७५६] जहावचिज्जए मोहो सुद्धलेसस्स ज्झाइणो ।
तहेव परिणामो वि विसुद्धो परिवड्ढए ।।

वृ- यथा शुद्धलेश्याकस्य ध्यायिनो धर्मध्यायिनः शक्लध्यायिनो वा मोहोऽपचीयते तथैव विशुद्धपरिणामो वर्धते । उक्तः शुभपरिणामोऽशुभपरिणामप्रतिपादनार्थमाह-

[भा.२७५७] जहा य कम्मिणो कम्मं मोहनिज्जं उदिज्जइ ।
तहेव संकिलिट्ठो से परिणामो विवड्ढती ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यथा च कर्मिणः संक्लिष्टलेश्यास्थानवर्तिनः आर्तध्यायिनो रौद्रध्यायिनश्चेत्यर्थः । कर्ममोहनीयं कषायनोकषायरुपमुदीर्यति तथैव से तस्य संक्लिष्टपरिणामो विवर्धते ।।

[भा.२७५८] जहा य अंबुनाहम्मि अनुबंधपरंपरा ।
वीइ उप्पज्जए एवं, परिणामो सुभोसुभो ।।

वृ- यथा अंबुनाथे समुद्रे अनुबद्धपरंपरा वीचिरुत्पद्यते । एवं जीवस्य परिणामशुभोऽशुभश्चानुबद्धपरम्पराक उपजायते । शुभाशुभपरिणामवैचित्र्यमेव द्दष्टान्तेन विभावयिषुः कण्टकद्दष्टान्तं प्रागुपन्यस्तं भावयति-

[भा.२७५९] कण्हगोमी जहा चित्ता कंटकं वा विचित्तियं ।
तहेव परिणामस्स विचित्ता कालकंडया ।।

वृ- कृष्णगोमी कृष्ण(कर्ण) शृगाली यथा सा कृष्णादिभी रेखाभिश्चित्रा विचित्रवर्णा भवति, वृश्चिकस्य महाविषलांगूलं कण्टक उच्यते । यथा स कृष्णादिरेखाभिश्चित्रितो नाना प्रकारो भवति, तथैव परिणामस्य विचित्राणि कालभेदेन कण्टकान्यसंख्येयस्थानात्मकानि भवन्ति । अथ कथं शुभाऽशुभेऽशुभाद्वा शुभे परिणामे याति तत्र लङ्खिकाद्दष्टान्तमाह-

[भा.२७६०] लंखिया वा जहा खिप्पं उप्पत्तिता सभोयइ ।
परिणामो तहा दुविहो खिप्पं एइ अवेति य ।।

वृ- यथा वा लङ्खिका क्षिप्रमुत्पत क्षिप्रमेव समवपतति तथा परिणामो द्विविधः-शुभोऽशुभश्च क्षिप्रमागच्छति अपैति च । एवं शुभादऽशुभाद्वाशुभे परिणामे गमनं, कियन्ति संख्ययाऽध्यवसायस्थानानीति चेदत आह-

[भा.२७६१] लेस्साठाणे उ एक्केक्के ठाणसंखमतिच्छिया ।
किलिट्ठेण तरेणं वा जे उ भावेन खुंदती ।।

वृ- एकस्मिन् लश्यास्थाने संख्यामतिक्रान्तानि संख्यातीतानि स्थानानि परिणामस्थानानि भवन्ति, यानि क्लिष्टेन संक्लिष्टेन इतरेण विशुद्धेन भावेन खुन्दति आस्कन्दति प्राप्नोतीत्यर्थः । अथ कः संक्लिष्टः को वा इतरो भाव इति चेदुच्यते-इह कृष्णलेश्यापरिणामान्नीललेश्यापरिणामो विशुद्धो नीललेश्यापरणिमादपि कापोतलेश्यापरिणामो विशुद्धस्तस्मादपि तेजोलेश्यापरिणामो विशुद्धस्तस्मादपि पद्मलेश्यापरिणामो विशुद्धस्तस्मादपि शुक्ललेश्यापरिणामः । शुक्ललेश्या परिणामात् पद्मलेश्यापरिणामः क्लिष्टस्तस्मादपि कापोतलेश्यापरिणामः क्लिष्टः । ततोऽपि नीललेश्यापरिणामस्तस्मादपि कृष्णलेश्यापरिणामः । उक्तं च-क्रमशः स्थितासु लेश्यागतासु जीवस्य भावपरिणतिषु अवपतनोत्पतनाद् वा संक्लेशाद्वा विशोद्धयाद्वा प्रत्येकैकस्मिन् लेश्यास्थाने परिणामसंख्मयातीतत्वं भावयति-

[भा.२७६२] भवसंघयणं चेव ठिति वासज्ज देहिणं ।
परिणामस्स जाणिज्ञा विवड्ढी जस्स जत्तिया ।।

वृ- भव एव संहननं भवसंहननं द्दढं भवं देहभवं वाधिकृत्येत्यर्थः । तथा स्थितं च जघन्यादिभेदभिन्नमाश्रित्य देहिनां नारकादीनां यस्य परिणामस्य कृष्णलेश्यादिरूपस्य यावती विवृद्धिस्तस्य तावती(तीं) जानीयात् । तथाहि-नारकाणां देवतानां जघन्यायां स्थितौ कृष्णलेश्यापरिणामो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानाजीवापेक्षया तरतमभेदेन चिन्त्यमाना असंख्येया एवं समयाधिकायामपि जघन्यस्थितौ द्विसमयादिकायामपि जघन्यस्थितावेव तावद्वाच्यं यावदुत्कृष्ट स्थितिस्थानं, । एवं कृष्णलेश्यायां परिणामा असंख्ये या भवन्ति । एवं नीललेश्यागतस्य विशुद्धस्य भावस्य फलमाह-

[भा.२७६३] विसुज्झंतेन भावेन मोहो समवचिज्ञइ ।
मोहस्सावचएयावि भावसुद्धी वियाहिया ।।

वृ- विशुद्धयता भावेन लेश्यागतेन मोहो मोहनीयं कर्म समपचीयते हानीमुपगच्छति मोहस्यापचये वापि भावविशुद्धिर्जीवस्य परिणामविशुद्धिर्व्याख्याता प्रतिपादत्ता । यथा कालक्षेपमृते केवलश्रिया लाभो भवति ।। अथ मोहनीयं कर्म उदयप्राप्तं शुभपरिणामेन क्षपयितुं शक्यते किं वा नेति शक्यन्ते इति ब्रूमस्तथा चाह-

[भा.२७६४] उक्कढंतं जहा तोयं सीयलेन ज्झविज्ञए ।
गदो वा अगदेनं तु वेरग्गेण तहोदओ ।।

वृ- यथा उत्कथ्यमानं तोयं शीतलेन तोयेन क्षिप्यते । गदो वा अगदेन तता मोहनीयस्योदयो वैराग्येण क्षिप्यते । तदेवमुक्तं प्रसक्तानुप्रसक्तमधुना प्रकृते योजनामाह-

[भा.२७६५] असुभोदयनिप्फन्ना संभवंति बहूविहा ।
दोसा एंगानियस्सेवं इमे अन्ने विआहिया ।।

वृ- अशुभोदयेन अशुभकर्मोदयेन निष्पन्ना अन्तरूपाश्रयस्याभिर्निविगडायां वसतावेवमेकाकिनो बहुविधा दोषास्तदेवं अन्तरुपाश्रयस्याभिनिर्विगडायां दोषा उक्ताः सम्प्रति बहिरुपाश्रयस्याभिनिर्विगडायां दोषानाह । इमे वक्ष्यमाणा अन्ये दोषा एकाकिनो व्याख्याताः प्रतिपादिताः-

[भा.२७६६] मिच्छत्त सोहि सागारियादि गेलणणखद्धपडिनीए ।
बहिपेल्लणित्थिवो रोगे तह सल्लमरणे य ।।

वृ- एकाकिनो मिथ्यात्वगमनं तथा शोधिरभावस्तथा सागारिकप्रवेशो वसतौ आदिशब्दाच्चलत्कुड्यां वसतौ कुट्यादिप्रपतनत आत्मवरिधनेतपिरिग्रहस्तथा ग्लानत्वे प्रतिजागरणा-भावस्तथा एकाकिनो मन्दाग्रेर्निवारकाभावात् प्रचुरभक्षणसंभवस्तथा च ग्लानत्वादिभावः । तथा एकाकी प्रत्यनीकस्य गम्यो भवति, । तथा उद्भ्रामका दण्डपाशादयो नगररक्षा एकाकिनं चौरोऽयं हेरिको वा न ज्ञायते । कथमन्यथा एकाकीति विचिन्तयतो बहिः प्रेरयेयुः । ग्रामान्नगराद्वा बहिर्निष्काशयेदिति भावः । तथा स्त्रीदोषा एकाकिनो जायन्ते । तथा व्यालेन दष्टस्य भेषजाकरणसंभवः रोगस्य च वृद्धिगमनं, । तथा सशल्यस्य सतो मरणमित्येष द्वारगाथासंक्षेपार्थः । साम्प्रतमेनामेव विवरीषुराह-

[भा.२७६७] ओगाढमप्पसहायं पनवेंति कुतित्थिया ।
समावणो विसोहिं च कस्स पासे करिस्सइ ।।

वृ- ओगाढमप्यसहायं कुतीर्थिकाः प्रज्ञापयंत्यतो मिथ्यात्वगमनं, तथा समापन्नः प्रायश्चित्तं कस्य पार्श्वे शोधिं करिष्यति । नैव कस्यचित् पार्श्वे ततः शोध्यभावः ।। सम्प्रति सागारिकद्वारं ग्लानद्वारं चाह-

[भा.२७६८] भया आमोसयादीणं सिज्जं वयति सारियं ।
असहायस्स गेलणे को से किच्चं करिस्सइ ।।

वृ- आमोषकादीनां भयात्तस्मिन्नेकाकिनि सति शून्यां शय्यां वसतिं दृष्ट्वा तां सागारिको व्रजति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वारगाथायामादिशब्दस्य व्याख्यानं तत्रैव कृतं तथा असहायस्य से तस्य ग्लानत्वे सति कः कृत्यं करिष्यति ।। खद्धप्रत्यनीकप्रेरणद्वाराण्याह-

[भा.२७६९] मंदग्गी भुंजए खद्धं ऊसढंति निरंकुसो ।
एगोपरूढगम्मो य पेल्लेउब्भामया वनं ।।

वृ- एकाकी निवारकामभावान्निरंकुशं ऊसढंति उत्कृष्टमितिकृत्वा मन्दाग्निः प्रचुरं भुङ्क्ते ततो ग्लानत्वादिदोषसंभ'शअथथा एकोऽसहायः प्ररुष्टस्य प्रत्यनीकस्य गम्यो भवति । तथा उद्भ्रामका नगरादिरक्षका एकाकिनममुं चौरादिरिलि कृत्वा नगरादेर्बहिः प्रेरयेयुः ।। अधुना स्त्रीद्वारमाह-

[भा.२७७०] विभिचारिम्मि परिणते निनिंदद्दूण समणवसहीतो ।
पंतावनादगारो उड्डाहो पउसएमादी ।।

वृ- या व्यभिचारी नाम जारस्तस्मिन् परिणते सा स्त्री केनापि कारणेन संयतिवसतिं गता भवेत् । ततः श्रमणवसतेस्तां निर्गच्छन्तीं दृष्ट्वा अगारस्तस्या भर्ता अन्यो वा निजकोऽनिजको वा तस्यामासक्तः प्रान्तापनादि मारणादि कुर्यात् । तथा च सति प्रवचनस्य उड्डाहः प्रान्तापनाद्यभावे तस्य दर्शनस्य वा सकलस्योपरि प्रद्वेष उपजायते । तथा च सति तस्यान्यस्य वा भक्तपानादिव्यवच्छेद इत्यादयो दोषाः ।।

[भा.२७७१] वालेण वावि डंकस्स से को कुणइ भेसज्जं ।
दीहरोगे वि वड्ढिं च गतो किं सो करिस्सइ ।।

वृ- व्यालेन सर्पादिना दष्टस्य से तस्य को भेषजं करोति । नैव कश्चिदेकाकित्वात्तथा दीर्घरोगे कृत्याकरणतो विवृद्धिं गतः स पश्चात्किं करिष्यति । नैव किञ्चित्केवलं मरिष्यतीत्यर्थः ।।

[भा.२७७२] सलुद्धरणविसोही मए दोसा बहुस्सुए वावि ।
सविसेसा अप्पसुए रक्खंति परोप्परं दोवि ।।

वृ- शल्योद्धरणे विशोधिरेकाकिनः शल्योद्धरणाभावस्ततो मृतेऽपि च स शल्ये तस्मिन् दोषास्तथाहि-स शल्यो यो म्रियते स दीर्घकालं संसारमनुवर्तते इति बहुश्रुतं चाप्येकाकिनि मृते दोषास्तथाहि-सोप्येकाकी मृतो गृहिणा बलीवर्दाभ्यां मल्लेन राजकुलेन वा निष्काश्यते । तथा वा लोकनिन्दाप्रवृत्ते प्रवचनव्याघातः सविसेसा अप्पसुएत्ति अल्पश्रुते एकाकिनि सविशेषा दोषास्तथाहि-बहुश्रुत आलोचनार्हाभावे सिद्धानामन्तिके आलोचयति । अल्प श्रुतस्त्वमुं विधिं न जानातीति सशल्य एव म्रियते । यदि द्वावपि बहु (श्रुताल्प) श्रुतावभिनिर्विगडायां वसतौ परस्परं संभूय वसतस्तदा द्वावपि तौ परस्परं रक्षयतः । अधुना सविसेसा अप्पसुए इत्येतद्वयाख्यानयत्ति-

[भा.२७७३] अप्पेव जिनसिद्धेसु आलोएहि बहुस्सुतो ।
अगीतो तमजानंतो ससल्लो जातिदुग्गतिं ।।

वृ- अप्येवमेवमपि एकाक्यपीत्यर्थः । बहुश्रुतो जिनेषु अर्हत्सु सिद्धेषु मनसि सम्प्रधारितेष तेषां पुरत आलोचयिष्यते । अगीतोऽबहुश्रुतः पुनस्तं विधिमजानानः सशल्यो मृत्वा याति दुर्गतिमतः सविशेषा अल्पश्रुते ।। सम्प्रति 'रक्खंति परोप्परं दोवित्ति' व्याख्यानार्थमाह-

[भा.२७७४] सीहो रक्खई तिनिसे तिनिसेहिं विरक्खितो तहा सीहो ।
एवणमनसहिया बिइयमद्धाणभादीसु ।।

वृ- सिंहो रक्षति तिनिशात् तिनिशवृक्षगुहां तिनिशैरपि तिनिशवृक्षगुहयापि सिंहो रक्ष्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमभिनिर्वगडायां वसतौ वसन्तावन्योन्योन्यसहितौ परस्परं रक्षयतः । अत्रैवापवादमाह- द्वितीयपदम-पवादमपदमध्वानं प्रतिपन्नकारणेनैकाकी अन्यसंभोगिकादीनां पार्श्वस्थादीनां वा वसते र्विष्वग् अपवरके निवेशनादिषु वा वसेत् । आदिशब्दादशिवादिगृहितो वा विष्वक् तिष्ठेत् ।।

मू. (१५४) *से गामंसिवा जाव रायहाणिंसि वा एगवडाए गदुवाराए एगनिक्खमणपवेसाए कप्पइ बहुसुयस्स बब्भागमस्स एगाणियस्स भिक्खुस्स वत्थए दुहओ कालं भिक्खुभावं पडिजागरमाणस्स ।*

[भा.२७७५] कारणतो वसमाणोऽगीतो गीओ व होइ निद्दोसो ।
पुव्वं च वणिया खलु कारणवासिस्स जयणा उ ।।

वृ- कारणतो गीतार्थोऽगीतार्थो वा यतनया वसन् निर्दोषो भवति । सा च यतना कारणत एकाकिनो वसनशीलस्य पूर्वमुक्ता एतदर्थख्यापनार्थमिदं सूत्रम् । अधुना सूत्रत एव सम्बन्धमाह-

[भा.२७७६] सुत्तेण व उ सुत्तं जोइज्जई कारणं तु आसज्ज ।
संबंधधरुव्वरए कप्पइ वसिउं बहुसुयस्स ।।

वृ- सूत्रेणैव सूत्रं योज्यते सम्बद्धयते । तद्यथाऽनन्तरसूत्रेणैकाकिनो बहुश्रुतस्यवासो निषिद्धोऽनेन तु सूत्रेणेदं प्रतिपाद्यते, कारणमाश्रित्याध्वप्रतिपत्त्यादिकं सम्बन्धगृहोद्वरके बहुश्रुतस्य वस्तुं कल्पते इत्येष सूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-अथ ग्रामे वा नगरे वा यावद्राजधान्या-मेकवगडायामेकपरिक्षेपायामेकद्वारायामेकनिष्क्रमणप्रवेशायां वसतौ बहुश्रुतस्य बह्वागमस्य भिक्षोर्वस्तुं कल्पते केवलमुभयकालं भिक्षुभावं प्रतिजाग्रतो भिक्षुभावश्चारित्रं तस्याविराधनार्थं या सामाचारी तां कुर्वत इत्येष सूत्रसंक्षेपार्थः । अधुना भाष्यनिर्युक्तिविस्तरस्तत्र भिक्षुभावं पडिजागरमाणस्सेति व्याख्यानार्थमाह भाष्यकृत-

[भा.२७७७] चरणं तु भिक्खुभावो सामायारीए जा तदट्ठाए ।
पडिजागरणं करणं उभयकालं अहोरत्तं ।।

वृ- भिक्षोर्यथावस्थितस्य भावो भिक्षुभावश्चरणं तदर्थं तस्य चारित्रस्याविराधनार्थं या सामाचारी तस्याः प्रतिजागरणं नाम करणमुभयकालमहनिरात्रौ च आचार्योऽपि तस्यैवं भिक्षुभावं प्रतिजाग्रतो गोसर्गे रात्रिकं पृच्छति । दिवसेऽपि भक्तपानादिचिन्तां करोति । विकले च दैवसिकं पृच्छति । सुखेन वृत्तस्तव दिवस इति । एवमुभयकालमाचार्यस्तं प्रतिजागर्ति । सम्प्रति निर्युक्तिविस्तरः-

[भा.२७७८] वक्खारे कारणम्मी निक्कारणपुव्ववन्निया दोसा ।
किं पुन हुज्जा कारण तद्दोसाई मुणेयव्वा ।।

वृ- वक्खारो नाम एकस्यां वलभ्यामभिनिर्विगडो विष्वक् अपवरकस्तस्मिन् कारणे सति वसति एतद्विषयमिदं सूत्रं यदि पुनः कारणमृते विष्वग् अपवरके वसति, तत्पूर्ववर्णिता मिथ्यात्वादयो दोषाः किं पुनर्भवेत्तत्कारणं, यद्वशात् पृथक् अपवरके तिष्ठति, तत आह-त्वग् दोषादीनि त्वग्दोषक्षयव्या-ध्यादीनि कारणानि ज्ञातव्यानि, । तथाहि-त्वग्दोषादिकमाचार्यो यदि निष्काशयति, तदा तस्य प्रायश्चित्तं चतुर्गुरुकम् । तस्मान्न स निर्यूहयितव्यः । किन्तु पृथगपवरके स्थितः परिपालनीयः । स च त्वग्दोषो द्वाभ्यां प्रकाराभ्यां भवति । तथा चाह-

[भा.२७७९] संदंतमसंदंते अस्संदिनसित्तमंडलपसुत्ती ।
किमिपूयं रसिगा वा पस्संदति तत्थिमा जयणा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- द्विविधस्त्वग्दोषस्तद्यथा-स्पन्दमानोऽस्पन्दमानश्च, । तत्रास्पन्दनोऽस्त्रावणश्चित्रप्रसुप्ति-र्मण्डलप्रसुप्तिश्च । यस्तु स्पन्दमानः स कृमीन् प्रस्पन्दते पूतं वा रसिकां वा । तत्र स्पन्दमाने त्वग् दोषे इयं वक्ष्यमाणा यतना तामेवाह-

[भा.२७८०] संदंतो वक्खारो अंतो बाहिं च सारणा तिन्नि ।
जत्थ विसीएज्ज ततो नाणादि उग्गमादी वा ।।

वृ- स्पन्दमाने त्वग्दोषऽनंतरेकस्यां वलभ्यां विष्वगपवरके तस्याभावे एकस्मिन्निवेशनेऽन्यस्यां वसतौ स्थाप्यते, । तत्र च वसतस्तिस्रः सारणाः साराः कर्तव्याः । यत्र (त्र) सको विसीदेत् । कास्तास्तिस्रः सारा इत्याह-ज्ञानादौ ज्ञाने दर्शने चारित्रे च । अथवा उद्गमादावुद्गमे उत्पादनायामेषणायां च अथवान्यथा तिस्रः सारास्ता एवाह-

[भा.२७८१] अहवा भत्ते पाने सामायारीए वा विसीयतं ।
एएसु तीसु सारे तिन्नि वि काले गुरुपुच्छे ।।

वृ- अथवेति प्रकारान्तरे भक्ते पाने सामाचार्यां च एतेषु त्रिषु स्थानेषु सीदंतं सारयन्त्याचार्या यदि वा तिस्रः -सारानाम त्रीनपि कालान् गुरुःपृच्छति । कथमियाह-

[भा.२७८२] गोसे केरिसयं तिय, कयमकयं वा किं ते आवासं ।
भिक्खंक लद्धमलद्धं किं दिज्जउ वा ते मज्झण्हे ।।

[भा.२७८३] पेहिय पेहियं वा वट्टइ ते केरिसं च अवरण्हे ।
निज्जहूहणंमि गुरुगा अविहि परियट्टणे वावि ।।

वृ- गोसे प्रातरिदं पृच्छति । कीद्दशं ते शरीरमिति, । तथा त्वया किमावश्यकं कृतमकृतं वा तथा मध्याह्ने पृच्छति-भैक्षं त्वया लब्धमलब्धं वा किं तव दीयतामिति । तथा अपराह्ने पृच्छति । किं तवोपकरणं केनापि त्वया वा प्रेक्षितं किं वा न प्रेक्षित्तं । कीद्दशं वा ते शरीरमिति । यदि पुनरेव सारां न करोति, किन्त्वेवमेव परित्यजति, तदा गुरोः प्रायश्चित्तं चत्वारो गुरुकाः, । अनिर्यूहिऽपि यद्यविधिना परिवर्तनं परिपालनं कारयति तदापि चतुर्गुरुकं प्रायश्चित्तं ।

[भा.२७८४] आणादिणो य दोसा विराधना होइ इमेहिं ठाणेहिं ।
पासवणफासलाला सेए मरुएण दिठंतो ।।

वृ- न केवलं प्रायश्चित्तं किन्त्वाज्ञादयश्च दोषास्तथा एभिर्वक्ष्यमाणैः स्थानैर्विराधना साधूनामात्मविराधना भवति, । कैः स्थानैरित्याह-प्रश्रवणेन स्पर्शेन, लालय स्वेदेन च प्रस्वेदेन । तथाहि-स्पन्दमानत्वग्दोषवतः प्रश्रवणस्पर्शनेनापि व्याधिरन्यत्र संक्रामति, । तथा गात्रस्पर्शनेन यदि वा तेन व्याधितेन ये परिभुक्ताः पीठफलकादयस्तान् यद्यव्याधितः परिभुक्ते तदा व्याधिः संक्रामति । तथा लालया सह भोजने व्याधिः संक्रामति । तस्य प्रस्वेदेन यदि कोऽपि स्पृश्यते, तदा तस्यापि व्याधिः संचरति, । अत्र च द्दष्टान्तो मरुकेण संडकब्राह्मणेन तत्कथानकं चावश्यके प्रबन्धतः कथितमिति ततोऽवधार्य, । साम्प्रतमेतदेव पश्चार्धं व्याचिख्यासुः प्रथमतः प्रश्रवणे यतनामाह-

[भा.२७८५] पासवण अन्नअसती भूतीए लक्खे माहु दूसियं मोयं ।
चलणतलेसु कमेज्जा एमेवेय निक्खमपवेसो ।।

वृ- तस्य स्पन्दमानत्वग्दोषवतः पृथक् कायिकी भूमिः कर्तव्या; । अन्यस्याविष्वक् प्रश्रवणभूमेरसति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभावे एकस्या एव कायिक्या भूमेस्तस्य योग्यं पृथक् अवकाशं भूत्या लक्षयति वृषभो यथा साधवस्तं परिहरन्ति, । तथा चाह-मा कोऽपि त्वग्दोषव्याधितस्य दूषितं मोकं प्रश्रवणं पादैराक्रमेत् । आक्रमेण को दोष इत्यत आह-आक्रान्ते तस्य प्रश्रवणे चरणतलेषु पादतलेषु त्वग्दोषव्याधिः संक्रामति, । तथा तस्य त्वग्दोषव्याधितस्य येनावकाशेन निष्क्रमणं प्रवेशो वा तमवकाशं भूत्या लक्षयति, । येन साधवस्तमपि परिहरन्ति, । अपरिहरणेऽनन्तरोदित एव दोषः ।।

[भा.२७८६] निंली व सो काउत्तली कमेसुं संथारतो दूर अदंसणेवी ।
मा फासदोसेण कमेज्ज तेसिं तत्थिक्कवत्थादिवि परिहरंति ।।

वृ- सस्पन्दमानत्वग्दोषी क्रमयोः पादयोस्तलके उपानहौ कृत्वा निर्गच्छति प्रविशति वा । योऽप्यस्पन्दमानत्वग्दोषी तस्यापि कायिकी भूमिर्विष्वक् क्रियते न पुनः पृथग् भूमिनिर्गम-प्रवेशस्थानम् ।। सम्प्रति स्पन्दमानस्यास्पन्दमानस्य च स्पर्शविषयां साधारणां यतनामाह-अस्पन्दनेऽपि त्वग्दोषे आस्तां स्पन्दमाने इत्यापि शब्दार्थः । संस्तरको दूरे क्रियते मा स्पर्शदोषेण तेषां शेषसाधूनां व्याधिः संक्रमेदिति हेतोस्तथा न केवलं दूरे संस्तारकः क्रियते । किन्तु तेन त्वग्दोषवता यत्स्पृष्टं वस्त्रादि तत्परिहरन्ति । पूर्वोक्तादेव दोषात्तदेवं प्रश्रवणयतनास्पर्शयतना च सप्रपञ्चोक्ता ।।

[भा.२७८७] न य भुंजतेगट्ठा लालादोसेण संकमति वाही ।
सेओ से वज्जिज्जइ जलपडलंतरप्पो य ।।

वृ- न च एकार्थे एकस्मिन्पात्रे तेन त्वग्दोषवता सह साधवो भुंजते । कुत इत्याह यतो लालादोषेण संक्रामति व्याधिः । तथा स तस्य त्वग्दोषवत स्वेदप्रस्वेदो वर्ज्यते । तथा जल्लः शरीरमल्लस्तथा तत्सत्कानि पात्रपटलानि तथा आन्तरकल्पश्च परिह्रियते व्याधिसंक्रमभयात्तथा चाह-

[भा.२७८८] एएहिं कमइ वाही एत्थं खलु सेउएण दिठंतो ।
कुट्ठय कच्छुयसिवं नयनामय कामलादीया ।।

वृ- एतैर्जल्लादिभिर्व्याधिस्त्वग्दोषव्याधिः संक्रामति । अत्र दृष्टान्तः खलु सेतुकेन (सिद्धकेन) तत एतानि परिह्रियन्ते, । किं नाम त्वग्दोष एव उतान्यस्मिन्नपि रोगे तत आह-कुष्टे क्षयव्याधौ कच्छ्वां पामायामशिवे शीतलिकायां नयनाऽमये नयनदोषे कामलादावेषा अनन्तरोदिता प्रश्रवणादिविषया यतना द्रष्टव्या ।।

[भा.२७८९] एसा जयणा बहुस्सुए अबहुस्सु न कीरते तु वक्खारो ।
ठावेंति एगपासे अपरिभोगंमि उ जतीणं ।।

वृ- एषा अनन्तरोदिता यतना बहुश्रुते द्रष्टव्या । अबहुश्रुतेऽप्येवं, नवरं स सम्बद्धगृहापवरके स्थाप्यते, भिन्नस्तु वक्षारोऽपवरको न क्रियते, । सम्बद्धगृहापवरकाभावे च वसतेरेकस्मिन् यतीनामपरिभोग्ये तं स्थापयन्ति, । अपान्तराले कटो दीयते, । कटाभावे भूत्या अन्तरं क्रियते । अथ किं कारणमबहुश्रुतो बहिर्न क्रियते ? तत आह-

[भा.२७९०] विवज्जतो उड्डविवज्जएहिं मा बाहिभावं अबहुस्सुतो उ ।
रुड्डाए भूतीव तिरो करेंति, मा एक्कमेक्कं सहसा फुसेज्जा ।।

वृ- उड्डविवज्जकैरहं विवर्जित परिहृत इत्येवमबहुश्रुतो मा बहिर्भावमुपयासीदिति भिन्ने अपवरके न स्थाप्यते किन्तु वसतेरेकस्मिन् प्रदेशे, तत्रापि काष्ठादिना फलकादिरूपेण तदभावात् भूत्या वा अन्तरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुर्वन्ति, । मा एकेकैन त्वग्दोषेण साधवः सहसा स्पृशेयुः । अस्पन्दमानत्वग्दोषे विधिविशेषमाह-

[भा.२७९१] अगलंते न वक्खारो लालासेया विविञ्जन तहेव ।
उस्सासभाससयनासनादीहिं होति संकंती ।।

वृ- अगलति अस्पन्दमाने त्वगृदोषे तस्मादुच्छ्वासादीनां वर्जनमत आह-उच्छ्वासभाषाशयनासनादिभिरादिशब्दात्पीठफलकादिपरिग्रहः संक्रांति र्व्याधिर्भवति ।।

[भा.२७९२] मुत्तूण जल्लपडलं धरेंति भाणं से काइयाइगते ।
सीए व दाउ कप्पं उवरिमधोयं परिहरंति ।।

वृ- यदि स त्वग्दोषे व्याध्युपेतः कायिक्या व्युत्सर्गाय व्रजति भाजनं च तस्य धारयितव्यं भवति, तदा से तस्य कायिक्यागतस्य मुक्त्वा स्फेटयित्वा जल्लपटलंभाजनमलखरण्टितं पटलमन्ये साधवो धरन्ति यावत्स आयाति, । अथ स त्वगृदोषी ग्लानः शीते पतति नात्मीयैर्वस्त्रैः कम्बलेन च संस्तरति तदा तस्य कल्पं वस्त्रं प्रावरणाय दीयते, । सोऽपि च त्वगृदोषी आत्मीयानां वस्त्रकल्पानामुपरि प्रावृणोति । तच्च समर्पितं वस्त्रमधौतं परिहरन्ति । यदा तु तद्वस्त्रमात्मना प्रावरितुकामास्तदा प्रक्षालयित्वा प्रावृण्वन्ति ।।

[भा.२७९३] असहुस्सुवत्तणादीनि कुव्वतो छिक्कुजत्तियं ।
खेयमकुव्वतु धोइज्ञा मट्टियादीहिं तत्तियं ।।

वृ- असहस्य त्वगृदोषव्याधितस्यागाढं ग्लानीभूतस्योद्धर्त्तनमुपविर्ष्टकरणमित्यादि कुर्वतो यावत्स्पृष्टं त्वग्दोषगात्रादिना तावत्खेदमकुर्वन् मृत्तिकादिभिरुध्धृष्य प्रक्षालयेत् ।।

[भा.२७९४] असती मोय महीए कयकप्प अगलंतमत्तए निसिरो ।
सेणावकए कप्पइतरे निसिरंति जयणाए ।।

वृ- मोकमह्याः प्रश्रवणभूमेरभावे अगलत्यस्रावििण कृतकल्पे मात्रके व्युत्सृजति प्रश्रवणमन्ये साधवोऽन्यस्मिन्मात्रके पृथम्मात्रकाभावेतेनैव यत्र त्वगदोषीक व्युत्सृष्टवान् तत्रैव कृतकल्पे मात्रके इतरे साधवो यतनया यथा कायिक्या मात्रस्य च शरीरावयवस्पर्शो न भवति, तथा कायिकां निसृजन्ति ।।

[भा.२७९५] एसा जयणा उ तहिं कालगते पुन इमो विही होइ ।
अंतरकप्पं जल्लपडलं च अगलंति उज्झंति ।।

वृ- एषा अनन्तरोदिता यतना तत्रगलत्यगलति वा त्वगृदोषवति कालगते पुनस्त्वगदोषवति विधिरयं वक्ष्यमाणो भवति. तत्र प्रथमतो अगलत्याह-आन्तरं कल्पं भाजनस्य जल्लपटलमुपरितनं वस्त्नमेते द्वे अपि वस्त्रे उज्झंति परिष्ठापयन्ति । किं कारणमतआह-

[भा.२७९६] धोयावि न निद्दोसा तेन छड्डुंति ते दुवे ।
सेसगं तु कए कप्पे सव्वं से परिभुंज्ञइ ।।

वृ- प्रक्षालिते अपि ते वस्त्रे न निर्दोषे तेन छड्येते परिष्ठाप्येते शेषकं तु सर्वमपि से तस्य कृते कल्पे परिभुज्यते दोषाभावात् गलति त्वगृदोषे विधिमाह-

[भा.२७९७] संदंतस्स वि किंचन असतीए तु भायणुक्कोसं ।
लेवद्दगमवनित्ता अनणमयं धोविउं लिंपि ।।

वृ- स्पन्दमानस्यापि स्पन्दमानत्वगृदोषवतो यत्किञ्चनाऽस्ति तत्सर्वं परिष्ठाप्यते केवलं यदि भाजनं नास्ति सति वा भाजने यदि तद्भाजनं सलक्षणं तदा तदेकभाजनमुत्कृष्टं मुक्त्वा शेषं परिष्ठाप्यते । तत्रापि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लेपमट्टकं वापनीय उष्णोदकादिभिः प्रक्षाल्यान्यमयमिव कृत्वा पुनः लिम्पेत् ततः परिभुञ्जीत ।।

[भा.२७९८] अगलंतमत्तसेवी असती कप्पे काउ भुंजंति ।
एसा जयणा उ भवे सव्वेसिं तेसिं नायव्वा ।।

वृ- यदि कायिकीभूमिर्न विद्यते बहिश्च सागारिकस्तथा शेषसाधूनामरोगाणां मात्रकमगलन् अस्पन्दमानत्वगदोषवान् सेवते किमुक्तं भवति-कायिकी तस्मिन् मात्रके व्युत्सृजति ततः कृतेकल्पे-ऽरोगाः तस्मिन् व्युत्सृजन्ति यदि पुनरकृते कल्पे व्युत्सृजन्ति तदा प्रायश्चित्तं चतुर्गुरुकं, । एषा यतना सर्वेषां गलत्त्वग्दोषिणामन्येषां च क्षयव्याध्याद्युपेतानां ज्ञातव्या ।

मू. (१५५) *जत्थ एए बहवे इत्थीओ य पुरिसा य पणहावेंति, तत्थ से समणे निग्गंथे अन्नयरंसि अचित्तंसि सोयंसि सुक्कपोग्गले निग्घायमाणे हत्थकम्मपडिसेवणपत्ते आवज्जइ मासियं परिहारट्ठाणं अनुग्घाइयं ।*

[भा.२७९९] एगानियस्स दोसा केत्तिय भवसो उ सुत्तसंबंधो ।
कारणनिवासिनो वा दुविहा सेविस्स पच्छित्तं ।।

वृ- एकाकिनो दोषा के इति शिष्यस्य प्रश्नावकाशमाशङ्क्याधिकृतसूत्रस्योपनिपात- । एष भवति सूत्रस्य सम्बन्धः, । अथवा कारणनिवासिनो द्विविधासेविनः सचित्तासेवनिऽचित्तासेविनश्च किं प्रायश्चित्तमिति परप्रश्नमुपजीव्य प्रायश्चित्तप्रतिपादनाय सूत्रद्वयमाहेति सम्बन्धः, अनेन सम्बन्धेना-यातस्यास्य व्याख्या-यत्र यस्मिन् प्रदेशे प्रत्यक्षत उपलभ्यमानाः स्त्रियः पुरुषाश्च प्रश्नुवन्ति मैथुनकर्म प्रारम्भन्ते तत्र तस्मिन् प्रदेशे प्रदेशे मैथुनकर्म दृष्ट्वा कश्चिदुदीर्णमोहः स श्रमणो निर्ग्रन्थोऽन्यतरस्मिन्नर्चिते हस्तकर्माद्युचिते युगच्छिद्रनलिकादौ श्रोत्रवति शुक्रपुद्गलान् निघातयन् शुक्रपुद्गलनिर्घाताय हस्तकर्मप्रवेशना प्रसक्तो भवति ।स च तथा प्रसक्त आपद्यते अनुद्घातितं गुरुकं मासिकं परिहारस्थानं प्रायश्चित्तस्थानं । तथा यत्रैते बहवः स्त्रियः पुरुषाश्च प्रश्नुवन्ति मैथुनकर्मप्रारम्भे तत्र तत् दृष्ट्वा कश्चित् स श्रमणो निर्ग्रन्थोऽन्यतरस्मिन्नर्चिते प्रतिमादौ श्रोत्रवति शुक्रपुद्गलान् निर्घातयन् मैथुनप्रतिसेवनाप्रसक्तो भवति, । स च तथा प्रसक्त पद्यते चातुर्मासिकमनुद्घातितं परिहारस्थानमित्येष सूत्रसंक्षेपार्थः ।

[भा.२८००] बाहिं वक्खारट्ठिए महिलादागम अवारणे गुरुगा ।
वारण पेसे पेल्लणमुदए पडिसेवणा भणिया ।।

वृ- बहिर्वक्षस्कारे अपवरके स्थिते त्वग्दोषवति तत्र निवेशनादौ वा कृतसङ्केता स्त्री सस्त्रीको वा पुरुषः समागच्छेत् । स चागच्छन् वारयितव्योऽवारणे प्रायश्चित्तं चत्वारो गुरुकाः ।वारणेत्यादि तत्र यथा वारणं तथा वक्तव्यम् । अथ बहिर्वर्षं गाढं पतित उपलक्षणमेतत् । स्तेनाः स्वापदानि वा बहिर्विद्यन्ते तेन ते न निर्गच्छन्ति । तदा तेष्वनिर्गच्छत्स्वधिकृतसूत्रस्यावकाशः तथा साधोः स्त्रिया प्रेरणा क्रियते । तथा प्रेरणायां तथा उदये वेदोदये सूत्रे प्रतिषेवणा भणिता । किमुक्तं भवति । प्रेरणायामुदये चाधिकृत-सूत्रस्योपनिपातस्तत्र वारणप्रतिपादनार्थमाह-

[भा.२८०१] पडिसेहो पुव्वुत्तो, उज्जु अनुज्जुमिहुणे चउत्थंमि ।
उ निग्गममनिग्गमे विजहिं च सुत्तस्स पारंभो ।।

वृ- वारणं प्रतिषेधः । स च कल्पाध्ययने चतुर्थोद्देशके पूर्वमुक्तस्तथा तस्मिन् मिथुनमृजु किंवा अनृजु इत्याद्यपि यद्वक्तव्यम् । ततस्तत्रैवाभिहितं तथा सस्त्रीकस्य पुरुषस्य यथा च सति निर्गमो भवति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा वाऽनिर्गम एतदपि तत्रैव व्याख्यातम् जहिं च सुत्तस्स पारंभो इत्येतत् पश्चाद्वयाख्यास्यते ।। गतं वारणद्वारमधुना उदये प्रतिसेवनेति व्याचिख्यासुस्तान् प्रतिसेवमानान् दृष्ट्वा कोऽपि वेदोदयवशात् येषु येषु स्थानेषु प्रतिसेवनामारभते, तानि प्रतिपादयति ।।

[भा.२८०२] जुगच्छिद्दनालिगादिसु पढम जामादि सेवणा सोही ।
मूलादी कप्पंमि या पुव्वुत्ता, पंचमजामे भवे सुत्तं ।।

वृ- युगच्छिद्रे नालिकायामादिशब्दात्तथाविधान्यवस्तुपरिग्रहः, तेषु युगच्छिद्रनालिकादिषु प्रथमयामासेवने प्रथमयामादासे वायां शोधिर्मूलादिका पूर्वं कल्पाध्ययने उक्ता, सा चैवं यदि रात्रेः प्रथमयामे युगच्छिद्रेण नालिकायां करकर्म करोति तदा प्रायश्चित्तमूलं, द्वितीयं यामे च्छेदः, तृतीये यामे षड् गुरु चतुर्थे यामे चतुर्गुरु । प्रभाते दिवसस्य प्रथमयामे रात्रिगतप्रथमयामापेक्षयां पञ्चमे यामे मासगुरुस्तथा चाह- पञ्चमे यामे भवति सूत्रम् - पञ्चमयामविषयमधिकृतसूत्रमितिभावः । एतेन यदुक्तं प्राक् यत्रच सूत्रस्य प्रारभ स्तद्वक्ष्ये इति तद्भावितम् ।।

मू. *(१५५... वर्तते) जत्थ एए बहवे इत्थिओ य पुरिसाय पण्हावेंति तत्थ से समणे निग्गंथे अन्नयरंसि अचित्तंसि सोयंसि सुक्क पुग्गले निग्घाएमाणे मेहुणपडिसेवणपत्ते आवज्जइ चाउम्मासियं परिहारठाणं अनुग्घाइयं ।*

[भा.२८०३] दुविहच्चा पडिमेयरस्सन्निहितेतरअचित्तसचित्ते ।
बाहिं व देउलादिसु सोही तेसिं तु पुव्वुत्ता ।।

वृ- अर्चा द्विविधा । तद्यथा-अचित्ता सचित्ता च । तत्राचित्ता द्विविधा-प्रतिमा इतरा च । इतरा नाम स्त्रीशरीरं निर्जीवं । एकैका पुनर्द्विविधा-सन्निहिता असन्निहिता असन्निहित च । एतेषु सर्वेष्वपि स्थानेषु प्रतिसेवनायां प्रथमे रात्रेर्यामे मूलं, द्वितीये च्छेदः, तृतीये षड्गुरु, चतुर्थे चतुर्गुरु पञ्चमेऽपि चतुर्गुरु सचित्ता स्त्रीशरीरं तत्राग्रे विधिर्वक्ष्यते । तत्र ग्रामादीनामन्तरुक्तं बहिरधिकृत्याह- बहिर्देवकुलादिषु प्रतिमादिकमचित्तमासेवमानस्य करकर्म वा कुर्वतस्तेषां भावानां शोधिः पूर्वोक्ता अनन्तरोक्ता दृष्टव्या । करकर्म कुर्वतः पञ्चमे यामे मासगुरुप्रतिमाद्यचित्तासेवने चतुर्गुरु इत्यर्थः सम्प्रति या प्रेरणा पूर्वमुक्ता तां भावयति-

[भा.२८०४] संगारदिन उ एसा सातितं वच्चेहिं अपेच्छंती ।
पेलेज्जवतं कुलडा पुत्तठा देज्ज रूवं वा ।।

वृ- साधुं कायिक्यादिनिमित्तं निर्गच्छन्तं दृष्ट्वा सा कुलटा चिन्तयेत् स एष आगतो येन मम संकेतो दत्तः । एवं चिन्तयित्वा तं साधुं गृह्णीयात् । साधुश्च तत्तथाग्रहणमास्वादेयत् । तथा च सति धर्मविराधना । अथवा तं दत्तसंकेतं पुरुषमपेक्षमाणा तं कायिक्यादिविनिर्गतं साधुं प्रेरयेत् तत्रापि धर्मविराधना यदि वा काऽपि महिला तस्य साधो रूपं रमणीयं दृष्ट्वा 'ईदृशो मम पुत्रो भूयात्' इति पुत्रार्थी सीत साधुमाददीत । यदि नेच्छति ततोऽहमुड्डाहं करिष्यामि । ततो धर्मविराधना अत्रैव प्रायश्चित्तविधिमाह-

[भा.२८०५] जइ सेव पढमजामे मूलं सेसेसु गुरुगावच्छ ।
अहवादिव्वाईयं सच्चित्तं होइ नायव्वं ।।

वृ- यदि प्रागुक्त प्रेरणावशात् स्त्रियं रात्रेः प्रथमयामे सेवते तदा प्रायश्चित्तं मूलं । द्वितीये यामे च्छेदस्तृतीये षट् गुरुकाः । चतुर्थे चत्वारो गुरुकाः । पञ्चमेऽपि चत्वारो गुरुका इति । तदेवं प्रेरणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याख्यानद्वारेण सचित्तमचित्तं व्याख्यातमथवान्यथा सचित्तमचित्तं तथा चाह-अथवा सचित्तं भवति ज्ञातव्य दिव्यादिकं दिव्यं तैर्यग्योनं मानुषं च प्रतिपिपादयिषुराह-

[भा.२८०६] जं सासु होति तियं ना दिव्वपासवं व संगीयं ।
जह वुत्तं उवहाणं न तं न पुनं इहावणं ।।

वृ- असवः प्राणाः सह असवो यस्य येन वा तत् सासु-सचित्तमित्यर्थः । यत्तु सासुसजिचत्तं तत्रिधा त्रिप्रकारं भवति । दिव्यं मानुषं पाशवं च । तत्र मानुषं त्रितयं सचित्तं, तद्यथा-जघन्यमध्यममुत्कृष्टं च तत्र जघन्यं प्राकृतं, मध्यमं कौटुंबमुत्कृष्टं दाण्डिनं । यथा त्रिविधं मानुषं दिव्यमपि जघन्यादिभेदभिन्नं त्रिधा, पाशवमपि च त्रिधा जघन्यादिभेदतः सङ्गीतं व्याख्यातं यथा कल्पाध्ययने तथात्रापि व्याख्येय यथा चोक्तमंत्रोपधानं प्रायश्चित्तं तदपि न तत्पूर्णमिहापन्नं न वक्तव्यं किन्तु वक्तव्यं । द्वयोर्नञोः प्रकृत्यर्थं च गमनात् । अत्रैवापवादमाह-

[भा.२८०७] बितियपदे तिगिच्छं निवीइयमाइयं अतिक्कंते ।
ताहे इमेण विहिना जयणा तत्थ सेवेज्ञा ।।

वृ- चिकित्सां निर्विकृतिकादिकां प्रागुक्तामतिक्रान्ते अस्थाने शब्दश्रवणतो हस्तकर्मकरणतो वा अनुपशाम्यति वेदोदये ततो द्वितीयपदे अपवादपदे अनेन वक्ष्यमाणेन विधिना यतनया सेवेत ।

[भा.२८०८] खल खिलमद्दिट्ठविसयं विसत्तअव्वंगवं गणं काउं ।
ताहे इमंमि लेसे गीयत्छजतो निलिज्ञेज्ञा ।।

वृ- खलं प्रतीतं । यत्र सजीवस्यापि सेवने वैराग्यमुपजायते किं पुनर्निर्जीवस्यासेवने । तत्र निर्जीवप्रतिपादनार्थमाह-खलखिलं खलखिलं निर्जीवमित्यर्थः । तत्कथं सेवते इत्यत आह-अद्दष्टविषयं यथा भवत्येवं सेवेत रात्रौ सेवतेति भावः । पुनः कथ मित्याह-विसत्वं विगताः सत्वा यत्र तत् विसत्वं विगतजनमित्यर्थः । अव्यङ्गं, नाम यस्य क्षतं क्षतकृतं न विद्यते तस्य व्यङ्गनं कृत्वा क्षतं कृत्वा अन्यं वेतालोत्थानदोषप्रसजनात् । ततोऽस्मिन् निर्जीवलेश्ये संलेष्ये मूत्रविवरे इत्यर्थः । गीतार्थो यतोऽरक्तद्विष्टः स् निलीयत् शुक्रपुद्गलान्भ्किशयेत् ।।

मू. (१५६) *नो कप्पइ निग्गंथाण वा निग्गंथीण वा निग्गंथिं अन्नगणाओ आगयं खुयायार सबलायारहं भिन्नायारं संकिलिट्ठायरचित्तं तस्स ठाणस्स अनालोयावेत्ता अपडिक्कमावेत्ता अनिंदावेत्ताअगरहावेत्ता अविउट्टावेत्ता अविसोहावेत्ता अकरणाए अनब्भुट्ठावेत्ता अहारिहं पायच्छित्त तवोकम्मंज्ञावेत्ता उवट्टावेत्तए वा संभुज्ञित्तए वा तासिहत्तरियं दिसंवा अनुदिसं वा उद्दिसित्तए वा धारेत्तए वा ।*

मू. (१५७) *कप्पइ निग्गंथाण वा अन्नगणाओ आगयं जाव ठाणस्स आलोयावेत्ता पडिक्कमावेत्ता निन्दादावेत्ता गरहावेत्ता विउद्दावेत्ता विसोहावेत्ता अकरणाए अब्भुट्ठावेत्ता अहारिहं पायच्छित्तं तवोकम्म पडिवज्ञावेत्ता उवट्ठावेत्तए वा धारेत्तए वा ।*

मू. (१५८) *नो कप्पइ निग्गंथाण वा निग्गंथीण वा निग्गंथं खुवायारं जाव अपडिक्कमावेत्ता अहारिहं पायच्छित्तं अपडिवज्ञावेत्ता उवट्ठावेत्तए वा संभुज्ञितए वा संवसित्तए वा तीसे इतरियं दिसंवा अनुदिसंवा उद्दिसित्तए वा धारेत्तए वा ।*

[भा.२८०९] अभिनिव्वगडादीसु व समणीणं पडिस्सगस्स दोसेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोसबहुला गणतो अवक्कमे काइ संबंधो ।।

वृ- अनन्तरसूत्रेष्वभिनिर्विगडादिका वसतिरुक्ता । तासु च अभिनिर्विगडादिकासु संयतीनां मध्ये उपाश्रयस्य दोषेण कापि दोषबहुला सामाचारी प्रमादपरा सती गणादपक्रामेत् । तस्या अनेन सूत्रेण विधिरुच्यते इत्येष सूत्रसम्बन्धः ।। प्रकारान्तरेण सम्बन्धमाह-

[भा.२८१०] इत्थी पण्हाइ जहिं व सोयए तेन सबलियायारो ।
उज्जुय विहारमनं उव्वेज्ज बिइत्तो भवे जोगो ।।

वृ- यत्र स्त्री उपलक्षणमेतत् पुरुषो वा प्रश्नौति प्रस्पन्दते मिथुनकर्म समारभते इत्यर्थः । वाशब्दः सम्बन्धस्य प्रकारान्तरोपदर्शने । तत्र तत् दृष्ट्वा तेन हेतुना काचित् उदीर्णप्रबलवेदा सचित्ते वाऽचित्ते वा तत्राचित्ते मृतकस्य सचित्ते पुरुषलिङ्गे तिर्यक्योनिकलिङ्गे वा शबलिताचारा सती अन्यदुद्यतविहारमुपेयात् आश्रयेत्तस्या विधिरनेनोद्यते इत्येष द्वितीयो योगः सम्बन्धो अनेन सम्बन्धेना-यातस्यास्य व्याख्या न कल्पते-निर्ग्रन्थीनां वा निर्ग्रन्थीनां वा निर्ग्रन्थीं क्षत्ताचारां शबलाचारां संक्लिष्टाचारां क्षतादीनां शब्दानामर्थः प्राग्वत् । तस्य स्थानस्य अनालोचयित्वा यस्मिन् सेविते सा क्षताचाराऽभवत् तत्स्थानमअनालोच्य तस्मात्स्थानादप्रतिक्राम्य तथा तस्य स्थानस्य विषये प्रायश्चित्तमप्रतिपाद्य उपस्थापयितुं वा संभोक्तुं वा संवस्तुं वा तस्यां इत्वरां दिशमनुदिशं वा उद्देष्टुमनुज्ञापयितुं नापि तस्याः स्वयं धारयितुं कल्पते इत्येष सूत्राक्षरार्थः ।। सम्प्रति भाष्यविस्तरः । तत्र परप्रश्नावकाशमाह-

[भा.२८११] जा होइ परिभवंतीह निग्गया सीयए कहं सत्ती ।
संवासमाइएहिं स छलिज्जइ उज्जमंतावी ।।

वृ- या प्रमादगणं परिभवन्ती धर्मश्रद्धया गृहवासादिह निर्गता सा कथं सीदति येन सा क्षताचारापि जाता । अत्र सूरिराह-संवासादिभिः सा उद्यच्छत्यपि उद्यमं कुर्वत्यपि शबली क्रियते । इयमत्र भावना-सा एकाकीत्वेन विहरन्ती गृहस्थाभिः समं वसन्ती स्वशक्त्यनुसारेणोद्यमं कुर्वत्यपि च्छलनां प्राप्नोति । आदिशब्दाद्गोचरचर्यायां विचारभूमौ वा यतः सत्येकाकिनी च्छलनामाप्नुयादिति । अथैकाकिनी सा कथं जातेत्यत आह-

[भा.२८१२] अद्धाण निग्गयादी कप्पट्ठी संभरंति जा बितिया ।
आगमनदेसभंगे चउत्थी पुन मग्गए सिक्खं ।।

वृ- अध्वनि अवमौदर्येणाशिवेन वा निर्गता । आदिशब्दात् राजद्विष्टेन वा सार्थेन वा स्तेनैरभिहृटता, निर्गताऽपि परिगृह्यते । एषा प्रथमा, द्वितीया कप्पट्ठिं दुहितरं संस्मरन्ती एकाकिनी जाता । तृतीया परचक्रगमनेन देशभङ्गे एकाकिनी । चतुर्थी शिक्षां मृगयमाणा एकाकिनी जाता ।

[भा.२८१३] गोउम्मुगमादीया नाया पुव्वमुदाहडा उमे ।
असिवे य दुट्ठे य सत्थे वा तेनभिहते ।।

वृ- अवमौदर्ये संयत्यो न संस्तरंति । तत्र गोज्ञातं पूर्वमुदाहृतं य था अल्पं गोब्राह्मणं नन्दति तत एतत् ज्ञातमवधार्य या यत्र संस्तरति सा तत्र गच्छति, अशिषे समुपस्थिते उल्मुकज्ञातमुदाहृतं पूर्वं कल्पाध्ययने यथा उल्मुकानि बहूनि मिलितानि ज्वलन्ति एकं द्वे वा न ज्वलतः, । एवमशिवमपि बहुषु गाढमुपतिष्ठति । नैकस्मिन् द्वयोर्वा ततो वृन्दघाते एकाकिनी जाता । एताभ्यां प्रकाराभ्यामध्वानं प्राप्ता । तथा राजद्विष्टेन पूर्वभणितेनैकाकिनी जायते । सार्थे वा स्तेनैभिरस्टता एकाकिनी जायते, ततः सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचार्योपाध्यायप्रवर्तिनीविरहिता निर्द्धर्म्माभूता पार्श्वस्थादिविहारं विहृत्य पुनरपि संवेगमापान्ना कंचिदाचार्यमुपाध्यायं गणावच्छेदकं वा द्रष्टुमुपस्थिता विज्ञपयति,-यथाहं पार्श्वस्थादिविहारात् प्रतिक्रमामितितो मम सङ्ग्रहं कुरुत यावदाचार्यमुपाध्यायं त्वात्मीयं पश्यामि । एवमन्यगणादागतं । तस्मात्स्थानादप्रतिकाम्य न कल्पते उपस्थापयितुं, नापि षड्विधेन संभोगेन, यथा संभवमार्यिकाणां संयतानां च संभोक्तुं नापि यावदात्मीयमाचार्यादिकं न गच्छति, तावदित्वर आचार्य एषा दिगित्युच्यते, । इत्वर उपाध्यायप्रवर्तिनी वा दीयते, एषा अनुदिक् गतमध्वानं प्रतिपन्नादीतिद्वारं अधुना कप्पट्ठिं संभरंति जा वितिया इति व्याख्यानार्थमाह-

[भा.२८१४] अन्नत्थदिक्खिया थेरी तीसे धूया य अन्नहिं।
वारिज्जंति एसा एज्ञा धूयानेहेन तं गणं ।।

वृ- अन्यत्र गच्छे स्थविरा माता दीक्षिता, अन्यत्र गच्छान्तरे से तस्य दुहिता दीक्षिता । ततः सा माता दुहितुः स्नेहेन आत्मीयानाचार्योपाध्यायान् पृच्छति व्रजामितां दुहितरं द्रष्टुं । सा वार्यमाणाप्या-चार्योपाध्यायैर्निर्गता । एवमेकाकिनी सा जाता एकाकितया निर्धर्मीभूता यत्र सा दुहिता दीक्षिताऽस्ति, तं गणमागता दृष्टा दुहिता संवेगमापन्ना, शेषं प्राग्वत् । । इदानीमागमनदेशं भङ्गे इत्यादिव्याख्यानार्थमाह-

[भा.२८१५] परचक्केण रट्ठंमि विद्दुते बोहिकाइणा ।
जहा सिग्घे पणंठासु एज्ञ एगा असहायिका ।।

वृ- परचक्रेण बोधिकादिना बोधिका म्लेच्छविशेषा तदादिना विद्रिते अभिद्रुते राष्ट्रे तथा शीघ्रमार्यिकाः प्रनष्टा यथा तासु प्रनष्टासु मध्ये सा एकाऽसहायिका जाता । एकाकितया धर्मरहिता बभूव । ततो गणान्तरं दृष्ट्वा पुनः संवेगमापन्ना, शेषमध्वानं प्रतिपन्ना इव वाच्यं अधुना चतुर्थी पुनर्मृगयते शिक्षाम् ।

[भा.२८१६] सोऊण काइ धम्मं उवसंता परिनया य पव्वज्जं ।
निक्खंत मंदपुना सो चेव जहंतु आरंभो ।।

वृ- श्रुत्वा काचन संविग्नानां पार्श्वे धर्म श्रुत्वा उपशान्ता प्रव्रज्यांप्रति परिणीता च सा च निष्क्रान्ता पार्श्वस्थादीनां समीपे ततः सा अचिन्तयत्, । यस्मादारम्भादसंयमरुपात् भीताहं मन्दपुण्या स एव मे समापतित आरम्भो यस्मादत्राहं प्रव्रजिता वर्ते इति । एतदेवाह-

[भा.२८१७] आभीरी पन्नवित्ताण गया ते आययट्ठिया ।
जह तत्थेतरे पत्ता निक्खमंति तमुज्जयं ।।

वृ- आयतो मोक्षस्तत्र स्थिता आयतस्थिता उद्यतविहारिणः संविग्ना इत्यर्थः । ते आभीरीं काञ्चन प्रज्ञाप्यान्यत्र विहारक्रमेण गता । अथानन्तरं तत्र ग्रामे इतरे पार्श्वस्थादयः प्राप्तास्ते तामुद्यतां निष्क्रामयन्ति । सा च पूर्वप्रकारेणासंयमाद्भीतातत्र समाधिं न लभते ।।

[भा.२८१८] दट्ठुंवा सोउं वा मग्गंती तु पडिच्छिया विहिना ।
संविग्गसिक्खमग्गइ पवत्तिनिमायरिय उवज्झं ।।

वृ- ततः सा मूलधर्मग्राहकानाचार्यन्मृगयन्ती द्रष्टुं वा श्रोतुं वा स्नानादिसमवसरणादौ समागतान् संविग्नशिक्षां ग्रहणशिक्षामासेवनाशिक्षां च मार्गयति । अन्यां च प्रवर्तिनीमन्यमाचार्यमन्यं चोपाध्यायं सा चैवं मार्गयति विधिना तैः प्रतीच्छिता स्वीकृता कर्तव्या । यत्र तत्र ते दृष्टाः श्रुता वा मूलधर्मग्राहका यथा च तैर्विधिना प्रतीच्छनीया तदेतदभिधित्सुराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२८१९] ण्हाणाइएसु मिलिया पव्वावेंते भणंति ते तस्से ।
होहव उज्जुयचरणा इमं वइनिं वयं नेमो ।।

वृ- स्नानादि समवसरणं गतया तया ते मूलधर्मग्राहका आचार्या दृष्टा भवेयुः श्रुता वा यथा अमुकग्रामनगरादौ वर्तन्ते ततः स्नानादिसमवसरणेऽन्यत्र वा गत्वा तेषां मिलिता शिक्षां प्रवर्तिन्यादिकं च याचते ततो विधिना तस्याः प्रतीच्छनं कुर्वन्ति । तमेव विधिमाह-ते मूलधर्मग्राहका आचार्यास्तस्याः प्रव्राजयतः प्रव्राजकान् आचार्यान् भणन्ति । यूयं वा भवत उद्यतचरणा अथवा इमां व्रतिनीं नयामः ।।

[भा.२८२०] भन्नति पव्वत्तणी वातेसि सति विसज्जे एवति ।
निमंतति विसज्जिए नयंती अविसज्जंतीए मासलहुं ।।

वृ- तेषां प्रव्राजकानामाचार्योपाध्यानामसति अभावे प्रवर्तिनी भण्यते-यथैतां व्रतिनीं विसर्जय । एवं भणिते यदि विसर्जयति ततो विसर्जिते विसर्जने कृते नयन्ति । अथैवं भणितापि सती सा प्रवर्तिनी न विसर्जयति तर्हि तस्या अविसर्जयन्त्याः प्रायश्चित्तं मासलघु । अत्रायं विधिः-प्रथमतः सा प्रवर्तिनी संयत्या भण्यते । यथा विसर्जयेमां साध्वीमिति । एवमुक्ता यदि न विसर्जयति तदा मासलघु ।।

[भा.२८२१] वसभे य २ उवज्झाए ३ आयरि ४ कुलेण ५ वावि थेरेण ।
गणथेरेण गणेण व ६ संघथेरेण संघेण ७ ।।

[भा.२८२२] भणियान विसज्जंती लहुगादी सोही जाव मूलं तु ।
नीयम हरिऊण ततो अनो से दिज्जते उ गणो ।।

वृ- यदा संयत्या भणितेऽपि सा प्रवर्तिनी न विसर्जयति तदा (२) वृषभो गीतार्थः कोऽपि साधुर्गत्वा तामापृच्छति । तत्रापि यदि न विसर्जयति तदा प्रायश्चित्तं चतुर्लघु । ततो यः (३) साधुरुपाध्यायस्थानं प्राप्तस्तेन आपृच्छ्यते । तत्राप्यविसर्जने चतुर्गुरुततो यः साधु (४) रचार्यस्थानं प्राप्तः स तामापृच्छति । यदि न विसर्जयति तर्हि तस्याः प्रायश्चित्तं षड्लघु । ततः (५) कुलेन कुलस्थविरेण वा भणनीया । तत्राविसर्जने षट्गुरु । ततो गणेण (६) गणस्थविरेण वा सा प्रज्ञापनीया तथाप्यमुत्कलने प्रायश्चित्तं च्छेदस्तदनन्तरं सङ्घेन सङ्घस्थविरेण वा सा भणनीया तथापि चेन्न विसर्जयति तर्हि प्रायश्चित्तं तस्या मूलं अन्यच्च यदि वा सङ्घमपक्रामति । ततस्तस्याः सकाशात् हृत्वा से तस्या अन्यो गणो दीयतेऽन्यस्याः प्रवर्त्तिन्याः सा समर्प्यते इत्यर्थः ।।

[भा.२८२३] एमेव उवज्झकाए अविसज्जंते हवंति लहुगाओ ।
भन्नंते गुरुगादी जाव नवमं तु ।।

[भा.२८२४] एमेवय आयरिए अविसज्जंते हवंति गुरुगा उ ।
वसभाईएहिं भणिए छल्लहुगाई उ जा चरिमे ।।

वृ- संयत्या भणितया स्वयं प्रवर्तिन्यास्तस्यामविसर्जनायां यदि तस्या उपाध्यायो न तां भणति यथा विसर्जयेमां साध्वीमिति तदा तस्य प्रायश्चित्तं लघुकाः । उपाध्यायातिक्रमणे यद्याचार्यो न भणति यथेमां विसर्जयेति, तदा तस्यापि प्रायश्चित्तं चतुर्लघु एवं तावत् प्रवर्तिन्यामविसर्जयन्त्यामुक्त-मिदानीमाचार्यस्योपाध्यायस्य वा अविसर्जयतः प्रतिपाद्यते । एवमेव अनेनैव प्रकारेणोपाध्याये अविसर्जयति प्रथमतो भवन्ति चत्वारो लघुकाः । ततो वृषभादिक्रमेण प्रायश्चित्तं वर्धमानं तावत् द्रष्टव्यं यावत् पर्यन्ते नवममनवस्थाप्यलक्षणं प्रायश्चित्तं आचार्येण प्रथमतोऽभण्यंते गुरुकाश्चत्वार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्ततस्तदादिकं वृषभादिक्रमे प्रवर्धमानं तावदवसेयं यावत्पर्यन्ते चरमं पाराश्चितमितीयमक्षरयोजना भावार्थस्त्वयम्-संयत्या प्रेषणे प्रवर्तिन्या विसर्जितायामविसर्जितायां वा यद्युपाध्यायो न विसर्जयति तदा तस्य प्रायश्चित्तं चत्वारो लघुकास्ततोऽन्येन साधुना गीतार्थेन स उपाध्यायो भण्यते । तथाप्यमुत्कलने चतुर्गुरु ततो यः साधुरुपाध्यायस्थानं प्राप्तस्तेन स प्रज्ञास्तेन स प्रज्ञाप्यते तथाप्य विसर्जने षड्लघु तदनन्तरमाचार्यस्थानं प्राप्तः साधुः प्रेष्यते तेनाप्यविसर्जने षड्गुरु कुलेन ततः कुलस्थविरेण वा भावनीयस्तत्राविसर्जने च्छेदः । गणेन गणस्थविरेण वा भणनेऽप्यविसर्जने मूलं सङ्घेन स्थविरेण वा प्रज्ञापनायामप्यमुत्कलनेऽनवस्थाप्यं तथा संयत्याभणने प्रवर्तिन्या विसर्जितायामविसर्जितायां वा यदि आचार्यो न विसर्जयति तदा तस्य प्रायश्चित्तं चतुर्गुरुकम् तदनन्तरं तस्य समीपे वृषभः प्रेष्यते तस्याप्यमुत्कलने षट्लघु । तत उपाध्यायस्थानप्राप्तेन साधुना भणनेऽप्यविर्सजने षट् गुरु । तदनन्तर-माचार्यस्थानप्राप्तः साधुः प्रेषणीयः । तस्याप्यमुत्कलने च्छेदः । कुलेन कुलस्थविरेण भणितेऽप्यविसर्जने मूलं गणेन गणस्थविरेण वाऽनवस्थाप्यं सङ्घेन सङ्घस्थविरेण वा पाराश्चितं संघातिक्रमे तस्या गणादपहरणं सङ्घेन । तथा चाह-

[भा.२८२५] साहत्थमुंडियं गच्छवासिणं बंधवेविभगंती ।
अन्नस्स देइ संघो नाणचरणरक्खणा जत्थ ।।

वृ- पार्श्वस्थादिभिः स्वहस्तमुण्डितां गच्छवासिनीं पार्श्वस्थादि गच्छवासिनीं वा बान्धवा उद्यत-विहारिणो ये संसारान्निस्तारयन्ति तान् विमार्गयन्ती अन्यस्याचार्यस्योपाध्यायस्यान्यस्याश्च प्रवर्तिन्याः सङ्घो ददाति । यत्र तस्या ज्ञानचरणरक्षणा भवति किमित्येवमत आह-

[भा.२८२६] नाणं चरणस्स पव्वज्ञकारणं नाणचरणतो सिद्धी ।
जहि नाणचरणवुड्डी अज्ञाठाणं तहिं वुत्तं ।।

वृ- प्रव्रज्याकारणं ज्ञानस्य चरणस्य च ज्ञानचरणनिमित्तं प्रव्रज्या प्रतिपद्यते इति भावः । यतो ज्ञानचरणतः सिद्धिर्नान्यस्मात्ततो यत्र ज्ञानचरणवृद्धिस्तत्रार्याणामार्यिकाणां स्थानप्रवस्थानमुक्तं तीर्थकरगणधरैः । पार्श्वस्थादीनां सकाशे ज्ञानचरणे न ततस्तेभ्यस्तामपहृत्य सङ्घो अन्यस्य ददाति ।।

[भा.२८२७] मोत्तूण इत्थ चरिमं इत्तिरितो होइ ऊ दिसाबंधो ।
उसन्नदिक्खियाए आवकहाए दिसाबंधो ।।

वृ- अत्र एतेषु चतसृषु मध्ये चरमां चउत्थी पुन मग्गए सिक्खमित्येवंरुपां मुक्त्वा शेषाणां तिसृणामध्वनिर्गतादिकादीनां दिग्बन्ध इत्वरो भवति । चरमायाः पुनरवसन्नदीक्षिताया यावत्कथिको दिग्बन्धः ।

मू. (१५९) *कप्पइ निग्गंथाण वा निग्गंथीण वा निग्गंथं अन्नगणाओ आगवं खुयायारं जाव तस्स ठाणस्स आलोयावेत्ता पडिक्कमावेत्ता निन्दावेत्ता गरहावेत्ता विउट्टावेत्ता विसोहावेत्ता अकरणाए अब्भुट्ठावेत्ता अहारिहं पायच्छित्तं पडिवज्ञावेत्ता उवट्ठावेत्तए वा धारेत्तए वा ।।*

वृ- अस्याक्षरगमनिका भाष्यविस्तरश्च प्राग्वत् द्रष्टव्यस्तथा चाह-

[भा.२८२८] एसेव गमो नियमा निग्गंथाणंपि होइ नायव्वो ।
नवरं पुन णाणत्तं अनवट्ठप्पो य पारंची ।।

वृ- एष एवानन्तरोदितो गमः प्रकारो निर्ग्रन्थानामपेत्य गणादागच्छतां भवति नियमात् ज्ञातव्यः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरं पुनः प्रायश्चित्ते नानात्वं अनवस्थाप्यं पाराञ्चितं च । इयमत्र भावना-येन प्रव्रजितः स क्षुल्लको भिक्षुर्वा स चेत् संयते प्रेषिते न मुत्कलयति तदा तस्य प्रायश्चित्तं चतुर्लघु । ततो वृषभादिक्रमेण प्रयश्चित्तं पूर्वप्रकारेण वर्धमानं तावद् द्रष्टव्यं यावत्सङ्घेन सङ्घस्थविरेण वा भणनेऽप्यमुत्कलनेऽनवस्थाप्यं तथा तस्य साधुना भणनेऽप्यमुत्कलने यद्युपाध्यायस्तं प्रव्राजकं न भणति यथा विसर्जयैनमिति तदा तस्य प्रायश्चित्तं चतुर्लघु । आचार्यस्याभणेन चतुर्गुरुस्तथा उपाध्यायः साधुप्रेषणे यदि न मुत्कलयति तदा चतुर्लघु । ततो वृषभादिक्रमेण पूर्ववद्वर्धमानं प्रायश्चित्तं तावद् द्रष्टव्यं यावत्संघातिक्रमेऽनवस्थाप्यं, आचार्यस्य तु चतुर्गुरुकादारभ्य तावद्वक्तव्यं यावत्सङ्घातिक्रमे पाराञ्चितमत्रापि निर्ग्रन्थ्या इव चत्वारो भेदास्तथा चाह-

[भा.२८२९] अद्धाण निग्गयादी कप्पट्ठगसंभरंततो बिइतो ।
आगमनदेसभंगे चउत्थ उ मग्गए सिक्खं ।।

वृ- प्रथमोऽध्वनिर्गतादिकोऽद्वितीयः कल्पस्थकं बालकं संस्मरन्, तृतीयः परचक्रागमेन देशभङ्गे चतुर्थः पार्श्वस्थादिदीक्षितः शिक्षां मार्गयति । अमीषां च व्याख्यानं सविस्तरं प्राग्वन्निरवशेषं द्रष्टव्यमत्राप्यचरमं मुक्त्वा शेषाणां त्रयाणामित्वरो दिग्बन्धश्चतुर्थस्य तु यावत्कथिक इति ।

उद्देशकः- ६ - समाप्तः

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहार सूत्रे षष्ठ उद्देशकस्य (भद्रबाहुस्वामी रचिता निर्युक्ति युक्त) संघदासगणि विरचितं भाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

उद्देशकः- ७

व्याख्यातः षष्ठोद्देशकः । सम्प्रति सप्तम आरभ्यते । तत्र चेदमादि सूत्रम्-

मू. (१६०) *जे निग्गन्था य निग्गन्थीओ य संभोइया सिया, नो कप्पइ निग्गंथीणं निग्गंथा अनापुच्छित्ता निग्गंथि अन्नगणाओ आगयं खुयायारं सबलायारं भिन्नायारं संकिलिट्ठायारचित्तं तस्स ठाणस्स अनालोयवित्ता जाव पायच्छित्तं अपडिवज्जावेत्ता पुच्छित्तए वा वाएत्तए वा उवट्ठावेत्तएवा संभुञ्जित्तए वा संवसित्तए वा तीसे इत्तरियं दिसं वा अनुदिसं वा उद्दिसित्तए वा धारेत्तए वा ।*

मू. (१६१) *जे निग्गंथा य निग्गंथा य निग्गंथीओ य संभोइया सिया कप्पइ निग्गंथीणं निग्गंथे आपुच्छित्ता निग्गंथिं अन्नगणाओ आगयं खुयायारं जाव संभुजित्तए वा संवसित्तए वा तीसे इतरियं दिसं वा अन्नदिसं वा उद्दिसिए वा धारेत्तएवा ।*

[भा.२८३०] निग्गंथीण हिगारे ओसणत्ते य समनुवत्तंते ।
सत्तमए आरंभो नवरं पुन दोवि निग्गंथी ।।

वृ- निर्ग्रन्थी नामाधिकारेऽवसन्नत्वे षष्ठोद्देशके चरमसूत्रद्वयाऽनुवर्त्तमाने सप्तमे उद्देशके सूत्रद्वयस्यारम्भो भवति । तत्र यथा षष्ठोद्देशके चरमसूत्रद्वये एकस्मिन् सूत्रे निर्ग्रन्थी द्वितीये सूत्रे निर्ग्रन्थ एवमिहापि नयत आह-नवरं सूत्रद्वयेपि द्वेपि निर्ग्रन्थ्यौ एवमनेन सम्बन्धेनायातस्यास्य व्याख्याः-ये निर्ग्रन्था निर्ग्रन्थ्यश्च सांभोगिकाःस्युस्तेषां मध्ये निर्ग्रन्थीनां न कल्पते निर्ग्रन्थाननापृच्छयान्य-स्माद्गणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दागतां क्षुताचारां भिन्नाचारां संक्लिष्टाचारचित्ताममीषां शब्दानामर्थः प्राग्वत्, यस्मिन् स्थाने सीदति स तस्य स्थानस्य अनालोच्य अप्रतिक्रम्य प्रायश्चित्तमप्रतिपाद्य प्रष्टुं वा वाचयितुं वा उपस्थापयितुं वा षण्णां संभोगेन संभोक्तुं वा संवस्तुं वा तस्याइत्वरं दिशमाचार्य लक्षणामनुदिशं वा उपाध्यायप्रवर्तिनी लक्षणा-मुपदेष्टुं वा अनुज्ञातुं नापि तस्याः स्वयं धारयितुमित्येष प्रथमसूत्राक्षरार्थः ।। सम्प्रति भाष्यविस्तरः-

[भा.२८३१] सुत्तधम्मकहनिमित्तमादि घेत्तूण निग्गया गच्छा ।
पणवणचेइयाणं पुअं काऊण आगमनं ।।

वृ- कस्याप्याचार्यस्य शिष्या सा सूत्रमुपलक्षणमेतदर्थं च गृहीत्वा तथा धर्मकथाः पठित्वा निमित्तं वातीतमनागतं गृहीत्वा आदि शब्दात् विद्यामन्त्रचूर्णयोगांश्च ज्ञात्वा गच्छान्निर्गता ततः संनिमित्तादिबलेन धर्मकथा च इत्यादीनामीप्सिता जाता ततः संस्तवेन तानावृत्त्य चैत्यायतनप्रज्ञापनातश्चैत्यायतनं कारितवती विपुलं तत्र सत्कारसमुदयमनुभवति । अन्यदा सा महत्तरिका तस्याः संबोधनार्थं वा विहारप्रत्ययं वा चैत्यमहमुद्दिश्य वा तत्र समागता सा तस्याः शिष्या परितुष्टा तत इभ्यगृहेषु विविधान्य-शनादीनि वस्त्राणि च महार्हाणि तस्या महत्तराया उत्पादयति, ततस्तस्या महत्तरिकया साऽनशिष्टा किमद्या प्यार्ये पार्श्वस्थत्वेन तिष्ठसि । कुरु संयमे समुद्योगं स्वयं वा सा उद्यंतु कामा एवं तस्यामुपस्थितायां यदि चैत्यानामन्यःशुश्रूषकोऽस्ति । ततस्तस्मात्स्थानात् प्रतिक्राम्य तां महत्तरिका नयति, अथ नास्ति चैत्यानामन्य शुश्रुषकस्ततो यदितस्मात्स्थानात् प्रतिक्राम्य तां महत्तरिका नयति तदा चैत्याभक्ति निमित्तं तस्याः प्रायश्चित्तं चतुर्गुरुकं, । एवं पूजां महत्तरिकायाः कृत्वा महत्तरिकया सह गुरु सन्निधावागमन-मेतदेवाभिधित्सुराह-

[भा.२८३२] धम्मकहनिमित्तेहियविज्ञामंतेहिं चुणजोगेहिं ।
इब्भादि जोसियाणं संथवदाने जिनाययनं ।।

वृ- धर्मकथानिमित्तं विद्यामन्त्रैश्चूर्णयोगैश्चइत्यादि । जोषित्वा प्रीतवित्वा संस्तवदाने परिचयकरणे तथाविध प्रज्ञापनया नियतनं कारितवती ।।

[भा.२८३३] संबोहणट्ठयाए विहारवत्ती य जिनवरमहेव ।
मपह (महय) रिया तत्थ गया निज्ञरणं भत्तवत्थाणं ।।

वृ- तस्याः सम्बोधनार्थं विहारवृत्या वा जिनवरमहे वा तस्या महत्तरिका तत्र गता तत इभ्यगृहेषु तस्या विविधस्य भक्तस्य महार्हाणां वस्त्राणां निर्जरणं दानं तया कारितम् ।।

[भा.२८३४] अनुसट्ठ उज्ञमंती विवज्ञए चेइयाण सारवए ।
पडिवज्ञंत अविज्ञंतए उ गुरुगा अभत्तीए ।।

वृ- ततः सा महत्तरिकया संयमोद्योगकरणे समनुशिष्टाः स्वयं वा उद्यच्छन्ती वर्तते । तत्र विद्यमाने चैत्यानां सारापके सारकारके तां नेतुं प्रतिपद्यन्ते । अविद्यमाने तु चैत्यसारकारके तस्यानयेन अभक्ति-निमित्ताश्चत्वारो गुरुकास्तासां महत्तरिकाणांम प्रायश्चितम् ।।

[भा.२८३५] आगमनं सक्कारं हिंडंति जहिं विरुवरूवेहिं ।
लाभेण सन्नियट्टा हिंडंती तो तहिं दिट्ठा ।।

वृ- एवं सत्कारं सन्मानं च प्रतिगृह्य गुरुसमीपे आगमनं ततो लाभेन वस्तुलाभेनोपेताः सन्निवृत्ता विरूपरूपैरन्यदेशसत्कैर्वस्त्रैः प्रावृत्तास्तत्रभिक्षां हिएडन्ते । चैत्यवन्दनाय वा व्रजन्ति । तत्र हिण्डमाना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृषभैर्द्दष्टा एतदेव स्पष्टं भावयति-

[भा.२८३६] सक्कारिया य आया हिंडंति तहिं विरूवरूवेहिं ।
वत्थेहिं पाउयाते दिट्ठा य तहिं तु वसभेहिं ।।

वृ- सत्कारिताश्च महत्तराः प्रवृत्तकार्या यत्र गुरवस्तिष्ठन्ति तत्रायातास्तत्र च विरूपरूप्यै-र्नानाप्रकारैर्महार्हैर्वस्त्रैः प्रावृत्ता हिण्डन्ति । ताश्च तत्र हिण्डमाना वृषभैर्द्दष्टाः ।।

[भा.२८३७] भिक्खाउ सरणंमि व अपुव्ववत्थ उ ताउ दट्ठूणं ।
गुरुकहण तासि पुच्छा अम्हे अदिन्ना नवा दिठा ।।

वृ- भक्षियां समवसरणे वा अपूर्ववस्त्रास्ता द्दष्ट्वा वृषभा गुरुकथनं कृतवन्तो वषभैर्गुरोर्निवेदितं । तत आचार्येण वृषभा भणिताः । पृच्छत ता आर्याः कुतो युष्माकं तानि वस्त्राणि ततो वृषभैस्तासां समीपं गत्वा पृच्छा कर्तव्या । यथा-आर्ये नास्माभिरेतानि वस्त्राणि दत्तानि, नापि केनचिद्दीयमानानि अस्माभिर्द्दष्टानि ।।

[भा.२८३८] निवेदियं च वसभे आयरिए दिट्ठ एत्थ किं जायं ।
तुम्हे अम्ह निवेयह किं तुब्भहियं नवरं दोन्नि ।।

[भा.२८३९] लहुगो लहुगा गुरुगा च्छम्मासा होंति लहुगुरुगा य ।
च्छेदो मूलं च तहा गणं च हाउं विगिंचेज्जा ।।

वृ- अत्र द्वयोर्गाथयोर्यथासंख्येन पदघटना । सा चैवम्-संयतीभिर्यत् किमपि वस्त्रादिकं लभ्यते तत्सर्वं गुरवे निवेदनीयं अनिवेदिते प्रायश्चित्तं लघुको मासः । वसभे इति वृषभे पृच्छके वृषभेण पृच्छायां कृतायां यदि न निवेदयन्ति तदा चत्वारो लघुकाः । आचार्येऽपि प्रच्छके यदि न कथयन्ति तदा चत्वारो गुरुकाः । यदि पुनराचार्यैरधिक्षिप्ता यथा किं युष्माभिर्न निवेदितानि तदा यद्व्यावृत्ता तदा चतुर्ल-घुकमथानावृत्ताः सत्यो न कथयन्ति तदा चतुर्गुरुकम् । अथ ता ब्रुवते यद् भणन्ति तत् द्दष्टं स्यात्तदा षण्मासा लघवः । अथाभिदधति किमत्रजातं यदि न निवेदितं तदा षण्मासा गुरवः प्रायश्चित्तं । अथ भाषन्ते यूयं किमस्माकं निवेदयत । अत्र प्रायश्चित्तं च्छेदः । किं युष्माकमस्मदधिकं नवरमावां परस्पर द्वे भ्रातृभाण्डे एवं तासां ब्रुवतीनां प्रायश्चित्तं मूलं । तस्याश्च प्रवर्तिन्या गणो हृत्वा अन्यस्या दीयते । अथ सापि नेच्छति ततोऽन्यस्या दातव्यः । अथ सापि नेच्छति तर्ह्यन्यस्या दीयते । एतदेवाह-

[भा.२८४०] अनिस्सादेंति गणं अह नेच्छति ततो विगिंचते ।
तंपि पुनरविदिन्निस्सा एवं तु कमेण सव्वासिं ।।

वृ- अन्यस्या गणमाचार्या ददति । तां पूर्वां प्रवर्तिनीं गणं हृत्वा विगिञ्चयेत् परित्यजेत् । पुनरन्यस्या ददति । एवंक्रमेण सर्वासामपि पूर्वस्या अनिच्छायां गणो दातव्यः । सर्वासामनिच्छयां सर्वासां परित्यागः ।

अथ कस्मात् ता गणं दीयमानं नेच्छन्ति तत आह-

[भा.२८४१] पवत्तिनि ममत्तेनं गीयत्थातो गणं जई ।
धारईत्ता न ईच्छंति सव्वासिंपि विगिंचणा ।।

वृ- यदि गीतार्था अपि गणं धारयितुं प्रवर्तिनी ममत्वेन नेच्छन्ति तदा सर्वासां विगिञ्चना परित्यागः ।

[भा.२८४२] चोयग गुरुतो दंडो पक्खेवगचरियसिद्धपुत्तीहिं ।
विसयहरणट्ठया तेनियं च एयं न नाहिंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- चोदकः प्राह-प्रवर्तिन्यास्तुच्छेऽपराधे गुरुको दण्डो दत्तः । आचार्यः प्राह-अपराधोऽपि तासां गरीयान् यत्व्याहृताः (अभिहिताः) सत्यो निष्ठुरं भाषंते । अन्यच्च ता एव स शिष्यमाणा अनापृच्छ्योपधिं गृह्णत्यश्चरिकासिद्धपुत्रीभ्यां प्रक्षेपकमुपचारविषयनिमित्तहरणार्थतया न ज्ञास्यन्ति । नापि कयाचित् सिद्धपुत्रिकया स्तैन्यकरणाय प्रव्रजितया एतत् उत्कृष्टवस्त्रादिकं स्तेनितं न ज्ञास्यंति तस्मादेतिच्छिष्यापननिमित्तमेष गुरुको दण्डः । एतदेव सप्रपञ्चमाह-

[भा.२८४३] अवराहो वि गुरूतासिं सच्छंदेणोवहिं तु जाघेत्तुं ।
न कहंती भिन्न वा जं निठुरमुत्तरं बेंति ।।

वृ- अपराधोऽपि तासां संयतीनां गुरुरेव यत् स्वच्छन्दसा उपधिं गृहीत्वा न कथयन्ति भिन्ना वा ज्ञाता वा सत्यो यन्निष्ठुरमुत्तरं ब्रुवते । अन्यच्च अनापृच्छया गृह्णत्यो विषयहरणार्थतया चरिकासिद्धपुत्रीभिः प्रक्षेपकं न ज्ञास्यन्ति । एतदेव भावयति-

[भा.२८४४] अचियत्ता निक्खंता निरोहलावन्नलंकियं दिस्सा ।
विरहालंभे चरिया आराधना दिक्खलक्खेण ।।

वृ- कापि महेला कुटुम्बिनो अवियत्ता अप्रीतिमती अहमिति प्रव्रजिता । नवरं संयतीत्वे निरोधेन कुतोऽपि कर्मकरणादीनामर्थाय निर्गमनं ततः शरीरस्य लावण्यमद्भुतां लावण्यालंकृतां भिक्षामटतीं स भर्ता दृष्ट्वा लोभं गतः । सा चात्मतृतीया भिक्षामटती विरहो न विद्यते यत्र तामालापयति । ततः स चरिकां दानसन्मानाभ्यामाराधयति । ततश्चरिका ब्रूते-सन्दिश यन् मया कर्तव्यं । स प्राह-एतां संयतीं तथा कुरुत यथा प्रतिभज्यते । ततः सा दीक्षालक्षेण दीक्षाव्याजेनाहं प्रव्रजिष्यामीत्येवं रूपेण तां संयतीमुपागता ।।

[भा.२८४५] अहवावि अनो कोई रूवगुणुम्माइतो सुविहियाए ।
चरियाए पक्खेवं करेज्ज च्छिद्दं अविंदंतो ।।

वृ- अथ च कोऽप्यन्योऽविरतः सुविहितायाः संयत्या रूपगुणेनोन्मादित उन्मादं ग्राहितच्छिद्रमविन्दन् अलभमानश्चरिकय दानसन्मानाभ्यामाराधितया प्रक्षेमुपचारं कुर्वात् ।।

[भा.२८४६] सिद्धीवि कावि एवं अहवा उक्कोसनंतगा भिन्ना ।
होहं वीसं भेउं अगहियगहिए य लिंगंमि ।।

वृ- अथवा चरिकया अभावे चरिकया प्रयोजनासिद्धौ कापि सिद्धयपि सिद्धपुत्रिकापि एवं दानसन्मानाभ्यां गृहीत्वा प्रयुज्येत, ततोऽनापृच्छया ग्रहणेऽजानत्यस्ता स्तमप्युपचारं गृह्णीयुस्तथा च सति महान् दोषः । अथवा सा सिद्धपुत्रिका तासां संयतीनामुत्कृष्टान्ययन्तकानि वस्त्राणि दृष्ट्वा भिन्ना वस्त्रग्रहणलोभेन चित्त(वि)भक्तमुपागता भविष्याम्यहं प्रव्रजितेति विश्रम्य गृहीत अगृहीते च लिङ्गे उत्कृष्टवस्त्राणां स्तैन्यं कुयात् । पर आह-

[भा.२८४७] वीसिज्जिय नासिहिती दिठ्ठंतो तत्थ घंटलोहेण ।
तम्हा पवित्तिनीए सारणजयणाए कायव्वा ।।

वृ- चोदकः प्राह-नन्वेवं विसर्जितास्ता नंक्ष्यन्ति तस्मान्मा क्रियतामी दृशो गुरुको दण्डः । आचार्यः प्राह-दृष्टान्तस्तत्र घण्टालोहेन । किमुक्तं भवति ? यस्मिन्नेव दिने यत्र लोहे घण्टा कृता तल्लोहं तस्मिन्नेव दिने विनष्टं । एवं यत्र दिवसे ताः स्वच्छन्दतो वस्त्राणि गृहीतवत्यः प्रव्रज्यां वा दत्तवत्य स्तस्मिन्नेव दिने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता विनष्टा यत एते दोषास्तस्मात् प्रवर्तिन्या सारणा यतनया कर्तव्या । तामेवाह-

[भा.२८४८] धम्मं जइ काउ समुट्ठियासि अप्पोवदुग्गं तुकुमं सएहिं ।
तदानि वच्चामो गुरूण पासं भव्वं अभव्वं च विदंति तेऊ ।।

वृ- सा परिव्राजिका सिद्धपुत्रिका यदि संयतीनामुत्तिष्ठति ततः सा प्रवर्तिन्या वक्तव्या यदि धर्मं कर्तुंसमुत्थितासि तर्हिसम्प्रति व्रजामो गुरूणां पार्श्व यतो भव्यमभव्यं वा ते विदन्ति । वयं तु किं जानीमः । गुरुवः कथं जानन्तीति चेदत आह-

[भा.२८४९] जो जेन अभिप्पाएण एति तं भे गुरू वियाणंति ।
पारगमपारगति य लक्खणतो दिस्स जाणंति ।।

वृ- यो येनाभिप्रायेण समागच्छति तत् भो गुरवो विजानन्ति तथा प्रव्रज्यां गृहीतुकामां दृष्ट्वा लक्षणत एव जानन्ति यथा एष प्रव्रज्यायाः पारगो भविष्यत्येषोऽपारग इति तथा-

[भा.२८५०] पत्ता पोरिसिमादी च्छाया उव्वाय वुत्थ साहंति ।
चोदेति पुव्वदोसे रक्खंती नाउ से भावं ।।

वृ- प्राप्ता पौरुष्यादिकं प्रथमपौरुष्यादिकं गुरवे निवेदनीया । तथा च्छाता बुभुक्षिता उद्धाता परिश्रान्ता तथा उषिता तदपि संयत्यो गुरूणां कथयन्ति गुरुश्च पूर्वदोषान् चोदयति कथयति । तथा से तस्या दीक्षिताया भावमभिप्रायं द्रष्टुं ज्ञात्वा गुरवो रक्षयन्ति । एष द्वारगाथा संक्षेपार्थः ।

[भा.२८५१] जा जीए होति पत्ता नयंति तं तीए पोरिसीए ।
उछो उव्वाय निमित्तं बितियाए ततियाए चरिमाए ।।

वृ- या यस्यां पौरुष्यां संयतीनां पार्श्वे प्राप्ता भवति तस्यां पौरुष्यां संयत्यो गुरुसमीपं नयन्ति । अथ सा च्छाता उद्धाता वा तर्हि तन्निमित्तं तेन कारणेन तस्या द्वितीयस्यां तृतीयस्यां चरमायां वा गुरु समीपं नीयते । नीत्वा च च्छातादिकं सर्वं कथ्यते । एतेन च्छातोद्धातेति व्याख्यातम् ।। साम्प्रतमुषिता-

[भा.२८५२] चरमाए जा दिज्जइ भत्तं विस्सामयंतिणं जा वं ।
ता होइ ति सा दूरं च अंतरं तेन वुच्छंमि ।।

वृ- चरमायां पौरुष्यां सा समागता सा च्छाता ततो यावत्तस्यां चरमायां पौरुष्यां भक्तं दीयते । भक्तानन्तरं च संयत्यस्तां विश्रामयन्ति तावन्निशा भवति । दूरंतरं चा गुरुणामुपाश्रयात् तेन सा तत्रैव संयतीनामुपाश्रये उषिता प्रभाते च गुरुसमीपे नेष्यते ।।

[भा.२८५३] नाहिंति ममंते तू काइ ना सेज्ज अप्प संकाए ।
जा उ न नासेज्ज तहिं तं तू गयं बेंति आयरिया ।।

वृ- प्रभातेऽहं गुरुसमीपे नेष्यते तु गुरवो मां ज्ञास्यन्ति इति विचिन्त्य काचिदात्मशङ्कया नश्येत् । या तु नश्यति तां तत्र गुरुपाश्रये गतामाचार्याणां संयत्यः कथयन्ति । यथैषास्माकमुपाश्रयेऽनेन कारणेनोषिता एतेन वुत्थसाहंतीति व्याख्यातम् ।। एवं कथिते आचार्यास्तां ब्रुवते किमित्याह-

[भा.२८५४] न हु कप्पइ दूती वा चोरा अम्हका इ इति वुत्ते ।
गुरुणानायामि अहं वएज्ज नाहंति वा बूया ।।

वृ- न हु नैव कल्पते दूती चौरी चास्माकं काचित् दीक्षयितुं कल्पते इति गुरुणोक्ते ज्ञाताहमिति विचिन्त्य व्रजेत् । यदि ब्रूयात्नाहं तादृशीति एतेन पूर्वदोषात् चोदयतीति व्याख्यातम् ।। सम्प्रति रक्खंति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाउं सभावमिति व्याख्येयं । तत्र कथं तस्या भावं लक्षयन्तीत्यत आह-

[भा.२८५५] अतिसयरहिया थेरा भावं इत्थीण नाऊ दुन्नेयं ।
रक्खेथ एयं उवियं लक्खेहिया से अभिप्पायं ।।

वृ- अतिशयरहिता अपि स्थविराः स्त्रीणां दुर्विज्ञेयं भावभिङ्गिताकारकुशलतया ज्ञात्वा वदन्ति- एतामुत्परां यत्नेन रक्षत लक्षयत वा से तस्या अभिप्रायं कथं लक्षयन्त्वित्यत आह-

[भा.२८५६] उच्चारभिक्खे अदुवा विहारे थेरीहिं जुत्तं गणिणी उ पेसे ।
थेरीण असती तु अत्तव्वयाहि ठवेति एमेव उवस्सयंमि ।।

वृ- यदा सा ब्रूते नाहं तादृशीति तदा तस्या उत्परिचितेन लिङ्गमात्रं समर्पितं तत उच्चारभूमौ भिक्षायामथवा विहारे गणिणी(नी) प्रवर्तिनी तां स्थविराभिर्युक्तां प्रेषयेत् । स्थविराणामभावे अतद्वयोभिस्तस्याः सकाशात् या याः क्षुल्लकतरास्तरुणास्ताभिः सममुच्चारभूम्यादिषु प्रेषयति । एवमेव प्रथमतः स्थविराभिस्तासामभावे असदृशवयोभिरित्यर्थः । उपाश्रये स्थापयति ।।

[भा.२८५७] कइयविया उपविट्ठा अच्छति छिड्डंतहिं निलिच्छंतो ।
विरहालंभे अहवा भणाइ इणमो तहिं सा उ ।।

वृ- कैतविका कैतववती प्रविष्टा सती वा तत्र छिद्रं निरीक्षमाणा तिष्ठति । अथवा विरहालाभे तत्र सा इदं भणंति । किं तद्भणतीत्यत आह-

[भा.२८५८] अविहाडाहं अव्वोमा मं पसेज्जनीयवग्गो वा ।
तंदानि चेइयाइं वंदह रक्खामहं वसहिं ।।

वृ- पाक्षिकादिषु आर्यिकाश्चैत्ये वन्दनार्थं प्रस्थिता अवलोक्य सा शैक्षी ब्रूते- अव्वो इति सम्बोधने । अहमविघाटा अप्रकटा वर्ते यदि वा मा मां प्रव्रजितां निजवर्गः पश्येत्ततः स व्रतात्त्याजयेत् । तस्मादिदानीं यूयं चैत्यानि वन्दध्वमहं वसतिं रक्षामि । एवमुक्ते एकया तरुण्या सह प्रतिश्रयपालिका स्थापिता । तत गतास्वार्यिकासु सा शैक्षी तां तरुणीमार्यिकां ब्रूते-

[भा.२८५९] उवन्नो सो धणिणं तुज्झ धवो जे तया सि नित्तणहो ।
वभिचारी उवअन्नी इति ना ते विगिंचणानीसे ।।

वृ- तव धवो भर्ता यस्तदा निस्तृष्ण आसीत् स इदानीं धणिवमत्यर्थं तवविषये उव्वन्न उत्कणिठतः । अथवा अन्यः कोऽपिव्यभिचारी पारदारिकः संयतीं प्रार्थयामास । तां प्रव्रज्यां व्याजेन व्यापारितवान् तत एव विरहं ज्ञात्वा ब्रूयात् । को वा तरुणोरूपादिगुणोपेतः तवानुगोऽनुरूपो वर्तते । स ते समागममिच्छति । एवं तस्या भावे ज्ञाते विगिञ्चना परित्यागः कर्तव्यः । अथवा काचित् सिद्धपुत्रिका वा अन्या वा संयतीनां वस्त्राद्यपहर्तुकामा निष्क्रमण व्याजेन प्रविष्टा चैत्यवन्दनार्थं गतास्वार्यिकासु तरुणीं क्षुल्लकां प्रतीदं ब्रूते-

[भा.२८६०] पारवयादीयाइं दिठाणं नासिणं तगामिण ए ।
तुज्झं नत्थिहितिरिहे वुत्ता खुड्डीतो दंसंति ।।

वृ- पारापतादिकानि आदिशब्दात् पुंड्रवर्धनकानि परिग्रहो न मया नन्तकानि वस्त्राणि दृष्टानि नमिति वाक्यालङ्कारे । तत् किं युष्माकं महत्तरिकायाः पार्श्वे तानि न सन्ति । एवमुक्तास्ताः क्षुल्लकाः तुच्छतया मास्माकं महत्तरिकाया परिभवो भूयादिति कृत्वा दर्शयन्ति । कानि कानीत्यत आह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२८६१] कोट्टंब तामलित्तगसिंधव ए कसिण जुंगिए चेव ।
बहु देसिए य अन्ने पेच्छसु अम्हं खमज्जाणं ।।

वृ- कोट्टम्बानि गौडदेशोद्भवानि, तामलित्तिकानि सैन्धवानि अन्यानि च बहुदेशिकानि कृत्स्नानि परिपूर्णानि जुङ्गितानि खण्डीकृतानि अस्माकं क्षमार्याणां क्षमाप्रधानानामार्याणां प्रवर्तिन्या इत्यर्थः । प्रेक्ष्य वस्त्राणीति उपसंहारमाह-

[भा.२८६२] सच्छंदगेण्हमाणीण होंति दोसा जतो उ इच्चाती ।
इइ पुच्छिउं पडिच्छा न तासि सच्छंदया सेयं ।।

वृ- स्वच्छंदत उपधिं शिष्यां वा गृह्णतीनां यतइत्यादय एवमादयो दोषा भवन्ति इत्यस्मात् कारणात् गुरुनापृच्छ्य उपधेः शिष्याया वा प्रतीच्छाग्रहणं न तु स्वच्छन्दता तासां श्रेयसी ।।

मू. (१६२) *जे निग्गंथा य निग्गंथीओ य संभोइया सिया कप्पइ निग्गंथाणं निग्गंथीओ आपुच्छित्ता वा अनापुच्छित्ता वा निग्गंथिं अन्नगणाओ आगयं खुयायारं सबलायारं भिन्नायारं संकिलिट्ठायारचित्त तस्स ठाणस्स आलोयवेत्ताजाव पायच्छित्तं पडिवज्जावेत्ता पुच्छित्तए वा वाएतए वा उवट्ठावेत्तए वा संभुञ्जित्तए वा संवसित्तए वा तीसे इत्तरियं दिसं वा अनुदिसं वा उद्दिसित्तए वा धारेत्तए वा । तं च निग्गंथीओ नो इच्छेज्जा सेवमेव नियंठाणं ।*

[भा.२८६३] अत्थेन गंथतो वा संबंधो सव्वहा अपडिसिद्धो ।
सुत्तं अत्थमवेक्खति अत्थो वि न सुत्तमतियाति ।।

वृ- अर्थतो ग्रन्थतश्च सम्बन्धोऽप्रतिषिद्धः सर्वथा यतः सूत्रमर्थमुपेक्षते । अर्थेऽपि चनिर्ग्रंथीनामधिकारे सूत्रमिदं प्रवृत्तमतः सूत्रतोऽर्थतश्च सम्बन्धोऽस्तीति न किञ्चिदनुपपन्नम् ।

[भा.२८६४] नदिसोय सरिसओ वा अहिगारो एस होइ दव्वठो ।
छठानंतरसुद्धा समणीणमयं तु जा जोगो ।।

वृ- अथवा षष्ठोद्देशके चरमानन्तरसूत्रद्वयादारभ्य एषोऽधिकारो नदीश्रोतः सदृशो दृष्टव्यो, अयं तु योगः तावत् यावत् श्रमणीनामधिकारः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-कल्पते निर्ग्रन्थानां निर्ग्रन्थीरापृच्छ्य अनापृच्छ्य वा निर्ग्रन्थीमन्यगणादागतां क्षताचारां संक्लिष्टचारचरित्रां तस्मात्स्थानादालोच्य प्रतिक्रम्य प्रायश्चितं प्रतिपाद्य प्रष्टुं वाचयितुं वा उपस्थापयितुं वा संभोक्तुं वा संवस्तुं वा तस्या इत्वरां दिशमाचार्यलक्षणामनुदिसमुपाध्यायलक्षणां प्रवर्तिनीलक्षणां च उद्देष्टुं वा स्वयं धारयितुं वा तां च निर्गन्थ्यः सांभोगिक्यो वा नेच्छेयुस्तर्हि सेहिमेव नियंठाणं निजमात्मीयं स्थानं प्रतिगमयतामपि तां परित्यज्यतामपीति भावः । निर्दोषत्वं प्रतिसिद्धिरेव न कश्चनापि दोष इति सूत्रसंक्षेपार्थः ।

[भा.२८३५] संविग्गाणुवसती आभीरी दिक्खिया य इतरेहिं ।
तत्थारंभं दड्ढ विपरिणमति तरेवदिठाओ ।।

वृ- को दिवा (काचिदा) भीरी संविग्नानां समीपे धर्मं श्रुत्वा उपशान्ता ते च संविग्ना अन्यत्र विहृता इतरेऽसंविग्नाः समागतास्तैः सा आभीरी दीक्षिता । तेषां चा संविग्नानामारंभं रन्धनादिकं दृष्ट्वा सा विपरिणमति विपरिणामेन तस्या अभिप्रायोजातस्तेषामेव संविग्नानां समीपमुपगच्छामि । एवं चिन्तयन्त्या तया ते इतरे संविग्ना स्थानादिसमवसरणे दृष्टाः श्रुता वा यथामुकस्थाने तिष्ठन्ति ।।

[भा.२८६६] तह चेव अब्भुवगया जह छठुद्देस वणिया पुव्विं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अविसज्जंताणंपि य दंडो तह चेव पुव्वुत्तो ।।

वृ- सा तत्र गता यत्र ते संविग्नाः श्रुता गत्वा च ग्रहणशिक्षामासेवनशिक्षामन्यमाचार्यमन्यमुपाध्यायमन्यां च प्रवर्तिनीं याचते एवमुक्ते यथैव षष्ठोद्देशके चतुर्थीमग्गए सिक्खमेत्यत्र । पूर्वं वर्णिता तथैव एषापि संविग्नैरभ्युपगता यथा अविसर्जयतां प्रवर्तिन्युपाध्यायाचार्याणां पूर्वदण्डः प्रायश्चित्तं दण्डस्तथैवात्रापि द्रष्टव्यः ।।

[भा.२८६७] तं पुन संविग्गमणो तत्थानीयं तु जइ न इच्छेज्जा ।
नियगातो संजतीतो ममकारादीहिं कज्जेहिं ।।

वृ- तां पुनः संवग्निमनसं तत्रानीतां यदि निजकाः संयत्यो ममकारादिभिः कार्यैर्नेच्छेयुस्तान्येव ममकारादीनि कारणान्याह-

[भा.२८६८] पासत्थि ममत्तेणं पगती वेसा अचक्खुकंताय ।
गुरुगणतनीयस्स व नेच्छंती पाडिसिद्धीतो ।।

[भा.२८६९] उमाणं ने(नो) काहिति संखलिबद्धाव ततो सव्वातो ।
मा होहि ईसागरियं सीयंति चउउयं नेच्छे ।।

वृ- यस्याः सा शिष्या तया सह तासां मैत्री ततो मा सा पार्श्वस्था अस्माकमुपरिमन्युं कार्षीरिति पार्श्वस्थाममत्वेन नेच्छंति । अथवा सा कर्मानुभावतः प्रकृत्या प्रायः सर्वजनस्यापि द्वेष्या यदि वा पूर्वभवानुभावत एकस्याः प्रवर्तिन्या अचक्षुः कान्ता अथवा सा प्रवर्तिनी आत्मीयस्याचार्यस्य विषये केनापि कारणेन कुपिता वर्त्तते । यदि वा गणस्य गच्छस्योपरि एतद्याचार्यो न जानाति यद्वा तस्याः संयत्या यो निजवर्गस्तस्य विषये प्रवर्त्तिन्याः [प्रव्रर्त्तिन्या प्रतिसिद्धिः] प्रतिस्पर्धता विद्यते । अथवा ताः सर्वा अपि संयत्यः शृंखलाबद्धाः परस्परं स्वजनाः ततो नोऽस्माकमपमानमेषा करिष्यति तस्मान्मा सागारिकं भवतु । यदि वा ताः सीदन्ति तद्याचार्यो न जानाति सा च धर्मश्रद्धया पार्श्वस्थाविप्रहायात्र समागता सास्माकं सागारिकीति कारणैः तामुद्यतामपि नेच्छन्ति । अत्र प्रायश्चित्तविधिमाह-

[भा.२८७०] भणिय वसभाभिसेए आयरियकुलेणगणेन संघेन ।
लहुगादि जाव मूलं अनिस्से गणो य दायव्वो ।।

[भा.२८७१] एवं पुव्वगमेणं विगिंचणं जाव होइ सव्वासिं १ ।
देवण २ मणुन्नाणं ३ अमणुन्न ४ चउण्हमेगयरं ।।

वृ- वृषभैरानीतां यदि पूर्वकारणैस्तां नेच्छन्ति तदा तासां प्रायश्चित्तं चतुर्लघुः । अभिषेक उपाध्यायस्तेन ताः संयत्यो भणनीयाः प्रतीच्छतेमां संयतीमिति नेच्छंति चतुर्गुरु एवमाचार्येणापि भणनेऽनिच्छायां षट् लघु कुलेन षट् गुरु, गणेन च्छेदः, सङ्घेन मूलम्, तथा चाह-लघुकादि चतुर्लघ्वादि प्रायश्चित्तं क्रमेण तावत् द्रष्टव्यं यावन्मूलम् । सङ्घभणनेऽप्यनिच्छायां प्रवर्तिन्या गणोऽपह्रियते अन्यस्याः गणो दातव्यः । अथ सा प्रवर्तिनी ममत्वेन गणं नेच्छति तर्ह्यन्यस्या दीयते । एवं पूर्वगमने विगिञ्चणं परित्यजनं तावत् द्रष्टव्यं यावत्सर्वासामपि भवति । ततो यस्तस्याचार्यस्य द्वितीयो गच्छस्तत्र नीयते तत्रापि यदि तथैव ता नेच्छन्ति । ततोऽन्यगच्छसत्काः सांभोगिक्यः संयत्यस्तासां दीयते ता अपि यदि नेच्छेयुस्तर्हि अन्यसांभोगिकीनां दीयते । तथा चाह-अन्यानांमनोज्ञानाममनोज्ञानां च सर्वसंख्यया चतसृणामेकतरं स्थानं ददति । तत्र प्रथमं स्थानमात्मीयाः संयत्यो द्वितीयं गच्छवर्तिन्यः तृतीयमन्याः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सांभोगिक्यश्चतुर्थममनोज्ञा इति अथवा अन्यथा चतुर्णा मेकतरमिति व्याख्यायते-

[भा.२८७२] समणुन्नमणुन्नाणं संजय तह संजतीण चउरो य ।
पासत्थि ममत्तादिव अद्धाणादिव्व जे चउरो ।।

वृ- समनोज्ञानां संयतानां समुदायः एकंस्थानं समनोज्ञानां संयतीनां द्वितीयम्, अमनोज्ञानां संयतानां तृतीयमनोज्ञानां संयतीनां चतुर्थमेवमेतानि चत्वारि स्थानानि एतेषामेकतरं समनोज्ञसंयतीनामात्म-तृतीयानां द्वितीयं गच्छवर्तिनीनामन्य गच्छवर्तिनीनां वा स्थानं दीयते । तदभावे अमनोज्ञसंयतीनामपि अथवा पार्श्वस्था ममत्वं प्रकृत्या सर्वजनद्वेष्या प्रवर्तिन्या वा अचक्षुः कान्ता गुर्वादिप्रतिस्पर्धता वा प्रवर्तिन्या एतानि यानि चत्वारि कारणानि । एतेषामेकतरत्कारणमधिकृत्यान्य सांभोगिकीनाम-सांभोगिकीनां च दीयते । अथवा याऽध्वनिर्गतादिका दुहितरं वा संस्मरन्ती परचक्रागमनेन देशभङ्गे वा शिक्षां वा मृगयमाणा एता याश्चतस्रस्तासामेकतरामन्यसांभोगिकीनामसांभोगिकीनां वा दातव्या । यद्यसांभोगिक्योऽपि नेच्छन्ति तदा किं कर्तव्यमित्याह-

[भा.२८७३] सेहित्ति नियंठाणं एवं सुत्तंमि जंतु भणियमिणं ।
एवं कयपयन्ना (त्ता) ताहे सुयं ताउ ते सुद्धा ।।

वृ- एवमसांभोगिकीनामप्यनिच्छायां यत्सूत्रे भणितं 'सेहमेव नियंठाणमिति तत्कर्तव्यमस्यायमर्थ एवं कृतप्रयत्ना अपि यदा संयत्यो नेच्छन्ति तदा ते तां मुञ्चन्तोऽपि शुद्धाः ।

मू. (१६३) *जे निग्गंथा य निग्गंथीओ य संभोइया सिया, नोण्हं कप्पइ पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए; कप्पइण्हं पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए । जत्थेव अन्नमन्नं पासेज्ञा, तत्थेव एवं वएज्ञा - 'अहणं अज्ञो, तुमाए सद्धिं इमम्मि कारणम्मि पच्चक्खं संभोगं विसंभोगं करेमि' । से य पडितप्पेज्ञा, एवं से नो कप्पइ पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए, से य नो पडितप्पेज्ञा, एवं से कप्पइ पच्चक्खं पडिएक्कं संभोइयं विसंभोगं करेत्तए ।।*

वृ- सूत्र सम्बन्धमाह-

[भा.२८७४] संभोइउं पडिक्कमाविया य कप्पइ अयंपि संभोगो ।
सो उ विवक्खे वुत्तो इमं तु सुत्तं सपक्खंमि ।।

वृ- अनन्तर सूत्रे प्रतिक्राम्य संभोक्तुं कल्पते इत्युक्तम् । अयमपि चानेन सूत्रेणाभिधीयमानः संभोगस्ततः संभोगधिकारादिदं सूत्रं प्रवृत्तमथवायं सम्बन्धः । पूर्वसूत्रे संभोगो विपक्षे संयतीरूपे-ऽभिहितः । इदं तु सूत्रं सपक्षे संयतरूपे संभोगविषयमिति सम्बन्धः । अनेन सम्बन्धेना-यातस्यास्य व्याख्या-ये निर्ग्रन्था निर्ग्रन्थ्यश्च सांभोगिकाः स्युस्तेषां नोणमिति वाक्यालङ्कारे कल्पते परोक्षे प्रत्येकं सांभोगिकं विसांभोगिकं कर्तुं कल्पते परोक्षं प्रत्यक्षं प्रत्येकं सांभोगिकं विसंभोगं करोमि । एवमुक्ते यदि स प्रतितप्यते मिथ्यादुष्कृतं न भूय एवं करिष्यामि एवं सति से तस्य न कल्पते । त्रयाणां प्रत्यक्षं प्रत्येकं सांभोगिकं विसांभोगिकं कर्तुमथ स न प्रतितप्यते । एवं सति से तस्य कल्पते त्रयाणां प्रत्येकं सांभोगिकं विसंभोगिकं कर्तुमिति सूत्राक्षरार्थः ।। अधुना भाष्यकार आह-

[भा.२८७५] संभोगो पुव्वुत्तो पत्तेयं पुन वयंति पडियक्कं ।
तप्पंते समणुने पडितप्पणमाणुतप्पं तु ।।

वृ- संभोगः पूर्वं निशीथाध्ययने उक्तः, पडियकं पुनर्वदन्ति प्रत्येकं यो विसंभोगं करोति स तप्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथा एतेन नाम शय्यातरपिण्डः प्रतिसेवितो हा कष्टमेवं तप्यन्तमितरो ज्ञात्वानुतप्यते । एष मम दोषेण तप्यति तस्मात्प्रत्याययामि यथा असदेतत् यदहं शय्यातरं पिण्डं सेवितवान् । अथ स तु तदासौ चिन्तयति मा ममदोषेणैष तप्यतु तस्मान्मिथ्या दुष्कृतं करोमि । एवं संविग्ने तप्यति यदनुतपनं तत्प्रति तपनमिति तदेवं भाष्यकृता विषमानि सूत्राक्षराणि विवृतानि । सम्प्रति निर्युक्त्यऽवसर :-

[भा.२८७६] सागारिए गिहा निग्गएय वडघरिय जंबुघरएय ।
घम्मिय गुलवाणियए हरित्तो लित्तेय दीवे य ।।

वृ- सागारिके शय्यातरे शय्यातरगृहान्निर्गते वटगृहिके जम्बूगृहिके च असदभ्याख्यानेन विसंभोगः कृतः । इयमक्षरघटना । भावार्थस्त्वयं-एकस्मिन्नगरे आचार्यस्य वटगृहिकः शय्यातरः तस्मिन्नेव नगरे अन्य जम्बूगृहिको गृहस्थोऽस्ति । ताभ्यां वटगृहिकजम्बूगृहिकाभ्यां आत्मीयं गृहं कारितं । तयोश्च निर्मापितयोर्द्वयोरपि गृहयोः कपोताः प्रविष्टास्ततोऽमङ्गलमिति मन्यमानौ तौ नैमित्तिकं पृच्छतः । कथमेतस्य दुर्निमित्तस्य व्याघातो भवेत् । नैमित्तिको वदति वटगृहिको जम्बूगृहिक गृहमधितिष्ठतु जम्बूगृहिको वटगृहिकगृहं, ततः कतिपयानि दिनानि स्थित्वा पश्चान्निजनिजगृहे गच्छेयातां । तौ परस्परगृहे संचरितौ तावदिदमथान्यदा अन्यस्मात् गच्छात् प्रघूर्णकाः समागताः । ततो वास्तव्यै जम्बूगृहिकस्य वटगृहिकगृहं प्रविष्टस्य गृहात्प्रथमालिकामानीय तेषां प्राघूर्णकानां दत्वा (त्ता) तैः शय्यातरपिण्डं मन्यमानैरुपरोधवशादप्रीत्यानुक्तास्ततस्ते प्राघूर्णका निर्गत्य आत्मीयस्याचार्यस्य समीपं गत्वा लोचयन्ति । तेऽस्माकं सांभोगिकाः शय्यातरपिण्डं भुञ्जते अस्माभिः कथमप्युपरोधशादप्रीत्या प्रथमालिका भुक्ता एवं श्रुत्वा आचार्योऽपि[अ]विचिन्त्य यदि विसंभोगं तं करोति ।

[भा.२८७७] नवघरकवोयपविसण दोण्हं नेमित्ति जुगवपुच्छा य ।
अनोनस्स घराइं पविसह नेमित्तितो भणइ ।।

[भा.२८७८] आदेसागमपढमा भोत्तुं लज्जाए गंतु गुरुकहणं ।
सो जइ करेज्जवीसुं संभोगं एत्थ सुत्तं तु ।।

वृ- नवयोर्गृहयोः कपोतानां प्रविशनं । ततो द्वयोरपि गृहस्वामिनो युगपन्नैमित्तिको भणति-अन्योन्यस्य गृहं प्रविशतस्तौ च प्रविष्टावन्यदा आदेशानां प्राघूर्णकानामागमस्ततो वास्तव्यैर्जम्बूगृहिकस्य वटगृहिकगृहं प्रविष्टस्य गृहात्प्रथमालिका आनीता तां लज्जया भुक्त्वा ततो निर्गत्य गुरुसमीपं गत्वा गुरोः कथनं स यद्यविचार्य विष्वक्संभोगं तं करोति । तदा अत्र सूत्रमापतितं द्रष्टव्यम् । अत्र विचारदि तावित्वरं गृहपरिवर्त्त कृतवन्तौ तदा स जम्बूगृहिकोऽशय्यातर एव अथ यावत्कथिकस्तदा जम्बूगृहिक एव शय्यातरः ।। धम्मियत्ति अस्य व्याख्यानम्-

[भा.२८७९] धम्मितो देउलं तस्स पालेइ जइ भद्दओ ।
सो विसंवड्ढियं तत्थ लद्धुं देज्ज जईणउ ।।

वृ- तस्य शय्यातरस्य किञ्चित् देवकुलं तत् धार्मिकः पालयति । स च यतीनां भद्रकस्ततः संवर्धितमग्रकूरं तस्मिन् शय्यातरगृहे लब्ध्वा साधूनामानीय ददाति । अत्रापि तथैव प्राघूर्णकागमनं धार्मिकात्प्रथमालिकानयनमित्यादि सर्वं तथैव वाच्यं गुलवणिक इत्यस्य व्याख्यानम्-

[भा.२८८०] वाणियतोयगुलं तत्थ विक्किणंतो उ तं दये ।
तत्थसो वारिए हुज्जा अडंकच्छपुडेण वा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- शय्यातरगृहे स्थितो गुडवणिक् स तत्र गुडं विक्रीणन् साधूनां गुडं ददाति । अथवा शय्यातरस्य अपवरिकायामात्मीयं भांडं निक्षिप्तं ततः कच्छपुटेनाटित्वा तत्रैव समागच्छति । स चाटन् यदा तदा वा साधूनां भिक्षां ददाति । ततः प्राघूर्णका गमनमित्यादिविभाषा तथैवहरितोपलिसे इत्यस्य व्याख्यानम्-

[भा.२८८१] हरितोलित्ता कया सेज्ञा कारणे तेय संठिया ।
पसज्ञा वसहिपालस्स चेइयगणेनिग्गए ।।

वृ- च्छिनानि वा विहरियाणि छगणेन वसतिरघुनोपलिप्ता कृता हरितानि च तत्र परिसाटितानि । तस्यामधुनोपलिप्तायां पातितेषु च हरितेषु साधवः कारणेन स्थिताः । अथवा पूर्वस्थितानां चैत्यवन्दनार्थं गणे निर्गते पश्चात् वसतिपालस्य प्रसह्य बलात्कारेणोपलिप्ता कृता हरितानि च पातितानि । अत्रावसरे प्राघूर्णकाः समागतास्ते बसतिं दृष्ट्वा चिन्तयन्ति । प्रतिदिवसमुपलिप्यते शय्याऽचार्यस्य कथितं तत्र च यद्यविचार्य विसंभोगः क्रियते तदा अत्र सूत्रोपनिपातः । दीपेचेत्यस्य व्याख्यानम् ।।

[भा.२८८२] पविट्ठो दीवएण वा कयकज्ञस्स पम्हट्ठे (.......) सोविजाने दिने दिने ।।

वृ- यस्यां शय्यायां संयताः स्थिताः । तत्र शय्यातरः केनापि कारणेन प्रदोपे दीपकेन सह प्रविष्टस्ततो येन कार्येण समागतस्तत्कार्यं कृत्वा निर्गतो दीपस्तत्रैव विस्मृतस्तत्रच तस्मिन् दिवसे सांभोगिकाः समागमन् स च प्राघूर्णक बृहत्तरः शय्यातरस्य कृतकार्यस्य विस्मृते दीपे जानाति दिने दिने वसतौ दीपः क्रियते । एवंज्ञात्वा गुरोः कथितं । स चाविचिन्त्य विसंभोगं कृतवान् । अत्राप्यधिकृतसूत्रस्योपनिपातः। एतान्यसन्ति कारणानि । अत्र प्रायश्चित्त विधिमाह-

[भा.२८८३] दठुं साहणलहुओ वीसुं करेंताण लहुगआणादी ।
अद्धाण निग्गयादी दोण्हं गणभंडणं चेव ।।

वृ- योऽसन्ति कारणान्यविवेच्य गुरोर्निवेदयति तस्य प्रायश्चित्तं लघुको मासः । कथितेऽपि यद्याचार्यो न विवेचयति अविवेच्य च विसंभोगं कुर्वन्ति तदा तेषां विष्वक् कुर्वतां चत्वारो लघुकाः । न केवलं प्रायश्चित्तं किन्त्विज्ञादयश्च दोषाः तथाऽध्वादि निर्गतानामादिशब्दादशिवादिकारणपरिग्रहः द्वयोरपि गणयोर्मण्डनं च । एतदेव स्पष्टं भावयति-

[भा.२८८४] तं सोउ मन संतावो संतई एइ उड्डई ।
अनेवि ते विवज्रंते वज्रिया अमुएहि तो ।।

वृ- ये तेषां संभोगिकास्तैस्तत् शय्यातरपिण्डाद्यासेवनं श्रुत्वा मनः संतापः क्रियते यथा तेन धर्म श्रद्धिकेनापि भवता शय्यातरपिण्डाद्य कल्पिकमासेवितं । ततः सोऽद्यप्रभृत्यस्माकं सन्तते स्तुद्यति पृथग् विभिन्न इत्यर्थः । ततोऽन्ये तेषां साम्भौ गिकास्तेऽपित्तान् विवर्जयन्ति यतस्तेऽ वसन्ना जातस्तनोऽमुकेन आचारेण विवर्जिता ।

[भा.२८८५] ततो वा अन्नतो वावि ते सुद्धा इह निग्गया ।
वज्रंता जं तु पावेंति निज्ररातो य हाविता ।।

वृ- ततस्ते विवर्जिता अध्वनिर्गता अशिवादिकारणेन वा निर्गता इह यत्र ते पूर्वसंभोगिकास्तिष्ठन्ति तत्र प्राप्तास्ततो यैरविवेच्य शय्यातरपिण्डादिकमासेवितमित्याचार्याणां कथितं तेभ्योऽन्येभ्यो वा श्रुत्वा यूयं पृथक्कृता इत्याकर्ण्य तंगणं वर्जयित्वा यतः प्रथमद्वितीयपरीषहाभ्यामनगाढादि परितापनं प्राप्नुवन्ति । तन्निष्पन्नमविवेच्य विसंभोगकारणं प्रायश्चित्तं । निज्ररातो य हाविया इति तेषाम-ध्वादिनिर्गतानां ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वास्तव्या वैयावृत्यं कृत्वा निर्जरां प्राप्नुयुस्ते ततो हापिताः, प्रभूतं च कर्म अविवेच्य नतत्पकैर्बध्यते यन्महता संसरेण निस्तीरतुं शक्यते ।।

[भा.२८८६] तं कज्जतो अकज्जे वा सेवियं जइ वि तं अकज्जेण ।
नहु कोइ पारोक्खं सहसा इति भंडणं हुज्जा ।।

वृ- यस्मादेते दोषास्तस्मात्कायतः कारमेन अकार्ये बा कारणाभावे वा यद्यपि सेवितं तत् शय्यातरपिण्डादिकं तथाप्यकार्येण एवमेव परोक्षं सहसा इत्येवं विसंभोगः न कयित । मा परस्परं द्वयोर्गणयोर्भणंडणं भूयादिति हेतोः कथं विवेकः कर्तव्य इत्यत आह-

[भा.२८८७] निस्संकियं व काउं आसंक निवेयणा तहिं गमनं ।
सुद्धे हि कारणमनाभोगजाणया दप्पतो दोण्हं ।।

वृ- तैः प्राधूर्णकैस्ते प्रष्टव्याः को युष्माकं शय्यातरः । कथं वा एव शय्यातरो न भवति । एवं निःशङ्कितं कृत्वा । अथ लज्जया न पृष्टास्ततो न निश्चय इति एवमाशङ्का निवेदनायां कृतायां यस्याचार्यस्य कथितं तेन प्रेषितस्य संघाटस्य तत्र गमनं तेन च संघाटकेन गत्वा यत्तैः कथितं तत्तेन प्रष्टव्यास्ततस्ते गृहपरिवर्त्यादि यथा तथ्यं कथयन्ति ततः सङ्घाटो गत्वा निजसूरिसमीपं कथयति । एवमक्रियमाणे द्वयोर्गणयोर्भण्डनं तदेव पश्चार्द्धेन भावयति । शुद्धे हि शुद्धैरप्यस्माभिः समं यूयं विसंभोगं करुथ अथवा कारणं गृहपरिवर्तादिकमाधिकृत्य न गृहीतव्यं, यदि वा अनाभोगेन गृहीतमथवा द्वयोः प्रथमद्वितीय-परीषहयोरुदीर्णयोर्जानता दर्पतो गृहीतं । पुनः पश्चात्कृता शोधिरपि च यदि निष्कारणेऽपि गृहीतं तथापि न युक्तं परोक्षं विसंभोगकारणं यदि वयं नाद्दता भवामस्ततो युक्तं विसंभोगकरणमथ कारणे गृहीतं तदा वयं शुद्धा एव कथं विसंभोगकारणमेवं भण्डनं स्यात् । साम्प्रतं कारणमनाभोगेति पदद्वयं व्याख्यानयति-

[भा.२८८८] कज्जेण वा विगहियं सागरपरियट्टतोय सो अम्हं ।
कारणमजाणतो वा गहियं किं ची सुकरणं तु ।।

वृ- कार्येण कारणेन गृहीतमस्माभिर्वापि शब्दो विकल्पने । तच्च कार्यमस्माकं स्वागारपरिवर्तः । अथवा कारणमजानता यदि गृहीतं तथापि किं कस्मात्परोक्षे विष्वक्करणं विसंभोकरणं ।

[भा.२८८९] जाणंते हिव दप्पा घेत्तुं आउट्टिउ कया सोही ।
तुब्भेत्थ निरइयारा पसीयह भंते कुसीलाण ।।

वृ- जानद्भिरपि वा प्रथमद्वितीयपरीषहत्याजितैर्दर्पात् गृहीत्वा आवृत्य कृतास्माभिः शोधिः तस्मात् यूयमेवात्र गतिर्निरतिचारा भदन्तः कुशीलानामस्माकं प्रसीदतेत्युपहासवचनमेतत् ।।

[भा.२८९०] पढमबिइओदएणं जं सव्वं आउरेहिं तं गहियं ।
दिट्ठादानि भवंतो जं बिइय पएसु नित्तण्हा ।।

वृ- प्रथमद्वितीयोदयेन प्रथमद्वित्तीयपरीषहोदयेन यत्तत्सर्वमातुरैर्गृहीतं युष्माभिस्तत् विस्मृतं दृष्टा भवन्त इदानीं यत् द्वितीयपदेषु निस्तृष्णा इति । एतदप्युपासवचनं । एवं भण्डनं प्रवर्तते । यत एवं परोक्षे विसंभोगकरणे भण्डनदोषस्तस्मात्कल्पते निर्ग्रन्थानां प्रत्यक्षं सांभोगिकं विसंभोगं कर्तुम-स्यैव सूत्रस्य व्याख्यानमाह-

[भा.२८९१] सत्तमए ववहारे अवराहविभावियरस्स साहुस्स ।
आउट्टगणाउट्टे पच्चक्खेणं विसंभोगे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अस्मिन् सप्तमे व्यवहारे व्यवहारस्योद्देशके अपराधेन विभावितः परिभावितो यः साधुः स यदि प्रत्यावर्तते, तदा तस्यापराध विभावितस्य साधोरावृत्तस्य विसंभोगो न क्रियते प्रायश्चित्तं पुनर्दीयते । अथ नावर्तते ततो वारत्रयं भण्यते-आवर्तस्य महानुभाव एवमुक्तोऽपि यदि नावर्तते तदा तस्मिन्ननावृत्ते प्रत्यक्षेण प्रत्यक्षतया विसंभोगः क्रियते ।।

[भा.२८९२] संभोगेभिसंबंधेन आगति केरिसेन सह नेओ ।
केरिसएण विभागो भणइ सुणसु समासेणं ।।

वृ- एवमभिसम्बन्धेन संभोगआगते शिष्यः पृच्छति-कीदृशेन सह संभोगो ज्ञेयः । कीदृशेन सह विसंभोगः ? । सूरिराहभण्यते एतत्समासेन तत्वं भण्यमानं श्रुणु । प्रतिज्ञातमेव निर्वाहयति-

[भा.२८९३] पडिसेहे पडिसेहो असंविग्गे दानमादितिक्खुत्तो ।
अविसुद्धे चउ गुरुया दूरे साहारणं काउं ।।

वृ- प्रतिषिध्यते पार्श्वस्थादिकं न कल्पते इति निवार्यते इति प्रतिषेधोऽसंविग्नः पार्श्वस्थादि भण्यते । तस्मिन् प्रतिषेधेऽसंविग्ने दानादेर्दानग्रहणसंसर्गादिः प्रतिषेधः त्रिः कृत्व इति यदि कथमपि दानादि करोति तदा एक द्वौ त्रीन् वारान् वार्यते । एकैकस्मिंश्च वारे प्रायश्चित्तं मासलघु वारत्रयवारणेऽपि यदि भूयस्तैः सह दानादि करोति । तदा सोऽविशुद्ध इति विसंभोगः क्रियते । विसांभोगिकमपि सांभोगिकं करोति । तस्य प्रायश्चित्तं चत्वारो गुरुकाः । दूरे गतानां यदि केऽपि पृच्छन्ति यथा सन्त्यस्माकं केचित्संभोगिकास्तत्र देशे इति तदा साधारणं कृत्वा वक्तव्यम् । यथा तदा सांभोगिकाः अभवन् । इदानीं पुनर्न जानीमः किमनुपालयन्ति सांभोगिकत्वं वा नेति एष निर्युक्ति गाथा समासार्थः ।

[भा.२८९४] पासत्थादि कुसीले पडिसिद्धे जाउ तेसिं संसग्गी ।
पडिसिज्झइ एसो खलु पडिसेहे होइ पडिसेहो ।।

वृ- पार्श्वस्थादिके कुसीले स्थाने प्रतिषेधे यातेषां पार्श्वस्थादि स्थानवर्तिनां संसर्गिः प्रतिषिध्यते । सा च संसर्गिर्दानग्रहणाभ्यामवसातव्या एष भवति प्रतिषेधे प्रतिषेधः न चैष प्रतिषेधे प्रतिषेधोनानर्थो-

[भा.२८९५] सूयगडंगे एवं धम्मज्झयणे निकाचितं ।
अकुसीले सया भिक्खू नो य संसग्गियं वदे (ये) ।।

वृ- सूत्रकृते द्वितीय अङ्गे धम्मज्झयणे एवं निकाचितं निश्चयपूर्वकं भणितं । यथा सदा भिक्षुरकुशीलो भवेत् । न च कुशीलैः सह संसर्गिकां व्रजेत् ।।

[भा.२८९६] दानादि संसग्गी सयं करे पडिसिद्धे लहुतो ।
आउट्टे असुद्धे गुरुलो उ तेन परं ।।

वृ- दानादिभिः संसर्गिदानादि संसर्गिस्तस्यां सकृत् कृतायां संप्रतिनिषिध्यते । आर्य कस्मात्पार्श्व-स्थादिभिः समं संसर्गिकरोषि । एवं प्रतिषिद्धे यदि स आवर्तते तदा स सांभोगिक एव । केवलं तस्मिन्नावृत्ते प्रायश्चित्तं लघुको मासः द्वितीयमपि वारं यदि करोति ततोपि मासलघु अथ तृतीयमपि वारं करोति आवर्त्तते चऽतदापि मासलघु सद्भावतस्त्रिकृत्वा आवृत्ते लघुको मासस्तेनपरभिति ततस्तृतीयात् वारात् चतुर्थं वारं संसर्ग करोति तदासोऽशुद्ध इति तस्य प्रायश्चित्तं गुरुको मासः एतदेव स्पष्टतरमाह-

[भा.२८९७] तिक्खुत्तो मासलहु आउट्टे गुरुगो मासो तेन परं ।
अविसुद्धे तं वीसुं करेंति जो भुंजति गुरुगा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- त्रिःकृत्य आवृत्ते प्रायश्चित्तं लघुको मास स्ततः परं भूयः संसर्गि करणे सोऽविशुद्ध इति गुरुको मासस्तं च विष्वक् विसंभोगं करोति । योऽपि तं संभुक्ते तस्यापि प्रायश्चित्तं चत्वारो गुरुकाः । अथ कस्मात् वारत्रयात् परं भूयः संसर्गिकृतो विसंभोगः क्रियते इत्यत आह-

[भा.२८९८] सति दोन्नि तिन्निवावी होज्ज अमाईसु मा तेन परं ।
सुद्धस्स होति चरणं माया सहिते चरण भेदो ।।

वृ- सकृदेकवारं द्वौ त्रीन् वारान् भवेदमायी ततस्तृतीयान् वारान् परं संसर्गिकरणे मायी अथ च शुद्धस्य भवति चरणं मायासहिते तु चरणभेदः चरणाभावस्ततो विसंभोगः क्रियते ।

[भा.२८९९] एवं तु पासत्थादिएसु संसग्गिवारिआ एसा ।
समणुन्नेवि अपरिच्छित्ते विदेसमादी गते एवं ।।

वृ- एवमुक्तेन प्रकारेण एषा दानग्रहणाभ्यां संसर्गि वारिता । एवं समनोज्ञेऽपि विदेशादौ गते अपरीक्षिते संसर्गिर्वारिता द्रष्टव्या सह संसर्गिः परीक्ष्य कर्तव्याः नान्यथेति भावः ।। सम्प्रति दूरे साहारणं काउमित्यस्य विभावनार्थमाह-

[भा.२९००] समणुन्नेसु विदेसं गतेषु पच्छगेहोज्ज अवसन्ना ।
तेवि तहिं गंतु मना आहत्थि तहिं मणुन्नाणे ।।

वृ- कस्याप्याचार्यस्य समनोज्ञेषु सांभोगिकेषु विदेशं गतेषु पश्चादागत्य सांभोगिकाः केचिद् भिक्षाद्यलाभेनावसन्ना भवेयुस्ततस्तेऽपि तत्र विदेशं गन्तुं मनस आचार्यं पृच्छंति सन्ति तत्रकेचिदस्माकं मनोज्ञाः सांभोगिकाः ।।

[भा.२९०१] अत्थित्ति होइ लहुतो कयादिउसन्न भुंजणे दोसा ।
नत्थि वि लहुतो भंडण नक्खित्तकहनेव पाहुण्णं ।

वृ- एवमुक्ते यद्याचार्यो वदति सन्ति तत्र नक्ष संभोगिकास्तदाप्रायश्चित्तंभवति तस्य लघुको मासः किं कारणमिति चेदत आहकदाचित्तेऽवसन्नी भूता भवेयुस्ते च प्राघूर्णिकास्तत्रगतास्तैः सह भुंजते, भुंजानानां च चतुर्गुरुकंप्रायश्चित्तं यत एवं दोषास्तस्मात्सन्तीति न वक्तव्यमत्राचार्यो ब्रूयात्-न सन्तीति तदपि मासो लघुकः कस्मादिति चेत् भण्डनदोषात्तनाहि ते तत्र प्राप्तास्तेषां नास्ति केनापि गृहीते तैर्वस्तव्यैरुक्तमस्माकं ते सांभोगिकास्ततस्तैः प्राघूर्णका उक्ताः । कस्माद्वसतौ नोत्तीर्णाः । प्राघूर्णकै रुक्तमस्मभिः क्षमाश्रमणाः पृष्टाः सन्त्यस्माकं तत्र सांभोगिकास्तैरुक्तं-न सन्ति । एवं वास्तव्यानाम-प्रीतिर्जाता किमस्माभिः कृतं यद्वयं विसंभोगाः कृतास्तदनन्तरं परुषमपि भाषन्ते ततो भण्डनं तथैव चाप्रीत्या मासपयोग्यंवर्षाप्रायोग्यं वा न कथयन्ति । न च प्राघूर्णकत्वं कुर्युर्यस्मादेते दोषास्तस्मादाचार्येणैवं वक्तव्यम् ।।

[भा.२९०२] आसि तया समणुन्ना भुंजह दव्वाइएहिं पेहित्ता ।
एवं भंडणदोसा न होंति अमणुन्न दोस य ।।

वृ- यदास्मात् देशात् निर्गतास्तदा समनोज्ञाः सांभोगिका आसीत् आसीरन् । इदानीं न जानीमः किमनुपालयन्ति सांभोगिकत्वं वा नेति । केवलंद्रव्यादिभिद्रव्यतः क्षेत्रतः कालतो भावतश्च प्रेक्ष्य परीक्ष्य स भुंग्धमित्येवमाचार्येणोक्ते न भण्डनदोषा नाप्यमनोज्ञदोषा भवन्तीति ।।

[भा.२९०३] नायमनाए आलोयणाउ अनालोइए भवे गुरुगा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गीयत्थे आलोयण सुद्धमसुद्धं विविचंति ।।

वृ- ज्ञाते अज्ञाते वा सांभोगे आलोचना दातव्या तदनंतरं तैः सह संभुज्यते, यदि पुनरनालोचिते परस्परं भुंजते तदा भवंति चत्वारो गुरुकाः प्रायश्चित्तं सालोचना गीतार्थैर्दातव्या । सुद्धमसुद्धंविविचंति इति शुद्धो अशुद्धो वा य उपधिस्तं विविचंति पृथक्कुर्वान्ति प्रतिपद्यन्ते । एष निर्युक्ति गाथा समासार्थः ।

[भा.२९०४] अविनठे संभोगे नायमनाए य नासि पारिच्छा ।
एत्थोवसंपयं खलु सेहंवासेज्ज आरे वी ।।

वृ- आर्यमहागिरेः परतः संभोगो अविनष्ट आसीत् । तदा ज्ञातेऽज्ञाते वा नास्ति द्रव्यादिभिः परीक्षा आर्यसुहस्तिशिष्य द्रमकप्रव्रज्या प्रतिपत्तिप्रभृतित आरात् विनष्टः संभोग इति ज्ञाते अज्ञाते वा द्रव्यादिभिः परीक्ष्यालोचयितव्यमालोचिते च सह भुञ्जते । अथ सांभोगिकाः सन्तः कथं न ज्ञायन्ते येनाज्ञातेने-त्युच्यमानं संभवेत् तत आह-एत्थोवसंपयं खलु इत्यादि पूर्वं ये उपसम्पन्नास्ते असमानीभूता अन्ये पश्चात्केऽप्युपसम्पन्ना । अथवा पश्चादागत्य केचित् प्रव्रजितास्ततोऽदृष्टपूर्वतया ते न ज्ञायन्ते इत्यज्ञाता भवन्ति । गाथायामेकवचनं जातौ ततोऽयमर्थः । आरादपि पूर्वदर्शनादर्वागपि पश्चादुपसम्पत् शैक्षान् वा आसाद्य सांभोगिकानामप्यज्ञातता भवति । तदेवं नायमनाएति गतमिदानीमालोयणाउ-

[भा.२९०५] महल्लायए गच्छस्स कारणेहऽसिवदिहि ।
देसांतरागयाणो णे तत्थिमा जयणा भवे ।।

वृ- अति महल्लया गच्छस्य नास्ति एकत्र संस्तरणं । यद्यस्ति वा अशिवादिभिः कारणैर्देशान्तरगताएतैः कारणैः बहवः पृथक् पृथक् स्थिता स्तत्र पूर्वस्थितेषु पश्चादागतानां परस्परं यत्र मेलापको भवति तत्रेयं यतना ।।

[भा.२९०६] दोन्नि वि जइ गीयत्था राइनिए तत्थ विगडणा पुव्वं ।
पच्छा इयरो वि दए समानतो च्छत्तच्छायातो ।।

वृ- अगीतार्थेन गीतार्थस्य पुरत आलोचयितव्यं । यदि पुनर्द्वावपि गीतार्थौ ततोऽवमरत्नाधिकेन गुरुरत्नाधिकस्य पुरत आलोचयितव्यमवमरत्नाधिकेनालोचिते पश्चादितरोऽपि अवमरत्नाधिकस्य पुरतो आलोचनां ददाति । यः पुनः समानच्छत्रछायाकः समरत्नाऽधिकस्तत्र यः पश्चादाचार्यसमीपा-न्निर्गतस्तस्य पुरतः प्रथममालोचयितव्यः । पश्चादितरस्य समीपे तेन यदि पुनरनालोचिते परस्परं भुञ्जते तदा प्रायश्चित्तं प्रत्येकं चत्वारो गुरुकाः । एतेन अनालोइए भवे गुरुगा गीयत्थे आलोयणा इति व्याख्यातम् । । सम्प्रति शुद्धमशुद्धं विविचंतीत्यस्य व्याख्यानमाह-

[भा.२९०७] निक्कारणे असुद्धो उ कारणे वानुवायतो ।
उज्झंति उवहिं दोवि तस्स सोहिं करेंति य ।।

वृ- य उपधिर्निष्कारणे पुष्टालम्बनमन्तरेणोद्गमादिभिर्परिशुद्धो गृहीतो यश्च कारणेऽनुपायतो यतनया गृहीतस्तमुपधिं द्वावपि परित्यजतस्तस्य परस्परमालोचनायां येन दोषेण शुद्धौपधिरात्त-स्तत्प्रत्ययमयतना प्रत्ययं च प्रायश्चित्तं प्रतिद्यते ।।

[भा.२९०८] एवं तु विदेसत्थे अयमन्नो खलु भवे सदेसत्थे ।
अभिनीवारीगादी विनिग्गए गुरुसगासतो ।।

वृ- एवमुक्तेन प्रकारेण खलु विदेशस्थे यतना भणिता । अयमन्यः खलु यतनाप्रकारः स्वदेशस्थे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमेवाह-अभिनिवारिका प्रागुक्त स्वरुपा तया, आदिशब्दादुपधिकार्येण स्पर्धकपतीनां वा सारा-करणेन गुरुपदेशतो गुरुसकाशाद्विनिर्गते विनिर्गमेनैव प्रत्यागतैराचार्यपादमूलं कस्यां वेलाया-मागन्तव्यमेनामेव निर्युक्तिगाथां भाष्यकारो विवृणोति-

[भा.२९०९] अभिनिवारे निग्गते अहवा अन्नेण वावि कज्जेण।
विसणं समणुन्नेसुं काले कोवावि कालो उ ॥

वृ- अभिनिवारिकया प्रागुक्तस्वरुपया निर्गते अन्येन वा उपध्युत्पातनादिना कार्येण निर्गते भूयः स मनोज्ञेषु सांभोगिकेषु स्वाचार्यपादमूले इत्यर्थः । विशनं प्रवेशः काले कर्तव्यः । शिष्यः प्राह-कः कालः ? । सूरिराह-

[भा.२९१०] भत्तठिय आवासग सोहे उ मतित्ति पच्छअवरण्हे।
अब्भुट्ठाण दंडाइयाण गहणेगवयणेणं ॥

वृ- भक्तार्थिनां कृत्वा बाह्यग्रामेषु भिक्षामटित्वा भोजनं च विधाय तदानन्तरमावश्यकमुच्चारादि शोधयित्वा पश्चादपराह्ले कालवेलायामायान्ति वास्तव्यैरपि नैषेधिकीं शब्दं श्रुत्वा अभ्युत्थानं कर्तव्यम् । दण्डादीनामादिशब्दात् पात्रादिपरिग्रहो ग्रहणं कर्तव्यं । कथमित्याह-एकवचनेन दण्डादिकं गृह्णामीत्येवं रुपेणैकेन वचनेन यदि समर्पयन्ति तदा गृहीतव्यः । किं कारणमितिचेदुच्यते-वास्तव्येनातिशयेन गृहीते गृहीतमिति मन्यमानेन प्राधूर्णकेन वास्तव्या गृहीते मुक्ते भाजनभेदो भवति । तेन च पतता प्राणजातिविराधनास्ततस्तन्निष्पन्नं प्रायश्चित्तं तस्मादेकवचनेन दण्डादिग्रहणं, वक्ष्यमाणकारणैः । पुनरपवादपदतः कालवेलायां न प्रविशेत् । तान्येव कारणान्याह-

[भा.२९११] खुड्डगविगिट्ठगामे उण्हं अवरण्हे तेन तुपगेवि।
पक्खित्तं मुत्तूणं निक्खिव उक्खित्तमोहेणं ॥

वृ- क्षुल्लको ग्रामे यत्र प्राप्तो वर्ततितत्र पर्याप्तं न भविष्यतीति हेतोर्यदि वाविकृष्टमन्तरं ततः कृतभिक्षाका न प्राप्स्यामोऽथवाऽपराह्ले व्रजतां तापस्तत एतैः कारणैः प्रागपि प्रातरपि प्रविशेत् । तत्र च नैषेधिकशिब्दं श्रुत्वा यत् मुखे प्रतिप्तं तत् मुक्त्वा तत् गिलनीयमित्यर्थः यत् उत्क्षिप्तं लम्बनं वर्तते तत्पात्रे निक्षिप्य वास्तव्यैरभ्युत्थातव्यमत्र यदि प्राधूर्णकाः कृतपर्यायाः ततस्तैर्वक्तव्यं मा अभ्युत्तिष्ठत वयं कृतपर्याप्ताः समागता यदि वा यस्य कस्याप्यर्थः तैः समं भुङ्क्ते । अथ कदाचित् प्राधूर्णका न कृतपर्याप्ता भवेयुस्तदा सर्वा तेषां दत्वा वास्तव्या अन्यत् गृह्णन्ति । अथ वास्तव्यैरतिशयेन पर्याप्ते लब्धे ते प्राधुर्णकास्स-मागतास्ततो यदि तपोऽर्हं प्रायश्चित्तमापन्नास्तदा ओघालोचनया आलोच्य तैः समं भुञ्जते । एष निर्युक्तिगाथासमासार्थः साम्प्रतमेनामेव विषयपदव्याख्यानतो व्याख्यानयति -

[भा.२९१२] जइ उ तवं आवन्नो जा भिन्नो अहव होज्ज नावन्नो।
तहियं ओहालोयण तेन परेण विभागो उ ॥

वृ- वास्तव्यैर्भिक्षावेलायामतिशयेन पर्याप्ते लब्धे यदि प्राघूर्णकाः समागच्छन्ति तदा यदि प्राघूर्णकस्तपोर्हं प्रायश्चित्तमापन्नोऽपि यावदद्यापि भिन्नो न भवति च्छेदादिकं प्राप्त इत्यर्थः । अथवा तपोऽर्हमपि प्रायश्चित्तं नापन्नः तदा ओघालोचनया आलोच्य तैः सम मण्डल्यां समुद्दिशन्ति । ततः समुद्देशानन्तरं परतो विभागालोचनयालोच्य प्रायश्चित्तं प्रतिपद्यन्ते । अथ च्छेदादिकमापन्नस्ततो मण्डल्या उत्कृष्य दीयते । अथ वेलायां न प्राप्ताः किन्त्वनागाढायां पौरुष्यां प्राप्तास्तत्र विधिमाह-

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

[भा.२९१३] अहवा भुत्तुद्धरियं संखडि अन्नेहिं वा वि कज्रेहिं ।
तं भुक्के पत्तेयं इमे य पत्ता तहिं हुज्रा ।।

वृ- अथवेति प्रकारान्तरे वास्तव्यानां भुक्तोद्धरितं वर्तते । अथवा संखड्यां निमन्त्रिताः श्राद्धादिभिर्वास्तव्यास्तत्र मुत्कंपर्यासं गृहीतमस्ति यदि वा आचार्याः कुलादिकार्यै विनिर्गतास्तान् कियन्तं कालं प्रतीक्ष्य तत् योग्यं मण्डल्यां भुंक्ते प्रत्येकमुद्धरितमस्ति । इमे च प्राधूर्णकास्तत्रावसरे प्राप्ता भवेयुस्ततो वास्तव्या नेषेधिकी शब्दं श्रुत्वा समुत्थाय भणन्ति-

[भा.२९१४] भुंजह भुत्ता अम्हे जे वा इच्छंति य भुत्ते सह भोज्रं ।
सव्वं व तेसि दाउं अन्नं गेण्हंति वत्थव्वा ।।

वृ- भुगूध्वं यूयं वयं भुक्ता यो वा इच्छति अभुक्तैर्वास्तव्यैः सह भोज्यं स तैः सह भुङ्क्ते । अथवा प्राघूर्णकानां न पश्चाद्भागे परिपूर्णं जातं तत् सर्वं तेषां प्राधूर्णकानां दत्वा वास्तव्या अन्यत् गृह्णन्ति ।।

[भा.२९१५] तिनि दिने पाहुणं सव्वेसिं असति बालवुड्ढाणं ।
जे तरुणा सग्गामे सव्वत्था बाहि हिंडंति ।।

वृ- सर्वेषामागतानां त्रीणि दिनानी यावत् प्राघूर्णकत्वं करणीयं । अथ सर्वेषा कर्तुं न शक्नुवन्ति ततः सर्वेषामभावे बालवृद्धानां त्रीणि दिनानि प्राधूर्णकत्वं करणीयं ये तथा प्राघूर्णकानां तरुणास्ते स्वग्रामे हिण्डन्ते ये तु वास्तव्यास्तरुणास्ते उद्भामकभिक्षाचर्यया बहिर्ग्रामे हिण्डन्ते ।।

[भा.२९१६] संघाडेगसंजोगो आगंतुगभद्दएतरेबाहिं ।
आगंतुकावबाहिं वत्थव्वयभद्दए हिंडे ।।

वृ- यदि ग्रामवास्तव्या जना आगन्तुकभद्रकास्तदा प्राघूर्णकानामेकैको वास्तव्येन समं सङ्घाटकेन हिण्डते । इतरे वास्तव्यानां संङ्घाटसंयोगा उद्भरितास्तेबहिर्ग्रामे उद्भामकभिक्षाचर्यायां व्रजन्ति । अथ ग्रामवास्तव्या जना वास्तवभद्रकास्ततो वास्तव्यनामेकैकः प्राधूणकेन समं हिण्डते । ये तु प्राघूर्णकानां सङ्घाटकसंयोगा अधिकास्ते बहिरुद्भामक भिक्षाचर्यया व्रजन्ति । उपधिचिन्तायामपि परस्परमा-लोचनायां दत्तायां यो गीतार्थेन उपधिरुत्पादितः स परिभुज्यते । यस्त्वगीतार्थेनोत्पादि तस्तस्य परित्यागः करणीयः ।

मू. (१६४) *जाओ निग्गंथिओवा निग्गंथा वा संभोइया सिया, नोण्हं कप्पइ पच्चक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए; कप्पइण्हं पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए । जत्थेव ताओ अप्पणो आयरियउवज्झाए पासेज्रा, तत्थेव एवं वएज्रा-'अहणं, भंते, अमुगीए अज्राए सद्धिं इमम्मि कारणम्मि पारोक्खं पाडिएक्कं संभोणं विसंभोगं करेमि'। साय से पडितप्पेज्रा, एवं से नो कप्पइ पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए; सा ये से नो पडितप्पेज्रा, एवं से कप्पइ पारोक्खं पाडिएक्कं संभोइयं विसंभोगं करेत्तए ।*

[भा.२९१७] मंडुगगति सरिसो खलु अहिगारो होइ बिइयसुत्तस्स ।
संपुडतो वा दोण्हवि होइ विसेसोवलंभो वा ।।

वृ- मण्डूकः शालूरः स यथा उत्प्लुत्य गच्छति एवं निर्ग्रन्थसूत्रान्निर्ग्रन्थीसूत्रं विसदृशमिति मण्डूकी गतिसदृशं तत उक्तं द्वितीयसूत्रस्याधिकारप्रस्तावो मण्डूकगतिसदृशः । तथा संपूट्तो वा इत्यादि यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वे फलके एकत्र कृते फलक सम्पुट इत्युच्यते । एवं निर्ग्रन्थसूत्रात् द्वितीयं निर्ग्रन्थी सूत्रं सम्पुटसद्दशं भवति तत उक्तं द्वयोरपि सूत्रयोः सम्पुटक इति निर्ग्रन्थसूत्रादनन्तरं निर्ग्रन्थीसूत्रमुक्तं भवति । विशेषोपलंभो वा इति ये निर्ग्रन्थी सूत्रं पठ्यते । ततः शिष्याणां विशेषोपलम्भो भवति । दूरव्यवधाने तु न स्यात् ततो भवति विशेषोपलंभ इति कृत्वा निर्ग्रन्थसूत्रादनन्तरं निर्ग्रन्थीसूत्रमुक्तमेयमनेन सम्बन्धेनायातस्यास्य व्याख्या-या निर्ग्रन्थ्यो वा सांभोगिकाः स्युस्तेषां न कल्पते प्रत्यक्षं प्रत्येकं सांभोगिकी सांभोगां कर्तुं कल्पते परोक्षं प्रत्येकं सांभोगिकं विसांभोगीकर्यु यत्रैववा तानि निर्ग्रन्थ्यं आत्मीयान् आचार्योपाध्यायान्पश्यन्ति तत्रैव एवं वदन्ति । अथ नमिति वाक्यालङ्कारे । भदन्त अमुकया सहास्मिन् कारणे समापतिते परोक्षं प्रत्यक्षं प्रत्येकं संभोगं विसंभोगं करोमि । सा च से तस्याः प्रवर्तिन्याः प्रति तपति मिथ्यादुष्कृतप्रदानेनानुतपति असद्धातदाख्यानमिति प्रत्यायपयति । एवं सति न कल्पते परोक्षं प्रत्येकं सांभोगं विसंभोगं कर्तुमत सा तस्याः प्रागुक्तप्रकारेण नानुतपिता स्वत एवं सति से तस्याः कल्पते परोक्षं प्रत्येकं संभोगं कर्तुमिति सूत्राक्षरार्थः । । सम्प्रति भाष्यकारः प्राह-

[भा.२९१८] एसोवगमो नियमा निग्गंथीणं पि होइ नायव्वो ।
जं एत्थं नाणत्तं तमहं वुच्छं समासेणं ।।

वृ- यो निग्रन्थसूत्रस्य व्याख्यागम उक्त एष एव गमो निर्गन्थीनामपि सूत्रे भवति ज्ञातव्यः केवलं यदत्र नानात्वं तदहं समासेन वक्ष्ये । तदेव विवक्षुः प्रथमतः प्रश्नमुत्थापयति-

[भा.२९१९] किं कारणं परोक्खं संभोगा तासु कीरइ वीसुं ।
पाएण ताहि तुच्छा पच्चक्खं भंडणं कुज्जा ।।

वृ- किं कारणं केन कारणेन तासु संयतीसु परोक्षं संभोगो विष्वक् क्रियते । आचार्य आह-हि यस्मात्प्रायेण ताः संयत्यस्तुच्छाः । ततः प्रत्यक्षं विसंभोगकरणे भण्डनं कुर्युः ।।

[भा.२९२०] दोन्नि वि ससंजतीया गणीणो एक्कस्स वा दुवे वग्गा ।
वीसुकरणंमि तेच्चिय कवोयमादी उदाहरणा ।।

वृ- द्वौ गणिनावाचार्यौ ससंयतीकौ परस्परं सांभगिकावथवा एकस्य द्वौ वर्गौ संयतवर्गः संयतीवर्गश्च । अपरस्य त्वेक एव संयतवर्गः । तौ यां विसंभोगां कुरुतस्तां तैरेव चटकगृहिककपोतप्रविशनादिरु-पादुदाहरणात् प्रागुक्तप्रकारेण विसंभोगं कुरुत इत्यर्थः । कथमित्याह-

[भा.२९२१] पडिसेवितं तु नाउं सांहती अप्पणा गुरुणं तु ।
तेवि य वा हरिऊणं पुच्छंती दोवि सब्भावं ।।

वृ- काश्चित्संयत्यः कासांचित् संयतीनां प्राधूर्णिका गतास्ताभिश्च पूर्वप्रकारेण प्रथमालिका कृता जाता शय्यातरपिण्डा शङ्का । अथवा हरितोपलिप्तायां वसतौ स्थिता यदि वा सदीपायां ततस्ताभिरागत्य निजप्रवर्तिन्या कथितं यथा-एताः शय्यातरपिण्डमासेवन्ते । प्रतिदिवसं हरितोपलिप्तायां वसतौ वसन्ति सदीपायां वेति सापि प्रवर्तिनी तन्मुखात्प्रतिसेवितमिति ज्ञात्वा ताभिः सह गत्वात्मनो गुरुणां कथयति । तेऽपि च गुरवो व्याहृत्य आकार्यद्वावपि संयती वर्गौ सद्भावं पृच्छन्ति । केवलं यदि ता एकगुरुप्रतिबद्धा अन्यथा दोषस्तथा चाह-

[भा.२९२२] जइ ताउ एगमेगं अहवावी परगुरुं वइज्जाहि ।
अहवावी परगुरुतो परवत्तिणी तीसुवीगुरुगा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यदि यकाभिः प्रतिसेवितं शय्यातरपिण्डादि यकाभिश्च प्रतिसेवितं ज्ञात्वा गुरुभ्यः कथितं ता यदि एकमाचार्यमाश्रिताः । अथवा आत्मीया अपि सत्यः शय्यातरपिण्डाद्या सेविन्यः परं गुरुं कुतश्चित्कारणात् व्रजेयुः प्रतिपन्ना यदि वा सा प्रवर्तिनी यत्संयतीभिः शय्यातरपिण्डाद्यासेवितं परगुरुत उपसम्पदं प्रतिपन्नासु एतासुतिसृष्वति यद्याचार्यः स्वयं पृच्छति कोऽत्र भूतार्थ इति तदा प्रायश्चित्तं चत्वारो गुरुकाः किं कारणमिति चेदत आह-

[भा.२९२३] भंडण दोसा हुंती वगडासुत्तं मि जे भणियपुव्विं ।
सयमवि य वीसुकरणे गुरुगा चावल्लया कलहो ।।

वृ- तासां तिसृणामपि स्वयं प्रच्छने भण्डनदोषा भवन्ति ये भणिताः पूर्वं कल्पाध्ययने प्रथमोद्देशके वगडासूत्रे ते चेमे तासां स्वयं प्रच्छने त्रिषु स्थानेषु भण्डनं तानि च त्रीणि स्थानान्यमूनि-आत्मनो द्वौ गच्छौ संयतवर्गः संयतीवर्गश्च तृतीयोऽन्याचार्याः सक्ताः संयताः संयत्यश्च एषैको वर्गो भ(ग) एयते । भण्डनं पुनरेवं जायते ताः संयत्यः परकीयरूपाः पृष्टाः सत्यौ ब्रूयुर्यथा जानीमो यत् दुःखापिता इहलोक-सहायया निजप्रवर्तिन्या एवमुक्ते संयतास्ताभिः सह कलहं कुर्युः । संयतीनामपि परस्परं रण्डाराटिर्भवति । तथान्ये गच्छवर्तिनः साधवः पराचार्येण समं परसंयतैः समं परसंयतीभिश्च समं राटिं विदध्युर्यत् एवं दोषास्तस्मात् द्वावपि तौ संयतीवर्गावात्मनः आत्मनाचार्यस्य कथयतः । यदि पुनस्ताः संयत्यः स्वयमेव विष्वक् संभोगं कुर्वन्ति ता तासां प्रायश्चित्तं चत्वारो गुरुकाः, कस्मादिति चेदत आह-चापल्यतश्चपलतादोषेण कलहः परस्परं भूयादिति हेतोः ।।

[भा.२९२४] पत्तेयं भूयत्थं दोण्हंपि गणहरो तुलेऊणं ।
मिलिउं तग्गुण दोसे परिक्खिउं सुत्तनिद्दोसो ।।

वृ- यत एवं दोषास्तस्मादात्मन आचार्यस्य कथनीयं तौ च गणधरौ द्वावपि संयती वर्गयोः प्रत्येकं भूतार्थं तुलयित्वा सम्यग् विज्ञाय तत एकत्र मिलित्वा तयोर्द्वयोरपि संयतीवर्गयोर्गुणदोषान् परीक्ष्य सूत्रनिर्देशः कर्तव्यः । स चायं यदि नानुतपंति ततस्तत्रैव यत्र मिलिताः सयतीनां परोक्षं संभोगं कुर्वन्ति । प्रत्यक्षं संयतीनां विसंभोगकरणे तुच्छतया कलहभावात् ।।

मू. (१६५) *नोकप्पइ निग्गंथाणं निग्गंथीं अप्पणो अट्ठाए पवावेत्तए वा मुंडावेत्तए वा सेहावेत्तएवा उवठावेत्तए वा संभुंजितए वा तीसेइत्तरियं दिसं वा अनुदिसं वा उद्दिसित्तएवा धारेत्तए वा ।*

मू. (१६६) *कप्पइ निग्गन्थाणं निग्गंथिं अन्नेसिंअट्ठाए पव्वावेत्तए वा धारेत्तए 'वा ।।*

[भा.२९२५] संभोगंमि पवत्ते इमा विसंभुजते उवठविउं ।
सीसायरियत्ते वा पगत्ते न दिक्खंति दिक्खेय ।।

वृ- पूर्वसूत्रेभ्यः संभोगे प्रवृत्ते प्रस्तुतसूत्राभिहिता उपस्थाप्य संभुज्यते अथवा शिष्यत्वमाचार्यत्वं च प्रकृतमस्ति ततः शिष्याचार्यत्वे प्रकृतेऽनेनापि सूत्रद्वयेनेदमुच्यते-अन्यस्यार्थाय निर्ग्रन्थी दीक्षन्ति नात्मनोऽर्थयेति । अनेन सम्बन्धेनायातस्यास्य व्याख्या न कल्पते निर्ग्रन्थानां निर्ग्रन्थीमात्मनोऽर्थाय प्रव्राजयितुं सामायिकारोपणतो मुंडापयितुं लोचकारापणतः शिष्यापयितुमासेवनाशिक्षाग्रहणप्रदानतः उपस्यापयितुमुत्थापनाकरणतः संभोक्तुं षणां सांभोगिकानामन्यतमेन यथा योगेन संभोगेन वस्तुं वा तथा तस्या इत्वरां दिशमाचार्य लक्षणामनुदिशं वा उपाध्यायादिरूपामुद्देष्टुं वा धारयितुं वा कल्पते । निर्ग्रन्थानां निर्गथीमन्येषामपि इत्यादि प्राग्वन्नवरमन्येषामित्याचार्यस्योपाध्यायस्य वा प्रवर्तिन्या

अर्थाय ते एतस्या उपग्रहं करिष्यन्तीत्यादि अभिप्रायेण शेषं सुगमम् । अत्र भाष्यकारः प्राह-

[भा.२९२६] अन्नट्ठमप्पणा वा पव्वावणे चउगुरुं च आणादी ।
मिच्छत्ता तेन संकट्ठ मेहुणे गहणे जं च ।।

वृ- शिष्यस्य मे सर्वकार्येषु सहायिनी भविष्यति इत्येवमन्यार्थमेवमात्मनो वार्थाय यदि प्रव्राजयति निर्ग्रन्थी तदा तस्य प्रायश्चित्तं चतुर्गुरु आज्ञादयश्च दोषास्तथा मिथ्यात्वं तीर्थकरवचनातिक्रमात् । तथा स्तैन्यार्थं शङ्कायां किमयं प्रव्राज्य (ज्य) हरिष्यति उत धर्मश्रद्धया प्रव्राजयतीत्येवं रूपायां यत्प्रयश्चित्तं चतुर्लघु उपलक्षणमेतत् । निःशङ्कितमेषप्रव्राज्य हरिष्यतीति निश्चयेऽप यत्प्रायश्चित्तं चत्वारो गुरुकाः । तथा मैथुने शङ्किते शङ्किते यथा किं मैथुनार्थमेव प्रव्राजयित उत् धर्मश्रद्धयाति यत् प्रायश्चित्तं चतुर्गुरुकम् । नूनमेष मैथुनार्थं प्रव्राजयतीत्येवं निःशङ्किते यन्मूलं प्रायश्चित्तम्, । यच्च ग्रहणे कञ्चुकादि संघाट प्रावरणो-पदेशदाने कक्षान्तरादिदृष्ट्वा परोभयसमुत्थदोषैर्ब्रह्मचर्यविराधनं तन्निमित्तमपि प्रायश्चित्तमापद्यते ।।

[भा.२९२७] तेनट्ठमेहुणे वा हरइ अयं संकसंकिए सोही ।
कक्खादभिक्खदंसण मथथक्कातोभये दोसा ।।

वृ- अयं प्रव्राजनाव्याजेन हरतीत्येवं शङ्कायामशङ्किते वा स्तैन्यस्यार्थे तथा मैथुनशङ्कायमशङ्किते वा मैथुने या शोधिः प्रायश्चित्तं तदापद्यते । तथा कक्षादीनामथक्रमप्रस्तावमभीक्ष्णदर्शने आत्मोभयदोषा उपलक्षणमेतत् । परदोषाश्च य तानपि प्राप्नोति एतदेव सविशेषमाह-

[भा.२९२८] हरतिती संकाए लहुगा गुरुगाय होंति नीसंको ।
मेहुणसंके गुरुगा निस्संकिए होइ मूलं तु ।।

वृ- अथ प्रव्रज्यादानव्याजेन हरतीत्येव शङ्कायां प्रायश्चित्तं चत्वारो लघुकाः । निशङ्के हरणे नूनमेष निश्चितं हरिष्यतीत्येवं निश्चये भवन्ति चत्वारो गुरुकाः । तथा मैथुनाशङ्कायां चत्वारो गुरुका निःशङ्किते मैथुने वा भवति मूलं अमुमेवार्थं सूत्रकृताङ्गालापकेन संवादयति-

[भा.२९२९] अविधूवगादिवासो पडिसिद्धो तहयवाससतिहिगा ।
वीसत्थादीदोसा वि जट्ठा एवं तु वुत्ता ।।

वृ- पूर्वसूत्रकृताङ्गे एवोक्ता अभिहिताः पूर्वोक्ताः ।।

[भा.२९३०] पव्वावणेसपक्खे परिच्छिए दोसविवज्जिए ।
दिक्खाएवं सुत्तं सफलं सुत्तनिवातोउकारणिउ ।।

वृ- यस्मादेते दोषाः सपक्षे प्रव्राजना कर्तव्या । तद्यथा-पुरुषाः संयतैः प्रव्राजनीयाः, स्त्रियः संयतीभिः, संयतिरनुज्ञाताभिः सा च दीक्षा परिपृच्छ्य किं प्रव्रजसि इति पृष्टा यद्यभ्युपगच्छति तदा दातव्या परंदोषवर्जिते अठारसपुरिषेष्वेवमादिदोषरहिते । अत्र पर आह-यद्येतत्तत्वं तर्हि सूत्रमफलं सूत्रे परपक्षेऽपि दीक्षाया अभ्यनुज्ञानात्तस्याश्चासम्भवात् । आचार्यः प्राहसूत्रनिपातः कारणिकःकारणमपेक्ष्येदं सूत्रं प्रवृत्तमिति भावः । किं तत्कारणमत आह-

[भा.२९३१] कारणमेगमडंवेखंतियमादीसु मेलणा होइ ।
पव्वज्जमब्भुवगए अप्पाणे च उव्विहातुलना ।।

वृ- कारणमशिवादि लक्षणमधिकृत्य कोऽपि साधुरेकाकी जातः कथमप्येक मण्डवेगतः एक मण्डवं नाम यस्य निवेशस्य सर्वासु दिक्षु च नास्ति कोऽप्यन्यो ग्रामो नगरं वा तस्मिन्नेवमण्डवे गतस्तत्र च संयत्यो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न विद्यन्ते अथ च तस्मिन्नेकमण्डवे तस्य साधोर्माता भगिनी अन्या वा काचननालसम्बधा स्वजनास्ति, कोऽप्यन्यो ग्रामं नगरं वा तासां मात्रादीनां मेलनं मेलापकः साधोर्भवति । स च मात्रादिकः स्त्रीजनो धर्मे कथितेऽकथिते वा प्रव्रज्यां प्रतिपत्तुमभ्युपगतो यथा वयं प्रव्रज्यां प्रतिपद्यामहे । एवं प्रव्रज्यामभ्युपगते मात्रादावशङ्कनीये स्त्रीवर्गे यतना कर्तव्या । सा चेयं-तेन साधुना चतुर्विधया तुलनया तोलयित-व्यस्तद्यथा-द्रव्यतः क्षेत्रतः कालतो भावतश्च । तत्र द्रव्यतो यदि समर्थ हारमुपधिभैषजादिकं चोत्पादयितुं समर्थः, । तथा कस्याप्येवं स्भावतो भवति । यथा न शक्नोति स्थातुं प्रथमालिकां विना चतुर्थरसिकादिकं वा पानकं न शक्नोति पातुं । ततस्तद्योग्यं पानकं प्रथमालिकां वा नेतुं समर्थः; । क्षेत्रतो यदि शक्नोति पथि पादाभ्यां गन्तुमध्वनि वा यदि शक्नोति आहारादिकमुत्पादयितुम् । कालतो ग्रीष्मकाले पानकं शीतकाले तत्कालप्रायोग्यमाहारादिकं तदुत्पादयितुं समर्थः । रात्रौ मध्याह्ने वा यदि गन्तुं प्रभुः, भावतो यदि क्रोधादीनां जयं कर्तुं क्षमो ज्ञानदर्शनचारित्राणि सामाचारीं च ग्राहयितुमीशस्ततो यावदाचार्याणां प्रवर्तिन्या वा मूलं न प्राप्नोति, तावदनया चतुर्विधया तुलनयात्मानं तुलयित्वा यदि समर्थो जातस्ततः प्रव्राजयति । एतदेवाह-

[भा.२९३२] असिवादिकारणगतो वोच्छिन्नमडंबसंजती रहितो ।
कहियाकहियउवठिय असंकइत्थी समा जयणा ।।

वृ- अशिवादिभिः कारणैरेकाकी व्यवच्छिन्ना ग्रामनगरादयो दिक्षुविदिक्षु च यस्मात्तस्मिन् व्यवच्छिन्ने संयतीरहिते मडंवे गतस्तत्र च धर्मे कथिते अकथिते वा मात्रादयो व्रतग्रहणार्थमुपस्थितास्तासु अशङ्कासु अशङ्कनीयास्वियं वक्ष्यमाणा यतनातामेवाह-

[भा.२९३३] आहारा दुप्पायणे दव्वे समुइं च जाणते तीसे ।
जइ तरइ गंतु खेत्ते आहारादीनि अद्धाणे ।।

वृ- द्रव्ये द्रव्यतो यद्याहारादीनामादि शब्दादुपध्यादि परिग्रहः उत्पादने समर्थः । समुइ नाम स्वभावः भावं तस्या जानाति यथा प्रथमालिकां विना न शक्नोति चतुर्थरसिकादिकं च पानीयं पातुं न शक्नोति, ततस्तद्योग्यं पानं प्रथमालिकांचोत्पादयितुं क्षमः । तथा क्षेत्रतो यदि पथि पादाभ्यां गन्तुं तरति अध्वनि वाहारादिकमुत्पादयितुम् ।

[भा.२९३४] गिम्हातिकाले पानग निसिगमनातिसुवा विजइसत्तो ।
भावे कोहाइ जओ गाहणनाणेय चरणे य ।।

वृ- काले ग्रीष्मादौ यदि पानकमुत्पादयितुमीश उपलक्षणमेतत् । शीतकाले वर्षाकाले च प्रायोग्यं तत्सम्पादयितुं शक्तो भावे यदि क्रोधादिजयः कर्तुं शक्यते ज्ञाने चरणे च तस्या ग्रहणे समर्थस्तदा यावदाचार्यमूलं प्रवर्तिनी मूलं चन प्राप्नोति । तावदेतया चतुर्विधायात्मानं तोलयित्वा यद्यात्मनः समर्थता गम्यते तदा प्रव्राजयति यावत्कथा समर्थो वा प्रव्राजयति । अत्रेयं मार्गणा यो यावत्कथं परिपालयितुं समर्थः स नियमात् प्रव्राजयति, इतरस्मिंस्तु भजना । तथाहि-यो यावत्कथं परिपालयितुं समर्थः तस्य यद्याचार्यः सलब्धिकः परिपालने समर्थोऽन्यो वा स्वगणशक्तः परिपालयितुं क्षमः, ततः प्रव्राज्य तस्य समर्पयति । अथाचार्योऽन्यो वा स्वगणाशक्तस्तां परिपालयितुसमर्थस्तदा न प्रव्राजयति । इयमितरस्मिन् भजना ।।

[भा.२९३५] अब्भुज्ज मेगयरं पडिवज्जिउ कामो जो उ पव्वावे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुगा अविज्जमाने अन्नेगणधारणसमत्थे ।।

वृ- योऽभ्युद्यतमेकतरं नाम लब्धिक आर्यिकाणां परिपालने च समर्थस्तदा तस्य मात्रादिकाव्रत-ग्रहणार्थमुपस्थिताः स यदि अभ्युद्यत विहारं मरणं वा प्रतिपत्तकामस्तर्हि यदि तस्याचार्योन्यो वा स्वगणसत्कः परिपालने समर्थस्तदा ता प्रव्राज्यतस्यसमर्पयतिसमर्प्य वाभ्युद्यतविहारमरणंवा प्रतिपद्यते अथ-नास्त्याचार्यः स्वगणसक्तो वातासां परिपालकस्तदा अन्यस्मिन् गणधारणसमर्थेऽविद्यमाने योऽभ्युद्यतमेकतरं विहारं मरणं वा प्रतिपत्तुकामः प्रव्राजयति तस्य प्रायश्चित्तं चत्वारो गुरुकाः ।।

[भा.२९३६] जो विय अलद्धिजुत्तो पव्वावेंतस्स होंति गुरुगाउ ।
जम्हा जोउ समत्थो सो पव्वावेइ ता उवा ।।

वृ- योऽप्यलब्धियुक्तो न तत्प्रायोग्याहारयितुमीशस्तस्यापि प्रव्राजयतो भवन्ति चत्वारो गुरुकाः प्रायश्चित्तं, यत एवमसमर्थतायां प्रायश्चित्तं तस्माद्यः समर्थः स ता मात्रादिकाः स्त्रीः प्रव्राजयति ।

[भा.२९३७] एवं तुलेऊणप्पं सा वि तुलिज्जइ उ दव्वमाईहिं ।
कायाणं दायाणं दिक्खसिक्ख इत्तरदिसानयणं ।।

वृ- एवमुक्तेन प्रकारेणात्मानं द्रव्यादिरूपया चतुर्विधया तुलनया तोलयत्वा या सौ प्रव्राजनीया सापि द्रव्यादिभिस्तोलयितव्या । सा च तुलनाग्रे भणिष्यते, । यदि तुलनायामुक्तायां सा ब्रूते सर्वमहं कर्तुं समर्था इति तदा सा दीक्षणीया सा च तुलना तस्याः कर्तव्या यस्याः स्वभावो न ज्ञायते यस्याः पुनः स्वभावो ज्ञातो वर्तते । तत्रान्मतुलनैव प्रागुक्ता कर्तव्या, । अथ यदि तस्य माता भगिनी वा ततः कथं तस्याः स्वभावो नज्ञायते, ।उच्यते-स लघुकएव नष्टः प्रव्रजितो वा । ततः स्वभावापरिज्ञानं, कायाणदायणमिति कायानां पृथिवीकायादीनां कर्तव्यं । यथा एष पृथिवीकाय उच्यतेऽयमप्कायोऽयं तेजस्काय एष वायुकायोऽयं वनस्पतिकाय एष चलनधर्मा द्वीन्द्रियादिस्त्रसकायस्तत्र पृथिव्या आलिखनादि न कर्तव्यमप्कायेन स्वगात्रसेवनादि, तेजस्कायेन प्रतापनादि च वनस्पतिकायेन दन्तधावनादि त्रसकायस्य परितापनादि । यदि पुनः कायैः कार्यमुपजायते, तदा तत्कारणे, प्रासुकेन परिमितेन कर्तव्यम् । एवमभ्युपगते तस्या दीक्षा दातव्या । तदनन्तरं ग्रहणशिक्षा सेवनाशिक्षा च शिक्षणीया । तत्र ग्रहणशिक्षा सा दशवैकालिकादि सूत्रं पाठनीया । आसेवनाशिक्षा यत्परिधानपनादि शिक्षते तत्र परिधापनविधि-मुपदर्शयितुकामेन पूर्वं लघुबालकसंयती नेपथ्येन परिधाप्यते तत उच्यते एवमार्ये त्वमपि परिधानं कुर्याः तथा भिक्षाटनसामाचारीं संक्षेपेण कथयति । तत इत्वरदिक्करणं यावदाचार्यसकाशं न व्रजामि तावदहमेव ते आचार्योऽहमेव च प्रवर्तिनी । आचार्यसमीपं गतानां त्वाचार्या ज्ञातारस्ततो वक्ष्यमाणविधिना गुरुसमीपे नयनं । एष निर्युक्ति गाथासमासार्थः । साम्तमेनामेव विवरीषुः भाष्यकारः आह-

[भा.२९३८] पेज्जादि पायरासा सयनासनवत्थपाउरणदव्वे ।
दोसीण पुव्वलाणि य सयनादि असक्कयाएहिं ।।

वृ- गृहस्थावस्थायां प्रातराशा प्रथमालिकापेयादिरूपा पेया प्रतीता । आदिशद्वान्मण्डकमोद-कादिपरिग्रहस्तथा शयनासनवस्त्राणि शोभनानि प्रावरणानि च कालोचितान्यासीरन् । इदानीं तु व्रतप्रतिपत्तौ प्रथमालिकायां भक्तं दोसीणमिति पर्युषितं भविष्यति । दुर्बलानि च शयनादीनि शयनासनवस्त्राणि प्रावरणानि च एतस्य कर्तुमशक्यता इयं द्रव्ये द्रव्यविषया प्रतिपृच्छा, ।

[भा.२९३९] पडिकाराय बहुविहा विसयसुहा आसि से न पुन इण्हिं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्थानिण्हाणधूवा विलेवणा ओसहाइं च ।।

वृ- तथा ते भवतीनां गृहस्थावस्थायां व्याधेः प्रतीकारा बहुविधा आसीरन् । विषयसुखानि च बहुविधानि, । तथाहिगृहस्थावस्थायां मनोज्ञानि वस्त्राणि, शरीरमनःप्रल्हत्तिकरं स्नानं प्राणमनो-निवृत्तिकरा धूपाः शरीरशुभगानि विलेपनानि । एतेन विषयसुखानि भावितानि । तथा औषधानि च गृहस्थावस्थायां नानाप्रकाराणि संगृहीतानि, इदानीं पुनर्न विषयसुखानि नापि प्रतीकारा बहुविधास्ततः परमदुष्करं व्रतमेतदिनि, क्षेत्रतः प्रतिपृच्छामाह-

[भा.२९४०] अद्धाण दुक्खसेज्ञा सरेणुतमसाय वसहितो खेत्तो ।
परपाएहिं गयाणं पुच्छाणय उउसुहघरेसु ।।

वृ- युष्माकं सदैव पर पादैर्गतानां सदैव ऋतुसुखेषु ग्रहेषूषितानां प्रव्रज्या प्रतिपत्त्यनन्तरमध्वनि स्वपादाभ्यां गमने महत् दुःखं भविष्यति । शय्यावसतिः सरेणुका तथा दीपो रात्रौ न प्रज्वाल्यते, वसतयो वसनानि तमसा कष्टानि भविष्यन्ति । एषा क्षेत्रे प्रतिपृच्छा । कालत आह-

[भा.२९४१] आहाराउवजोगो जो जम्मि होइ कालंमि ।
सोन्नहा न यनिसिं अकालो जोग्गो य हीनो य ।।

वृ- यो यस्मिन्काले योग्य आहाराद्युपयोगः स गृहस्थावस्थायां समपद्यत, व्रतप्रतिपत्यनन्तरं तु आहाराद्युपयोगोऽन्यथा भवति, तथा न रात्रावाहाराद्युपयोगो नवा कालेऽपि च कदाचिदयोग्यो भवति, । सोऽपि च न परिपूर्णः किन्तु हीन इति, गता कालप्रतिपृच्छा । भावपृच्छामाह-

[भा.२९४२] सव्वस्स पुच्छणिज्ञा नय पडिकूलेन सइरसुदतासि ।त्त्य
खुड्डीविपुच्छणिज्ञा चोयण फरुसा गिराभावे ।।

वृ- गृहस्थावस्थायां त्वं सर्वस्य पृच्छनीया वर्तसे, तत्रापि न प्रतिकूलेन, तथा स्वैरं स्वेच्छया मुदिता प्रमोदवती गृहस्थावस्थायामसि भवसि, । व्रतप्रतिपत्त्यनन्तरं तु क्षुल्लिकापि त्वया प्रच्छनीया, तथा तथा चोदना शिक्षणं परुषया गिरा भविष्यति एतच्च परम दुस्सहमित्येषा भावे भावविषया प्रतिपृच्छा ।

[भा.२९४३] जा जेन वयेण जहा वलालिता तं तदन्नहा भणति ।
सोयादि कसायाण य जोगाण य निग्गहो समिति ।।

वृ- या यस्मिन् वयसि गाथायां तृतीया सप्तम्यर्थे प्राकृतत्वात् । यथा येन प्रकारेण लालिता वा शब्दो भावविषया प्रतिपृच्छा प्रकारान्तरोपदर्शने तां तदन्यथा इदं वक्ति । श्रोत्रादीनामिन्द्रियाणां कषायाणां योगानां च कायप्रभृतीनां निग्रहः कर्तव्यः समितयश्च ईर्यासमित्यादयः पञ्च परिपालनीयाः तदेवं तस्या द्रव्यादिभिस्तुलनोक्ता । सम्प्रति कायानां च दर्शनमाह-

[भा.२९४४] आलिहणं सिंचतावणवीयणं दंत धुवणादिकज्जेसु ।
कायाण अनुवभोगो फासुयभोगो परिमितो य ।।

वृ- पृथिव्याः काष्टादिना आलिखनमुदकेन सिञ्चनमग्निनातापनं वायोर्व्यञ्जनं दन्तधवनं दन्तप्रक्षालनमित्यादि कार्येषु कायानामनुपभोगः यदि पुनः कार्यैः प्रयोजनमुपजायते, । तदा प्रासुकेन परिभोगः कर्तव्यः । सोऽपि च परिमित इति, । सम्प्रति दीक्षादिद्वार प्रतिपादनार्थमाह-

[भा.२९४५] अब्भुवगयाए लोउ कप्पठगलिंगकरणदावणया ।
भिक्खगहणकहेति वेति वहंते दिसा तिन्नि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- पूर्वोक्तं सर्वं यद्यभ्युपगतवती भवति तदा तस्या अभ्युपगताया अभ्युपगमवत्यालोचः कर्तव्यो यदा तु निवसनविधेरुपदेष्टुमुपक्रान्तो भवति तदा कल्पस्थकस्य बालस्य संयती नेपथ्यपरिधापनेन निवसनस्य दर्शनं कर्तव्यम् । तथा भिक्षाग्रहणं भिक्षाटनसामाचारीं कथयति वदति च । यावदाचार्यसमीपं न व्रजामि तावदहं ते तव तिस्रो दिशः अहमेव तवाचार्योऽहमेवोपाध्यायोऽहमेव च प्रवर्तिनीति ।

आचार्यपादमूलं गतानां त्वाचार्यः प्रमाणं नयनविधिमाह-

[भा.२९४६] माऊ एक्किंयाए संबंधी इत्थी पुरिससत्थे य ।
एवमेव संयतीण वि लिंगं करणमोत्तुबितियपदं ।।

वृ- एकस्या मातुरुपलक्षणमेतत् भगिन्या वा नयनं नालबद्धस्त्रीसम्बन्धिना स्त्रीसार्थेन समं तदभावे नालसम्बन्धिना पुरुषसार्थेन तस्याप्यभावेऽन्येन भद्रकेन सार्थेन सहगाथायां सप्तमी तृतीयार्थे ।

मू. *(१६७) नो कप्पइ निग्गंथीणं निग्गंथं अप्पणो अठाए पव्वत्तावित्तए वा जाव धारेत्तए वा ।*

मू. *(१६८) कप्पइ निग्गंथीणं निग्गंथं अन्नेसिं अट्ठाए पव्वावेत्तए वा जाव धारेत्तए वा ।*

वृ- सूत्रद्वयस्य अक्षर गमनिका प्राग्वत्- अत्र भाष्यकारः प्राह-ऐवेत्यादिगाथापश्चार्धं । एवमेव अनेनैव प्रकारेण संयतीनामपि संयतं प्रव्राजयन्तीनां निरवशेषं वक्तव्यम् । नवरं लिङ्गकरणे द्वितीयपदं मुक्त्वा लिंगकरणे द्वितीयपदमधिकं वा सेवनीयमिति भावः । एतदेव दर्शयति -

[भा.२९४७] उठंत निवेसंते सति करणादीय लज्जनासे य ।
तम्हा उ सकडिपट्टं गाहंति तयं दुविह सिक्खं ।।

वृ- अग्र पूरकमात्रकरणे उत्तिष्ठतिय निवसति सकृत्करणादौ च यस्माल्लज्ञानाशो भवति तस्मात्तकं संयतं द्विविधामपि शिक्षां ग्राहयति । सकट्टीपट्टकं सन्तं कटीपट्टकपरिधानापेतं सन्तं ।

[भा.२९४८] आयरियउवज्झातो तइयाय पवत्तिनीउ समणीणं ।
अनेसिं अट्ठाएत्ति होइ एएसिं तिण्हंपि ।।

वृ- श्रमणीनामाचार्यउपाध्यायस्तृतीया च प्रवर्तिनी भवति, श्रमणानां त्वाचार्योपाध्यायौ ततोऽन्येषामर्थायेति । यदुक्तं सूत्रद्वयेऽपि तस्यायमर्थो भवति, यथायोगमेतेषां त्रयाणां अर्थाय संयतो त्रयाणामर्थाय संयतस्तु द्वयोरर्थायेत्यर्थः । एतेन अन्नेसिं अठाए इति सूत्रद्वयमपि व्याख्यातम् ।

मू. *(१६९) नो कप्पइ निग्गंथीणं वितिगिठियं दिसं वा अनुदिसं वा उद्दिसित्तए वा धारेत्तएवा ।*

मू. *(१७०) कप्पइ निग्गंथाणं विइकिट्ठियं दिसं वा अनुदिसं वा उद्दिसित्तए वा धारेत्तए वा ।।*

[भा.२९४९] पव्वावियस्स नियमा देंति दिसिं दुविहमेव तिविहा वा ।
सो पुन कस्सविगिठा उद्दिसतिसन्निगिट्ठावा ।।

वृ- अनन्तरसूत्रेषु प्रव्राजनमुक्तं प्रव्राजितस्य तु नियमात् दिशं द्विविधां त्रिविधां वा प्रयच्छंति, । संयतस्य द्विविधामाचार्योपाध्यायलक्षणां संयत्यास्त्रिविधामाचार्योपाध्यायप्रवर्तिनीरूपामित्यर्थः, । सा पुनर्दिक्कस्य विप्रकृष्टा उद्दिश्यते, कस्य सन्निकृष्टेति प्रतिपादनार्थमधिकृतं सूत्रद्वयमित्येष सम्बन्धः ।

[भा.२९५०] अहवा विसरिसपक्खस्स अभावादिक्खणावि पक्खेवि ।
तत्थविकस्सविगिठाद्दिसति कस्स वा नेति ।।

वृ- पुरुषाः संयतानां सदृशपक्षः, संयतीनां पुरुषा विपक्षः । अथवापीति सम्बन्धस्य प्रकारान्तरोपदर्शने सदृशपक्षस्याभावात् दीक्षणं विपक्षेऽपि कर्तव्यमित्यनन्तरसूत्रेष्वभिहितम्, तत्रापि कस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिक्विकृष्टा उद्दिश्यते, कस्य वा नेति; तदधिकृतसूत्रद्वयेनाभिधातव्यमिति सम्बन्धः, । अनेन सम्बन्धेनायातस्यास्य व्याख्या-न कल्पते निर्ग्रन्थीनां व्यतिकृष्टामतिशयेन क्षेत्रतो भावतश्च विकृतां दिशमनुदिशं वा उद्देष्टुमनुज्ञातुं नापि स्वयं धारयितुं तथा कल्पते निर्ग्रन्थानां क्षेत्रतो भावतश्च व्यतिकृष्टां दिशमनुदिशं वा स्वयं धारयितुं वा इत्येष सूत्रद्वयाक्षरार्थः । सम्प्रतिभाष्यम्-

[भा.२९५१] दुविहंपिय तिविगिठं निग्गंथीनुद्दिसंति चउगुरुगा ।
आणाइणो य दोसा दिठंतो होइ कोसलए ।।

वृ- द्विविधामपि विकृष्टां क्षेत्रविकृष्टां भावविकृष्टां चेत्यर्थः निर्ग्रन्थीनां दिशमुद्दिशति तस्मिन् प्रायश्चित्तं चत्वारो गुरुकाः आज्ञादयश्च दोषाः । तत्र क्षेत्रविकृष्टां दिशमुद्दिशतो ये दोषास्तत्र कोशलको भवति दृष्टान्तस्तमेव भावयति ।

[भा.२९५२] उवसामिया जयंतेन कोसलेणं गते य सातंमि ।
तं चेव ववदिसंती दिक्खंती दिक्खंता अन्नगच्छंमि ।।

[भा.२९५३] वारिज्जंती विगया पडिवणा सा य तेय पावेणं ।
जिनवयण बाहिरेणं कोसलएणं अकुलएणं ।।

वृ- एकः कोशलकः कोशलदेशोत्पन्न इत्यर्थः । तेन अन्यदेशं गतेन यतमानेन सदनुष्ठान-परायणेनकापि श्राविका उपामिता, । स च कोशलकः स्वदेशं गतस्तस्मिंश्च गते सा श्राविकाऽन्यस्मिन् गच्छे तत्र गते तस्य समीपे निष्क्रमितुमुपस्थिता यथा मां निक्रामयत परं मम स एव कोशलकः आचार्यः, । एवं सा तमेव व्यपदिशन्ती तै दींक्षिता सा च दीक्षाप्रतिपत्त्यनन्तरं वार्यमाणापि कोशलसमीपे गता । सा च तेन पापेन जिनवचनबाह्येनाकुलजेन कोशलेन प्रतिपन्ना । एष दोषः । क्षेत्रविप्रकृष्टां दिशमुद्दिशतः ।

[भा.२९५४] कोसलए किं कारणगहणं बहुदोसलो उ कोसलतो ।
तम्हा दोसुक्कडया गहणइह कोसले अवि य ।।

वृ- किं कारणमत्र कोशलकस्य ग्रहणं कृतम् ? सूरिराह-यस्मात्कोशलको देशस्वभावात् बहूदोषान् लाति आदत्ते । अतिबहुदोषलो बहुदोषवान् तस्मात् दोषोत्कटतयात्र कोशलस्य ग्रहणमपि च-

[भा.२९५५] अंधं अकूरमययं अवि य मरहट्ठयं अवोगिल्लं ।
कोसलयं च अपावं सएसु एक्कं न पेच्छाम्मो ।।

वृ- अन्ध्रमन्ध्रदेशोत्पन्नमकूरमतकमक्रूराभिप्रायमपि च महाराष्ट्रकमवोगिल्लमवाचालं कोशलकं चापापं शतेषु मध्ये एकं न प्रेक्षामहे इति प्रसिद्धिरतः कोशलग्रहणं । पुनरपि प्राह-

[भा.२९५६] कोसलए जो दोसा उदिदस्संतंमि किन्न सेसाणं ।
ते तेसिं होज्ज वन वा इमेहिं पुने नोद्दिसे तेवी ।।

वृ- ये दोषाः कोशलके दिशमुद्दिशति ते किं न शेषाणां दिशमुद्दिशन्ति । किं न भवन्ति भवन्त्वेति भावः । सूरिराह-ते दोषास्तेषां भवेयुर्वा न कोशलके पुनर्नियमाद्भवन्ति देश विदेशजन्मनोऽपि गुणदोषा हेतुत्वात्ततः कोशलोपादानं । एतैः पुनर्वक्ष्यमाणैः कारणैस्तानपि शेषदोषोत्पन्नान् क्षेत्रविकृष्टा न्नोद्दिशेत् ।

[भा.२९५७] अन्न उद्दिसिऊणं निक्खंता वा सरागधम्मंमि ।
अणोणंमि ममत्तं न हुअग्गाणंपि संभवति ।।

वृ- वा शब्दो दूषणान्तरसमुच्चये । यद्यकालभाविनि सरागधर्मेऽन्यमाचार्यमुद्दिश्य निष्क्रान्ता परम-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न्योन्यस्मिन् परस्परस्मिन् यत् ममत्वं तत् व्यग्राणामपि व्यग्रचित्तानामपि न तु नैव भवति । किन्त्वे-कचित्तानामुपजायते । सा चैकचित्तता अत्र नाति । तथा चाह-

[भा.२९५८] सुचिरंपि सारिय गच्छइति ममयानया गच्छस्स ।
सीयंतचोयणासु य परिभूयामित्ति मन्नेज्जा ।।

वृ- सुचिरमपि कालं सारिता शिक्षिता सती गमिष्यतीति मन्यमानस्य गच्छस्य न तस्या विषये ममता ममत्वमायाति सीदन्त्याः संयमयोगेषु शिथिलीभवन्त्यो याश्चोदनाशिक्षास्तासु दीयमानासु सान्यत्र गन्तुमनाः परिभूतास्मीति मन्यते तत स्तस्या अपि न गच्छस्योपरि ममता । किं च-

[भा.२९५९] गमणुस्सुएण चित्तेन सिक्खातो वि न गेण्हई ।
वारिज्जंतीवि गच्छेज्जा पंथदोसे इमे लभे ।।

वृ- गमनोत्सुकेन चित्तेन शिक्षा अपि नाना प्रकारा ग्रहणशिक्षा आसेवनाशिक्षाश्च न गृह्णाति तथा वार्यमाणापि तस्य क्षेत्रविकृष्टस्यान्यस्याचार्यस्य समीपं गच्छेत् । तत्र च पथि दोषानिमान् वक्ष्यमाणान् लभते, । अत्र यदुक्तं प्राक् एतैर्वक्ष्यमाणैर्दोषैस्तानपि नोद्दिशेदिति तद्व्याख्यानावसरः । तानेव दोषानाह-

[भा.२९६०] मिच्छत्तसोहि सागारियादि पासंडतेन सच्छंदा ।
खेत्तविगिठे स दोसा अमंगलं भवविगिट्ठंमि ।।

वृ- मिथ्यात्वं मिथ्यात्वगमनं शोधेरभावस्तथा सागारिके अगारसहिते आदिशब्दादनागारे एकाकिन्या उपाश्रये दोषाः, । तथा पाषण्डैर्विपरिणामनं स्तेनैरपहारस्तथा स्वच्छन्दा स्यात् । न गच्छाधीना तथा च सति भूयांसो दोषा एते क्षेत्रविकृष्टे उद्दिश्यमाने दोषा भवविकृष्टे उद्दिश्यमाने अमङ्गलं तेन संयमजीविता-द्भवजीविताद्वा भ्रश्येत्तस्माद्भवविकृष्टोऽपि नोद्देष्टव्यः एष द्वारगाथासंक्षेपार्थः साम्प्रतम् विवरणमाह-

[भा.२९६१] उवदेसो न सिं अत्थि जेनेगागीए हिंडए ।
इति मिच्छं जनो गच्छे कत्थ सोहि च कुव्वउ ।।

वृ- उपदेशः सिं तासामेकाकिनीनां नास्ति येन स तादृशः स्त्रीजन एकाकी हिण्डते । तत इति अस्मा-त्कारणात् । उपदेशाभावलक्षणात् जनः स्त्रीजनो मिथ्यात्वं गच्छेत् । गतं मिथ्यात्वद्वारं । शोधद्विरमाहकुत्र प्रायश्चित्तमापन्ना सती शोधिं कुर्यात् । नैवकुत्रापीति भावः, । एकाकिनीत्वान्न च प्रायश्चित्तस्थानम-प्रायश्चित्तस्थानं वा सा जानाति । तत इतोऽपि शोध्यभावः सागारिकाद्वारं पाखण्डद्वारं चाह-

[भा.२९६२] सागारमसागारे एकी उवस्सए भवे दोसा ।
चरिगादिविपरिणामण सपक्ख परपक्ख निण्हादी ।।

वृ- सागारे अगारसहिते असागारे अगाररहिते उपाश्रये एकस्या एकाकिन्या दोषा भवन्ति । तत्र सागारे दीपस्पर्शनादयोऽनाकारे कुलटाजारादिप्रवेशतो, गतं सागारिकादिद्वारं, । पाषण्डद्वारमाह इत्यादि स्वपक्षे च विपरिणमनं तत्र स्वपक्षे निन्हवादिभिरादिशब्दात् पार्श्वस्थादि परिग्रहः परपक्षे चरकादिभिः, स्तेन द्वारं स्वच्छंदद्वारं चाह-

[भा.२९६३] तेनेहिंवा विहिज्जइ सच्छन्दुत्थाणगमणमादीय ।
दोसा भवंति एए, किंच न पावेज्ज सच्छंदा ।।

वृ- स्तेनैर्वा शरीरापहारिभिर्वा सा पथि गच्छन्ती ह्रियेत, तथा स्वच्छन्दमुत्थानं स्वच्छन्दगमन-मित्यादयश्चैते दोषा एकाकिन्या भवन्ति । किं वा स्वच्छन्दा सती सा न प्राप्नुयात् । सर्वं दुःखस्थान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माप्नुयादित्यर्थः । सम्प्रति भवविकृष्टे दोषानाह-

[भा.२९६४] गौरवभयममकारा अविदूरत्थे वि होइ जीवन्ते ।
कोदानि समज्ञा तस्स, कुणइ नय तेन जं किच्चं ।।

वृ- अपिदूरस्थेऽपि जीवति सति तद्विषया गौरवभयममीकारा भवन्ति भूयस्तन्मिलनादि प्रत्याशासंभवात् । इदानीं पुनस्तस्य समुद्घातस्य को गौरवं भयं ममीकारं वा करोति न च नैव कश्चित् यत् यस्मात् न च नैव तेन कृत्यं प्रयोजनं मृतत्वेन सर्वप्रयोजनातीतत्वात् ।

[भा.२९६५] कोसलवज्ञा ते च्चिय दोसा सविसेस भवविगिठंमि ।
दुविहंपि वितिगिठं तम्हा उ न उद्देसिज्ञाहि ।।

वृ- य एव दोषा मिथ्यात्वगमनादयः । क्षेत्र विकृष्टेऽभिहितास्त एव सविशेषा भवविकृष्टेऽपि ज्ञातव्याः केवलंकोशलवर्जाः । कोशलदोषा हि भवविकृष्टे न भवन्ति मृतत्वेनासंभवात्तस्माद्द्विविधमपि व्यतिकृष्टं क्षेत्रविकृष्टं भवविकृष्टं च नोद्दिशेत् अत्रैवापवादमाह-

[भा.२९६६] बितियं तिव्वनुरागा संबंधी वा न तेय सीयंति ।
इत्तरदिसाउनयनं अप्पाह एव दुरंमि ।।

वृ- द्वितीयपदमपवादमधिकृत्य क्षेत्रविकृष्टमपि उद्दिशेत् । यदि साधर्मग्राहिण्याचार्ये तीव्रानुरागा भवेत् । स वा आचार्यस्तस्याः सम्बन्धी स्वजनो न च ते आचार्याः संयमयोगेषु सीदन्ति उद्यतविहारिण इत्यर्थः । केवलं तस्या इत्वरादिशोऽनुबन्धयित्वा यावत्ते स्वक आचार्यो न मिलति तावद्वयमाचार्या एते उपाध्याया इयं प्रवर्तिनीति ततः स्वाचार्यसमीपे विधिना नयनमथतं च दूरे ते आचार्यास्ततः सन्देशं कथयन्ति । यथा युष्मदयिधर्मशैष्याऽस्माकं पार्श्वे प्रतिपन्नदीक्षाका वर्तते सा प्रतिग्राह्या ।

[भा.२९६७] भवविगिट्ठे वि एमेव समुज्ञातोत्ति वा न वा ।
तत्थ आसंकिए बंधो निस्संके उ न बज्झति ।।

वृ- भवविकृष्टेऽप्येवमेव । द्वितीयपदमवगन्तव्यमिति भावः । कथमित्याह- किंसमुद्घातः कालगतः किं वा नेत्येवं तस्मिन् भवविकृष्टे तस्याबन्धः क्रियते । निशङ्किते तु भवविकृष्टे सा न बध्यते ।

[भा.२९६८] अहवा तस्स सीसं तु, जति साउ समुद्दिसे ।
विप्पकट्ठे तहिं खेत्ते जयणा जा उ सा भवे ।।

वृ- अथवा यदि सा तस्य शिष्यं समुद्दिशति कथयति मम त एव आचार्या अहंतु तच्छिष्यसमीपे स्थास्यामीति, तदा भवविकृष्टेऽपि तस्याबन्धः क्रियते । तत्र या विकृष्टे क्षेत्रे यतनोक्ता साऽत्रापि भवति ज्ञातव्या । तदेवं निर्ग्रन्थसुत्रव्याख्यानार्थमाह-

[भा.२९६९] निग्गंथाण विगिट्ठे दोसा ते चेव मुत्तु कोसलयं ।
सुत्तनिवातोभिगए संविग्गे सेस इत्तरिए ।।

वृ- निर्ग्रन्थानामपि विकृष्टे उद्दिश्यमाने य एव निर्ग्रन्थानां दोषा मिथ्यात्वादय उक्तास्त एव कोशल-कमेकं दोषं मुक्त्वा शेषा सर्वे निरवशेषा द्रष्टव्याः । यद्येवं तर्हि सूत्रमनर्थकमविषयत्वात्तदत आह- सूत्रनिपातो अभिगते संविग्रे च शेष इत्वरिकः । इयमत्र भावना- अभिगतो ज्ञाततत्वः श्राद्धः पुराणो वा संविग्नः स्वयं योऽपि धर्मदेशकस्तस्य आचार्यस्सोपि संविग्नस्तस्मिन् सूत्रनिपातो यस्तु शेषः स्वयं न सम्यक् ज्ञाततत्वस्तस्य पथिं व्रजतो मिथ्यात्वादयो दोषाः । तस्य दीक्षामाधाय इत्वरिको दिगबन्धः क्रियते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनः प्रेष्यति । एतदेव व्याचिख्यासुराह-

[भा.२९७०] सड्ढो पुराणो वा जइ लिंगं घेत्तुवयति अन्नत्थ ।
तस्स वितिगिठबंधा जा इच्छइ ताव इत्तरितो ।।

वृ- श्राधः श्रावकः पुराणः पश्चात्कृतो वा शद्धो विकल्पनेऽधिगततत्वतः स्वयं संविग्नो योऽपि तस्य धर्मग्राहकः चार्यः सोऽपि संविग्नः । स इत्थंभूतो यदि लिङ्गं गृहीत्वाऽन्यत्र क्षेत्रविकृष्टमूलाचार्यसमीपे व्रजति तस्य विकृष्टो दिग्बन्धः कर्तव्यो, यावच्च तत्र तिष्ठति तावत्तस्यात्मीय इत्वरिको दिग्बन्धः-

[भा.२९७१] मिच्छत्तादी दोसा जे वुत्ता ते उ गच्छतो तस्स ।
एगागिस्सवि न भवे इति दूरगते वि उद्दिसणा ।।

वृ- ये च पूर्वं मिथ्यात्वादयो दोषा उक्तास्तेऽपि तस्यैकाकिनोऽमप गच्छतो न भवन्ति, ज्ञाततत्वत्वात्संविग्नत्वाच्च इति हेतोस्तस्य दूरगतेऽपि क्षेत्रविकृष्टेऽपि गुरावुद्देशनं भवति ।।

[भा.२९७२] गीयपुराणो वुठं धारंतो सत्तमुद्दिसंतं तु ।
आसन्नं तं उदिस्सइ पुव्वदिसं वा सयंधरए ।।

[भा.२९७३] चोइज्जंतो जो पुन उज्जसिहिति तंपि नाम बंधंति ।
सेसेसु न उद्दीसणा इति भयणा खेत्तवितिगिट्ठे ।।

वृ- गीतो नाम सूत्रार्थनिष्पन्नः पुराणः पश्चात्कृतश्रमण भावः स निष्क्रमितुभावोऽन्येषामाचार्याणा-मुपस्थितस्तस्य च पूर्वाचार्योऽवसन्नो विदेशस्थश्च सतं सततमेवाभिधारयति । येषां च समीपे निष्क्रमितुमुपस्थितस्तान् प्रति उद्दिशतिभणतीत्यर्थः । मम स एवाचार्य इति तं गीतं पुराणमुवस्थमुपस्थितं पूर्वमाचार्यमवसन्नमभिधारयन्तं वचसा तमेवोद्दिशन्तं च प्रति यस्य समीपे निष्क्रमितुमुपस्थितः स पूर्वाचार्यस्य विदेशस्थस्य योऽन्य आसन्नस्थस्य सम्बन्धी संविग्नस्तमुद्दिशति । यथा स तवाचार्य इति अथवा स्वयं तेनात्मीयावसन्नदिक् धारयितव्या न पुनः स तेन तत्रोद्देशयितव्यः । तस्यावसन्नत्वाद्यदि वा तमप्यवसन्नमुद्दिशन्तमुद्दिशति । केवलमनेन प्रकारेण केनेत्यत आह-चोइज्जंतो इत्यादि यः पुनर्ज्ञायते चोद्यमानः शिष्यमाण उद्यस्यन्ति संविग्नो भविष्यन्ति तमपि नाम ते आचार्यो बध्नन्ति यथा ते तवाचार्य इति । ये पुनर्न ज्ञायन्ते न चोद्यमानाः संविग्नाभविष्यन्ति तेषु शेषेषु नोद्देशनमिति भजना ।

[भा.२९७४] एमेव य कालगते आसन्नंतं च उद्दिसइ गीए ।
पुव्वदिसा धारणं वा अगीयमुत्तूण कालगयं ।।

वृ- एवमेव अनेनैव प्रकारेण कालगते तस्य मूलाचार्ये यदि स्वयं गीतार्थो भवति तदा तस्य योऽन्य आसन्न आचार्यस्तं च उद्दिशति पूर्वदिशं वा धारयति । अथ स स्वयमगीतार्थस्तदा तस्य कालगतं मुक्त्वा शेषोऽन्य उद्दिश्यते इति ।

मू. (१७१) *नोकप्पइ निग्गंथाणं वितिगिठाइं पाहुडाइं विओसवित्तए ।*

[भा.२९७५] वितिगिट्ठा समणाणं अव्वित्तिगिट्ठा य होइ समणीणं ।
मा पाहुडंपि एवं भवेज्ज सुत्तस्स आरंभो ।।

वृ- व्यतिकृष्टा श्रमणानां दिग्भवति अव्यतिकृष्टा श्रमणीनामित्यनन्तरसूत्रद्वयेऽभहितमेव तच्चाकर्ण्य माप्राभृतमप्येवं भवतीति मन्येतेत्यधिकृत सूत्रस्यारम्भः । अस्य व्याख्या-न कल्पते निर्ग्रन्थानां व्यतिकृष्टानि प्राभृतानि कलहानित्यर्थः । वितोषयितुमुपशमयितं किन्तु यत्रोत्पन्नं तत्रोपशमयितुं कल्पते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२९७६] सेज्ञासनातिरित्ते हत्थादीघट्टभाणभेदेय ।
वंदंतमवंदंते उप्पज्जइ पाहुडं एवं ।।

वृ- शय्यासनातिरिक्ते किमुक्तं भवति ? अतिरिक्तां शय्या मतिरिक्तानि वसनानि परिग्रहे कुर्वति वार्यमाणे यदि वा हस्तादि हस्तपादादिकं पादेन संघट्याक्रम्या क्षमयित्वा व्रजति, यद्वा कथमप्यनुपयोगतो भाजनभेदे अथवा पूर्वं वन्दमाने पश्चाद्वन्दने प्राभृतं नाम कलहस्तदेवमुत्पद्यते ।

[भा.२९७७] अहिगरणस्सुप्पत्ती जा वुत्ता परिहारियकुलंमि ।
सम्ममनाउट्टंते अधिकरणतउ समुप्पज्जे ।।

वृ- उत्पत्तिसंभवे सत्यां ततः सम्यगनावर्तमाने अधिकरणं समुत्पद्यते ।

[भा.२९७८] अहिगरणे उप्पन्ने अवितोसवियम्मि निग्गयं समणं ।
जे साइज्जइ संभुज्जए व मासा चत्तारि भारीया ।।

वृ- अधिकरणे उत्पन्ने सति येन सहाधिकरणमुदपादि, तस्मिन्नतोपिते निर्गतं श्रमणं य आसादयति प्रतिगृह्णाति स्वसत्तामात्रेण य च तेन सह भुङ्क्ते तस्य प्रायश्चित्तं चत्वारो भारिका गुरवः;

[भा.२९७९] सगणं परगणं वा विसंकंतमवितोसिते ।
छेदादि वणियासोहि नाणत्तं तु इमं भवे ।।

वृ- येन सहाधिकरणमुपजातं तस्मिन्नवितोषिते स्वगणं परगणं वा संक्रान्तमधिकृत्य या च्छेदादिका शोधिः पूर्वं कल्पाध्ययने वर्णिता, साऽत्रापि तथैव वक्तव्या । नवरमत्र यन्नानात्वं तदिदं वक्ष्यमाणं भवति-

[भा.२९८०] मादेह ठाणमेयस्स पेसवे जइउ गुरुचउ ।
गुरु ततो तस्स कहं तेवि य चउलहू ।।

वृ- अन्यत्र गतस्य यद्याचार्यः साधुसंघाटं सन्देशं वा प्रेषयन्ति यथैषोऽधिकरणं कृत्वा समागतो वर्तते, तस्मादेतस्य स्थानं मादेया इति, तदा तस्य प्रायश्चित्तं चतुर्गुरु । ततः प्रेषणानन्तरं यस्य पार्श्वे सोऽन्यत्रगतस्तस्य स प्रेषितो यदि कथयति तदा तस्मिन्नपि प्रायश्चित्तं चतुर्लघु यतस्तत्रेमे दोषाः ।

[भा.२९८१] उहाणं वा वि वेहासं पदोसा जं तु काहिती ।
मूलं उहावले होइ वेहासे चरमं भवे ।।

वृ- यत् यस्मात् प्रेषणे कथने वा स द्वेषादवधावनं करिष्यति । वेहायसं वा वैहायसनं नामोत्कलम्बनं तत्रावधावने तेन कृते सति प्रेषयितुः कथयितुर्वा मूलं प्रायश्चित्तं, । वैहायसे पाराञ्चितं । अन्यच्च-

[भा.२९८२] तत्थनत्थवासं नादेंति मे न विय नंदमाणेणं ।
नंदंति ते खलु मए इति कलुसप्पा करे पावं ।।

वृ- मे मम तत्रात्मीयसमीपे अन्यत्रैवेहागतस्य जन्मान्तरवैराद्वासं न ददति । नापि च मयि नन्दति ते नन्दन्ति, महाप्रद्वेषतोऽसुखभावात्ततो न जन्मान्तरवैरिणस्ते मम पृष्टं मुञ्चन्तीति कलुषात्मा पापं कुर्यात् किं तदित्याह-

[भा.२९८३] आलीवेज्जववसहिं गुरुणो अन्नस्स घायमरणं वा ।
कंडत्थारिउसहितो सयं च उरस्स बलवं तु ।।

वृ- कंडच्छारिउ नाम ग्रामो ग्रामाधिपतिर्देशो देशाधिपतिर्वा लूषका वा सहायास्तेन सहितः स्वयं वा उरस बलवान् वसति मादीपयेत् । गुरोरन्यस्य वा घातं मरणं वा कुर्यात् किं तदित्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.२९८४] जइ भासइ गणमज्झे अवप्पयोगा तत्थगंतूणा ।
अवितोसविएसा गतोत्ति ते चेव ते दोसा ।।

वृ- यः प्रेषितो यद्वा अव प्रयोगात् अन्येन कार्येण तत्र गत्वा गणमध्ये सकलगणसमक्षं यदि भाषते यथा एषोऽधिकरणं कृत्वा येन सहाधिकरणमभूत्तस्मिन्नतोषितेऽत्रागत इति ते इति तस्यापि त एव प्रागुक्ता दोषाः ।

[भा.२९८५] जम्हा एए दोसा अविही पेसणे य कहणे य ।
तम्हा इमेण विहिणा पेसणकहणं तु कायव्वं ।।

वृ- यस्मादविधिना प्रेषणे कथने च एते अनन्तरोदिता दोषास्तस्मादनेन वक्ष्यमाणेन विधिना प्रेषणं कथने तु कर्त्तव्यम् । तमेव विधिमाह-

[भा.२९८६] गणिणो अत्थि निब्भेयं रहितो किच्चपेसितो ।
गमेति तं रहे चेव नेच्छे सहासहं खु त्तो ।।

वृ- अन्येन प्रयोजनेन प्रेषितः स तु रहिते विविक्ते प्रदेशेऽथ निर्भेदं तदधिकरणरहस्यं गणिन आचार्यस्य गमयति कथयति क्रमेणाचार्यस्तं कृताधिकरणं रहस्येव गमयति । यथा त्वमित्थमधिकरणं कृत्वाऽत्र समागतो न च स उपशमित इति एवमुक्ते यदि स नेच्छेत् । तथाहं नाधिकरणं कृत्वा समागतो यस्त्विदं ब्रूते तेन सहाहं थ्रु[ब्रु] वे पु[खु] निश्रितमिति ।

[भा.२९८७] गुरुसमक्खं गमितो तहावि जइ नेच्छइ ।
ताहे गणमज्झंमि भासते नातिनिठुरं ।।

वृ- एवं तस्यानिच्छायां स प्रयोजनान्तरव्याजेन प्रेषितो रहसि गुरुसमक्षमधिकरणं गमयति, तथा कथञ्चनापि तच्चित्तमनुप्रविश्य कथयति यथारोपं न विदधाति, तथा गमितोऽपि यदि नेच्छति । ततः प्रहरदिवसाद्यतिक्रमेण प्रस्तावान्तरमारचय्या गणमध्ये तं भाषते, परं नातिनिष्ठुरं, कथं तं भाषते इत्याह-

[भा.२९८८] गणस्स गनिनो चेव तुमंसी मग्गतं तया ।
अद्धिती महती आसि सोविपक्खो य तज्जितो ।।

वृ- तदा तस्मिन् काले त्वयि अधिकरणं कृत्वा निर्गते समस्तस्यापि गणस्य गणिनश्चाचार्यस्य महती अधृतिः आसीत्, येन च सह तवाधिकरणमभूत्, सोऽपि विपक्षो गणिना गणेन च तर्जितः ।

[भा.२९८९] गणेन गणिना चेव सारिज्जत मज्झंपिए ।
ताहे अन्नावदेसेण विविगो से विहिज्जइ ।।

वृ- एवमुक्तानन्तरं तत्रत्येन गणिना च सम्यक् सारणीयः शिक्षणीयो येन स्वदोषं प्रतिपद्य तत्र गत्वा विपक्षं क्षमयति, । अथ स तथा सार्यमाणो झंपितो नोपशमन्नीतो दुःस्वभावत्वात्ततोऽन्यापदेशेन स तस्य विवेकः परित्यागो विधीयते, केनापदेशेनेत्याह-

[भा.२९९०] महाजनो इमो अम्हं खेतंपि न पहुप्पति ।
वसही सन्निरुद्धा वा वत्थपत्तावि नत्थि नो ।।

वृ- अयं साधुसाध्वीलक्षणो महान् जनोऽस्माकमेतावतां स चैतत् क्षेत्रं न प्रभवति संकीर्णत्वात्, यदि वा वसतिः संनिरुद्धा संकटा वर्तते, तत एतावन्तः साधवोऽत्र न नान्ति । अथवा वस्त्रपात्राण्यस्माकं सम्प्रति न सन्ति, अपि शब्दान्न चात्र तथाविधपाठोऽप्यस्ति, साधवोऽप्येतेतीवासहनास्तस्मात् यूयमन्यत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्वापि गच्छत, यदि पुनः स सार्यमाण उपशममधिगच्छति । स च वक्ष्यमाणेन विधिनोपशमयितव्यस्तत्र प्रथमतोऽधिकरणोपशमनस्थानमाह-

[भा.२९९१] सगणिच्चपरगणिच्चेण समुणुनेयरेण वा ।
रहस्साविव उप्पन्नं जं जहिं तं तहिंक्खवे ।।

वृ- स्वगणसक्तेन परगणसक्तेन वा तेनापि समनोज्ञेन संभोगिकेनेतरेण वा सह रहसि वा आदिशब्दात् अरहसि वा यत् यत्राधिकरणमुत्पन्नं तत्तत्र क्षपयेत् उपशमयेत्, । तत्रोपशमनविधिमाह-

[भा. २९९२] एक्को व दोव निग्गय उप्पनं जत्थ तत्थ वोसमणं ।
गामे गच्छे दुवे गच्छा कुलगणसंघेय बिईयपयं ।।

वृ- एको वा द्वौ वा वाशब्दा त्त्रयो वा चत्वारो वा येऽधिकरणं कृत्वा निर्गतास्ते यत्र ग्रामे वाऽधिकरणमुत्पन्नं, तत्रानीयन्ते, ।आनीय च यैः सहाधिकरणमभूतैः सह व्युपशमनं क्षामणं कार्यते, । तत्पुनरधिकरणमेकस्मिन् गच्छे यदि वा द्वयोर्गच्छयोरथवा कुले यदि वा गणे यदि वा संघे समुत्पन्नं स्यात्, बिइयपदमिति अत्रापि द्वितीयपदमपवादपदं, ततो वक्ष्यमाणकारणैर्विप्रकृष्टमपि प्राभृतं वितोषयेत्तच्च वितोषणामग्रे भावयिष्यते । साम्प्रतमधिकरणमुत्पन्नं यथोपशमयितव्यं तथा चाह -

[भा.२९९३] तं जित्तिएहिं दिटंतेत्ति यमित्ताणमेलणं काउं ।
गिहियाण व साहूण व पुरतोच्चिय दोवि खामंति ।।

वृ- तत् अधिकरणमुत्पन्नं यावद्भिर्गृहस्थैः संयतैर्वा दृष्टं, तावन्मात्राणां गृहस्थानां साधूनां वा मीलनं कृत्वा तेषां पुरतो द्वावपि परस्परं क्षमयतः कुलादिसमवाये यद्युत्पन्नं ततः कुलादिसमवायं कृत्वा क्षमयतः किं कारणं यावन्मात्रैर्गृहिभिः संयतैर्वा दृष्टं तावतां मीलनं कृत्वा परस्परं क्षमयतस्तत्राह-

[भा.२९९४] नवनीयतुल्लहियया साहू एवं गिहिणो उ नाहेंति ।
न य दंडभया साहू काहिंति तत्थ वोसमणं ।।

वृ- नवनीततुल्यहृदयाः साधव एवं गृहिणस्तुशब्दादभिनव शैक्षादयश्चज्ञास्यन्ति न च दंडभयात् साधवस्तत्राधिकरणे समुत्पन्ने व्युपशमनं करिष्यन्ति किंतु कर्मक्षपणाय एवं च ज्ञास्यन्ति; एवं रुपा च प्रतिपत्तिः शुभोदयपरंपराहेतुरतस्तावतां मीलनं कृत्वा परस्परं तौ क्षमयतः । सम्प्रति यदुक्तं बिइयपयम्।

[भा.२९९५] बिइयपदे वितिगिठे वितोसवेज्ञा उवट्ठिते बहुसो ।
बिइतो जइ न उवसमे गतो य सो अन्नदेसेसु [संतु] ।।

वृ- द्वितीयपदे व्यतिकृष्टान्यपि प्राभृतानि वितोषयेत् उपशमयेत्कथमित्याह-येन सहाधिकरणं बहुशो बहून् वारान् कृतं, तस्योपस्थितस्तं क्षमयति, स च क्षाम्यमाणो द्वितीयो नोपशाम्यति अनुपशाम्यति अनुपशान्तश्च स गतोऽन्यं देशम् ।

[भा.२९९६] कालेन व उवसंतो वज्जिजंतो अन्नमन्नेहिं ।
खीरदिसलद्धीणव देवयगेलन्नपुट्ठो वा ।।

वृ- तस्यान्यं देशं गतस्य बहुना कालेनागतेन तस्य कषायाः प्रतनवोऽभवन् तत उपशान्तः तथा अन्योऽन्यैः साधुभिकृताधिकरण एष इति स्थाने स्थाने विवर्जमान एवं स्वचेतसि संकथयति, यथा कषायदोषेणाहं स्थाने स्थाने विवर्जे, तस्मादलं कषायैरिति पुनरावृत्तिरथवा क्षीरादिसलब्धीनां क्षीराश्रवादिलब्धीनामुपदेशतः शममुपगतवान्, देवतया शिक्षितो यदि वा ग्लानत्वेन स्पृष्टस्ततश्चिन्तयति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि कथमपि साधिकरणो म्रियेऽहं ततो नाराधको भवामि, । तस्मात्तं गत्वोपशामयामि एवं जातपुनरावृत्तिना यत्कर्तव्यं तदाह-

[भा.२९९७] गंतुं खामेयव्वो अहवा न गच्छेज्जमेहिं दोसेहिं ।
नीयल्लग उवसग्गो, तहियं तस्स होज्जत्त ।।

वृ- तेन जातपुनरावृत्तिना यत्रोत्पन्नमधिकरणं तत्र गत्वा शमयितव्योऽथवा एतैर्वक्ष्यमाणैर्दोषैस्तत्र न गच्छेत् यत्रोत्पन्नमधिकरणं, कैर्दोषैरित्यत आह-निजकाः स्वजनास्तस्य तत्र विद्यन्ते, ततस्तत्र गतस्य तैरुपसर्गः क्रियते । तथा-

[भा.२९९८] सो गामो उठिओ हुज्जा अंतरा यावि जनवतो ।
निण्हगमनं गतो वा न तरइहवावि पडिचरती ।।

वृ- यत्र ग्रामेऽधिकरणमुत्पन्नं स ग्रामउत्थित उद्धसीभूतोऽथवा अन्तरा जनपदउत्थितो यदि वा येन सममधिकरणमजायत, स निण्हवगणं प्रविष्टवान् । अन्यत्र गत इतरो वा ग्लानो जातस्ततो गन्तुं न शक्नोति, अथवा ग्लानं प्रतिचरति;

[भा.२९९९] अब्भुज्जयं च पडिवज्जे भिक्खादि अलंभो अंतर तहिं वा ।
रायदुठं उमं असिवं वा अंतरतहिं वा ।।

वृ- अथ वा सोऽधिकृतः क्षमयितुमना अभ्युद्यतं विहारं प्रतिपत्तुकामो लग्नं प्रत्यासन्नं ततो गन्तुं न शक्नोति, । अथवान्तरा अपान्तराले तत्र वा यत्राधिकरणमुत्पन्नं भिक्षाया अलाभो, यदि वान्तरा तत्र वा राजद्विष्टमवमौदर्यमशिवं वा ।

[भा.३०००] सबरपुलिंदादिभयं अंतरतहियं च अहव हुज्जहि ।
एएण कारणेणं वच्चंतं कंपि अप्पाहे ।।

वृ- अन्तरा तत्र वा शबरभयं पुलिन्द्रभयमादिशब्दात् स्तेनम्लेच्छादिभयपरिग्रहो अथवा भवेत्, तत एतैः कारणैस्तत्र गन्तुमशक्नुवन् यः कोऽप्यन्यः श्रावको वा सिद्धपुत्रो वा मिथ्यादृष्टिर्वा तत्र भद्रको व्रजति तं सन्देशयति यथाहमधुनोपशान्तः । एतैश्च कारणैरागन्तुमशक्तस्तस्मात्त्वमत्रागत्य मया सह क्षमणं कुरु । ततः सन्देशे कथिते तेन यत्कर्तव्यं तदाह-

[भा.३००१] गंतूण सोवि तहियं सपक्खपरपक्खमेव मेलित्ता ।
खामेइ सोवि कज्जं व दीवए नागतो जेन ।।

वृ- यस्य सन्देशः कथापितः स तत्र गत्वा यैस्तदधकरणं ज्ञातं समस्तस्वपक्षं परपक्षं च मेलयित्वा तं क्षमयति, । सोऽपि च क्षम्यमाणो येन कारणेन नागतस्तत्कारणं तस्य साक्षाद्दीपयति कथयति ।

[भा.३००२] अह नत्थि कोइ वच्चंतो ताहे उवसमति अप्पणा ।
खामेइ जत्थणं मिलती अदिठे गुरुणं तियं ।।

वृ- अथ नास्ति कोऽपि तत्र व्रजन् यस्य सन्देशःकथ्यते, तर्हि आत्मना स्वयमुपशाम्यति सर्वथा मनसोऽधिकरणमुपशमपरायणतया स्फेटयति । ततो यत्र मिलति तत्र क्षमयति, । अथ न क्वापि मिलती, ततस्तस्मिन्नदृष्टे गुरुणामन्तिकं गत्वा तं मनसि कृत्य क्षामणं करोति ।

मू. (१७२) *कप्पइ निग्गंथीणं वितिगिठाइ पाहुडातिं वितोसवित्तए ।*

वृ- कल्पते निर्ग्रन्थीनां व्यतिकृष्टानि क्षेत्रविप्रकृष्टानि कलहान् वितोषयितुमुपशमयित्तुमिति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३००३] निग्गंथीणं पाहुडवितोसवियव्व होइ वितिगिठं ।
किह पुन होज्जुप्पणं चेइयघरवंदमाणीणं ।।

[भा.३००४] चेइय थुतीण भणतो उण्हे अन्नातो वाहि अच्छंति ।
परितावियामो धणियं कोइलसद्दाहि तुब्भाहिं ।।

वृ- निर्ग्रन्थीनां प्राभृतं वितोषयितव्यमुपशमयितव्यं भवति, व्यतिकृष्टं क्षेत्रं विकृष्टं शिष्यः प्राह-कथं केन प्रकारेण पुनस्तासामधिकरणमुत्पन्नं स्यात् । सूरिराह-काश्चनार्यिकाश्चैत्यवन्दनाथ चैत्यगृहं गतास्तस्मिंश्च चैत्यगृहे बहिर्मुखमण्डपादिकं न समस्ति । ततः चैत्यगृहमध्यस्थिताश्चैत्यानि वन्दन्ते, । तासां च वन्दमानानां प्रथमस्तुतेरारभ्य अन्याः काचन संयत्यः समागतास्ता श्चमध्येऽवकाशो नास्तीति बहिरुष्णे स्थितास्ततो विस्तरणैः चैत्यस्तुतीनां भणने ता बहिः स्थिता उष्णेन परिताप्यमाना वदन्ति । युष्माभिः कोकिलाशद्वाभिर्धणियमतिशयेन वयं परितापितास्तथा-

[भा.३००५] नच्चंति नडे नाइं कलंपि कलभाणिणीण तुज्झाणं ।
विप्पगते भवतीणं, जायतं भयं नरवतीतो ।।

वृ- युष्माकं कलभाननानां तु स्वरमनोज्ञाननानां पुरतः कलामपि मनागपि नाटकानि नार्धन्ति । ततो भवतीनां विप्रकृते कारणेन जातं नोऽस्माकं भयं नरपतेर्नुनं नरपतिना यूयं नाटके प्रक्षेपि स्यध्वे ।

[भा.३००६] इति असहणउन्नुयय मज्झत्यातो समंति तत्थे व ।
असुणाम सव्वगण भंडेण व गुरुसिट्ठिमा मेरा ।।

वृ- इत्येकमुपदर्शितेन प्रकारेणासहनाभिर्या उत्तेजिता कोपं ग्राहितानां मध्यस्थाः संयत्यस्तत्रैव शमयन्ति, । न च तास्तत् भण्डनं कस्यापि श्रावितवत्यः । अथ मध्यस्थानां संयतीनामभावतो क्लेवशाद्वा सर्वगणस्य भण्डनमभूत्तर्हि सर्वगणभण्डने स्वस्वगुरुशिष्टं कर्त्तव्यम् । ततस्तावुपशमयतो अथ लज्जातो भयतो वा न स्वस्वगुरोर्निवेदितं, तर्हि तत्रेयं मर्यादा । एतदेवाह-

[भा.३००७] गणहरगणहरगमनं एगायरियस्स दोन्नि वा वग्गा ।
आसन्नागमदूरे य पेसणं तं च बितियपयं ।।

वृ- समस्तस्यापि गणस्य भण्डने जाते आत्मीयस्यात्मीयस्य समीपे गमनमथवा एकस्याचार्यस्य सम्बन्धिनौ तौ द्वावपि संयतीवर्गौ । तत एकस्यं समीपे गच्छतस्ततः स एकस्तौ वा द्वौ गणधरौ तदधिकरणं यत्र चैत्यगृहेऽन्यत्र चोत्पन्नं तत्र द्वावपि वर्गौ नीत्वा उपशमयतोऽथ लज्जादिना स्वस्वगुरोर्न निवेदित-मेकतरश्च पक्षो निर्गतस्तत आह-आसन्नेत्यादि यद्यासन्नं गतोऽपान्तराले च निर्भयं ततः स आनाय्यते । अथ सापायां (यं) तर्हि तासां गणधर आगच्छति आगत्य क्षमणं करोति, । अथ दूरे गताः, तर्हि वृषभाणां प्रेषणं कर्त्तव्यं, ततो वृक्षभाः समेत्य ताः सयंतीः क्षमयन्ति, । अथ द्वितीयपक्षो नोपशान्तस्ततः पु॰रावर्त्तौ जातायां पुर्वोक्तकारणैस्तदेवं प्रागुक्तं द्वितीयं पदमवसातव्यं, । यत्र मिलन्ति तत्रैव क्षमयन्ति, । अमिलने गुरुणामन्तिके इति एतदेवमूलतः सविस्तरं विभावयिषुरिदमाह-

[भा.३००८] चेइयघरन्नेइत्ता जत्थुप्पन्नं च तत्थ विज्झवणं ।
लज्जभयावअसिट्ठे दुवेगतरनिग्गमइमंतु ।।

वृ- स्वस्वगुरुनिवेदने कृते तौ द्वावपि गुरु संयतीवर्गद्वयमपि चैत्यगृहं नीत्वा अथवा यत्रान्यत्रोत्पन्न-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मधिकरणं तत्र नीत्वाधिकरणस्य विध्यापनं कुरुतः । अथ लज्जया भयाद्वा गुरुणामशिष्टमभवत् द्वयोश्च पक्षयोर्मध्ये एकतरस्य पक्षस्य निर्गमस्तत इदं कर्तव्यम् ।

[भा.३००९] आसन्नमाणावाए अनवाहे वा गणहरागम्म ।
जननाय अविक्खामण आणाविज्ञन्नहिं वावि ।।

वृ- यद्यासन्नं निर्भयं च ततस्ता निर्गताः संयत्यः स्वगणेन सह आनाय्यन्ते अथ सापायं ततस्तासां गणधर आगच्छति । ततस्ताः संयत्य आनीता गणधरो वा एक आगतो यत्र जनज्ञातं भण्डनमभूत् तत्रानाप्यन्ते । अन्यत्र वा आनाय्य च परस्परमभिक्षमणं कार्यं । अथ दूरेण गतास्तर्हि वृषभाः समागत्य संयता क्षमयन्ति ।

मू. (१७३) *नोकप्पइ निग्गंथाण वा निग्गंथीण वा वितिगिट्ठे काले सज्झायं उद्दिसित्तए वा करेत्तए वा ।*

[भा.३०१०] वितिगिट्ठं खलुपगयं एगंत्तरितो य होइ उद्देसो ।
अव्वितिगिट्ठविगिट्ठं जह पाहुडमेव नो सुत्तं ।।

वृ- व्यतिकृष्टमिति खलु प्रकृतमनुवर्तमानमस्ति दिग् सूत्रादव्यतिकृष्टे काले उदघाटायां पौरुष्यामित्यर्थः स्वाध्यायमुद्दिष्टुं वा कर्तुं वेति सूत्राक्षरार्थः । सम्प्रति भाष्यविस्तरः-

[भा.३०११] लहुगा य स पक्खंमी गुरुगापरपक्खउद्दिसंतस्स ।
अंगंसुयखंधं वा अज्झकयणुद्देसथुतिमाई ।।

वृ- यदि विकृष्टे उद्घाटा पौरुषीलक्षणे सपत्त उद्दिशति संयतः संयतस्योद्दिशतीत्यर्थः । तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः परपक्ष संयतस्य संयती संयत्याः संयतस्तत्र संयतः संयत्वाः उद्दिशति कारणे वा संयती संयतस्य तदा प्रायश्चित्तं चत्वारो गुरुकाः, । अथ किमुद्दिशत एवं प्रायश्चित्तमत आह-अङ्गं श्रुतस्कन्धमध्ययनमुद्देशं स्तुतिमादिशब्दात् सम्बन्धात्तत्र स्तुतिस्तवयोर्विशेषमभिधित्सुराह-

[भा.३०१२] एगदुगे तिसलोका कतीसु अन्नेसि होइ जा सत्त ।
देविंदथयमादी तेनं तु परं थया होइ ।।

वृ- एक श्लोका द्विश्लोका त्रिश्लोका वा स्तुतिर्भवति, परतश्चतुः श्लोकादिकः स्तवः । अन्येषामाचार्याणां मतेन एक श्लोकादि सप्तश्लोकपर्यन्ता स्तुतिस्ततः परमष्ट श्लोकादिकाः स्तवाः, । यथा देवेन्द्रस्तवादयः । आदिशब्दात्कर्मस्तवादि परिग्रहः । अथ व्यतिकृष्टे काले उद्दिशतः पठतो वा को दोषः ?

[भा.३०१३] अठहा नाणमायारो तत्थकाले य आदिमो ।
अकालज्झाणासोउ नाणायारो विराहितो ।।

वृ- ज्ञानाचारोऽष्टधाऽष्टप्रकारः । काले विनए इत्यादि प्रागुक्तलक्षणस्तेषु वाष्टसु ज्ञानाचारेषु मध्ये काले इत्यादि यो ज्ञानाचारः । स चाकालाध्यायिना ज्ञानाचारो विराधितः न केवलमयं दोषः ।

[भा.३०१४] कालादि उवयारेण विज्ञासिज्ञए विना देइ ।
रंधे वा अवद्धसं साव अनावसतेहिं ।।

वृ- कालाद्युपचारेण विना विद्या न सिध्यति न केवलं न सिध्यति । किन्तु कालादि वैगुण्यलक्षणे रन्ध्रे छिद्र सति साधिकृतविद्याधिष्ठ्यऽन्यावाक्षुद्रदेवता तत्रावसरे अवध्वंसं दधा(दा)ति । एष दृष्टान्तोऽयमुपनयो व्यतिकृष्टे काले सूत्रे उद्दिश्यमानेन पठ्यमानेन वा सूत्रं निर्जरा फलदायितया न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिध्यति, न केवलंन सिध्यति, किन्तु यया देवतया सूत्रमधिष्ठितं, सा कालातिक्रमेण पठनतः क्षाम्यन्ती प्रान्ता वा काचिद्देवता अकाल अकालपठनलक्षणं च्छिद्रं अवाप्यावध्वं संदध्यात् । अथ कथं ज्ञायते सूत्रं देवतयाधिष्ठितमत आह-

[भा.३०१५] स लक्खणमिदं सुत्तं जेण सव्वन्नु भासियं ।
सव्वं च लक्खणोवेयं समहिठंति देवया ।

वृ- इदमधिकृतं सूत्रं सलक्षणं येन कारणेन सर्वज्ञेन भाषितं, सर्वमपि च लक्षणोपेतं वस्तु जगति देवताः समधितिष्ठन्ति, ततो ज्ञायते सूत्रमपि देवताधिष्ठितं । अन्यच्च-

[भा.३०१६] जहा विज्ञा नरिंदस्स जं किंचिदपि भासियं ।
विज्ञा भवति सा चेह देसे काले य सिज्झइ ।।

वृ- यथा विद्या नेन्द्रस्य विद्या चक्रवर्तिनो यत् कश्चिदपि भाषितं विद्या भवति, सा चेह जगति देशे काले वा सिद्ध्यति, न कालाद्युपचारमन्तरेण तथा-

[भा.३०१७] जहा य चक्किणो चक्कं पत्थिवेहिं वि पुज्जइ ।
तया वि किलणं तस्स जत्थ तत्थ न जुज्जति ।।

वृ- यथा वा शद्बो दृष्टान्तान्तरसूचने, चक्रिदृणश्चक्रवर्तिनश्चक्रमाज्ञा पार्थिवैरपि सर्वैः पूज्यते, न चापि तस्य चक्रस्य यत्र तत्र वा कीर्तनं संशब्दनं पुज्यते । उक्तौ दृष्टान्तवुपनयमाह-

[भा.३०१८] तहेहहुगुणोवेया जिनसुत्तीकायवती ।
पुज्जते नय सव्वत्थ ती सज्झायाओ जुज्जती ।।

वृ- तथा तेन प्रकारेण इह जगति वाक् सूत्रीकृता अष्टगुणोपेता वक्ष्यमाणनिर्दोषत्वाद्यष्टगुणसमन्विता सर्वैरपि सुरासुरमनुजैः पूज्यते, न च सर्वतः देशे काले वा तस्याध्याता युज्यते किन्तु यथोक्त एव देशे काले च, । सम्प्रति तानेवाष्टौ गुणानाह-

[भा.३०१९] निद्दोसं सारवंतं च हेउजुत्तमलंकियं ।
उवनीयं सोवयारं च मियं महुरमेव य ।।

वृ- निर्दोषं द्वात्रिंशतापि दोषैर्विनिर्मुक्तं, सारवत् बह्वर्थमधिकृत व्यवहारसूत्रवत्, हेतवोऽन्वयव्यतिरेकलक्षणास्तैर्युक्तम्, अलंकृतमुपमाद्यलंङ्कारोपेतं, उपनीतमुपनयोपसंहतं, सोपचारं, मितं परिमिताक्षरं, मधुरं ललिताक्षरपदाद्यात्मकतया श्रोत्रमनोहारि,

[भा.३०२०] पुव्वह्ले अवरह्ले य अरहा जेन भासई ।
एसावि देसना अंगे जं च पुव्वुत्तकारणं ।।

वृ- येन कारणेन भगवानर्हन् पूर्वाह्लेऽपराह्ले च (भाषते) एषैव भगवतो देशना अङ्गे निबद्धा, तस्मादुद्घाटायां पौरुष्यां न पठनीयं, नाप्युद्देष्टव्यम् । यच्च पूर्वं निशीथाध्ययने उक्तं कारणं तत्रोदाहरणं लक्षणं तस्मादप्यकाले न पठनीयं, नाप्युद्देष्टव्य मितः संध्या [श्रद्धे] काले न पठनीयं । यत आह-

[भा.३०२१] रत्ती दिनानमज्झेसु उभयतो संज्झतो रवि ।
चरंति गुज्झगाकेई तेन तासिं तु नो सुयं ।।

वृ- रात्रिदिनमध्ययोः प्रातः सन्ध्यायां विकालसन्धायां चेत्यर्थः । तथा उभयोरपि सन्ध्ययोर्मध्याह्नसन्ध्यायामर्धरात्रासन्ध्यायां चेत्यर्थः । येन कारणेन केचित् गुह्यका व्यन्तरविशेषाश्चरन्ति परिभ्रमन्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेन कारणेन तासु च चतसृष्वपि सन्ध्यासु न श्रुतमुद्दिश्यते, पठ्यते वा मा भूत् च्छलनादोष इति कृत्वा आह, -यदि सन्ध्यासु गुह्यकाश्चरन्ति ततः कथमावश्यकं सन्ध्यायां क्रियते, तत आह-

[भा.३०२२] जाव होमादि कज्जेसु उभओ संज्झओ सुरा ।
लोगेन भासिया तेन संझावासगदेसणा ।।

वृ- यावत् होमादिकार्येषु उभयोः सन्ध्ययोः सुरा गुह्यका लोकेन भाषितास्तिष्ठंति, तावद्वयमावस्यकं कुर्मस्तेषां तत्र व्यापृतत्वादावश्यकस्यापि च सन्ध्याकृत्यरुपत्वात्तेन सन्ध्यायामावश्यकदेशना ।

[भा.३०२३] एते उ सपक्खं मी दोसा आणादयो समक्खाया ।
परपक्खंमि विराधन दुविधेन विसेण दिठंतो ।।

वृ- एते प्रवचनवेदिनामतीव सिद्धाः सपक्षे उद्देशत आज्ञादयो दोषाः समाख्याताः, । तद्यथा-आज्ञा तीर्थकराणां भग्ना भवति, अनवस्था तं दृष्ट्वा अन्येषामपि तथा करणात् । मिथ्यात्वं तीर्थकराज्ञाभङ्गात्; विराधना द्विविधा-संयमविराधना आत्मविराधना च । तत्र संयमविराधना ज्ञानाचारविराधना दात्मविराधनादेवताच्छलनात्; । परपक्षेऽपि एते दोषाः । केवलं या संयमविराधना सा ज्ञानाचारविघाता-स्मिका, ब्रह्मघातात्मिका च ज्ञातव्या । तत्र द्विविधेन विषेण द्रव्यविषेण भावविषेण च दृष्टान्तः -

[भा.३०२४] दव्वविसं खलु दुविहं सहजं संजोइयं च तं बहुहा ।
एमेवय भावविसं, सचेयणा चेयणं बहुहा ।।

वृ- द्रव्यविषं खुल द्विविधं, तद्यथा-सहजं संयोगिमं च संयोजनं संयोगस्तेन निवृत्तं संयोगिमं भावादिमइतीमप्रत्ययस्त च्च सह संयोगिमं च बहुधा अनेनैव प्रकारेण खलु द्विविधं भावविषयं तद्यथा-सहजं संयोगिमं च । तच्च प्रत्येकं सचेतनमचेतनं च बहुधा बहुप्रकारं ।

[भा.३०२५] सहजं सिंगियमादी संजोइमधयमहुं च समभागं ।
दव्वविसं नेगविहं एत्तो भावंमि वुच्छामि ।।

वृ- सहजं द्रव्यविषं शृङ्गिकादि, । संयोगिमं धृतं मधु च समभागं, । एतच्चैकैकमपि द्रव्यविष मनेकविधं द्रष्टव्यमत ऊर्ध्वभावे भावविषं वक्ष्यामि, । प्रतिज्ञातमेव निर्वाहयति-

[भा.३०२६] पुरिसस्स निसग्गवीसं इत्थी एवं पुमंपि इत्थीए ।
संजोइमो सपक्खो दुण्हवि परपक्ख नेवत्थो ।।

वृ- पुरुषस्य निसर्गविषं स्त्रीनेपथ्योपेता एवं स्त्रिया अपिसहजं विषंपुमान् नेपथ्योपेतः । संयोगिमविषं द्वयोरपि संयतस्य संयत्याश्चेत्यर्थः, । स्वपक्षः परपक्षनेपथ्यः । तद्यथा-संयतस्य पुरुष स्त्रीनेपथ्योपेतो निर्गन्थ्याः स्त्री पुरुषनेपथ्योपेता ।

[भा.३०२७] घाणरसफासतो वा दव्वविसं वा सइति वाएइ ।
सव्वविसयानुसारी भावविसं दुज्जइं असइं ।।

वृ- द्रव्यविषं घ्राणतो रसतः स्पर्शतो वा सकृदेकवारतो अतिपातयति । वा विभाषायां तेऽपि सकृदति-पातवैकल्पिकं भवति । तथाहि-द्रव्यविषं जीवितान्न च्यावयेदिति । भावविषं पुनः सर्वविषयानुसारि पञ्चस्वपीन्द्रियविषयेषु संप्रापकत्वात्तथा दुर्जयमल्पसत्त्वेन जेतुमशक्यत्वान्नियमाच्चास-कृदनेकवारमतिपातयति, विनाशयति । भावविषमूर्च्छितानामनेकमरणभावात् । उपसंहारमाह-

[भा.३०२८] जम्हा एए दोसा तम्हा उ सपक्खसमणसमणीहिं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्देसो कायव्वो, किमत्थ पुन कीर उद्देसो ।।

वृ- यस्माद्विपक्षे एते दोषास्तस्मात् श्रमणश्रमणीभ्यां स्वपक्षे उद्देशः कर्तव्यः, । संयतैः संयतानामुद्देशः कार्यः, संयतीभिः संयतीनामित्यर्थः । ततः प्रागुक्तदोषा न भवन्ति । आह परः-किमत्र पुनः कारणं यदुद्देश क्रियते, अनुद्दिष्टं कस्मान्न पठ्यते । तत्राह-

[भा.३०२९] बहुमानविनयआउ त्तया य उद्देसतो गुणाहुंति ।
पढमाएसो उ सव्वा एतो कुच्छं करणकालं ।।

वृ- उद्देशे हि क्रियमाणे श्रुतस्य श्रुताधारस्य वा ध्यापकस्योपरि बहुमानमान्तरप्रीतिविशेषो भवति, विनयश्च प्रयुक्तः स्यादायुक्तता च महती भवति, । एते उद्देशतो गुणा भवन्ति, । एष सर्वोऽप्यङ्गादिविषयउद्देशः प्रथमोद्देशः, । अत ऊर्ध्वं तु स्वाध्यायकरणकालं वक्ष्ये प्रतिज्ञातमेव निर्वाहयति-

[भा.३०३०] थयथुइ धम्मक्खाणं पुव्वद्दिठं तु होइ संज्झाए ।
कालिय काले इयरं पुव्वुद्दिठं विगिठेवि ।।

वृ- स्तवः स्तुतिधर्माख्यानं वा पूर्वोद्दिष्टं सन्ध्यायामपि पढनीयं भवति, कालिकं पुनः श्रुतं प्रथमायां पौरुष्यामुद्दिष्टं काले प्रथमपौरुषी लक्षणे चरमपौरुषीलक्षणे च पठ्यते नाकाले, इतरं (इतरत्) उत्कालिकं प्रथमायां पौरुष्यामुद्दिष्टः व्यतिकृष्टेऽपि काले सन्धायाममस्वाध्यायिकं च वर्जयित्वा पठ्यते ।

[भा.३०३१] पत्ताणसमुद्देसो अंगसुयक्खंध पुव्वसूरंनि ।
इच्छानिसीहमादी सेसादिनपच्छिमादीसु ।।

वृ- अध्ययनमुद्देशं वा पठन्तो यदैव श्रवणं प्राप्ता भवन्ति, तदैव तस्या ध्ययनस्योद्देशस्य वा समुद्देशः क्रियते, अंगं श्रुतस्कन्धो वा पूर्वसूरे उद्घाटायामपि पौरुष्यामनुज्ञायते, येषामागाढा योगास्तेषां निशीथादीनामिच्छा प्रथमायां चरमायां वा पौरुष्यां तेषामनुज्ञा प्रवर्तते इति, शेषाण्यध्ययनान्युद्देशका वा दिवसस्य पश्चिमायां पौरुष्यामादिशब्दात् रात्रेः प्रथमायां चरमायां वानुज्ञायन्ते, ।

[भा.३०३२] दिवस्स पच्छिमाए निसिं तु पढमाए पच्छिमाए वा ।
उद्देसज्झयणुन्ना न य रत्ति निसीहमादीणं ।।

वृ- उद्देशानामध्ययनानां चानुज्ञा दिवसस्य पश्चिमायां, निशि तु प्रथमायां पश्चिमायां वा प्रवर्तते, निशि तु प्रथमायां पश्चिमायां वा प्रवर्तते, निशीथादिनामागाढयोगानां दिवसस्य प्रथमायां चरमायां वा पौरुष्यामनुज्ञातं न तु रात्रौ । अत्रैवादिशब्दस्याधिकार्थसंसूचकत्वमुपदर्शयति-

[भा.३०३३] आदिग्गहणादसकालिय मुत्तरज्झायण चुल्लसुयमादी ।
एएसि भइयणुन्ना । पुव्वण्हे आवि य अवरण्हे ।।

वृ- आदिग्रहणादादिशब्दोपादानात् यानि दशवैकालिकोत्तराध्ययनक्षुल्लककल्पश्रुतादीनि । अत्र आदिशब्दादौपपातिकादिपरिग्रहः । एतेषामनुज्ञा भजिता विकल्पिता पूर्वाह्ले वा स्यादपराह्ले वा ।

[भा.३०३४] नंदीभासणचुन्नो य विभासा होइ अंगसुयक्खंधे ।
मंगलसद्धाजननं अज्झयणाणं च वुच्छेदो ।।

वृ- अङ्गे श्रुतस्कन्धे च भवति अनुज्ञायां कर्त्तव्यायां नन्दिभाषणं ज्ञानपञ्चकोच्चारणं, चूर्णेच विभाषा यदि भवन्ति वासाः शिरसि प्रक्षिप्यन्ते, । तदभावे केसराण्यपि, कस्मादेवमनुज्ञा क्रियते इति चेदत आह-नन्दीभाषणे वासनिक्षेपे च मंगलं भवति, ज्ञानपञ्चकस्यभावमङ्गलत्वाद्वासनिक्षिपस्य च द्रव्य-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मंगलत्वात्तथाहि अन्येषां परमश्रद्धाजननं, यथैकोऽमुकस्याङ्गस्यश्रुतस्कन्धस्य च पारगत आचार्येण चैवं सकलजनसमक्षं पूजितस्तस्माद्वयमपि गाढतरमुत्साहं कुर्म इति, तथा अध्ययनानां वा व्यवच्छेदोऽन्यथा नानुज्ञातमन्येषां दीयते इति तेषां व्यवच्छेदः स्यात् । अत्रैवापवादमाह-

[भा.३०३५] बिइयपयं आयरिए अंगसुयक्खंधमुद्दिसंतंमि ।
मंगलसद्धाभयगोरवे य तह निठिए चेव ।।

वृ- सपक्षे उद्देशः कर्तव्यो न परपक्षे इत्युत्सर्गः । अत्र द्वितीयपदमपवादपदं यदि प्रवर्तिन्यास्तत् श्रुतं न विद्यते तत आचार्यः परपक्षेऽपि संयतीरुपे अङ्गश्रुतस्कन्धं वा उपलक्षणमेतदध्ययनादिकं चोद्दिशति । अथवा सत्यपि तस्मिन् प्रवर्तिन्याः श्रुते आचार्ये संयत्वा अङ्गं श्रुतस्कन्धं वा उद्दिशति मङ्गलादीनि भवन्ति ततः स एवोद्दिशति । स परमं ज्ञानपात्रामिति मङ्गलबुद्धिरुपजायते तथा यस्मादाचार्येणोद्दिष्टमिदमत आदरेण पठनीयमिति तत्पाठविषया महती श्रद्धा भवति । तथा यदि पाठे प्रमादं करिष्यामि ततो न पठितमित्याचार्यारुष्येयुरिति भयं तथा ममेदमाचार्येण गौरवेणोद्दिष्टं तस्मादादरेण पठित्वा शीघ्रं समाप्तिं नयामि । तह निट्ठिए चेवात्ति तदा निष्ठिते अङ्गे श्रुतस्कन्धे वा समाप्तिं नीते यथासंभवमेतैरेव कारणैरङ्गं श्रुतस्कन्धं वाचार्योऽनुजानीयात् ।

[भा.३०३६] एमेव संयतीवा उद्दिसंती संजयाण बिइयपदे ।
असतीए संजयाणं अज्झयणाणं च वोच्छेदो ।।

वृ- तत् विवक्षितं श्रुतं संयतानां न विद्यते अध्ययनानां चान्यथा व्यवच्छेदः स्यात् ततो द्वितीयपदेनाऽपवादपदेन गाथायां सप्तमी तृतीयार्थे संयत्यपि संयतानामुद्दिशति ।

[भा.३०३७] एवं ता उद्देसो अज्झाओवी न कप्पइ विगिट्ठे ।
दोण्हंपि हुंति लहुगा विराधनासेव पुव्वुत्ता ।।

वृ- एवमुक्तेन प्रकारेण तावदुद्देशोऽभिहितो यथा व्यतिकृष्टे काले स न क्रियते अध्यायोऽप्यध्येयमात्मविराधना च । तत्र ज्ञानविराधना ज्ञानाचारहननादात्मविराधनाप्रान्तदेवताच्छलनात् ।

[भा.३०३८] बितियविगिठे सागारियाए कालगय असतिवुच्छेदो ।
एवं कप्पइ तहियं किं ते दोसा न संतीओ ।।

वृ- कदाचित्साधवः कारणेन सागारिकायां वसतौ स्थितास्तत्र परिचारणाशब्दं श्रुत्वा यस्य यत्पराजितं स तत्परावर्तयति । आदि शब्दात् स्तेनकादिष्वपि समापतत्सु यस्य यत्पराजितं स तत् गुणयति परिग्रहस्तथा कालगतः संयतो यदि कारणेन प्रतीक्षापयितव्यो भवति । तदा रात्रौ जागरणनिमित्तं यस्य यत्पराजितं स तत्परावर्तयति । तथा यस्य सकाशे तत् श्रुतमधीतं कालगतोऽन्यत्र च तत् श्रुतं नास्ति । ततः सम्प्रति पठितं माविस्मृतिं यायात् अनुपेक्षायां च सोऽकुशलस्तत एवमेतैः कारणै र्द्वितीयपदमधिकृत्य व्यतिकृष्टेऽपि कालेऽध्यायः कल्पते । अत्र पर आह-तत्रापवादपदेन व्यतिकृष्टेऽपि काले पठति किं ते दोषाः आज्ञाभङ्गादयो न सन्ति न भवन्ति । अत्रोत्तरमाह-

[भा.३०३९] भणइ जेणजिनेहिं अनुणायाइ कारणे ताइं ।
तो दोसो न संजायइ जयणाए तहिं करेंतस्स ।।

वृ- भण्यतेऽत्रोत्तरं दीयते-येन कारणेन जिनैः कारणे सागारिकादिलक्षणे तानि पठनान्यनुज्ञातानि तस्मात्कारणात् रहस्य श्रुतस्यापि च यतनया वक्ष्यमाण लक्षणया । तत्र सागारिकवसत्यादौ पाठं कुर्वतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोष आज्ञाभङ्गादिलक्षणो न संजायते । तत्र यतनामाह-

[भा.२०४०] कालगयं मुत्तूण इमो अनुप्पेहदुव्वले जयणा ।
अन्नवसहिं अगीते असतीतत्थेवणुच्चेणं ।।

वृ- कालगतं मुक्त्वा शेषेषु कारणेष्वनुप्रेक्षादुर्बले इयं चवक्ष्यमाणयतना अन्यस्यां वसतौ गत्वा रहस्यश्रुतं परावर्तयन्ति । मा अगीते अगीतार्थस्य श्रुतश्रुवणं भूयादिति हेतोरन्यथान्य उपाश्रयो न विद्यते ततोऽन्यस्या वसतेरभावे तत्रैव तस्यामेव वसतावनुच्चेन शब्देन परावर्तयन्ति । कालगतेऽपि वसत्यन्तरे न यान्ति किन्तु तत्रैव जागरणनिमित्तं अनुच्चशब्देन गुणयन्ति संयत्योऽप्यपवादपदेन संयतानां समीपे पठेयुः परावर्तयेयुर्वा न कश्चिद्दोषः

मू. (१७४) *कप्पति निग्गंथीणं वितिगिट्ठे काले सज्झायं करेत्तए निग्गंथनिस्साए ।।*

वृ- कल्पते निर्ग्रन्थीनां निर्ग्रन्थनिश्रया व्यतिकृष्टेऽपि काले स्वाध्यायं कर्तुमिति सूत्रार्थः । अधुना भाष्यप्रपञ्चः । तत्र प्रथमतः पूर्वपक्षस्वावकाशं दर्शयति-

[भा.२०४१] कप्पइ जइ निस्साए वितिगिट्ठे संजतीण सज्झाओ ।
इति सुत्तेणुद्दारे कयंमि उ कमागतं भणइ ।।

वृ- कल्पते यति निश्रया व्यतिकृष्टे काले संयतीनां स्वाध्याय इति सूत्रेण द्वारे कृते परः क्रमागतं परिपाट्यागतमिदं भणति किं तदित्याह-

[भा.२०४२] पुव्वं वन्नेऊणं संजोगविसं च जायरुवं च ।
आरोवणं च गुरुइं न हु लब्भावायणं दाउं ।।

वृ- पूर्वसंयोगविषयजातरुपं च विषं सहजविषं चेत्यर्थः । आरोपणं प्रायश्चित्तं चतुर्थी (गुरुकं) वर्णयित्वा यत्सम्प्रति वाचनां ददत अन्तर्भूतण्यर्थत्वाद्दापयत तां दापयितुं न हुनैव लभ्यं । एवं परेण पूर्वपक्षे कृते सूरिराह-

[भा.२०४३] कारणियं खलु सुत्तं असति पवायंतीयाए वाएज्ञा ।
पाढेण विना तासिं हानी चरणस्स हुज्ञाहि ।।

वृ- इदं खलु सूत्रं कारणिकं कारणेन निवृत्तं । तदेव कारणमाह-असत्यभावे प्रवाचयन्त्याः प्रवर्तिन्या वाचयेत् संयतीरन्यथा पाठेन विना तासां चरणस्य हानिर्भवेत् । यदि भवति ततः को दोष इत्यत आह-

[भा.२०४४] जातो पव्वइयातो सग्गं मुक्खं च मग्गमानीतो ।
जइ नत्थि नाणचरणं दिक्खाहु निरत्थिगा तासिं ।।

वृ- याः स्वर्गं मोक्षं च मृगयमाणाः प्रव्राजितास्तासां यदि ज्ञानं चरणं च नास्ति ततो हु निश्चितं दीक्षा निरर्थिका, । कथं निरर्थिकेत्यत आह-

[भा.२०४५] सव्वजगुज्ञोयकरं नाणं नाणेण नज्ञए चरणं ।
नाणंभी असंतंमी अज्ञा किह नाहिति विसोहिं ।।

वृ- सर्वस्यापि जगत उद्योतकरं ज्ञानं ज्ञानेन च ज्ञायते चरणं, । ततो ज्ञाने असत्यार्यिका विशोधिं कथं ज्ञास्यन्ति, । नैव ज्ञास्यन्तीति भावः, । ततो विशुद्ध्यभावाच्चरणाभावस्तथा चाह-

[भा.२०४६] नाणंमि असंतंमी चरित्तं वि न विज्ञए ।
चरित्तंमि असंतंमी तित्थे नो स चरित्तया ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ज्ञाने असति प्रागुक्तयुक्तेश्चारित्रमपि न विद्यते, असति चारित्रे सकले तीर्थे नार्यिकाणां स्वचारित्रता ।

[भा.३०४७] अचरित्तयाए तित्थस्स निव्वाणं नाभिगच्छइ ।
असती निव्वाणस्स य दिक्खा होति निरत्थिगा ।।

वृ- संयतीरधिकृत्य तीर्थस्याचारित्रतया संयती निर्वाणं कापि न गच्छति, । निर्वाणस्याभावे दीक्षा निरर्थिका ।

[भा.३०४८] तम्हा इच्छावेई एयासिं नाणदंसणचरित्तं ।
नाण चरणेण काहिति अंतं भवसयाणं ।।

वृ- यतो निर्वाणाभावे दीक्षा निरर्थिका अथ च तासां निर्वाणाय भगवता दीक्षानुज्ञाता तस्मादेतासां दीक्षा बलादपि ज्ञानदर्शनचारित्रं समाहारत्वादेकवचनमिच्छापयति यतो अन्तं विनाशं भवशतानां करिष्यत्यार्यिका, यतो निर्वाणं लभ्यते ज्ञान चरणेन नान्यथा ।

[भा.३०४९] नाणस्स दंसणस्स चारित्तस्स महानुभावस्स ।
तिण्हं पि रक्खणठा दोसविमुक्को पवाएज्ञा ।।

वृ- ज्ञानस्य दर्शनस्य चारित्रस्य च कथंभूतस्यैकैकस्येत्यत आह-महान् अनुभावः प्रभावो यस्य तत्तथा तस्य एतेषां त्रयाणां रक्षणाय दोषविमुक्तो वक्ष्यमाणदोषविप्रमुक्तः प्रवाचयेत् ।

[भा.३०५०] अप्पसत्थेन भावेन वाएतो दोस संभवे ।
केरिसो अप्पसत्थो उ इयो सोइ पवुच्चती ।।

वृ- अप्रशस्तेन भावेन वाचयन् दोषवान् भवति न प्रशस्तेन, । अथ कीदृशः सोऽप्रशस्तो भावः । सूरिराह-सोऽप्रशस्तो भावोऽयं प्रोच्यते, तमेवाह-

[भा.३०५१] परिवारहेउमणठयाए वभिचारठ व हेउं वा ।
आगाराय बहु विहा असंवुडादीउ दोसाउ ।।

वृ- परिवारो मे भूयादिति हेतोरन्नार्थतया वा अन्नं पानं वा ममानीय दास्यतीत्येतदर्थं वा इत्यर्थः । व्यभिचारार्थं वा अन्येषां वा एतद्व्यतिरिक्तानां कार्याणां हेतोरथ आगाराणि गृहाणि बहुविधानि असंवृतादीनि मे सम्पादयिष्यतीत्येतदर्थं यदि वाचयति तदा सोऽप्रशस्तो भाव इति तस्य दोषाः ।

[भा.३०५२] गणिणी कालयाए बहि या य नविज्ञए जया अणा ।
संतावि मंदधम्मा मज्ञायाए पवाएज्ञा ।।

वृ- गणिन्यां प्रवर्तिन्यां कालगतायां तत्रान्यत्रवा बहिर्यदा अन्य प्रवाचिका न विद्यते, । अथास्ति पर सत्यपि सा मन्दधर्मा, ततः साधुर्मर्यादया प्रवाचयति तामेव मर्यादामाह-

[भा.३०५३] आगाढजोगवाहीए कप्पो वावि होज्ञ असमत्तो ।
सुत्ततो अत्थतो वावि कालगया य पवत्तिनी ।।

वृ- आगाढयोगवाहिनी कापि संयती यदि वा कस्याश्चित्संयत्याः प्रकल्पो निशीथाध्ययनं सूत्रतोऽर्थतश्चासमाप्तो भवेत् वर्तते, । अत्रान्तरे च प्रवर्तिनी कालगता ।

[भा.३०५४] अन्नाय सगच्छंमी जइ नत्थि पवाइगा ।
अन्नगच्छा मणुन्नं तु आनयंति ततो तहिं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अन्या स्वगच्छे यदि प्रवाचिका न विद्यते, ततोऽन्यगच्छान्मनोज्ञां सांभोगिकी तत्रार्यिकां वसतावानयन्ति ।

[भा.३०५५] सा तत्थ निम्मवे एक्कं तारिसीए असंभवे ।
उग्गहधरणाकुसलं ताहे य नयंति अन्नत्थ ।।

वृ- सा मनोज्ञा समानीता सती तत्र एकामार्यिका निर्मापयति । अथ तादृशी मनोज्ञा न विद्यते, तत आह-तादृशाभावे ततोऽवग्रहधारणाकुशलामन्यत्रासांभोगिक गच्छान्तरे नयति तत्र संयतीनां संयतानां च परीक्षा कर्तव्या । तथा चाह-

[भा.३०५६] संविग्ग असंविग्गा परिच्छियव्वा य दोविग्गाओ ।
अपारिच्छणंमि गुरुगा परिच्छ इमेहिं ठाणेहिं ।।

वृ- द्वावपि संयतसंयतीरुपौ वर्गौ संविग्नावसंविग्नाविति वा परीक्षितव्यौ यदि साचपरीक्षा एभिर्वक्ष्यमाणैःस्थानैः कर्त्तव्या तानेवाह

[भा.३०५७] वच्चंतितावएंती, भत्तं गेण्हंति तावदेंति ।
कदंप्पतरुणा बउसं, अकालभीयायसच्छंदा ।।

वृ- न परीक्ष्यन्ते ततो द्वयोर्वर्गयोरपरीक्षणे प्रायश्चित्तं चत्वारो गुरुकाः, । सयंताः संयतीनामुपाश्रये निष्कारणं व्रजन्ति, ता अपि वा संयत्यः संयतनामुपाश्रयं निष्कारणमागच्छन्ति, । तथा भक्तं पानं वा संयतानां पार्श्वे संयत्यो यथा कथंचन गृह्णन्ति ता वा संयत्यः संयतानां प्रयच्छन्ति । तथा परस्परं तरुणास्तरुण्यश्च कन्दर्पकथां कथयन्ति, तथा संयताः संयत्यश्च बकुशं भावं बिभ्रति । तथा द्वावपि वर्गाविकाले चरतस्तथा संयता आचार्यस्य न बिभ्यति, । आर्यिकाः प्रवर्तिन्याः, तथा संयताः संयत्यश्च स्वच्छन्दा आत्मन् इच्छयायान्त्यायान्ति वा इत्यर्थः ।

[भा.३०५८] अट्ठमी पक्खिए मोत्तुं वायणाकालमेव य ।
पुव्वुत्ते कारणे वावि गमनं होइ अकारणे ।।

वृ- अष्टमीं पाक्षिकं तथा वाचनाकालं तथा पूर्वोक्ता निग्गम्मंती कारणजाए इत्यादिना ग्रन्थेन यानि कल्पे अभिहितानि तानि मुक्त्वा शेषकालं यद्भवति गमनं, तदकारणं निष्कारणमित्यर्थः । एतेन ता वा संयत्यो निष्कारणमायान्तीति व्याख्यातम् ।

[भा.३०५९] थेरा सामायारिं अज्जा पुच्छंति ता परिकहेंति ।
आलोयणसच्छंदं वेटल गेलन्न पाहुणिया ।।

वृ- स्थविरा आचार्या आत्मीया आर्यिका वास्तव्यानामार्यिकाणां समाचारीं पृच्छन्ति । यथा कीदृशविस्तव्यानामार्यिकाणां सामाचारीति । एवं पृष्टाः सत्यस्ताः परिकिथयन्ति । या यत्र गता सा ततः प्रत्यागता नालोचयति नापि दैवसिकं रात्रिकं पाक्षिकं वातीचारमालोचयन्ति, यथा स्वच्छन्दं वर्तते, नाचार्योपाध्यायप्रवर्तिनीनां च वश्यायत्ता, तथा वेटलानि प्रयुञ्जन्ति न च ग्लानायाः प्रति तर्पयन्ति नापि प्राघूर्णकानां वात्सल्यं बिदधति ।

[भा.३०६०] चित्तलए सविकारा बहुसो उच्छोलणं च कप्पट्ठे ।
थलि घोड वेससाला, जं त व ए काहिय निसज्जा ।।

वृ- तथा चित्रलानि वस्त्राणि परिदधति, तथा सविकारा गता वुल्लापे च विकारसहिताः तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुशोऽनेकप्रकारं मुखनयनकक्षाहस्तपादादीनामुच्छोलनं प्रक्षालनं कुर्वन्ति । तथा कल्पस्थानि-डिम्भरुपाणि रमयन्ति मण्डयन्ति ममीकुर्वन्ति वा तथा स्थल्यो देवद्रोण्यस्तासु भिक्षार्थं व्रजन्ति, । तत्र घोटाडिंगरास्ते निरुद्धा बलादपि गृह्णन्ति स्थल्यां वा समवसृतः प्रत्यासन्ने य उपाश्रयस्तत्र वसन्ति वेश्यागृहाणि वा हिण्डन्ते । तत्पाटके वा वसतौ तिष्ठन्ति, शाला हस्तिशाला अश्वशाला वा तासु हिण्डन्ते तासां वा समीपे उपाश्रये तिष्ठन्ति, । यन्त्राणि इक्षु यन्त्रतैलयंत्रादि गृहाणि तानि हिण्डन्ते, तन्मध्ये वा उपाश्रये वसन्ति तथा व्रजान् गोकुलानि व्रजन्ति, काथिकादिकत्वं वा कुर्वन्ति, गृहनिषद्यां वा बाधन्ते एष द्वारगाथाद्वयसमासार्थः । साम्प्रतमेतदेव विवरिषुः प्रथमत आलोचनाद्वारं सच्छन्दद्वारं चाह-

[भा.३०६१] जा जतो गया सा उ, ना लोए दिवसपक्खियं वा वि ।
सच्छंदातो वयणे, महत्तरियाए न ठायंति ।।

वृ- या यत्र गता सा ततः प्रत्यागता नालोचयति, नापि काचन दैवसिकं पाक्षिकं अपि शब्दात् रात्रिकं वातीचारमालोचयति । तथा स्वच्छन्दाः सर्वा अपि वर्तन्ते न महत्तरिकाया उपलक्षणमेतत् । नाप्याचार्योपाध्याययोर्वचनेन तिष्ठन्ति । अधुना बिंटलादिद्वार चतुष्टयमाह-

[भा.३०६२] विटलानि पजुंजंति, गिलायाणाविन पडितप्पंति ।
आगाढेवा अनागाढं करेंति अनागाढे आगाढं ।।

[भा.३०६३] अजयणाएव कुव्वंती पाहुणगादि अवच्छला ।
चित्तलाणिय नियसंति वित्तायहरणा तहा ।।

वृ- विंटलानि खिटिका चप्पुटिकादीनी प्रयुञ्जते, नापि ग्लानायाः प्रति तर्पयन्ति प्रतिचरन्ति यदि वा आगाढे अनागाढं कुर्वन्ति, अनागाढे वा आगाढमयतनया वा कुर्वन्ति, तथा प्राघूर्णिकायाम-वत्सलास्तथा चित्रलानि विचित्ररेखोपेतानि वस्त्राणिनि वसने परिदधति । चित्राणि वा नानाप्रकाराणि रजोहरणानि धारयन्ति । सम्प्रति सविकारद्वारमाह-

[भा.३०६४] गइविब्भमादिएहिं आगार विगारा तहा पदंसंति ।
जह किढगाणा विमोहो समुदीरति किं तु तरुणाणं ।।

वृ- गतिविभ्रमादिभिराकार विकारास्तथा प्रदर्श्यन्ते, यथा किटकानामपि वृद्धानामपि मोहः समुदीर्यते, । किं पुनस्तरुणानामिति बहुशः । उच्छोलन द्वारं कल्पस्थद्वारं चाह-

[भा.३०६५] बहुसो उच्छोलंती मुहनयने हत्थ पायकक्खादी ।
गेण्हणमंडणरामण भोयतिव ता तो कप्पट्ठे ।।

वृ- ता मुखनयनानि हस्तपदाकक्षादिकं च बहुशोऽनेकवारमुच्छोलयन्ति, प्रक्षालयन्ति, तथा गृहस्थबालकानां ग्रहणं कुर्वन्ति, । मण्डनं वा रामणं वा क्रीडनं यदि वा ताः कल्पस्थान् गृहस्थदारकान् भोजयन्ति, । स्थलीघोटद्वारं वेश्याद्वारं चाह-

[भा.३०६६] थलि घोडादिठाणे वयंति ते वावि तत्थ समुवेंति ।
वेसित्थी संसग्गी उवासतो वा समीवंमि ।।

वृ- स्थली घोटादिस्थाने अत्रादिशब्दस्तेषामेव देवडिंगराणामनेकभेदख्यापनार्थ ता व्रजन्ति, ते वा स्थली घोटादेवडंगरापरपर्यायास्तत्रार्यिकोपाश्रये स्थली समीपे समुपयन्ति गच्छन्ति, तथा वेश्यास्त्रीसंसर्गिः सदैव तासां यदि वा वैश्यागृहसमीपे तासामुपाश्रयः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३०६७] तह चेव हत्थिसाला घोडगसालाण चेव आसन्ने ।
जंति तह जंतसाला काहीयत्तं च कुव्वंति ।।

वृ- तथा चैव हस्तिशालानां घोटकशालानां चासन्ने प्रदेशे हिण्डन्ति यदि वा तासां प्रत्यासन्ने उपाश्रये वसन्ति, । तथा इक्ष्वादियन्त्रशालां गच्छन्ति, तत्समीपे वा वसन्ति, । व्रजद्वारं सुगमत्वान्नविवृतं, काथिकत्वं या कुर्वन्ति । सम्प्रति स्थलीघोटद्वारे दोषमाह-

[भा.३०६८] थलि घोटादिनिरुद्धा पसज्झगहणं करेज्ज तरुणीणं ।
संकाइ होइ तहियं गोयरे किमु पाडिवेसेहिं ।।

वृ- स्थली घोटादयोऽनेकप्रकारा देवडिंगरानिरुद्धाः कृतसन्तस्तरुणीनां प्रसह्य बलात्कारेग ग्रहणं कुर्युस्ततो गोचरेऽपि तत्र गतानां शङ्का भवति, किं पुनस्तैः प्रातिवेश्मिकैः तेषु प्रातिवेश्मिकेषु सुतरां शङ्का; एवं हस्तिशालादिष्वपि दोषविभाषा यथायोगं कर्तव्या । कथिकद्वारमेत्र सविस्तरं गृहनिषद्या-बाधनद्वारं चाह-

[भा.३०६९] सज्झायमुक्कजोगा धम्मकहाविकह पेसणगिहीणं ।
गिहि निसिज्जं च वाहंती संथवं वा करेंति उ ।।

वृ- स्वाध्यायेन मुक्तो योगो व्यापारो यासां ताः स्वाध्यायमुक्तयोगास्तथाभूताः सत्यो गृहीणां धर्मकथानामाख्याने विकथानां च स्त्रीकथादीनां करणे प्रेरणे च नानारुपे गृहिणामुद्युक्तः तथा गृहनिषद्यां बाधन्ते गृहनिषद्यामुपवसन्तीत्यर्थः । संस्तवं वा परिचयं वा गृहस्थैः सह कुर्वन्ति, । उपलक्षणमेतत् । वस्त्राण्यन्नपानं वा गृहस्थानां ताः संयत्यो ददति, । अविरतीश्च मण्डयन्ति, मण्डनोपदेशं वा तासां प्रयच्छन्ति, । मण्डनकानि वा ददतीति ।

[भा.३०७०] एवं तु ताहि सिट्ठे निक्खिवियव्वा उ ता उ कहियं तु ।
दोसु वि संविग्गेसु निखिवियव्वा भवे ताउ ।।

वृ- एवमुक्तेन प्रकारेण ताभिः संयतीभिः शिष्टे कथिते ता क्व निक्षेत्तव्याः । सूरिराह-द्वयोरपि संयत संयतीवर्गयोः संविग्नयोस्ता भवन्ति निक्षेप्तव्याः । अत्र संयतसंयतीवर्गयोः संविग्नासंविग्नभेदतश्चत्वारो भङ्गास्तद्यथा संयताः सीदन्ति संयत्योऽपि सीदन्ति प्रथमो भङ्गः, संयताः सीदन्ति न संयत्यः इति द्वितीयः, संयता न सीदन्ति किन्तु संयत्यः सीदन्ति इति तृतीयः । न संयताः सीदन्ति नापि संयत्य इति चतुर्थः, । तत्र दोसु संविग्नेसु इति चतुर्थो भङ्गो गृहीतः । शेषेषु भङ्गेषु निक्षेपणं प्रतिषिद्धं, । तथा च तत्र प्रायश्चित्त-

[भा.३०७१] संजयसंजतिवग्गे संविग्गेक्केक्के अहव दोसं तु ।
निक्खवणा होंति गुरुगा अहपुनसुद्धे चेमेदोसा ।।

वृ- संयतवर्गे संयतीवर्गे वा एकैकस्मिंन्नसंविग्ने एतेन द्वितीयतृतीयभङ्गौ गृहीतौ, । अथवा द्वयोरपि संयतसंयतीवर्गयोरसंविग्नयोरनेन प्रथम भङ्गो गृहीतः, । निक्षेपणे प्रायश्चित्तं चत्वारो गुरुका भवन्ति, । नवरं तपः कालविशेषता प्रथमभङ्गे द्वाभ्यामपि विशेषिता, । अथ पुनः शुद्धेऽपि चतुर्थे भङ्गे इमे वक्ष्यमाणा दोषास्तर्हि तत्रापि क्षेपणे चत्वारो गुरुकाः, सम्प्रति तानेव दोषानाह-

[भा. ३०७२] तरुणा सिद्धपुत्तादी पविसंति नियल्लगाण निस्साए ।
महयरिय न वारेती, जे वि य पडिसेवे तहिं किं च ।।

वृ- तरुणाः सिद्धपुत्रादयो निजकानामात्मीयानां आर्यिकाणां निश्रयावन्दनव्याजेन प्रविशन्ति, ।

प्रवेशेय च तत्रैव चिरकालमवतिष्ठंते तान्महत्तरिका यदि न निवारयति, येऽपि च तत्र वसतौ काश्चिदार्यिकामात्मीयां। प्रतिसेवन्ते पर्युपासन्ते पर्युपासीनाश्च चिरं कालं तिष्ठन्ति तानपि न निवारयति,

भा. [३०७३] निक्खेवणे तत्थ गुरुगा अह पुन होज्ञा हु सासमुज्ज त्ता।
चरणगुणसुनियमं वियक्खणा सील संपन्ना ।।

वृ- तत्रापि निक्षेपणे प्रायश्चित्तं चत्वारो गुरुकाः, । अथ पुनः सा महत्तरिका चरणगुणेषु नियतं विचक्षणा शीलसम्पन्ना सती समुद्युक्ता अयुक्तं समस्तमपि वारयति तथा-

[भा.३०७४] समासीसपडिच्छीणं चोयणासु अनालसा।
गणिणी गुणसंपन्ना पसज्झा पुरिसाणुगा ।।

वृ- शिष्याणां प्रातीच्छिकानां च समा । तथा चोदनासु शिक्षणासु अनलसा कृतोद्यमा गणिणी महत्तरिका गुण सम्पन्ना तथाऽप्रसह्याऽप्रधृष्यो यः पुरुषस्तदनुगता तदनुसारिणी ।

[भा.३०७५] संविग्गा भीयपरिसा य उग्गदंडाय कारणे ।
सज्झायज्झाणजुत्ता य संगहे य विसारया ।।

वृ- संविग्रा सामाचार्यां सम्यगुद्युक्ता तथा भीता पर्षत् यस्याः सा भीतपर्षत् यतः कारणे उग्रदण्डा स्वाध्यायध्याने युक्ता संग्रहे च विशारदा ।।

[भा.३०७६] विगहा विसोत्तियादीहिं वज्रिया जाय निच्चसो ।
एयग्गुणोववेयाए तीए पासंभि निक्खिवे ।।

वृ- या च नित्यशः सर्वकालं विकथा विश्रोतसिकादिभिरादिशब्दात् ऋद्धिगौरवादिपरिग्रहोपवर्जिता एतद्गुणोपेतायास्तस्याः पार्श्वे निक्षिपेत्-

[भा.३०७७] एयारिसाए असती वाएज्ञाहि ततो सयं ।
वायंते इमा तत्थ विही उ परिकित्तिया ।।

वृ- एतादृश्या गणिन्या अभावे स्वयं वाचयेत्, तस्मिंश्च वाचयत्ययं वक्ष्यमाणो विधिः परिकीर्तितः ।

[भा.३०७८] माया भगिनीधूया मेहावी उज्जुया य आनत्ती ।
एआसिं असईए सेसा वाएज्ञिमा मोत्तुं ।।

वृ- मातरं भगिनीं दुहितरं वा कथं भूतामित्याह-मेधाविनीं प्रज्ञावतीं ऋजुकामकुटिलां आज्ञप्तां यदुपदिश्यते तस्यै तथैव कारिकां वाचयेदिति योग एतासामसत्यभावे शेषा अपि अस्वजना वाचयेत् । इमा वक्ष्यमाणामुक्ता ता एवाह-

[भा.३०७९] तरुणिं भोइय मेहुणियं पुव्वहसिय वभिचारिं ।
एतासु होंति दोसा तम्हा य न वायए तेऊ ।।

वृ- तरुणीं पुराणां पश्चात्कृतव्रतां पुनरभ्युपगतदीक्षां, भोग्यां वेश्यां, मैथुनिकी भार्या ययासह पूर्व सहितमासीत व्यभिचारिणीं पूर्वावस्थां स्वैरिणीं एतासु यस्माद्वाच्यमानासु पूर्वाभ्यासेनात्मपरसमुत्था दोषा भवन्ति तस्मात्तान् न वाचयेत् । अत्रैव विशेषमाह-

[भा.३०८०] वज्रकुड्डसमं चित्तं जइ होज्ञाहि दोण्हवि ।
तहावि संकितो होइ पज्ञातो वाययंत उ ।।

वृ- यद्यपि द्वयोरपि वाच्यवाचकयोश्चित्तं वज्रकुड्यसमं तथाप्येता वाचयन् शंकितः शङ्कागोचरो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवति तत एतासां वर्जनम् ।

[भा.३०८१] पूर्वं तु किंटी असतीए मज्झिमा दोसरहिय वाएति ।
गणहरो अन्नयरो वावि परिणतो तस्स असतीए ।।

वृ- पूर्वं तावत् किण्टी वृद्धां वाचयेत् । तस्यामसत्यां दोषरहितो गणहरो मध्ययां वाचयेत् । अथ गणधरः प्रयोजनान्तरेण व्याकुलस्ततस्तस्य गणधरस्यासत्यभावे परिणतोऽन्यतरो वापि वाचयेत् ।

[भा.३०८२] तरुनीसु सयं वाए दोसन्नयरेण वाविजुत्तेसु ।
विहुणा उ इमेणं तु दव्वादीएण उ जयंतो ।।

वृ- अथान्यतरः परिणतो न विद्यते, किन्तु सर्वेऽपि तरुणाः वृद्धा अन्यतरेण दोषेण सविकारत्वादिना युक्तास्ततस्तरुणेषु शेषेसु वृद्धेसुवान्यतरेण दोषेण युक्तेषु सत्स्वनेन वक्ष्यमाणेन गणधरः स्वयं वाचयेत् । किं विशिष्ट इत्याह-द्रव्यादिना यतमानस्तामेव द्रव्यादियतनामभिधित्सुराह-

[भा.३०८३] दव्वे खेत्ते काले मंडलिदिठी तहा पसंगो य ।
एएसु जयणं वुच्छं, आनुपुव्विं समासतो ।।

वृ- द्रव्ये क्षेत्रे काले मण्डल्यां तथा दृष्टिप्रसङ्गे एव एतेषु स्थानेषु यतनामानुपूर्व्या समासतो वक्ष्ये ।

[भा.३०८४] जं खलु पुलागदव्वं तव्विवरीयं दुवेवि भुंजंति ।
पुव्वुत्ता खलु दोसा तत्थ निरोधे निसग्गे य ।।

वृ- यत् खलु पुलाकमसारं द्रव्यं तद्विपरीतं द्वावपि वाच्या वाचयिता चेत्यर्थः भुञ्जाते अन्यथा तत्र व्याख्यानमंडल्यां सूत्रादि निरोधे निसर्गे वा पूर्वोक्ताः खलु दोषा उक्ता द्रव्ययतना । क्षेत्रयतनामाह-

[भा.३०८५] सुन्नघरे पच्छन्ने उज्जाने देउले सभारामे ।
उभयवसहिं च मोत्तुं वाएज्ज असंकणिज्जेसु ।।

वृ- शून्यगृहाणि प्रच्छन्नानि विविक्तान् प्रदेशिन् तथा उद्घातानि देवकुलानि सभा आरामाश्च तथा उभयवसतिं संयतवसतिं संयतिवसतिं च मुक्त्वा शेषेष्वशङ्कनीयेषु स्थानेषु वाचयेत् ।

[भा.३०८६] उभयनिजे वय नीए वसन्नि यहा भद्द तहय धुवकम्मी ।
आसन्ने सति अज्जाणु वसए अप्पणो वावि ।।

वृ- उभयस्य संयत्याः संयतस्य च निजे स्वस्थाने आसन्ने सति यदि वा प्रतिन्या निजे अथवा संज्ञिनी श्रावके यदि वा यथा भद्रके अथवा ध्रुवकर्मणि लोहकारादौ प्रत्यासन्ने सति वाचयेत् । अथान्यदर्शनीयं स्थानं न विद्यते, ततः अन्यस्य स्थानस्यासति आर्याणामुपाश्रयेऽथवा आत्मन उपाश्रये यत्र शय्यातरस्य संलोको भवति, तत्र स्थितो वाचयति, गतं क्षेत्रद्वारमधुना कालयतनाद्वारमाह-

[भा.३०८७] जइ अत्थि वायणं दिंतो अदाउं ताहे गच्छइ ।
अह नत्थि ताहे दाउण सुत्तअत्थाण पोरिसिं ।।

वृ- यदि साधूनां सूत्रस्यार्थस्य च वाचनां दाता समस्ति तत आचार्यो वाचनां साधूनामदत्वा गच्छति । प्रातरेव साध्वीनामशङ्कनीये स्थाने वाचनां दातुं गच्छतीति भावः । अथार्थ पौरुषी दाता समस्ति, न सूत्र पौरुषी दाता, तदा सूत्रवतां संयतानां सूत्रपौरुषीं दत्वा गच्छति ।

[भा.३०८८] अह अधइत्ता होज्जा हि तो जाइ पढमाए ।
ऊ असतीए दोण्हवी दाने इमाउ जयण तेहिं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथ सूत्रस्य दाता विद्यते नार्थस्य, साधवश्चार्थवन्तोपि अर्थार्थिनोऽपि सन्ति, ततः प्रथमपौरुष्यां संयतीनां वाचना प्रदानाय गच्छति, । द्वितीयस्यां तु पौरुष्या मागत्य संयतानामार्थं ददाति, । अथ संयतानां सूत्रस्य वा प्रदाता अन्यो न विद्यते, तदान्यस्यासत्यभावे द्वयानामपि संयतानां संयतीनां चात्मनउपाश्रये एकस्मिन् तेन वाचना देया । तत्र द्वयानां वाचनादाने इयं वक्ष्यमाणा यतना । अत्र मण्डलीयतनाद्वारसापतितं तदेवाह-

[भा.३०८९] कडिनंतरितो वाए दीसंति जनेन दोविजह वग्गा ।
बंधंति मंडलिं ते उ एक्कतो वावि एक्कतो ।।

वृ- ते संयताः संयत्यश्च मण्डलीं बन्धन्ति, । तद्यथा-एकतः संयतमण्डली एकतः संयतीमण्डली, । अपान्तराले च संयतीनां व्यवधानाय कटो दीयते, । तत्रापि प्रच्छन्ने प्रदेशे स्थिताः संयतीर्न वाचयति, । अन्यथा ये शून्यगृहादिषु वाचयतः शङ्कादयो दोषा उक्तास्तेऽत्रापि स्युस्तत आह-यत्र द्वावपि वर्गौ संयतसंयती समुदायरुपावुपविष्ठौ जनेन दृश्येते, तत्र स्थितःकटेनान्तरितो वाचयति । एवं सति योगुणस्तमाह-

[भा.३०९०] लोगेवि पच्चतो खलु वंदनमादीसु होंति वीसत्था ।
दुग्गूढादी दोसा विगार दोसा य नो एवं ।।

वृ- एवं क्रियमाणे सति लोकेऽपि शुद्धशीलसमाचारविषयः प्रत्यय उपजायते । येऽपि च वन्दनादिषु समागच्छन्ति तेऽपि द्वावपि वर्गौ तथोपविष्टौ दृष्ट्वा विश्वस्ता भवन्ति । एवं च सति ये दुर्गूढादयः प्रच्छन्नप्रदेशादि भाविता दोषाः ये च परस्परं संयतसंयतीनां विकारदोषास्ते न भवन्ति । अथ कटो न विद्यते तदा वस्त्रेण चिलिमिलि क्रियते । तथा चाह-

[भा.३०९१] चिलिमिलि च्छेदे वायइ जह पासइ दोण्हवी पवायंती ।
दिट्ठी संबंधादी इमेय तहियं न वाएज्जा ।।

वृ- प्रवाचयन् गणधरश्चिलिमिल्या उपलक्षणमेतत् कटस्य च च्छेदे पर्यन्ते तिष्ठति, यथा द्वावपि संयतसंयतीवर्गौ (स) पश्यति । तत्र ये संघताः संयतीनां दष्टिर्दृष्ट्यात्मीयया संबध्नन्ति, ते दृष्टिसम्बन्ध उच्यं(च्य)ते । आदिशब्दान्मैथुनकादि परिग्रहस्तानिमान् वक्ष्यमाणान्न वाचयेत् ।

[भा.३०९२] सविकारा मेहुणादी य जे या वि धिइदुब्बला ।
अनेन वायए तेउ निसिं वा पडिपुच्छणं ।।

वृ- ये दृष्ट्या सविकारा ये च मैथुनिकादयो मैथुनिको भर्ता आदि शब्दात्पुराणादि परिग्रहः, ये चापि धृत्या दुर्बलास्तान् अन्येनोपाध्यायादिना वाचयेत्, निशि रात्रौ वा तेषां सन्दिग्धस्थानं प्रतिप्रच्छनं ।।

[भा.३०९३] असयणे पवायंते पढंति सव्वे तेहिं अदोसिल्ला ।
अनिसन्नथेरसहिया थेरसहाओ पवायं तो ।।

वृ- अथान्य उपाध्यायादि प्रवाचयन् न विद्यते तदान्यस्मिन्नसति वाचयति सर्वे तत्र पठन्ति ततऽदोषवन्तस्तत्रापि संयत्यः पठन्त्यनिषन्ना अनुपविष्टा स्थिता इत्यर्थः । येन परस्परं दृष्टिसम्बन्धो न भवति तथा स्थविराः सहिताः प्रवाचयन्नपि स्थविरसहायः प्रवाचयति, येन तत्सहायः सर्वानपि निभालयति, संयत्योऽनिषन्नाः संयत्योऽनिषन्नाः पठन्तीत्युक्तं तत्रापवादमाह-

[भा.३०९४] जा दुब्बला होज्ज चिरं व सज्झातो ताहे निसणा न य उच्चसद्दा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पलंब संघाडेन उज्जला य अनुनाया वास तिरंजलीय ।।

वृ- या शरीरेण दुर्बला भवति वर्तते चिरं च स्वाध्यायः कर्तव्यः । तदा निषण्णा उपविष्टा सती पठति, न च उच्चशब्देन महता शब्देनालापकमुद्घोषयतीत्यर्थः । तदा संघाटिः प्रलम्बा पादगुल्फपर्यन्ता क्रियते, नोज्वला तथा अनुन्नता पठति, । किमुक्तं भवति । नोर्ध्वमुखा सती अन्यस्यान्यस्य मुखं विप्रक्ष्यमाणा पठति तथा वासो वस्त्रान्तेन तिरोहिताञ्जलिरालापकं गुरोः समीपे याचते

[भा.३०९५] एयविहि विप्पमुक्को संजतिवग्गं तुजो पवाएज्जा ।
मज्जायातिक्कंतं मनायारं वियाणाहि ।।

वृ- एतेनान्तरोदितेन विधिना विप्रमुक्तो यः संयतिवर्गं प्रवाचयेत्, तं मर्यादातिक्रान्तमनाचारमाचारमाचाररहितं विजानीयात् ।

मू. (१७५) *नो कप्पइ निग्गंथाण वा निग्गंथीण वा असज्झाए सज्झाइयं करित्तए*

मू. (१७६) *कप्पइ निग्गंथाण वा निग्गंथीण वा सज्झाइए सज्झायं करित्तए ।*

[भा.३०९६] सज्झातो खलु पगतो वितिगठे नो कप्पइ जहाउ ।
एमेव असज्झाए तप्पडिवक्खे उ सज्झाओ ।।

वृ- स्वाध्यायः खलु प्रकृत पूर्वसूत्रे वर्त्तते, स च यथा व्यतिकृष्टे काले न कल्पते । एवमेवास्वाध्यायकेऽपि, तत् प्रतिपक्षे पुनः स्वाध्यायिके स्वाध्यायः कल्पते । इत्येतदर्थख्यापनार्थमिदं सूत्रमिति सम्बन्धः, । अनेन सम्बन्धेनायातस्यास्य व्याख्यान कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा अस्वाध्यायिके स्वाध्यायं कर्तुं, कल्पते निर्ग्रन्थीनां वा स्वाध्याये स्वाध्यायं कर्तुमिति सूत्राक्षरसंस्कारः ।

[भा.३०९७] असज्झाइयं च दुविहं आयसमुत्थं च परसमुत्थं च ।
जं तं तु परसमुत्थं तं पंचविहं तु नायव्वं ।।

वृ- द्विविधं खलु अस्वाध्यायिकं तद्यथा-आत्मसमुत्थं परसमुत्थं । आत्मानः स्वाध्यायं चिकीर्षोः समुत्थं आत्मसमुत्थं । परस्मात् स्वाध्यायकर्तुरन्यस्मात्समुत्थं परसमुत्थं च शब्दाच्च स्वाध्यायिकतया तुल्यकक्षता संसूचकौ तत्र यत्परसमुत्थं तत्पञ्चविधं ज्ञातव्यम् । तानेव पञ्च प्रकारानाह-

[भा.३०९८] संजमघाउप्पाए सा दिव्वे वुग्गहे य सारीरे ।
एएसु करेमाणे आणाइयमो उ दिठंतो ।।

वृ- संयमघाति संयमोपघातिकमौत्पातिकमुत्पातानिमित्तं स देवता प्रयुक्तं व्युद्ग्रहः शारीरं च एतेषु पञ्चस्वप्यस्वाध्यायिकेषु स्वाध्यायं कुर्वत्याज्ञादय आज्ञाभङ्गादयो दोषास्तथाज्ञां तीर्थकराणां भञ्जति । प्रायश्चित्तं चतुर्गुरु । अनवस्थया अन्येऽपि तथा करिष्यन्तीति, तत्रापि प्रायश्चित्तं चतुर्गुरु, यथा वादि तथाकारी न भवतीति मिथ्यात्वं, तन्निष्पन्नमपि प्रायश्चित्तं चतुर्गुरु, विराधना द्विविधा संयमविराधना आत्मविराधना च । तत्र संयमविराधना ज्ञानाचारविराधना आत्मविराधनायामिदमुदारहरणं तदेवाह-

[भा.३०९९] मिच्छभयघोसणनिवे दुग्गाणि अतीहमाविनेसिहि हा ।
फिडिया जेउ अतिगया इयरा हयसेसंनिवदंडो ।।

वृ- कस्सवि रन्नो मेच्छा खंधावारोपि सयं आगंतुं हणियकामो तं भयं जाणित्ता रना सविसए सयलेवि घोसावियं, मिच्छ खंधावारो आगंतुं विसयं हनिउकामो वट्टति, तास, तुब्भे दुग्गाणि अतीहतत्थ जेहिं । रन्नो आणाकया ते मिच्छ भयातो फिडिया जेहिं न कया आणा तेमिच्छेहिं लूसिया मारिया य जेवि तत्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केइ परिमुक्का ते वि रणा दंडिया ।। अक्षरयोजना त्वेवम्-म्लेच्छभयमाकर्ण्य नृपेण दण्डः कृतः ।

[भा.३१००] राया इव तित्थगरो जानवया साहुणो घोषणं सुत्तं ।
मिच्छाय असज्झातो रयणधनाइं च नाणादी ।।

वृ- अत्र राजा इव तीर्थकरो जनपदा इंवे साधवः, घोषणमिव सूत्रम् । म्लेच्छा इव अस्वाध्यायो रत्नधनानीव ज्ञानादीनि । तत्र ये साधवो जनपदस्थानीया राजस्थानीयस्य तीर्थकरस्याज्ञां नानुपालयन्ति ते प्रान्तदेवतया च्छल्यन्ते । प्रायश्चित्तदण्डेन च दण्ड्यन्ते । केन पुनः कारणेनास्वाध्यायिके स्वाध्यायं करोति । तत आह-

[भा.३१०१] पोवावसेव पोरिसि अज्झयणं वा वि जो कुणइ सोउं ।
नाणाइ सारहीनस्स तस्स छलणाउ संसारो ।।

वृ- स्तोकावशेषामपि पौरुष्यमध्ययनं पाठ उद्देशो वाद्यापि नान्तं नीत इति कृत्वा उद्घाटायामपि पौरुष्यामस्तमिते वा सूर्ये अथवा अस्वाध्यायिकमिति श्रुत्वापि योऽध्ययनं पाठमपि शद्वादुद्देशनं च करोति । तस्य ज्ञानादित्रिकं तत्वतोऽपगतं तीर्थकराज्ञा भङ्गकरणादिति, ज्ञानादित्रिकसारहीनस्य संसारे नरकादि भवभ्रमणलक्षणे च्छलना भवति, । अपारघोर संसारे निपतनं भवतीति भावः, ।

[भा.३१०२] अहवादिठंत अवरो जहरनो केइपंचपुरिसाओ ।
दुग्गातिपरितोसिओ, तेहिय रायाअह कयाई ।।

[भा.३१०३] तोदेति तस्स राया नगरंमी इच्छियं पयारं तू ।
महिएया दइमोल्लं जनस्स आहारवत्थादी ।।

[भा.३१०४] एगेन तोसियतरो गिहमगिहे तस्स सव्वहिं वियरे ।
रत्थाइं सुचउण्हं एविह सज्झाइए उवमा ।।

वृ- अथवेति दृष्टान्तस्य प्रकारान्तरसूचने अपरो दृष्टान्तो यथा-राज्ञः पञ्चपुरुषाः सेवकास्तैरथ कदाचित् राज्ञा दुर्गादिषु पतितो निस्तारितस्तत्रापि तेषां पञ्चानां मध्ये एकेन केनचित् परमसाध्वसमवलंब्यस्वयमवलंब्य भूयस्तरं साहायिकमकारि ततस्तेषां तेनैकेन वर्जितानां चतुर्णां पुरुषाणां राजा परितुष्टः सन् नगरे रथ्यादिषु गृहचर्येषु प्रचारमीप्सितं ददाति, । यथा यत्किमपि रथ्याया मापणादिषु त्रिकचतुष्कचत्वारादिषु वा यूयं यद्वस्त्राहारादिकं प्राप्नुयात् युष्माकमेव एवं प्रसादे कृते वस्त्राहारदौ नगरे तैः स्वेच्छया गृहीते राजा यस्य सत्कं तैः गृहीतं तस्य मूलं ददाति । येन चैकेन पुरुषेण भूयस्तरं साहायिकं कुर्वता राजा तोषिततरस्तस्य राजा गृहेऽगृहे वा सर्वत्र नगरमध्ये प्रचारमीप्सितं वितरति अनुज्ञानाति । तत्रापि यस्य सत्कं तेन गृह्यते वस्त्राहारादि तस्य राज्ञा मूल्यं दीयते । इतरेषां तु चतुर्णां रथ्यादिष्वेव प्रचारमनुज्ञातवान् न गृहेषु । एवमुक्तेन प्रकारेण इह प्रस्तुते अस्वाध्यायिके उपमादृष्टान्तः । तदेवमुक्तो दृष्टान्तः ।

[भा.३१०५] पढमम्मि सव्वचिट्ठा सज्झातो वा निवारतो नियमा ।
सेसेसु असज्झातो चेट्ठा न निवारिया अणा ।।

वृ- प्रथमे अस्वाध्यायिके संयमोपघातिलक्षणे सर्वा कायिकी वाचिकी चेष्टा स्वाध्यायश्च नियमाद्वारितस्तोषकतर पुरुषस्थानीयतया तस्य सर्वत्र साधुव्यापारेषु प्रवृत्ते, शेषेषु पुनश्चतुर्थस्वाध्यायिकेषु अस्वाध्यायः स्वाध्याये एव केवलो निवारितो नान्या कायिकी वाचिकी वा प्रतिलेखनादिका चेष्टा वारिता, तेषां शेषपुरुष चतुष्टयस्थानीयानां बहीरथ्यादाविव स्वाध्यायमात्र एव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यापारभावात् । तदेव पञ्चस्वप्यस्वाध्यायिकेषु सामान्यतो विशेषतश्चोदाहरणयुक्तमिदानीं प्रथमस्वाध्यायिकं संयमोपघाति प्ररुपयति ।

[भा.३१०६] महिया य भिन्नवासे सच्चित्तरए य संजमे तिविहे ।
दव्वे खेत्ते काले, जहियं वा जच्चिरं सव्वं ।।

वृ- महिका गर्भमासे पतन्ती प्रसिद्धा तस्यां तथा गृहादौ यत्पतति वर्षं तत् । भिन्नं वर्षं तस्मिन् तथा सचित्तरजसि च एवंविधे त्रिप्रकारे संयमे पदैकदेशे पदसमुदायोपचारात् संयमोपघातिनि अस्वाध्यायिके निपतति द्रव्यतः, क्षेत्रतः कालत, भावतश्च वर्जनं भवति, । तत्र द्रव्यत एतदेव त्रिविधमस्वाध्यायिकं द्रव्यं, क्षेत्रतो जहयन्ति यावत्क्षेत्रे तत्पतति तावत् क्षेत्रं, कालतो यश्चिरं यावन्तं कालं पतति तावन्तं कालं । भावतः सर्वकायिक्यादिचेष्टादिकं वर्ज्यते । एनामेव गाथां व्याख्यानयति-

[भा.३१०७] महिया उ गब्भमासे वासे पुनहोंति तिन्नि उ पगारा ।
वुब्बुयतव्वज्ञफुसी सच्चित्तरजो य आतंबो ।।

वृ- महिका गर्भमासे प्रतीता, । गर्भमासो नाम कार्तिकादि यावत् माघमासः । वर्षे पुनस्त्रयः प्रकाराः भवन्ति तानेवाह, वुब्वुयतिः यत्र वर्षे निपतति पानीयमध्ये बुद्बुदास्तोयशलाका रुपा उत्तिष्ठन्ति ततो वर्षमप्युपचारात् बुद्बुदमित्युच्युते । तद्वर्जं बुद्बुद्वर्जं, द्वितीयंवर्षं तृतीयं फुसी इति जलस्पर्शिकनि-पतन्त्यः । तत्र बुद्बुदे वर्षे निपततिं यामाष्टकादूर्ध्वं अन्ये तु व्याचक्षते । त्रयाणां दिनानां परतस्तद्वर्जं पञ्चानां दिनानां जलस्पर्शिका रुपे सप्तानां परतः सर्वमप्कायस्पृष्टं भवति । ततस्तत्र द्रव्यतः क्षेत्रतः कालतो भावतश्च वर्जनं प्राग्वद्भावनीयम् । यावच्चापकायमयं न भवति तावत् यच्चुपाश्रंयो श्लक्ष्णधूलिस्तच्च सचित्तरजो वर्णेनाताम्रं गाथायां पुस्त्वं प्राकृतत्वात् । तच्च दिगंतरेषु दृश्यते । तदपि निरन्तरपातेन त्रयाणां दिनानां परतः सर्वं पृथिवी कायभावितं करोति । तत्रापि पतितद्रव्यादितो वर्जनं प्राग्वत् ।

[भा.३१०८] दव्वे तं चिय दव्वं खेत्ते जहियं तु जच्चिरं काले ।
ठाणादिभासभावे मुत्तुं तउस्सासउम्मेसुं ।।

वृ- द्रव्ये द्रव्यतस्तदेवास्वाध्यायिकं महिकं भिन्नवर्षं सचित्तरजो वा वर्ज्यते । क्षेत्रतो यत्र क्षेत्रे निपतति । कालतो यच्चिरं कालं पतति । भावतो मुक्त्वा उच्छ्वासमुन्मेषं च तद्वर्जने जीवितव्याघात-संभवात् । शेषां स्थानादिकमादिशब्दात् गमनागमने प्रतिलेखनादि परिग्रहः कायिकां चेष्टां भाषां व वर्जयति ।

[भा.३१०९] वासत्ताणा चरिया निक्कारणेठंति कज्जजयणाए ।
हत्थत्थंगुलिसन्ना पोत्तावरिया व भासत्ति ।।

वृ- निष्कारणे कारणाभावे वर्षत्राणं कम्बलमयः कल्पस्तेन सौत्रिककल्पान्तरितेन सर्वात्मना आवृत्तातिष्ठन्ति न कामपि लेशतोऽपि चेष्टां कुर्वन्ति । कार्ये तु समापतिते यतनया हस्तसंज्ञया वा व्यवहरन्ति, पोताचरिता वा भाषन्ते । ग्लानादि प्रयोजने वर्षा कल्पावृता गच्छन्ति । गतं संयमोपघात्यस्वाध्यायिकमिदानीमौत्पातिकमाह-

[भा.३११०] पंसूयमंसरुहिरे केससिलावुट्ठितह रउग्धाए ।
मंसरुहिरेहोरत्तं अवसेसो जच्चिरं सुत्तं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अत्र वृष्टिशब्दः प्रत्येकमभिसम्बध्यते । पांशुवृष्टौ मांसवृष्टौ रुधिरवृष्टौ केशवृष्टौ शिलावृष्टौ च । तत्र पांशुवृष्टिर्नामयदि वृत्तं रजोनिपतति, मांसवृष्टिर्मांसखण्डानि पतन्ति, । रुधिरवृष्टिः रुधिरबिन्दवः पतन्ति, । केशवृष्टिर्यद्वराः केशाः पतन्ति । शिलावृष्टिः पाषाणनिपतनं करकादिशिलावर्षमित्यर्थः । तथा रजउद्घाते रजस्वलासु दिक्षु सूत्रं न पठ्यते शेषाः सर्वाअपि चेष्टाः क्रियन्ते । तत्र मांसे रुधिरे च पतति अहोरात्रं वर्ज्यते, अवशेषे पांशुवृष्ट्यादौ यावच्चिरं पांश्वादिपतनं तावन्तं कालं सूत्रं नन्द्यादि न पठ्यते । शेषकालं तु पठ्यते । सम्प्रति पाशुंरजउद्घात व्याख्यानमाह-

[भा.३११९] पंसू अचित्तरजो सलातो दिसारउद्घातो ।
तत्थ स वाते निव्वायइ एयसुत्तं परिहरंति ।।

वृ- पांशवो नाम धूमाकारमापाण्डुरमचित्तं रजः, रज उद्घातो रजस्वलादिशो यासु सत्सु समन्ततोऽन्धकारइव दृश्यते । तत्र पांशुवृष्टौ रजउद्घाते वा स वाते निर्वाते च पतति यावत्पतनं तावत्सूत्रं परिहरन्ति । अत्रैवापवादमाह-

[भा.३११२] साभाविए तिनि दिना सुगिम्हए निक्खेवंति ।
जइजोगं तो तंमि पडंतंमी कुणंति संवच्छरं ज्झायं ।।

वृ- यदि सुग्रीष्मे ग्रीष्मकालप्रारंभ उष्णकालप्रारंभ चैत्रशुक्लपक्षे इत्यर्थः । दशम्याः परतो यावत् पौर्णमासी । अत्रान्तरे निरन्तरं त्रीणि दिनानी यावत् यदि योगं निक्षिपन्ति एकादश्यादिषु त्रयोदशीपर्यन्तेषु यदि वा त्रयोदश्यादिषु पौर्णमासी पर्यन्तेषु सचित्तरजो अवहेठ[ब]नार्थं कायोत्सर्गं कुर्वन्ति तदा तस्मिन् पांशुवर्षे रजउद्धाते वा स्वाभाविके पतति संवत्सरं यावत्स्वाध्यायं कुर्वन्ति । इतरथानेति गतमौत्पातिकमिदानीं सदेवमाह-

[भा.३११३] गंधव्वदिसाविज्जुक्क[अ]गज्जिते जूव जक्खलित्ते य ।
एक्केक्कपोरिसिं गज्जियं तु दो पोरिसीहणति ।।

वृ- गन्धर्वनगरं नाम यच्चक्रवर्त्यादि नगरस्योत्पातसूचनाय सन्ध्यासमये तस्य नगरस्योपरि द्वितीयं नगरं प्राकाराट्टल कादि संस्थितं दृश्यते; दिग्दाहः विद्युत्प्रतीता उल्का सरेखाप्रकाशयुक्ता वा गर्जितं प्रतीतं यूपको वक्ष्यमाणलक्षणो यक्षालिप्तं नाम एकस्यां दिशि अन्तरान्तरा यद्दृश्यते विद्युत्सदृशः प्रकाशः एतेषु मध्ये गन्धर्वनगरादिकमेकैकां पौरुषीं हन्ति । गर्जितं पुनर्द्वे पौरुष्यौ हन्ति ।

[भा.३११४] गंधव्वनगरनियमा सदेव्वं सेसगानि भजितानि ।
जेन न नज्जंति फुडं तेन य तेसिं तु परिहारो ।।

वृ- अत्र गन्धर्वनगरादिषु मध्ये गन्धर्वनगरं नियमात्सदेवमन्यथा तस्यासंभवात् । शेषकाणि तु दिग्दाहादीनि भक्तानि विकल्पितानि, कदाचित्स्वाभाविकानि विद्यन्ति भवन्ति । कदाचित् देवकृतानि । तत्र स्वाभाविकेषु स्वाध्यायो न परिह्रियते । किन्तु देवकृतेषु परं येन कारणीन स्फुटं वैविक्त्येन भाति ज्ञायन्ते तेन तेषामविशेषेण परिहारः । सम्प्रति दिग्दाहादि व्याख्यानमाह-

[भा.३११५] दिसिदाहो च्छिन्नमूलो उक्कसरेहा पगासजुत्ता वा ।
संज्झाच्छेयाचरणो उ जूवतो सुक्के दिने तिन्नि ।।

वृ- दिशि पूर्वादिकायां च्छिन्नमूलो दाहः प्रज्वलनं दिग्दाहः । किमुक्तं भवति ? अन्यतमस्यां दिशि महानगर प्रदीप्तमिवोपरि प्रकाशोऽधस्तादन्धकार इति दिग्दाहः उल्का पृष्टतः सरेखा प्रकासयुक्ता वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यूपको नाम शुक्ले शुक्लपक्षे त्रीणि दिनानि यावत् द्वितीयस्यां तृतीयस्यां चतुर्थ्यां चेत्यर्थः सन्ध्याच्छेदः, सन्ध्याविभागः स आध्रि[व्रि]यते येन स सन्ध्याच्छेदावरणश्चन्द्रः । इयमत्र भावना-शुक्लपक्षे द्वितीया तृतीया चतुर्थी रुपेषु त्रिषु दिवसेषु संध्यागतश्चंद्र इति कृत्वा संध्या न विभाव्यते, ततस्तानि शुक्लपक्षे त्रीणि दिनानि यावच्चंद्रः संध्याच्छेदावरणः स यूप इति तेषु च त्रिषु दिवसेषु प्रादोषिकी पौरुषी नास्ति । सन्ध्याच्छेदाविभावनादिति । अत्रैव मतान्तरमाह-

[भा.३११६] केसिंचि होइ मोहो उ जूवतो ते होंति आइणा ।
जेसिं तु अणाइन्ना तेसिं खलु पोरिसी दोनि ।।

वृ- केषाञ्चिदाचार्याणां मतेन भवन्ति शुक्लपक्षे प्रतिपदादिषु त्रिषु दिवसेष्वमोधामोघा शुभाशुभसूचननिमित्तादि तथोत्पादा आदित्यकरणविकारजनिता आदित्यस्योदयसमयेऽस्तमयसमये वा आताभ्राः कृष्णश्यामा वा यूपक इति ते च भवन्ति वर्त्तन्ते । आचीर्णा नैतेषु स्वाध्यायः परिह्रियते इत्यर्थः, । येषां त्वाचार्यणामनाचीर्णास्तेषां मतेन यूपको द्वे पौरुष्यौ हन्ति न केवलममूनि सदेवानि किन्त्वमून्यपि । तान्येवाह-

[भा.३११७] चंदिमसूरुवरागा निग्घाएगुंजिते अहोरत्तं ।
चंदो जहनेनाट्ठउ उक्कोसपोरिसि विच्छक्कं ।।

[भा.३११८] सूरो जहन्न बारस उक्कोसं पोरिसी उ सोलसउ ।
संगहनिव्वुड्ड एवं, सुरादी जेन होरत्ता ।।

वृ- चन्दोपरागे सूर्योपरागे च तद्दिनापगते इति वाक्यशेषः । तथा साभ्रे निरभ्रे वा नभसि व्यन्तरकृतो महागर्जितसमो ध्वनिर्निर्धातः गर्जितस्येव विकारो गुञ्जावत् गुञ्जमानो महाध्वनिर्गुञ्जितं तस्मिन् निर्धाते गुंजिते च प्रत्येकमहोरात्रं यावत्स्वाध्यायपरिहारः । तत्र जधन्यत उत्कर्षतश्चन्द्रोपरागं सूर्योपरागं चाधिकृत्य स्वाध्यायोचितकालमानमाह-चन्द्रो जधन्येनाष्टौ पौरिषीर्हन्ति, उत्कर्षतः पौरुषी द्विषट्कं द्वादशपौरुषीरित्यर्थः । कथमित चेदुच्यते-तद्गच्छन् चन्द्रमा राहुणा ग्रहीतस्ततश्चतस्त्रः पौरुषीर्दिवसस्य हन्ति । चतस्त्र आगामिन्या रात्रेश्चतस्त्रो द्वितीयस्य दिवसस्याथवा औत्पातिकग्रहणेन सर्व रात्रिकं ग्रहणं जातं, सग्रह एव निमग्नस्ततः संदूषितरात्रेश्चतस्त्रः पौरुषी रन्यच्चाहोरात्रं । अथवा अभ्रच्छन्नतया विशेषपरिज्ञानाभावाच्च न ज्ञातं कस्यां वेलायां ग्रहणं प्रभाते च सग्रहो निमज्जन् दृष्टः । ततः समग्रा रात्रिः परिहृता । अन्यच्चाहोरात्रमिति द्वादशः सूर्यो जधन्येन द्वादशपौरुषीर्हन्ति उत्कर्षत षोडशमिति चेदुच्यते-सूर्यः सग्रह एवास्तमुपयातस्ततश्चतस्त्रः पौरुषी रात्रेर्हन्ति चतस्त्र आगामिनो दिवसम्य चतस्त्रस्ततः परस्या रात्रेरेवं द्वादश, षोडश पुनरेवं सूर्य उद्गच्छन् राहुणा गृहीतः सकलं दिनं समुत्पातवशात् सग्रह एवास्तमुपागतस्ततश्चतस्त्रः पौरुषीर्दिवसस्य हन्ति चतस्त्र आगामिन्या रात्रेस्ततश्चतसस्त्रः परदिवसस्य ततोऽपि चतस्त्रः परतराया रात्रे रेवं षोडश पौरुषीर्हन्ति सग्रह निमग्नः सग्रह एवास्तमितस्तथा चोक्तम्-एयं उगच्छन्नगहिए सग्गहनिब्बुडे । दट्ठव्वमिति सूरादी जेण हो रत्तत्ति ।। सूर्योदयो येनाहोरात्रास्ततः किमित्याह-

[भा.३११९] आइन्नं दिनमुक्के सोव्विय दिवसो य राती य ।
निग्घाय गुंजिएसुं सव्वि य वेलाउ जा पत्ता ।।

वृ- यतः सूर्यादिरहोरात्रास्ततो दिनमुक्ते सूर्ये स एव दिवसः सैव च रात्रिरस्वाध्यायिकतया परिह्रियते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रे तु तस्यामेव रात्रौ मुक्ते यावदपरश्चन्द्रो नोदेति तावदस्वाध्याय इति सैव रात्रि परंपरं च दिनमित्येषमहोरात्रमस्वाध्यायः । अन्ये पुनराहुराचीर्णमिदं चन्द्रो रात्रो गृहीतो रात्रावेव मुक्तस्तस्या रात्रेः शेषंवर्जनीयं यस्मादागामिसूर्योदये समाप्तिरहोरात्रस्य जाता । सूर्योऽपि यदि दिवा गृहीतो दिवैव मुक्तस्तस्तस्यैव दिवसस्य शेषं रात्रिश्च वर्जनीया इति । तथा निर्घात गुञ्जितयोः प्रत्येकं यस्यां वेलायां निर्घातो गुञ्जितं वाऽधिकृतं दिनेऽभवत् द्वितीयोऽपि दिने यावत्सैव वेला प्राप्ता भवति, तावदस्वाध्याय एव तयोरप्यस्वाध्यायस्याहोरात्रप्रमाणत्वात् । उक्तं च- निग्घातो गुंजियं च लोकप्रतीता एए । अहोरत्तं उवहनंतित्ति तथा ।।

[भा.३१२०] चउसंज्झासु न कीरइ पाडिवएसुं तहेव चउसुंपि ।
जो जत्थ पूजतीतु सव्वहिं सुगिम्हतो नियमा ।।

वृ- चतस्रः सन्ध्यास्तिस्रो रात्रौ तद्यथा-प्रस्थिते सूर्ये अर्धरात्रे प्रभाते च चतुर्थीदिवसस्य मध्यभागे एतासु चतसृष्वपि स्वाध्यायो न क्रियते, । शेष क्रियाणां तुप्रतिलेखनादीनां न प्रतिषेधः स्वाध्यायकरणे याज्ञाभङ्गादयो दोषास्तथा चतस्रः प्रतिपदस्तद्यथा-आषाढपौर्णमासी प्रतिपत् १, इन्द्रमह प्रतिपत् २, कार्तिक पौर्णमासी प्रतिपत् ३, सुग्रीष्म प्रतिपत् ४, चैत्रपौर्णमासी प्रतिपदित्यर्थः, एतास्वपि चतसृष्वपि प्रतिपत्सु तथैव स्वाध्याय एव न क्रियते न शेष क्रियाणां प्रतिषेधः । इह प्रतिपद्ग्रहणेन प्रतिपत् पर्यन्ताश्चत्वारो महाः सूचिताः । इत्येषां तु चतुर्णां महानां मध्ये यो महो यस्मिन् देशे यतो दिवसादारभ्य यावन्तं कालं पूज्यते तस्मिन् देशे ततो दिवसादारभ्य तावन्तं कालं स्वाध्यायं न कुर्वन्ति, प्रतिपत् पुनः सर्वेषां पर्यन्तः । सव्वेसिं जाव पडिवतो इति वचनात् । सुग्रीष्मकश्चैत्रमासभावी पुनर्महामहः । सर्वेषु देशेषु शुक्लपक्ष प्रतिपद्य आरभ्य चैत्रपूर्णमासी प्रतिपत्पर्यन्तो नियमात्प्रसिद्धस्ततो यद्यध्वानं प्रतिपन्नस्तथापि चैत्रमासस्य शुक्लपक्ष प्रतिपद आरभ्य सर्वं पक्षं पौर्णमासी प्रतिपत्पर्यन्तं यावदवश्यमनागाढो योगो निक्षिप्यते । शेषेषु आगाढादिकेषु योगो न क्षिप्यते केवलं स्वाध्यायं न कुर्वन्ति । गतं सदेवमस्वाध्यायिकमिदानीं व्युद्ग्राहमाह-

[भा.३१२१] वुग्गह दंडियमादी संखोभ दंडिएय कालगतो ।
अनरायए य सभए जच्चिर निदोच्चहोरत्तं ।।

वृ- व्युद्ग्रहे परस्पर विग्रहे दण्डिकादीनामादिशब्दात् सेनापत्यादिनां च विग्रहे अस्वाध्यायः । इयमत्र भावना-द्वौ दण्डिकौ सस्कन्धावारौ परस्परं संग्रामं कर्तुकामौ । यावन्नोपशाम्यतस्तावत्स्वाध्यायः कर्तुं न कल्पते किं कारणमिति चेतुच्यते-तत्र वानमन्तराः कौतुकेन स्वस्वपक्षेण समागच्छन्ति, ते च्छलयेयुर्भूयसांच लोकानामप्रीतिर्वयमेवं भीता वर्तामहे कामप्यापदं प्राप्स्याम एते च श्रमणका निर्दुःखं पठन्ति । अत्रादिशब्दव्याख्यानार्थमिमां गाथामाह-

[भा.३१२२] सेनाहिव भोइय महत्तरपुंसित्थीणं मल्लजुद्धे वा ।
लोठादिभंडणे वा गुज्झ उड्डाह अचियत्तं ।।

वृ- द्वयोः सेनाधिपत्योर्द्वयोर्वा तथाविध प्रसिद्धपात्रयोः स्त्रियोः परस्परंव्यूद्गहे वर्तमाने अथवा मल्लयुद्धे तथा द्वयोर्ग्रामयोः परस्परे सकलुषभावे बहवस्तरुणाः परस्परं लोष्टैर्युध्यन्ते । यदिवा बाहुयुद्धादिभिस्ततो लोष्टादिभिर्वा परस्परं भण्डने कलहे यावन्नोपशमो भवति सेनाधिपादिव्युद्ग्रहस्य तावदस्वाध्यायः । अत्र कारणमाह-गुज्झगउड्डाह अचियत्तं गुह्यकाः कौतुकेन दण्डिके कालगते अन्नाराएयत्ति यावदन्यो राजा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाभिषिक्तो भवती तावत् प्रजानां महान् संक्षोभो भवति । तस्मिन् संक्षोभे सति स्वाध्यायो न कल्पते किमुक्तं भवति ? यावत्संक्षोभस्तावदस्वाध्यायः । अत्रापि पूर्वोक्ता दोषाः सभयं म्लेच्छादिभयाकुलं तस्मिन्नपि स्वाध्यायो न कर्त्तव्यः, । एतेषु सर्वेषु व्युद्ग्रहादिष्वस्वाध्यायविधिमाह-जच्चिरनिद्दोव्यहोरत्तं व्युद्ग्रहादिषु यच्चिरं यावन्तं कालमनिदोच्चमित्यनिर्भयमखस्थमित्यर्थस्तावन्तं कालमस्वाध्यायः । स्वस्थीभवनानन्तरमप्यके महोरात्रं परिहृत्य स्वाध्यायः कर्त्तव्यः । उक्तं च-

निद्दोसी भूतेति अहोरत्तमेगं परिहरित्ता सज्झाओ ।
कीरइ इह संखोमे दंडिए कालगए वा ।।

कालगए इत्यनेनान्यदपि सूचितमस्ति, ततस्तदभिधित्सु । संखोमे दंडीए इत्येतदपि व्याख्यानयति-

[भा.३१२३] दंडीय कालगयंमी जा संखोभो न कीरते ताव ।
तद्दिवस भोइ महत्तर वा दुगपति सेज्जयरमादी ।।

वृ- दण्डिके कालगते सति यावत्संक्षोभस्तावत्स्वाध्यायो न क्रियते । अन्यस्मिंस्तु राज्ञि स्थापितेऽहोरात्रातिक्रमेण क्रियते स्वास्थ्यभवनात् । तथा भोजिके ग्रामस्वामिनि महत्तरिके ग्रामप्रधाने वाटकपतौ वसत्यनुगतवाटकैक स्वामिनि तथा शय्यातर आदि शब्दादन्यस्मिन्वा शय्यातरसम्बन्धिनि मानुषे कालगते तद्दिवसमस्वाध्यायः एकमहोरात्रं यावत्स्वाध्यायपरिहार इत्यर्थः । तथा-

[भा.३१२४] पगयबहुपक्खिए वा सत्तघरंतरमतेव तद्दिवसं ।
निदुक्खत्ति य गरिहा न पढंति सनियगं वावि ।।

वृ- अन्योऽपि यो नाम ग्रामे प्रकृतोऽधिकृतो महा मनुष्यस्तस्मिन् यदि वा बहुपाक्षिके बहु स्वजने कालगते अन्यस्मिन्वा प्रकृते स्ववसत्यपेक्षया सप्तगृहाभ्यन्तरे कालगते तद्दिवसमेकमहोरात्रमस्वाध्यायः । किं कारणमत आह- नि.दुक्खा अभी इत्यप्रीत्या गर्हा संभवात् ततो न पठन्ति यथा न कोऽपि शृणोतीति महिलारुदित शब्दोऽपि यावत् श्रूयते तावन्न पठन्ति ।

[भा.३१२५] हत्थसयमनाहम्मी जइ सारियमादित्तविगिंचिज्ज्रा ।
तो सुद्धं अविचित्ते अन्नं च तहिं विमग्गंति ।।

वृ- कोऽप्यनाथो हस्तशताभ्यन्तरे मृतस्तस्मिन्ननाथे हस्तशताभ्यन्तरे कालगते कालगते स्वाध्यायो न क्रियते, । तत्रेयं यतना-शय्यातरस्य वा तद्विधस्य श्रावकस्य यथा भद्रकस्य वा वार्त्ताकथ्यते यथा स्वाध्यायान्तरायमस्माकमनाथमृतकेन कृतमस्ति ततः सुन्दरं भवति । यदीदं च्छर्दति एवमभ्यर्थितो यदि शय्यातरादिर्विगिञ्चयेत् ततः शुद्धं भवतीति स्वाध्यायः कार्यः । अथ च शय्यातरादिर्न कोऽपि परिष्ठापयितुमिच्छति तदा तस्मिन्ननाथमृतके अविविक्ते अपरिस्थापित अन्यां वसतिं मार्गयन्ति ।

[भा.३१२६] अण वसहीए असती ताहे रत्तिंवसभा विवेचंति ।
विक्खिन्ने व समत्ता जं दिट्ठं असढयरे सुद्धा ।।

वृ- अन्यस्या वसतेरभावो यदि ततो रात्रौ सागारिका संलोके वृषभास्तदनाथमृतकं विविचन्ति अन्यत्र प्रक्षिपन्ति । अथ तत्कलेवरं श्वशृगालादिभिस्समंततो विकीर्णं ततो विकीर्णे तस्मिन् सर्वततो निभालयन्ति दृष्टं तत्सर्वमपि विविचन्ति । इतरस्मिंस्तु प्रयत्ने कृतेऽप्यदृष्टे असढा इति कृत्वा शुद्धाः स्वाध्यायं कुर्वन्तोऽपि न प्रायश्चित्तभागिन इति भावः । गतं व्यद्ग्रहजमिदानीं शारीरिकमाह-

[भा.३१२७] सारीरंपि य दुविहं मानुसतेरिच्छियं समासेणं ।

तेरिच्छं तत्थ तिहा जल थल खहजं पुणो चउहा ।।

वृ- शरीरे भवं शारीरं तदपि समासेन संक्षेपतो द्विविधं द्विप्रकारं । तद्यथा-मानुषं तैरश्चं च । तत्र तैरश्चं त्रिधा-जलजं जलजमत्स्यादि, तिर्यग्भवमेवं गवादीनां स्थलजं खजं च मयूरादीनाम् । पुनरेकैकं चतुर्धा चतुः प्रकारं । तानेव प्रकारानाह-

[भा.३१२८] चम्मरुहिरं च मंसं अत्थिपि य होइ चउविगप्पं तु ।
अहवा दव्वाईयं चउविहं होइ नायव्वं ।।

वृ- चर्मसशोणितं रुधिरं मांसमस्थि इत्येतानि प्रतीतानि । एवमेकैकं जलजाति चतुर्विकल्पं भवति । अथवा जलजादिकं प्रत्येकं चर्मादिभेदतश्चतुर्विकल्पं सत्पुनद्रव्यादिकं द्रव्यादिभेदतश्चतुर्विधं भवति ज्ञातव्यं । तानेव प्रत्येकं द्रव्यादीन् चतुरो भेदानाह-

[भा.३१२९] पंचेंदियाण दव्वे खित्ते सट्ठिहत्थपोग्गलाकिणे ।
तिकुरच्छमहन्नेगा नगरिं बाहिं तु गामस्स ।।

वृ- द्रव्ये द्रव्यतः पञ्चेन्द्रियाणां जलजादीनां चर्मादिकं चतुष्टयमस्वाध्यायिकं न विकलेन्द्रियाणां, क्षेत्रे क्षेत्रतः षष्टिहस्ताभ्यन्तरे परिहरणीयं न परतः । अथ तत्स्थानं तैरश्चेन पौद्गलेन मांसेन समन्ततः मांसने समन्ततः काककुकुरादिभिर्दिक्षुविक्षिप्तेनाकीर्णं व्याप्तं तदा यदि स ग्रामस्तर्हि तस्मिन् तिसृभिः कुरथ्याभिरन्तरिते विकीर्णे पुद्गले स्वाध्यायः क्रियते । अथ नगरं तदा तत्र यस्यां राजा ज बलवाहनो गच्छति तदेवं यानं रथो वा विविधानि वा संवाहनानि गच्छन्ति । तथा महत्याप्येकया रथ्यया अन्तरिते स्वाध्यायः कार्यः । अथ स ग्रामः समस्तो विकीर्णेन पौद्गलेनाकीर्णो विद्यते तेन तिसृभिः कुरथ्याभिरन्तरितं तत्पौद्गलभवाप्यते तदा ग्रामस्य बहिः स्वाध्यायो विधेयः । गता क्षेत्रतो मार्गणा । सम्प्रति कालतो भावतश्च

[भा.३१३०] काले तिपोरिसि अट्ठव भवि सुत्तं तु नंदिमादीयं ।
बहि धोय रुद्धपक्के वूढे वा होति सुद्धं तु ।।

वृ- तत एकैकं जलजादिगतं चर्मादिकालस्तिस्रः पौरुषी र्हति, । अट्ठवेति महाकाय पञ्चेन्द्रियस्य मूषिकादेराहननं । तत्राष्टौ पौरुषीर्यावत्स्वाध्यायविधातो गता कालतोऽपि मार्गणा भावत आह-भावे भावतो नन्द्यादिकं सूत्रं न पठति, बहिधोएत्यादि यदि षष्टिहस्तेभ्यः परतो बहि प्रक्षाल्य मांसमानीतं यदि वा राद्धास्थालीपाकेन तदा तस्मिन् वहिर्धौते बहिराद्धे बहिः पक्के वा तत्रानीते शुद्धमस्वाध्यायिकं न भवतीति भावः । अथवा यत्तत्र षष्टिहस्ताभ्यन्तरे पतितमस्वाध्यायिकं रुधिरं तेनावकाशेन पानीयप्रवाह आगतस्तेन व्यूढं तदा पौरुषीत्रयमध्येऽपि शुद्धमस्वाध्यायिकमिति स्वाध्यायः कार्यः ।

[भा.३१३१] अंतो पुन सट्ठीणं धोयंमी अवयवा तहिं होंति ।
तो तिन्नि पोरिसीतो परिहरियव्वा तहिं हुंति ।।

वृ- यदि पुनः षष्टेर्हस्ता नामभ्यन्तरे मांसं प्रक्षालयति, तदा तस्मिन् धौते यतस्तत्र नियमादवयवाः पतिता भवन्ति, । ततस्तिस्रः पौरुष्यः स्वाध्यायमधिकृत्या तत्र परिहर्तव्या भवन्ति । अट्ठवेति यदुक्तं तदिदानीं भावयति-

[भा.३१३२] महाकाये अहोरत्तं मज्जारादीन मूसगादिहते ।
अविभिन्ने गिने वा पठंति एगे जइ पलाति ।।

वृ- महाकाये मूषिकादौ मार्जरादिना हते मारितेऽहोरात्रमष्टौ पौरुषीर्यावदस्वाध्यायः । अत्रैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मतान्तरमाह-अविभिन्ने इत्यादि । एके प्राहुर्यदि मार्जारादिना मूषिकादिरविभिन्न एव सन्मारितो मारयित्वा च गृहीत्वा अथवा गिलित्वा यदि ततः स्थानात् पलायते तदा पठन्ति, साधवः सूत्रं न कश्चिद्दोषः, अन्येनेच्छन्ति । यतः कस्तं जानाति अविभिन्नो वा मारित इति । अपरे पुनः एवमाहुर्यत्र मार्जारादिः स्वयं मृतो अन्येन वा केनाप्यविभिन्न एवं सन्मारितस्तत् यावत् तत्कलेवरं न भिद्यते तावन्नास्वाध्यायिकं विभिन्नेऽस्वाध्यायिकमिति तदेतदसमीचीनं यतश्चर्मादिभेदतश्चतुर्विधमस्वाध्यायिकं तस्मादविभिन्ने-ऽप्यस्वाध्याय एव ।

[भा.३१३३] अंतो बहिं च भिन्ने अंडबिंदू तह वियायाए ।
रायपह वूढ सुद्धे परवयणे साणमादीनि ॥

वृ- अन्तरुपाश्रयस्य मध्ये यदि चोपाश्रयाद्बहिः षष्टिहस्ताभ्यन्तरे अण्डके पतिते यदि तदण्डकमभिन्नमद्याप्यस्ति तदा तस्मिन्नुज्झिते स्वाध्यायः कल्पते । अथवा पतितं स दण्डकं भिन्नं तस्य चाण्डकस्य कललबिन्दुर्भूमौ पतितस्तदा भिन्ने अण्डके बिन्दौ च भूमौ पतिते न कल्पते स्वाध्यायः । अथ कल्पे पतितं सदण्डकं भिन्नकललबिन्दुर्वा तत्र लग्नस्तदा तस्मिन् षष्टिहस्तेभ्यः परतो बहिर्नीत्वा धौते कल्पते । तथा विजातायां प्रसूतायां तैरश्च्यामस्वाध्यायः पौरुषी त्रितयं यावत् तथा ये राजपथे अस्वाध्यायिक बिन्दवो गलितास्ते न गण्यन्ते । तथान्यत्र प्रतिपतित एवास्वाध्यायिकं ततो वर्षोदक प्रवाहेन तस्मिन् व्यूढे कल्पते । अत्र श्वादिकमाश्रित्य परस्य वचनं तदाग्र भाव इष्यते इति गाथासंक्षेपार्थः ।

[भा.३१३४] अंडयमुज्झियकप्पे न य भूमि खणंति इहरेहातिन्नि ।
असज्झाइयपरमाणं मच्छियपाया जहिंबुप्पे ॥

वृ- यद्यण्डकमभिन्नमेव पतितं तदा तस्मिन्नुज्झिते स्वाध्यायः कल्पते, अभिन्नं तदा कल्पते, अथ भिन्नं तदा न कल्पते । न च भूमिं खनन्ति, इतरथा भूमिखननेन यदि तदस्वाध्यायिकमपनयन्ति तथाहि तिस्रः पौरुषीर्यावदस्वाध्यायः । अण्डक बिन्दोरस्वाध्यायिकस्य प्रमाणं । यत्र मक्षिकापादा निमज्जंति । किमुक्तं भवति ? यावन्मात्रे मक्षिकापादो ब्रुडति तावन्मात्रेऽप्यण्डकबिन्दौ भूमौ पतति अस्वाध्यायः ।

[भा.३१३५] अजराउ तिन्नि पोरिसि जरा उयाणं जरे पडिए तिन्नि ।
निज्जं तु वस्स पुरतो, गलियं जति निग्गलं होज्जा ।

वृ- अजरायुः प्रसूता तिस्रः पौरुषी स्वाध्यायं हन्ति, अहोरात्रं च्छेदं मुक्त्वा अहोरात्रे तु च्छिन्ने आसन्नायामपि प्रसूतायां कल्पते स्वाध्यायो जरायुजानां यावज्जरायुर्लम्बते तावदस्वाध्यायो, जरायौ पतिते सति तदनन्तरं तिस्रः पौरुषीर्यावदस्वाध्यायः तथा उपाश्रयस्य पुरतो नीयमानं तदस्वाध्यायिकं गलितं भवति । तदा पौरुषीत्रयं यावदस्वाध्यायो, यदि पुनर्निर्गलं भवेत्तदा तस्मिन्नीते स्वाध्यायः रायपहवूढेति-

[भा.३१३६] रायपहे न गणिज्जति अह पुन अन्नत्थ पोरिसी तिन्नि ।
अह पुन वूढं होज्जा वासो देणं ततो सुद्धं ॥

वृ- राजपथे यद्यस्वाध्यायिकबिन्दवो गलितास्तदा तदस्वाध्यायिकं न गण्यते किं कारणमिति चेदुच्यते-यतस्ततःस्वयोग्यत आगच्छतां च मनुष्यतिरश्चां पदनिपातैरेवोत्क्षिप्तं भवति । जिनाज्ञा चात्र प्रमाणमतो न दोषः । अतः पुनस्तदस्वाध्यायिकं तैरश्चं राजपथादन्यत्र षष्टिहस्ताभ्यन्तरे पतति तदा तिस्रःपौरुषीर्यावदस्वाध्यायः । अथ तदपि वर्षोदकेन व्यूढं भवेत् । उपलक्षणमेतत् प्रदीपनकेन वा दग्धं तदा शुद्धं तत्स्थानमिति कल्पते स्वाध्यायः । सम्प्रति परवयणे साणमादीण इति व्याख्यानयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३१३७]　चोदेति समुद्दिसिउं साणो जइ पोग्गलं तुएज्झाहि ।
उदरगतेनं चिट्ठइ जाता चउहो असज्झातो ।।

वृ- अत्र परश्चोदयति श्वा यदि पौद्गलं तैरश्च मांसं बहिः समुद्दिश्य तत्रागच्छेत् तर्हि यावत्स तत्र तिष्ठति तावत्तेनोदरगतेन पौद्गलेन स्वाध्यायः कस्मान्न भवति । सूरिराह-

[भा.३१३८]　भणति जइ ते एवं सज्झातो एव तो उ नत्थि तुहं ।
असज्झाइयस्स जेणं पुनोसि तुमं सया कालं ।।

वृ- भण्यते-अत्रोत्तरं दीयते,-यदि ते एवं पूर्वोक्तप्रकारेण मतिस्ततः तव स्वाध्यायः कदाचनादपि नास्त्येव एवकारो भिन्नक्रमः । स च यथास्थानं योजितः कस्मान्नस्वाध्यायः कदाचनापीत्यत आह-येन कारणेन सदाकालं सर्वकालं त्वमस्वाध्यायिकस्य पूर्णः शरीरस्य रुधिरादिचतुष्टयात्मकत्वात् ।

[भा.३१३९]　जइ फुसति तहिं तुंडं जइ वलेच्छारिएण संचिक्खे ।
इहरा न होति चोयगवंतं परिनयं जम्हा ।।

वृ- यदिश्वा खरण्टेन मुखेन तत्रागत्यात्मीयं तुण्डं कापि स्पृशति, यदि वा खरण्टितेनैव मुखेन संतिष्ठति । तदा भवत्यस्वाध्याय इतरथा यदि पुनर्वहिरेव मुखं लीढ्वा समागच्छति तदा न भवति, । तथा यद्यप्यागन्तुं वमति तथापि चोदक ! नास्त्यस्वाध्यायिकं, यस्मात्तद्वान्तं परिणतमेवं मार्जारादिकमप्यविकृ(तं)त्य भावनीयं । गतं तैरश्चमधुना मानुषमाह-

[भा.३१४०]　मानुस्सगं चउद्धा अट्ठिं मुत्तूण सयमहोरत्तं ।
परियावण विवणा सेसेझग सत्तअट्ठेव ।।

वृ- मानुषमानुषमस्वाध्यायिकं चतुर्धा । तद्यथा-चर्मरुधिरं मांसमस्थि तत्र एतेष्वस्थि मुक्त्वा शेषेषु सत्सु क्षेत्रतो हस्तशताभ्यंतरे न कल्पते स्वाध्यायः कालतोऽहोरात्रं, परियावण विवणत्ति-मानुषं तैरश्चं वा यद् रुधिरं तत् यदि पर्यापन्नत्वेन स्वभाववर्णाद् विवर्णीभूतं भवति, खदिरसारसमाससारादिकल्पं तदा तदस्वाध्यायिकं न भवतीति क्रियते तस्मिन् पतितेऽपि स्वाध्यायः, । सेसत्ति पर्यापन्नं विवर्णं मुक्त्वा शेषमस्वाध्यायिकं भवति, । तिगत्ति यत् अविरताया मासे मासे आर्तवमस्वाध्यायिकमागच्छति तत्स्वभावतस्त्रीणि दिनानी गलति, ततस्तानि त्रीणि दिनानि यावदस्वाध्यायस्त्रयाणां दिवसानां परतोऽपि कस्याश्चित् गलति, परं तदार्तवं न भवति तन्महारक्तं नियमात्पर्यापन्नं विवर्णं भवतीति नास्वाध्यायिकं गण्यते । तथा यदि प्रसूताया दारको जातस्तदा सप्तदिनान्यस्वाध्यायिकमष्टमे च दिवसे कर्तव्यः । अथ दारिकी जाता तर्हि सा रक्तोत्कटेति तस्यां जातायामष्टौ दिनान्यस्वाध्यायो नवमे दिने स्वाध्यायः कल्पते ।

[भा.३१४१]　रत्तुक्कडा इत्थी अट्ठादिना तेन सुत्त सुक्कहिए ।
तिएहदिनानवरेणं अनाउयं तं महारत्तं ।।

वृ- निषेककाले यदि रक्तोत्कटता तदा स्त्री इति तस्यां जातायां दिनान्यष्टावस्वाध्यायः दारकः शुक्राधिकस्तेन तस्मिन् जाते सप्तदिनानि अस्वाध्यायः । तथा स्त्रीणां त्रयाणां दिनानां परतस्तन्महारक्तमनार्तवं भवति ततो न गणनीयं-

[भा.३१४२]　दंते दिट्ठे विगिंचण सेसट्ठिगबारसेव वासाई ।
झामिते वूढे सीयाण पाणमादीण रुद्द घरे ।।

वृ- यत्र हस्तशताभ्यन्तरे दारकादीनां दन्तः पतितो भवति तत्र निभालनीयं यदि दृश्यते तदा

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

परिष्ठाप्यः, । अथ सम्यग् मृग्यमाणैरपि न दृष्टस्तदा शुद्धमिति कल्पते स्वाध्यायः, । अन्ये तु ब्रुवते तस्यावहेडनार्थं कायोत्सर्गः करणीयः दन्तं मुक्त्वा शेषे अङ्गोपाङ्गादिसम्बन्धिन्यस्थीनि हस्तशताभ्यन्तरं पतिते द्वादशवर्षाणि न कल्पते स्वाध्यायः । अथ तत्स्थानमग्निकायेन ध्यामितं पानीयेन वा प्रव्यूढं तदा शुद्धमिति ध्यामिते व्यूढे वा स्वाध्यायः कल्पते, । तदा सीयाणत्ति श्मशाने यानि कलेवराणि न दग्धानि तानि अस्वाध्यायिकानि न भवति यानि पुनस्तत्रानाथकलेवराणि न दग्धानि निखातीकृतानि वा तानि द्वादशवर्षाणि स्वाध्यायं घ्नन्ति । यद्यपि च नाम श्मशानं वर्षोदकेन प्रव्यूढं तथापि तत्र न कल्पते स्वाध्यायो मानुषास्थि बहुलत्वात् । पाणमादीणत्ति पाणानामाडम्बरो नामयक्षो हिरनिक्ता (डिक्का) परनामा दैवतं तस्यायतनस्याधस्तात् मानुषान्यस्थीनि निक्षिप्यन्ते, ततस्तत्र तथा मातृगृहे चामुण्डायतने रुद्रगृहे वाधस्तात् मानुषं कपालं निक्षिप्यते । ततस्तयोरपि द्वादशवर्षाण्यस्वाध्यायः ।

[भा.३१४३] सीयाणे जं दड्ढं न तं त मुत्तूणणाह निहायाइं ।
आडंबरे यरुद्देमादिसु हेठठियाबारा ।।

वृ- श्मशाने यत् दग्धमस्थिजातं तदस्वाध्यायिकं न भवति, तन्मुक्त्वा शेषाणि न दग्धानि निखातानि वा तानि द्वादशवर्षाणि स्वाध्यायं घ्नन्ति । तथा आडम्बरे आडम्बरयक्षायतने रुद्रे रुद्रायतने मातृषु मातृगृहेषु आडम्बरादीनामधस्तादस्थीनि सन्ति तेन कारणेन तत्र द्वादशवर्षाण्यस्वाध्यायः ।

[भा.३१४४] असिवोमाधयणेसुं बारसअवसोहितंमि न करेंति ।
झामियवूढे कीरइ आवासियसोहिते चेव ।।

वृ- यत्र ग्रामे समुत्पन्नेनाशिवेन भूयान् जनः कालगतो न च निष्काशितो यदि वा अवमौदर्येण प्रभूतो जनो मृतो न च निष्काशितो अथवा आघातस्थानेषु भूयान् जनो मारयित्वा निक्षिप्तो वर्तते । तत एतेष्वशिवावमौदर्याघातस्थानेषु पूर्वं विशोधनं क्रियते, । विशोधने च क्रियमाणे यत् दृष्टं तत्परित्यज्यते । अदृष्टविषये च देवतायाः कार्योत्सर्गं कृत्वा पठन्ति । अथ न क्रियते विशोधनं ततस्तस्मिन्नविशोधिते द्वादशवर्षाणि यावत् स्वाध्यायं न कुर्वन्ति, । अथ तदशिवादिस्थानमग्निकायेन ध्यामितं वर्षोदकेन वा प्लावितं तदा क्रियते तत्र स्वाध्यायः आवासिय सोहिए चेयत्ति श्मशानं यदि भूयो जनैरावासितं तस्मिन्नावासिते शोधनं क्रियते तत् दृश्यते तत् विविच्यते । एवं शोधिते तस्मिन् अदृष्टास्थ्युपघाताय देवतायाः कायोत्सर्गं कृत्वा स्वाध्यायं प्रस्थापयन्ति ।

[भा.३१४५] उहरग्गाममयंमी न करेंती जाननीणियं होति ।
पुरगामे च मडंते वाडवसाहिं परिहरंति ।।

वृ- उहरके क्षुल्लक ग्रामे कोऽपि मृतस्तस्मिन् मृते तावत्स्वाध्यायो न क्रियते यावत्तत्कलेवरं न निष्काशितं भवति, । पुरे पत्तने महति वा ग्रामे वाटके साहौ वा यदि मृतो भवति तदा तं वाटकं साहिं वा परिहरन्ति । किमुक्तं भवति । तत्र न कुर्वन्ति स्वाध्यायं यावत्ततः वाटकात् साहितो वा न निष्काशितं भवति वाटकात् साहीतो अन्यत्र मृते ना स्वाध्यायः ।

[भा.३१४६] जति उ उवस्सय पुरतो नीइज्जइ तंमहल्लयं ताहे ।
हत्थसयं तो जावउ तावउ न करेंति सज्झायं ।।

वृ- यदि तत्कलेवरं मृतकं नीयमानं यदि संयतानामुपाश्रयस्य पुरतो हस्तशताभ्यन्तरेण नीयते, ततो यावत् हस्तशतांतो हस्तशतं व्यतिक्रम्यते तावन्न कुर्वन्ति स्वाध्यायं हस्तशतं व्युत्क्रान्ते पठन्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३१४७] कोवी तत्थ भणेज्ञा पुप्फादी जाउ तत्थ परिसाढी ।
जा दीसंति तावउ न कीरए तत्थ सज्झातो ।।

वृ- कोऽपि तत्र ब्रूयात् या मृतके नीयमाने पुष्पादीनामादिशब्दात् जीर्णचीवरखण्डादीनामुपाश्रयस्य पुरतो हस्तशताभ्यन्तरे परिशाटिः सा यावत दृश्यते तावत्तत्र न क्रियते स्वाध्यायः । अत्र सूरिराह-

[भा.३१४८] भन्नइ न य तंतु तहिं निज्ञंतो मोत्तुहो असज्झायं ।
जम्हा चउप्पयारं सारीरमतो न वज्ञति ।।

वृ- भण्यते-अत्रोत्तरं दीयते तत्र नीयमानं मृतकं मुक्त्वा अन्यत् कतकपुष्पादिकं पतितमस्वाध्यायिकं न भवति । यस्मात् शरीरमस्वाध्यायिकं चतुः प्रकारं रुधिरादिभेदतश्चतुर्विधं पुष्पादिकं च तद्व्यतिरिक्तमतोऽस्वाध्यायिकतया तत्र वर्जयन्ति । आत्मसमुत्थंत्वग्रेतनसूत्रे व्याख्यास्यते । तदेवं नो कप्पइ निग्गंथाण वा २ असज्झाइए सज्झायं करेत्तए इति सूत्रं व्याख्यातमधुना कप्पइ निग्गंथाण वा निग्गंथीण वा सज्झाइए सज्झायं करेत्तए इति सूत्रव्याध्यानार्थमाह-

[भा.३१४९] एसो उ असज्झातो तव्वज्ञित्तो झायो तत्थिमा जयणा ।
सज्झाइए विकालं कुणइ अप्पहिं तु चउलहुगा ।।

वृ- एषोऽनन्तरोदित आत्मसमुत्थपरसमुत्थभेदभिन्नो अस्वाध्याय उक्तस्तद्विवर्जितस्तद्व्यतिरिक्तः स्वाध्यायः स्वाध्यायिकमित्यर्थः । तत्र स्वाध्यायिक इयं वक्ष्यमाणयतना तामेवाह-स्वाध्यायिकेऽपि सति कालं प्रत्युपेक्ष्य स्वाध्यायं करोति यदि पुनः कालमप्रत्युपेक्ष्य स्वाध्यायं करोति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः । अत्र परावकाशमाङ्कते-

[भा.३१५०] जइ नत्थि असज्झायं किं निमित्तं तु धेप्पए कालो ।
तस्सेव जाणणठा भणइ किं अत्थि नत्थित्तिं ।।

वृ- ननु यदि नास्त्यस्वाध्यायमस्वाध्यायिकं तर्हि कं निमित्तं केन कारणेन कालो गृह्यते । सूरिराह-भण्यते तस्यैवास्वाध्यायिकस्य परिज्ञानार्थं कालो गृह्यते यथा किमस्ति तद स्वाध्यायिकं किं वा नेति । यद्यस्वाध्यायिकं भविष्यति ततः कालो न शुद्धमासादयिष्यति अथ नास्ति ततः कालो शुद्धो भविष्यति ।

[भा.३१५१] पंचविह असज्झाइस्स जाणणठाए पेहए कालं ।
काए विहीए पेहे सामायारी इमा तत्थ ।।

वृ- यतो अस्वाध्यायस्यैव परिज्ञानाय कालग्रहणमुक्तं तीर्थकरगणधरैस्ततः पञ्चविधस्यास्वाध्यायिकस्य ज्ञानायावश्यं प्रेक्षते साधुः कालं, । शिष्य प्राह-केन विधिना प्रेक्षते कालः । सूरिराह-तत्र कालप्रेक्षणे इयं वक्ष्यमाणा सामाचारी तामेवाह-

[भा.३१५२] चउभागवसेसाए चरिमाए पोरसीए ।
उग्गतो ततो पेहेज्ञा, उच्चारादीन भूमीतो ।।

वृ- दिवसस्य चतुर्थी पौरुषी चरम पौरुषी तस्यां चरमायां पौरुष्यां चतुर्भागावशेषायां तिस्त्र उच्चारादीनां उच्चार प्रश्रवण कालादीनां भूमी प्रत्युपेक्षेत । इयमत्र भावना-उपाश्रयपरिधिस्तस्यान्तरिस्त्रो भूमीरुच्चारस्याध्यासितव्याः प्रत्युपेक्षते तद्यथा आसन्ने दूरे मध्ये च तिस्त्रौऽनध्यासितव्यास्ता अध्येवमेवमेताः परिधस्थान्तः । षट् एवमेव परिघाद्बहिरपि षट् तद्यथा-आसन्नदूरमध्य भेदतस्तिस्त्रोऽनध्यासितव्यास्तिवस्त्रोऽनध्यासितव्या इति सर्व संकलनया उच्चार भूमयो द्वादश एवमेव प्रश्रवणस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशभूयस्तिस्रो भूमयः कालस्य तद्यथा-आसन्ने दूरे मध्ये एताश्चोपाश्रयपरिघस्यान्तर्वेदितव्याः । सर्वसंख्यया चतुर्विंशतिभूमीः प्रत्युपेक्षते । एतदेवाह-

[भा.३१५३] अहियासिया य अंतो आसन्ने चेव दूरे मज्से य ।
तिनेव अनहियासी अंतो छ छच्च बाहिरतो ।।

[भा.३१५४] एमेवय पासवणा बारस चउवीसतिं तु पेहित्ता ।
कालस्स य तिण्णि भवे अह सूरो अत्थमुवयाति ।।

वृ- अध्यास्या अध्यासनीया उपाश्रयपरिधस्यान्तस्तिस्रो भूमयस्तद्यथा-आसन्ने दुरमध्ये च एवमेव तिस्रो मध्येऽनध्यास्या अध्यासितुमशक्याः सर्वसंख्याया अन्तरुच्चारस्य भुमयः षट् एवमेव षट् परिधाद्बहिरपि सर्वसंकलनया द्वादशोच्चारभूमय एव प्रश्रवणेऽपि द्वादशभूमयः सर्वमीलने चतुर्विंशतिं भूमीः प्रत्युपेक्षते । तदनन्तरं कालस्य तिस्रो भूमयः जघन्येन हस्तान्तरिताः प्रत्युपेक्ष्य भवन्ति । तासु च प्रत्युपेक्षितास्तथानन्तरं सूर्योऽस्तुमुपयाति ।

[भा.३१५५] जइ पुन निव्वाघातो आवस्संतो करेंति सव्वेवि ।
सड्ढादिकहणवाधाय याए पच्छा गुरु ठंति ।।

वृ- सूर्यास्तमयसमये यदि निर्व्याघातं व्याघातस्याभावो गाथायां पुंस्त्वं प्राकृतत्वात् । ततः सर्वेऽपि गुरुप्रभृतय आवश्यकं प्रतिक्रमणं कुर्वन्ति । अथ श्राद्धानां श्रावकाणामादिशब्दादश्राद्धानां वा धर्मो गुरुणां कथयितव्योऽस्ति । ततः श्राद्धादीनां धर्मकथनेन व्याघातनायामावश्यकव्याघाते सति पश्चाद्गुरवो निषद्याधरसहिता आवश्यके तिष्ठन्ते । इयमत्र भावना-श्राद्धादीनां धर्मः कथयितव्यो भवति । तत आचार्यो धर्मं कथयति । निषद्याधरश्च पार्श्वे तिष्ठति । शेषाः पुनरावश्यकभूमौ सूत्रार्थस्मरण निमित्तमाचार्यमापृच्छय आत्मीये स्थाने पश्चादागच्छतामवकाशपथमरुद्धाबलं वीर्यं चागूहयन्तो यथाशक्ति चारित्रकायोत्सर्गेण तिष्ठन्ति, । स्थित्वा च सूत्रार्थान् तावदनुप्रेक्षन्ते, यावदचार्यः कायोत्सर्गेण स्थितो भवति, । तस्मिन् स्थिते दैवसिकमतीचारं चिन्तयन्ति । एतदेवाह-

[भा.३१५६] सेसाउ जहासत्ति आपुच्छित्ताण ठंति सट्ठाणे ।
सुत्तत्थज्झरणहेउं आयरियठियंमि देवसियं ।।

वृ- गुरुणा श्राद्धादीनां पुरतो धर्मकथने प्रारब्धे शेषाः साधवो गुरुमापृच्छय सूत्रार्थस्मरणहेतोः स्वसमिन् स्वस्मिन् स्थाने यथाशक्ति कायोत्सर्गेण स्थिता भवन्ति । आचार्ये कायोत्सर्गेण स्थिते दैवसिकमतीचारं चिन्तयन्ति । अत्रैवापवादमाह-

[भा.३१५७] जो होज्ज उ असमत्थो बालो वुड्ढो व रोगितो वावि ।
सो आवस्सगजुत्तो अत्थेज्ञा निजरापेही ।।

वृ- यो बालो वृद्धो रोगितो वा सञ्जातरोगः कायोत्सर्गेण स्थातुमसमर्थः स निर्जरापेक्षी आवश्यकयुक्तोऽवश्यकर्तव्यव्यापारयुक्त उपविष्टस्तिष्ठेत् ।

[भा.३१५८] आवस्सयं काऊणं जिनोवइट्ठं गुरुवएसेण ।
तिन्नि थुतिपडिलेहा कालस्स विही इमो तत्थ ।।

वृ- आवश्यकं जिनोपदिष्टं गुरुपदेशेन कृत्वा पर्यन्ते तिस्रः स्तुतयः प्रवर्धमान वक्तव्याः । तद्यथा-प्रथमा एकश्लोकिका, द्वितीया द्विश्लोकिका, तृतीया त्रिश्लोकिका तदनन्तरं कालस्य प्रत्युपेक्षा कर्त्तव्या ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां च कालप्रत्युपेक्षणायामयं वक्ष्यमाणो विधिस्तमेवाह-

[भा.३१५९] दुविहो य होइ कालो वाघाइमएयरो नायव्वो ।
वाघातो घंघसालाए घट्टणं धम्मकहणं वा ।।

वृ- इहकालो द्विविधो भवति, । तद्यथा-व्याघातिम इतरश्च । व्याघातेन निर्वृत्तो व्याघातिमः भावादिमइतीम प्रत्ययः । इतरो निर्व्याघातः । तत्र व्याघातो नाम घंघशालायां घट्टनं धर्मकथनं वा तत्राव्यतिरिक्ता बहुकार्येटिका सेविता वसतिर्घंघशाला तस्यां । इयमत्र भावना-घंघशालास्थितानां साधुनामतिदूरमागच्छतोर्वाकालप्रत्युपेक्षकयोः स्फालनं पतनं वा भवति । अथवा कृते आवश्यके गुरुणां श्राद्धादीनामग्रतो धर्मः कथयितव्यो वर्तते । ततो निवेदने व्याघातः एवं रुपेण घट्टनलक्षणेन व्याघातेन निर्वृत्तो व्याघात इतरो निर्व्याघातस्तत्र निर्व्याघाते द्वौ जनौ कालप्रत्युपेक्षकौ प्रवर्तेते तौ कालं प्रत्युपेक्ष्याचार्यस्य निवेदयतः, । व्याघातिमेतु काले उपाध्यायस्तृतीयः काले प्रत्युपेक्षया दीयते, येन तौ तस्येव पुरतः कालं निवेदयतः । एवं ते द्वौ त्रयो वा जना आचार्यं मस्तकेन वन्दामहे इत्यनेन वचनेनाभिमुखीकृत्य पृच्छन्ति-संन्दिशत कालप्रत्युपेक्षका वयं व्रजाम इति एवमापृछ्य निर्व्याघाते गुरुणामितरथोपाध्यायस्य वन्दनकं दत्वा प्रादोषिकं कालं गृह्णीम इत्यापृच्छय द्वयोर्व्रजतोर्यदि दीपद्यो[ज्यो]तिषास्पर्शनं भवति क्षुतं वा श्रवणपथमागतं तदा कालवधो भवतीति अथ न सन्त्येतानि तदा कालभूमिं व्रजतः एतदेव सविस्तरं प्रतिविवादयिषुरिदमाह-

[भा.३१६०] वाघाते ततिओ सिं दिज्जइ तस्सेव ते निवेदंति ।
इहरा पुच्छंति दुवे, जोगं कालस्स घेच्छामो ।।

वृ- व्याघाते घङ्घशालायां घट्टनरुपे धर्मकथनरुपे वा तृतीयस्तयोः कालप्रत्युपेक्षकयोरुपाध्यायो दीयते, ततस्तौ तस्यैव पुरतो निवेदयतः सर्व सन्देशापनादिकालानुष्ठानं तस्याग्रे कुरुत इत्यर्थः, । इतरथा व्याघाताऽभावे द्वौ कालप्रत्युपेक्षकौ गुरुमापृच्छ्य तौ यथायोगं व्यापारं कालस्यकरिष्याव इति ।

[भा.३१६१] कित्तिकम्मे आपुच्छण आवासियखलिय पडियवाघाए ।
इंदियदिसायतारा वासमसज्झाइयं चेव ।।

वृ- यदि निर्व्याघातं भवति, ततो गुरुणां कृतिकर्मवन्दनकं दातव्यमितरथा उपाध्यायस्य, ततः कृतकर्मणि प्रदत्ते कालग्रहणास्याप्रच्छनं कर्तव्यम् । यथा प्रादोषिकं कालं गृह्णीमस्तत्र यद्यना-पृच्छ्यावश्यकी न करोति, भूमिं वा न प्रमार्जयति । अपान्तराले गच्छन् स्खलितः पतितो वा वस्त्रादि वा क्वापि विलगति तदा कालस्य व्याघातः । अथवेन्द्रियार्थाः प्रतिकूलाः समापतिता दिशो वा विपरीताः प्रतिभान्तिस्म तारा वा पतन्ति, वर्षं वा अकाले निपतति, । अन्यद्वा अस्वाध्यायिकमुपजातं तदा कालवधः ।

[भा.३१६२] कितिकम्मं कुणमाणो, आवत्तगमादीयं ।
तहिं वितहं गुरु पडिच्छती तत्थ कालवहो ।।

वृ- कृतिकर्म वन्दनकं कुर्वन् यद्यावर्तादिकं तत्र वितथं करोति, गुरुर्वा तत्र वन्दनके वितथं प्रतीच्छति तदा कालवधः ।

[भा.३१६३] एवं आवासा सज्जमादि वितहं खलियपडिए य ।
भिंताण छीयजोई वहोज्झा ताहे नियत्तंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एवमावश्यिकीमशय्यां आदिशब्दादन्यामपि भूमिप्रत्युपेक्षणादिकां वितथां क्रियां कुर्वन्ति, तथास्खलिते पतिते च तथा यदि निर्गच्छतो क्षुतं भवति प्रदीपज्योतिर्वा भवेत्तदा व्याघात इति तौ निवर्तेते।

[भा.३१६४] अह पुन निव्वाघायं ताहे वच्चंति कालभूमिं तु ।
जइ तत्थ गोणमादी संसप्पापततो एंति ।।

वृ- अथ पुनर्निर्व्याधातं यथोक्तरुपस्यैकस्यापि व्याघातस्याभावस्तदा कालभूमिं व्रजतः, । यदि तत्र कालभूमौ गौणमादीति गवादय आदिशब्दात् श्वादि परिग्रहः । संसर्पा बहवः कीटका वेल्लूकप्रभृतयोऽत्रादि शब्दान्मार्जारादि परिग्रहः पतत आगच्छन्ति तत्र (तत्र) कालग्रहणं कुर्वन्ति कालस्य व्याहननात् ।

[भा.३१६५] एमादि दोसरहिते संडासादी पमज्जिउ निविट्ठो ।
अच्छंति निलिच्छंतो दोदो दिसो दु अग्गादि (वि) ।।

वृ- एवमादिभिरनन्तरोक्तैर्दोषैरहिते कालग्रहणयोग्यप्रदेशे सण्डासादि प्रमार्ज्य कालग्रहणवेलां प्रतीक्ष्यमाणो निविष्टस्तिष्ठति । इतरोऽपि दण्डधारी युगमात्रान्तरितस्तिष्ठति तौ चैवं द्वावपि तिष्ठतो द्वे द्वे दिशौ निरीक्षमाणौ । पुनः कथंभूतावित्याह-

[भा.३१६६] सज्झायमचिंतंता कविहसिए विज्जुगज्जिउक्काए ।
कनगम्मिय कालवहो दिठे अदिठे इमा मेरा ।।

वृ- प्रत्येकं द्वे द्वे दिशौ निरीक्षमाणावुपयुक्तौ स्वाध्यायमचिन्तयन्तावननुप्रेक्षमाणौ तिष्ठतः, यदि स्वाध्यायमनुप्रेक्षेते तदा कालवधः । दिशो निरीक्ष्यमाणौ च यदि कपिहसितं श्रृणुतः । कपिहसितं नाम नभसि विकृतिरुपस्य वानर सद्दश मुखस्य अटट्टहासः । विद्युतं वा पश्यतो गर्जितं वा समाकर्णयन्तः उल्का वा निरीक्षेते तदा कालवधः । कनकेऽपि च वक्ष्यमाणसंख्याके निपतिते कालवधः । एवं तावत् द्दष्टेऽद्दष्टे पुनरियं वक्ष्यमाणमर्यादासमाचारी तामेवाह-

[भा.३१६७] कालो सज्झाय तहादोवि समप्पंति जह समं चेव ।
तह तं तुलंति कालं चरमदिसं वा असज्झायं ।।

वृ- तथा कथं च नापि तं कालं तुलयतः कालग्रहणवेलां कलयतो यथाकालस्तथा सन्ध्यावद्वावप्येतौ यथा समकं समाप्नुतः समाप्तिं यातः । काले समाप्ति यथा संध्यादिविगमो भवतीति भावः, । यदि वा यथा कालसमाप्तौ चरमां पश्चिमां दिशं ससन्ध्याका पश्यतस्तथा तुलयतश्चरमायां दिशि पश्चात्सन्ध्या विगमो भवतीति प्रकारान्तरेोपदर्शनम् ।

[भा.३१६८] नाऊण कालवेलं ताहे उठेउ दंडधारीउ ।
गंतूण निवेदेती बहुवेला अप्पसद्दत्ति ।।

वृ- उक्तप्रकारेण कालग्रहणवेलां तुलयित्वा ज्ञात्वा च कालवेलां किमुक्तं भवति । स्तोकावशेषसन्ध्यात इत इदानीं कालग्रहणसमयइति परिज्ञाय तदनन्तरं दण्डधारी साधुजननिवेदनार्थमुत्तिष्ठति, उत्थाय ततः कालग्रहणस्थानान् दण्डधारी प्रतिश्रयमागच्छति, । तस्य वा गच्छत इयं सामाचारी यदि समागच्छन् नैषेधिकी न करोति कालवधः, । अथ नमो खमासमणाणमिति न ब्रूते, तदापि कालवधः, । एवं गत्वा सनिवेदयति यथा कालस्य बहुवेला वर्त्तते, तस्मात् यूयमल्पशद्बा भवथइति ।

[भा.३१६९] ताहे उवउत्तेहिं अप्पसद्देहिं तत्थ होयव्वं ।
जइ न सुयत्थकेहिं विदिठंतो गंडएणतहिं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एवंदंडधारिणा निवेदने कृते तत्र कालग्रहणवेलायां सर्वैरप्युपयुक्तैरल्पशब्दैर्भवितव्यं, यदि पुनस्तत्र तथा दण्डधारिणा निवेदने कृतेऽपि कैश्चिदपि श्रुतं न भवेत्तत्र दृष्टान्तो गण्डकेन वक्तव्यस्तमेवाह-

[भा.३१७०] जह गंडगमुग्धुट्ठे बहूहिं असुयंमि गंडए दंडो ।
अह थोवेहिं न सुयंति वयति तेसिं ततो दंडो ।

वृ- यथा ब्राह्मणाः किमपि भक्तुकामाः वा पर्यालोचयितुकामा वा चतुर्वेदसमवायविमित्तं गण्डकं पूर्वस्थापितं संदिशन्ति, । यथा चतुर्वेदसमवायोद्घोषणं कुरुते, अतस्तेन गण्डकेनोद्घुष्टे यदि बहुभिर्नश्रुतं तदा गण्डके दण्डो गण्डकस्य दण्डः क्रियते, । अथ स्तोकैर्न श्रुते च बहुभिस्तु श्रुतमिति तदा यैर्न श्रुतं तेषां दण्डो निपतति । एष दृष्टान्तोऽयमर्थोपनयः ।

[भा.३१७१] एविहवि दठव्वं दंडधरे होति दंडो तेसिं च ।
आवेदेउं गच्छइ तमेव ठाणं तु दंडधरो ।।

वृ- एवमुक्तेन प्रकारेण इहापि द्रष्टव्यं यदि बहुभिर्नश्रुतं तदा दण्डधरस्य दण्डो भवति, । अथ बहुभिः श्रुतं कतिपयैर्नाश्रावि, तदा तेषां कतिपयानाम श्रुतवतां दण्डः । एवं दण्डधरः साधूनामावेद्य तदेवस्थानमात्मीयं गच्छति ।

[भा.३१७२] ताहे कालग्गाही उट्ठेति गुणेहिमेहिं जुत्तो उ ।
पियधम्मो दढधम्मो संविग्गो वज्जभीरु य ।।

वृ- ततो दण्डधरस्यस्वस्थानागमनादनन्तरं कालग्राही । एभिर्वक्ष्यमाणैर्गुणैर्युक्तः कालग्रहणायोत्तिष्ठति, कैर्गुणैर्युक्त इत्याहप्रियो धर्मो यस्यासौ प्रियधर्मा न दृढधर्मः २, एकः प्रियधर्मापि दृढधर्मापि च ३, एको न प्रियधर्मो नापि दृढधर्मः ४ । अत्र पदद्वयोपादानात्तृतीयभङ्गग्रहणं संविग्नः सम्यग् अनुष्ठाता कस्मात् संविग्न इत्याह-वज्रभीरु अवद्यं पापं तस्माद्भीरुः अवद्यभीरुरथ प्रथमाहेतौ निमित्तकरणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शनमिति वचनात्ततोऽयमर्थो यदवद्यभीरुस्ततः संविग्नत्वं करोति ।

[भा.३१७३] खेयन्नो य अभीरु एरिसओ सो उ कालगाहीउ ।
उठेइ गुरुसगासं ताहे विनएन सो एइ ।।

वृ- खेदज्ञः कालविधेः सम्यक् ज्ञाता अभीरुर्मार्जारादेर्न बिभेति, अन्यथा उत्त्रस्तस्य च्छलना स्यात् । एतादृशः स कालग्राही तत उत्थाय गुरुसकाशं स्थापनागुरोः समीपं विनयेनागच्छति । कथमित्याह-

[भा.३१७४] तिनिय निसीहियातो नमनुस्सेहो य पंचमंगलए ।
कितिकम्मं तह चेव य काउं कालं तु पडियरई ।।

वृ- स्थापनागुरुसमीपमागच्छन् आसन्नदूरे मध्ये च तिस्रोः नैषेधिकीः करोति तदनन्तरं च प्रत्यासन्नागमनेन नमनं नमः क्षमाश्रमणेभ्य इति भणनं ततो हस्त शताभ्यन्तरे गमनेऽप्यैर्यापथिक्याः प्रतिक्रमणं, तत्र कायोत्सर्गे स्मर्तव्यं पञ्चमङ्गलिकस्तस्मिन् स्मृतं नमस्कारेण पारयित्वा पञ्चमङ्गलिकस्याकर्षणं ततो मुखपोतिकां प्रत्युपेक्ष्य कृतिकर्मवन्दनकं द्वादशावर्तं कर्तव्यम् । तत्कृत्वा तदनन्तरं कालं प्रादोषिकं प्रतिचरति, सन्दिशत प्रादोषिकं कालं गृह्णीम इत्युक्त्वा प्रतिगृह्णाति, यथा प्रतिचरति तथा प्रतिपियादयिषुरिदमाह-

[भा.३१७५] थोवावासेसियाए संज्झाए वा तिउत्तराहुत्तो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दंडधरो पुव्वमुहो वायइ दंडंतरा काउं ।।

वृ- स्तोका वा शेषायां सन्ध्यायां कालग्राहक उत्तराभिमुखस्तिष्ठति । दण्डधरः पुनः पूर्वाभिमुखस्तिष्ठति, दण्डमन्तरा अपान्तराले तिर्यक् ऋज्वायतं कृत्वा ।

[भा.३१७६] गाहणनिमित्तुस्सग्गं अट्ठुस्सासेय चिंतियस्सारे ।
चउवीसगदुमपुप्फिय पुव्वा एक्केक्किय दिसाए ।।

वृ- त्रीन् वारान् भूमिं रजोहरणेन प्रमार्ज्य ततश्चोत्तराभिमुखो द्वावपि पादौ स्थापयित्वा पञ्चभिरिन्द्रियैः षष्ठेन च मनसा सम्यगुपयुक्तः प्रादोषिककालग्रहणनिमित्तं उत्सर्गं कायोत्सर्गं करोति । स चैवं पादोसियकालस्स सोहणवत्तियाए ठामि काउस्सग्गं अन्नत्थउससिएणं जाव अरिहंताणं भगवंताणं नमोक्कारेणं न पारेमि तावकायं ठाणेणं मोणेणं झाणेणं अप्पाणं वोसिरामि । एवं कायोत्सर्गं कृत्वा तत्राष्टावुच्छ्वासान् चिन्तयति पञ्च नमस्कारं मनसानुप्रेक्षते इत्यर्थः, । ततो मनसैव नमस्कारेण पारयित्वा चतुर्विंशतिस्तवं द्रुमपुष्पिकं श्रामण्यपूर्विकाध्ययनं परिपूर्णं क्षुल्लिकाचारकथाध्ययनस्य त्वाद्यामेक गाथां मनसानुप्रेक्षत । एवं तावदुत्तरस्यां दिशि विधिरुक्तः । इत्थं च शेषायामप्येकैकस्यां दिशि द्रष्टव्यम् । तद्यथा-क्षुल्लिका-चारकथाद्यगाथानुप्रेक्षानन्तरं ततोऽपि परावृत्य पश्चिमाभिमुखं एतच्चिन्तयति । तदनन्तरं ततोऽपि परावृत्य पश्चिमाभिमुख एव चिन्तयति चतसृष्वपि च दिक्षु प्रत्येकं चिन्तयन् द्वे द्वे दिशौ निरीक्षते द्वे द्वे दिशौ दण्डधरः । तत्र यदीमानि भवेयुस्तदा कालवधः कानीत्यत आह-

[भा.३१७७] बिंदुयच्छी य परिनयभयरोमं चेव होइ कालवहो ।
भासंत मूढ संकिय इंदियविसए य अमणुणो ।।

वृ- यदि कालं गृह्णत उदकबिन्दुस्तस्य दण्डधरस्य चोपरि निपतेत् क्षुतं केनापि स्यात् बावो तस्यान्यथा परिणतः स्यात् यदिवाऽन्यतोऽनानुपूर्व्या दिशः, परिणतोऽथवा अध्ययनमनानुपूर्व्यानुप्रेषितुं परिणतः । यदि वा बिभीषिकादि दर्शनतोभयेन रोमाञ्चः संजातः । अथवा वाचा अध्ययनमन्यद्वाभाषते यदि वा दिशि अध्ययने वा मूढं शङ्कितं वा अध्ययनादिकं जातं । अन्यत्र वा दिशि अध्ययने वा संक्रान्तः इन्द्रियविषयो वा अमनोज्ञः संवृत्तो यद्वा दुर्गन्धो गन्ध आगच्छति विकृतं वा रुपं पश्यति, । विकृतं नामास्वाभाविकं चेडरुपंच विस्वरं रुदितिच्छिन्द्धि भिन्द्धि मारयेति वा शब्दान् शृणोति । उपलक्षणमेतत् । इष्टविषयेषु वा विरागमुपगच्छति, तदा कालवधः । एतस्या एव गाथाया व्याख्यानमाह-

[भा.३१७८] गिण्हंतस्स उ काले जइ बिंदू तत्थ कोइ निवएज्जा ।
छीयं व परिणतो वा भावो होज्जा से अन्नत्तो ।।

[भा.३१७९] भीतो विभासियाइ भासंतो वावि गेण्हइ न सुज्झे ।
मूढो व दिस ज्झयणे संकियं वावि उवघाओ ।।

[भा.३१८०] अन्नं वादिसज्झयणं संकतो होज्जणिट्ठ विसए वा ।
इट्ठेसु वा विरागं जई वच्चइ तोह तो कालो ।।

[भा.३१८१] जइ उत्तरं अपेहिय गिण्हइ सेसाउ ता हतो कालो ।
तीसु अदीसंतीसु वि तारासु भवे जहन्नेणं ।।

वृ- यदि उत्तरां दिशमपेक्ष्य शेषादिशः प्राथम्येन गृह्णाति किमुक्तं भवति यदि पूर्वमुत्तराभिमुखो न भवति, । किन्तु शेषदिगभिमुखस्तदाहतः कालस्तथा यदि जधन्यतस्तिसृषु तारास्वदृश्यमानासु कालं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गृह्णाति तदापि हतः कालः ।

[भा.३१८२] वासं च निवडइ जती अहव असज्झाइयं व निवेहेज्ञा ।
एमादीहिं न सुज्झे, तव्विरहंमी भवेसुद्धो ।।

वृ- यदि वर्ष निपतति अथवा किंचिदस्वाध्यायिकं निपतेत् तदा एवमादिभिरादिशब्दात् यदि कायोत्सर्गेण तिष्ठन् भूमिं न प्रमार्जयति, । च्छिन्नं वा मार्जारादिनापान्तरालं दण्डधरो वा कालग्राहिणो दुरव्यवस्थानस्थितो न युगान्तरमात्र इत्यादि परिग्रहः । कालो न शुद्धयति उपहन्यते काल इत्यर्थः । तद्विपरीते यथोक्तदोषाभावे भवति शुद्धः कालः ।

[भा.३१८३] गहियंमी कालम्मी दंडधरो अत्थती तहिं चेव ।
इयरो पुन आगच्छइ जयणाए पुव्व भणियाए ।।

वृ- गृहीते काले दण्डधरस्तत्रैव कालभूमौ तिष्ठति इतरः पुनः कालग्राही यतनया पूर्वभणितया आवश्यकी कृत्वा सम्यगु पयुक्तो रजोहरणेन भूमिं प्रमार्जयन् गुरुसमीपागमने च नैषेधिकी कुर्वन् इत्यादिकयागच्छति ।

[भा.३१८४] जो गच्छंतंमि विही आगच्छंतंमि होंति सव्वेव ।
जं एत्थं नाणत्तं तमहं वुच्छं समासेणं ।।

वृ- यो गच्छति विधिरुक्त आगच्छंत्यपि विधिः स एव भवति नवरमत्र यन्नानात्वं तदहं समासेन वक्ष्ये । प्रतिज्ञातमेव निर्वाहयति-

[भा.३१८५] अकरणे निसीहियादी आवडणादीय होंति जोइक्खे ।
अपमज्जिय भीते छीए च्छिन्ने य कालवहो ।।

वृ- अकरणे नैषेधिक्यादेरादि शब्दात् आवश्यिक्या नमस्कारादेश्च परिग्रहः । यदि कालभूमेर्निर्गच्छन् आवश्यिकी न करोति गुरुसमीपं गच्छन् नैषेधिकी गुरुसमपिमागतो नमः क्षमाश्रमणेभ्य इति नमस्कारं वा यदि न करोति नाप्यैर्यापथिकी प्रतिक्रामति नापि वन्दनकं ददाति तदा कालवध इति योगः, । तथा आपतनादौ आपतने प्रस्खलने च कालवधः । तथा जोइक्खो नाम दीपः । जोइक्खं तह छाइल्लयं च दीवं मुणेज्ञाहि इति वा तज्ज्योतिः स्पर्शने वा कालवधः अथाप्रमार्जित भूमेरप्रमार्जने तथा क्षुते च्छिन्ने व मार्जारादिनापान्तराले मार्गे कालवधः ।

[भा.३१८३] इरियावहिया हत्थंतरेवि मंगलनिवेयणा समयं ।
सव्वेहिं वि पठविए पच्छाकरणं अकरणं वा ।।

वृ- आगत्य हस्तशताभ्यन्तराप्यैर्यापथिक्या प्रतिक्रन्तव्यम् । मुखपोतिका प्रतिलेखनान्तरं वन्दनकं दातव्यं । ततः शुद्धकाल इति मङ्गलनिवेदनं कर्तव्यम् । ततो मङ्गलनिवेदनान्तरं समकमेव सर्वैः स्वाध्याये प्रस्थापिते पश्चात्करणमकरणं वा कालदानस्य किमुक्तं भवति ? यः प्रस्थापनवेलायां नागतस्तस्य कालदानाकरणमितरेषां तु प्रस्थापनवेलागतानां कालदानकरणमिति एतदेवाह—

[भा.३१८७] सन्निहियाण वडारोपट्ठविए पमादिनो दए कालं ।
वाहिठिए पडियरइ पविसइ ताहे य दंडधरो ।।

वृ- स्वाध्याये प्रस्थापिते ये स्वाध्यायप्रस्थापनवेलायां प्रमादिनो नागतास्तेषां कालं न दद्यात्, शेषाणां तु दद्यात् । तथा चात्र मरुकज्ञातं विजृम्भते यः समवाये नागतस्तस्य वडारो भागो न दीयते, सन्निहितानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु दीयते, एवम त्रापि ये प्रस्थापना वेलायां नागतास्ते प्रमादेन तीर्थकराज्ञाभङ्गकारिण इति कालस्तेषां न दातव्यः शेषाणां तु दातव्य इति स्वाध्यायप्रस्थापनानन्तरं च कालग्राही अन्यो वा बहिः स्थितः कालं प्रतिचरति ततो दण्डधरः स्वाध्यायप्रस्थापनार्थं मध्ये प्रविशति ।

[भा.३१८८] पठवित वंदिते ताहे वुच्छंति केन किं सुयं भंते ।
ते विय कहंति सव्वं जं जेन सुयं वा दिट्ठं वा ।।

वृ- दण्डधरेणा प्रस्थापिते स्वाध्याये गुरौ च वन्दिते कालग्रादिदण्डधरावन्ये वा पृच्छन्ति साधून् केन किं श्रुतं भदन्त तेऽपि साधवः कथयन्ति यत् येन दृष्टं वा श्रुतं वा ।

[भा.३१८९] एगस्स दोण्ह वा संकियंमि कीरइ न कीरए तिण्हं ।
सगणंमि संकिए परगणंमि गंतुं न पृच्छंति ।।

वृ- एकस्य द्वयोर्वा क्षुतादौ शङ्किते स्वाध्यायः क्रियते त्रयाणां शंकिते न क्रियते, बहूनां शङ्कास्पदतया तस्य परमार्थतो निश्चितीभूतत्वात् । तथा स्वगणे शङ्किते परगणं गत्वा न पृच्छन्ति । यतो यत्रास्वाध्यायिक संभवस्तत्राशङ्कां परगणस्यस्थानान्तरवर्तिनस्तत्रास्वाध्यायिका संभवान्न भवेदप्याशंकेति ।

[भा.३१९०] पादोसितो अभिहितो इयानि सामन्नतो उ वृच्छामि ।
कालचउक्कस्सवि ऊ उवघाय विही उ जो जस्स ।।

वृ- तदेव मुक्तप्रकारेण प्रादोषिककालोऽभिहितः । सम्प्रति कालचतुष्कस्यापि सामान्यत उपघातविधिं वक्ष्ये । विशेषतोऽपि यो यस्योपघातविधिस्तमपि । प्रतिज्ञातमेव निर्वाहयति ।

[भा.३१९१] इंदियमाउत्ताणं हणंति कणगा उ सत्त उक्कोसं ।
वासासुयि तिन्नि दिसा उउबद्धे तारगा तिन्नि ।।

वृ- सर्वैरपीन्द्रियैर्मनसा वा युक्तानामुपयुक्तानां कनका उत्कर्षतः सप्त कालं घ्नन्ति । किमुक्तं भवति ? ग्रीष्मकाले यत्रः कणकाः कालं घ्नन्ति । शिशिरे काले पञ्चवर्षाकाले सप्त, उल्काकणकयोश्चायं विशेषः । स रेखा उल्का, रेखारहितः कनक इति । तथा वर्षासु तिस्त्रो दिशः प्रकाशयुक्ता यदि स्युस्तदा प्राभातिककाल शुद्धिरिति वा शेषः । इयमत्र भावना-वर्षाकाले उपरिच्छन्ने तिर्यग् दिक्ष्वच्छन्नासु मण्डपिकादौ काला गृह्यन्ते । तत्राद्येषु कालेषु यदि चतस्त्रोऽपि दिशः प्रकाशयुक्ता अनन्तरिता इति भावस्तदा शुद्धयति, तथा यद्युपरिनीचं तदा प्राभातिकं कालमुपविष्टोऽपि गृह्णाति । ऋतुबद्धे काले चतुर्ष्वपि कालेषु यदि चतस्त्रोऽपि दिशः प्रकाशयुक्तास्तदा शुद्धिरितरथा नेति । उउबद्धे तारगा तिन्नित्ति ऋतुबद्धे काले आद्येषु त्रिषु यदि तिंस्त्रस्तारका दृश्यन्ते तदा कालो गृह्यते । अदृष्टासु न कालो गृह्यते, कालग्रहणानन्तरं तु यद्यपि न दृश्यन्ते तारकास्तथापि पठंति प्राभातिके पुनः काले अदष्टेऽपि तारके ग्रहणमनुज्ञातं वर्षाकाले चत्वारोऽपि काला अदृश्यमानास्वपि तारकासु गृह्यन्ते ।

[भा.३१९२] कणगा हणंति कालं ति पंच सत्तेव घिंसि सिरवासो ।
उक्का उ सरेहागारेहारहितो भवे कनगो ।।

[भा.३१९३] वासासुं पाभाइए तिन्नि दिसा जइ पगासजुत्तातो ।
सेसेसु तिसु वि चउरो उउंमि चउरो चउदिसंपि ।।

[भा.३१९४] तिसु तिन्नि तारगातो उउंमि पाभाइए अदिठेवि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वासासु अतारगाउ चउरो छणे निविठोवि ।।

वृ- इदं गाथा त्रयमपि व्याख्यातार्थत्वात्सुप्रतीतं । च्छन्ने निविठो वीत्युक्तमतस्तदेव सविशेषं भावति-

[भा.३१९५]　　ठाणे सति बिंदूसुवगेण्हइ चिठ्ठोवि पच्छिमं कालं ।

पडियरति वावि एक्को एक्को अंतद्वितो गेण्हे ।।

वृ- वर्षाकाले तथाविधस्यान्यस्य स्थानस्यासति अभावे बिन्दुस्वपि निपतत्सुउपर्यति नीचतया ऊर्ध्वस्थानासंभवे उपविष्टोऽपि पश्चिमं प्राभातिकं कालं गृह्णाति तथा स्थाना सति एको दण्डधरो बहिः स्थितः कालं प्रतिचरति एकः पुनरन्तः स्थितः कालं गृह्णाति एष वर्षासु प्राभातिके काले विशेषो नाद्येषु त्रिषु कालेषु, । अथ कतरे चत्वारः काला उच्यन्ते । प्रथमः प्रादोषिको, द्वितीयोऽर्धरात्रस्फिटितः तृतीयो वैरात्रिकश्चतुर्थः प्राभातिकः, । अथ कः कालः प्रथमतः कस्यां दिशि गृह्यते । तत आह—

[भा.३१९६]　　पातोसि अद्धरत्ते उत्तरदिसि पुव्वपेहए कालं ।

वेरत्तियंमि भयणा पुव्वदिसा पच्छिमे काले ।।

वृ- प्रादोषिकमर्धरात्रमर्धरात्रस्फिटितं च पूर्वं प्रत्युपेक्षते गृह्णाति उत्तरस्यां दिशि, वैरात्रिके भजना विकल्पना उत्तरस्यां दिशि पूर्वं प्रत्युपेक्षते पूर्वस्यां वेति, पश्चिमे प्राभातिके काले प्रथमतः प्रत्युपेक्षणं पूर्वस्यांदिशि, अथ कियन्तः काला जघन्यत कियन्त उत्कर्षतः साधूनां ग्राह्यास्तत आह-

[भा.३१९७]　　काल चउक्कं उक्कोसएण जहन्नेन तिगं तु बोधव्वं ।

वेइयपयंमि दुगंतूमाइठ्ठाणे विमुक्काणं ।।

वृ- मातृस्थानेन विमुक्तानामशठानां साधूनामुत्कर्षेण कालचतुष्कं ग्राह्यं भवति, जघन्येन त्रिकं कालत्रिकं ग्राह्यं बौद्धव्यं द्वितीयपदे अपवादपदे द्विकं कालद्विकं तु शब्दादेकोऽपि कालो बोद्धव्यः । कथमुत्कर्षतः कालचतुष्कमत आह-

[भा.३१९८]　　पातोसिएण सव्वे पढमं पोरिसि करेंति सज्झायं ।

ताहे उ सूत्तइत्ता सुवंति जग्गंति वसभाउ ।।

वृ- प्रादोषिकेन कालेन सर्वे साधवः प्रथमपौरुषीं यावत्कालिकं स्वाध्यायं कुर्वन्ति, ततो द्वितीये यामे सूत्रवन्तः साधवस्तेस्वपन्ति, वृषभा जाग्रति । ते च जाग्रतस्तेनैष कालेन प्रज्ञापनादिकं परावर्तयन्ति, तावत् यावत् कालवेला भवति । ततः कालवेलायां कालस्य प्रतिक्रम्य ।

[भा.३१९९]　　फिडियंमि अद्धरत्ते काले घेत्तुं सुवंति जागरिया ।

ताहे गुरुगणंती चउत्थे सव्वे गुरू सुवती ।।

वृ- स्फिटिते अर्धरात्रं कालं गृह्णन्ति कालं गृहीत्वा ते आचार्यमुत्थापयन्ति ततस्ते जागरिताः स्वपन्ति ततो गुरव उत्थिताः सन्त उद्घाटकालिकं प्रज्ञापनादि गुणयन्ति । ततश्चतुर्थ्यां पौरुष्यामेव गाढायां वैरात्रिकं कालं गृहीत्वा सर्वेऽपि कालिकं श्रुतं परावर्तयन्ति गुरुः स्वपिति, ततो बालवृद्धादीनां वाचनोपग्रहकारिकालग्रहणाय यावत्यां वेलायां नवानां कालानां ग्रहणं भवति । तावतीं वेलां ज्ञात्वा एकः कालग्राही न प्रतिक्रामति शेषाः प्रतिक्रामन्ति यस्त्वप्रतिक्रान्तः स कालं प्राभातिकं गृह्णाति ।।

[भा.३२००]　　एवं तु होति चउरो कह पुन होज्जाहि तिनि कालाओ ।

पादोसियंमि पठिए गहियंमि अड्ढरत्ते य ।।

[भा.३२०१]　　जइ वेरत्तिय सुज्झे ताहे तेनेव अद्धरत्तेण ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

पढियं पाभादीयं गिह्णंती होति तिनेव ।।

वृ- एवमुपदर्शितेन प्रकारेण चत्वारः काला भवन्ति, कथं पुनस्त्रयः काला भवेयुः । सूरिराह-प्रादोषिके काले गृहीते पठितं तदनन्तरं चार्धरात्रेऽपि काले गृहीते यदि वैरात्रिको न शुद्ध्यति कालस्तदा तेनैवार्धरात्रिकेन कालेन पठित्वा प्राभातिकं कालं गृह्णन्ति । एवमेते त्रयः काला भवन्ति ।

[भा.३२०२] अहवा पढमे सुद्धे बितिय असुद्धंमि होति तिनेवं ।
पातोसिय वेरत्तिय अत्तिउवयोगा भवे दोन्नि ।।

वृ- अथवेति प्रकारान्तरोपप्रदर्शने प्रथमे प्रादोषिके काले शुद्धे द्वितीये अर्धरात्रिणि काले अशुद्धे त्रय एवं काला भवन्ति उपलक्षणमेतत् । तेन प्रादोषिके वा प्राभातिके वा अशुद्धे तत्र इत्यपि द्रष्टव्यं । कथं द्वौ कालौ भवत इत्यत आह-प्रादोषिके काले गृहीते अर्धरात्रिके वा गृहीते चरमायां पौरुष्यामवगाढायां वैरात्रिके काले गृहीते कालिकं श्रुतं परावर्तयद्भिः स्वाध्यायविषमे (ये) त्युपयोगभावतस्तावन्न ज्ञाता प्राभातिककालवेला यावत् सन्ध्या उपस्थिता । एवं मातृस्थाने विमुक्तानामशठानामपवादेन द्वौ कालौ भवतः, । तद्यथा प्रादोषिको वैरात्रिकश्च । अत्रैव प्रकारान्तरमाह-

[भा.३२०३] अहवावि अद्धरत्ते गहिए वेरत्तिए असुद्धंमि ।
तेनेवय पढियंमी पाभातियं सुद्धदोनेव ।।

वृ- अथवेति पूर्ववत् प्रादोषिकं कालं गृहीत्वा तेन कालिके श्रुते परावर्तिते द्वितीये यामे तेनैव कालेन प्रज्ञापनादि परावर्त्य कालवेलायामतिक्रान्तायामर्धरात्रिके काले गृहीते तेनाचार्येण प्रज्ञापनादौ परावर्त्तिते चतुर्थ्यां पौरुष्यामवगाढायां वैरात्रिके अशुद्धे ततस्तेनैवार्धरात्रिकेन कालेन कालिके पठिते प्राभातिके अशुद्धे द्वावेव कालौ भवतः, उपलक्षणमेतत् । तेन प्रादेषिक प्राभातिकयोरथवाऽर्धरात्रिक वैरात्रिकयोरथवार्धरात्रिकप्राभातिकयोर्यदि वा वैरात्रिक प्राभातिकयोर्ग्रहणे शेषयोरग्रहणे कालद्विकमेकतरस्य कालस्य शुद्धावेकः कालः ।

[भा.३२०४] नवकालवेलसेसे उवग्गहियठाए पडिक्कमए ।
न पडिक्कमए एगो नववारहए असज्झातो ।।

वृ- नवानां कालानां वेला यत्र स नवकालवेल इत्थंभूते चरमपौरुष्यां शेषबालवृद्धादीनां वाचनायां औपग्रहिक उपष्टम्भकारी प्राभातिकः कालस्तदर्थं शेषाः साधवो वैरात्रिकस्य कालस्य प्रतिक्रामन्ति । एको न प्रतिक्रामति । ततः स प्राभातिकं कालं गृह्णाति । अन्ये तु ब्रुवते कालग्राही वैरात्रिकस्य कालस्य प्रतिक्रम्य प्राभातिकं कालं गृह्णाति । शेषास्तु कालवेलायां वैरात्रिकस्य प्रतिक्रामन्ति प्राभातिकश्च कालो यदि नववारान् हतस्तदा ध्रुवमस्वाध्याय इति कथं नववारान् ग्रहणं हनने वा तत्र आह--

[भा.३२०५] एक्केक्को तिन्निवारे बीयादि हयंमि गेण्हए कालं ।
असती एक्को वि हु नववारे गेण्हति ताहे ।।

वृ- क्षुतादिनाहते एकैकस्त्रीन् वारान् कालं गृह्णाति । इयमत्र भावना क्षुतादिभिः कालस्योपघातं संभवे एकस्त्रीन् वारान् गृह्णाति । तस्याप्युपहतेऽन्यस्त्रीन् वारान् अथान्यः कालं गृह्णन् न विद्यते तर्हि तस्य गृह्णतोऽसत्यभावे एकोऽपि नववारान् कालं गृह्णाति, तथापि चेदुपहतस्तर्हि हता पौरुषीति ध्रुवमस्वाध्यायः-

[भा.३२०६] पाभाइयंमि काले संचिक्खे तिनित्थीय रुणेसु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चोदइ अनिठसद्दे जति होति काल घाताउ ।।

[भा.३२०७] एवं बारसवासे खरसद्देणं तुहम्मती कालो ।
भणइ मानुसनिट्ठे तिरियाणं तू पहारंभि ।।

वृ- प्राभातिके काले गृह्यमाणे त्रयः पुरुषाः क्षुतरुदितादि संचिक्खे इति परिभावयंति गाथायां तु सप्तमी द्वितीयार्थे बहुवचन सकला स्वाध्यायिक सूचनार्थं तेन क्षुतरुदितादीनीति द्रष्टव्यं । अत्र परश्चोदयति यदि अनिष्टे रुदितशब्दे कालघातो भवति । एवं सति खरशब्देन गर्दभशब्देन द्वादशवर्षाणि कालो हन्यते खरशब्दस्यार्तावानिष्ठुरतरत्वात्सूरिराह-भण्यते अत्रोत्तरंदीयते मानुष्यानिष्टे शब्दे कालोपघातः तिरश्चां तु प्रहारे दीयमाने विस्वर शब्दे ।

[भा.३२०८] पावासि जाइया ऊ जइ रोविज्जाहि कालवेलम्मि ।
ताहे घेप्प अनागत अहपुनारोए पगेचेव ।।

वृ- प्रवसतीत्येवं शीलः प्रवासी तस्य जायैव जायिका भार्या यदि कालवेलायां कालग्रहणसमये रुद्यात् तर्हि यावन्नरोदिति तावदनागते एवं कालो गृह्यते । अथ पुनः सा प्रगे एव अति समन्धकारेण रुदिति तत आह-

[भा.३२०९] ताहे उप्पन्नविज्जइ अह अन्नविया जया न वा एक्का ।
ताहे उग्घाडेज्जइ अह पुन वालं रुवेज्जासि ।।

[भा.३२१०] वीसरसरं रुवंते अव्वत्तगडिं भगंमि मा गिण्हे ।
अप्पेण वि विरसेणं महल्लवेडंतु उवहनती ।।

वृ- यदि सा अति समन्धकारे एवं रुदिति मा गृह्णीयात् कालं महत् पुनः खेदरूपमल्पेनापि विरसेन स्वरेण कालमुपहन्ति । तदेवं प्राभातिककालग्रहणविधिरुक्तः । सम्प्रति प्रस्थापन विधिमभिधित्सुराह-

[भा.३२११] गोसेउ पठावंती छीए छीए उ तिन्नि वारातो ।
आइण पिसिय महिया इ पेहणट्ठादिसा पेहे ।।

वृ- गोसे प्रभाते स्वाध्याये प्रस्थाप्यमाने यदि क्षुतं भवति तदा आकीर्णमासमन्तात् विकीर्णं यत् पिशितं यत् महिकादिकमस्वाध्यायिकं तत्प्रेक्षणार्थं दिशः प्रेक्षते । तत्र यदि न दृष्टमस्वाध्यायिकं तदा पुनः प्रस्थापयति । तत्रापि यद्यर्धप्रस्थापिते भवति तदा पुनरप्याकीर्णं पिशित महिकादि प्रेक्षणार्थं दिशः प्रेक्षते । एवं क्षुते क्षुते उपलक्षणमेतदन्यस्मिन् वा स्वाध्यायभङ्ग कारिणि समुपस्थिते त्रीन् वारान् आकीर्ण पिशितादि निरीक्षणार्थं दिशः प्रेक्षते । न केवलं दिशः प्रेक्षते किन्तु--

[भा.३२१२] सेज्जायरसेज्जादिसु छारादिठाए विसिउ पेहंति ।
तिण्हयरेणं नत्थउ तत्थवि उ तिन्निवारा उ ।।

वृ- त्रिष्वपि वारेषु प्रत्येकमन्यत्र शय्यातरगृहे सेज्जंति प्रातिवेशिकागृहे आदिशब्दादन्यस्मिन् वा परतरादौ गृहे क्षारादिग्रहणनिमित्तं मध्ये प्रविश्य पिशितादिकमस्वाध्यायिकं प्रेक्षते । यदि न दृष्टं किमपि वाराणां त्रयाणां परतोऽन्यत्र गत्वा स्वाध्यायं प्रस्थापयन्ति । तत्रापि यदि त्रीन् वारानुपहतः स्वाध्यायः क्षुतादिना ।

[भा.३२१३] ताहे पुनोवि अन्नत्थ तत्थवि य तिन्नि वाराउ ।
एवं नववाराहते ताहे पढमाए न पढंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ततः पुनरन्यत्र गत्वा स्वाध्यायः प्रस्थापनीयः । तत्रापि यदि त्रीन् वारान् कालस्योपघातः स्यात् तत एवममुना प्रकारेण सर्व संकलनया नववारान्हते स्वाध्याये प्रथमायां पौरुष्यां न पठन्ति स्वाध्यायम् ।

[भा.३२१४] पट्ठवियंमि सिलोगे घाणा लोया य वज्जणिज्जाओ ।
सोणियवच्चिक्काणं मुत्तपुरिसाण तहचेव ।।

वृ- प्रस्थापिते स्वाध्याये भणिते क्षुल्लकाचारकथाद्ये श्लोके स्वाध्यायं कुर्वन्ति कुर्वद्‌भिश्च स्वाध्यायं शोणित स्तबकानां शोणितसूचकानां मुत्रपुरीषाणां च घ्राणालोका वर्जनीयाः । कथमित्याह-

[भा.३२१५] आलोगंमि चिलिमिली गंधे अन्नत्थ गंतु पगरेंति ।
एसो उ सज्झातो तव्विवरीतो असज्झातो ।।

वृ- आलोके शोणितादीनामन्तरा चिलिमिली क्रियते । गन्धे पुनरागच्छति अन्यत्र गत्वा स्वाध्यायं कुर्वन्ति । एषोऽनन्तरोदितः सकलदोषविनिर्मुक्तः स्वाध्याये कालः स्वाध्यायः कारणे कार्योपचारात् तद्विपरीतः प्रागुक्तदोष संयुक्तः कालोऽस्वाध्यायः ।

[भा.३२१६] एएसामन्नयरेअसज्झाए जो करेइ सज्झायं ।
सो आणा अणवत्थ मिच्छत्त विराधनं पावे ।।

वृ- एतेषामनन्तरोदितानामस्वाध्यायिकानामन्यतरस्मिन्नस्वाध्याये अस्वाध्यायिके सति यः करोति स्वाध्यायं आज्ञाभंङ्गं तीर्थकराज्ञाविलोपात् अनवस्थांतं तथा कुर्वन्तमवलोक्यान्यस्यापि तथा करणात् मिथ्यात्वमयथावादकरणात् विराधनां । संयमविराधनां ज्ञानोपचारोपघातात् आत्मविराधनां प्रान्तदेवताच्छलनात् प्राप्नोति । अत्रैवापवादमाह-

[भा.३२१७] बिति आगाढे सागारियादि कालगते असति वुच्छेए ।
एएसिं कारणेहिं जयणाए कप्पई काउं ।।

वृ- द्वितीयपदमपवादपदमागाढे योगा उह्यमाने यद्यप्यस्वाध्यायिकं भवति, तथापि यतनया कर्तुं कल्पते स्वाध्यायो यथा स्कन्दके चमरे च प्रत्यासन्ने अनुद्दिष्टमपि स्कन्दकोद्देशं च रात्रौ रात्रौ त्रीन् वारान् दिवसान स्वाध्यायकेऽपि तदनुग्रहाय कर्षयंति । तथा कारणवशेन प्रतिबद्धायां स्थितस्तत्र सागारिकस्य शय्यातरस्य प्रतिघारणाशद्वं श्रुत्वा मा शृणुयात् एनमनिष्टं शद्धमिति कृत्वा यत् कालिकमुत्कालिकं वा परिजितं केवलं स तदस्वाध्यायिकेऽपि पठति । आदिग्रहणेन कदाचित् यथाच्छन्दस्योपाश्रयेकारणेन स्थितास्ततो यथामतिविकल्पितां तस्य सामाचारीं मा शृण्वामेति तत्प्रतिघातार्थमस्वाध्यायिकेऽपि स्वाध्यायं कुर्वन्ति इति परिग्रहः । तथा कालगते जागरणनिमित्तं मेघनादादिकमध्ययनमस्वाध्यायिकेऽपि परावर्त्यते । असति वोच्छेए इति अधुना गृहीतं किमप्यध्ययनं तच्च यस्य समीपे गृहीतं स मरणमुपागतः अन्यत्र च तत्र विद्यते ततो मा भूत्तद्व्यवच्छेद इत्यस्वाध्यायिकेऽपि तत्परावर्त्यते । एतैः कारणैः पञ्चविधानामस्वाध्यायिकानामन्यतमस्मिन्नप्यस्वाध्यायिके यतनया कर्तुं कल्पते स्वाध्यायः ।

मू. (१७७) *नो कप्पइ निग्गंथाण वा निग्गंथीण वा अप्पणो असज्झाइए सज्झायं करेत्तए । कप्पइण्ह अन्नमन्नस्स वायणं दलइत्तए ।*

[भा.३२१८] अच्चाउलाण निच्चोउयाणमोहेज्ज निच्च असज्झातो ।
अरिसा भगंदरादिसु इति वायणसुत्तसंबंधो ।।

वृ- अत्याकुलानां बालवृद्धैरतिशयेन समाकुलानां साधूनामर्शोभङ्गदरादिषु श्रमणीनां च नित्यर्त्तुकानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा नित्यं सर्वकालमस्वाध्यायो भवतिइति वाचनासूत्रमुत्पन्नस्तमित्येष सम्बन्धः । अनेन सम्बन्धेनाया-तस्यास्य व्याख्या - न कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वात्मनः समुत्थे अस्वाध्यायिके स्वाध्यायं कर्तुं किन्तु कल्पते परस्परस्य वाचनां दापयितुमन्यत्र यदि वा प्रक्षालनान्तरं गाढबन्धे प्रदत्ते सति तत्रापि स्वयमपि वाचानं दातुं कल्पते इति वाक्यशेषः । एतदेव भाष्यकारः सप्रपञ्चमाह-

[भा.३२१९] आयसमुत्थमसज्झाइयं तु एगविहं होइ दुविहं वा ।
एगविहं समणाणं दुविहं पुन होइ समणीणं ।।

वृ- आत्मनः शरीरात् समुत्थं संभूतमात्मसमुत्थमस्वाध्यायिकमेकविधं भवति द्विविधं वा तत्र यत् एकविधमर्शो भगन्दरादि विषयं तत् श्रमणानां भवति, अमणीनां पुनर्भवति द्विविधं अर्शो भगन्दरादि समुत्थमृतुसंभवं च । तत्र यतनामाह-

[भा.३२२०] धोयंमि य निप्पगले बंधा तिनेव होंति उक्कोसा ।
परिगलमाणे जयणा दुविहम्मी होइ कायव्वा ।।

वृ- व्रणादौ निप्रगले धौते उपरि क्षारप्रक्षेपः पुरस्सरं त्रयो बन्धा उत्कर्षतो भवन्ति यथापि परिगलति द्विविधे व्रणादावार्तवे च यतना वक्ष्यमाणा कर्तव्या । एतदेव सप्रपञ्चं भावयति ।

[भा.३२२१] समणो उ वणे भगंदरे बंधेक्ककाउ वाएति ।
तह विगलेंत छारे छोढुं दोतिन्नि बंधाउ ।।

वृ- श्रमणो व्रणे वा भगन्दरे वा परिगलति हस्तशताद्बहिर्गन्त्वा निःप्रगलं प्रक्षाल्य चीवरे क्षारं क्षिप्त्वा उपर्यन्यत् चीवरं कृत्वा व्रणं भगन्दरं बध्नाति, । तत एवमेकं बन्धं कृत्वा वाचयति यदि तथापि परिगलत्य-स्वाध्यायिकं तत उपरि क्षारं निक्षिप्य द्वितीयं बन्धं ददाति । ततो वाचयति तथाप्यतिष्ठति तृतीयमपि तृतीयमपि बन्धं प्रत्यवतारं दत्वा वाचयति ।

[भा.३२२२] जाहे तिन्निविभिन्ना ताहे हत्थसयबाहिराधोउं ।
बंधिउ पुनोविवाए गंतु अन्नत्थ व पंढति ।।

वृ- यदा त्रयोऽपि बन्धास्तेना स्वाध्यायिकेन विभिन्ना भवन्ति तदा हस्तशताद्बहिर्गत्वा निप्रगलं प्रक्षाल्य पुनः क्षारं निक्षिप्योपरि चीवरेण बध्वा पुनरपि वाचयति । अन्यत्र वा गन्तुं पठन्ति ।

[भा.३२२३] एमेव य समणीणं वणम्मि इयरम्मि सत्तबंधाउ ।
तहवि य अठायमाणो धोऊणं अहव अन्नत्थ ।।

वृ- एवमेव श्रमणीनामपि व्रणविषये यतना कर्तव्या भवति इतरस्मिन्नार्तवे सप्तबन्धाः पूर्वप्रकारेण भवन्ति । तथापि व्रणे इतरस्मिन् वा अतिष्ठति हस्तशताद्बहिः प्रक्षाल्य तथैव बन्धान् दत्वा वाचयति अन्यत्र गत्वा पठन्ति ।

[भा.३२२४] एए सामन्नयरे असज्झाए अप्पणो उ सज्झायं ।
जो कुणइ अजयणाए सो पावइ आणमादीनि ।।

वृ- एतेषामनन्तरोदितानामन्यस्मिन्नात्मनोऽस्वाध्यायिके सति यः स्वाध्यायं करोति तत्राप्ययतनया स प्राप्नोत्याज्ञादीनि तीर्थङ्कराज्ञाभङ्गादीनि दूषणानि । आदिशब्दादनवस्थादि परिग्रहः । न केवलमिमे दोषाः किंत्विदमेव ।

[भा.३२२५] सुयनाणंमि अभत्ती लोगविरुद्धं पमत्तछलणा य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विज्ञासाहणवेगुण धम्मया एयमाकुणसु ।।

वृ- अस्वाध्यायिके पठनश्रुतज्ञानस्याभक्तिविराधनाकृता भवति, तद्विराधनायां दर्शनविराधना चारित्रविराधना च तदभावे मोक्षाभावः । तथा लोकविरुद्धमिदं यथात्मनो अस्वाध्यायिके पठनं तथाहि- लौकिका अपि व्रणे आर्तवे च परिगलति परिवेषणं देवतार्चनादिकं वा (न) कुर्वन्ति । तथा प्रमत्तीभूतस्य प्रान्तदेवतया च्छलना स्यात्तथा विद्या उपचारमन्त्रेण साध्यमाना साधनवैगुण्यधर्मतया न सिध्यति । तथा श्रुतज्ञानमपि तस्मान्मैवं कार्षीः । अत्र परावकाशमाह-

[भा.३२२६] चोएइ जइ एवं सोणियमादीहिं होइ सज्झातो ।
तो भरितोच्चियदेहो एएसिं किंह नु कायव्वं ।।

वृ- परश्चोदयति यद्येवमुक्तप्रकारेणास्वाध्यायो भवति तत एतेषां शोणितादीनां देहो भृत इति तत्र कथं तु कर्तव्यम् । तस्मिन् सति कथं स्वाध्यायः । अत्र सूरिराह-

[भा.३२२७] कामं भरितो तेसिं दंतादी अवजुया तह विवज्जा ।
अनवजुयाउ अवज्जा लोए तह उत्तरे चेव ।।

वृ- कामं मन्यामहे एतत्तेषां शोणितादीनां भृतो देहस्तथापि ये दन्तादयोऽवयुताः पृथग्भूतास्ते च वर्ज्या वर्ज्यनीयाः । ये त्वनवयुताः अपृथग्भूता लोके उत्तरे च अवर्ज्या अपरिहर्तव्याः । एतदेव भावयति-

[भा.३२२८] अब्भंतर मललित्तो कुणति देवाणमच्चणं लोए ।
बाहिर मलालित्तो पुन न कुणइ अवनेइ च ततोणं ।।

वृ- अभ्यन्तरमललिप्तोऽपि देवानामर्चनं लोके करोति । बाह्यमललिप्तः पुनर्न करोति अपनयति वा मलं ततः शरीरादेवमत्रापि भावनीयम् ।

[भा.३२२९] आउट्टियावराहं सन्निहिया न खमए जहा पडिमा ।
इय परलोए दंडो पमत्त छलणा इह सियाउ ।।

वृ- उपेत्यकृतमपराधं सन्निहितासन्निहित प्रातिहार्या प्रतिमा न क्षाम्यति । इति एवममुना प्रकारेण श्रुतज्ञानमप्युपेत्य कृतमपराधं न क्षमते । तत्र परं लोके दुर्गतिप्रपातो दंड इहलोके प्रान्तदेवता छलना स्यात् ।

[भा.३२३०] रागा दोसा मोहासज्झाए जो करेइ सज्झायं ।
आसायणावकासे को वा भणितो अनायारो ।।

वृ- रागात् द्वेषात् मोहाद्वायोऽस्वाध्याये स्वाध्यायं करोति, से तस्य का कीदृशी फलत आशातना को वा कीदृशाः फलद्वारेण भणितोऽनाचारः । तत्र रागद्वेषमोहात् व्याख्यानयति-

[भा.३२३१] गणिसद्दमाइमहितो रागदोसंमि न सहते सद्दं ।
सव्वमसज्झायमयं पमादी होइ मोहाओ ।।

वृ- गणी आचार्य आदिशब्दादुपाध्यायो गणावच्छेदकः इत्यादि परिग्रह एवमादिभिः शब्दैर्महित उत्कर्षितो योऽस्वाध्यायं करोति स रागे द्रष्टव्यो । यस्त्वन्यस्य गणिशब्दमुपाध्याय शब्दं वा न सहते, अहमपि पठित्वा गणी उपाध्यायो भविष्यामि । इति विचिंतयन्नादरपरोऽस्वाध्यायेऽपि स्वाध्यायं विदधाति, स द्वेषेऽवसातव्यः । यस्तु सर्वमस्वाध्यायमयमित्येवमादि विचिन्त्यास्वाध्याये स्वाध्यायं करोति एष भवति मोह इति । सम्प्रत्याचार्य फलद्वारेणाशातनामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३२३२] उम्मायं च लभेज्ञा रोगायंकं च पाउणेदीहं ।
तित्थयरभासितातो भस्सइ सो संजमातो वा ।
[भा.३२३३] इहलोए फलमेयं परलोए फलं न देंति विज्ञातो ।
आसादना सुयस्स कुव्वइ दीहं तु संसारं ।।

वृ- उन्मादं वा लभते रोगातङ्कं च दीर्घं प्राप्नुयात् । तीर्थकरभाषिताद्वा संयमाद्भ्रश्यति । इहलोके विद्या अङ्गश्रुतस्कन्धादि लक्षणाः फलं मोक्षलक्षणं न ददति न प्रयच्छति न केवलं फलदानाभावः किन्तु श्रुतस्याशातना दीर्घं संसारं करोति । तदेवं फलत आशातनाभिहिता । साम्प्रतमनाचारं फलत आह-

[भा.३२३४] नाणायारो विराहितो दंसणयारो वि तहा चरित्तं च ।
चरणविराधनयाए मुक्खाभावो मुणेयव्वो ।।

वृ- अस्वाध्याये स्वाध्यायं कुर्वता ज्ञानाचारो विराधितस्तद्विराधनायां दर्शनाचारश्चारित्रं च विराधितं । चरणविराधनतायां मोक्षाभावः । अत्रैवापवादमाह-

[भा.३२३५] बितियागाढे सागारियादि कालगय असति वुच्छए ।
एएहिं कारणेहिं जयणाए कप्पए काउं ।।

मू. (१७८) *ति वासपरियाए समणे निग्गंथे तीसं वास परियाए समणीए निग्गंथीए कप्पइ उवज्झाय त्ताए उद्दिसित्तए ।।*

मू. (१७९) *पंचवास परियाए समणे सट्ठिवास समणीए निग्गंथीए कप्पइ आयरिय उवज्झायत्ताए उद्दिसित्तए ।।*

[भा.३२३६] संगहमादीनट्ठाए वायणं देंति अन्नमन्नस्स ।
अयमवि य संगहो च्चियदुविहदिसा सुत्तसंबंधो ।।

वृ- पूर्वसूत्रे अन्योन्यस्य वाचनां ददाति संग्रहादीनामर्थाय अयमपि च सूत्रेणाभिधीयमाने द्विविधदिशा आचार्यदिशा उपाध्यायदिशा च सङ्ग्रह एव ततः संग्रहप्रस्तावादधिकृतसूत्रस्योपन्यासः । एष सूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्यात्रिवर्षपर्यायश्रमणो निर्ग्रन्थस्त्रिंशद्वर्षपर्यायाः श्रमण्याः कल्पते उपाध्यायतया उद्देष्टुं पञ्चवर्षपर्यायः श्रमणो निर्ग्रन्थः । षष्टिवर्षपर्यायाः श्रमण्या निर्ग्रन्थ्याः कल्पते । आचार्यतया उपाध्यायतया वा उद्देष्टुमिति एष सूत्राक्षरार्थः । सम्प्रति भाष्यविस्तरः-

[भा.३२३७] तइयंमिउ उद्देसे दिसासु जो गणहरो समक्खाओ ।
सो चेवय होइ इहं परियातो वणितो नवरं ।।

वृ- तृतीये उद्देशे दिक्षु आचार्योपाध्यायप्रवर्तिस्थविरगणावच्छेदिरुपासु यो गणधर आचार्य उपाध्यायो वा समाख्यातः स एव इहापि भवति ज्ञातव्यः । नवरमिह पर्यायोऽधिको वर्णितः ।

[भा.३२३८] तेवरिसो तीसियाए जम्मण चत्ताए कप्पति उवज्झे ।
बितियाए सट्ठि सयरीय जम्मण पणवास आयरितो ।।

वृ- त्रिवर्षस्त्रिवर्षपर्याय उपाध्यायः कल्पते त्रिंशत्कायास्त्रिंशद्वर्षपर्याया जन्मना जन्मपर्यायेण जघन्यतश्चत्वारिंशद्वर्षपर्याया उत्कर्षत देशोनपूर्वकोटिकायाश्चत्वारिंशत्कथं स्यादिति चेदुच्यते । दशवर्षजातायाः प्रव्रज्या प्रतिपत्तिस्त्रिंशद्वर्षाणि व्रतपर्याय एवं चत्वारिंशत्तथा द्वितीयस्याः श्रमणा निर्ग्रन्थ्याः षष्टिवर्षव्रतपर्याया जन्मतो जघन्यतः सप्ततिवर्षप्रमाणायाः पञ्चवर्षपर्याय आचार्यः कल्पते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्कर्षतो देशोनपूर्वकोटिकाया जन्मतः सप्तभिर्वर्षाणि कथं भवतीति चेदुच्यते-दशवर्षपर्यायाः प्रव्रज्याप्रतिपत्तिः प्रव्रजितायाः षष्टि वर्षाणीति।

[भा.३२३९] गीया गीता वुड्ढा अवुड्ढा जावतीसपरियागा।
अरिहंतिति संगहं सा दुसं गहं वा भयपरेणं ।।

वृ- गीता वा गीतार्था वा भवतु अगीता वा अगीतार्था वा भवतु तथा वृद्धा वा भवतु अवृद्धा वा यावत् त्रिंशद्वर्षपर्याया तावन्नियमात्रिन्संग्रहं त्रयाणामाचार्योपाध्याय प्रवृत्तिनीनां संग्रहमर्हति दुसंगहं भयवरेणं-त्रिंशत् वर्ष पर्यायात्परतो भजना विकल्पनात्रिसंग्रहं वा उपाध्यायस्य प्रवर्तिन्या वा अभावतः।

[भा.३२४०] वयपरिनियायगीया बहुपरिवाराय निव्वियाराय।
होज्जउ अनुवज्झाया अप्पवत्तिणिया वि जा सठी ।।

वृ- या वयसा परिणता गीतार्था बहु परिवारा निर्विकारा च सा यावत् षष्ठिस्तावदनुपाध्यायी वा भवेद् प्रवर्तिनी वा एवं भवति द्विसंग्रहिका।

[भा.३२४१] एमेव अनायरिया थेरी गणिणी व होज्ज इयरीय।
कालगओ सणा एव दिसाए धारेंति पुव्वदिसं ।।

वृ- षष्टि वर्षेभ्यः परतो गणिनी प्रवर्तिनी इतरा वा अप्रवर्तिनी स्थविरा अनाचार्या भवेत् कथमित्याह-कालगतो सन्नाए वेत्यादि कालगतायामवसन्नायां दिशि आचार्यलक्षणायां षष्टि वर्षेभ्यः परतो वर्तमाना आर्यिका धारयन्ति पूर्व दिशमेवमनाचार्या भवति। किं कारणं संयतीनामवश्यं संग्रहं इष्यते तत आह-

[भा.३२४२] बहुपच्चावाय अज्जाउ नियमा पुन संगहे अपरिभूया।
संगहिया पुन अज्जा थिरथावर संजमा होइ ।।

वृ- आर्या पुनर्बहुप्रत्यवाया ततोऽसंग्रहे सति नियमात् परिभूता भवति पराभवस्थानमुपजायते। संगृहीता पुनरार्या स्थिरस्थावरसंयमा भवति। ततः संग्रह इष्यते। के अपाया इत्याह-

[भा.३२४३] पेसी अइया दीया जे पुव्वमुदाहया अवायाओ।
ते सव्वे वत्तव्वा दुसंगहं वणयंतेन ।।

वृ- ये पूर्वं कल्पाध्ययने द्विसंग्रहं वर्णयता पेसी आर्यिका आदि शब्दात् कुलपुत्र भोजिकादि परिग्रह इत्यादिका ऊदाहृता अपायास्ते सर्वऽत्रापि वक्तव्यास्ततो बह्वपायदर्शनतः संग्रहो मन्यते। तदेव द्रढयति।

[भा.३२४४] अज्जाय विउलखंधा लतावाएणा कंपते।
जले वा अबंधणा नावा उवमा एस असंगहे ।।

वृ- अजात विपुलस्कन्धा यथा वातेन लता कम्पते जले वा यथा अबन्धना बन्धनरहिता नौरेषा असंग्रहे उपमाऽर्याप्यसंगृहीता सती बहु प्रत्यवायवातोत्कलिकाभिरितस्ततः संयमात्कम्पते इत्यर्थः।

[भा.३२४५] दिट्ठंतो गुव्विणीए उकप्पट्ठगबोधिए हि कायव्वो।
गब्भंते रक्खंती समत्थं खुड्डुए अगडे ।।

वृ- अत्र लोके दृष्टान्तो गुर्विण्याः कर्तव्यो लोकोत्तरे कल्पस्थकबोधिकैः क्षुल्लकाचौरैः तत्र गर्भस्थ पुत्रेस्वगोत्रजादयस्तां रक्षन्ति स एष पुत्रप्रभावः, । अवटेगते चौरैक्षुल्लकस्य तन्मारणाय सामत्थं (सामर्थ्यं) पर्यालोचनं सोप्येष पुरुषस्य प्रभावस्तत्र प्रथमतो गुर्विणीदृष्टान्तं विभावयिषुस्तावदिदमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३२४६] सगोत्तरायमादीसु गब्भत्थो वि धनं सुतो ।
रक्खए मायरं चेव किमुता जायवड्ढितो ।

वृ- गर्भस्थोऽपि यतः स्वगोत्र राजादिषु धनं जिघृक्षु धनं रक्षति । मातरं च किं पुनर्जाताः प्रवर्धितश्च स सुतरां रक्षति, । तत्र यथा गर्भस्थोऽपि रक्षति तथा प्रतिपादयति ।

[भा.३२४७] वणिए मए रायसिट्ठे गब्भिणि धनमिच्छतए भूपाए ।
सव्वं सुयस्स दाहं धूयाभत्तं च वीवाहं ।।

वृ- एको वणिक तस्य भार्या आपन्नसत्वा वणिक् कालगतस्तः केनापि राज्ञः शिष्टं देवगुर्विण्या धनमस्ति राज्ञोक्तं तिष्ठतु तद्धनं, यदि प्रसूतायाः सुतो भविष्यति ततः सर्व सुतस्य दास्यामो दुहितरि च जातायां यावता भक्तं यावता भक्तं यावता च वीवाहस्तावन्मात्रं दास्यामः । एवं गच्छेऽपि गर्भस्थोऽपि सुतो राज्ञः स्वगोत्रेभ्यश्च धनं रक्षति मातरं च अन्यथा स्वगोत्रजै राज्ञा वाद्यापि तव पार्श्वे धनमस्तीति बहुधा विलुप्यते । भावितं लौकिकमुदाहरणमधुना लोकोत्तरं भावयति ।

[भा.३२४८] लोउत्तरिए अज्ज़ा खुड्डगबोहिहरणीं पसरणीयं ।
चोरे य रणं कूवे सामत्थण वारणालेट्ठा ।।(थू) (लद्धा) ।।

वृ- लोकोत्तरिकोऽयं दृष्टान्तः । कचित् ग्रामे मालव शबरानीकमापतितं । तत्र कैश्चित् बोधिकैश्चौरैरार्यिकाणामेकस्य च क्षुल्लकस्य हरणं कृतं ते चौरा अन्यस्यैकस्य चौरस्यार्यिकाः क्षुल्लकं च समर्प्यान्यस्य हरणाय गताः स चैकश्चौरस्तृषापीडितः सन् कुपे पानीयायावतीर्णः । ततः क्षुल्लकश्चिन्तयति वयमेतावत्संख्याका बहवोऽयमेकस्ततः किमेकस्यापि न प्रभविष्याम इति विचिन्त्य ता आर्यिका भणिताः । पाषाणपुञ्जमेनं कुर्मस्तानेच्छन्ति मा मारयिष्यतीति कृत्वा ततः क्षुल्लकेन तद्वचो श्रुत्वा महानेकः पाषाणस्तस्योपरि मुक्तस्ततः पश्चात्ताभिः सर्वाभिरेककालं पाषाणा मुक्तास्ततः स पाषाण-पुञ्जेनाक्रान्तश्चौरो मरणमुपागमत् । ततः क्षुल्लकेन तास्ततो निष्काशिता एवं क्षुल्लको रक्षति किं पुनर्महान् तत एतेन उपाध्याय आचार्यश्च त्रिवर्षपञ्चवर्षपर्यायस्त्रिंशत् षष्टि वर्षपर्यायाणामपि गीतार्थानामपि दीयते ।

***मू. (१८०)** गामानुगामं-दूइज्जमाणे भिक्खू य आहच्च वीसंभेज्जा तं च सरीरगं केइ साहम्मिए पासेज्जा कप्पइ सेतं सरीरगं न सागारियमिति कट्टु थण्डिले बहुफासुए पडिलेहित्ता पमज्जित्तापरिठवेत्तए, अत्थियाइंथकेइ साहम्मिय संतिए उवगरणजाए परिहरणारिहे, कप्पइ से सागारकडं गहायदोच्चंपि ओग्गह अनुन्नवेत्ता परिहारं परिहारेत्तए ।।*

[भा.३२४९] अतिरेगट्ठा उवट्ठा सट्ठी परिया य सत्तरी जम्मं ।
जरपागं मानुस्सं पडणं एक्कस्स संबंधो ।।

वृ- अनन्तरसूत्रे अतिरेकार्थमतिरेकप्रतिपादनार्थमाचार्यस्योपाध्यायस्य च उपस्था उपस्थापनं कृतं, तत्र षष्ठिपर्यायं सप्ततिवर्षजन्मकं मानुषं जरापाकं भवति, । जरसा एकस्य पतनं तच्चपतनमनेन सूत्रणाभिधीयते एष सूत्रसम्बन्धः, । अनेन सर्व सम्बन्धेनायातस्यास्य व्याख्या । गामानुगामं दूइज्जमाणे इति विहरन् आह कदाचित् शरीरात् विष्वक् पृथग् भवेत् भ्रियते इत्यर्थः, । तत्र शरीरकं केचित्साधर्मिकाः संयताःपश्येयुस्तत्र तस्य साधर्मिकस्य तत् शरीरं मा सागारिकं भवत्विति कृत्वा एकान्ते विविक्ते अचित्ते स्थण्डिले बहुप्राशुके कीटिकादिसत्वरहिते प्रत्युपेक्ष्य प्रमार्ज्य च परिस्थापयितुं अत्थिया इत्थ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि । अस्ति चात्र किञ्चित्साधर्मिक सत्कमुपकरणजातं सलक्षणं पतद्ग्रहादि परिहरणार्हं परिभोगार्हं करिष्यति । से इत्यादि कल्पते से तस्य सागारिकृतं गृहीत्वा सागारकृतं नाम नात्मना स्वीकरोति आचार्यसक्तमेतत् । आचार्य एव एतस्य ज्ञायक एवं गृहीत्वा आचार्याणां समर्पयेदिदं आचार्यस्तस्यैव ददाति । ततः स मस्तकेन वन्दे इति ब्रुवाण आचार्यवचः प्रमाणं करोति, । एष द्वितीयोऽवग्रहस्तमनुज्ञाप्य द्विविधेन परिहारेण परिहर्तुं परिभोगयितुं अथाचार्योऽन्यस्मै ददाति तदा तस्य तदिति सूत्रसंक्षेपार्थः ।

[भा. ३२५०] तं चेव पुव्वभणियं सुत्तनिवातो उ पथे गामे वा ।
गामे एगमनेगा बहूवएमेव पंथेवि ।।

वृ- यत्पूर्व कल्पाध्ययने चतुर्थे उद्देशके विष्वग् भवनं विधानं भणितंतदेवात्रापि द्रष्टव्यम् । नवरमिह विशेषो भण्यते सूत्रनिपातो ग्रामे वा भवत् । पथि गामानुगामं दूइज्जामाणे इति वचनात् तत्र ग्रामे एको वा भवेदनेके वा तत्र ये अनेके ते द्विप्रभृतयो यावत् सप्त बहवो वा द्रष्टव्या वमेव पथ्यपि द्रष्टव्यमेको वानेके वा तत्रानेके द्विप्रभृतयो यावत्सप्त बहवो वा एतदेवाह-

[भा. ३२५१] एगो एगो चेव उ दुप्पभिति अनेन सत्त बहुगावा ।
कालगत गाम पंथे वा जाणग उज्झण विहीए ।।

वृ- एकस्तावदेक एव तस्यैकत्वेन भेदाभावात् द्विप्रभृतयो यावत्सप्ततावदनेके ततः परं बहवः एतेषां मध्ये कदाचिदेको ग्रामे पथि कालगतो भवेत् तत्र उज्झनविधिः परिष्ठापनविधेर्ज्ञायकास्ते यथोक्त विधिना परिष्ठापयन्ति । अथानेके द्विप्रभृतयो यावत्सप्तेति कस्मादुक्तं न पञ्च षट्वेति उच्यते । सप्तानामेव समासकल्पत्वादन्यथात्वविधिरिति ज्ञापनार्थं तथा चाह-

[भा. ३२५२] चउरोवहंति एगो कुसादिरक्खइ उवस्सयं एगो ।
एगो य समुग्घातो इति सत्तण्हं अहाकप्पो ।।

वृ- चत्वारो जना विष्वग् भूतं वहन्ति । एकः पंचमकः कुशान् दर्भान् पानं च गृहीत्वा पुरतो याति एकषष्ठ उपाश्रयं रक्षति । एकः सप्तमः समुद्घातः कालगत इति एवममुना प्रकारेण सप्तानां यथाकल्पो विधिकल्पः ।

[भा. ३२५३] सत्तण्हं हेट्ठेणं अविहीउ न कप्पए विहरिउं जे ।
एगाणि यस्स अविहीउ अत्थि उंगच्छिउं वावि ।।

वृ- सप्तानामधस्तादविधिस्ततस्तेषां षट्पञ्चप्रभृतीनां विहर्तुं न कल्पते, जे इति पादपूरणे एकाकिनः पुनरासितुं गंतुं नियमादविधिः तेषामपि कदाचित्कारण वशतः स्थितानां यः परिष्ठापनाविधि सोऽग्रेऽभिधास्यते । तथा च एकानेकेषामेव विधिमभिधित्सुः प्रथमतोऽनेकेषां प्रतिजानीते-

[भा. ३२५४] नेगाण विहिं वुच्छं नायमनाएव पुव्वखेत्तंभि ।
दिसि थंडिल झामिय बिंबमादि तीसुं पदेसेसु ।।

वृ- पूर्वमेकेऽनेके चोक्तास्तत्र प्रथमतोऽनेकेषां विधिं वक्ष्यामि । प्रतिज्ञातमेव करोति । तत्र ज्ञातेऽज्ञाते वा पूर्वक्षेत्रे दिक् परिभावनीया । तथा त्रिषु प्रदेशेषु स्थण्डिलं तच्च स्वाभाविकं शिलातलादिरूपं ध्यामितमग्निना दग्धं बिम्बादीनां समीपं वा तत्र प्रथमतो ज्ञातक्षेत्रविषयविधिमाह-

[भा. ३२५५] नाएउ पुव्वदिट्ठं तं चेवय थंडिलं हवति तत्थ ।
अन्ना ते वेलपत्ता सन्नादिगयाउ पेहंति ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ज्ञाते क्षेत्रे यत् पूर्व दृष्टं तदेव स्थण्डिलं भवति । अज्ञाते यदि वेलायां प्राप्तास्तदा संज्ञादिगताः स्थण्डिलं प्रेक्षन्ते ।

[भा.३२५६] अह पुन विकाले पत्ताइं ता चेव उ करेंति उवओगं ।
अकरणे हवंति लहुगा वेलं पत्ताण चउगुरुगा ।।

वृ- अथ पुनर्विकाले विकालवेलायां प्राप्तास्तत आगच्छन्त एवं स्थण्डिलविषयमुपयोगं कुर्वन्ति अथ प्रमादतोऽमङ्गलबुद्ध्या वा न कुर्वन्ति तदा उपयोगस्याकरणे चत्वारो लघुकाः प्रायश्चित्तं, वेलाप्राप्तानां पुनः स्थण्डिलविषयोपयोगाकरणे प्रायश्चित्तं चत्वारो गुरुकाः ।

[भा.३२५७] आणादिणो य दोसा कालगते संभमादिसुं हुज्ञा ।
अच्छंतमनच्छन्ना विनासगरिहं च पावेंति ।।

वृ- न केवलं प्रायश्चित्तं किन्त्वाज्ञादयश्च दोषास्तथा तेषां मध्ये कोऽपि रात्रौ कदाचित्कालं कुर्यात्तत्र स्थण्डिलं न प्रत्युपेक्षितमिति न परिष्ठापयन्ति । अपरिष्ठापयत्तां च वेतालोत्थानदोषः अथ परिष्ठापयन्ति तर्ह्यस्थण्डिलदोषासंगः । तथाहि रात्रौ वह्नि संभवो वा स्तेन संभ्रमो वा परचक्रविभ्रमो वा जातः सोऽपि च व्रती कालगतः स्थण्डिलं न प्रत्युपेक्षितमिति न परिष्ठापितस्तत्र यदि अग्निसंभ्रमादिषु कथमनाथकलेवरमिति त्यक्त्वा व्रजामो मा प्रवचनस्योड्डाहो भूदिति विचिन्त्य तिष्ठन्ति तस्य समीपे तदा तेषामग्न्यादेर्विनाशं उपधिर्वा स्तेनादिभिरपग्रहणं अथ न तिष्ठन्ति । किन्तु तत्त्यक्त्वा पलायन्ते तदा ते जनमध्ये गर्हां प्राप्नुवन्ति । अथवा स्थण्डिलं न प्रत्युपेक्षितमिति प्रभाते परिष्ठापयन्ति । तदा मलिनैर्वस्त्रैस्तस्मिन्परित्यज्याने प्रवचनस्यापभ्राजना अहो अमी वराका अदत्तदाना मृता अपि शोभां न लभंते, । संभमादिसु होज्ञा इत्यादिकमेव व्याख्यानयति-

[भा.३२५८] तेनग्गि संभमादिसु तप्पडिबंधेन दाहो हरणं वा ।
मइलेहिव च्छड्डुंती गरिहाय अथंडिलेवावि ।।

वृ- स्तेनाग्निसंभ्रमादिष्वादि शब्दात्परचक्रसंभ्रमादि परिग्रहः तत्प्रतिबन्धेन कालगतप्रतिबन्धेन तिष्ठतामग्निदाहं स्तेनैर्वाहरणं स्यात् । अथ स्थण्डिलं न प्रत्युपेक्षितमिति प्रभाते परिष्ठापयन्ति । तदा मलिनैर्वस्त्रैरुपेतं छर्दयन्तीति गर्हा स्यात् । अथैतद्दोषभयाद्वा तद स्थण्डिलेऽपि परिष्ठापयन्ति तदा अस्थण्डिले परिस्थापनादोषः ।

[भा.३२५९] एएदोस अपेहिय अह पुन पुव्वं तु पेहितं होंति ।
ता ताहिच्चिय निंभाए ते दोसा न होंता य ।।

वृ- एते अनन्तरोदिता दोषा अप्रेक्षिते स्थण्डिले भवन्ति । अथ पुनः पूर्वं प्रत्युपेक्षितमभविष्यत्त एते अनन्तरोदिता दोषा ना भविष्यन् ।

[भा.३२६०] अह पेहिएवि पुव्विं दियाव रातो व होज्ज वाघातो ।
सावय तेन भया वा ढक्कि या ताहे अत्थावि (तो) ।।

वृ- अथ पूर्वं प्रेक्षितेऽपि स्थण्डिले दिवा वा रात्रौ वा भवेत् व्याघातः कथमित्याहस्वापदभयात् स्तेनभयाद्वा यदि वा रात्रौ द्वाराणि ढक्कितानि पिहितानि तदा आस्थापयन्ति धरन्ति न परिष्ठापयन्तीत्यर्थः । तदा बन्धनच्छेदनजागरणादिका पूर्वोक्ता यतनापि, (वा) स्थाण्डिलस्य व्याघातः तर्हि यावत्स्तेनादि भयापगमो भवति स्थण्डिलं वा किमपि कालोचित्तं प्राप्यते, तावत्सैव प्राक्तनी यतना कर्त्तव्या ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३२६१] असतीए सुक्किलाणं दिनकालगयं निसिं विवेचंति ।
परिहारियं च पच्छा कडादि कोडीदुगेणं वा ।।

वृ- अथ दिवसे कालगतः परं शुक्लानि वस्त्राणि न विद्यंते तर्हि शुक्लानां वस्त्राणामभावे दिनकालगते बन्धनादियतना विषयं कृत्वा निशि रात्रौ विवेचंति परिष्ठायन्ति । अथ रात्रौ पूर्वोक्त कारणैर्व्याधातस्तर्हि यदन्यत एवमेव याचने शुक्लं वस्त्रं न लभ्यते, । तदा पश्चात्कृतादिषु प्रातिहारिकं शुलं वस्त्रं याच्यते । अथ तदपि न लभ्यते तर्हि कोटीद्विकेनाप्युत्पादयेत् । किमुक्तं भवति ? पूर्वं विशोधिकोट्यामृग्यते तदभावे अविशोधिकोट्यापीति ।

[भा.३२६२] असती नीनेउ निसिं ठवेतु सागारिथंडिलं पेहे ।
थंडिलावाधायंमिवि, जयणा एसेव कायव्वा ।।

वृ- कोटीद्विक प्रकारेणापि शुक्लवस्त्राणामभावे निशि रात्रौ परिष्ठापयन्ति । तत्र सागारिकं शय्यातरं कालगतस्य समीपे स्थापयित्वा स्वयं साधवः स्थण्डिलं तथाविधं प्रत्युपेक्षन्ते । अथ स्थण्डिलव्याघातः तथा एषैवानन्तरोदिता यतना कर्तव्या रात्रिद्वारं गतमथ दिग्द्वारमाह-

[भा.३२६३] महल्लपुरगामे वा दिसा वाडग साधीतो ।
इहरादुव्विभागाउ कुग्गामे सुविभाविया ।।

वृ- महानगरस्य महाग्रामस्य वा महत्वेन दिग्विभागो दुःखेन विभाव्यते । ततं उपाश्रयात् वाटकात् साहेर्वा दिग्विभागः परिभावनीयः । इतरथा दुर्विभागा भवेयुः कुग्रामे तु सुविभाव्यादिशस्ताः पुनरिमादिशः ।

[भा.३२६४] दिशा अवर दक्खिणा य अवरा य दक्खिणा पुव्वा ।
अवरुत्तरा य पुव्वा उत्तरपुव्वुत्तरा चेव ।।

वृ- दिक् प्रथमतोऽपरदक्षिणा नैऋती निरीक्षणीया तदभावे दक्षिण तस्या अभावे अपरा पश्चिमा तस्याप्यभावे दक्षिणपूर्वा आग्नेयी इत्यर्थः । तस्या अभावे अपरोत्तरा वायवीति भावः । तस्या अलाभे पूर्वा तस्या अप्यभावे उत्तरपूर्वा । सम्प्रति प्रथमायां दिशि सत्यां शेषदिक्षु परिष्ठापने दोषमाह-

[भा.३२६५] समाही य भत्तपाने उवगरणे ज्झायमेव कलहो उ ।
भेदो गेलणं वा चरमा पुन कड्ढते अनं ।।

वृ- प्रथमायां अपरदक्षिणायां परिष्ठापने प्रचुरान्नपानलाभतः समाधिरुपजायते । तस्यां सत्यां द्वितीयस्यां दक्षिणायां परिष्ठापने अभक्तपानं भक्तपानालाभः तृतीयस्यामनुपकरणमुपधेरभावः । चतुर्थ्यां दक्षिणपूर्वस्यां स्वाध्यायभावः । पञ्चम्यामपरोत्तरस्यां कलहः । षष्ट्यां पूर्वस्यां गच्छभेदः । सप्तम्यामुत्तरस्यां ग्लानत्वं चरमा अष्टमी पूर्वोत्तराकृतमृतकपरिष्ठापना अन्यत् मृतकं कर्षयति मरणमापादयतीत्यर्थः । एतदेवस्पष्टतरमाह-

[भा.३२६६] पउरण पाणपढमा बितियाए भत्तपान न लभन्ति ।
तत्तियाए उवहिमादि नत्थि चउत्थीए सज्झातो ।।

[भा.३२६७] पंचमियाए असंखड छट्ठीए गणस्स भेयणं नियमा ।
सत्तमिया गेलणं मरणं पुन अट्ठमीबेंति ।।

वृ- गाथाद्वयमपि व्याख्यानार्थत्वात्सुगमम् । नवरं पउरणपाणपढमा इत्यत्र प्राकृतत्वात् सप्तम्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोपस्ततः प्रथमायामिति द्रष्टव्यम् । अष्टमीति अष्टम्यामिति । साम्प्रतमुक्तानुक्तद्वार संग्रहार्थमाह-

[भा.३२६८] रत्तिदिसा थंडिल्ले सिल विंचा झामिए य उस्सन्ने ।
छेत्ता विभत्ती सीमा सीयाणा चेव ववहारो ।।

वृ- प्रथमं रात्रिद्वारं । तच्च प्रागेव सप्रपञ्चमुक्तं । द्वितीयं दिग्द्वारं तच्च भण्यमानमास्ते । तृतीयं स्थण्डिलद्वारं त्रिधा शिलारुपं बिम्बादि वृक्षादीनामधो ध्यामितं च चतुर्थमुच्छन्नद्वारं । पञ्चमं क्षेत्रैर्विभक्ते भूमिभागे द्वयोर्ग्रामयोः सीमायां परिष्ठापनीयमित्येवं लक्षणं षष्टे श्मशाने इति द्वारं । तत्र च व्यवहारो वक्तव्यः । एष द्वारगाथा संक्षेपार्थः । साम्प्रतमेनामेव विवरीतुकामो रात्रिद्वारं किल प्रागेव सप्रपञ्चमुक्तमतो दिग्द्वारस्य वक्तव्यशेषमाह-

[भा.३२६९] लब्भमाणे वा पढमाए असतीए वाघाते वा ।
ताहे अन्नाए विदिसाए पेहेज्ज जयणाए ।।

वृ- लभ्यमानायां गाथायां पुस्त्वं प्राकृतत्वात् । प्रथमाया अपरदक्षिणस्या अभावे व्याघाते वा सति ततस्तस्याः प्रथमाया दिशोऽन्यस्यां दिशि द्वितीयस्यां स्थण्डिलं यतनया प्रेक्षेत । तस्या अपि लभ्यमानाया अभावे व्याघाते वा सति तृतीयस्यामेवं यावच्चरमायामपि न प्रागुक्तो दोषः । तीर्थकराज्ञानुपालनपुरस्सरं यतनया प्रवृत्तेर्यदि पुनर्द्वितीयस्यां सत्यां तृतीयस्यां दोष उक्तः स प्रसजति चतुर्थ्यां तृतीयोक्त एवमुत्तरोत्तरदिक्ष्वपि भावनीयं । गतं दिग्द्वारमधुना स्थण्डिलद्वारमाह-

[भा.३२७०] सिलायलं पसत्थं तु जत्थत्थाविफासुयं ।
झामं थंडिलमादिच्च बिंबादीन समीवे वा ।।

वृ- शिलातलं शिलातलरुपं यत्प्रशस्तं स्थण्डिलं तत्र परिष्ठापयन्ति । अथवा यत्र गोकुलमजा वा उषिता आदिशब्दादन्यथा यत् प्रासुकं तत्र यदि वा ध्यामिते अग्निना दग्धे प्रदेशे आदिशब्दात्करीषादिप्रदेशरुपे वा स्थण्डिले यदि वा बिम्बादीनां वृक्षाणां समीपे यत्र महान्सार्थ उषितस्तत्र परिष्ठापयति । गतं स्थण्डिलद्वारमधुना उस्सन्न उ द्वारमाह-

[भा.३२७१] उस्सन्ना तिन्नि कप्पाउ होंति खेत्तेसुकेसुई ।
अत्थंडिलादिसासुं वा तेवि जाणेज्ज पणवं ।।

वृ- केषुचित्क्षेत्रेषु उसणेन बाहुल्येन बहुकालाचीर्णाः कल्पा भवन्ति । किं विशिष्टा इत्याह-अस्थण्डिलास्तथाहि केषुचित् ग्रामेषु नगरेषु वा एवं रुपा मर्यादा यथा एतावति प्रदेशे मृतकं त्यक्तव्यं नान्यत्र तत्र च स्थण्डिलाभावः । ततस्तत्र धर्मास्तिकायप्रदेशनिश्रामुपकल्प्य परिष्ठापयेत् । यत्रापि नदीपूरेण वर्षासु स्थण्डिलप्रदेशः प्लावितो अन्यासु विदिक्षु स्थण्डिलव्याघातः । तत्रापि धर्मास्तिकायप्रदेशनिश्रया परिष्ठापनं कुर्यात् । एतच्च प्रस्तावादुक्तमन्यथा नायमाचीर्णः कल्पः तथा केषुचित् क्षेत्रेषु दिक्षु बहुकालाचीर्णाः कल्पा भवन्ति । यथा आनन्दपुरे उत्तरस्यां दिशि संयताः परिष्ठापयन्ति । ततस्तत्र तथैव परिष्ठापनं कर्तव्यं नास्ति कश्चिद्दोषः । तानपि अस्थण्डिलान् दिक्षु वा अकल्पान् प्रज्ञावान् जानीयात् । ज्ञात्वा च तथैव समाचरेदिति । गतमुत्सन्नद्वारमिदानी क्षेत्रमाह-

[भा.३२७२] खेत्ते विभत्ते गामे राय भए वा अदेंतसीमाए ।
भोइयमादीपुच्छा रायपहे सीममज्झे वा ।।

वृ- क्वचित् ग्रामे कौटुम्बिकैः क्षेत्रभूमयः सर्वा अपि सीमाच्छेदेन विभक्तास्ततः समस्तं भूमण्डलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रैर्निरुद्धं क्षेत्रसीमासु च न लभ्यते परिष्ठापयितुं कुत इत्याहः-रायभए वा अदेंतसीमाए । यदि क्षेत्रसीमायां परिष्ठाप्यते तदा येषां कुटुम्बिनां सा सीमा ते राजकुले गृह्यन्ते । यथा युष्माभिरयं मारितः । ततः सीमायां राजभयेन वा शब्दः समुच्चये अददत्सु कौटुम्बिकेषु तस्य ग्रामस्य यो भोजिको महत्तरः स पृच्छयते यथा क्षेत्रसीमायां वयं मृतकं परिष्ठापयाम आदि शब्दात् यदि स ब्रूयात् आयुक्तो जानाति नाहमिति ततस्तं पृच्छ तदा स पृच्छ्यते । यदि सोऽनुजानाति ततः सुन्दरमथ नानुजानाति तदा राजपथे परिष्ठाप्यते । अथवा द्वयोर्ग्रामयोर्मध्ये सीमायां स राजावग्रह इति कृत्वा । अधुना श्मशानद्वारमाह-

[भा. ३२७३] असती उ सीयाणे संभण अन्नत्थ अपरिभोगंमि ।
असती अनुसट्ठादीनं तग अंताइ इयरे वा ।।

वृ- राजपथस्य ग्रामद्वयमध्यस्य वा कथमप्यभावे सीयाणे श्मशाने परिष्ठाप्यते । अथ श्मशानपालकः श्मशानद्वारे स्थितो निरुणद्धि यथा यत् दातव्यं तत् दत्वा श्मशानमभिगच्छथ तदा अन्यत्र अपरिभोगे यत्रानाथमृतकानि परिष्ठाप्यन्ते दह्यन्ते वा तत्र परिष्ठापयन्ति । अथ तादृक् स्थानं न विद्यते तदा तस्य असत्यभावे तस्य श्मशानपालकस्य अनुशिष्टिरनुशाशनमादिशब्दात् धर्मकथा च क्रियते । अथ तथापि न ददाति तर्हि से तस्य मृत्यस्य यानि नंतिगानि अन्तानि प्रान्तानि तस्मै दीयन्ते । अथ तानि नेच्छति तर्हि इतराणि नवानि दीयन्ते । कथं भूतानीत्यत आह-

[भा. ३२७४] अदसाइय निच्छंते साहारणगमनदारमुत्तूणं ।
सति लंभमुवारुहणं सव्वे व विगिंचणा लंभे ।।

वृ- अदशानि दशारहितानि दीयन्ते । अथ तानि नेच्छति तर्हि साधारणं वचनं भण्यते-यथा यं कालगतो अवतारितस्तिष्ठतु वयं ग्रामं प्रविश्य मार्गयामो यदि लभ्यामहे दास्यामो नो चेत्तर्हि तवायत्तमिदं मृतकमिति एवं साधारणं वचनमुक्त्वा तत्केवलं श्मशानद्वारे अवतार्य ग्राममध्ये गमनं कुर्वन्ति । सति लंभेत्यादि यदि लब्धानि सदशान्ति वस्त्राणि ततः प्रत्यागत्य दत्वा परिष्ठापयन्ति । अथ न लब्धानि तदा राजकुले उपारोहणं चटनं चटित्वा निवेद्यते यथा युष्मदीयः शमशानपालकः श्मशाने व्रतिनं कालगतं मोक्तुं न ददाति, साधवो हि निःकिञ्चनाः सन्नस्मभ्यं याचते । एवं निवेद्य तस्य पुरुषमानीय परिष्ठापयन्ति । एतेन यदधस्तान् द्वारगाथायां व्यवहार इत्युक्तं तद्भावितम् । अथ राजकुलं ब्रूयात् श्मशानपालस्यै तदायत्तं ततोयत्स ब्रूते तत्कर्तव्यम् । एवं राजकुले व्यवहारस्यालाभे सैव विवेचना । किमुक्तं भवति पुनस्तत्र न गम्यते ।

[भा. ३२७५] सीयाणस्सवि असती अलंभमाणे उवरि कायाणं ।
निसिरंता जयणाए धम्मादिपदेसनिस्साए ।।

वृ- अथ श्मशानपालकः श्मशानद्वारे मृतकस्य स्थापनं न ददाति तदा श्मशानस्याभावे श्मशाने द्वारे च स्थापयितुमलभ्यमाने अस्थण्डिलेऽपि कायानां हरति । कायादीनामुपरियतनया धर्मादि-प्रदेशनिश्रया धर्मास्तिकायादि प्रदेशेध्विदं परिष्ठापयाम इति कल्पनया निःसृजंतः परिठापयन्तः शुद्धाः ।

[भा. ३२७६] एस सत्तण्हमज्झाया ततो वा जे परेण य ।
हट्ठा सत्तण्ह थोवाउ तेसिं वुच्छमि जो विही ।।

वृ- एषा अनन्तरोदिता मर्यादाविधिः सप्तानां तेभ्यो वा सप्तभ्यः परतो येऽष्टप्रभृतयः तेषां द्रष्टव्यो ये तु सप्तानामधस्तात् स्तोकास्तेषां यो विधिस्तं वक्ष्ये प्रतिज्ञातमेव करोति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३२७७] पंचण्ह दोण्हि हारा भयणा आरेण पालहारेसु ।
ते चेव य कुसपडिमा नयंति हारावहारो वा ।।

वृ- यदि सप्तानामधस्तात् षट् भवन्ति तदा त्रयो विश्रम्य द्वौ द्वौ भूत्वा वहन्ति, एको वसतिपाल एकस्तृणानि मात्रकं च गृह्णाति पञ्चानां विधिं साक्षादाह-पञ्चानां साधूनां संभवे द्वौ हारौ वहत इत्यर्थः । तृतीयः कुशादिनयति, चतुर्थो वसतिपालः पञ्चमः कालगतः पञ्चानामारतो ये चतुः प्रभृतयस्तेषां वसति रक्षणे वहने च विकल्पना, किमुक्तं भवति, यथा संभवमशून्यां वसतिं कृत्वा शय्यातरस्य वा निवेद्य शून्यामपि कृत्वा यथा शक्नुवन्ति, तथा परिष्ठापयन्ति, तथा चाह, तएव हरा मृतवाहकाः कुशप्रतिमा नयन्ति, इयमत्र भावना शय्यातरस्य वसति निवेदने कृते विश्रम्य विश्रम्य वहंति, यस्तु विश्राम्यति सकुशादि नयतीति । अथवा एक एव यः समर्थः स हरो भवेत्स वहतीति भावः ।

[भा.३२७८] एक्को व दो व उवहिं रत्तिं वेहा सदि य असुणंमि ।
एक्कस्स य तह चेवा छड्डणे गुरुगा य आणादी ।।

वृ- यदि त्रयः साधवो भवेयुस्तदा एकः कालगतो ये च द्वौ तौ रात्रावुपधिं विहायसि कृत्वा एको द्वौ वा वहतो, अथ दिवा परिष्ठाप्यते तदा एकस्य मोचनेन शय्यातरभालनेन वा अशून्ये उपाश्रये कृते सति द्वाभ्यामेकेन वा उद्व्वा परिष्ठापयितव्यः । एकस्यापि परिष्ठापने विधिः तथैव द्रष्टव्यो यथा द्वयोरनन्तर मुक्तः । किमुक्तं भवति ? रात्रावुपधिं विहायसि कृत्वा परिष्ठापयति । दिने शय्यातंरभालनेन वसतिमशून्यां कृत्वा परिष्ठापयेत् ।यद्येकद्वित्रिप्रभृतयः स्तोका वयं कथं वीक्ष्याम इति विचिन्त्य न परिष्ठापयन्ति । किन्तु त्यक्त्वा गच्छन्ति तदा तेषां प्रायश्चित्तं चत्वारो गुरुकाः न केवलं प्रायश्चित्तमेव किन्त्वाज्ञादयश्च दोषास्तन्निमित्तमपि तेषां प्रायश्चित्तमिति भावः । इमे चान्ये दोषाः ।

[भा.३२७९] गिहिगोणमल्लराउल निवेयणा पाणकड्डणुड्डाहो ।
छक्कायाण विराधन ज्झावणसुक्खेय वावन्ने ।।

वृ- साधूनामभावे गृहिणस्तं त्यजन्ति यदि वा गावौ बलीवर्दौ योक्त्रयित्वा ताभ्यां गृहस्थाः कर्षयन्ति । अथवा मल्लैः परित्याजयन्ति यदि वा गृहस्था राजकुले निवेदयन्ति । तत्र पाणैराकर्षणे प्रवचनस्योड्डाहः । यथा प्राप्तमीदृशेन धर्मेण यत्रेदृशी अवस्था प्राप्यते, एते प्रवचनविराधना विरूपा दोषा इयं संयमविराधना असंयतैर्नीयमानैः षट्कायविराधना, ध्यामनादहनं तस्य कलेवरस्य गृहस्थैः क्रियते । ततस्तत्रापि षट्कायविराधना तथा व्यापन्ने कुथिते कृमिजालसंसक्ते शुष्के शोषमुपगते द्वीन्द्रिय विराधना-

[भा.३२८०] तम्हा उवहि तं वोढुं जे जई पच्चला नयंति ।
दोवि निद्दोवे सद्दोवे ठावए निसिं ।।

वृ- यस्मादेते अनन्तरोदिता दोषास्तस्मात् स्तोकैरपि परिष्ठापयितव्यं । तत्र विधिः प्रागुक्त एवं यथा यदि चत्वारस्तदा एको वसतिपालः शेषास्त्रयो विश्रम्य विश्रम्य तत्कलेवरं वहन्ति । यस्तु विश्राम्यति स तृणानि मात्रकं च वहंति । अत्र योजना यदि वा द्वौ तदा यदि रात्रौ निर्भयं तर्हि निद्दोच्चे निर्भये ये यतय उपधिं कलेवरं वोढुं प्रत्यलाः समर्थास्ते द्वावपि नयतः उपधिं तच्च कलेवरं नयन्तीत्यर्थः । नीत्वा च कलेवरं स्थगयित्वा परिष्ठापयन्ति । अथ बहिरुपकरणस्तेन भयं तदा रात्रावुपकरणं विहायसि विलम्ब्य द्वारं बध्वा परिष्ठाप्य प्रत्यागच्छन्ति । यदि वा सद्दोच्चे समये रात्रौ तत्कलेवरं स्थापयन्ति स्थापयित्वा बन्धन-च्छेदनजागरणादिकां यतनां कुर्वन्ति ततो दिवसे यदि शक्नुवन्ति । तदा उपकरणं गृहीत्वा परिष्ठापयंति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथोपकरणं वोढुं न शक्नुवन्ति तदा शय्यातरादीनां परिनिवेद्य द्वारं स्थगयित्वा परिष्ठापयन्ति । परिष्ठाप्य भूयो वसतौ प्रत्यागच्छन्ति ।

[भा.३२८१] अह गंतुमना चेव तो नयंति ततो च्चिय ।
उलोयणमकुव्वंतो असढो तत्थ सुज्झए ।।

वृ- अथान्यं ग्रामं ते गन्तुमनसस्तत उपकरणं सह नयन्ति नीत्वा तत्कलेवरं परिष्ठाप्य तत एव परिष्ठापनप्रदेशात्परतोऽन्यं ग्रामं गच्छन्ति । तत्र यदुक्तमधस्तात्कल्पाध्ययने अवरज्जूयंमि अवलोयणा कायव्वा इति तदन्यग्रामगमनेना शठोऽकुर्वन् शुध्यति न दोषभागू भवति ।

[भा.३२८२] छड्डेउं जइ जंती नायमनायावनाए परलिंगं ।
जइ कुव्वंती गुरुगा आणादीभिक्खु दिट्ठंतो ।।

वृ- यदि कालगतं छर्दयित्वा अपरिष्ठाप्य गच्छन्ति तर्हि ते विचारणीयास्तेन ग्रामेण ते ज्ञाताऽज्ञाता वा तस्य परिचिता अपरिचिता वा इत्यर्थः । तत्र ज्ञाते ग्रामस्य परिचये सति यदि कालगतस्य परिलिङ्गं कुर्वन्ति कृत्वा वा परिष्ठाप्य गच्छन्ति । तदा प्रायश्चित्तं चत्वारो गुरुका आज्ञादयश्च दोषा अथाज्ञाते परलिङ्गं कृत्वा अपरिष्ठाप्य गच्छन्ति । तदा कालगतस्य परलिङ्ग दर्शनतो मिथ्यात्वगमनमत्र च श्रावकभिक्षु दृष्टान्तः । स चावश्यकटीकातो भावनीयः । तत्र ज्ञातेऽन्ये च दोषास्तानेवाह-

[भा.३२८३] अचियत्तमादिवोच्छेयमादि दोसा उ होति परलिंगे ।
अन्नाए उहि काले एकए गुरुगा य मिच्छत्तं ।।

वृ- ज्ञाते सति परलिङ्गे क्रियमाणेऽचियत्तादयोऽप्रीत्यादयो व्युच्छेदादयश्च दोषा भवन्ति तथाहि ग्रामेयकास्तत् परलिङ्ग कृतमितरांश्च साधून् अप्रीतिं कुर्वन्ति । अहो इमे संयता निःशूका निर्लज्जामापरिष्ठाप्यो भूदिति परलिङ्गमारोप्यापरिष्ठाप्य त्यक्त्वा गताः । आदिग्रहणेनागाढमिथ्यादृष्टीनां प्रतिरूप जायते इति परिग्रहस्तत्र च व्युच्छेदादयो दोषास्तथाहि ते आगाढमिथ्यादृष्टयः प्रीतिं ब्रूवते । अहो सुन्दरमात्मनैव तैः प्रवचनस्य हीलना कृता मा एतेषामाहारादीनि प्रयच्छथ । आदिग्रहणान्मा अत्र कोऽपि प्रव्रज्यां प्रतिपद्येत मा सोऽप्येवं विधामवस्थां प्राप्नुयात् । एते ज्ञातानां दोषा अथाज्ञाता यतनां कृत्वा तत्कलेवरमरिष्ठाप्य व्रजन्ति । यदि क्षिप्रमेव गतास्ततः पश्चात्कालगतो देवलोके उत्पन्नो अवधिं प्रयुङ्क्ते ततः स एवं मन्येत । अहमेतेन लिङ्गेन देवोजात एवं (ममता) माननान्तरं मिथ्यात्वगमनं । अत्र काले कृते तेषां गमने प्रायश्चित्तं चत्वारो गुरुकाः । यस्मादेते दोषास्तस्माद्विधिना परिष्ठाप्यः सम्प्रति यः कथंचन एकाकी जातस्तस्य परिष्ठापना विधिमाह-

[भा.३२८४] एगानि तो जाहे न तरेज्ज विविचिउं तयं सोउ ।
ताहे य विमग्गेज्जा इमेण विहिणा सहा उ ।।

वृ- यदा स एकाकी त्यक्तकलेवरं विवेक्तुं न शक्नुयात् तदा अनेन वक्ष्यमाणेन विधिना सहायान् विमार्गयेत्, तमेव विधिमाह-

[भा.३२८५] संविग्गमसंविग्गे सारुविय सिद्धपुत्त सन्नीय ।
सग्गामंमि य पुव्वं सग्गामे असती परग्गामे ।।

[भा.३२८६] अप्पाहेइय सयं वा विगच्छई तत्थं वा विया अन्नं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असती निरच्चए वा काउं ताहेव वच्चेज्जा ।।

[भा.३२८७] संविग्गइ तेच्चिय असतीए ताहे इत्थीवग्गेण ।
सिद्धीसाविग संजति किढि मज्झिमकायतुल्ला वा ।।

वृ- यदि तस्मिन् ग्रामे अन्येऽपि संविग्ना असांभोगिकाः सन्ति तदा तैः सह परिष्ठापयन्ति तेषामभावे असंविग्नैः पार्श्वस्थादिभिः समं तेषामप्यभावे सारूपिकसिद्धपुत्रैस्तेषामप्यप्राप्तौ संज्ञिभिः श्रावकैः समं एवं पूर्वं स्वग्रामे मार्गणा कर्तव्या । तत्र स्वग्रामे संज्ञिनामप्यसति अभावे यदि परग्रामे स्वपक्षोऽस्ति तत्र कंचित् प्रेषयति अन्यस्य वा तथाविधस्य प्रेषणयोग्यस्याभावे अप्पाहेसेति अन्यं गच्छन्तं सन्दिशति । अन्यस्यापि गच्छतोऽसंभवे कालगतस्य पार्श्वे कंचित्स्थापयित्वा स्वयमन्यग्रामं गच्छति गत्वा स्वपक्षमन्यमानयति अथ स कोपि न विद्यते, यः कालगतस्य पार्श्वे स्थाप्यते तर्हि यत्र काकादिभिर्न भक्ष्यते तत्र निरत्यते निरपाये स्थाने कालगतं कृत्वा ततोऽन्यंग्रामं व्रजेत् । गत्वा संविग्नादीना नयति प्रथमतः संविग्नान् सांभोगिकानानीय तैः समं परिष्ठापयति । तेषामलाभे असांभोगिकैरपि तेषामप्यभावे असंविग्नैः पार्श्वस्थादिभिः तेषामप्यसति सारूपिकसिद्धपुत्रैस्तेषामप्यप्राप्तौ श्रावकैः समं तेषामप्यभावे स्त्रीवर्गेण । तत्र क्रममाह-प्रथमतः सारूपिकीभिः सिद्धपुत्रिभिरतुल्यवयोभिस्तासामप्यलाभे श्राविकाभिर तुल्यवयोभिस्तासामप्यभावे वृद्धाभिः संयतीभिस्तासामप्यप्राप्तौ मध्यमवयोभिःसंयतीभिस्तासामप्य-लाभे तुल्याभिरपि तुल्यवयोभिरपि संयतीभिः ।

[भा.३२८८] गणभोइएवि जुंगिते संवरमादी मुहा अनिच्छंते ।
अनुसट्ठिं अदसादी तेहिं समं तो विविंचेउ ।।

वृ- तुल्यवयसामपि संयतीनामभावे मल्लगणं वा हस्तिपालगणं वा कुंभकारगणं वा समुपतिष्ठति ततो यान् ते सहायान् ददति तैः समं परिष्ठापयति । गणानामभावे भोजिकं ग्राममहत्तरमुपतिष्ठते, । ततो यान् सहायान् ददाति तैः सह परिष्ठापयति । तत्रापि सहायानामलाभे ये जुङ्गिका हीनजातयो हीनकर्माणश्च सम्बरादयश्च सम्बराः कचवरोत्सारका आदिशब्दान्नखशोधकाः स्नानकारकक्षालप्रक्षालकादि परिग्रहस्तेषामनुशिष्टिं ददाति । ततस्तैः सहायैः परिष्ठापयति । अथ ते मुधानेच्छन्ति तदा येऽन्ये जातिजुङ्गिका वरुडादयस्तेषामनुशिष्टिं ददाति । अथ तेऽपि मुधानेच्छन्ति तदा तेषामदशानि वस्त्राणि मूल्यं दीयते । अदशानामनिच्छायां सदशान्यपि ततस्तैः समं विवेचयत् ।

[भा.३२८९] अथ रुंभिज्जदारट्ठे मुल्लं दारुण दीनहा ।
अनुसट्ठादितु तहियं अनो वा भणती जती ।।

वृ- तस्मिन् कालगते कदाचित् रात्रौ नीयमाने द्वारस्थो द्वारं न दद्यात् । यदि किञ्चित्प्रयच्छ ततो निष्काशं ददामि । क्वचिद्देशे पुनरयमाचारो दिवसेऽपि मृतं द्वारपालस्य किंचित् दत्वा निष्काश्यते । तस्य रुन्धतोऽनुशिष्टिः कर्तव्या । आदिशब्दात् धर्मकथापि । तत्र यदि नेच्छति ततो यद्यन्यः कोऽपि धर्मकथामनुशिष्टिं वा श्रुत्वा ब्रूते । किं ब्रूते इत्याह-

[भा.३२९०] मुंच दाहामहं मुल्लं उवेहं तत्थ कुव्वती ।
अदसादीनि वा देती असती साहारणं वदे ।।

[भा.३२९१] जइ लब्भामो अनेमो अलद्धे तं वियाणतो ।
सो वि लोगरवाभीतो मुंचते दारपालतो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- मुञ्चामुं साधुमहं ते मूल्यं दास्यामि । तत्रोपेक्षां साधुः कुरुते न तं मूल्यं प्रयच्छन्तं वारयति । अथान्यः कोऽपि नैवं भणति तदा अदशानि वस्त्राणि ददाति तेषामनिच्छायां सदशान्यपि अथ वस्त्राणि सदशान्यदशानि वा सन्ति तदा तेषामभावे साधारणं वदेत् । तथाहि यदि लप्स्यामहे तत् आनेष्यामो अलाभे त्वमेतस्य कलेवरस्य विज्ञायक एवं साधारणे उक्ते सोऽपि द्वारस्थो लोकरवभीतो नियमात् मुञ्चति अमोचने तत्तत्रैव मुक्त्वा वस्त्रोत्पादनाय गच्छन्ति । गत्वा अन्तं प्रान्तं वा वस्त्रमानयन्ति । अलाभे सोऽपि द्वारपालो मृतकेन हील्यते ततो मुहूर्तानन्तरं स स्वयमेव मुञ्चति अज्ञातविषयेऽपवादमाह-

[भा.३२९२] अन्नाए वावि परलिंगं जयणाए काउ वच्चती ।
उवयोगठ नाऊणं एसविही असहायए ।।

वृ- अथवा अज्ञाते अपरिचये ग्रामरूपयतना कालगतस्य परलिङ्ग कृत्वा व्रजति । कया यतनयेत्याह- उपयोगार्थं ज्ञात्वा एतावता कालेन तस्य कालगतस्य उपयोगलक्षणोऽर्थोऽभूत् । नातः परं परलिङ्गकरणेऽपि कश्चिद्दोष इति ज्ञात्वा एषविधिरसहायेष्वसहायस्य एकाकिनो द्रष्टव्यो न तु द्विप्रभृतीनामपि ।

[भा.३२९३] एएण सुत्ते न गयं सुत्तनिवा तो उ पंथगामे वा ।
एगो व अनेगो वा हवेज्ज वीसंभिया भिक्खू ।।

वृ- यदेतद्व्याख्यानमेतैन न सूत्रं गतं किन्तु सामाचारी प्रकाशनिमित्तं सर्वमेतद्व्याख्यातं । सम्प्रति यदधः प्रतिपादितः सूत्रनिपातः पथि ग्रामे वेति तदिदानीं व्याख्यायते । एको वा अनेके वा भवेयुर्विष्वग्भूता भिक्षवः । इयमत्र भावना-अत्र चत्वारो भङ्गाः एकेन साधुना एकः कालगतो दृष्टः १ एकेनानेके २ अनेकैरेकः ३ अनेकैरनेके० ४ । तत्र प्रथमभङ्गमधिकृत्य विधिमाह-

[भा.३२९४] एगाणियं तु गामे दट्ठुं सोउं विगिंचण तहेव ।
जा दाररुंभणं तू एसो गामे विही वुत्तो ।।

वृ- ग्रामे एकाकी एकाकिनं कालगतं संविग्नमसंविग्नं वा दृष्ट्वा श्रुत्वा वा विवेचनं परिष्ठापनं तथैव कुर्यात् यथोक्तमनन्तरं तावत् यावत् द्वारे निरोधनम् । एवं शेषेष्वपि भङ्गेषु संविग्नशरीरं वाऽसंविग्नशरीरं वा प्रागुक्तेन विधिना परिष्ठापयितव्य एष ग्रामे विधिरुक्तः सम्प्रति पथि विधिमभिधित्सुराह-

[भा.३२९५] एमेव य पंथंमि वि एवमनेगे विगिंचणा विहिना ।
एत्थं जो उ विसेसो तमहं वुच्छं समासेणा ।।

वृ- एवमेव अनेनैव प्रागुक्तेन प्रकारेण पथ्यपि एकस्यानेकस्य च विधिना विवेचना परिष्ठापना द्रष्टव्या । नवरमत्र यो विशेषस्तमहं समासेन वक्ष्ये ।

[भा.३२९६] एगोएगं पासति एगो नेगे नेगे एगं ।
नेगानेगे ते पुन संविग्ग तरेव जे दिट्ठा ।।

वृ- तत्र एकोऽनेक प्रतिपादनार्थमाह- दिठा एक एकं पश्यतीति प्रथमो भङ्ग १, एकोऽनेकान् २, अनेके एकं ३, अनेके अनेकान् ४ । तत्र ये दृष्टास्ते संविग्ना भवेयुरसंविग्ना वा सर्वथा परिष्ठापना कर्तव्या । अन्यथा प्रवचनोपघातसंभवात् । सम्प्रति विशेष प्रतिपादनार्थमाह-

[भा.३२९७] वीइक्कंते भिन्ने नियट्टे सोऊण पंचविपयाइं ।
मिच्छत्त अन्न पंथेण कड्डणा ज्झामणाजं च ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- व्यतिक्रान्तं व्यपगतजीवमिति भावः । भिन्नंश्वादिभिर्विकीर्णं कुथितमकुथितं वा तस्मिन् व्यतिक्रान्ते भिन्ने उपलक्षणमेतत् । अभिन्ने वा श्रुते निवृत्त्य यथोक्तविधिना तत्परिष्ठापयेत् । यदि पुनः श्रुत्वा एकमपि पदं गच्छति तदा आज्ञादीनि पञ्चापि पदानि तस्य प्रसजन्ति, न केवलमाज्ञादीनि पञ्चपदानि किन्त्वन्यान्यपि मिथ्यात्वादीनि प्रसजन्ति । तद्यथा श्रुत्वा यदि परिष्ठापना भयादन्यपथेन उन्मार्गेण वा अन्यथा ग्रामाभिमुखं व्रजति तदा न स यथा वादकारीति तस्य मिथ्यात्वं, कड्ढणत्ति गृहस्थाद्याकर्षणे यत्प्रायश्चित्तं तदपि प्राप्नोति । तथा झामणेत्ति ध्यामनं अग्निकायेन यदि तस्य कलेवरस्य क्रियते तदा ध्यामननिष्पन्नमपि प्रान्तस्य प्रायश्चित्तमापद्यते । यच्चान्यत्तदपि प्राप्नोति । किं तदिति चेत् यावन्तः प्राणा विमूर्च्छंति तावन्तो विराध्यन्ते । यावन्तश्चागन्तुकाः प्राणविराधनामाप्नुवन्ति तत्सर्वमपरिष्ठापयन् प्राप्नोति । अथवा श्रुत्वा पदमात्रातिक्रमेऽपि पञ्चापि पदानि प्राप्नोति । कानि तानीत्यत आह मिथ्यात्वमयथावादकारित्वात्, अन्यपथेन व्रजने तन्निमित्तं प्रायश्चित्तं २ गृहस्थादिभिः कर्षणं तन्निष्पन्नं ३ अग्निकायेन दहने तद्धेतुकं ४ यच्चान्यत्संमुर्च्छितागन्तुकप्राणजाति विराधना, जं तदपि ५ ।

[भा.३२९८] तं जीवातिक्कंतं भिन्नं कुहितेयरं व सोऊणं ।
एगपयंपिनियत्ते गुरुगामग्गमादिवा ।।

वृ- तत्कलेवरं जीवातिक्रान्तं व्यतिक्रान्तमुच्यते; । भिन्नं श्वादिभिर्विकीर्णं तच्च कुथितमकुथितं वा उपलक्षणमेतत् अभिन्नं वा श्रुत्वा एकपदमपि न गच्छति किन्तु निवर्तते । अन्यथा एकपदातिक्रमेऽपि प्रायश्चित्तं चत्वारो गुरुकाः । उन्मार्गादौ वा प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः ।

[भा.३२९९] आणादी पंचपदे नियत्तणे पावए इमे ।
अन्नोमिच्छत्तादीवपदे कमविक्खेवावजे पंच ।।

वृ- न केवलमनिवर्त्तने प्रायश्चित्तं किन्त्वाज्ञादीनि पञ्च पदानि प्राप्नोति । तद्यथा आज्ञा १ नवस्था २ मिथ्यात्व ३ मात्मविराधना ४ संयमविराधना ५ च । न केवलममूनि पदानि किन्त्वमून्यपि मिथ्यात्वादीनि पदान्यन्यानि प्राप्नोति । तानि च प्रागेव विभावितानि अथवा पञ्चापि पदानि प्राप्नोति इत्युक्तं । तत्र तान्येव पञ्चपदानि द्वारगाथया दर्शयति-क्रमविक्षेपात्पादविक्षेपाद्यानि पञ्चपदानि मिथ्यात्वादीनि मिथ्यात्वमन्यपथेन प्रव्रजनं २ गृहस्थादिभिराकर्षणं ३ अग्निकायेन दहनं ४ यच्चान्यत्संमूर्च्छितागन्तुकप्राणजातिविराधनमिति तानि प्राप्नोति तदेवं पञ्चपदानि तस्य व्याख्यानं द्विधा कृतं सम्प्रति कर्षणपदं यच्चेति पदं च व्याख्यानयति ।

[भा.३३००] गोणादिजत्तिया लोय पाणजादीउ तत्थ मुच्छति ।
आगंतुगावपाणाजं पावेते तयं पावे ।।

वृ- गवादयो यत्समाकर्षयन्ति यावन्तो वा प्राणजातयस्तत्र कलेवरे मूर्च्छन्ति । आगन्तुका वा प्राण यत्प्राप्नुवन्ति तदेतत्सर्वं सोऽनिवर्तमानः प्राप्नोति शेषपदानि सुगमानीति कृत्वा न व्याख्यातानि ।

[भा.३२०१] दट्ठुं वा सोउं वा अव्वावन्नं विगिंचए विहिना ।
वावन्ने परलिंगं उवहीनातो अनातो वा ।।

वृ- पथि कालगतं दृष्ट्वा यदि कालगत इति अन्यतः श्रुत्वा यदि तत्कलेवरमव्यापन्नम-विभिन्नमित्यर्थस्ततः पूर्वोक्तेन विधिना विवेचयेत् । अथ स एकाकी ततः परिष्ठापयितुं न शक्नोति यदि वा शक्नोति परं बहवो मृतास्ततः परलिङ्गं कृत्वा व्रजति । अथ तत् व्यापन्नं तदा तस्मिन्परलिङ्ग

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्तव्यं । परलिङ्गकरणं नाम यस्तस्योपधिग्रहणं । स चोपधिर्द्विधा-ज्ञातोऽज्ञातो वा । ज्ञातो नाम यथैतत्सांभोगिकस्य साधोरुपकरणमज्ञातो नाम यो न ज्ञायते किमेष सांभोगिकस्य साधोरुपकरणं किंवा असांभोगिकस्येति । तत्र ज्ञातोऽज्ञातो वा तस्योपधिर्गृहीतव्यः । अथ कस्मात्परलिङ्ग क्रियते तत आह-

[भा.३३०२] मानं पिच्छंति बहूइति नाएवी करेइ परलिंगं ।
गहिउंमि वि उवगरणे परलिंगं चेव तं होइ ।।

वृ- मा अमुं बहवोजनाः प्रेक्षन्तामिति कृत्वा ज्ञातेऽपि तस्मिन् कालगते परलिङ्गं क्रियते । किंतत्परलिङ्गकरणमिति चेदतआह-गृहीते चोपकरणे परलिङ्गमेव तद्भवति साधुलिङ्गाभावात् । सम्प्रति ज्ञातस्य वाज्ञातस्य चोपधिग्रहणे विधिमाह-

[भा.३३०३] सागारकडे एक्को मणुन्नदिन्नो ग्गहो भवे बिइतो ।
अमणुन्ने अप्पिणतो न गेण्हती दिज्जमाणं पि ।।

वृ- सागारकृतं नाम यत्स्वयं नात्मामार्थीकृतं किन्त्वाचार्या एतस्य विज्ञायका इति बुद्धया परिग्रहीतं तस्मिन् सागारकृते एकप्रथमोवग्रहः । यदि सांभोगिकस्योपधिरयमिति ज्ञातस्तदा आचार्यसमीप गत्वा निवेद्य आचार्यस्य समर्पयति । तत्र यद्याचार्यो ब्रूते त्वमेवामुपमुधिं परिभुंक्ष्य ततो मस्तकेन वन्दे इति भणित्वाऽन्येषां साधूनां निवेदयति । यथा क्षमाश्रमणैरेतत् वस्त्रं पात्रं वा मह्यं दत्तमिति ततस्ते ब्रुवते-आरोग्यधारणीयं क्षमाश्रमणानां गुणैर्वर्धस्व । एवंमनोज्ञस्य सांभोगिकस्योपधेर्दत्तस्यावग्रहो द्वितीयः । अथामनोज्ञस्य स उपधिस्तर्हि तं गुरोः समर्पयति । तं च गुरुणा दीयमानपि न गृह्णाति । असांभोगिसत्कत्वात्तर्हि कथं तत्कर्तव्यमित्याहः-

[भा.३३०४] इयरे सिं घेत्तूणं एगं ते परिठवेज्जविहिना उ ।
अन्नए संविग्गो बहिंमि कुज्जाउ घोसणयं ।।

वृ- इतरेषामसांभोगिकानां लिङ्गमात्रोपजीविनां वा संबन्धी यदि ज्ञातोभवति, तर्हि आचार्याणां तथैव निवेदनीयं, । तत्र यद्यन्त उपधिर्नास्ति ततः कारणे आचार्यो ब्रूते परिभुंक्ष्वामुपधिमिति । तेन च तथेति प्रतिपत्तव्यं । अथान्य उपधिः समस्ति तदा सूरिवचनात्तं गृहीत्वा एकान्ते परिष्ठापयेत् । अथ न ज्ञातो भवति किमयमुपधिः संविज्ञानामिति तदा अज्ञाते संविज्ञोपधौ विधिना घोषणां कुर्यात् ।

मू. (१८१) *सागारिए उवस्सयं वक्कएणं पउंजेज्जा, सेयवक्कइयं वएज्जा इमम्हिय इमम्हिय ओवासे समणा निग्गंथा परिवसंति से सागारिए पारिहारिए, सेयनोवएज्जा वक्कइए वएज्जा, से सागारिए पारिहारिए दोवितेवएज्जा दोविसागारिया पारिहारिया ।*

मू. (१८२) *सागारिए उवस्सयविक्किणेज्जा, सेय कइयंवएज्जा इमम्हिय इमम्हिय ओवासे समणानिग्गंथा परिवसंति, से सागारिए, पारिहारिए, सेयनोवएज्जा कइए वएज्जा सेसागारिए पारिहारिए दोविते वएज्जा दोविसागारियापारिहारिया ।।*

वृ- सागारिए उवस्सय इत्यादि सूत्रद्वयं । अस्य सम्बन्धमाह-

[भा.३३०५] उग्गह एव अहिकितो इसे उ सुत्ताउ ऊग्गहो चेव ।
साहम्मिय सागारिय नाणत्तमिणं दुवेण्हंपि ।।

वृ- अवग्रहः पूर्वसूत्रेऽधिकृते इमे अपि चाधिकृते द्वे अपि सूत्रेऽवग्रहप्रस्तावादस्य सूत्रद्वयस्यात्रोपन्यासो नवरं पूर्वसूत्रे साधर्मिक उक्तोऽस्मिन्सागारिकः शय्यातर इति नानात्वं द्वयोरपि तदेवमुक्तः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्बन्धोऽनेन सम्बन्धेनायातास्य व्याख्या सागारिक शय्यातर उपाश्रयमवक्रयेण कियत्कालं भाटकप्रदानेन प्रयुञ्जीत व्यापारयेत् स च सागारिकोऽवक्रियकं भाटकेन प्रतिग्राहिकं वदेत् । अस्मिन् अस्मिन् अवकाशे श्रमणा निर्ग्रन्थाः परिवसन्ति तस्मादेतत्परिहारेण त्वया भाटकेन गृहीतव्यमेवमुक्ते स सागारिकतया परिहार्यः परिहर्तव्यः । अथ तेन पूर्वस्वामिना सागारिकेण सर्वमपि भाटकेन प्रदत्तं ततो न किमपि वदेत् । केवलमवक्रियको वदेत् । अस्मिन्नास्मिन्नवकाशे श्रमणा निर्ग्रन्था परिवसंतु तदा अवक्रियकः शय्यातर इति परिहार्यः परिहर्तव्यः । अथ द्वावपि वदेयातां यथा पूर्वस्वामिनोक्त-मेतावत्येकदेशे श्रमणाः सन्तु तावत्यऽमातः साधून् दृष्ट्वा अवक्रियको ब्रूयादेतावति मदीयेऽपि प्रदेशे तिष्ठन्तु एवं विक्रिय सूत्रमपि भावनीयं । तदा द्वावपि तौ सागारिकौ शय्यातरविति परिहार्याविति सूत्रद्वयाक्षरार्थः । सम्प्रति भाष्यकारः-

[भा.३३०६]　　वक्कइयसालट्ठाणे चउरो मासा हवंति तनुग्घाया ।
　　　　दियरातो असिवा पुन भिक्खगते भुंजणगिलाणे ।।

वृ- वक्रयेण कियत्कालं भाटकप्रदानेन निवृत्ता वाक्रयिकी सा चासौ शाला च वाक्रयिकशाला तद्रूपे स्थाने शालाग्रहणमुपलक्षणं तेनापद्वारिकास्थाने वा गृहे वा इत्यपि द्रष्टव्यं यदि तिष्ठन्ति साधवस्तदा तेषां प्रायश्चित्त चत्वारो मासा अनुद्घाता गुरवो भवन्ति यतस्तत्र इमे दोषाः । सा शाला अपद्वारिका पूर्वं संयतानां दत्वा पश्चात्कोऽपि ग्रहणाय रुपकान् ददाति । ममेमां शालामपद्वारिकां गृहं वा कियत्कालं भाटकेन प्रयच्छ ततः सरुपकलोभेन संयतान् निष्काशयेत् । यदि वा रात्रौ वा उभयत्रापि निष्काशेन स्पर्धकपतेराचार्यस्य वा प्रत्येकं प्रायश्चित्तं चतुर्गुरुकं रात्रौ निष्काशनेश्वश्वापदद्विविधस्तेनतोऽशिवापनं विनाशप्राप्तिरित्यर्थः । अन्यां च वसतिं मार्गयतामप्यलभ्यमानानां जनगर्हायद्येतेषां शुभं कर्म ततः पूर्वोपाश्रयादपि न निष्काशयेरन् । अन्यां वा वसतिं लभेरन् । भिक्खगयत्ति संयता एकं वसतिपालं मुक्त्वा शेषा भिक्षार्थं गताः । पश्चात्स एकाकी वसतिपालो निष्काश्येत । भुंजणत्ति भोक्तुकामा वा निष्काश्येरन् । तत्र चोभयत्रापि जनगर्हा ग्लानो वो कोऽपि वर्तते सोऽकाण्डे निष्काशितः कथं क्रियते । तदेवं शालामधिकृत्योक्तमिदानीमुपलक्षणव्याख्यानसूचितान्यपद्वारिकां गृहं च वाक्रयिकमधि-कृत्योक्तदोषयोजनां साक्षादाह-

[भा.३३०७]　　उवरिं च गिहं वाविवक्कएण पउंजए ।
　　　　पउत्तेतत्थ वाघातो विनासगरिहा धुवा ।।

वृ- अपद्वारिकां गृहं वा यत् शय्यातरो वक्रयेण प्रयोजयति तत्र स्थाने तदेव पूर्वोक्तं प्रायश्चित्तं यतो वक्रयेण प्रयुक्ते तत्र गृहादौ बलादकाण्डनिष्काशने सूत्रार्थव्याघातो रात्रौ निष्काशने श्वश्वापदस्तेनैर्विनाशोऽन्यवसत्यलाभे भिक्षागतादिनिष्काशने वा ध्रुवा लोगे गर्हा । एतच्च सर्वं प्रागेव भावितमिति न भूयो भाव्यते ।

[भा.३३०८]　　एगदेसंमि वा दिन्ने तन्निस्सहोज्ज तेनगा ।
　　　　रसालदव्वगिद्धा वा सेहमादीउजं करे ।।

वृ- शालाया अपद्वारिकाया गृहस्य वा एकदेशे दत्ते अन्तरा कटके प्रक्षिप्ते यदि तिष्ठन्ति तदा तन्निश्रयाः संयतनिश्रयाः स्तेनकाश्चौरा भवेयुः । संयतेषु कायिकभूमिं गतेषु स्तेनाः प्रविश्य गृहस्थानां भाण्डकमपहरेयुरथवा रसालं रसवत् यत्तत्तत्र द्रव्यं तद्गृद्धाः शैक्षकादयो वा यत्कुत्यं तत्कुर्युः । ततो गृहस्थेन

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

संयता वा शंक्यंते यथा नूनमेतैरस्मद्भाण्डमपहृतमथवा एतेषां द्वारेण स्तेनैरपहृतं यदि वा एतैरेव संयतैः कस्यापि दुस्थितस्य सम्प्रदत्तमिति । एवं शङ्कायां स विनाशं वा कुर्यात् । यदि वा राजकुलेऽन्यत्र वा नीत्वा वा ग्रामबृहत्पुरुषपार्श्वे कर्षणं तत्र भूयसी जनगर्हेति-

[भा.३३०९] पेहाविया रज्झायादी जे य दोसा उदाहिया ।
अच्छंते ते भवे तत्थ वयए भिन्नकप्पता ।।

वृ- ये दोषाः पूर्वं कल्पाध्ययने मद्योदकधान्यसालादिषु सागारिके चोपाश्रये प्रेक्षायां विचारभूमौ स्वाध्यायादौ वाऽभिहितास्ते तत्र शालादीनामेकदेशे तिष्ठति भवेयुरथैतद्दोषभयादन्यत्र व्रजति तर्हि भिन्नकल्पता दोषा मासकल्पे वर्षाकालकल्पे वा अपरिपूर्ण एव सति निर्गमात् ।

[भा.३३१०] भिक्खं गतेसु वा तेसु वक्कति बेति नीहमे ।
नीनिएवा विपाले नं उवहिस्सासिवावणा ।।

वृ- भिक्षां गतेषु वा तेषु साधुषु वक्रयीभाटकेन गृहीतशालादिको ब्रूते । यथा निर्गच्छत यूयं मम गृहात्तदा भिक्षाटन व्याघातस्तत्कालमन्यवसत्यलाभे जनगर्हा सूत्रार्थव्याघातश्च । अथवा तेषु भिक्षांगतेषु पश्चादागत्य वसतिपालं निष्काशयन्ति तस्मिन् निष्काशने नमिति वाक्यालङ्कारे उपधिः स्यादशिवापन स्तेनैरपहरणं विस्मरणतो वा नशनमिति ।

[भा.३३११] अहवा भरियभाणाउ आगत जइ निच्छुभे ।
भत्तपानविनासोउ भुञ्जएसागते इमे ।।

वृ- अथ भक्तभृतभाजनानागतान् यदि निष्काशयति तदा गृहीतभक्तपानं विनाशो गतं भिक्षाद्वारमधुना भोजनद्वारमाहअथ भुञ्जानेषु स वक्रयी समागतस्तदा इमे वक्ष्यमाणा दोषाः तानेवाहः-

[भा.३३१२] जिया अट्ठि सरक्खावि लोगो सव्वोविवोट्टितो ।
पगासिए य अन्नेसिं हीला होइ पवयणे ।।

वृ- साधून् साधुक्रियया भुञ्जानान् दृष्ट्वा स विपरिणतभावो ब्रूते जिता एतैरस्थिसरजस्का अपि कापालिकास्तेभ्योऽप्यमी हीनाचारा इति भावस्तथा लोकः सर्वोऽप्येतैः पाणकैरिवैकत्र भुञ्जानैर्वोटितो विट्टालितो न केवलं स एवं तत्र ब्रूते-किन्त्वन्येषामपि जानानां स प्रकाशयति, प्रकाशिते वान्येषां प्रवचनस्य हीला भवति तदेवं भुंजणत्ति व्याख्यातमधुना ग्लानद्वारमाह-

[भा.३३१३] सीयवायाभितावेहि गिलाणो जंतु पावई ।
अमंगलं भउक्खित्ते ठाणमन्नोवि नो दए ।।

वृ- शीतेन वातेन अभितापेन च यत् ग्लानो आगाढादि परितापनं प्राप्नोति तन्निष्पन्नं स्पर्धकपतेराचार्यस्य वा प्रायश्चित्तं तथा तैर्निष्काशितैर्ग्लान उत्क्षिप्तस्तस्मिन् उत्क्षिप्ते वसतिमन्यां मार्गयतां मृतोऽयमित्यमङ्गलमितिकृत्वा मारिस्पृष्टोऽयमिति भयेन वाऽन्योऽपि कश्चित्स्थानं न ददाति ।

[भा.३३१४] गहिते उत्थाणरोगेन अच्छंते नीनियंमि वा ।
वोसरियंमि उड्डाहो धरणे वायविराधना ।।

वृ- तथा ग्लाने उत्थाणरोगेणातीसाररोगेण गृहीते तिष्ठति निष्काशिते वाऽतीसारे दोषस्तथा चाह-व्युत्सृष्टे उड्डाहो धरणे चात्मविराधनामरणगाढतरग्लानस्य वा भावात् । उपसंहारमाह-

[भा.३३१५] एए दोसा जम्हा तहियं होंति उठायमाणाणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तम्हा न ठायव्वं वक्कयसालाए समणेहिं ।।

वृ- यस्मात्तत्र वक्रयशालादौ तिष्ठतामेते अनन्तरोदिता दोषा भवन्ति तस्मात्तस्यां वक्रयशालाया-मुपलक्षणमेतत् वक्र्यापद्धाग्किायां वक्रयगृहे वा श्रमणैर्नस्थातव्यं । अत्र परस्यावकाशमाह-

[भा.३३१६] एवं सुत्तं अफलं सुत्तनिवातो उ असती वसहीए ।
बहियावि असिवादी उ कारणे तो न वच्चंती ।।

वृ- यदि नाम वक्रयशालादौ न स्थातव्यं तर्हि सूत्रमधिकृतमफलं सूत्रे वक्रयेऽपि श्रमणानामवस्था-नानुज्ञानात् सूरिराह-नेदं सूत्रमफलं । यतोऽन्यसूत्रस्य निपातोऽवकाशो वसतेरन्यस्या अभावे बहिरपि निर्गच्छतामशिवादिकं कारणं ततो न व्रजन्ति किन्तु तत्रैव वक्रयशालादौ तिष्ठन्ति । तत्र यतनामाह-

[भा.३३१७] एएहिं कारणेहिं ठायंताणं इमो विही तत्थ ।
च्छिंदंति तत्थकालं ऊउबद्धे वासवासे वा ।।

वृ- एतैरनन्तरोदितैरन्यत्र वसत्यलाभे बहिरशिवादिलक्षणैस्तत्रा वक्रयशालादौ तिष्ठतामयं वक्ष्यमाणो विधिस्तमेवाह-तत्र कालं च्छिन्दन्ति ऋतुबद्धे वर्षावासे वा इयमत्र भावनाऋतुबद्धे शय्यातरं प्रति भण्यते-यदि सम्पूर्णं मासं ददासि । वर्षाकाले भण्यते-यदि चतुरो मासान् ददासि तर्हि तिष्ठामोऽथ न ददासि तर्हि न तिष्ठामः । एतदेवाह-

[भा.३३१८] मासचउमासियं वा न विनिच्छोढव्वा उ अम्हे नियमे न ।
एवं च्छिन्नठियाणं वक्कइतो आगतो हुज्जा ।।

वृ- ऋतुबद्धे काले मासं वर्षाकाले चातुर्मासं नियमेन वयं न निष्काशयितव्याः । एवं च्छिन्नकाले शय्यातरेण तथैव प्रतिपन्ने तिष्ठन्ति तेषां च तथा तिष्ठतां वक्रयिको वक्रयेण ग्राही आगतो भवति ।

[भा.३३१९] दिन्नावच्चुणएणं अहवा लोभा सयंपि देज्जाहि ।
अनुलोमिज्जइ ताहे अदेंते अनुलोमे वक्कइयं ।।

वृ- स शय्यातरो वसतिं दत्वा प्रवसितः पश्चात्पुत्रस्य समीपे वक्रयी समागतः स ब्रूते-यत्र संयता-स्तिष्ठन्ति तन्मे भाटकेन प्रयच्छ सा वसतिर्दत्ताभूत् । केन पुत्रेण अथवा स शय्यातरः प्रभूतभाटकलोभेन स्वयमपि वक्रयिणो दद्यात् दत्वा च निष्काशयेत् । तत्र यद्यन्या वसतिर्लभ्यते तर्हि न तत्र स्थातव्यं अन्यवसत्यलाभे स धर्मकथया अनुलोम्यतेऽनुकूलः क्रियते । अथ स धर्मकथयानुलोमो न भवति तर्हि यस्तस्यार्हतो गरीयान् पितामहमातामहप्रभृतिकस्तेनानुलोमी क्रियते । अथैवमपि स न ददाति स्थातुं तर्हि तस्मिन्नददति वक्रयिकमुक्तप्रकारेणानुलोमयेत् ।

[भा.३३२०] तंमिवि अदेंते ताहे च्छिन्नमच्छिन्नेव नेंति उउबद्धे ।
वासासुं ववहारो उउबद्धे कारणज्जाते ।।

वृ- तस्मिन्नप्यवक्रयिणि पूर्वप्रकारेणानुलोभ्यमानेऽप्यददति ऋतुबद्धे काले च्छिन्ने अच्छिन्ने वा परिपूर्णेऽपूर्णे वा अवधौ निग्रच्छन्ति वर्षाकाले यद्यन्यः कोऽपि साधूनामनुकल्पको न विद्यते । यो वसतिं प्रयच्छति तर्हि गत्वा राजकुले व्यवहारः कर्तव्यः । न केवलं वर्षासु किन्तु ऋतुबद्धेऽपि काले कारणजाते सति कर्तव्यः, कारणजातमेव पृच्छति ।

[भा.३३२१] किं पुन कारणजातं असिवोमादी उबाहि होज्जाहि ।
एएहिं कारणेहिं अनुलोमनुसट्ठि पुव्वं तु ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- किं पुनः कारणजातं यद्वशात् ऋतुबद्धेऽपि काले व्यवहार आश्रीयते । अशिवावमौदर्या-दिकमादिशब्दात् म्लेच्छपरचक्रादि भयपरिग्रहो बहिः कारणजातं भवेत् ? तत एतैः कारणैर्ऋतुबद्धेऽपि काले पूर्वमनुशिष्ट्यानुलोमनं क्रियते । कथं क्रियते इत्याह

[भा.३३२२] सगिं जंपंति रायाणो सगिं जंपंति धम्मिया ।
सगिं जंपंति देवावि तंपि ताव सगिं वदा ।।

वृ- सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति धार्मिकाः सकृज्जल्पन्ति देवा अपि, त्वमपि तावत्सकृद्वदसि ततः स्वयमुक्त्वा कथमकस्मान्निष्काशयसि ।

[भा.३३२३] अनुलोमिए समाणे तं वा अन्नं वज्जइ उ देज्जाहि ।
अनोवनुकंयाए देज्जाहीवक्कयं तस्स ।।

वृ- एवमुक्तेनप्रकारेणानुलोमिते सति तामन्यां वा यदि वसतिं दद्यात् यदि वा अन्योनुकम्पया तस्य वक्रयं भाटकं दद्यात् ।

[भा.३३२४] अन्नं व देज्ज वसहिं सुद्धमसुद्धं च तत्थ ठायंति ।
असती पुरुसा विज्जइ ननीमो दाउण को तंसि ।।

वृ- अन्यां वा वसति मन्योऽनुकम्पया दद्यात् किं विशिष्टामित्याह-शुद्धामशुद्धां वा शुद्धां विशुद्धय विशुद्धि कोटिरहितामशुद्धां विशुद्ध्य विशुद्ध कोटिदूषितां वा तत्र तिष्ठन्ति अथ स तामन्यां वा वसतिं न ददाति नापिकोप्यन्यो भाटकं शुद्धामशुद्धां वसतिं, तदाऽसति एकस्या प्युक्तरुपस्य प्रकारस्याभावे स पुरुषते पोरुषी क्रियते कथमित्याह छिन्न कालां वसतिं दत्वा संप्रत्य सम्पूर्ण एव काले अस्मान्निष्काशयसि न निर्गच्छामः । कः स्वं वसतिं दत्वा साम्प्रतमसि दत्वा दानमनीश्वर इति वचनात् अथ किञ्चिक्तव्यं तर्हि राजकुले गच्छामः एवं परुषितो यदि तिष्ठति ततः सुन्दरमथ न तिष्ठति तदा राजकुले गन्तव्यं ।

[भा.३३२५] रायकुले ववहारे चाउम्मासं तु दाउनिछुभती ।
पच्छाकडाय तहियं दाऊणभणीसरो होति ।।

वृ- राजकुले गत्वा व्यवहारः क्रियते । कथमित्याह-चतुर्मासं दत्वा एषोऽस्मान्निष्काशयति तत्र राजपुरुषैर्दत्वा दानमनीश्वरो भवतीति न्यायमनुसरद्भिः पश्चात्कृतः ।

[भा.३३२६] पच्छा कडो भणेज्जा अच्छउ भंडं इहन्निवायंमि ।
अहयं करेमि अन्नं तुब्भं अहवा वि तेसिं तु ।।

वृ- स उक्तप्रकारेण राजकुले पश्चात्कृतः सन् ब्रूयात् इह यत्र यूयं तिष्ठथ च तत्र निवाते भाण्डं क्रयाणकं तिष्ठतु अन्यथा कोपिष्यति । युष्माकं पुनरन्यां वसतिं करोमि । अथवा तेषां क्रयाणकानां योग्यमन्यत्स्थानं करोमि ।।

[भा.३३२७] असती अन्नाए ऊ ताहे उवेहा न पच्चनीयत्तं ।
ठायंति जत्थ जंपति चोए कम्मादि तहिं दोसा ।।

वृ- एवमुक्ते यदान्या वसतिः प्राप्यते तदा तत्र गन्तव्यमथान्या वसतिर्नास्ति तदाऽन्यस्या वसतेरभावे उपेक्षा कर्तव्या । किमुक्तं भवति ? यद्यन्यां वसतिं क्रीत्वा ददाति अविशोधिकोटिकृतां वा तदा तत्रापि स्थातव्यं न पुनः तत्रैवास्माभिः स्थातव्यमित्याग्रहपरतया तस्य प्रत्यनीकत्वमुत्पादनीयं स हि प्रत्यनीकीकृत्यः सन् साधूनामन्यस्य वसतिदायकस्य वा प्रतिकूलमाचरेत् । अत्र चोदको जल्पति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र तिष्ठन्ति साधवस्तत्रकर्मादय आधाकर्मादयो दोषाः आदिशब्दान्मिश्रक्रीतादि दोषपरिग्रहः ।

[भा.३३२८] भन्नइ निंताण तहिं बहिया दोसा उ बहुतरा हुंति ।
वासासु हरिय पाणा संजमे आयाए कंटादी ।।

वृ- भण्यते अत्रोत्तरं दीयते । ऋतुबद्धे काले निर्गच्छतां तत्र यदि बहुतरा दोषा अशिवाद्युपद्रवलक्षणा भवन्ति, वर्षाकाले निर्गच्छतां संयमविराधना आत्मविराधना स (च) तत्र यत् हरितकायोपमर्दनं द्वीन्द्रियादिप्राणाक्रमणं वा, सा संयमे संयमस्य विराधना, कण्टकादिभिरात्मनो विराधना, । तदेवं च्छिन्ने काले तिष्ठतां विधिरुक्तोऽथ कालच्छेदो न कृतो अथ च वर्षाकालो वर्तते, अथवा ऋतुबद्धे काले बहिरशिवादि आगाढं कारणं तदा अन्यस्यां वसतौ गन्तव्यं न पुनः शय्यातरं प्रति किमपि वक्तव्यम् । अथान्या शुद्धा वसतिर्न प्राप्यते तदा विशोधिकोटिदूषितायां स्थातव्यं तस्या अप्यलाभे अविशोधिकोटि दूषितायामपि स्थातव्यमिति । सम्प्रति सागारिक वक्रयकयोः शय्यातरत्त्वचिन्तां कुर्वन्नाह-

[भा.३३२९] सोचेवयतरो तेसिं ठाणं तु मोत्तु जइ दिन्ने ।
अह पुन सव्वं दिन्नं तो वक्कई उ तरो ।।

वृ- शालगृहस्य वा अपद्वारिकाया वा अर्धत्रिभागो वावक्रयेण दत्तः शेषं संयतानां दत्तं यथा अत्र यूयं तिष्ठथ तत्र च साधवः सर्वेऽपिमान्ति, स एव स्वामी शय्यातरो भवति । अथ पुनस्तेन पूर्वस्वामिना सर्वमपि शालादि भाटकेन प्रदत्तं तदा निर्गच्छतः साधून् दृष्ट्वा यदि वक्रयी ब्रूते मा निर्गच्छत यूयमहं युष्माकमवकाशं दास्यामि । तर्हि सोऽवकाशं ददानो वक्रयीतरः शय्यातरः

[भा.३३३०] अह पुन एगपदेसे भणेज्ज अत्थह तहिं न मायंति ।
वक्कतिओ बेति इत्थं । अत्थहनो खित्ते भंडेणं ।।

वृ- अथ स पूर्वस्वामी भणेत् यथा यूयमस्मिन्नेकप्रदेशे तिष्ठथ तत्र च साधवो न मान्ति । ततोऽमातः साधून् दृष्ट्वा वक्रयिकोनुकम्पया ब्रूते । अत्र तिष्ठत यूयं न किं नोऽस्माकं भाण्डेन क्षिप्तेन प्रयोजनम् ।

[भा.३३३१] तहियं दोवितराऊ अहवा गेह्लेज्जणागइं कोइं ।
दुल्लह अच्चग्धरं नाउतहिं संकमइ तस्स ।।

वृ- तत्रानन्तरोक्ते प्रकारे द्वावपि शय्यातरौ अथवा कोऽपि चिन्तयति यदा भाण्डं नेष्यति तदा बहवः क्रयिका भविष्यन्ति ततोऽत्यर्धतरा शाला भविष्यति यदि बहुकेनापि मूल्येन दुःखेन लप्स्यते तत् दुर्लभामत्यर्धतरां वा शालां ज्ञात्वा अनागतं साधूनामनागमनकाले एव भाटकप्रदानेन गृह्णाति । एतच्च साधुभिरागतैर्ज्ञातं यथा शालाभाटकेनामुकस्यायत्ता जाता ततस्तं गत्वा याचन्ते सोऽपि ब्रूयात् ।

[भा.३३३२] जाव नागच्छते भण्डं ताव अत्थह साहवो ।
एवं वइक्कतो साहू भणंतो होइ सारितो ।।

वृ- यावन्नागच्छति भाण्डं तावत्साधवो यूयं तिष्ठथ, । एवं वक्रयिकः शय्यातरो भवति ।

[भा.३३३३] देसं दाऊण गतो गलभाणं जइछएज्ज वइक्कतो ।
अनोवनुकंपाए ताहे सागारितो सोसि ।।

वृ- पूर्वस्वामी शालादेर्देशमेकं दत्वा काप्यन्यत्र गतो वर्षाकाले च स देशो गलति गलन्तं प्रदेशं वक्रयिकोऽन्योवानुकम्पयाच्छादयति तदा स तेषां साधूनां सागारिकः शय्यातरः । एतदेव सविस्तरं -

[भा.३३३४] मुत्तूणं साधूणं गहितो पुन वक्कतो पउत्थंमि ।

हेठा उवरम्मि ठिते सीसंमि पडालि ववहारो ।।

वृ- साधूनामवकाशं मुक्त्वा तेन पूर्वस्वामिना शय्यातरेण वक्रयो भाटकं गृहीतः । गृहीत्वा च प्रोषितस्तस्मिन् प्रोषितेऽधस्तात् क्रयिकस्य भाण्डमुपरि माले साधवः । अथवा अधस्तात् शालायां स्थिताः साधव उपरि माले वक्रयिकस्य दत्तं एतन्मिश्रमुच्यते । एवं मिश्रे रुपे मिश्रे स्थितानां यदा शालायां साधव उपरि माले वक्रयिकस्य भाण्डं तदा पडाली गलति भाण्डस्योपरीति न काचित्साधूनां क्षतिः । अथ वक्रयिकस्य भाण्डमधस्तात् शालायामुपरि माले तिष्ठन्ति साधवः । पडाली च गलति तदा वक्रयिकश्चिन्तयति । उपरि माले पडाली गलति तत्र साधूनां कष्टं मम त भाण्डमधस्तात् शालायां ततो न विनश्यतीति एवं चिन्तयित्वा पडाली न च्छादयति । तत्र यद्यन्योऽपि कश्चित् न च्छादयति तदा व्यवहारः कर्तव्यः व्यवहारेण छादयितव्य इति । एतदेवाह-

[भा. ३३३५] हेट्ठाकयं वक्कइएण भंडं तस्सोवरिंवावि वसंति साहू ।
भंडं न मेउल्लइ मालबद्धे नोतं छयंतंमि भवेविवाओ ।।

वृ- अधस्तात् शालायां कृतं वक्रयिकेण भाण्डं तस्य भाण्डस्योपरि माले वसन्ति साधवस्ततो नाम भाण्डमस्मिन् माले बद्धेनार्द्रयते न तिम्यते । इति विचिन्त्य न तां पडाली च्छादयति । भवेद्विवादो व्यवहारो जायते कथमित्याह-

[भा. ३३३६] वक्कइय छएयव्वे ववहारकयंमि वक्कयं बेंति ।
अकयंमि य साहीणं वेतितरं दाइयं वावि ।।

वृ- यदि पूर्वमवक्रयकाले एवं वागन्तिको व्यवहारः कृतो यः वक्रयिकेण छादयितव्यमिति तदा वक्रयिकं साधवोऽनुकूलेन प्रतिकूलेन वा वचसा ब्रूवते । यथा त्वया छादयितव्या पडालीति अथ न कृतस्तथारुपो वागन्तिक व्यवहारस्तत्राह- अकृते यथोक्तरुपे वागन्तिके व्यवहारे स्वाधीनं शय्यातरं ब्रुवते यथा च्छादयत पडालीमिति अथ स शय्यातरः क्वापि प्रोषितो भवेत् तदा तस्य शय्यातरस्य दायाहं वा गोत्रिणं ब्रुवते-

[भा. ३३३७] अच्छयंते च दाऊणं सयं सेज्ञायरे घरं ।
अनुसट्ठाईहनिच्छं तं ववहारेण छावए ।।

वृ- अथ शय्यातरः प्रमाद्यति न च्छादयति, तदान्यः कश्चिदभ्यर्थ्यते ततो येन सा पडाली च्छादिता सोऽपि शय्यातरो भवति । अथान्यः कश्चनापि च्छादयिता न विद्यते तदा शय्यातरे स्वयं गृहं दत्वा प्रमादेनानाच्छादयति अनुशिष्टिरनुशासनं क्रियते । आदिशब्दात् धर्मकथा च तथापि च्छादयितुमनिच्छंतं व्यवहारेण येन गृहं दत्तं तेन च्छादनमपि कर्तव्यं । न च पूर्वमाच्छादनं विचारितं, न चास्माकमकिञ्चनानां किञ्चिदस्ति येन च्छादयाम इत्येवं राजकुलेऽपि गत्वा व्यवहारकरणेन च्छादयेत् । तदेवमवक्रयसूत्रं भावितमिदानीं क्रयिकसूत्रमति देशतो व्याख्यानयति-

[भा. ३३३८] एसोवकमो नियमा कइयंमि वि होइ आनुपुव्वीए ।
नवरं पुन नाणत्तं उच्चत्ता गेण्हती सोऊ ।।

वृ- य एव क्रमोऽवक्रयिकेऽभिहितः स एव क्रमो नियमात् क्रयिके शय्यातरत्वचिन्ता कृता तथा तथैव रीत्या क्रयिकेऽपि कर्त्तव्येति नवरं पुनर्वक्रयकात् क्रयिकस्य नानात्वं इदं वक्रयिकः कियत्कालं मूल्यप्रदानतो गृहीतः स तु क्रयिकः पुनरुच्चत्वेन गृह्णाति यावज्जीवं मूल्यप्रदानत आत्मसत्ताकी करोति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१८३) *विहवधूया नायकूलधूयवासिणी सावियावि ओग्गहं अनुन्नवेयव्वा किमंगपुनपिया वा भाया वा पुत्तेवासेवि यावि ओगाहे ओगेण्हियव्वे ।*

[भा.३३३९] सागारिय अहिगारे अनुवत्तं तंमि कोति सो होत्ति ।
संदिठो व पभूवो विहवा सुत्तस्स संबंधो ।।

वृ- इह पूर्वसूत्रात्सागारिकाधिकारः शय्यातराधिकारोऽनुवर्तते । तस्मिन् अनुवर्तमाने अनेन सूत्रेण कोऽपि सागारिकः । कोऽपि प्रभुरिति प्रतिपाद्यमित्येष विधवासूत्रस्य सम्बन्धः । अस्य व्याख्या-न विद्यते धवो भर्ता यस्याः सा विधवा धूता दुहिता ज्ञातिकुलवासिनी पितृगृहवासिनी पितामहगृहवासिनी वा इत्यादि । अथवा समासकरणादिदं द्रष्टव्यं-या दुहिता विधवा या च ज्ञातिकुलवासिनी दुहिता नाम या गृहजामातुर्दत्ता साप्यवगृहमनुज्ञापयितव्या किमङ्ग पुनः पिता वा भ्राता वा पुत्रो वा ससुतरामनुज्ञापयितव्यः । तथा चाह-सेयावतीत्यादि तौ द्वावप्यवग्रहमवग्रहीतव्याविति सूत्राक्षरार्थः ।

[भा.३३४०] विगय धवा खलु विधवा रुवं तु भत्तारमाहु नेरुत्ता ।
धारयति धीयते दधाति वा तेन उ धवोत्ति ।।

वृ- विगतधवा खलु विधवा विगतो धवोऽस्था इति व्युत्पत्तेः । धवं तु भर्तारमाहुर्नैरुक्ता निरुक्तशास्त्रविदः कया व्युत्पत्त्या इत्याह-धारयति तां स्त्रियं धीयते वा तेन पुंसा वा स्त्री दधाति सर्वात्मना पुष्णाति वा तेन कारणेन निरुक्तिवशात् धव इत्युच्यते-

[भा.३३४१] विधवा वणुन्न विज्जइ किं पुन पियमाइ मायपुत्तादी ।
सो पुन पभुवऽपभुवा अपभू पुन तत्थिमे होइ ।।

वृ- विधवाऽप्यनुज्ञाप्यते किं पुनः पिता माता भ्राता पुत्रादिर्वा स सुतरामनुज्ञाप्यः केवलं स पुनः पुत्रभ्रातृप्रभृतिको द्विधा प्रभुर्वा भवेत् अप्रभुर्वा तत्र पुनरप्रभव इमे वक्ष्यमाणा भवन्ति ।

[भा.३३४२] आदेसदासभइए विरिक्कजामाइए उदिन्नाय ।
अस्सामि मासो लहुतो सेस पभूणुग्गहेणं वा ।।

वृ- आदेशः प्राघूर्णको दासोऽङ्कितो भृतकः कर्मकरो विरिक्तो गृहीतरिक्तादिभागः पुत्रो भ्राता अन्यो वा तथा कन्या अन्यत्र पृथग् गृहे जामातरि एतेऽस्वामिनोऽप्रभव एतान् यदि अनुज्ञापयति तदा प्रायश्चित्तं मासलघु । शेषाः प्रभवः स्वामिनस्तान् अनुज्ञापयेत् आनुग्गहेणं चेति अप्रभूणामपि येषां प्रभुणानुग्रहः कृतो यथा त्वया कृतं दत्तं वा तत्प्रमाणमिति तेन वा अनुग्रहेणाप्रभूनपि अनुज्ञापयेत् नान्यथा अप्रभूणामनुज्ञापने दोषानाह ।

[भा.३३४३] दियरातो निच्छुहणा अप्पभूदोसा अदिन्नदानं च ।
तम्हाउ अनुन्नवए पभुं च पभुणाव संदिठं ।।

वृ- अप्रभूणामनुज्ञापने दोषाःदिवा रात्रौ वा निष्काशनं तत्र च जनगर्हा विनाशादयो दोषा न केवलं निष्काशनमदत्तादानं च यस्मादप्रभूणामनुज्ञापने एते दोषास्तस्मात्प्रबुं प्रभुसन्दिष्टं वानुज्ञापयेत् । -

[भा.३३४४] गहपति गहवतिणि वा अविभत्तसुतो अदिन्नकन्ना वा ।
पभवति निसिट्ठविहया आदिट्ठे वा सस यं दाउं ।।

वृ- गृहपतिर्गृहपत्नी वा अविभक्तसुतो वा अदत्तकन्या वा वाशद्वादविभक्त द्रव्यभ्रातृभ्रातृव्यादि र्वा प्रभवति, । अथवा या दुहिता विधवा निसृष्टागृहे प्रमाणीकृता सापि प्रभवति, यदि वा यः स्वयं दातुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभुणा आदिष्टः सोऽपि प्रभवति । एताननुज्ञापयेत् ।।

मू. (१८४) *पहेवि उग्गहो अनुन्नवेयत्तो ।*

[भा.३३४५] उग्गह पहुंमि दिठे कहियं पुन सो अणुन्नवेयव्वो ।
अद्धाणादीएसुवि संभावणसुत्तसंबंधो ।।

वृ- अवग्रहस्य प्रभोर्दृष्टे क पुनः सोऽवग्रहमनुज्ञापयितव्य, इति चिन्तायामधिकृतसूत्रेणोच्यते पथ्यप्यवग्रहमनुज्ञापयितव्यः । अपिशब्दः ग्रामे नगरे वा किंतु संभावनाया अध्वन्यपि । तथा चाह-अध्वादिकेष्वप्यनुज्ञापयितव्यः । एष संभावना सूत्रसम्बन्धः । सम्प्रति भाष्यविस्तरः

[भा.३३४६] अद्धाण पुव्वभणियं सागारियमग्गणा इहं सुत्ते ।
एगेन परिग्गहिए सागारियसेसए भयणा ।।

वृ- अध्वनि यद्वक्तव्यं सत्सर्वं पूर्वं कल्पाध्ययने भणितमितीह-पुनः सूत्रेऽध्वानं व्रजतां सागारिकमार्गणा शय्यातरमार्गणा क्रियते । तथा एकेन परिगृहीते वृक्षादौ सति शेषे सागारिके भजना यदि संस्तरन्ति तर्हि यावद्भिस्तत् गृहीतं वृक्षादि तावतः शय्यातरान् करोति । असंस्तरणे एकमपि एकमपि शय्यातरमिति भावार्थः । सम्प्रति पूर्वार्धव्याख्यानमाह-

[भा.३३४७] दिने दिने जस्स उवल्लियंती भंडी वहंते व पडालियं वा ।
सागारिए होति स एगएव रीढागएसुं तु जहिं वसंति ।।

वृ- दिने दिने यस्य भण्डीं गन्त्रीं वहन्तीमुपलीयन्ते आश्रयन्ति साधवो यदि वा पडालिकां पडालिका नाम यत्र मध्याह्ने सार्थिकास्थिन्ति यत्र वा वसन्ति तत्र वस्त्रादिमयं कुवलयनं कुर्वन्ति तां वा यस्य दिने दिने उपलीयन्ते तदा स एवैकः सागरिकाः शय्यातरो भवति । रिड्डागतेषु तु अवज्ञया यत्र तत्र गतेषु तु साधुषु यत्र रात्रौ वसन्ति तद्दिवसं शय्यातरः । इयमत्र भावना । यस्य न नियमेन भण्डीं वा पडालिकां वा प्रतिदिनमुपलीयन्ते किन्तु यदृच्छयाकस्मिन दिने कस्यापि तदा यां यां रात्रिं यस्य भण्ड्यादिकमुपलीयते तस्मिन तस्मिन दिने स शय्यातरः ।

[भा.३३४८] वीसमंताविं छायाए जे तहिं पढमं ठिया ।
चिट्ठंति पुच्छियंतेवि पंथिए किमु जहिं वसे ।।

वृ- विश्राम्यन्तोऽपि च्छायायां ये तत्र पथिकाः प्रथमं स्थितास्तिष्ठन्ति तानपि पृष्ट्वा तत्र तिष्ठेत् नान्यथा । किं पुनर्यत्र वसेयुस्तत्र सुतरां ते अनुज्ञातव्यास्ततो भवन्ति से शय्यातराः । सम्प्रति एगेन परिग्गहिए सागरियसेसए भयणा इति व्याख्यानयन्नाह ।

[भा.३३४९] वसतिवाजहिं रत्तिं एगानेगपरिग्गहे
तत्ति ए उत्तरे कुज्जा वावंतेगमसंथरे ।।

वृ- यत्र वृक्षस्याधस्तादन्यत्र वा एकस्य वा परिग्रहे अनेकस्य वा पथिकसंघातस्य परिग्रहे अनेकस्य वा पथि संघातस्य परिग्रहे साधवो रात्रौ वसन्ति तर्हि सर्वानपि तान् शय्यातरान् कुर्युरथ न संस्तरन्ति तदातन्मध्ये एकं शय्यातरं स्थापयति शेषान् निर्विशन्ते एषा शेष सागारिके भजना ।

मू. (१८५) *सेरज्जपरियट्टेसु संथडेसु अव्वोगडेसु अवोच्छिन्नेसु अपरपरिग्गहिएसु सच्चेव ओग्गहस्स पुव्वाणुन्नवणा चिट्ठइ अहालदमवि ओग्गहे ।*

मू. (१८६) *सेरज्जपरियट्टेसु असंथडेसु वोगडेसु वोच्छिन्नेसु परपरिग्गहिएसु भिक्खुभावस्स अट्ठाए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोच्चंपि ओग्गहे अणुन्नवेयव्वेसिया । -त्तिबेमि ।

वृ- से रज्जपरियट्टेसु इत्यादि सूत्रद्वयस्य सम्बन्धप्रतिपादनार्थमाह -

[भा.३३५०] सागारियसाहम्मिय उग्गहगहणेण उत्तमाणंमि ।
सत्तम अंतिमसुत्तं ठवंति राउग्गहे थेरा ।।

वृ- पूर्वसूत्रेभ्यः सागारिकावग्रहणमनुवर्तते ततोऽपि परतरेभ्यः साधर्मिकावग्रहग्रहणं तस्मिन् अनुवर्तमाने अवग्रहग्रहणप्रस्तावात् सत्तमोद्देशकस्यान्तिमं सूत्रद्वयं-राजावग्रहेस्थविराः सूत्रकर्तारः स्थापयन्ति । एषोऽधिकृतसूत्रद्वयसम्बन्धोऽनेन सम्बन्धेनायातस्यास्य व्याख्या-से तस्य भिक्षो राजपरावर्तेषु राजपरावर्तो नामाग्रेतनो राजा कालगतो नवोऽभिषिक्तस्तेषु पुनः कथंभूतेषु इत्याह-संस्तृतेषु न कोऽपितत्राज्यं विलुम्पतीति भावः । तथा अव्याकृतेषु येषां दायादानां सामान्यं तद्राज्यं तैरविभक्तेषु अव्यवच्छिन्नेषु तस्मिन् वंशे अनुवर्तमानेषु अत एवापरगृहीतेषु सैवावग्रहस्य पूर्वानुज्ञापना तिष्ठति । या तस्य वंशस्यादावनुज्ञापना कृता कियन्तं कालं पुनः सैव पूर्वानुज्ञा तिष्ठति तत आह-यथा लन्दमप्यवग्रहः किमुक्तं भवति यावन्तं कालं स वंशोऽनुवर्तते तावन्तमपि कालमवग्रहे राजावग्रहे सैव पूर्वानुज्ञापना वर्तते । न पुनरस्मिन् राज्ञि उपविष्टेस भूयोऽवग्रह मनुज्ञापयितव्यः । एष प्रथमसूत्रस्यार्थः ,। सम्प्रति द्वितीयस्योच्यते-से तस्य भिक्षोराज्यपरावर्तेषु अन्येषु राज्यं प्रतिपन्नेषु असंस्थितेषु त्रुटितपूर्वराज्य संस्थितिषु व्याकृतेषु अन्यवंशीयैर्दायादैर्वा स विभज्य समीकृतेषु व्यवच्छिन्नेषुव्यवच्छिन्नपूर्ववंशेषु अत एव परपरिगृहितेषु भिक्षुभावस्यार्थाय भिक्षुभावो नाम ज्ञानदर्शनचारित्राणि तेषामेव भिक्षुशब्द-प्रवृत्तिनिमित्तत्वादेतच्च प्रथमोद्देशके सप्रपञ्चं भावितम् । तस्यार्थाय स भिक्षुभावः परिपूर्णो भूयादित्येव-मर्थमित्यर्थः । अन्यथा सचित्तादीनामननुज्ञापने अदत्तादानं स्यात् द्वितीयमपि वारमवग्रहोऽनुज्ञा-पयितव्यः । एष द्वितीयस्यापि सूत्रस्यार्थः साम्प्रतमेनामेव व्याख्यां भाष्यकृदप्याह-

[भा.३३५१] संथड मो अविलुत्तं पडिवक्खो वा न विज्जती जस्स ।
अणहिट्ठियन्नेण व अव्वोगडदाइ सामन्नं ।।

वृ- संस्तृतं नाम राज्यं यदविलुप्तं मो इति पादपूरणे । यस्य वा प्रतिपक्षो न विद्यते नाप्यन्येन केनाप्यधिष्ठितं अव्याकृतं नाम दायिनां सामान्यं न पुनस्तैर्विभक्तं ।

[भा.३३५२] अव्वोगडं अविगडं संदिठं वावि जं हवेज्जाहि ।
अव्वोच्छिन्न परंपरमागय तस्सेव वंसस्स ।।

वृ- अव्याकृतं नाम यदविकृतं केनापि विकारमनापादितं यदि वा यद्भवेत् पूर्वराजेन सन्दिष्टं यथा एतस्मै राज्यं देयमिति तदव्याकृतम् । अव्यवच्छिन्नं नाम यत्तस्यैव वंशस्य परम्परया समागतमिति ।

[भा.३३५३] पुव्वाणुन्ना जा पुव्वएहिं राईहिं इह अनुन्नाया ।
लंदं तु होइ कालो चिटइ जा वुग्गहो तेसिं ।।

वृ- पूर्वानुज्ञाता मया पूर्वकं राजभिरनुज्ञाता जहालन्दमवीत्यत्र लन्दो नाम भवतिकालस्ततोऽयमर्थो यावन्तं कालं तेषामवग्रहस्तावन्तमपि कालं सैवावग्रहे पूर्वानुज्ञा तदेवं प्रथमसूत्रव्याख्या कृता ।

[भा.३३५४] जं पुन असंथडं वा सगडंव तहवोगडं व वोच्छिन्नं ।
नंदमुरियाणव जहा वोच्छिन्नो जत्थ वंसोउ ।।

वृ- यत्पुनरसंस्तृतं शकटमिव विशरारूलया संतरीतुमशक्नुवन् यथा व्याकृतं दायादैरन्यवंशजैर्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विभज्यभङ्गीकृतं व्यवच्छिन्नं यत्र नन्दमौर्याणामिव वंशो व्यवच्छिन्नः ।

[भा.३३५५] तत्थ उ अनुन्नविज्जइ भिक्खूभावठमोग्गहो नियर्य ।
दिक्खादि भिक्खुभावो अहवा तइयव्वयादीउ ।।

वृ- तत्र नियतमवश्यंभावेन भिक्षुभावार्थं यथावस्थितभिक्षुभावसम्पादनायानुज्ञाप्यते । अथ कोऽसौ भिक्षुभाव इत्याह-दीक्षादिरादि शब्दात्सम्यक् ज्ञानादि परिग्रहो भिक्षुभावोऽथवा तृतीयव्रतादिकं भिक्षुभावः । तत्रैव भिक्षाशब्दस्य परमार्थत्वात्रूढत्वात्तदेवं कृता सूत्र व्याख्या । सम्प्रति निर्युक्तिः

[भा.३३५६] रन्नाकालगयंमी अथिरगुरुगा अणुन्नव तंमि ।
आणादिणोयदोसा विराधना इमेसु ठाणेसु ।।

वृ- राज्ञि कालगते ये द्वौ वा त्रयो वा दायिनस्तेषां मध्येयः स्थिरः सोऽनुज्ञापयितव्यः । यदि पुनरस्थिर मनुज्ञापयन्ति तदा तेषां प्रायश्चित्तं चत्वारो गुरुकाः आज्ञादयश्च दोषास्तथा विराधना आत्मविराधना संयमविराधना वा एषु वक्ष्यमाणेषु स्थानेषु तान्येवाह-

[भा.३३५७] ध्रुवमन्ने तस्स भज्झेव एक्केव मुक्कसंनाहो ।
ददेन्नेगयरपदोसो अणनुन्नवणे थिरे गुरुगा ।।

वृ- ध्रुवमन्यस्मिन् अन्यवंशजे अस्थिरे तस्य वा पूर्वराजस्य सम्बन्धिनां दायिनामेकस्मिन् अस्थिरे संयतैरनुज्ञापिते स चिन्तयति । एते भट्टारका जानन्ति यो राजा भविष्यति ततोऽहमनुज्ञापितो यदि पुनरितरस्यापि राज्यमभविष्यत् । ततो नाहमनुज्ञापयिष्ये इति स तथा विचिन्त्य नास्ति तथा भावस्थान्यथा भाव इति स एको मुक्तसन्नाहो वर्त्तते । तं च विश्वस्तं ज्ञात्वाऽन्यादासोऽन्येन दायादादिना मारितो राज्यमधिष्ठितं ततः स राजा चिन्तयति । संयतैर्ममामित्रः परिगृहीतो येन कारणेनसो-ऽवग्रहमनुज्ञापितस्ततः स प्रद्विष्टो द्वयोरेकतरस्य प्रद्वेषं कुर्यात् । किमुक्तं भवति ? निर्विषयत्वादि कुर्यात् जीवचारित्रयोर्वा भेदं कुर्यात् तस्मात् यः स्थिरः सोऽनुज्ञापयितव्योऽननुज्ञापने प्रायश्चित्तं चत्वारो गुरुकाः ।

[भा.३३५८] अणनुन्नविह दोसा पच्छावा अप्पितो अवन्ना वा ।
पत्ते पुव्वममंगलनिच्छुभण पदोसपत्थारो ।।

वृ- यदि स्थिरो नानुज्ञाप्यते तदा एतस्मिन्ननुज्ञापिते दोषाः सर्वे सामान्ये पाषण्डाः समीपमागता निर्ग्रन्थाः पुनरवज्ञां कृत्वा स्थितास्तः प्रद्वेषतो निष्काशनादि कुर्यात् । तस्माद्व्यवच्छिन्ने वंशे सोऽवश्यमवग्रहमनुज्ञापयितव्यः । किं पूर्वं पश्चान्मध्ये वा तत्र यदि सर्वैरन्यैः पाषण्डैरनुज्ञापिते स पश्चादनुज्ञाप्यते ततः स चिन्तयति-अहमेतेषामप्रियोऽवज्ञा या ममैतैः क्रियते तेन पश्चादागताः । अथ प्राप्ते राज्ये पूर्वमनुज्ञाप्यते । तदा कदाचिदमङ्गलंमन्येत ततो निच्छुभणं निष्काशनं कुर्यात्प्रद्वेषतः प्रस्तारो जीविताद्व्यपरोपणं क्रियते । तस्मान्मध्येऽनुज्ञापयितव्यो यदि पुनर्भद्रक इति ज्ञातो भवति पूर्वं चानुज्ञाप्यमानो मङ्गलमितिमन्यते तदा पूर्वमप्यनुज्ञापनीयः । अथ कथं स स्थिरो ज्ञातव्यः कथं वा भद्रकः कथं वा पूर्वमनुज्ञाप्यमानो मङ्गलं मन्यते इति तत आह-

[भा.३३५९] उहादी आभोगणा निमित्तविसएण वावि नाऊणं ।
भद्दगपुव्वा मणुना वयंतमनाएय मज्झंमि ।।

वृ- अवध्यादिनाऽतिशयेनादिशब्दान्मनः । पर्यवज्ञान श्रुतातिशयविशेषपरिग्रहोऽथवा निमित्तविशेषेणाथात्मनोऽवध्याद्यतिशयो निमित्तविशेषो वा न विद्यते तदा अन्यानवध्याद्यतिशयिनो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निमित्तविशेषं ज्ञात्वा पृष्ट्वा भद्रकंपूर्वमनुज्ञापयेत् प्रान्तमज्ञातं वा मध्ये-

[भा.३३६०] एएणं विहिणाउ सोणुन्नवितो जयावएज्जाहि ।
रया किं देमित्ति यं जं दिन्नं अन्नराईहिं ।।

वृ- एतेनान्तरोदितेन विधिना सोनुज्ञापितो राजा यदा वदेत् किं ददामीति तदा वक्तव्यं यद्दत्तमन्यै राजभिस्तद्देहीति ।

[भा.३३६१] जाणंतो अनुजाणइ अजाणतो भणति तेहिं किं दिन्नं ।
पायोग्गंतिय भणिए किं पाउग्गं इमं सुणसु ।।

वृ- एवमुक्ते जानानः सर्वमनुजानाति, अज्ञायको ब्रूते तैरन्यैराजादिभिः किं दत्तं तत्र प्रायोग्यमिति भणितव्यं तस्मिन् भणिते पुनर्ब्रूते-किं प्रायोग्यमिति । ततो वक्तव्यं शृणुत इदं प्रायोग्यं तदेवाह -

[भा.३३६२] आहार उवहि सेज्जा ठाणनिसीयण तुयट्टगमनादी ।
थीपुरिसाण य दिक्खा दिन्ना नोपुव्वराइहिं ।।

वृ- नो अस्माकं पूर्वराज्ञैराहारउपधिः शय्यास्थानमूर्ध्वस्थानं निपदनं त्वगवर्तो गमनमादि-शब्दादागमनपरिग्रहस्तथा स्त्रीपुरुषाणां दीक्षाऽनुज्ञाद्वारेण दत्ता ।

[भा.३३६३] भद्दो सव्वं वियरइपंतो पुन दिक्खवज्जमियराणि ।
अनु सठाइम काउ निंतेगुरुगाय आणादी ।।

वृ- एवं कथिते सति यो भद्रकः स सर्वं वितरति प्रान्तः पुनर्दीक्षावर्जमितराणि सर्वाण्यप्याहारादीनि अनुजानाति प्रव्रज्यां पुनर्नानुजानाति । तत्र यदि तस्य राज्ञोऽनुशिष्टिमकृत्वा आदिशब्दात् विद्यादि वा प्रभुकरणं वा अकृत्वा यदि तद्विषयात् निर्गच्छन्ति तदा तेषां प्रायश्चित्तं चत्वारो गुरुकाः आज्ञादयश्च दोषाः ।

[भा.३३६४] चेइय सावगपव्वइउ कायअतरंत बालवुड्ढाय ।
चत्ता अजंगमावि य अभत्ति तित्थस्स परिहानी ।।

वृ- अन्यच्च चैत्यानितेन परित्यक्तानि श्रावका ये च प्रव्रजितुकामास्तथा अतरन्तोग्लाना बाला वृद्धा अजङ्गमाश्च ते सर्वे परित्यक्ता अभक्तिस्तीर्थकराज्ञा खण्डनात् । तीर्थस्य च परिहानिरापादिता । तथा हि-ये तत्र विषये परिव्रजितुकामास्ते न प्रव्रजिष्यन्ति श्रावका अपि सम्यक्त्वमणुव्रतानि च गृह्णन्तो न ग्रहीष्यन्ति न ग्रहीष्यन्ति ततो भवति तीर्थस्य व्यवच्छेदः । यद्येवं तर्हि तत्रैव तिष्ठन्तु । तत्राप्याह-

[भा.३३६५] अत्थंताण वि गुरुगा अभत्तितित्थस्सहानि जा वुत्ता ।
भणमाण भणवित्ता अच्छंति अनिच्छि वच्चंति ।।

वृ- तत्र तिष्ठतामपि प्रायश्चित्तं चत्वारो गुरुका मासाः देशान्तरे भव्यपौण्डरीक प्रतिबोधनलाभतो भ्रष्टत्वात्तथा तीर्थकराणामभक्ति स्तिष्ठद्भिः कृता तदाज्ञा खण्डनात् तीर्थस्य हानिरापादितया स्वयमेव तेन राज्ञोक्ता स्त्रीपुरुषा न दीक्षितव्या इति यद्येवं तर्हि किं कर्तव्यमत आह-स्वयं भणन्तः प्रज्ञापयन्तेऽन्यैर्भणयंत स्तिष्ठन्ति तथापि चेत् स नेच्छेत् तर्हि ततो देशात् व्रजन्ति-

[भा.३३६६] अहपुन हवेज्ज दोन्नी रज्जाइं तस्स नरवरिंदस्स ।
तहियं अनुजाणंतो दोसुविरज्जेसु अप्पबहुं ।।

वृ- अथ पुनस्तस्य नरवरेन्द्रस्य स्वयमन्यैर्वा प्रज्ञाप्यमानस्य कदाचित् द्वे राज्ये भवतस्तत्र तयोर्द्वयो

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

राज्ययोर्मध्ये एकत्र क्वाप्यनुजानाति यथा मम द्वे राज्ये तत्र तयोर्द्वयोर्मध्ये यत्रैकत्र भवद्भ्यो रोचते तत्र प्रवाजय द्वितीये नानुजानामि । एवमुक्तेऽल्पबहु परिभाव्य यत्र भूयात्तीर्थ प्रवृद्ध्यादिलाभस्तत्र स्थातव्यमेतदेव स्पष्टतरमाह-

[भा.३३६७] एक्कहिं वि दिन्नरज्जे एगत्थ होइ अविदिन्नं ।
एगत्थ इत्थियातो पुरिसज्जायायएगत्थ ।।

वृ- एकत्र एकस्मिन् राज्ये वितीर्णमनुज्ञातं भवति । एकस्मिन् राज्येऽवतीर्णं यत्रानुज्ञातंतत्र स्त्रियः पुरुषा वा अनुज्ञाता । अथवा एकत्र राज्ये स्त्रियो अनुजानीते एकत्र पुरुषजनान् ।

[भा.३३६८] थेरा तरुणा य तहा दुग्गया य अड्डयाय कुलपत्ता ।
जानवया नागरया अभंतरया कुमाराय ।

वृ- अथवा एकत्र राज्ये स्थविराननुजानात्येकत्र तरुणान्, अथवा एकत्र दुर्गतकान् पात्र आढ्यान् यदि चैकत्र कुलपुत्रान् परत्राभीरान् एवमेकत्रजानपदानन्यत्र नागरकान् एकत्राभ्यन्तरकान् अभ्यन्तरका नाम ये राजानमति प्रत्यासन्नीभूयावलगन्ति कुमारा राज्ञो दायादाः । एवमनुज्ञाते किं कर्तव्यमित्याह-

[भा.३३६९] उहीमादीनाउं जे बहुतरयाउ पव्वयंति तहिं ।
ते वेत्ति समनुजाणसु असती पुरिसेव जे बहुगा ।।

वृ- अवध्यादिनादिशब्दात् श्रुतातिशयविशेषेण निमित्तविशेषेण वा ज्ञात्वा यत्र बहुतरकाः । अत्र अनुजानीहि, असति अवध्यादेर्निमित्तविशेषस्याभावे वा ये बहवः पुरुषास्तानेवानुज्ञापयति न शेषान् स्तोकानष्टप्रभृतीनिति ।

[भा.३३७०] एयाणि वियरति तहिं कम्मघनो पुनभणेज्ज तत्थइमं ।
दिट्ठाउ अमंगल्लामा वा दिक्खेज्ज अच्छत्ता ।।

वृ- एतानि अनन्तरोदितानि प्रान्तोऽपिमनाक् भद्रकः सन् तत्रात्मीयेराज्ये वितरति । य पुनः कर्मघनो निबिडपापकर्मा स तत्रानुज्ञापनायां क्रियमाणायां इदं ब्रूयात् । दृष्टा अपि सन्तो यूयमभङ्गलास्त-स्मादप्रतिठन्तो मा कश्चन दीक्षयेयुरिति वा शब्दो वापेक्षया विकल्पते ।

[भा.३३७१] मावादच्छामि पुनो अभिक्खणं बेंति कुणति निव्विसए ।
पभवत्तो भणति ततो, भरहाहिवती नसि तुमंति ।।

वृ- यदि वा मा पुनर्भूयो द्रक्ष्याम्येतान् अभीक्ष्णंवा ब्रुवन्ति स्वयमन्यैर्वा पुनः पुनर्विज्ञपयन्तीति कृत्वा निर्विषयान् करोति । ततोयः प्रभवत् वक्ष्यमाणगुणोपेतो ब्रूते नासि त्वं सकलस्य भरतस्याधिपतिर्येन निर्विषयत्वाज्ञापनेऽस्माकंभयं स्यादत्र स्थातुं न दास्यसि ततोऽन्यत्र यास्यामः । तथा इदमपि ब्रूते-

[भा.३३७२] केवइयं वा एयं गोपयमेत्तं इमं तुहं रज्जं ।
जं पेल्लिउ नासिय गमंति य महुत्तमित्तेण ।।

वृ- क्रियद्वा एतत् गोष्पद मात्रमिदं च राज्यं यत्रेयं मुहूर्तमात्रेण नष्ट्वा गम्यते । एवमुक्ते स प्राह ।

[भा.३३७३] जं होउं तं होउ पभवामि अहं तु अप्पणो रज्जे ।
सो भणइ नीहमिज्जं रज्जातो किं बहूणाओ ।।

वृ- स राजा ब्रूते यत् यावन्मात्रंभवतु तावन्मात्रं आत्मनो राज्ये तावदहं तस्मात् किमत्र बहुना मम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्यात् यूयं निर्गच्छतेति एवमुक्ते यत्कर्तव्यं तदाह-

[भा.३३७४] अनुसट्ठी धम्मकहा विज्जनिमित्तादिएहिं आउट्टे ।
अट्ठिएपभुस्स करणं जहा कयं विण्हुणा पुव्विं ।।

वृ- अनुशिष्ट्या अनुशासनेन धर्मकथया विद्यया निमित्तेन आदिशब्दान्मन्त्रेण चूर्णयोगैर्वा तं राजानमावर्तयेत् । अनुकूलयेत् अत्रैवमपि न तिष्ठति यर्हि तस्मिन् अस्थिते प्रभोरन्यस्य करणं कर्तव्यं यथा कृतं विष्णुना विष्णुकुमारेण । अथ कीदृशस्तं राजानमन्यप्रभुकरणे प्रेरयतीत्यत आह-

[भा.३३७५] वेउव्वियलद्धी वाई सत्थे विज्जतोरसवलीवा ।
तवलद्धिपुलाती वापेल्लेति तमेतरे गुरुगा ।।

वृ- या वैक्रियलब्धिमान् यो वादिषु शास्त्रे निर्मातोऽनेकैरपि पुरुषसहस्त्रैर्दुर्जयः अथवा विद्याबलवान् यदि वौरसबली साह सिकोऽथवा तपो लब्धि पुलाकः स तमन्यप्रभुकरणेन प्रेरयति । यस्तु सत्यामपि शक्तौ प्रभुमन्यं न करोति तस्मिन्नितरस्मिन् प्रायश्चित्तं चत्वारो गुरुकाः । अथ कथं प्रभुमन्यं करोती ?

[भा.३३७६] तं घेत्तुं बंधिऊणं पुत्तं रज्जं ठवेति उ समत्थो ।
असती अनुवसमंते निग्गंतव्वं ततो ताहे ।।

वृ- तं राजानं गृहीत्वा बन्धनेन च बध्वा समर्थस्तस्य पुत्रं राज्ये स्थापयति असति सामर्थ्ये अनुषिष्ट्यादिभिरुपशेमयति । स च तथोपशम्यनामोऽपि नोपशाम्यति तर्हि ततो देशान्निर्गन्तव्यं तत्राध्वनि यतनामाह-

[भा.३३७७] भत्तादिफासुएणं अलब्भमाणे य पणगहानीए ।
अद्धाणे कायव्वा जयणा उ जा जहिं भणिया ।।

वृ- अध्वनि मार्गे प्रासुकेन भक्तादावलभ्यमाने पञ्चकहान्या यतना कर्तव्या । या यत्र ग्रामे नगरे अरण्येवा पूर्वं कल्पाध्ययने भणिता ।।

<u>उद्देशकः ७ समाप्तः</u>

मुनि दीपरत्नसागरेण संशोधिता संपादिता व्यवहारसूत्रे सप्तमोद्देशकस्य [भद्रबाहु स्वामि रचिता निर्युक्तियुक्तं] संघदासगणि विरचितं भाष्यं एवं मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

उद्देशकः ८

व्याख्यातः सप्तमोद्देशकोऽधुनाष्टम आरभ्यते । तत्र चेदमादिसूत्रं-

मू. (१८७) *गाहाउपज्जोसविए ताहे गाहाए ताहे पएसाए ताहे उवासांन्तराए जमिणं सेज्ञा संथारग लभेज्ञा तमिणं तमिणं ममेवसिया थेरायसे अनुजाणेज्ञा तस्सेवसिया, थेरायसेनो अनुजाणेज्ञा, एव से कप्पइ आहा राइनिधाए सेज्ञासंथारंगपडिग्गाहेत्तए ।।*

[भा.३३७८] तह चेव उग्गहम्मी अनुयत्तं तंमि रायमादीणं ।
साहम्मि उग्गहम्मी सुत्तमिणं अठमे पढमं ।

वृ- तथैव पूर्वोक्तेनैव प्रकारेण राजादीनामवग्रहे त वर्तमाने अवग्रहप्रस्तावादष्टमे उद्देशके प्रथममिदं सूत्रं । साधर्मिकावग्रहे पठति एष सूत्र सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-गाहा गेहं तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऋतौ ऋतुबद्धे काले वर्षाकाले वा पर्युषितस्तस्मिन् गाहे सूत्रे स्त्रीत्वं प्राकृतत्वात्तदेवमुत्तरत्रापि तस्मिन् प्रदेशेऽन्तर्बहिरादिलक्षणे तस्मिन्नवकाशान्तरे द्वयोर्मध्यभागलक्षणे यत् यत् शय्यासंस्तारकं शय्यासंस्तारकभूमि लाभस्तत् ममैव स्यादिति ब्रूते । तत्र यदि स्थविरास्तस्या शठभावमवगम्यानुजानन्ति, तदातस्यैवस्यादथ से तस्य शठभावंमवबुध्य स्थविरा नानुजानते । एवं तर्हि से तस्य कल्पते यथा रात्निकतया यथा रत्नाधिकतया शय्यासंस्तारकं शय्यासंस्तारकभूमिं परिग्रहीतुमिति सूत्रसंक्षेपार्थः ।

[भा.३३७९] गाहाघरे गिहेया एगठा होंति उग्गहे तिविहो ।
उउबद्धे वासासु य वुड्ढावासे य नाणत्तं ।।

वृ- गाहा इति धरमिति गिहमिति वा एते त्रयोऽप्येकार्थास्तच्च गृहं त्रिविधे अवग्रह भवति । तद्यथा- ऋतुबद्धसाधर्मिकावग्रहे वर्षावाससाधर्मिकावग्रहे तत्रऋतुरिति ऋतुबद्धावग्रहो गृहीतः । पज्जोसविते इत्यनेन वर्षावग्रहः । एतयोर्द्वयोरप्यवग्रहयोरंतः प्रविष्ट इति कृत्वा सामर्थ्यतस्तृतीयोऽपि वृद्धावासावग्रहो गृहीतस्तथा चाह-वृद्धावासे च तत्र त्रिष्वप्यवग्रहेषु यन्नानात्वं तत्प्रत्येकसूत्रेषु वक्ष्यामीति वाक्यशेषः ।

[भा.३३८०] चाउस्सालादि गिहं तत्थ पदेसोउ अंतो बाहिं वा ।
उवासंतरमो पुन अमुगाणं दोण्ह मज्झंभि ।।

वृ- चतुःशालादिगृहमादि शब्दादेकशालद्विशालत्रिशाल परिग्रहः । तस्य प्रदेशा अन्तर बहिरासन्नदूरादि लक्षणा अवकाशान्तरं नाम अमुकयोर्द्वयोर्मध्यमिति । तदेवं कृता भाष्यकारेण विषमपदव्याख्या ।

[भा.३३८१] खेत्तस्सउ संकमणे कारण अन्नत्थ पट्ठविज्जंतो ।
पुव्वुद्दिठे तं मि उउवासे सुत्तनिद्देसो ।।

वृ- आचार्य ऋतुबद्धकालनिमित्तं वर्षाकालनिमित्तं वा अन्यत् क्षेत्रं संक्रमितुमना अजायत । तत क्षेत्रस्य संक्रमणे कर्तव्येऽन्यस्मिन् वा आत्मनः कारणे समुत्पन्ने कंचित्साधुमन्यत्र प्रस्थापयेत् । स च प्रस्थाप्यमानः पूर्वोद्दिष्टे तस्निवकाशे आचार्यान् विज्ञयति । अस्मिन् प्रस्तावेऽधिकृतसूत्रस्य निर्देशो भणनं । इयमत्र भावना योऽसौ प्रस्थाप्यतेतेन तत् गृहं दृष्टं यदि वा योऽन्यः पूर्वं क्षेत्रप्रत्युपेक्षणाय गतस्तेन तस्य सम्यक्कथितंयथाऽमुक प्रदेशो निवादोऽमुकः प्रवातोऽमुकः साधारणोऽमुकः सुखावहोऽमुको दुःखावहोऽमुकः सालोकोऽमुको निरालोकस्ततः स प्रस्थाप्यमान आचार्यं विज्ञपयति । यथा मम श्लेष्मा प्रस्पन्दतेऽथवा प्रवाते स्वपतोऽजीर्णमुपजायते यदि वा धर्ममध्यासिनुं न शक्नोमि । अथवा अमुकं अमुकं च साधुमहं सदैव प्रतिपृच्छामि तत एतयोर्मध्ये मम शय्यासंस्तारभूमिमनुजानीत यदि वा प्रस्थापित स्तत्र गत्वा तत् गृहमालोक्यात्मनः संसाधकं प्रदेशमाचार्यस्य श्लेष्मप्रस्पन्दनादिकारणप्रकाशनपुरस्सरं सन्देशयति यथामुकाममुकां मे संस्तारकभूमिमनुजानीतेति तथा चाह-

[भा.३३८२] दीवेउं तं कज्जं गुरुं च अन्नं व सोउ अप्पाहे ।
ते विय तं भूयत्थं नाउं असढस्स वियरंति ।।

वृ- तत् श्लेष्मप्रस्पन्दनादिकार्यं दीपयित्वा प्रकाश्य गुरुमाचार्यमन्यं वा स्पर्धकपतिमुपाध्यायादिकं अप्पाहेति सन्देशयति । तेऽपि च गुरवोऽन्ये वा यत्सन्दिष्टं साक्षात्कथितं वा तत् भूतार्थं यथावस्थितं ज्ञात्वा तस्या शठस्य तां शय्यासंस्तारकभूमिं वितरन्ति ।

[भा.३३८३] अह पुन कन्दप्पातीहिमग्गते तो उ तस्स न दलंति ।
एयं तु पिंडसुत्ते पत्तेय इहं तु वुच्छमि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अथ कन्दर्पादिभिर्मार्गयति । कन्दर्पनिमित्तमन्यद्वा किञ्चिश्चित् शठत्वमवलम्ब्य विज्ञपयति तदा तस्य न ददति नानुजानन्ति । अथवा जमिणं सेज्ज्संथारयं लभिज्जा इत्यादि सूत्रस्यायमर्थः-शय्या एव संस्तारकः शय्या संस्तारकः । स च द्विधाफलक संस्तारकः कंचि[थि]संस्तारको वा । तस्य योग्रेतनः संस्तारकः खरकस्तत्र स्वपतः पार्श्वाणि दुःखायन्ते । ततस्तेन पूर्वं मृदुकुले गत्वा मृदु संस्तारकोऽनुज्ञापितः तज्ञ आचार्यसमीपमागत्य विज्ञपयति यं यं शय्या संस्तारकं लभेत स ममैव स्यात् । तत्र यदि स्थविरा स्तस्याशठत्वमालोक्यानुजानन्ति तदा स तव [तस्य] स्यात् अथ शठ इति कृत्वा तस्य नानुजानन्ति तर्हि से तस्य कल्पते यथा रात्निकतया शय्यासंस्तारकं परिगृहीतुं नान्यथेति एतत् पिण्डसूत्रं व्याख्यातमधुना पुनः प्रत्येकसूत्राणि व्याख्यास्यामि ।

मू. (१८८) *सेय अहा लहुस्सगं सेज्ञा संथारगं गवेसेज्ञा । जं चक्किया एगेन हत्थेणं ओगिज्ञ जाव एगाहं अद्धाणं परिवहित्तए एस मे वासावासुं भविस्सइ ।।*

वृ- इत्यादि सोधिकृतो भिक्षुर्यथा लघुस्वकमनेकान्त लघुकं वीणाग्रहणग्राह्यं । शय्या सर्वाङ्गिका संस्तारकोर्धतृतीयहस्तदीर्धहस्तचत्वार्यङ्गुलानि विस्तीर्णः । अथवा तत्पुरुषः समासः शय्या एवं संस्तारकः शय्यासंस्तारकः तृणमयं पट्टमयं वा गवेषयेत् । तत्र यत् शक्नुयात् एकेन हस्तेनावग्रह्य यावदेकाहं वा द्व्यहं त्र्यहं वा अध्वानं गच्छन् परिवोढुं तत् गृह्णीयात् । एष मे वर्षावासे भविष्यति एष वर्षा सूत्रस्यार्थः।

मू. (१८९) *से अहा लहुसगं सेज्ञा संथारगं गवेसेज्ञा जं चक्किया एगेणं हत्थेणं ओगिज्ञ जावएगाह वादुयाहं वा तियाहं वा परिवहित्तए एसमे हेमंतगिम्हासु भविस्सइ ।।*

मू. (१९०) *से अहा लहुसगं सेज्ञा संथारगं जएज्ञा जं चक्किया एगेणं हत्थेणं ओगिज्ञ जावएगाहं वा दुयाहं वा तियाहं वा चउयाहं वा पंचगाहं वा अद्धाणं परिवहित्तए एस मे वुड्ढावासासु भविस्सइ ।।*

वृ- एवं हेमन्तग्रीष्मसूत्रार्थो वृद्धावाससूत्रार्थश्च भावनीयः नवरं वृद्धावाससूत्रे चतुरहं वा पञ्चाहं वेत्यधिकं वक्तव्यमधुना निर्युक्तिविस्तरः -

[भा.३३८४] सोपुन उउम्मि घेप्पइ संथारो वुड्ढावासे वा ।
ठाण फलगादी वा उउम्मि वासासुय दुवे वि ।।

वृ- स पुनः संस्तारकः स्थानं स्थानरुप ऋतुबद्धे वर्षाकाले वृद्धावासे च यथानुरुपे गृह्यते । तद्यथा-ऋतुबद्धे कालेऽवकाशे गृह्यते, वर्षावासे च वृद्धावासे च निवातस्थानेऽपि, तथा ऋतुबद्धे काले ऊर्णादिमयः संस्तारकः परिगृह्यः पुरुषविशेषं ग्लानादिकमपेक्ष्य फलकादिर्वा वर्षावासे द्विकावपि द्वावपि संस्तारकौ वक्ष्यमाणलक्षणौ गृह्णीयात् ।

[भा.३३८५] उउबद्धे दुविहगहणा, लहुगो लहुगाय दोष आणादी ।
झामियहियवक्खेवे संघट्टणमादिपलिमंथो ।।

वृ- द्विविधः संस्तारकः परिशाटिरुपोऽपरिशाटिरुपश्च । तत्र पारिशाटिरुपो द्विविधो झुषिरोऽझुषिरश्च तत्र शाल्यादि पलालतृणमयो झुषिरः कुशवल्ककादिरुपोऽझुषिरः, । अपरिशाटिरुपो द्विविधः-एकाङ्गिकोऽनेकाङ्गिकश्च । एकाङ्गिकोपि द्विविधः सङ्घातितोऽसंघातितश्च । तत्रासङ्घातित एकफलकात्मकः संघातितोद्व्यादिफलक संघातात्मकः अनेकाङ्गिकः कंथिका प्रस्तारात्मकस्तत्र यदि ऋतुबद्धेऽभ्कुषिरं परिशाटिं संस्तारकं गृहाति तदा तस्य प्रायश्चित्तं लघुको मासः । झुषिरंगृह्णतश्चत्वारो लघुका अपरिशाटिमपिगृह्णतश्चत्वारो लघुका न केवलं प्रायश्चित्तं किन्त्वाज्ञादयश्चदोषाः । तथा यद्यग्निना

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स ध्याम्यते तदापि प्रायश्चित्तं चत्वारो लघुकाः व्याक्षेपणे वा स्तेनैरपहृते चतुर्लघुकं अपरिशाटौ ध्यामिते हृते वा मासलघुस्ततोऽन्यं संस्तारकं मृगयमाणानां सूत्रार्थपलिमन्थः तथा तस्मिन् संस्तारके ये प्राणजातय आगन्तुकास्तदुद्भता वा तान् संघट्टयति अपद्रावयति च ततस्तन्निष्पन्नं तस्य प्रायश्चित्तमिति गाथार्थः ।

[भा. ३३८६] परिसाडिय अपरिसाडी दुविहो संथारतो समासेन ।
परिसाडि झुसिरेयर एत्तो वुच्छं अपरिसाडिं ।।

वृ- द्विविधः समासेन संक्षेपेण संस्तारकः तद्यथा परिशाटिरपरिशाटिश्च । तत्र परिशाटिर्द्विधा-झुषिरः इतरश्च । इतरो नाम अझुषिरः । अत ऊर्ध्वमपरिशाटिं वक्ष्ये प्रतिज्ञातमेव करोति-

[भा. ३३८७] एगंगी अनेगंती संघातिम एयरोय एगंगी ।
अब्कुसिरगहणे लहुतो चउरो लहुकाय सेसेसु ।।

वृ- अपरिशाटिर्द्विधा-एकाङ्गिकोऽनेकाङ्गिकश्च । तत्रैकाङ्गिको द्विधा-संघातिम इतरश्च । अमीषां व्याख्यानं प्रागेव कृतम् । तत्राझुषिरस्य संस्तारस्य ग्रहणे प्रायश्चित्तं लघुको मासः शेषेषु झुषिरसंघातिमेतरैकाङ्गिकानेकाङ्गेषु प्रत्येकं चत्वारो लघुकाः ।

[भा. ३३८८] लघुकाय झामियंमि य हरिएविवहोंति अपरिसाडिम्मि ।
अपरिसाडिंमिय लहूगो आणादि विराधना चेव ।।

वृ- अग्निना ध्यामितेऽपरिशाटो स्तेनैर्वा तस्मिन्नपहृते प्रत्येकं प्रायश्चित्तं चत्वारो लघुका भवन्ति परिशाटौध्यामित्ते हृते वा प्रत्येकं लघुको मासः आज्ञादयश्च दोषास्तथा विराधना च संयमस्य ।।

[भा. ३३८९] विक्खेवो सुत्तादिसु आगंतु तदुब्भवाण घट्टादी ।
पलिमंथो पुव्वुत्तो मंथिज्जत्ति संजमोजेन ।।

वृ- अन्य संस्तारकमार्गणे सुत्रादिष्वर्थेषु च विक्षेपो व्याघातः पलिमन्थ इत्यर्थः । तथा यत्तत्रागन्तुकाः प्राणाः कीटिकादयो ये च तदुद्भवा मत्कुणादयस्तेषां यत् घट्टनादि तन्निमित्तमपि प्रायश्चित्तं । इदानीं पलिमन्थो व्याख्येयः । स च पूर्वमेव विक्खेवो सुत्तादिसु इत्यादिना ग्रन्थेनोक्तः । अथ कस्मात् व्याक्षेपो घटनादि वा परिमन्थ इत्युच्यते । तत आह-येन प्रकारेण तेन संयम उपलक्षणमेतत् सूत्रमर्थश्च मथ्यते तेन परिमन्थ इति ।

[भा. ३३९०] तम्हाउ न घेत्तव्वो उउंभि दुविहो वि एस संथारो ।
एवं सुत्तं अफलं सुत्तनिवाओउकारणितो ।।

वृ- यस्मादेते दोषास्तस्मात् ऋतौ ऋतुबद्धे काले द्विविधोऽप्येष परिशाट्य परिशाटिरुपः संस्तारो न गृहीतव्यः । अत्र पर आह-एवं सति सुत्रमफलं सूत्रे तृणमसयस्य शय्यासंस्तारकस्यानुज्ञानादाचार्य आह-सूत्रनिपातः कारणिकः । कारणवशात्प्रवृत्तः । तदेव कारणमुपदर्शयति-

[भा. ३३९१] सुत्तनिवातो तणेसुं देसि गिलाणे य उत्तमट्ठेय ।
चिक्खल्लपाणहरिए फलगाणि वि कारणज्ञाते ।।

वृ- सूत्रस्य निपातो निपतनमवकाश इति भावः । देशे देशविशेषे तथाग्लाने उत्तमार्थे च तथा चिक्खल्ले कर्दमे प्राणे प्राणजाते भूमौ संसक्ते तथा हरिते हरितकाये एवं रुपे कारणजाते सति फरकान्यपि गृह्यन्ते । फलकरुपोऽप्यपरिशाटिः संस्तारको गृह्यते इति गाथा संक्षेपार्थः । साम्प्रतमेनामेव विवरीषुः राह -

[भा. ३३९२] असिवादिकारणगता उवही कुत्थण अजीरगभया वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अझुसिरमसंधिअबीए एक्कमुहे भंगसोलसगं ।।

वृ- अशिवादिभिः कारणैस्तत्र प्रदेशेगता यो वर्षारात्रे पानीयेन प्लाव्यते, यथा सिन्धुविषयो अथवा तत्र देशे स्वभावतः प्रखराभूमिस्ततो रात्रौ शीतलवातसम्पर्कतोवश्याय-पतनतो वा जलप्लावितेव सा भूमिरुपजायते । अथवा आसन्नीभूतेन पानीयेन तमवकाशमप्राप्नुवतापि भूमिः स्विद्यति । तत्रोपधेः-कोथनंमाभूत् । मावाऽजीर्णेन ग्लान्यमित्युपधिकोथनभयादजीर्णभयाद्वा तृणानि गृह्णन्ति । साधवस्तानि च अझुषिराणि असन्धीनि अबीजानि च एतान्येकमुखानि क्रियन्ते यत्र च अझुषिर असन्धे वा अबीज एकमुखरुपेषु चतुर्षु पदेषु भङ्ग षोडशं षोडश भङ्गाः तत्र असंतमपितदपि अझुषिरादिपदमाह-

[भा.३३९३] कुसमादि अझुसिराई असंधबीयाइं एक्कतोमुहाइं ।
देसी पोरपमाणा, पडिलेहातिन्निवेहासं ।।

वृ- कुशादीनि कुशवच्चक्रप्रभृतीनि तृणानि अभ्कूषिराणि असन्धीनि अबीजानि च भवन्ति तानि एकमुखानि कर्तव्यानि । तत्र भङ्गषोडशमध्ये यत्र भङ्गेषु झुषिराणि तत्र प्रायश्चित्तं चत्वारो लघुकाः । बीजेषु प्रत्येकेषु पञ्चरात्रिं दिवानि लघुकानि अनन्तकायिकेषु गुरुकाणि । शेषेषु भङ्गेषु मासलघु, प्रथमे भङ्गेगृह्णंतः शुद्धा पौरेत्यादि देशीत्यङ्गुष्टोऽभिधीयते । तस्य यत्पर्व तत्प्रमाणानि जिनकल्पिकानां स्थविरकल्पिकानां च तृणानि भवन्ति, । इयमत्र भावना-अङ्गुष्टस्य यत्पर्वं तत्राङ्गुलाग्राणि स्थापयित्वा यावद्भिस्तृणैर्मुष्टिरांपूर्यते तावन्ति मुष्टिप्रमाणानि जिनकल्पिकानां स्थविरकल्पिकानां च तृणानि भवन्ति । तेषां च तृणानां प्रत्युपेक्षास्तिस्रस्तद्यथाप्रभाते मध्याह्ने अपराह्ने च । यदा च भिक्षादौ गच्छन्ति तदा हियसि कुर्वन्ति । साम्प्रतमेतदेव किञ्चिद्व्याचिख्यासुराह-

[भा.३३९४] अंगुठपुव्वमेत्ता जिणाण थेराण होंति संडासो ।
भूमिए विरल्लेउं अवनेत्तु पमज्जए भूमिं ।।

वृ- अङ्गुष्टपर्वमात्राणि अङ्गुष्टपर्वपरिमितमुष्टिप्रमाणानि जिनानां जिनकल्पिकानां स्थविराणां स्थविर कल्पिकानां भवन्ति । तैश्च तृणैः संस्तारक आस्तीर्यमाणस्तावद्भवन्ति यावत्सण्डासः तानि च भूमौ विरल्य शयनार्थं विरलीकृत्य भूमि प्रमार्जन समये अपनीय भूमिं प्रमार्जयति ।

[भा.३३९५] गेलन्न उत्तमट्ठे उम्मग्गेणं तु वत्थसंथारो ।
असतीए अभ्कुसिराइं खराऽसतीए वज्झुसिरावि ।।

वृ- यो नाम ग्लानोयो वा प्रतिपन्नोत्तमार्थः कृतानशनप्रत्याख्यानः तस्मिन् द्वयेऽपि संस्तारक उत्सर्गतो वस्त्ररुपः क्रियते तस्य कोमलतया समाधिभावात् असति अविद्यमाने वस्त्ररुपे संस्तारके अझुषिराणि कुशवच्चकप्रभृतीनि मृग्यन्ते । अथ तानि खराणि यदि वा न सन्ति तदा झुषिराण्यपि शाल्यादि पलालमयान्यानेतव्यानि

[भा.३३९६] तद्दिवसं मलियाइं अपरिमिय सयं तुयट्टजयणाए ।
उभयट्ठि ऊठिएऊ चंक्कमण विज्ञकज्जे वा ।।

वृ- तद्दिवसं प्रति दिवसं मलितानि तृणान्युत्सार्यन्ते । अन्यानि च समानयिन्ते तानि वा परिमितानि गृह्यन्ते यथा समाधिर्भवति तथा सकृत् एकवारं तुयट्टानि प्रस्तारितानि तिष्ठंति, तत्र यतनया करणं उभयं नाम उच्चारः प्रस्रवणं च तदर्थमुत्थिते ग्लाने उत्तमार्थे वा अन्यो निषीदति किं कारणमिति चेत्प्राणिदयार्थमन्यथा शुषिरभावस्तत्रागन्तुकाः प्राणास्तृणान्युपालीयेरन् स तावन्निषीदति यावत्स तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रत्यागच्छति । एवं च क्रमणार्थमप्युत्थिते प्रवातार्थं वा बहिर्निर्गते वैद्यकार्ये वा बहिर्नीते यावत्स प्रत्यानीयते तावदन्यो निषीदति तस्मिन्नागते स उत्तिष्ठति । अथवा स गुरुणामपि पूज्य इति तस्मिन् पूर्वोक्तकारणैरुत्थिते तत्रान्यस्य निषदनं न कल्पते । तेषां तृणानामुपरि हस्तः कर्तव्यः । एतदेवाह-

[भा.३३९७] अन्नोन्नि सव्वइ तहिं पाणदयठाए तत्थ हत्थो वा ।
निक्कारणमगिलाणे दोसा च ते चे चेव य विकप्पो ।।

वृ- अन्यस्तत्र संस्तारके प्राणदयार्थं निषीदति हस्तो वा तत्र क्रियते । अत्र भावना प्रागेव कृता । एतैः कारणैर्यथोक्तरुपसंस्तारक कृतुबद्धे काले निष्कारणं देशादि कारणमन्तरेणाग्लानेऽग्लानस्य तृणमसंस्तारकग्रहणे त एव पूर्वोक्ता दोषा विकल्पो विकल्पदोषश्च । अत्र विकल्पग्रहणेन कल्पप्रकल्पावपि सूचितौ । तेषां व्याख्यानमाह-

[भा.३३९८] अत्थरणवज्जितो उ कप्पो उ होति पट्टदुगं ।
तिप्पभिई तु विकप्पो अकारणेणं च तणाभोगो ।।

वृ- आस्तरणवर्जितः कल्पः किमुक्तं भवति यज्जिनकल्पिका अनवस्तृता रात्रावुक्कुडुकास्तिष्ठन्ति एप कल्प इत्यभिधीयते तत्पुनः पट्टद्विकं भवति । संस्तारोत्तरपट्टयोरुपरियत्सुप्यते इत्यर्थः एष भवति प्रकल्पः । यानि पुनः त्रिप्रभृतीनि संस्तारे प्रस्तारयति एष विकल्पः । यच्च अकारणेन कारणमन्तरेण तृणानां भोगं क्रियते एषोऽपि विकल्पः । अथवान्यथा कल्प प्रकल्प व्याख्यानमाह-

[भा.३३९९] अहवा अज्झुसिरगहणे कप्पोकपकप्पो उ कज्जे ।
झुसिरे अज्झुसिरे वा, होइ विकप्पोअकज्जंमि ।।

वृ- अथवेति प्रकारान्तरोपदर्शने यत्कारणेसमापतिते अज्झुषिराणि तृणानि गृहन्ति । एष कल्पो यत्पुनः कार्ये समापतिते झुषिराण्यपि तृणानि गृह्णानित एष प्रकल्प । यत्पुनरकार्येज्झुषिराणि अज्झुषिराणि वा गृह्णाति एष भवति विकल्पः । एवं तावत्तृणानामृतुबद्धे काले कारणेन गृहीतानां यतनोक्ता । सम्प्रति कारणैरेव कृतुबद्धे काले फलकरुपस्य संस्ताकस्य ग्रहणे यतनां चाह-

[भा. ३४००] जह कारण तणाइं उउबद्धंमि उ हवंति गहियाइं ।
तह फलगाणि वि गेण्हइ चिक्खल्लादीहिं कज्जेहिं ।।

वृ- यथा कारणेदेशादिलक्षणे कृतुबद्धे काले तृणानि गृहीतानि तथा क्रतुबद्धे एव काले चिक्खल्लादिभिः कार्यैरादि शब्दात्प्राणसंसक्तिहरितकाय परिग्रहफलकान्यपि गृह्णाति । तत्र यतनामाह-

[भा.३४०१] अज्झुसिरमविद्धफुडियअगुरुय अनिसठवीणगहणेन ।
आया संजमे गुरुगा सेसाणं संजमे दोसा ।।

वृ- अझुषिरो ज्झुषिररहितोऽविद्धो वेधरहितोऽस्फुटितोऽराजितोऽगुरुको गुरुभाररहितोऽनिसृष्टः प्रातिहारिकः । एतेषां च पञ्चानां पदानां द्वात्रिंशद्भङ्गा । ते च प्रागिव प्रस्तारतः स्वयं ज्ञादव्याः । अत्र यः प्रथमो भङ्गः सोऽनुज्ञातस्तत्र दोषाभावात् अयं लघुकः शेषदोषविनिर्मुक्तश्च ततो यथा वीणा लघुकत्वात् दक्षिणहस्तेन मुखं विवक्षितं स्थानं नीयते इति वाक्यशेषः शेषा एक त्रिंशत् भङ्गा नानुज्ञाताः । तत्र गुरुके आत्मविराधनाप्रत्ययं च प्रायश्चित्तं चतुर्गुरुकं संयमविराधना पुनरेव भवति । गुरुके हस्तात्पतिते एकेन्द्रियादीनामुपघातोऽत्र स्वस्थान प्रायश्चित्तं शेषेषु संयमे दोषाः संयम विराधना । ततस्तत्र प्रत्येकं प्रायश्चित्तं चत्वारो लघुकाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३४०२] अज्झुसिरमादीएहिं अनिसिट्ठं तु पंचिगा भयणा ।
अह संथडपासुद्धे विवज्जए होंति चउलहुगा ।।

वृ- अज्झुषिरादिभिः पदैरारभ्य यावदनिसृष्टमिति पञ्चमं पदं तेषु पञ्चसु पदेषु प्रथमभङ्गरुपेषु इयं वक्ष्यमाणा भजना विकल्पना । तामेवाह-अह संथडेत्यादि शय्यातरेण य उपाश्रयो दत्तस्तस्मिन् यो यथावस्तुतः प्रथमभङ्गरुपः संस्तारकः स गृहीतव्यस्तदभावे पार्श्वेनकृतस्तस्याप्यभावे ऊर्ध्वकृत एवं क्रमेण यतनया ग्रहणं कर्तव्यम् । यदि पुनर्विपर्यासेन गृह्णाति तदा विपर्यस्ते गृह्यमाणे प्रायश्चित्तं चत्वारो लघुकाः ।

[भा.३४०३] अंतो वस्सयबाहिं निवेसवाडसाहिएग्गामे ।
खेत्तंतो अन्नगाम खेत्तबहिं वा अवोयच्छं ।।

वृ- एवमन्तर उपाश्रयस्य यदि संस्तारकं फलकरुपं न लभते तदा बहिरुपाश्रयस्य तथैव गृहीतव्यः । तत्राप्यलाभेऽनेनैव क्रमेण निवेशनादानेतव्यस्तत्राप्यसति वाटकात् तत्राप्यलाभे साहीतः तत्राप्यसति दूरादपि ग्राममध्यादानेतव्यो ग्राममध्येऽप्यसति क्षेत्रान्तस्तत् क्षेत्रमध्या भावादन्यग्रामादाने-तव्यस्तत्राप्यसति क्षेत्राद्बहिष्टोऽप्यानेयः । एवमविपर्यस्तमानयनं कर्तव्यं यदि पुनः सति लाभे विपर्यस्तमानयति तदा प्रायश्चित्तं चत्वारो लघुकाः । सम्प्रत्यानयने यतनामाह-

[भा.३४०४] सुत्तं चे अत्थं च दुवे वि काउं भिक्खं अडंतो उ दुए विएसे ।
लाभे सहूएति दुवेवि घेत्तुं लाभासती एगदुवेव हावे ।।

वृ- सूत्रं च अर्थं च द्वावपि कृत्वा भिक्षामटन् द्वावप्येषयेत् गवेषयेत् तद्यथा भिक्षां संस्तारकं च, तत्र लाभे सति समर्थो द्वावपि गृहीत्वा प्रत्यागच्छति लाभा सति भिक्षांगतस्य संस्तारकाभावे एकं सुत्रमर्थं वा यदि वा द्वावपि हापयति संस्तारकगवेषणेन ।

[भा.३४०५] दुल्लभे सेज्जसंथारे उउबद्धंमि कारणे ।
मग्गणंमि विहीएसो भणतो खेत्तकालतो ।।

वृ- ऋतुबद्धे काले कारणे समापतिते दुर्लभे शय्यासंस्तारके यन्मार्गणं तत्र क्षेत्रतःकालतश्च विधिरेष भणितो अनेन विधिना(ना)न्यथेति ।

[भा.३४०६] उउबद्धे कारणंमि अगेण्हणे लहुगगुरुगवासासु ।
उउबद्धे जं भणियं तं चेव य सेसयं वोच्छं ।।

वृ- ऋतुबद्धे काले कारणे सति यदि संस्तारकं न गृह्णाति तदा प्रायश्चित्तं चत्वारो लघुकाः, वर्षासु पुनरवश्यं गृहीतव्यः संस्तारकस्ततः तत्र तस्याग्रहणे चत्वारो गुरुकाः । तथा या ऋतुबद्धे काले यतना भणिता गवेषणादौ सर्वे सा वर्षास्वपि द्रष्टव्या । शेषं वक्ष्याम । प्रतिज्ञातमेव करोति ।

[भा.३४०७] वासासु अपरिसाडी संथारो सो अवस्स घेत्तव्वो ।
मणिकुट्टिमभूमीए दि तमगेण्हाणे चउगुरुआणा ।।

वृ- वर्षासु यदि मणिकुट्टिमायां भूमौ वसन्ति तथापि संस्तारकोऽपरिशाटिः फलकरुपोऽवश्यं गृहीतव्यस्तमगृह्णाति प्रायश्चित्तं चत्वारो गुरुकास्तथा आज्ञा उपलक्षणमेतत् अनवस्थादयश्च दोषाः ।

[भा.३४०८] पाणासीयलकुंथू उप्पायगदीहगोम्हि सिसुनागे ।
पणए य उवहि कुत्थणमलउदकवहो अजीरादी ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कालस्य शीतलतया भूमौ प्राणाः संमूर्च्छन्ति के ते इत्याह-कुन्थवः प्रतीताः उत्पादका नाम ये भूमिंभित्वा समुत्तिष्ठन्ति दीर्धाःसर्पास्तेभ्य आत्मविराधना, गोम्मी नाम कर्णशृगाली शिशुनागोऽलसः तथा शीतलायां भूमौ पनकः संजायते, उपधावपि पनकाः समुर्च्छन्ति तथा उपधेः शीतलभूमिस्पर्शतः कोथनसंभवः । तथा सत्रे (ए) (सती) हथूलि लगने मलसंभवः ततो हिण्डमानस्य वर्षा पतति उदकवधोऽप्काय विराधना तथा उपधेर्मलिनत्वेनारतिसंभवे निद्राया अलामतो अजीर्णसंभव आदिग्रहणात् ततो ग्लानत्वं तदन्तरं चिकित्सा करणेत्यादि परिग्रहः ।

[भा.३४०९] तम्हा खलु घेत्तव्वो तत्थ इमे पंच वणिया ।
गहणे य अनुन्नवणा एगंगिय अकुयपाउग्गे ।।

वृ- यस्मादेते दोषास्तस्मादवश्यं फलकरुपः संस्तारको गृहीतव्यः । तत्र च ग्रहणे इमे वक्ष्यमाणाः पञ्च वर्णिता भेदास्तानेवाह-ग्रहणेऽनुज्ञापनायामेकाङ्गिके अकुचे प्रायोग्ये च । तत्र प्रथमतो ग्रहणद्वारमाह-

[भा.३४१०] गहणं च जाणएणं सेज्ञाकप्पोउ जेन समहीतो ।
उस्सग्गववाएहिं सो गहणे कप्पिओ होइ ।।

वृ- येन समधीतः सम्यगधीतः शय्याकल्पः शय्याग्रहणविधिस्तेन जानता ग्रहणं संस्तारकस्य कर्त्तव्यं । यतः स उत्सर्गापवादाभ्यां ग्रहणे कल्पिको योग्यो भवति । गतं ग्रहणद्वारमिदानीमनुज्ञापने या यतना तामाह-

[भा.३४११] अनुन्नवणाए जयणा गहिए जयणाहोति कायव्वा ।
अनुन्नाए लद्धे बेंति पडिहारियं एयं ।।

वृ- अनुज्ञापनायां यतना गृहीते च यतना कर्तव्या । तत्रानुज्ञायामियं लब्धे संस्तारके ब्रुवते । एतं संस्तारकं प्रातिहारिकं गृहीष्यामो यावत्प्रयोजनं तावद्धरिष्यामः पश्चात्समर्पयिष्याम इति ।

[भा.३४१२] कालं च ठवेइ तहिं बेइयपरिसाडिवज्जमप्पेहं ।
अनुन्नवणजयणा एसा गहिए जयणा इमा होति ।।

वृ- यदा संस्तारको लब्धो भवति तदा तत्र कालं स्थापयति । एतावन्तं कालं धरिष्यामः तथा ब्रूते एष संस्तारको जराजीर्णतया परिशाटिरुपस्तंएनं वयं गृहीष्यामस्तत्र निर्व्याघातेनैतावता कालेन यत्परिशटति तन्मुक्त्वा शेषमपयिष्यामः । एवं यदि प्रतिपद्यते तदा गृह्यते अथ न प्रतिपद्यते तदा न गृहीतव्यः । किन्त्वन्यो याच्यते । अथान्यो याच्यमानो न लभ्यते, तदा स एव परिगृह्यते केवलं परिशाटी यतना विधेया । एषा अनुज्ञापने यतना गृहीते यतना इयं वक्ष्यमाणा भवति तामेवाह-

[भा.३४१३] कासपुनप्पयव्वो चेतिमिमं जाहितं भवे सुन्नो ।
अमुगस्सवि सोवि सुन्नो ताहे घरम्मी ठवेज्जाहि ।।

[भा.३४१४] कहि एत्थ चेव ठाणे पासे उवरिं च तस्स पुंजस्स ।
अहवा तत्थेवत्त उ ते वि हु नियल्लया अम्हं ।।

वृ- गृहीते संस्तारके पुनः पृच्छति कार्यसमाप्तौ कस्य पुनरर्पयितव्य एष संस्तारकः । एवमुक्ते स यदि ब्रूते ममैव समर्पयितव्यः इति तदा वक्तव्यम् त्वं भवसि शून्यः किमुक्तंभवति, यदायूयं न दृश्यध्वे तदाकस्य समर्पणीयः, अथ ब्रूयाद्मुकस्य, ततो भूयोपि वक्तव्यं सोऽपि यदा शून्यो भवति न दृश्यते इत्यर्थः । तदा कस्मै समर्पणीयः । अथ ब्रूयादत्रैव गृहे स्थापयेत् ततः पुनरपि पृच्छेत् कतरस्मिन्नवकाशे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थापनीयः । एवमुक्ते यदि स ब्रूयाद् यतोऽवकाशात् गृहीतोऽत्रैव स्थाने स्थापयेत् यदि वा वदेत् अत्रैव स्थाने च्छिन्नं प्रदेशेऽथवा यतोऽवकाशात् गृहीतस्तस्य पार्श्वे अथवा यस्य पुञ्जस्योपरिस्थितो गृहीतस्तस्य पुञ्जस्योपरिस्थापयेत् यदि वा यत्र यूयं नयथ तत्रैव तिष्ठतु । यतो यस्योपाश्रये यूयं वसथ तेऽपि हु निश्चितमस्माकं निजका । किं बहुना यत्र वददि तत्र नीत्वा स्थापयितव्याः ।

[भा.३४१५]　　एसा गहिए जयणा एत्तो गेण्हंत ए उ वुच्छामि ।
एगोच्चिय गच्छे पुन संघाडो गेण्हभिग्गहितो ॥

वृ- एषा अनन्तरोदिता गृहीते यतना । अत ऊर्ध्वं गृह्णाति यतनां वक्ष्यानि प्रतिज्ञातमेव करोति । गच्छे पुनरेक एवं सङ्घाटः आभिग्रहिकः संस्तारकं गृह्णाति न शेषोऽन्यथाऽव्यवस्थापत्तेः ।

[भा.३४१६]　　आभिग्गहियस्स असती वीसुं गहणे पडिच्छिउं सव्वे ।
दाऊण तिन्नि गुरुणो गिण्हतन्ने तहा वुड्ढं ॥

वृ- अभिग्रहिकस्याभावे विष्वक् प्रत्येकं संङ्घाटकानां ग्रहणं प्रवर्तते । इयमत्र भावना-एकैकः सङ्घाटः प्रत्येकमेकैकं संस्तारकं मार्गयति अभ्यधिकास्त्रयः संस्तारका आचार्यस्य योग्य मृग्यन्ते । अत्रापि सैव मार्गणेऽनुज्ञापने गृहीते च यतना यावत्कार्यसमाप्तौ क्व स्थापयितव्यः इति । एवं विष्वक् ग्रहणे सर्वान् संस्तारकन् प्रतीच्छय प्रतिगृह्य त्रीन् संस्तारकान् गुरोर्दत्वा शेषानन्यान् यथा वृद्धं गृह्णन्ति । इयमत्र सामाचारी । आभिग्रहिकसंघाटेन प्रत्येकं प्रत्येकं संघाटैरानीतानां वा मध्यादाचार्यस्योत्कृष्टान् त्रीन् संस्तारकान् प्रवर्त्तको दत्वा शेषाणां रत्नाधिकतया संस्तारकान् भाजयति । तेऽपि तथैव गृह्णन्ति ॥

[भा.३४१७]　　नेगाणउ नाणत्तं सगणेयर भिग्गहीण वन्नगणे ।
इदिठो भासणलद्धे सन्नाउट्टेपभू चेव ॥

वृ- अनेकानां स्वगणेतराभिग्रहिकानां यन्नानात्वं प्रतिविशेषो यच्चान्यगणेन सह स्वगणसाधूनां समुदायेन संस्तारकान् मार्गयतामाभवद्वयवहारनानात्वं तद्वक्ष्ये तत्र पञ्च द्वाराणि । तद्यथा-दृष्टद्वारमवभाषणं नाम याचनं तद्वारं, मानयाचनतद्वारं प्रभुद्वारं च ।

[भा.३४१८]　　दिठादिएसु एत्थं एक्केक्के होंति छ भवे भेया ।
दठूण अहाभावेन वाविसोंउ च तस्सेव ॥

[भा.३४१९]　　विप्परिणामकहणा वोच्छिन्ने चेव तिपडिसिद्ध्या ।
एएसिं तु विसेसं वुच्छामि अहानुपुव्वीए ॥

वृ- अत्र एषु दृष्टादिकेषु द्वारेषुमध्ये एकैकस्मिन् द्वारे इमे वक्ष्यमाणाः षट्भेदा भवन्ति । तद्यथा-दृष्टेति द्वारं यथा भावेनेति द्वारं तस्य वा वचनतः श्रुत्वेति द्वारं विपरिणमेन कथनद्वारं व्यवच्छिन्नद्वारं विप्रतिषिद्धद्वारं च । एतेषां तु द्वाराणां यथानुपूर्व्या क्रमेण विशेषं वक्ष्यापि । यदपि च दृष्टादिषु द्वारनानात्वं तदपि यथावसरं वक्ष्यते । मानः संस्तारकं फलकरूपं पट्टरूपं वा देहान्तं देहप्रमाणं अस्वाधीन प्रभुं न विद्यते स्वाधीनः । ततः कालप्रत्यासन्नप्रभुर्यस्य स तथा तमस्वाधीन प्रभुं दृष्ट्वा कमपि पृच्छति कस्यैष संस्तारकः । स प्राह-अमुकस्य परमिदानीमत्र स न तिष्ठति ततः संघाटकश्चिन्तयति यदा संस्तारकस्वामी समागमिष्यति तदा याचिष्ये इति विचिन्त्या प्रतिसरति प्रतिनिवर्तने वसतावागच्छतीत्यर्थः । ततः प्रतिनिवृत्त्य तदा अन्यदा च भाषिते याचिते संस्तारकं बध्वा वसतिमानयति । अत्रैवापान्तराले वक्तव्यशेषमाह-

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

[भा.३४२०] संथारोदिट्ठो नय तस्स जो प्रभूलहुगो अकहणे गुरुणं ।
कहिए व अकहिए वा अन्नोणवि आनितो तस्स ।।

वृ- यदा संस्तारकं प्रेक्ष्य तस्य स्वामिनमद्दष्ट्वा वसतौ प्रत्यागतस्तदा तेन गुरुणामाचार्याणां कथनीयं यथा दृष्टः संस्तारको न च तस्य संस्तारकस्य यः प्रभु, स उपलब्ध इति एवं चेन्नालोचयति । तस्प्रायश्चित्तं लघुको मासः । तथा कथिते अकथिते वा गुरुणां यद्यन्येन संघाटकेनामुकस्य गृहे संस्तारकोऽमुकेन सङ्घाटकेन दृष्टः परं स्वामी नोपलब्ध इति न याचितस्तस्माद्वयं याचित्वा नयाम इति विचिन्त्य तत्र गत्वा स्वामिनमनुज्ञाप्यानीतस्तथापि येन पूर्वं दृष्टस्तस्या भवति न पाश्चात्यसंघाटकस्य तदेवं दहूणेति व्याख्यातमधुना यथा भावेनेति व्याख्यानयति-

[भा.३४२१] वितिओउ अन्नदिट्ठं अहभवेणं तु लद्धमानेइ ।
पुरिमस्सेव स खलु केई साहारणं बेंति ।।

वृ- प्रथमसङ्घाटके संस्तारकं दृष्ट्वा स्वामिनमनुपपलभ्या याचित्वैव वसतौ प्रत्यागते द्वितीयः संघाटोऽशठभावोऽन्येन पूर्वं दृष्ट इत्यजानानो यथाभावेन तमन्यदृष्टं संस्तारकं स्वामिनमनुज्ञाप्य लब्ध्वा समानयति कस्य भवतीति चेदत आह-स खलु नियमात्पूर्वस्य संघाटकस्य येन पूर्वं दृष्टो न पाश्चात्यस्य येन लब्धः समानीतः केचित् उभयोरपि संघाटयोराभवनमधिकृत्य साधारणं ब्रूवते । गतं यथा भावेनेति द्वारमिदानीं तस्यैव वचनतः श्रुत्वेति द्वारव्याख्यानार्थमाह-

[भा.३४२२] तइतोउ गुरुसगासे विगडिज्जं तं सुणेत्तुं संथारं ।
अमुगत्थ मए दिट्ठो हिंडंतो वन्नसीसं तं ।।

वृ- तृतीयः सङ्घाटः प्रथमेन सङ्घाटकेन कापि संस्तारकं दृष्ट्वा स्वामिनमनुपलभ्य वसतौ प्रत्यागतेन गुरुसकाशे आचार्यस्य समीपे दष्टो मया संस्तारकः परं स्वामी न दृष्ट आगतं सन्तं याचिष्ये इति संस्तारकं विद्यमानमालोच्यमानं श्रुत्वा यदि वा भिक्षां हिण्डमानोऽन्यस्य सङ्घाटकस्य शास्ति कथयति यथा अमुकत्र मया दृष्टः परं स्वामी नास्तीति न याचितः स्वामिन्यागते याचिष्यामि इति शिष्यमाणं श्रुत्वा-

[भा.३४२३] गंतूण तहिं जायइ लद्धंमी वेति अम्ह एस विही ।
अन्नदिठो न कप्पइ दिठो एसो उ अमुगेनं ।।

[भा.३४२४] मा देज्जसि तत्थेयं पडिसिद्धं तंमि एसुमज्झं तु ।
अन्ना धम्मकहाए आउट्टेऊण तं पुव्वं ।।

[भा.३४२५] संथारगदान फलादि लोभियं बेंति देहि संथारं ।
अंगंति तिन्निवारा पडिसेहेऊण तं मज्झं ।।

वृ- गत्वा तत्र संस्तारक स्वामिनं संस्तारकं याचते याचित्वा लब्धे तं परिणामयत यथा एषोऽस्माकं विधिराचारोऽन्येन दृष्टो दृष्ट्वा च संस्तारक स्वामिनं संस्तारकं याचिष्ये इत्यध्यवसितः सोऽन्यस्य न कल्पते । एवं च संस्तारको न दृष्टस्ततस्त्वं मम प्रियतया तस्य याच्यमानस्य मा न संस्तारकममुं दद्यात्ततस्तस्मिन् प्रतिषिद्धे एष मम भविष्यति । अत्रेयमाभवनचिन्ता यदि विपरिणामकरणे लब्धस्ततस्तस्य नाभवति । किन्तु पूर्वस्यैव संघाटस्य अथवा द्वितीयोविपरिणामनप्रकारस्तमाह-गुरुं सकाशे विकटयमानमन्यस्य वा संघाटस्य शिष्यमाणं संस्तारकं श्रुत्वा अन्यः संघाटकस्तत्र गत्वा संस्तारक स्वामिनं पूर्व संस्तारकदानफलादिलाभिनं । ब्रूतेऽमुकं संघाटं याचमानं त्रीन्वारान् प्रतिपिध्य तदनन्तरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मम संस्तारकं देहि । एव विपरिणामकरणतो लब्धे स पूर्वस्यैव संघाटकस्या भवति न पाश्चात्यस्य ।

[भा.३४२६] एवं विपरिणामिएण लभति बहुगोय हुंति सगणिच्चे ।
अन्नगणिज्ञे गुरुगामायनिमित्तं भवे गुरुगो ।।

वृ- एवमुक्तेन प्रकारेण विपरिणामितेन स्वामिना यदि लभते स्वगणसक्तसाधुस्तदातस्य प्रायच्छित्तं चत्वारो लघुकाः अन्यगणसक्ते चत्वारो गुरुकास्तथा स्वगणसत्को वा अन्यगणसत्को वा विपरिणम्यलब्ध्वा यदि पृष्टः सन् विपरिणामनमपलपति । तदा मायानिमित्तो मायाप्रत्ययो भवत्यधिको गुरुको मासः । सम्प्रति व्यवच्छिन्नद्वारमाह-

[भा.३४२७] अहपुनजेणं दिट्ठो अन्नलद्धोउ तेनसंथारो ।
छिन्नो उवरिभावो ताहेजो लभतितस्सेव ।।

वृ- अथ पुनर्येन दृष्टः संस्तारक स्तेनान्यो लब्धः संस्तारकस्तस्य पूर्वदृष्टस्योपरिभावो व्यवसायश्छिनः व्यवच्छिन्न स्ततोयः पश्चाल्लभते तस्यैव स आभवति तेन तस्य गतं व्यवच्छिन्न द्वारम् ।

[भा.३४२८] अहवावि तिन्निवारा उमग्गितो नवि य तेन लद्धोउ ।
भावे च्छिन्नमच्छिन्ने अन्नो जो हवइ तस्से ।।

वृ- अथवा येन दृष्टस्तेन याचितः परं न लब्धो द्वितीयमपि वारं याचितो न लब्धस्तृतीयमपि वारं न लब्धस्ततः एवं त्रीन्वारान् याचितो न च तेन लब्धस्ततस्तस्योपरि यदि तस्य संघाटकस्य भावो व्यवच्छिन्नो यदि वा न व्यवच्छिन्नस्तथापि योऽन्यो लभते तस्या भवति न पूर्वसंघाटकस्य तदेवं षड्भिर्द्वारैः समाप्तं प्रथमं दृष्टद्वारमधुनावभाषित द्वारमाह-

[भा.३४२९] एवं ता दिट्ठंमीओ भासितेवि होंति छच्चेव ।
सोउं अह भावेन व विप्परिणामेय धम्मकहा ।।

[भा.३४३०] वोच्छिन्नंमिवभावे अन्नो वन्नस्य जस्स देज्ञाहि ।
एए खलु छब्भेया उ हासणे होंति नायव्वा ।।

वृ- एवमुक्तेन प्रकारेण दृष्टे दृष्टद्वारे षट्भेदाः प्रकाशिताः । एवमवभाषितेऽपि षट् भेदा भवन्ति ज्ञातव्याः । तद्यथा-प्रथमं श्रुत्वेति द्वारं, द्वितीयं यथाभावेनेति द्वारं तृतीयं विपरिणामद्वारं चतुर्थं धर्मकथाद्वारं पञ्चमं व्यवच्छिन्नद्वारं षष्टमन्यो वा तस्येतिद्वारं । तत्र एते खलु षट् भेदा अवभाषेण भवन्ति बोद्धव्याः । प्रथमद्वार व्याख्यानार्थमाह-

[भा.३४३१] उभासिते अलद्धे अव्वोच्छिन्नेय तस्स भावेउ ।
सोउं अणोभासइ लद्धाणीतो पुरिल्लस्स ।।

वृ- संघाटकेन भिक्षामटता संस्तारकं स्वामी च संस्तारकं याचितः परं न लब्धोऽथ च तस्य संघाटकस्य संस्तारको परिभावोऽद्यापि न व्यवच्छिद्यते तेन य संघाटकेन गुरुसमीपमागत्यालोचितो यथामुकस्य गृहे संस्तारको दृष्टो याचितश्च परं न लब्धो द्वितीयवारं याचिष्यते । एवमवभाषितेऽलब्धेऽव्यवच्छिन्ने च तस्य संस्तारकस्योपरि भावे विकटनं श्रुत्वा अन्यः संघाटकस्तत्र गत्वा याचते लभते च स लब्ध्वानीतः सन् कस्या भवतीत्यत आह-पूर्वस्य येन पूर्वमवभाषितोऽपि न लब्धस्तस्या भवति तद्विषयभावाव्य-वच्छेदान्नेतरस्य ।।

[भा.३४३२] सेसाणि जहा दिट्ठे अह भावदीनि जाव वोच्छिन्ने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दाराइं जोएज्ञा छट्ठे विसेसं तु वुच्छामि ।।

वृ- शेषाणि यथा भावादीनि चत्वारि द्वाराणि यावत् व्यवच्छिन्नद्वारं यथादृष्टे द्वारे पूर्वं भावितानि तथा योजयेत् । तद्यथा-एकेन सङ्घाटेन भिक्षामटता कापि संस्तारको दृष्टो याचितश्च परं न लब्धो द्वितीयः संघाटको तथा भावेन तत्र गत्वा तं संस्तारकमानयति स पूर्वसङ्घाटकस्या भवति न येनानीतस्तस्य अन्ये तु ब्रूवते द्वयोरपि संघाटकयोराभवनमधिकृत्य साधारण इति । गतं यथा भावद्वारमधुना विपरिणाम-द्वारमुच्यते । गुरुसमीपे विकत्थ्यमानमन्यस्य वा संघाटकस्य कथ्यमानं याचितमलब्धं संस्तारकं मह्यं सम्प्रति देहि । अत्रापि पूर्वस्यैव संघाटकस्य स आभवति न येनानीतस्तस्य । गतं विपरिणामद्वारं । सम्प्रति धर्मकथाद्वारमुच्यते-अग्रेतनेन संघाटकेन याचितेऽलब्धे चान्यः संघाटकस्तत्र गत्वा तं संस्तारकस्वामिनं धर्मकथा कथनेन समाकर्ण्य याचते । संस्तारकं स तथा लब्ध्वा नीतः सन पूर्वपूर्वसङ्घाटकस्या भवति न येन पश्चादानीतस्तस्येति गतं धर्मकथाद्वारमधुना व्यवच्छिन्नभावद्वारमुच्यते-प्रथम संघाटकेन संस्तारको याचितो न लब्धस्ततस्तद्विषये भावो व्यवच्छिन्नो गुरुसमीपे च गत्वा तथैवा लोचितं यथा अमुकस्य गृहे अमुकस्य गृहे संस्तारको दृष्टो याचितश्च परं न लब्धः स तिष्ठतु द्वितीयं वारं न कोऽपि याचिष्यते, । एवं व्यवच्छिन्नं भावं ज्ञात्वा योऽन्य संघाटको याचते लभते च स तस्याभवति न पूर्वस्य । तदेवं योजितानि यथा भावादीनि चत्वार्यपि द्वाराणि । अत ऊर्ध्वमाह-षष्टे द्वारेऽन्यो वान्यस्येति लक्षणे विशेषऽस्ति तं वक्ष्यामि । प्रतिज्ञातमेव करोति-

[भा.३४३३] अच्छिन्ने अन्नोन्नं सो वा अन्नं तु जइ स देज्जाहि ।
कप्पइ जो उ पणइतो तेन व अन्नेण व न कप्पो ।।

वृ- येन प्रथमसंघाटकेन संस्तारको दृष्टो याचितश्च न लब्धस्तस्य तद्विषये भावे अच्छिन्नेअव्यवच्छिन्ने अन्येन संघाटकेन तत्रगत्वा याचितेऽन्यो मनुष्योऽन्यसंस्तारकं यदि दद्यात् यदि वा स एव संस्तारकस्वामी अन्यं संस्तारकं दद्यात् । तदा स तस्य कल्पते यस्तु प्रणयितो याचितः संस्तारकः स तेन स्वामिनाऽन्येन वा मनुष्येण दीयमानो न कल्पते । गतमवभाषितद्वारमधुना लब्धद्वारमाह-

[भा.३४३४] लद्धद्वारे चेवं जोए जह संभवं तु दाराइं ।
जत्तिय मेत्तो विसेसो तं वुच्छामि समाणेणं ।।

वृ- लब्धद्वारेऽप्येवमुक्तप्रकारेण श्रुत्वादीनि द्वाराणि यथासंभवं योजयेत् । यावन्मात्रश्च विशेषस्तावन्मात्रं तं विशेषं समासेन वक्ष्ये । तत्र प्रथम श्रुत्वेति द्वारमधिकृत्य विशेषमाह-

[भा.३४३५] उभासियंमि लद्ध भणंति न तरामि एण्हि नेउं जे ।
अत्थउ न हामो पुन कल्ले वा घच्छेहामोत्ति ।।

वृ- प्रथमसंघाटकेन भिक्षामटता क्वापि संस्तारको दृष्टो याचितो लब्धश्च । तस्मिन् अवभाषिते लब्धे च साधवो भणन्ति न शक्नुमः । सम्प्रति भिक्षामटन्तः संस्तारकं नेतुं ततस्तिष्ठतु पश्चान्नेष्यामः । एतच्च गुरुसमीपे समागत्य तेन संघाटकेनालोचितं तच्च श्रुत्वाऽन्यो याचते लभते च आनीतः सन् पूर्व संघाटकस्या भवति न तस्य । अपरे द्वयोरपि तं साधारणमाचक्षते, विपरिणामद्वारं साक्षादाह-

[भा.३४३६] नवरिय अनो आगतो तेन वि सो चेव परणतितो ।
तत्थ दिन्नो अन्नस्स स उ विपरिणामेइ तह चेव ।।

वृ- प्रथम संघाटकेन संस्तारको याचित्ते लब्धेनेतुमशक्यतया तत्रैव मुक्तेन नवरिकेवलमन्यः सङ्घाटक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगतस्तेनापि तत्र स एव संस्तारकः प्रणयितो याचितः संस्तारकस्वामिनोक्तं दत्तोऽन्यस्य ततस्तथैव तं विपरिणामयति । यथा सर्वदैवाहं तव प्रियस्ततो मयि सति किमन्यस्मै तव दातुमुचितं तस्माद्यदि स आगच्छति तर्हि तस्य प्रतिषिद्ध पश्चान्मम दातव्य इति । एवं यदि विपरिणम्यानीतो भवति तत पूर्वतमस्था भवति नेतरस्य तदेवमुक्तं विपरिणामद्वारमधुना धर्मकथाद्वारंतथैव प्रथमसंघाटकेन संस्तारके दत्तोऽन्यस्मै ततो धर्मकथाकथनतस्तमावर्ज्य ब्रूते । यथा तस्य प्रतिषिध्यायं संस्तारको मह्यं देयः एवमानीतः पूर्व संघाटकस्य स आभवति नेतरस्य । तथा येन प्रथमसंघाटकेन संस्तारको याचितो लब्धश्रुतस्य तद्विषयभावव्यवच्छेदात् तथा प्रथमसंघाटकेन संस्तारके याचिते लब्धे नेतुमशक्यतया तत्रैवमुक्तेऽन्यः संघाटकस्तत्र समागत्य संस्तारकं याचते । तत्र यदि अन्यो मनुष्यो संस्तारकं दद्यात् स वा प्रथमसंघाटक-याचितोऽन्यं तदा स तस्य कल्पते यः पुनः प्रणयितः स तेनान्येन वा दीयमानो न कल्पते । तथा च विपरिणामद्वारं मुक्त्वा शेषद्वाराणामतिदेशमाह-

[भा.३४३७] अहभावो लोयण धम्मकहणवोच्छिन्नमन्नदाराणि ।
नेयाणि तहाचेव उ जहेवउ छट्ठ दारम्मि ।।

वृ- यथा भावद्वारमालोयणत्ति पदैकदेशे पदसमुदायोपचारादालोचनं श्रुत्वेति द्वारं धर्मकथनद्वारं व्यवच्छिन्नदारमन्यद्वारं चेति पञ्चद्वाराणि यथैवावभाषितद्वारेऽभिहितानि तथैव ज्ञेयानि षष्टं तु विपरिणामद्वारं साक्षादुक्तं । गतं लब्धद्वारमिदानीं संज्ञातिद्वारमाह-

[भा.३४३८] सन्नायएवि एच्चिय दारा नवरं इमं तु नाणत्तं ।
आयरिएणाभिहितो गेण्हइ संथारयं अज्जो ।।

[भा.३४३९] सुद्धदसमी ठियाणं तेभी घेच्छामि तद्दिनं चेव ।
नायगिहे पडिनत्तो माएउ संथारत्तो भंते ।।

वृ- यान्येव श्रुतादीनि षट् द्वाराणि लब्धद्वाराभिहितान्येतान्येव सज्ञातिकद्वारेऽपि द्रष्टव्यानि नवरं भावनायां यन्नानात्वं तदिदं वक्ष्यमाणंतदेवा-आयरिएणेत्यादि आचार्येणाभिहित आर्यसंस्तारकं गृहाण, एवमुक्तः सन् सज्ञातिकानां गृहमागमत् दृष्टः संस्तारको याचितो लब्धश्च अथवा सज्ञातिकैरयाचितैरेव स उक्तो ग्रहाण संस्तारकं ततस्तेनोक्तं यस्मिन् दिवसे संस्तारके स्वमुमारप्स्यते तस्मिन् दिवसे नेष्यामः । आचार्याश्च शुद्धदशम्यास्तत्र स्थितास्तत आगत्य शुद्धदशमी स्थितानां गुरुणामन्तिके ब्रूते आलोचयति-भदन्त मया ज्ञातिगृहे संज्ञातिकगृहे संस्तारकः प्रतिज्ञप्तो निभालितस्तिष्ठति ततो यत्र दिने संस्तारके स्वप्स्यते तद्दिवसमेव तस्मिन्नेव दिने गृहीष्यामः । एवमालोचितं श्रुत्वाऽन्यो याचते लभते च आनीतः पूर्व संघाटकस्या भवति न येनानीतस्तस्य गतं श्रुत्वाद्वारमपरः संघाटकोऽग्रेतनसंघाटकवृत्तान्तमनवज्ञाय यथाभावेन गत्वा याचते लभते तेनाप्यानीतः पूर्वसंघाटकस्या भवति न तस्य, अपरे तु द्वयोरपि संघाटयोस्तं साधारणमाचक्षते यथा भावद्वारमपि गतमिदानीं साक्षाद्विपरिणामद्वारमाह-

[भा.३४४०] विपरिणामे तहच्चिय अन्नो गंतूण तत्थ नायगिहं ।
आसन्नयरो गिण्हइ मित्तो अन्नोवि मं मोत्तुं ।।

[भा.३४४१] अन्नेवि तस्स नियगा देहिहि अन्नं य तस्स मम दाउं ।
दुल्लभ लाभ मणाउं ठियंमि दाणं हवति सुद्धं ।।

[भा.३४४२] सन्नायगिहे अन्नो न गेण्हए तेन असमणुनातो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्तिविहवेसत्तीएय सोविहु नवि तेन निव्विसति ।।

वृ- तेन साधुना मया भदन्त ज्ञातिगृहे संस्तारकः प्रतिज्ञप्तोस्तित, तस्तस्मिन्नवेदिने समानेष्यते इत्यालोचितं श्रुत्वा अन्य आसन्नतरो मित्ररुपो वा ज्ञातिगृहं गत्वा तत्र तथैव संस्तारकस्वामिनं विपरिणामयति । स चान्यो विपरिणस्य गृह्णाति इदं वक्ष्यमाणमुक्त्वा तदेवाह-अन्ने वीत्यादि अन्येऽपि च तस्य निजकाः संस्तारकं दास्यन्ति यदि वा मामामुं संस्तारकं दत्वा तस्यान्यं संस्तारकं दद्याः । अथवा अस्माद्दशेऽज्ञातोंच्छवृत्तिजीविनि यत् दुर्लभदानं दीयते तद्भवति शुद्धमिह परलोकाशंसा विप्रमुक्तत्वात् तथा स्वज्ञातिगृहेऽन्योऽसंज्ञातिकस्तेन संस्तारकस्वामिना असमनुज्ञातो न गृह्णाति । अहं पुनः संज्ञातिकस्ततो व शय्यामेकवारमनुज्ञातस्यापि संस्तारकस्य ग्रहणे तथा सति विभवे यदि वा विभवाभावेऽपि स्वशक्त्या सोऽपि सज्ञातिकस्तेनात्मीयेन सज्ञातिके विना न निर्विशति उपभुङ्क्ते भक्तपान संस्तरकादि तस्मान्मम दातव्य एष संस्तारक इति एवं विपरिणम्यानीतः पूर्व संघाटकस्या भवति न येनानीतस्तस्यगतं विपरिणामद्वार मधुना धर्मकथाद्वारमुच्यते तथैवालोचनामाकर्ण्यान्यः संघाटक स्तत्रागत्य धर्मकथामारभते । ततो धर्मकथया तमत्यन्तमावर्ज्य तं संस्तारकं याचते । स धर्मकथा-श्रवणोपरोधतो न निषेध्धुं शक्त इति तस्मै दत्तवान् सोऽपि पूर्वसंघाटकस्या भवति, न येनानीतस्तस्य । गतं धर्मद्वारं । सम्प्रति व्यवच्छिन्नद्वारमाह-भावना तस्य सज्ञातिकस्य याचितसंस्तारकविषये भावः । कुतश्चित्कारणात् व्यवच्छिन्नोऽन्येन च संघाटकेनाभावेन याचित्वा समानीतः स येनानीतस्तस्या भवति न पूर्वसंज्ञातिकस्य । अन्यद्वारभावना त्वियम्-पूर्वप्रकारेण तेन संज्ञातिकेन गुरुणामन्तिके विकटेन कृते तत् श्रुत्वाऽन्यः संघाटकस्तत्र गत्वा संस्तारकं याचते । तत्रान्यो मनुष्योऽन्यं संस्तारकं यदि ददाति यदि वा स एव पूर्वसंघाटकयचितः संस्तारकस्वामीपरमन्यं संस्तारकं तदा कल्पते पूर्वयाचितस्त्वनेनान्येन वा दीयमानो न कल्पते तथा चाह-

[भा.३४४३] सेसाणि य दाराणि तहवि य बुद्धीय भासणियाइं ।
उद्धद्दारे वि तहा नवरं उद्धंभि नाणत्तं ।।

वृ- शेषाण्यपि विपरिणामजानि श्रुत्वादीनि द्वाराणि तथेव प्रागुक्त प्रकारेणैव बुद्धया परिभाव्य भाषणीयानि तानि च तथैव भाषितानि । गतं संज्ञातिक द्वारमिदानीमूर्ध्वद्वारमाह-ऊर्ध्वद्वारेऽपि तथा पूर्वोक्तप्रकारेण द्वाराणि श्रुत्वादीनि योजनी यानि नवरमूर्द्धे नानात्त्वं तदेव भावयति ।

[भा.३४४४] आनेऊण न तिणे वासस्सय आगमंतु नाऊणं ।
माउल्लेज्ज हुच्छणे ठवेइ मावणो मग्गेज्जा ।।

वृ- संघाटकेन क्वापि गृहे संस्तारको दृष्टो याचितो लब्धश्च आने तुमपि व्यवसितः । परं वर्षस्यागमनागमनं ज्ञात्वा मापान्तराले वर्षं पतेदिति कृत्वानानेतुं तीर्णः शक्तस्तथा मा वर्षेणात्र प्रस्तारित आर्द्रीक्रियते मा वा अन्यः संघाटकः समागत्य मार्गयत् याचेत इति । छन्ने प्रदेशे कुड्येऽवष्टभ्य ऊर्ध्वीकृतस्ततो गुरुसमीपे समागत्य विकटयति । तच्च श्रुत्वा अन्य उपेत्यागत्य याचते स च तेनानीतः पूर्व संघाटकस्या भवति, न येनानीतस्तस्य । गतं श्रुत्वा द्वारमिदानीं यथा भावद्वारं विवक्षुराह-

[भा.३४४५] पुच्छाए नाणत्तं केणुद्धकयं तु पुच्छियमसिद्धे ।
अन्नासढ माणीयंपि पुरिल्ले केइ साहारं ।।

वृ- यथा भावद्वारे पृच्छायां नानात्वं किं तदिति चेदुच्यते-अन्यः संघाटकस्तत्र यथा भावेन गतस्तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वकृतं संस्तारकं दृष्ट्वा चिन्तितं किं नामैष संयतेन ऊर्ध्वीकृत उत गृहस्थेन यथा भावत एवं तेन संशयानेन पृष्टः-केनायमूर्ध्वीकृत' इति गृहस्थैश्च न किमपि शिष्टं कथितं ततोऽन्येन संघाटकेनाशेठन संस्तारको याचितो लब्ध आनीतश्च । तथान्येनाशठेनानीतमपि संस्तारकं पूर्वस्य संघाटकस्याभवन्तमाचक्षते । केचित्पुनर्द्वयोरपि संघाटकयोः साधारणं । अथ पृष्टे गृहस्थैराख्यातं गृहस्येनोर्ध्वीकृतस्तथा यथाभावेन याचितो लब्धश्च । सोऽप्यानीतः पूर्वसंघाटकस्याभवति । अपरेतु द्वयोरपि साधारणमाहुः-

[भा.३४४६] छन्ने उद्धोवक्कतो संथारो जइ वि सो अहा भावो ।
तत्थवि सामायारी पुच्छिज्जइ इतरहा लहुतो ।।

वृ- यद्यपि संस्तारको यथा भावात् यथा भावेन गृहस्थैः छन्ने प्रदेशे उर्ध्वोपकृतो ज्ञायते चैतत्तथापि तत्रैयं सामारि गृहस्थोऽवश्यमुक्तप्रकारेण पृच्छ्यते । इतरथा पृच्छाकरणाभावे प्रायश्चित्तं लघुको मासः । गतं यथा भावद्वारं । विपरिणामनधर्मकथाव्यवच्छिन्नभावान्यद्वाराणि पूर्ववत् भावनीयानि । तथा चाह-

[भा.३४४७] सेसाइं तह चेव य विपरिणामाइयाइं दाराइं ।
बुद्धीए विभासेज्ञा एत्तो वुच्छं पभुद्दारं ।।

वृ- शेषाणि विपरिणामादीनि द्वाराणि बुद्ध्या यथा प्रागभिहितानि तथैव परिभाव्य विभाषेत प्रतिपादयेत । गतमुर्द्धीकृतद्वारमत ऊर्ध्वं प्रभुद्वारं वक्ष्यामि । प्रतिज्ञातमेव निर्वाहयति-

[भा.३४४८] पभुदारे वि एवं नवरं पुन तत्थ होइ अहभावे ।
एगेन पुत्तो जाइतो बिइएण पिया उ तस्सेव ।।

वृ- प्रभुद्वारेऽपि एवं पूर्वोक्तप्रकारेण श्रुत्वादीनि षट्द्वाराणि ज्ञेयानि, नवरं पुनस्तत्र प्रभुद्वारे यथा भावे यथा भावलक्षणे अवान्तरभेदे नानात्वं भवति । एकेन संघाटकेन यथाभावेन पुत्रो याचितः । द्वितीयेन तस्यैव पिता द्वाभ्यामपि दत्तः स कस्या भवति तत आह-

[भा.३४४९] जो पभुतरओ तेसिं अहवा दोहिंपि जस्स दिन्नंतु ।
अपभुम्मि लहु आणा एगतरपदोसतो जं च ।।

वृ- तयोःपितापुत्रयोःमध्ये यः प्रभुतरस्तेन यस्य दत्तस्तस्या भवति । अथ द्वावपि प्रभूताभ्यामपि संभूय यस्य दत्तस्तस्या भवति यस्य तु प्रतिषिद्धस्तस्य नाभवति । अथाप्रभुणा दत्तं गृह्णाति गाथायां सप्तमी तृतीयार्थे तदा तस्य प्रायश्चितं चत्वारो लघवः । तथा आज्ञादयो दोषा यच्च एकतरप्रद्वेषत आपद्यते प्रायश्चित्तं तदपि तस्य द्रष्टव्यमेकतरप्रद्वेषो नाम यः प्रभुः स संयतस्य चोपरि प्रद्वेषं यायात् । येन वा अप्रभुणा सता दत्तस्तस्य ।

[भा.३४५०] अहवा दोन्नि वि पहुणो ताहे साधारणं तु दोण्हं पि ।
विप्परिणामादीणि उ सेसाणि तहेव भासेज्ञा ।।

वृ- अथवा द्वावपि पितापुत्रौ प्रभू, द्वाभ्यामपि च पृथक् पृथक् द्वयोः संघाटकयोरनुज्ञातस्तदा तयोर्द्वयोरपि संघाटकयोः साधारणमाचक्षते संस्तारकं, तदेवं यथाभावे विशेषो दर्शितः । शेषाणि तु विपरिणामादीनि पञ्चपि द्वाराणि तथैव भावनीयानि यथा प्रागभिहितानि ।। साम्प्रतमुपसंहारमाह-

[भा.३४५१] एसविहीउ भणितो जहि यं संघाटएहिं मग्गंति ।
संघाडेह अलभंता तो वंदेन मग्गंति ।।

वृ- यत्र संघाटकैः प्रत्येकं प्रत्येकं संस्तारका मृग्यन्ते तत्र एष प्रत्येकं प्रत्येकमानीतानां संस्तार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कानामाभवन् व्यवहारविषये विधिरुक्तः । यत्र पुनरेकैकः संघाटको न लभते तदा वृन्दसाध्यानि कार्याणि वृन्देन कर्तव्यानीति न्यायात् संघाटकैरलभमाने वृन्देन समुदायेन मार्गयन्ति तत्र विधिमतिदेशत आह-

[भा. ३४५२] वंदेणं तह चेवय गहणणुन्नवणाइ तो विही एसो ।
नवरं पुन नाणत्तं अप्पणणे होइ नायव्वं ।।

वृ- वृन्देनापि मार्गणे तथैव तेन प्रकारेण ग्रहणेऽनुज्ञापनायामादि शब्दादर्पणे च विधिरेष प्रागभिहितो द्रष्टव्यो नवरं पुनरर्पणे भवति नानात्वं ज्ञातव्यं । तदेवाह-

[भा. ३४५३] सव्वेवि दिठरुवे करेहिं पुन्नंमि अम्ह एगयरो ।
अन्नो वा वाघो अप्पहिति जं भणसि तस्स ।।

वृ- संस्तारकस्वामिनं प्रत्युच्यते सर्वानप्यस्मान् दृष्टमूर्तान् कुरु अस्माकमेकतरः पूर्णे वर्षाकाले संस्तारकंयुष्माकमर्पयिष्यति । अथास्माकमेतेषां कश्चनापि व्याघातो भवेत् तदा अन्योऽपि यत्त्वं भणसि तस्य समर्पयिष्यति-

[भा. ३४५४] एवं ता सग्गामे असती आनेज्ज अनगामातो ।
सुत्तत्थे काऊणं मग्गइ भिक्खं तु अडमाणो ।।

वृ- एवमुक्तप्रकारेण तावत्स्वग्रामे संस्तारकानयने विधिरुक्तोऽसति स्वग्रामे संस्तारकस्याभावे अन्यग्रामादपि आनयेत् । कथमित्याह-सूत्रार्थौ कृत्वा सूत्रपौरुषीमर्थपौरुषीं च कृत्वा भिक्षामटन-संस्तारकं मार्गयति यदि पुनरन्यग्रामेऽपि प्रत्येकं संघाटकस्यालाभस्तदा अथपौरुषीं हापयित्वा तत्र वृन्देन गत्वा याचन्ते ।

[भा. ३४५५] अदिट्ठे सामिम्मि उं वसिउं आनेइ बिइय दिवसंमि ।
खेत्तंमि उ असंते आनयनं खेत्तबहियातो ।।

वृ- यदि स्वग्रामे न दृश्यते संस्तारको दृश्यमानो वा न लभ्यते तदा स्वक्षेत्राद्विगव्यूतप्रमाणे अन्यग्रामे गत्वा याचनीयः । अथ न दृश्यते तत्र संस्तारकस्वामी तदा गृहे उषित्वा द्वितीयदिवसे संस्तारकमनुज्ञाय गृहीत्वा समागच्छन्ति । अथ स्वक्षेत्रे न लभ्यते तदा स्वक्षेत्रे संस्तारकस्याभावे स्वक्षेत्राद्वहिष्टादप्यानयनं संस्तारकस्य द्वित्रिदिनमध्ये कर्त्तव्यम् ।

[भा. ३४५६] सव्वेहिं आगएहिं दाउं गुरुणो उ सेस जह वुड्ढं ।
संथारे घेत्तूण उवासेहो अनुन्नवणा ।।

वृ- सर्वैरपि संघाटकैः पर परतग्रामेभ्यः समागतैः संस्तारकपरिपूर्णतायां सत्यां त्रय उत्कृष्टाः संस्तारकाः गुरोर्दातव्यास्ततः शेषैर्यथावृद्धं यथा रत्नाधिकतया गृहीतव्याः । तान् संस्तारकान् गृहीत्वा तदनन्तरमवकाशेन भवत्यनुज्ञापना । एतावता ग्रहणद्वारं अनुज्ञापनाद्वारं समापतितमित्यावेदितम् ।

[भा. ३४५७] जो पुव्वपुनन्नवितो पेसिज्जंतेन होंति उगासे ।
हेट्ठिल्ले सुत्तंमि तस्सावसरं इह पत्तो ।।

वृ- यः पूर्वमधस्तने प्रथमे पिण्डसूत्रे प्रेष्यमाणे-नावकाशोऽनुज्ञापितस्तस्यावसर इह प्राप्तस्ततः स भण्यते-

[भा. ३४५८] नाउण सुद्धभावं थेरा वियरंति तं तु उगासं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेसाण वि जो जस्स उ पाउग्गो तस्स तं देंति ।।

वृ- तत्र प्रेष्यमाणस्यावकाशमनुज्ञापयतः स्थविरा आचार्याः शुद्धं भावं ज्ञात्वा तमेवावकाशं वितरन्ति । अनुजानते शेषाणामपि योऽवकाशो यस्य साधोः प्रायोग्यस्तस्य तं ददाति । अत्र विधिमाह-

[भा.३४५९] खेलनिवातपवाते कालगिलाणे य सेहपडियरए ।
समविसमे पडिपुच्छा आसंखडिए अनुन्नवणा ।।

वृ- यस्य खेलः श्लेषाम प्रस्पन्दते स गुरुन् अनुज्ञापयति भगवन् ! श्लेष्मापतति ततोऽन्यदवकाशान्तरमनुजानीत । ततस्तस्यान्योऽवकाशोदातव्यः । तथा निवाते धर्मे निपीड्यमानो यदि प्रवातमनुज्ञापयति तर्हि तस्य प्रवातो दातव्यः । प्रवाते वाते पीडयमानस्य निवातः कालग्राही द्वारमूलमनुज्ञापयति, । स तत्र स्थाप्यते, ग्लानस्य समीपे शैक्षस्य प्रतिचारकः शिक्षाद्वयं ग्राहयित्वा शैक्षकस्य समीपे समविषमायां भूमौ यस्य पार्श्वाणि दुःस्वयतो सोऽध्यास्यायां भूमौ स्थाप्यते । यो यं पुनः पुनः प्रतिपृच्छति स तस्य पार्श्वे आसंखडिकाः स्व स्व तरकस्य पार्श्वे एवमनुज्ञापना साधूनां भवति । आचार्येण च शुद्धभावमवगम्य तथैवानुज्ञायते उपसंहारमाह-

[भा.३४६०] एवमणुन्नवणाए एयं दारं इहं परिसमत्तं ।
एगंदियादि दारा एत्तो उड्ढं पवक्खामि ।।

वृ- एवमुक्तप्रकारेण साधूनामनुज्ञानायां भणितायामेतत् अनुज्ञापना लक्षणं द्वारमिह परिसमाप्तमत ऊर्ध्वं तु एकाङ्गिकादीनि द्वाराणिप्रवक्ष्यामि । प्रतिज्ञातमेव निर्वाहयति-

[भा.३४६१] असंघातिमेव फलगं घेत्तव्वं तस्स असति संघाइं ।
दोमाइतस्स असती गेण्हेज्ज अहाकडा कंबी ।।

वृ- पूर्वमसंघातिममेव फलकं गृहीतव्यं तस्यासत्यभावे संघातिमं किं विशिष्ट मित्याह-द्वयादि फलकात्मकं द्विफलकात्मकमादि शब्दात्रिफलकात्मकं चतुःफलकात्मकं वा गृह्णीयादिति योगः । तस्य फलकसंघातात्मकस्य संस्तारकस्याभावे यथाकृताः कम्बी गृह्णीयात् । गृहीत्वातन्मयः संस्तारको विधीयते । तत्र या नमन्तिकं व्यस्ताः सान्तराः क्रियन्ते निरन्तराभिः प्राणजातेर्विराधनां एतच्च फलकेष्वपि द्रष्टव्यं । तथा चाह-

[भा.३४६२] दो मादि संतराणि उ करेइ मा तत्थ ऊनमंतेहिं ।
संथरसेणणोन्ने पाणादिविराहणा कुज्जा ।।

वृ- द्वयादीनि फलकानि नमन शीलानि सान्तराणि करोति । किमर्थमित्याह-तत्र द्वयादि फलकात्मके संस्तारके नमद्भिः फलकैरन्योन्यं संस्तारके प्राणादीनां विराधना भवेत् । प्राणा द्वि त्रि चतुरिन्द्रि आदिशब्दाज्जीवादि परिग्रहः । गतमेकाङ्गिकद्वारमिदानीमकुचद्वारम् कुचस्पन्दनेन कुचतीत्य कुच इगुपान्त्यलक्षणः । कः प्रत्ययः यस्तथा बद्धः सन् न स्पन्दते सो अकुचो ग्राह्यो यस्तु कुचबन्धनः स परिहार्यस्तथा चाह-

[भा.३४६३] कुयबंधणंमि लहुगा विराधना होई संजमायाए ।
सिढिलिज्जंतंमि जहा विराधना होइ पाणाणं ।।

[भा.३४६४] पवडेज्ज बदुबद्धे विराधना तत्थ होइ आयाए ।
जम्हा एए दोसा तम्हा उ कुयं न बंधेज्जा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कुचं शिथिलं बन्धनं यस्य तस्मिन् कुचबन्धने संस्तारके गृह्यमाणे प्रायश्चित्तं चत्वारो लघुकाः । तथा विराधना भवति संयमे आत्मनि च यतस्तस्मिन शिथिल्यमाने शिथिलबन्धनतया प्रस्पन्दमाने प्राणानां विराधना भवति । एषा संयमविराधना दुर्बद्धे स प्रपतेत् । तत्र भवत्यात्मविराधना यस्मादेते दोषास्तस्मात् यथा कुचं शिथिलं भवेत् तथा न बन्धीयात् किन्तु गाढ बन्धनबद्धं कुर्यात् ।

[भा.३४६५] तद्दिवसं पडिलेहाई सी उक्खेतु हेट्ठंउवरिं च ।
रयहरणेणं भंडं अंके भूमीए वा काउं ॥

वृ- तद्दिवसं प्रतिदिवसं दिने दिने इत्यर्थः । भाण्डं संस्तारकादि लक्षणमीषत् उत्क्षिप्य अङ्के उत्सङ्गे भूमौ वा कृत्वा अध उपरि च रजोहरणेन तस्य प्रत्युपेक्षा कर्तव्या ।

[भा.३४६६] एवं तु दोन्नि वारा पडिलेहा तस्स होइ कायव्वा ।
सव्वे बंधे मोत्तुं पडिलेहा होइ पक्खस्स ॥

वृ- एवमुक्तेन प्रकारेण द्वौ वारौ प्रातरपराह्ने च तस्य संस्तारकस्य प्रत्युपेक्षा भवति कर्तव्या । पक्षस्य पक्षस्यान्ते पुनः सर्वान् बन्धान् मुक्त्वा च्छोटयित्वा प्रत्युपेक्षा भवति कर्तव्या । गतमकुचद्वारम् ।

[भा.३४६७] उग्गममादी सुद्धो गहणादी जो व वन्नितो एस ।
एसो खलु पाउग्गो हेठिमसुत्ते च जो भणितो ॥

वृ- य उद्गमादि दोषशुद्धउद्गमोत्पादनादि दोषविशुद्धो यो वा एषोऽनन्तरमुपवर्णिथओऽग्रहणादौ ग्रहणेऽनुज्ञापनायां बद्ध एकाङ्गिकोऽकुचश्चयदिवा यो मणितोऽधस्तनसूत्रे ऋतुबद्धप्रत्येक सूत्रे द्वात्रिंशद्भङ्गेषु मध्ये प्रथमभङ्गवर्ती एष खलु प्रायोग्यो वेदितव्यः ॥

[भा.३४६८] कज्जंमि समत्तंमी अप्पेयव्वो अणप्पिणणे लहुगा ।
आणादी आ दोसा बिइयं उट्ठाण हियदड्ढो ॥

वृ- कार्ये समासे सति नियमात्संस्तारकोऽर्पयितव्यो अनर्पणे प्रायश्चित्तं चत्वारो लघुकाः आज्ञादयश्च दोषाः । अत्रापि द्वितीयपदमपवादपदं यदि रोगस्योत्थानं प्रवर्तते । स्तेनैर्वापृतोऽग्निना वा कथमपि दग्धस्तदानार्पणमिति । तदेवं भावितं वर्षावाससूत्रं, (सं) प्रति वृद्धावाससूत्रभावनार्थमाह-

[भा.३४६९] वुड्ढावासे चेवं गहणादि पदाउ होंति नायव्वा ।
नाणत्तखेत्तकाले अप्पडिहारी य सो नियमा ॥

वृ- वृद्धावासेऽप्येवं पूर्वोक्तेन प्रकारेण ग्रहणादीनि पदानि भवन्ति ज्ञातव्यानि भवन्ति । किमुक्तं भवति । यथा प्राक् वर्षावासे ग्रहणानुज्ञानैकाङ्गिका कुचप्रायोग्य लक्षणानिपञ्च द्वाराण्यमिहितानि । तथा वृद्धावासेऽप्यनुगन्तव्यानि तु शब्दो विशेषणो स चैतद्विशिनष्टि । वृद्धावासे ऋतुबद्धेऽप्येष एव विधिरिति नवरमत्र नानात्वं क्षेत्रे काले च तथा नियमादप्रतिहारी स वृद्धावासयोग्यः संस्तारको गृहीतव्यः ।

[भा.३४७०] काले जा पंचाहं परेण वा खेत जाव बत्तीसा ।
अप्पडिहारी असती मंगलमादीसु पुव्वुत्ता ॥

वृ- इह वर्षावासे संस्तारकस्यानयने कालत उत्कर्षेण त्रीणि दिनान्युक्तानि । अत्र तु वृद्धावासे काले कालमधिकृत्य यावत्पश्चाहं पञ्चदिनानि ततः परेण वा आनयनं द्रष्टव्यम् । क्षेत्रतो यावत् द्वात्रिंशत् योजनानि तथा अप्रतिहारिणोऽसत्यभावे संस्तारकस्य यानि मङ्गलादीनि पूर्वमुक्तानि तानि प्रयोक्तव्यानि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (१९१) *थेराणं थेरभूमिपत्ताणं कप्पइ दंडए वा भंडए वा छत्तए वा मत्तए वा लट्ठिया वा चेले वा चम्मे वा चम्मपलिच्छेयणए वा अविरहिए ओवासे ठवेत्ता गाहावइकुलं पिंडवायपडियाए पविसित्तए वा निक्खमित्तए वा, कप्पइ ण्हं संनियट्टचारीणं ओग्गहं अनुन्नवेत्ता परिहरित्तए ।*

[भा.३४७१] वुड्ढो खलु समधिगतो अजंगमो य जंगमविसेसे ।
अविरहितो वा वुत्तो सहाय रहिए इमा जयणा ।।

वृ- अनंतर सूत्रे वृद्धः खलु समधिकृतोऽनेनापि सूत्रेण वृद्ध एव उच्यते स्थविर वृद्ध शब्दयोरेकार्थत्वात् ततः पूर्वसूत्रादनंतरमस्यसूत्रस्योपन्यासो नवरं स पूर्व सूत्रे वृद्धोऽजंगमो जंघाबलपरिहान उक्तोऽत्र तु जङ्गमविशेषो न सर्वथा जङ्घाबलपरिहीनो वक्तव्योऽथवायं विशेषः पूर्वसूत्रे योधिकृतो वृद्ध उक्तः ससहायैरविरहित उक्तोऽत्रतु यः सहाय रहितस्तस्य सामाचारी प्रतिपाद्या तथा चाह-सहायरहिते इयमधिकृतसूत्रप्रतिपाद्या यतना अनेन सम्बधेनायातस्यास्य व्याख्या-स्थविराणां जरसा जीर्णानां स्थविरभूमिं प्राप्तानां सूत्रार्थतदुभयोपेतानामित्यर्थः । कल्पेन दण्डविदण्डादिभेदभिन्नं भण्डकं अनेक विधानि उपकरणानि च्छत्रकं प्रतीतं मात्रकमुच्चारादिसत्कं लष्टिका दण्ड विशेषः चेलंकल्पादि चर्मतलिकादिरुपं चर्मपरिच्छेदनकं वध्रा । एतान् अविरहिते अवकाशे स्थापयित्वा गृहपतिकुलं पिण्डपातप्रतिपाताय प्रवेष्टुं वा निःक्रमितुं वा कल्पते सन्निवृत्तवाराणां भिक्षाचर्यातः प्रत्यागतानां स्थविराणां द्वितीयमपिवारमवग्रहमनुज्ञाप्य परिहर्तुं धारणया परिभोगेन चेत्येप सूत्राक्षरमात्रार्थः । विशेष व्याख्या तु भाष्यकृता क्रियते तत्र यानि पदानि व्याख्येयानि तानि दर्शयति ।

[भा.३४७२] दण्ड वि दण्डे लट्ठी वि लट्ठी चम्मोय चम्मकोसेय ।
चम्मस्सय जे च्छेया थेरा वि य जे जराजुण्णा ।।

वृ- दण्डो विदण्डः यष्टिर्वियष्टिः चर्म चम्मकोशः चर्मणश्च ये च्छेदास्ते चर्मपरिच्छेदनकास्ते च व्याख्येयास्तत्र प्रथमतः स्थविरपदमाचक्षते स्थविरा अपि च ये जराजीर्णास्ते द्रष्टव्याः ।

[भा.३४७३] आयवताण निमित्तं छत्तं दंडस्स कारणं वुत्तं ।
किस ठवेई पुच्छा स दिग्धथूरो उ दुग्गड्डा ।।

वृ- आतप उष्णेन परितापना तस्य त्राणार्थं च्छत्रकं गृह्णाति, दण्डस्य उपलक्षणमेतत् । विदण्डादीनां ग्रहणे कारणं पूर्वं निशीथे कल्पे च भणितं । अथ कस्माद्दण्डं स्थापयति । एषा पृच्छा । अत्रोत्तरं दण्डको दीर्घः स्थिरश्च । ततस्तं दुर्गे व्याघ्रादि परिवारणनिमित्तिं परिवहति । सम्प्रतिभाण्डादिपद व्याख्यानार्थमाह-

[भा.३४७४] भंडं परिग्गहो खलु उच्चारादी य मत्तया तिन्नि ।
अहवा भंडग गहणे नेगविहं भंडगं जोग्गं ।।

वृ- भाण्डकं खलु पतद्ग्रह उच्यते उच्चारादौ च आदि शब्दात् प्रश्रवणे श्लेष्मणि चेति परिग्रहस्त्रीणि मात्रकाणि भवन्ति । तद्यथा-उच्चारमात्रकं प्रश्रवणमात्रकं श्लेष्ममात्रकं चेति । अथवा भाण्डक-ग्रहणेनानेकविधं भाण्डकं गृहीतं द्रष्टव्यं ।

[भा.३४७५] चेलग्गहणे कप्पा तसं थावर जीवदेहनिप्फन्ना ।
दोरयराव चिलिमिलि चम्मं तलिगावकत्ति व्व ।।

वृ- चेलग्रहणेन त्रसस्थावरजीवशरीरनिष्पन्ना ऊर्णिकसूत्रिकरुपा इत्यर्थः कल्पाः परिग्रह्यन्ते । चिलिमिलिनमिति जवनिका सादवरकमयी इतरा वा द्रष्टव्या चर्ममयतलिका उपानत् कृत्तिर्वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औपग्रहिकोपग्रहण विशेषरुपा ।।

[भा.३४७६] अंगुठ अवरकाणु तहकोसगच्छेयणं तु जे वद्धा ।
तेच्छिन्न संघणट्ठा दुखंड संधाण हेउं वा ।।

वृ- चर्ममयः कोशः चर्मकोशः सोङ्गुष्ठस्य यदि वा अवरपार्ष्णु पार्ष्णिका तस्या परिरक्षणाय ध्रियते । अथवा नखरदनादेरौपग्रहिकोपकरणविशेषस्य चर्ममयः कोशश्चर्मकोशः ये तु बध्रास्ते चर्मपरिच्छेदनकमित्युच्यते । ते च च्छिन्नसन्धानार्थमथवा द्विखण्डसन्धानहेतोर्धियन्ते । तदेवं विषमपदानि व्याख्यातानि । सम्प्रति दण्डादि उपकरणस्थानचिन्तां चिकीर्षुराह-

[भा.३४७७] जइय ठवेइ असुने नयबेई देज्जहेत्थ उहाणं ।
लहुगो सुत्ते लहुगा हियंमि जं जत्थ पावति उ ।।

वृ- यदित्वशून्ये अविरहिते प्रदेशे दण्डाद्युपकरणं स्थापयति न च कस्यापि संमुखमेवं ब्रूते अत्र दद्यादवधानमुपयोगमिति, तदा तस्य प्रायश्चित्तं लघुको मासः । अथ शून्ये स्थापयति तदा चत्वारो लघुकास्तथा शून्ये मुक्ते स्तेनैश्चापहृते यत् यत्र जधन्ये मध्यमे उत्कृष्टे वा उपकरणे प्रायश्चित्तमुक्तं तत् प्राप्नोति । अत्र परस्यावकाशमाह-

[भा.३४७८] एयं सुत्तं अफलं जं भणियं कप्पत्ति थेरस्स ।
भणति सुत्त निवातो अति महल्लस्स थेरस्स ।।

वृ- चोदकः प्राहः-यद्येवमशून्ये शून्ये च प्रदेशे उपकरणे दोषस्तर्हि तत्सूत्रमफलविषयं यदुक्तं कल्पते अविरहिते अवकाशे स्थापयित्वेत्यादि सूरिराह-भण्यते अत्रोत्तरं दीयते । अस्य सूत्रस्य निपातो अतिमहतोऽतिशयेन गरीयसः ।

[भा.३४७९] गच्छानुकंपणिज्जो जेणठवेउण कारणेणं तु ।
हिंडइ जुन्नमहल्लो तं सुण वोच्छं समासेनं ।।

वृ- सोऽति वृद्धो महान् गच्छस्यानुकम्पनीयः परं येन कारणेन सजीर्ण महान् एकाकीभूतोऽविरहिते प्रदेशे उपकरणं स्थापयित्वा भिभक्ष्यां हिण्डते तत्कारणं समासेन वक्ष्ये तच्च वक्ष्यमाणं शृणु ।

[भा.३४८०] सो पुन गच्छेण समं गंतूण मजंगमो न वाएइ ।
गच्छाणु कंपणिज्जो हिंडइ थेरो पयत्तेणं ।।

वृ- स पुनरजङ्गमो गच्छेन समं गंतुं न शक्नोति, ततः स गच्छस्याऽनुकम्पनीय इति कृत्वा स्थविरो वक्ष्यमाणेन प्रयत्ने नयतनया हिण्डतो । तमेव प्रयत्नमाह-

[भा.३४८१] अतक्किय उवहिणा उ थेरा भणिआय लोयणिज्जेन ।
संकमणे पट्ठवणं पुरतो समगं च जयणाए ।।

वृ- यमुपधिं न कोऽपि तर्कयति विशेषतः परिभावयति तेनात्कारणीयेनोपधिना अत एवालोचनीयेन लोभगोचरतामति क्रान्तेन परिस्थाप्य मासकल्पप्रायोगस्य वर्षावास प्रायोगस्य वा क्षेत्रस्य संक्रमणे कर्त्तव्ये आचार्येण ते स्थविरा अति महान्तो भणिताः पुरतः समकं वा यतनयावल्यतां तत्र यदि प्रतिभासते तर्हि पुरतोऽग्रे साधुभिः सह तस्य प्रस्थापनं क्रियते । अथ न शक्नोति पुरतो गन्तुं तदा समकं नीयते । कथमित्याह-यतनया तामेव यतनामाह-

[भा.३४८२] संघाडगएगेण वा समगं गेण्हंति सभए ते उवहिं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किति कम्मदवं पढमा करेंति तेसिं असति एगो ।।

वृ- यदि गच्छेन समं व्रजति ततः सुन्दरमेव सकलस्यापि गच्छस्य तत्साराकरणात् । अथ समकं गन्तुं न शक्नोति तदा साधुसंघाटकेन समं साधुसंघाटकस्याभावे एकेन वा साधुना समं व्रजति । तत्र यो तौ सहायौ दत्तौ तौ तस्योपकरणं गृह्णीतः । परिवहतः । यदा तु चौरभयेन समयं स्थानं तदा समस्तमपि उपधिकल्पादि लक्षणं गृह्णीतो गृहीत्वा स स्थविरो यथाजातः -कृत्वा अग्रे क्रियते । ततः समयस्थानलङ्घने कृतिकर्मविश्रामणां तस्य कुरुतः कृत्वा द्रवं पानीयं समर्पयतः तदनन्तरं प्रथमालिकां कारयतः । तयोर्द्वयोः साध्वोरभावे एकः समस्तं प्रागुक्तं करोति ।

[भा.३४८३] जइ गच्छेज्जाहिगरणो पुरतो पंथे य सोफिडिज्जाहि ।
तत्थ उ ठवेज्जा एगं रिक्कं पडिपंथगप्पाहे ।।

वृ- अथैकोऽपि सहायो न विद्यते तदा स्थविर एकाक्यपि पुरतः प्रवर्त्यते । तत्र यदि सार्थादिवशतस्त्वरितं गच्छन् यदि वा पथि परिरयादिना स स्फिटितो भवेत्तत्र एकं साधुं रिक्तमुपकरणरहितं स्थापयेत् । अथ तत्र शरीरापहारिस्तेन भयं दुष्ट व्याघ्रादि स्वापदभयं वा ततः स मोक्तुं न शक्यते तर्हि अग्रेतनस्थानात् प्रतिनिवर्तमानं पथि कमप्याहे इति सन्देशापयेत् । तथा अग्रे साधुसमुदायो व्रजन्नास्ते तस्मात्त्वरित मागम्यतामिति । सम्प्रति यथा स स्फिटितो भवति तथा प्रदर्शयति ।

[भा.३४८४] सारिक्खकंड्डणीए अहवा वातेन हुज्जपुठो उ ।
एवं फिडितो हुज्जा अहवावी परिरएणं तु ।।

[भा.३४८५] कालगए वसहाए फिडितो अहवावि संभमो हुज्जा ।
पढमबियतोवएणवगामपविट्ठो व जो हुज्जा ।।

वृ- पथि गच्छतो मार्गद्वयं तत्र येन पथा गच्छो गस्तस्मादन्यस्मिन् पथि केचित्साधु सद्दशाः पुरतो गच्छन्तो द्दष्टास्ततः साधव एते गच्छन्तीति साद्दशन्तीति साद्दश्य कर्षिन्याविप्रलब्धः सन् तेन पथा गच्छेदथवा अपान्तराले स वातेन स्पृष्टः स्यात् ततो गन्तुं न शक्नोति । एवममुना प्रकारेण स स्फिटितो - भवेत् । अथवा तथाविध महागर्तया पर्वतस्य नद्या वा परिरएण स स्थविरो व्रजन् गच्छन् स्फिटितः स्यात् यदि वा यस्तस्य सहायो दत्तः स कालगत इति स्फिटित एकाकी संजातः । अथवा संभ्रमे स्वापदसंभ्रमे वा त्वरितं सार्थेन सह पलायमाने गच्छे स्थविरः शनैर्व्रजन् स्फिटितो भूयात् । यदि वा प्रथमेन क्षुत्परीषहेन पीडितः सन् यः स्थविरो ग्रामं व्रजिकां वा प्रविष्टो भवेत् । गच्छश्च स्तेनादिभयेन सार्थेन समं त्वरितं व्रजति स गच्छात स्फिटति ।

[भा.३४८६] एएहिं कारणेहिं फिडितो जो अट्ठमं तु काऊण ।
अनहिंडंतो मग्गइ इयरे विय तं विमग्गंति ।।

वृ- एतैरनन्तरोदितैः कारणैर्यो गच्छात् स्फिटितः सोऽष्टमं षष्टं चतुर्थं वा कृत्वा भिक्षामटन् गच्छं मार्गयति अन्वेषयति इतरेऽपि च गच्छसाधवस्तं स्थविरं विमार्गयन्ति । अथ ते गच्छसाधवः सार्थेन समं व्रजन्तो यदि सार्थं मुञ्चति तदा स्तेनैरपह्रियन्ते वनदावेन दह्यन्ते दुष्टेन वा स्वापदेन केनापि गृह्यन्ते । तत गवेषयितुं न शक्नुवन्ति तर्हि स्थविरेणावश्यमुक्तप्रकारेण मार्गणा कर्तव्या ।

[भा.३४८७] अह पुन न संथरेज्जा तो गहितो नेय हिंडतो भिक्खं ।
जहतरेज्जाहि ततो ठवेज्ज ताहे असुन्नम्मि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यदि चतुर्थेन षष्ठेनाष्टमेन वा गवेषणं कर्तुं न संस्तरेत् ततस्तदा तदुपकरणमशून्ये प्रदेशे स्थापयेत्। तत्रापि यानि वर्जनीयानि स्थानानि तानि प्रदर्शयति-

[भा.३४८८] अह पुन ठविज्ञा मेहिं तु सुन्नग्गिकम्म कुत्थिएसुं वा ।
नाणुन्नवेज्ञ दीहं बहु भुंजपरिच्छए पत्तं ।।

[भा.३४८९] तिसु लहुग दोस लहुगो खद्धाइयणे य चउ लहू होति ।
चउ गुरुगसंखडीए अप्पत्तपडिच्छमाणस्स ।।

वृ- अत्राद्यगाथा पदानां द्वितीयगाथोक्त प्रायश्चित्तैः सह यथासंख्येन योजना सा चैवमथ पुनः स्थापयेदेषु वक्ष्यमाणेषु स्थानेषु गाथायां तृतीया सप्तम्यर्थे । ततः प्रायश्चित्त संभवस्तत्र यदि शून्ये स्थापयति चतुर्लघु । आग्निकर्मिकायामपि शालायां स्थापने चतुर्लघुका, अग्निना यदि कथमप्युपकरणस्य दाहस्तदा तन्निष्पन्नमपि प्रायश्चित्तं, जुगुप्सिते जुगुप्सितगृहेषु स्थापयतश्चतुर्लघु । तस्मादेतानि स्थानानि वर्जयित्वा वक्ष्यमाणेषु स्थानेषु स्थापयेत् । यत्र स्थापयति ते अनुज्ञापयितव्याः । अननुज्ञापने मासलघु दीर्घां भिक्षाचर्यां करोति मासलघु । बहुसु भुंजति प्रायश्चित्तं चत्वारो लघवो भवन्ति । खद्धाइयणे इति खद्धस्य प्रचुरस्य अदने भक्षणे सतीत्यर्थः । तथा अप्रातं संखडिं प्रतीक्षमाणस्य प्रायश्चित्तं चत्वारो गुरुकाः । सम्प्रति येषु स्थानेषु स्थापयेत्तानि दर्शयति-

[भा.३४९०] असतीए मणुन्नाणं सव्वोवहिणा व भद्दएसुं या ।
देसकसिणेव घेत्तुं हिंडइ सइ लंभे आलोए ।।

वृ- यदि समनोज्ञाः सन्ति तर्हि तेषूणकरणं स्थापयितव्यम् । तेषामसत्यभावेऽमनोज्ञानामपि असांभोगिकानामप्युपाश्रये स्थापयेत् । यदि वा सर्वेणाप्युपधिना गृहीतेन हिण्डते यदि शक्तिरस्ति, अशक्तौ पार्श्वस्थादिष्वपि स्थापयति । यदि वा यथा भद्रकेषु गृहेषु स्थापयति देसकसिणे वा घेत्तुमिति समस्तस्योपधिर्देशभूतानि यानि कृत्स्नानि परिपूर्णानि कल्पादीनि तानि गृहीत्वा भिक्षामटति । अशक्तौ तान्यपि मुक्त्वा परिभ्रमति । तत्र सति लाभे तेषु गृहेषु भिक्षामटति येष्वटन् उपकरणं पश्यति ।

[भा.३४९१] असतीए अविरहियम्मि निंतिक्कादीण अंतीए ठवए ।
देज्ञह उहानंतिय जावउ भिक्खं परिभमामि ।।

वृ- असति अविद्यमाने भावे अविरहिते प्रदेशे नैत्यकादीनां नैत्यिको ध्रुवकर्मिको लोहकारादिरादिशब्दात् मणिकारशङ्खकारादि परिग्रहस्तेषामन्तिके स्थापयेत् ब्रूते च-दद्यादस्योपकरणस्यावधानं यावदहं भिक्षां परिभ्रमामि-

[भा.३४९२] उवेति गणयंतो वा समक्खं तेसि बंधिउं ।
आगतो रक्खियाभेत्ति तेन तुब्भेव्विया इमे ।।

वृ- तेषां ध्रुवकार्मिकप्रभृतीनां समक्षं गणयन् बध्वा स्थापयति । वा शब्दः स्थापनाविषयप्रकारान्तरसूचने आगतश्च सन् द्वितीयमपि वारमवग्रहमनुज्ञापयति । कथमित्याह-भोइत्यामन्त्रणे युष्मामी रक्षितान्यमूनि न युष्मदीयानीत्यनुजानीतमां गृहन्तमिति ।

[भा.३४९३] दट्ठुणवन्नहा गंतिं केन मुक्कोत्ति पुच्छत्ती ।
रहियं किं घरं आसी को परो व इहागतो ।।

वृ- इह यदा तेषां समक्षमुपकरणं बध्वा स्थापयति तदा सामिज्ञानां ग्रन्थिं बध्नाति ततः आगतः सन्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं प्रलोकयति मा केनाप्युन्मुच्य किंचित् हृतं स्यात्तत्र यदि तथैव ग्रन्थिं पश्यति ततः पूर्वोक्त प्रकारेणद्वितीयमवग्रहमनुज्ञापयति अथ ग्रंथिमन्यथा पश्यति, ततो ब्रूते ग्रंथिरुन्मुक्तः छोटितइति पृच्छति तदा । किमिति क्षेपे रहितं शून्यं गृहमासीत् को वा अपर इह समागत इति ।

[भा.३४९४] नत्थि वत्थुसुगंभीरं तं मे दावेहमाचिरा ।
न दिट्ठो वा कहं पत्तो तेन तो उ चउ इहं ।।

वृ- ममोपकरणमध्ये यद्वस्तु सुगंभीरमतिशोभनं तन्नास्ति तद्दर्शयत तद्वस्तु मा चिरकाली कुरु । अथ न गृहीतं मया नापि कोऽप्यागच्छन् दृष्टस्तत आह-न दृष्टो वा कथमत्रागच्छन् स्तेन क उपयाति उत्परकः अवश्यं स दृष्टः स्वयं वा गृहीतमिति भावः ।

[भा.३४९५] धम्मो कहिज्ज तेसिं धम्मट्ठा एव दिन्नमन्नेहिं ।
तुब्भारिसेहिं एयं तुब्भे सु य पच्चतो अम्हं ।।

वृ- धर्मस्तेषां ध्रुवकर्मकप्रभृतीनां कथ्यते । कथयित्वा च पर्यन्ते सं(स)टंकमानीयमिदमुच्यते-धर्मार्थमेव युष्मादृशैरन्यैरेतत् उपकरणं मह्यं दत्तं युष्मासु च विषयेऽस्माकमतीव प्रत्ययो विश्वासस्ततः किमित्याह-

[भा.३४९६] तो ठवियंणे एत्थ दिज्ज उ तं सावया इयं अम्हं ।
जइ दंती रमणिज्जं अदेंते ताहे इमं भणति ।।

वृ- यत एवं तस्मात् श्रावका यन्नोऽस्माकमत्र स्थापितं तदिदमस्माकं दीयतामेवमुक्ते यदि ददति ततो रमणियं सुन्दरं, अथ न ददाति ततोऽददतस्तानिदं वक्ष्यमाणं भवति तदेवाह-

[भा.३४९७] थेरोत्ति काउं कासु मा अवन्नं संती सहाया बहवो ममन्ने ।
ज उग्गमेस्संति ममे य मोसं खित्ताइ नाउं इति वे अदेंते ।।

वृ- स्थविर इति कृत्वा मा ममावज्ञां कार्षुर्यतः सन्ति ममान्ये बहवः साहाया ये क्षेत्रादि ज्ञात्वा क्षेत्रे कालादि ज्ञात्वा क्षेत्रकालादिकमपुष्य मामेतत् मोषमुद्गमयिष्यन्ति इत्येतत् तानददतः प्रति ब्रूते ।

[भा.३४९८] उवही पडिबंधेणं सो एवं अच्छइ तहिं थेरो ।
आयरियपायमूला संघाडेगो व अहपत्तो ।।

वृ- उपधि प्रतिबन्धेनः स स्थविरस्तत्र एवमुक्तप्रकारेण तिष्ठति तावत् यावदाचार्यपादमूलात् संघाटक एको वा साधुः समागच्छति अथ सोऽपि प्राप्तस्तर्हि यतैः कर्त्तव्यं तदुपदर्शयति-

[भा.३४९९] तेविय मग्गंति ततो अदेंते साहिंति भोइयाईणं ।
एवं तु उत्तरुत्तर जा राया अहव जादिन्नं ।।

वृ- तेऽपि आचार्यपादमूलादागताः साधवस्तान् ध्रुवकर्मिकादीन्मार्गयन्ति याचन्ते ततो यदि न ददति तर्हि तान् अददतो भोजिकादीनां नगरप्रधान पुरुषादीनां साधयन्ति कथयन्ति । अथ तत्रापि न किमप्यनुशासनं तर्हि ततोऽपिबृहतां बृहत्तराणां कथनीयम् । एवमुत्तरोत्तरस्य कथनं तावत् यावत् राजा अथवा यावद्दत्तं भवति तावत्कथनीयम् ।

[भा.३५००] अह पुन अक्खयचिठे ताहे वो चोग्गइं अनुन्नवए ।
तुब्भच्चयं इमंतिय जेन भे रक्खियं तुमए ।।

वृ- अथ पुनस्तत् उपकरणमकृतं तिष्ठति तदा द्वितीयमवग्रहमनुज्ञापयति यथा इदं समस्तमप्युपकरणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

युष्मदीयं येनेदं युष्माभी रक्षितं तस्मान्मां गृह्यन्तमनुजानीतेति एतावता कप्पतिण्हंसन्नियइत्त्चाराणां दोच्चंपि उग्ग हं अनुन्नावित्ते ति व्याख्यातम् ।

[भा. ३५०१] घेत्तुं वहिं सुन्नघरं व भुंजेक्खिनोव तत्थेव उ च्छन्नदेसे ।
छन्नासती भुंजइ कच्चगेऊ सव्वोवि यं भाणे करे तु कप्पं ।।

वृ- गृहीत्वा उपधिं शून्यगृहे गत्वा भुंक्ते, । अथ मार्गपरिश्रमणे भिक्षाटनेन खिन्नः परिश्रान्तस्तर्हि तत्रैव छन्ने आवृत्ते प्रदेशे भुङ्क्ते । अथ च्छन्नप्रदेशो नास्ति तर्हि कच्चगे चड्डगे सर्वं भाजनादपवृत्य भाजनस्य च कल्पं कृत्वा भुङ्क्ते ।

[भा. ३५०२] मज्झे दवं पि वत्तो भुत्ते वा तेहिं चेव दावे ति ।
नेच्छे वामोयत्तणएमेवय कच्चए डहरे ।।

वृ- मध्ये भोजनमध्यभागे किञ्चिद्भुंक्ते इत्यर्थः । द्रवं पिबन् पातुंकामो वा भुङ्क्ते वा परिपूर्णे तैरेव गृहस्थैर्दापयति मात्र कात्पानीयम पवर्त्तापयति । अपवर्ताप्यद्धाभ्यां कृत्वा पिबति । अथ नेच्छति गृहस्थोपवर्तयितुं ततो वामहस्तेन स्वयमपवर्त्य एकेन हस्तेनाञ्जलिं कृत्वा पिबति । तथा यदि क्षुल्लके चड्डुगे न सर्वं भक्तं माति तदायः पानीय पानविषयेविधिरुक्तः स एव अत्रापि द्रष्टव्यसत्था एवमेवा नेनैव प्रकारेण डहरे क्षुल्लके च द्दष्टव्यं तथा चाहः-

[भा. ३५०३] अप्पडिबज्झंतगमो इयरेवि गवेसह पयत्तेणं ।
एमेव अवुड्ढस्स वि नवरंगहिएण अडणं तु ।।

वृ- एवं यतनां कुर्वतो व्रजिकोदिष्वपि अप्रतिबध्यमानस्य प्रतिबन्दमकुर्वतो गमो गमनं गच्छे भवति । इतरेऽपि च गच्छसाधवस्तं स्थविरं प्रयत्नेन गवेषयन्ति । गाथायामेक वचनं प्राकृतत्वात् । योऽप्यवृद्धः कारणतः कथमप्येकाकी भवेत्तस्याप्येवमेवानेनैव प्रकारेण यतना द्रष्टव्या । नवरंभिक्षार्थमटनं गृहीतेनोपकरणेन तस्य द्रष्टव्यं-

***मू. (१९२)** नो कप्पइ निग्गंथाण वा निग्गंथीण वा पाडिहारियं वा सागारिय संतियं वा सेज्जा संथारगं दोच्चंपि आग्गहं अननुन्नवेत्ता बहिया निहरित्तए ।*

***मू. (१९३)** कप्पइ अनुन्नवेत्ता ।*

***मू. (१९४)** नो कप्पइ निग्गंथाण वा निग्गंथीण वा सागारियसंतियं वा सेज्जा संथारगं दोच्चंपि ओग्गह अनुन्नवेत्ता बहिया नीहरित्तए, कप्पइ अनुन्नवेत्ता।*

***मू. (१९५)** नो कप्पइ निग्गंथाण वा निग्गंथीण वा सागारिवसंतियंवा सेज्ञासंथारगं सव्वप्पण अप्पिणित्ता दाच्चंपि ओग्गहं अनुन्नवत्ता अहिट्ठित्तए । कप्पइ अनुन्नवेत्ता ।*

[भा. ३५०४] संथारएसु पगएसु अंतर छत्तदंडकत्तिल्ले ।
जंगमथेरे जयणा अनुकंपरिहे समक्खाया ।।

[भा. ३५०५] दोच्चंव अनुन्नवणा, भणिया इमिगावि दोच्चणुन्नवणा ।
नियउग्गहंमि पढमं बिइयं तु परोग्गहे सुत्तं ।।

वृ- संस्तारकेषु पूर्वसूत्रेष्वधिकृतेषु अन्तरा चछत्र दण्ड कृत्तिचत्रि जङ्गमस्थविरे समस्तस्यापि गचछस्यानुकम्पार्हे यतना अनन्तरसूत्रेण समाख्याता । सम्प्रति पुनः संस्तारकोऽनेन सूत्रेण भण्यते । एष सूत्रसम्बन्धः । अथवान्यथा सूत्रसम्बन्धस्तमेवाह दोच्चं वेत्यादि द्वितीयावग्रहानुज्ञापना जङ्गमस्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विरस्यानतन्तरसूत्रेण भणिता । इयमपि सूत्रेणाभिधीयमाना द्वितीयावग्रहानुज्ञापना ततोर्द्वितीया-वग्रहानुज्ञापना प्रस्तावादिदं सूत्रं पूर्वसूत्रादन्तरमुक्तं नवरं प्रथममनन्तरसूत्रं निजकस्यात्मीयस्यो-पकरणस्यावग्रहेऽनुज्ञापना विषयं द्वितीयमधिकृतं तु परस्पर परकीयस्य शय्यातरसत्कस्यान्यसत्कस्य वा इत्यर्थः । अवग्रेहऽनुज्ञापनायामेवमनेन सम्बन्धेनायातस्यास्य व्याख्या नो कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा प्रातिहारिकं शय्यासंस्तारकं शय्यातरसत्कमन्यसत्कं वा द्वितीयमप्यवग्रहमननुज्ञाप्य-बहिर्निर्हर्तु, नवरमनुज्ञाप्यपुनः कल्पते इति सूत्रसंक्षेपार्थः । सम्प्रति निर्युक्तिविस्तरः -

[भा.३५०६] परिसाडीमपरिसाडो पुव्वं भणिया इमं तु नाणत्तं ।
पडिहारियसागारिय तं चेवं तेबहिंनेति ।।

वृ- परिशाटिः यादृशः संस्तारको भवति यादृश्चा परिशाटिरेतौ द्वावपि पूर्वस्मिन्नेवाष्टमोद्देशके भणिताविदं त्वत्र नानात्वं तदेवाह-प्रातिहारिकं सागारिकसत्कं तमे व शय्यातरसंस्तारकमन्तः स्थितं बहिर्नयति । एतदेव सविस्तरं भावयति-

[भा.३५०७] परिसाडी परिसेहो पुनद्धारो य वणितो पुव्वं ।
अपरिसाडिग्गहणं वासासु य वणियं नियमा ।।

वृ- पूर्वं परिशाटेः शय्यासंस्तारकस्य प्रतिषेधः कृतो यथा न कल्पते परिशाटिः शय्यासंस्तारक इति ततः पुनरुद्धारोऽपवादः पूर्वमिव वर्णितो यथा ऋतुबद्धे काले निष्कारणं संस्तारका न कल्पन्ते तथा पूर्वमेवैतदपि वर्णितं यथा वर्षासु काले नियमादपरिशाटिः शय्यांस्तारकस्य ग्रहणं कर्तव्यमिति ।।

[भा.३५०८] पुनंमि अंतो मासे वासावासेविमं भवइ सुत्तं ।
तत्थेवगवावेसे असतीतं चेव नुन्नवए ।।

वृ- अन्तर्ग्रामस्य नगरस्य वा मध्ये पूर्णे मासे वा बहिरवस्थातुकामानाभिदमधिकृतं सूत्रं भवति यथा न कल्पन्तेऽभ्यन्तराणि तृणफलकादीनि यैर्दत्तानि तानि अनापृच्छ्य बहिर्नेतुमिति तत्र प्रथमतस्तत्रै बहिः प्रदेशेऽन्यं तृणफलकादिमयं शय्या संस्तारकं गवेषयेत् । असति बहिः संस्तारकस्या लभ्यमाना त्वनाभावे तमेव सागारिकं सत्कन्यसक्तं वा शय्यासंस्तारकनुज्ञापयेत् । यथा बहिर्याचित्तः शय्या संस्तारकः परं न लब्धस्ततो यूयमनुजानीतात्मीयं संस्तारकं येन बहिर्नयाम इति । यदि नानुज्ञापयति तदा तृणमयं संस्तारकविषये प्रायश्चित्तं मासलघु फलकमयसंस्तारकविषये चतुर्लधु । अत्रैवापवादमधिकृत्य विकल्पमाह-

[भा.३५०९] अहवा अवस्स घेत्तव्वयंमि दव्वंमि किं भवे पढमं ।
नयनं समणुन्ना वावि वज्ञउ वा जुहत्तातो ।।

वृ- अथवेत्यपवादमधिकृत्य प्रकारान्तरोपदर्शने यदि नियमात्तत्संस्तारकद्रव्ये बहिर्नेतव्यं न शक्यते तद्विना मोक्षसाधनं कर्तुमिति तर्हि प्रथमतः किं कर्तव्यं नयनं समनुज्ञा वा ? आचार्य आह-अवश्यं नयनलक्षणेऽपवादे प्राप्ते पूर्वं नयनं कर्तव्यं पश्चादनुज्ञापना । यदि वा पूर्वमनुज्ञा कर्तव्या पश्चान्नयनं विपर्ययो वा यथोक्ता किमुक्तं भवति नापि पूर्वमनुज्ञापयेत् नापि नीत्वा पश्चादनुज्ञापयेत् । ततः पूर्वमनुज्ञापनं पश्चान्नयनमित्येकान्त शुद्धो भङ्गः एष च भङ्गस्तदा द्रष्टव्यो यदा ये दोषा मासकल्पे वर्णितास्ते अन्तः सन्ति बहिर्न विद्यन्ते बहिश्च तृणफलकादीन्यनुज्ञाप्यमानानि न लभ्यन्ते तदा अभ्यन्तराणि येषां सत्कानितानुज्ञाप्यनीयन्ते । अथान्तरं शिवादीनि कारणानि निर्गमनमुहूर्तश्चाति प्रत्यासन्नो न च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहिस्तृणफकादीनि लभ्यन्ते तदा पूर्वंनयनं पश्चादनुज्ञापनं यथा बहिर्याविचतानि तृणफलकादीनि परंनलब्धानि ततो युष्मदीयान्येव तत्र नीतानीत्यस्माकं तान्यनुजानीत । यदा तु कारणवशतो बहिरवश्यं गन्तव्यं बहिश्च तृणफलकादानि न लभ्यन्ते न च तानि विना साधवः संस्तरीतुं शक्नुवन्ति न तु येषामभ्यन्तराणि तृणफलकादीनि ते अनुजानन्तः संभाव्यन्ते न वाननुज्ञाप्यं तेषुबहिर्नीतेषु तेषामभिनवा तदा न पूर्वमनुज्ञापनं नापि नीत्वा पश्चादनुज्ञापनमिति । तदेवं पूर्णे मासकल्पे पूर्णे च वर्षाकल्पे चायं विधिरुक्त एवमपूर्णेऽपि द्रष्टव्यं । तथा चाह-

[भा.३५१०] एमेव अपुन्नंमिवि वसही वाघाए अन्नसंकमणे ।
गंतव्वुवासया सति संथारो सुत्तनिद्देसो ।।

वृ- एवमेव अनेनैव प्रकारेण पूर्णे मासकल्पे द्रष्टव्यं कथमित्याह-वसतेर्व्याधाते सति उपाश्रया भावे गन्तव्यमवश्यं जातं । तत्रान्यक्षेत्र संक्रमेण तत्र संस्तारकालाभे पूर्वप्रकारेण संस्तारको नेतव्यः । एव सूत्रनिर्देशः एष सूत्र विषय इति भावः, तत्र पूर्वं नयनं पश्चादनुज्ञापनमिति भङ्ग मधिकृत्य विधिमाह-

[भा.३५११] नीहरिउं संथारं पासवणुच्चार भूमीभिक्खादी ।
गच्छेहगविज्झायं करे इमा तत्थ आरुवणा ।।

वृ- यदि कारणवशतः पूर्वमनुज्ञाप्य तृणफलकादिमयः संस्तारको बहिर्नीतो यदि वा तं वसतेर्व्याघाते बहिरन्यां वसतिं गतवा तत्र संस्तारकोऽननुज्ञाप्य नीत्वा स्थापितस्तर्हि शेषव्यापारपरित्यागेन नियमतः पश्चादनुज्ञापना कर्तव्या । अथ नीत्वा प्रश्रवणभूमिमुच्चारभूमिं भिक्षादौ वा गच्छेदथवा स्वाध्यायं करोति तत्रेयं वक्ष्यमाणा आरोपणा प्रायश्चित्तम् । तमेवाह-

[भा.३५१२] एएसु चउसुपि तणो सुलहुगो य लहुगफलगेसु ।
रायदुठग्गहणे चउगुरुगा हुंति नायव्वा ।।

वृ- एतेषु प्रश्रवणभूम्यादिषु चतुर्षु स्थानेष्वननुज्ञाप्यप्रवृत्तौ तृणेषु तृणमयसंस्तारकविषये प्रायश्चित्तं लघुको मासः । फलकेषु विषये चत्वारो लघुकाः राजद्विष्टाना राजप्रतिषिद्धानां तृणफलकादीनाननुज्ञाप्य ग्रहणे चत्वारो गुरुका भवन्ति ज्ञातव्याः

मू. (१९६) *नो कप्पइ निग्गंथाण वा निग्गंथीण वा पुव्वामेव ओग्गहं ओगिण्हिता तओ पच्छा अनुन्नवेत्तए ।।*

मू. (१९७) *कप्पइनिग्गंथाण वा निग्गंथीण वा पुव्वामेव ओग्गहं अनुन्नवेत्ता तओपच्छा ओगिण्हित्तए, अहपुन एवं जाणेज्ञा इह खलु निग्गंथाण वा निग्गंथीण वा नोसुलभेपाडिहारिए सेज्ञासंथारएत्तिकट्टुएवण्हं कप्पइ पुव्वामेव ओग्गाहं ओगिण्हित्ता तओ पच्छा अनुन्नवेत्तए मा वहउ अज्ञोवइअनुलोमेण अनुलोमेयव्वे सिया ।।*

[भा.३५१३] उग्गहसमणुन्नासु सेज्ञासंथारएसु य तहेव ।
अनुवत्ततेसु भवेपंते अनुलोमवति सुत्तं ।।

वृ- अवग्रहसंस्तारकाश्च स्वामिना अनुज्ञाता अवग्रहीतव्या इत्युत्सर्गत उपदेशस्तदेवमवग्रह-समनुज्ञासु सय्यासंस्तारकेषु तथैव समनुज्ञातव्येष्वनुवर्तमानोष्विदमपि सूत्रं समनुज्ञातसंस्तारकादि-ग्रहणविषये भवति, अपवादतो अननुज्ञाप्य संस्तारकग्रहणे यदि संस्तारकस्वामी प्रान्तो रुष्टो भवेत् । तस्मिन् प्रान्तेऽनुलोमवाक् वक्तव्या । अनेन सम्बन्धेनायातस्यास्य व्याख्या-न कल्पते निर्ग्रन्थानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्ग्रन्थीनां वा प्रतिहारिकं शय्यासंस्तारकं सर्वात्मनाअर्पयित्वा द्वितीयमप्यवग्रहमनुज्ञाप्या-धिष्ठातुमनुज्ञाप्य पुनः कल्पते । एवं सागारिकसत्केऽपि शय्यासंस्तारके द्वावालापकौ वक्तव्यौ । तथा न कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा पूर्वमेवावग्रहमवग्रहीतुं ततः पश्चादनुज्ञापयितुं; कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा पूर्वमेवावग्रहमनुज्ञापयितुं पश्चादवग्रहीतुमिति । अथ पुनरेतत् जानीयात् इह खलु निर्ग्रन्थानां निर्ग्रन्थीनां वा न सुलभः शय्यासंस्तारक इति कृत्वा एवमेवामुना प्रकारेण नमिति वाक्यालंकारे कल्पते पूर्वमेवावग्रहमवग्रहीतुं ततः पश्चादनुज्ञापयितुं तत्रैवं कारणे शय्यासंस्तारकस्वामिना सह संयतानां कलहे आचार्याः संयतान् ब्रुवते-मा चार्याद्वि विधा कुरुत द्वावपि कुरुत । एके वसतिं प्रतिगृह्णीथ अपरे परुषाणि भाषध्वे तस्मात् क्षमध्वं इत्येवं वचसा अनुकूलेन अनुलोमेनानुलोमयितव्यः स्यादिति ।

[भा.३५१४] सेज्जासंथारदुगं अणुन्नवेऊण ठायमाणस्स ।
लहुगो लहुगो लहुगा आणादीनिच्छुभणपंतो ।।

वृ- शय्यासंस्तारकद्विकं परिशाट्य परिशाटिरूपं शालादिषु चावग्रहमनुनज्ञाप्य तिष्ठतः प्रायश्चित्तं लघुकादि तद्यथा-शालादिष्ववग्रहमननुज्ञाप्यतिष्ठतो लघुको मासः परिशाटौ मासलघु अपरिशाटौ चत्वारो लघुकाः तथा आज्ञादय आज्ञाभङ्गदयो दोषाः तथा प्रान्तः कोऽपि रुष्टः सन्निच्छुभणं निष्काशनं कुर्यात् ।

[भा.३५१५] एयमदिन्नवियारे दिन्नवियारे वि सभएवादीसु ।
तणफलगाणुन्नाया कप्पडियादीण जत्थ भवे ।।

वृ- एवमदत्तं विचारे शालदौ द्रष्टव्यं, दत्तविचारं नाम यत्र कार्पटिकादिर्न कोऽपि वार्यते । तच्च सभा वा प्रपा वा मण्डपको वा यान्यपि च तत्र तृणफलकादीनि तान्यप्यनुज्ञातानि । तथा चाह-यत्र कार्पटिकानां तृणफलकादीन्यनुज्ञातानि भवन्ति । तेष्वपि दत्तविचारेषु सभाप्रपादिषु यानि तृणफलकादीनि तान्यपि किमित्याह-

[भा.३५१६] ताणवि उ न कप्पंती अणनुन्नवियं मि लहुक मासो उ ।
इत्तिरियंपि न कप्पइ तम्हाउ अजातितोग्गहणं ।।

वृ- तान्यपि अननुज्ञापिते स्वामिनि गृहीतुं न कल्पते, यदि पुनरननुज्ञाप्य गृह्णाति तदा प्रायश्चित्तं लघुको मासः । कस्मादेवमत आह-यस्मादित्वरमपि क्षणमात्रमपीत्यर्थः अवग्रहगमयाचितं न कल्पते

(उक्तं च-) इत्तिरियंपि न कप्पइ अविदिन्नं खलु परोग्गहादीसु ।
चिठित्तु निसीयतु व तइयव्वय रक्खणठाए ।।

तथा अननुज्ञापने तिष्ठत इमे च दोषाः

[भा.३५१७] जावंतियदोसा वा अदत्तनिच्छुभणदिस रातो वा ।
एव दोसे पावइ दिन्न वियारे विठायंते ।।

वृ- अननुज्ञातो दत्तविचारेऽपि यदि तिष्ठति तदा यावन्तिकदोषस्तथा अदिन्नति अदत्तदान-गृहणदोषश्चोपजायते तथा कदाचित्स सभादिस्वामी प्रान्तो ब्रूयात् । केनामीषामत्र स्थानं दत्तं नह्यमीषां योग्यमिति ततो रुष्टः सन् दिवसे रात्रौ वा निष्काशनं कुर्यात् । तस्याद्दत्तीविचारेऽप्य-ननुज्ञाप्य तिष्ठन् एतान् दोषान् प्राप्नोति तस्मात्तत्रापि पूर्वमनुज्ञाप्य पश्चात्कल्पते स्थातुमेवं सति यावन्तिकदोषो न भवति स्वामिसत्कं कृत्वा तदनुज्ञापनाददत्तादानं निष्काशनं च नभवतीति-

[भा.३५१८] किंतुअदिन्नविचारे कोट्ठारादीसु जत्थतणफलगा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रक्खिज्जते तहियं, अणनुन्नाए नठायंति ।।

वृ- आस्तां दत्तविचारे अनुज्ञापनमंतरेण न तिष्ठतु, प्रागुक्तदोषसंभवात् किंतु अदत्तविचारेष्वपि, गाथायामेकवचनमपि शब्दलोपश्चार्षत्वात् न दत्तो विचारप्रदेशो यत्रतान्यदत्तविचाराणि तेष्वपि केष्वित्याह कोष्ठागारादिषुकोष्ठागारं धान्यस्य तृणादीनां वा आदिशब्दात् चतुःशालादीनि तथा देवकुलं गोष्टिकादीनां वा गृहाणि यत्र गोष्टिकादयः समवायं कुर्वन्ति तानि दत्तविचाराणि गृह्यन्तेतेषु कोष्टागारादिषु यत्र येषु तृणफलकानि रक्ष्यन्ते तथाहि-प्रतितमेतत्कोष्टागारादिषु मा कोऽपि किमपि हार्षीरिति प्राहरिकमोचनेन तृणानि फलकानि च प्रयत्नेन रक्ष्यन्ते । तत्र तेष्वननुज्ञातेषु साधवो न तिष्ठन्ति किमर्थमिति चेदत आह-

[भा.३५१९] दोसाणरक्खणठा चोएइ निरत्थयं ततो सुत्तं ।
भन्नइ कारणियं खलु, इमे य ते कारणा हुंति ।।

वृ- दोषाणां प्रायश्चित्तप्रसङ्गतो भङ्गादिरुपाणां रक्षणार्थं रक्षणाय तत्र न तिठिन्ति अत्र परश्चोदयति, यद्येवं ततः सूत्रं इह खलु निग्गंथाण वा निग्गंथीण वा नो खलु भे पाडिहारिए इत्यादि निरर्थकमविषत्वात् सूत्रे हि अनुज्ञापनमन्तरेणापि पूर्वमनुज्ञातमिति सूरिराह-भण्यते उत्तरं दीयते इदं खलु सूत्रं कारणिकं कारणैर्निवृत्तं तानि च कारणानि इमानि वक्ष्यमाणानि भवन्ति तान्येवाह-

[भा.३५२०] अद्धाणे अठाहिय उमसिवे गामनुगामियविवेले ।
तेनासावयमसगा सीयं वासं दुरहियासं ।।

वृ- अध्वनि मार्गे गताः साधवस्तत्रान्यत्रयाचिता वसतिः परं न लब्धा अथवा अष्टाहिकां द्रष्टुमागता, यदि वा अवमौदर्यमशिवंवाभविष्यतीत्यन्यदेशं प्रस्थिता विकाले प्राप्ता अथवा ग्रामानुग्रामं विहरन्ति । व्यतिकुष्टमन्तरमपान्तराले इति कृत्वा सार्थवशेनवाविकेल विकाले प्राप्ताः । अन्या च वसतिर्न रोचते वसतिमन्तरेण च स्तेनभयं वा स्वापदभयं वा मशका वा दुरध्यासाः सीतं वा दुरध्यासं पतति यथा उत्तरापथे वर्षं वा घनं निपतन् तिष्ठति तत एतैः कारणैरदृष्टेऽप्यधिकृतवसति स्वामिनि मा अन्यपथिकाः कार्पटिका वा तिष्ठंति, तथैव कायिक्यादिभूमीः प्रत्युपेक्ष्य पूर्वमवग्रहं गृहीत्वा पश्चाद्वसतिस्वामिनमनुज्ञापयन्ति । एतदेव सविशेषमाह-

[भा.३५२१] एएहिं कारणेहिं पुव्वं पेहेतु दिट्ठणुन्नाए ।
ताहे अयंत दिट्ठे इमाउ जयणा तहिं होइ ।।

वृ- एतैरनन्तरोदितैः कारणैः पूर्वमुच्चारादिभूमीः प्रत्युपेक्ष्य दृष्टः परिजनोऽनुज्ञाप्यते । ततस्तस्यां वसतावायान्ति साधवः । तत्रदष्टे परिजने इयं वक्ष्यमाणा यतना भवति । तामेवाह-

[भा.३५२२] पेहेतुच्चार भूमादी ठायंति वोत्तु परिजणं ।
अत्थाउ जाव सोएइ जातीहामो तमागयं ।।

वृ- प्रेक्ष्य प्रत्युपेक्ष्य उच्चारभूम्यादिपरिजनमुक्त्वासाधवस्तत्र तिष्ठन्ति कथमुक्त्वेत्यत आह-आस्महे तावत् यावत् स गृहस्वामी समागच्छति ततः तमागतं याचिष्यामहे सच आगतो येनविधिना समनुज्ञापयितव्यस्तं विधिमाह-

[भा.३५२३] वयंवन्नं च नाऊण वयंते वग्गुवादिणो ।
सभंडावेयरसेज्जं अप्फंदंतीति निरंतरं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- वयोवर्णं च गृहस्वामिनो वल्गु शोभनं वल्गु शोभनं वदन्तीएवंशाली वल्गुवादिनो वसतिस्वामिनं वक्ष्यमाणं वदन्ति, । इतरे च सभाण्डाः सोपकरणाः सन्तो निरन्तरं वसतिमास्पन्दन्ते व्याप्नुवन्ति ।

[भा.३५२४] अब्भासत्थं गंतूण पुच्छए दुरएत्ति मा जयणा ।
तद्दिवसमंत पडिच्छण पत्तेयकहिंति सब्भावं ।।

वृ- यदि अभ्यासस्थो निकटवर्ती भवति, तदा गत्वा वसतिस्वामिनं पृच्छति । अथ च दूरप्रातस्तत्रेयं यतना तां दिशमागच्छतः प्रतीक्षणं कर्तव्यं प्राप्ते च तस्मिन् सद्भावं कथयन्ति । यथा वहिः स्तेनादिभयात् युष्माकमुपाश्रयेवयं स्थिताः तथेदं वदन्ति-

[भा.३५२५] विले वसिउं नागापातो गच्छामो सन्नणा निरत्थाणं ।
बहिं दोसा जाते मा, होज्ज तुज्झवी अहो सज्ञान (व) ।।

वृ- विलेनागा इव वयं युष्मदुपाश्रये उषित्वा प्रातर्गच्छाम एवं याचितो यदि ददाति ततः सुन्दरमथन ददाति तदानुलोभेन वचसानुलोमयितव्यः धर्मकथातस्यकथ्यते निमित्तादिकं वा प्रयुज्यते । तथाप्यददति परुषमपि वक्तव्यम् । कथमित्याह- निरस्तानां निष्काशितानामस्माकं ये स्तेनकस्वापदादि-भिरुपधिशरीरमरणदोषा जायेरन् मा ते तवाप्युपरि पतेयुरिति । एतदेव सविस्तरमभिधित्सुराह-

[भा.३५२६] जइ देइ सुंदरं तू अह उवएज्ज़ाहि नीह मज्झ गिहा ।
अन्नत्थ वसहिमग्गह तहियं अनुसठिमादीणि ।।

वृ- यदि बिले वसिउं नागा इत्यादि भणनानन्तरं वसतिं ददाति ततः सुन्दरमथ वदेत् मम गृहान्निर्गच्छतान्यत्र वसतिं याचध्वमिति तदा तत्रानुशिष्ट्यादीनि क्रियते । अनुशिष्टिरनुशासनं क्रियते । आदिशद्वात् धर्मकथा कथ्यते इति परिग्रहः ।

[भा.३५२७] अनुलोमणं सजाती सजाइमेवेति तहवि उ अटंतो ।
अभिओगनिमित्तं वा बंधगोसेय ववहारो ।।

वृ- तथानुलोभेन वचसाऽनुलोमनं कर्तव्यं । अथ तथापि न ददाति तर्हि सजातिः सजातिमनु-कूलयतीति न्यायमङ्गीकृत्य ये तस्य स्वजना यानि च मित्राणि तैरनुनायितव्यः । तथाप्यतिष्ठति अभियोगो मन्त्रादिना कर्तव्यो निमित्तं वा प्रयोक्तव्यं बन्धनं वा तस्य सर्वैरपि साधुभिस्तस्य कर्तव्यं । ततः प्रभाते व्यवहारः कर्तव्यः ।

[भा.३५२८] मानेत्थि वसुभाणा इमाभिंदस्स सिणे जय ।
दुहतो माया वालेंति थेरा वारेंति संजए ।।

वृ- यदि साधूनां भाण्डकं बहिर्नेतुं व्यवसितस्तदा स भण्यते-मा नोऽस्माकं भाजनानि स्पृश हे अयत मा वा नोऽस्माकं भाजनानि भिन्द्धि यदि पुनस्तं संयतानिर्धर्मादिवचोभिराक्रोशन्ति तदा स्थविरा आचार्याः संयतान् वारयन्ति वारयन्ति आचार्या द्विधातो वालं कार्षुकं तावत् वसितं प्रतिगृह्णीथ - द्वितीयं परुषाणि भाषध्वे, तस्मान्मा एवं भणत । यत्करोति तत्क्षमध्वमिति ।

[भा.३५२९] अहवा बेंति अम्हे ते साहामो य सतेवाली ।
न सहेज्ञा वराहं ते तेन होज्ज न ते खमं ।।

वृ- अथवा इदं ब्रुवते-वयं तवापराधं सहामहे । एष पुनर्बलीयान् तवापराधं न सहेत असहिष्णुना च तेन यत्क्रियते तन्न ते क्षमं भवेत् । एवमुक्तो यदि सोऽतिरोषेण न तिष्ठति निष्काशयति प्रहारैर्वा धावति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा स वलीयान् यत्करोति तद्दर्शयति ।

[भा.३५३०] सो य रुठोव उठित्ता खंभं कुड्डं व कंपते ।
पुव्वं सनातिमित्तेहिं तं गमंति पहूण वा ।।

वृ- स वलीयान् रुष्ट इव न तु परमार्थतो रुष्ट उत्थाय स्तंभं वा कुड्यं वा मुष्टिप्रहारेण कम्पयति । कम्पयंश्च ब्रूते-वं शिरः पातयिष्यामि यदि न स्थास्यसि एतच्च पर्यन्ते उच्यते । अन्यथा पूर्वमेव ज्ञातिभिर्मित्रैर्वा प्रभुणा तं गमयन्ति तथाप्यतिष्ठत्यनन्तरोदितं क्रियते;

मू. (१९८) *निग्गंथस्सणं गाहावतिकुलं पिंडवाय पडियाए अनुपविट्ठस्स अहालहुसए उवगरणजाए परिभट्ठे सिया, तं च केइ साहम्मिए पासेज्जा कप्पइ से सागारकंड गहाय जत्थेव अन्नमन्नंपासेज्ञा तत्थेव एवं वएज्ञा इमे भे अज्ञोकिं परिन्नाए ? सेयवएज्ञा, परिन्नाए तस्सेवपडिणिज्ञाएव्वे सिया सेयवएज्ञा नो परिन्नाए तं नो अप्पणा परिभुंजेज्ञा नो अन्नमन्नस्सदावए एगंते बहुफासुए थंडिले परिट्ठवेयव्वे सिया ।*

मू. (१९९) *निग्गंथस्सणं बहिया वियारभूमिं वा विहारभूमिंवा निक्खंतस्स अहालहुसए जाव परिट्ठवेयव्वे सिया।*

मू. (२००) *निग्गंथस्सणं गामानुगामं दूइज्ञमाणस्स अन्नयरे उवगरणजाए परिभट्ठे सिया तं च केइसाहम्मिए पासेज्ञा कप्पइ से सागारकडं गहाय दूरमेवयद्धाणं परिवहित्तए जत्थेव अन्नमन्नं पासेज्ञा तत्थेव जाव परिठवेयव्वे सिया ।*

[भा.३५३१] गहियन्नरक्खणठा वइ सुत्तमिणं समासतो भणियं ।
उवहिसुत्ताउ इमे साहम्मिय तेन रक्खणट्ठा ।।

वृ- अन्यकर्पटकादिरक्षणार्थं गृहीतेऽवग्रहे वाक्सूत्रमिदमनन्तरं समासतो भणितमिमानि च पुनरुपधिसूत्राणि साधर्मिकास्तेनरक्षणार्थमुपन्यस्तानीत्येष सूत्र सम्बन्धः । अनेन सम्बन्धेना-यातस्यास्यव्याख्या । निर्ग्रंथस्य नमिति वाक्यालङ्कारे गृहपतिकुलंपिंडं वा य पडिवाए इति पिण्ड-भक्तं पानं वा पातयिष्यामीति बुद्ध्या यथा महाराष्ट्रं सुत्तं पाडिउं निग्गउं आनेष्यामीति बुद्ध्या निर्गत इत्यर्थः । अनुप्रविष्टस्य यथा लघु स्वकमेकान्तलघुकं जघन्यं मध्यमं वा इत्यर्थः । उपकरणजातं परिभ्रष्टं पतितंस्यात्तच्च कश्चित्साधर्मिकः पश्येत्कल्पते से तस्य सागारकृतंनाम यस्यैवेदमुपकरणंतस्यैवेदं देयमिति बुद्ध्या गृहीत्वा यत्रैवान्यमन्यं साधर्मिकं पश्येत्तत्रैव एवं वदेत् । इदं भो आर्य किं परिज्ञातं स च यदि वदेत् परिज्ञातं, तत स्तस्यैव प्रतिनिर्यातव्यं समर्पणीयं स्यात् । किमुक्तं भवति । यदि तस्य सत्कं तर्हि तस्मै दीयते, । अथ ब्रूयादमुकस्य सत्कं यदा तस्येति, स च वदेत् न परिज्ञातं न कोऽपि जानातीति भावः तर्हि तन्नात्मना परिभुञ्जीत, न अन्यस्यान्यस्य दर्शयेत् । किन्त्वेकान्ते बहुप्रासुके स्थण्डिले परिस्थापयितव्यं स्यात् । एवं निग्गंथस्सणं बहिया वियारभूमिं वा विहारभूमिं वा निक्खंतस्सेत्याद्यपि सूत्रं भावनीयम् । तथा निर्ग्रन्थस्य नमिति प्राग्वत् ग्रामानुग्रामं दुइज्ञमाणस्सेति विहरतोऽन्यतरत् उपकरणजातं भ्रष्टं स्यात् तच्च कश्चित्साधर्मिकः पश्येत्कल्पते से तस्य सागारकृतं गृहीत्वा दुरमप्यध्वानं परिवोढुं जत्थ वेत्यादि प्रागवत् । एष सूत्रत्रयसंक्षे पार्थः । सम्प्रति भाष्यकृत् यथालधुस्वकग्रहणं तृतीयसूत्रमन्यतरग्रहणं च व्याख्यानयति ।।

[भा.३५३२] दुविहो य अहालहुसो जहन्नतो मज्झिमो य उवहीउ ।
अन्नयरग्गहणेण उघेप्पइ तिविहो उ उवहीय ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यथा लघुस्वक उपधिर्द्विविधो भवति जधन्यो मध्यमश्च । अन्यतरग्रहणेन तु त्रिविधोऽप्युपधिः परिगृह्यते । तदेवंकृता विषमपदव्याख्या भाष्यकृता सम्प्रति निर्युक्तिविस्तरः ।

[भा.३५३३] अंतो परिठावंते बहिया य विहारमादिसु लहुगो ।
अन्नयरं उवगरणं दिठं संका न घेच्छंति ।।

[भा.३५३४] किं हुज्ज परिठवियं पम्कुठा वावितो न गेण्हंति ।
किं एयस्सन्नस्स वसं किज्जइ गेण्हमाणोवि ।।

वृ- अन्तर्ग्रामादीनां मध्ये बहिर्विचारभूमौ वा परिस्थापयति विस्मरति पम्हठंति वा परिठवियं ति वा एगठ्ठमिति वचनात् प्रायश्चित्तं लघुको मासः । कस्मादीदृशं प्रमादं करोतीति हेतोः कः पुनर्दोषो यदि विस्मृतमत आह अन्यत्तरत् जधन्यं मध्यममुत्कृष्टं वा उपकरणं दृष्टं ततो जाता शंङ्का शंकातश्च न केचनापि ग्रहीष्यंति, शङ्कामेव स्पष्टतां भावयति । किं होज्जेत्यादि साधवस्तदन्यतरत् उपकरणमन्तर्बहिर्दृष्ट्वा शङ्कन्ते किमेतत् परिठापितमुतकस्यापि विस्मृतं भवेत् । एवं शङ्कमानास्तदुपकरणं विस्मृतं न गृह्णन्ति यतो गृह्णन्नपि जनैः स शंक्यते । तथापि-तत्पतितं गृह्णन्तं संयतं कोऽपि दृष्ट्वा शङ्केत किमेतस्य अन्यस्य वा किमुक्तं वा भवति । किमात्मीयं पतितं गृह्णाति किंवापरकीयं कस्यापि दानार्थमेवं शङ्कासंभवे तस्य प्रायश्चित्तं चत्वारो लघुकाः । अथ निःशङ्कितं परेषां स्यात्तदा चतुर्गुरुकं । एवं शङ्कासंभवतो न गृह्णन्ति तस्मिंश्चागृह्यमाणे इमे दोषाः ।

[भा.३५३५] थिग्गलधुत्तापोत्ते बालगचीराइएहिं अहिगरणं ।
बहुदोसतमाकप्पा परिहानी जा विना तं च ।।

वृ- तत्पतितं यथा लघुस्वकमुपकरणं गृहस्थैर्दृष्टं ततस्ते तत् गृहीत्वाऽन्यस्य छिद्रवतो वस्त्रस्य थिग्गलकं कुर्वन्ति, तथा प्रक्षाल्य पोतकानि वहिकापट्टादिरूपाणि कुर्युर्यदि वा उत्तानशायिनां बालकानां योग्यानि चीवराणि विदधीरन् । इत्येवमादि भिः प्रकारैर्यथा लघुस्वकस्योपकरणाग्रहणे अधिकरणं यदा तु पतिताः कल्पा न गृह्यन्ते । तदा न बहुदोषतमाः प्रभूततमं तेष्वधिकमिति भावः । तच्च उपकरणंविना अन्यद् उपकरणं याचमानस्य परिहानिः सूत्रार्थयोः ये च तृणग्रहणाग्निसेवनादयो दोषास्तेऽपि प्रसजन्ति ।

[भा.३५३६] एते अन्नेय बहू जम्हा दोसा तहिं पसज्जंति ।
आसगणे अंतो वा तम्हा उवहिं न वोसिरए ।।

वृ- एते अनन्तरोदिता अन्ये च यस्माद्बहवो दोषास्तत्र पतिते प्रसजन्ति तस्माद्ग्रामादीनां बहिरासन्ने प्रदेशे अन्तर्वा तमुपधिंन व्युत्सृजेन्नविस्मरणतः पातयेत् । अधुना यः शङ्कानः शङ्कमानो वा न गृह्णाति तं प्रत्युपदेशमाह-

[भा.३५३७] निस्संकियं तु नाउं विच्चुयमेयंति ताहे घेत्तव्वं ।
संकादि दोसविजढा नाउं वप्पंति जस्स नयं ।।

वृ- यदा एतदुपकरणं कस्यापि विच्युतं विस्मरणतः पतितमिति निःशङ्कितं ज्ञातं भवति तदा नियमतो ग्रहीतव्यं । गृहीत्वा च शङ्कादिदोषरहिता मा ममविषये कस्यापि शङ्कास्यादित्यादि दोषवर्जिता यस्य वत् उपकरणं तस्य ज्ञात्वा समर्पयन्ति । एतच्च वद्विषये कर्तव्यं तदाह-

[भा.३५३८] समणुन्नेयराणं वा संजती संजयाण वा ।
इयरे उ अनुवदेसो गहियं पुन घेप्पए तेहिं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- समनोज्ञानां सांभोगिकीनामितरासामसांभोगिकीनां संयतीनां संयतानां वा स्तकमुपकरणं पतितं गृहीत्वा यस्य सत्कं तस्य दातव्यमितरे तु पार्श्वस्थादयस्तेषामयमुपदेशस्तेषां सक्तं पतितं गृहीत्वा यस्य सक्तं तस्मै देयमिति नास्माकमुपदेशोऽधिकरणवप्रवृत्तेस्तैः पुनः पार्श्वस्थादिभिः संविग्नानां विहारिणामेतदुपकरणमिति ज्ञात्वा यत्पतितं गृहीतं तदानीं तं पुनगृह्यते । अत्रैव द्वितीयपदमाह-

[भा.३५३९] बिइय पदे न गेण्हेज्ञा विविंचिय दुगुच्छिए असंविग्गे ।
तुच्छमपयोयणं वा अगेण्हता होय पच्छित्ती ।।

वृ- द्वितीयपदे अपवादपदे न गृह्णीयात् पतितं विविचितं परिष्ठापितमिति कृत्वा जुगुप्सितमशुचिस्थानपतितमिति कृत्वा वा असंविग्नानां वा एतदुपकरणमिति ज्ञात्वा तथा तुच्छं मुखपोतिकादि तदपि कुथित्वादिना कारणेना कारणेनाप्रयोजनमगृह्यातो भवत्यप्रायश्चित्ती ।

[भा.३५४०] अंतोविसगलजुणं विविंचियं तं च दट्ठुनोगिण्हे ।
असुअठाणिविचुत्तं बहुधावालादि छिन्नं वा ।।

वृ- अन्तर्ग्रामादीनां मध्येविसकलं खण्डास्पष्टीकृतं जीर्णं विवेचित्तं परिष्ठापितमिति ज्ञातव्यं तच्च दृष्ट्वा न गृण्हीयात् तथा अशुचिस्थानेऽपि च्युतं बहुधा वा व्यालादिभिः श्वप्रभृतिभिश्छिन्नं न गृह्णीयात् ।

[भा.३५४१] हीनाहियप्पमाणं सिव्वणिचित्तलाविरंगभंगी वा ।
एएहिं असंविग्गो विहित्तिं दट्ठुं विवज्जंती ।।

वृ- हीनाधिक प्रमाणं नागमोक्तप्रमाणोपपन्नं तथा सीवनिकया चित्रलं चित्रं च तत्सीवनिका चित्रलं तथा विविधरंगेण रागद्रव्येण भङ्गिविच्छित्ति तत् विरङ्गभङ्गितद्वा दृष्ट्वा एतैः कारणैरयमसंविग्नानामुपधिरिति ज्ञात्वा विवर्जयन्ति ।

[भा.३५४२] एमेवयबितिय पदे अंतो उवरिं ठविज्जइ इमेहिं ।
तुच्छो अतिजुन्नो वा सुन्ने वीविंचेज्ञा ।।

वृ- एवमेव अनेनैव प्रकारेण एभिर्वक्ष्यणैर्ग्रामादीनामन्तर्द्वितीयपदेन परिष्ठापयेत् पतितं न गृह्णीयात् कैरित्याह-तुच्छो मुखपोत्तिका पादप्रोच्छनादिकः । कुथितत्वादिना अकिंचित्करा यदि वा अतिजीर्णो हस्तेन गृह्यमाणोऽनेकधाविशरारुर्जायते । शून्ये वा विविक्त्ते प्रदेशे पतितो यत्र विस्तरणासंभवस्तत एतैः कारणैः परिष्ठापितः एष उपधिरिति कृत्वा विविच्यात् न गृह्णीयादिति भाव : ।

[भा.३५४३] एमेव य बहियावी वियारभूमीए होज्ञपडियं तु ।
तस्स विउ एस गमो होइ य नेओ निरवसेसो ।।

वृ- एवमेव अनेनैव प्रकारेण ग्रामादीनां बहिरपि विचारभूमौ पतितं भवेत् तस्याप्येव एवानन्तरोदितो गमः प्रकारो निरवशेषो ज्ञेयो भवति । तदेवं सूत्रद्वयं भावितमधुना तृतीय सूत्रभावनार्थमाह-

[भा.३५४४] गामो खलु पुव्वुत्तो दूइज्जंते उ दोन्नि उ विहाणा ।
अब्भंतरगहणेणं दुविहो व उवही ।।

वृ- ग्रामः खलु पूर्वमुक्तस्तस्मादनुकूलोऽन्यो ग्रामोऽनुग्रामो ग्रामश्चानुग्रामश्च ग्रामानुग्रामं समाहारत्वादेकवचनं तत् दूयमानस्य गच्छतस्तस्मिन् गच्छति द्विविधाने ऋतुबद्धे काले गन्तव्यं । तथा पादाभ्यामिति आभ्यां द्वाभ्यां प्रख्या सम्प्रति निर्युक्तिविस्तरः :-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३५४५] पंथे उवस्सए वा पासवनुच्चार माइयंते वा ।
पम्हु सतीहएहि तम्हा मोत्तूणिमे ठाणा ।।

वृ- तत् उपकरणं पथिव्रजतः कथमपि पतेत् ग्रामानुग्रामं वा गच्छन् यत्रोपाश्रये उषितस्तत्र विस्मरणतः पतितं भवेत् । विश्राम्यतो वा क्वचित् पतितं स्यात् । उच्चारं प्रश्रवणं वा कुर्वतः स्यात् पतितं, आचमतो वा विस्मृतमेतैः कारणैर्विस्मरणतः पतनसंभवस्ततो येषु विश्राम्यत उच्चारं प्रश्रवणं वा कुर्वतो दोषा भवन्ति तानीमानि स्थानानि वर्जयेत् । तान्येवाह

[भा.३५४६] पंथे वीसमणनिवेसणादि सो मासो होइ लहुओ ऊ ।
आगंतसंठाणे लहुगा आणादिनो दोसा ।।

वृ- पथि यदि विश्राम्यति निवसति वा आदिशब्दात् ऊर्ध्वस्थितो वा तिष्ठति सुप्तो वा उच्चारं प्रश्रवणं वा व्युत्सृजति तदा सर्वत्र असमाचारी निष्पन्नंप्रायश्चित्तं मासलघु यदि पुनः आगन्तृणां स्थाने सभादौ विश्रमणादि करोति तदा सर्वत्र प्रत्येकं चत्वारो लघुकाः आज्ञादयश्च दोषाः ।

[भा.३५४७] मिच्छत्त अन्नपंथे धूली उ विखनन उ उवहिणो विनासो ।
ते चेवय सविसेसा संकादिविविंचमाणे वी ।।

वृ- स साधुः पथिविश्राम्यति धिग्जातीयाश्चान्ये जातिमदावलिप्तास्तेन पथा समागता भवेयुस्ततः स साधुश्चिन्तयेत् । मा मन्निमित्तमेने उद्वर्तमानाहरितिकायादिविराधनां कार्षुरिति । स साधुः पथ उत्थाय अन्यत्र तिष्ठेत् यत्र च इमे दोषा जानन्त्ये ते श्रमणवादिन आत्मनः सारमतोऽयमस्मान् दृष्ट्वादवृत्त इति तथा साधूनां धिग्जातीयानां पथि दत्तेऽत्र एव तेषामपि गुरवो धिग्जातीयाः प्रधानाश्च एतच्चाभिनवधर्माणः श्रुत्वा दृष्ट्वा वा मिथ्यात्वं प्रतिपद्येरन् । तथा अनपंथेत्ति तं साधुं पथि स्थितं दृष्ट्वा पथिका उद्वृत्या व्रजन्ति । ते चोद्वर्तमाना हरितकायादीनां विराधनां कृर्वन्ति । तथा केचित्तं पथि स्थितं दृष्ट्वा ब्रुवते-अहो निर्लज्जः श्रमणः पन्थानं रुध्वा स्थितः । तच्च श्रुत्वा कोऽप्यसहनः कलहं कुर्यात् ततो युद्धे समापतिते भाजने भेदोऽनागाढादिः परितापना च स्यात् । तथा पादनिक्षेपेण धूल्या उत्खननं भवतीति तेन च उपधेर्विनाशो मलिनत्वभावात् ते एवानन्तरोदितदोषाः सविशेषाः शङ्कादयो विविंचत्यपि उच्चारादि त्यजत्यपि, तथाहि-उच्चारादि पथि कुर्वतो लोकस्य शङ्कोपजायते किमनेन गुदंनिर्लेपितमुत नेति । आदिशद्वात् किमेष स्तेनकः किं चाश्रमणोऽभिचारको हेरिको वा इत्यादि परिग्रहः । एष द्वारगाथासंक्षेपार्थः । साम्प्रतमेनामेवगाथां विवरीषुः प्रथमतो मिथ्यात्वद्वारं विवृणोति-

[भा.३५४८] पंथे न ठाइयव्वं बहवो दोसा तहिं पसज्जंति ।
अब्भुठियत्ति गुरुगा जं वा आवज्जती जत्तो ।।

वृ- पथि साधुना विश्रमणनिमित्तं न स्थातव्यं यतस्तत्र बहवो दोषाः प्रसजन्ति । तानेवाह-साधुना धिग्जातीयानां पथि प्रदत्ते अभ्युत्थिताएते अभ्युत्थानमेतेषां कृतमिति लोकप्रतिपत्तौ तस्य प्रायश्चित्तं चत्वारो गुरुकाः, । यच्चस्वयं दृष्ट्वा यतो वा श्रुत्वा मिथ्यात्वमापद्यते । अभिनवधर्या मिथ्यादृष्टिर्वा गाढतरं मिथ्यात्वमधिगच्छति तन्निष्पन्नं च तस्य प्रायश्चित्तं धिग्जातीयानां चात्मबहुमानसंभवः-

[भा.३५४९] जाणंति अप्पणो सारं एते समणवादिणो ।
सारमेएसि लोगो य मप्पणो न वियाणई ।।

वृ- ये आत्मानं श्रमणमिति वदन्ति ते आत्मनः सारं परमार्थतत्वं जानन्ति यथा अस्मभ्यमेते गरीयांस

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति । यस्त्वेषामयं लोकः स सारमर्थतत्वमात्मनो न विजानाति अविदितपरमार्थत्वान् । गतं मिथ्यात्व।

[भा.३५५०] अन्नपहेण वयंते कायासो चेव वा भवे पंथो ।
अचियत्त संखडादी भाणाइ विराधना चेव ।।

वृ- तं साधुं पथि स्थितं दृष्ट्वा पान्था अन्येन पथा व्रजन्ति तथा च सति काया हरितकायदयो विराध्यन्ते । तथा स एव भवति पन्थास्ततो महान् प्रवर्तनादोषः । तथा पथि स्थितं दृष्ट्वा कस्याप्यचियत्तमप्रीतिरुपजायते ततः स ब्रूते-अहो मुण्डः पन्थानं रुध्वा स्थितः । तस्य श्रुत्वा कोऽप्यसहनोऽसंखडं कलहं कुर्यात् । आदिशब्दात् युद्धमपि । तथा च सति भाजनविराधना । आदिशब्दादनागाढादिपरितापना भावतः शरीर विराधना च । सम्प्रति धूलीउक्खणउवहिविनासो इति व्याख्यानयति ।।

[भा.३५५१] सरक्खधूलीचेयणे पत्थिवाणं विनासना ।
अचित्तरेणुमइलंभि दोसो धोव्वण धोव्वणे ।।

वृ- सह रजसा श्लक्षणधूलिरुपेण वर्तते इति सरजस्का स चासौ धूलिश्च तस्याश्चैतन्यो तस्यां चेतनायामित्यर्थः । पादनिक्षेपेण उत्खनने शरीरादिसंस्पर्शतः पार्थिवानां विनाशनं भवेत् । अथ सोऽचित्तोरेणुस्तर्हि तेनाचित्तेन रेणुना मलिने उपधौ यदि प्रक्षालयति तथापि दोषः प्राणविराधनापत्तेर्वा (ब) कुशत्वसंभवाच्चाप्रक्षालनेऽपि दोषाः । प्रवचनहीलनाद्यापत्तेः अन्यच्च-

[भा.३५५२] वेगाविद्धा तुरंगादी सहसा दुक्खनिग्गहा ।
परम्मुहं मुहं किच्चा पंता ठाणं पणोल्लए ।।

वृ- वेगाविद्धा वेगेनागच्छन्तस्तुरगादय आदिशब्दात् बलीवर्दादिपरिग्रहः सहसा दुःखेन निगृह्यन्ते निवार्यन्ते इति दुःखनिग्रहा निवारयितुमशक्या इति भावतस्तः शरीरविराधना भाजनविराधना च तथा केचित् प्रान्तः पराङ्मुखं कृत्वा पथि स्थितं प्रणुदेयुर्गाथायामेकवचनं प्राकृतत्वात् । प्राकृते हि वचनव्यत्ययोपिभवति । किंच-

[भा.३५५३] पम्हुठमवि अन्नत्था जइत्था कोविपेच्छती ।
पंथे उवरिमम्हुठं खेप्पं गेण्हंति अद्धगा ।।

वृ- पथोऽन्यत्र विस्मरतः पतितमपि यदृच्छया यदि कथमपि कोपिप्रेक्षते, पथि पुनरध्वगा परिभृष्टंक्षिपं गृह्णन्ति तस्मात्पथि न विश्रमितव्यं ।

[भा.३५५४] एवं ठितोवचिठे विसेसतरा भवंति उन्निवणे ।
दोसा निद्दपमायं गते य उवहिं हरंततो ।।

वृ- एवममुना प्रकारेण स्थिते ऊर्ध्वस्थानेनावतिष्ठमाने तथा उपविष्टेदोषा वक्तव्याः । निवन्ने शयाने सविशेषतरा दोषा भवन्ति, तथाहि-पूर्वोक्तास्तावत्तथैव द्रष्टव्या, अन्यच्च शयाने कथमपि निद्राप्रमादं गते उपधिमन्ये पथिकादयो हरन्ति तस्मात्पथि न शयितव्यमिति । सम्प्रति ते चेवयसविसेसा संकादिविविंचमाणेवीत्येतद्व्याख्यानार्थमाह-

[भा.३५५५] उच्चारं पासवणं अनुपंथे चेव आयरंतस्स ।
लहुतोय होइ मासो चाउम्मासो सवित्थारो ।।

वृ- उच्चारं प्रश्रवणं वाध्वगानामनुकूले पथि आचारतोऽसमाचारी निष्पन्नं प्रायश्चित्तं लघुको भवति मासः, । अथ तथोच्चारं प्रश्रवणं वा कुर्वन्तमवलोक्य केचिदन्यं पन्थानं कुर्वन्ति चत्वारो मासा लघुकाः, ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सवित्थारोत्ति यच्च स्त्र्यादिभिः सह संघट्टनादि प्राप्नोति तन्निष्पन्नमपि तस्य प्रायश्चित्तमिति भावः । तथा-

[भा.३५५६] छड्डावणन्नपहो दवासती दुब्भिगंधकलुसप्पे ।
तेनोत्ति वसंकेज्जा आदियणे चेव उड्डाहो ।।

वृ- कोऽपि सखरो राजकुलमान्यः प्रान्तः श्रवणमुच्चारं पथि कुर्वन्तं दृष्ट्वा कोपात्तमेव श्रमणमास्कन्द्य तमुच्चारं छर्दापयेत् । अपरैन्यः पन्था क्रियतेतत्रचोक्तंप्रायश्चित्तं, तथा पथि द्रवाभावे दुरभिगन्ध उच्छलेत् । तत्रापि प्रवचनोड्डाहस्तथा कोऽपि कलुषात्मा शंकेत स्तेनक इति उपलक्षणमेतत् । हेरिकोऽभिचारिको वा इत्यपि शङ्केत । तत आदाने ग्रहणेप्रवचनस्य उड्डाहः तस्मात् पथि विश्रामणादि न कर्तव्यमत्रे-वापवादमाह-

[भा.३५५७] अच्चायव दूरपहे असहूभावेण खेदियप्पावा ।
छन्ने वा मोत्तुपहं गामसमीवे य छन्ने वा ।।

वृ- अतिशयेनातप उष्णं तपति वृक्षाश्च पथो दूरे दर्त्तन्त यथासणपल्लीमार्गं प्रतिपन्नानामेक एवाध्वनि विश्रमणयोग्यो वृक्ष एवमधिकृतेप्यध्वनि विश्रमणहेतुरेक एव वृक्षोऽन्यत्रमाकाशं तेन कारणेन पथ्यपि वृक्षस्यअधस्तात् विश्राम्येत् । असहो नाम नातिदूरे वृक्षाः सन्ति परं तत्र गन्तुं न शक्नोति ततः सोऽपि पथि वृक्षस्याधो विश्रमणं कुर्यात् । अथवा उपधिभारेण खेदितात्मा अतिशयेन परिश्रान्तस्ततः पथ उद्वर्तितुं न शक्नोतीति पथ्येव विश्राम्यति । तदेव पथ उभयोः पार्श्वयो दूरेण वृक्षसंभवे द्वितीयपदमुक्त-मिदानीं समन्ततो वृक्षच्छन्ने प्रतिपादयति- छन्ने वा मोत्तुपहमिति यत्र पन्था उभयोः पार्श्वयोर्वृक्षैः छन्नस्तत्वा वा विभाषायां यदि निर्भयं, न ततः पन्थानं मुक्त्वाऽन्यत्र विश्रमणादि करोति । अथ भयं तदा पथ्येवेति एतद्दूरेऽभिहितं, ग्रामसमीपे पुनर्निर्भयमिति वृक्षच्छन्ने वा पथिय उद्वर्त्य विश्रामणादि करोति ग्रामसमीपे यस्य तस्य वृक्षादेर्देवकुलादेश्छायासंभवात्तेन पुनः साधुना पथः कियद्दूरे उद्वर्तितव्यमत आह-

[भा.३५५८] पंथे ठितो न पेच्छइ परिहरिया पुव्व वन्निया दोसा ।
बिइयपए असतीए जयणाए चिट्ठणादीनि ।।

वृ- तावति दूरे उद्वृत्य स्थातव्यं यत्र पथिकः पथा वृजन् पथि ऊर्ध्वस्थितो वा साधुमुद्वृत्तं न पश्यति । एवं च पूर्ववर्णिता दोषाः समस्ता अपि परिहृताः । द्वितीये पदे अपवादपदे पुनरुद्वर्तने असति उद्वर्तनाभावे पथ्यपि यतनया वक्ष्यमाणया स्थानादीनि करोति स च तथा कुर्वन् तीर्थकराज्ञया प्रवृत्तेः शुद्ध इति, ।

[भा.३५५९] संकट्ठहरियच्छाया असतीए गहितो वहिट्ठितो अत्थे ।
उठे इव अपत्ते सहसा पत्ते ततो पठिं ।।

वृ- संकठो नाम पन्था स उच्यते यो वाट्योरपान्तराले तत्रोद्वर्तनस्यासंभवः अथवा चतसृष्वपि दिक्षु समन्ततो हरितकायः अथवा पन्थानमतिरिच्यान्यत्र सर्वथा च्छाया न विद्यते, । तत एतैः कारणैरुद्वर्त-नासंभवे पथ्येव गृहीतोपकरणो मुहूर्तमात्रमूर्ध्वास्थितो मार्ग एव च्छायायां विश्राम्येत, यदातु पथिकानागच्छतः पश्यति तदा तेषु तं प्रदेशमप्राप्तेष्वेव उत्तिष्ठति । तथा ते जानन्ति पूर्वमेष उत्थित इति । अथ सहसैव ते पथिका अदृष्टा एवं संप्राप्तास्तदा तेषां पृष्टं दत्वा उत्तिष्ठति । तदा ते जानन्ति यथैष आत्मव्यापारेणोत्थित इति । एवं मिथ्यात्वादिदोषाः परिहृता भवन्ति ।

[भा.३५६०] भुंजणपियणुच्चारे जयणं तत्थ कुव्वती ।
उदाहडाय जे दोसा पुव्वं तेसु जतो भवे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- भोजने पाने उच्चारे यतनां तत्र पथि करोति कथमित्याह-उदाहृता ये पूर्वं दोषास्तेषु यतो भवेत् न भवन्ति तथा यतनेति भावः ।

[भा. ३५६१] गंतव्व पलोएउं अकरणिलहुतो उ दोस आणादी ।
पम्हुट्ठो वासट्ठो लहुतो आणादिनो चेव ।।

वृ- विश्रम्य उच्चारं प्रश्रवणं कृत्वा यदा गन्तव्यं भवति तदा सिंहावलोकनेन पश्चादवलोक्य गन्तव्यं । यदिपुनरवलोकनं नकरोति तदा प्रायश्चित्तं तस्य लघुको मासः, । अधिकरणदोषाश्च प्रागुक्ताः कथमपि विस्मरणः पतिते संभवन्ति । आज्ञादयश्च आज्ञाभङ्गादयश्च दोषः तथा यदि कथमपि विस्मरणतः पतितं स्यात्ततस्तग्रहणाय प्रतिनिवर्तितव्यः । यदि मन्यतेकिं तेनेति व्युत्सृजति तदा मासलघुकं आज्ञाभङ्गादयश्च दोषाः । एतदेवाह-

[भा. ३५६२] पम्हुठे गंतव्वं आगमने लहुगो य दोस आणादी ।
निक्कारणंमि तिन्नि उ पोरिसीकारणे सुद्धो ।।

वृ- पम्हुठे कथमपि विस्मरणतः पतिते सिंहावलोकनेन च दृष्टे नियमतस्तदानयनाय पश्चाद्गन्तव्यं । अगमने प्रायश्चित्तं लघुको मासः । अधिकरणदोषाश्च प्रागुक्ता आज्ञादयश्च तथा निष्कारणमिति कारण-स्वाभावो निष्कारणं तस्मिन् यदि नास्तिवर्तमानस्य प्रत्यवाय इत्यर्थः । तदा अवश्यं निवर्तितव्यं तिन्नि उत्तियदि प्रथमायां पौरुष्यां विस्मरणतः पतितं चरमायां च पौरुष्यां स्मृतं तत्र यदि निःप्रत्यवायमन्तरा च वासोऽस्ति यदा निवृत्य गृहीत्वा आनेतव्यमथ सूर्यास्तसमयवेलायां स्मृतं यथाऽमुकं मे विस्मरणतः पतितमिति तदा आद्यान् त्रीन् यामान्-उषित्वा चतुर्थे यामे प्रतिनिवृत्त्यानेतव्यं प्रत्यवायाभावे, कारणे तु प्रत्यवायलक्षणे अनिवर्तमानोऽपि स शुद्धः । एतदेव भावयति-

[भा. ३५६३] चरमाए वि नियत्तइ जइ वासो अत्थि अंतराचसिमे ।
तिन्नि वि जामे वसिउं निवत्तइ निरच्चए चरमे ।।

वृ- प्रथमायां पौरुष्यां विस्मरणतः पतिते तदानयनाय चरमायामपि पौरुष्यां निवर्तते । यदि च सिमे अन्तरावासोऽस्ति । अथ चरमायां दिनपौरुष्यां पतितं तदा रात्रे त्रीन् यामान् उषित्वा चरमे यामे निरत्यये प्रत्यवायाभावतो निर्भये निवर्तते । कारणे शुद्धो इति व्याख्यानार्थमाह-

[भा. ३५६४] दूरं सो विय पुच्छो सावय तेना नदी व वासं वा ।
इच्चाइ कारणेहिं करेंति उस्सग्गमो तस्स ।।

वृ- दूरमतिशयेन गतानां स्मरणपथमवतीर्णः पतित उपधिः सोऽपि वा उपधिरतिशयेन तुच्छः मुखपोतिकादिरुपोऽति जराजीर्णश्चेति भावः । अथवा अपान्तराले व्याघ्रादीनि स्वापदानि स्तेना वा शरीरापहारिण उपकरणापहारिणो वा नदी वापान्तराले वर्ष वा पतति । आदिशब्दात् म्लेच्छभयं वा अशिवं वेत्यादिपरिग्रह इत्यादिभिः कारणैस्तस्य विस्मरणतः पतितस्योपकरणस्य उत्सर्गं वोसिरामित्ति त्रिभणनपूर्वकं परित्यागं करोति । एवं करणे अधिकरणादयो न भवन्ति ।

[भा. ३५६५] एवं ता पम्हुठो जेसिं तेसिं विही भवे एसो ।
जे पुनअन्ने पेच्छे तेसिं तु इमोविही होइ ।।

वृ- एवमुक्तेन प्रकारेण तावत् येषामुपधिर्विस्मरणतः पतितस्तेषामेषोऽनन्तरोदितो विधिर्भवति । ये पुनरन्ये साधर्मिकाः प्रेक्षन्ते तेषामयं वक्ष्यमाणो विधिर्भवति । तमेवाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३५६६] दट्ठु अगेण्हणे लहुगो दुविहो उ विहीउ नायमनातो ।
दुविहा नायमणीया संविग्ग तहा असंविग्गा ।।

वृ- द्विविध उपधिरौधिक औपग्रहिकश्च । तस्य द्वितीयस्यापि पतितस्य दृष्ट्वा अवग्रहणे लघुको मासो ये च पूर्वमुक्ता अधिकरणादयो दोषास्तेऽपि तस्य प्रसजन्ति । सर्व उपधिर्भूयोद्विधा ज्ञातोऽज्ञातश्च । तत्र ज्ञातो नाम येषां स उपधिस्तेषां ज्ञायते अज्ञातोनाम यो न ज्ञायते यथाऽमुक्तस्य सम्बन्धीति । ते ज्ञाता द्विविधा भवेयुः-संविग्ना असंविग्ना वा । योऽपि चोपधिर्येषां सत्कृतया न ज्ञायते तेऽप्यज्ञाता द्विविधाः संविग्रा असंविग्राश्च ।

[भा.३५६७] मोत्तूण असंविग्गे संविग्गाणं तु नयनजयणाए ।
दोवग्गा संविग्गे छब्भंगा नायमनाए ।।

वृ- मुक्त्वा असंविग्रान् किमुक्तं भवति? यो ज्ञायतेऽसंविग्नानामेष उपधिः स न नीयते येस्तु संविग्नानां द्वौ वर्गौ तद्यथा संयताः संयत्यश्च । तत्र संविग्रे एकैकस्मिन् वर्गे षड् भङ्गा ज्ञाते भवन्ति अज्ञाते च वक्ष्यमाणो विधिः । तत्र षड् भङ्गानुपदर्शयति-

[भा.३५६८] संयमे व अन्नपेसे अप्पाहे वावि एय सग्गामे ।
परगामे वि य एवं संजति वग्गेवि छब्भंगा ।।

वृ- यदि ते संयताः संविग्ना इति ज्ञातास्तदा स्वयं वा गन्तुं नयति । अन्यस्य वा हस्ते प्रेषयति संदिशति वा यथा मया स उपधिर्विस्मरणतः पतितो लब्ध इति एवं स्वग्रामे त्रयो भङ्गाः परग्रामेऽपि स्थितानामेते एव त्रयः प्रकाराः षड् भङ्गाः संयतनामेवं संयतीवर्गेऽपि षड् भङ्गाः । तदेवं ज्ञातविषये विधिरुक्तः ।

[भा.३५६९] ण्हाणादि नाय घोसण सोउं गमनं च पेसणप्पाहे ।
पम्हुठे वोसठे अप्पबहु असंथरंतंभि ।।

वृ- यो न ज्ञायते कस्याप्येष उपधिरिति सपरिज्ञाननिमित्ते स्नानादिसमवसरणे घोष्यते । घोषणां च श्रुत्वा केनापि कथिते ज्ञाते येषां स उपधिस्तत्र स्वगं वा गन्तुं नयति । अन्यस्य वा हस्ते प्रेषयति सन्देशयति वा । तथा पम्हुठे विस्मरणतः पतिते व्युत्सृष्टे परित्यक्ते येनानीतस्तस्मिन्नसंस्तरति अल्पबहु परिभाव्य परिभोगोऽनुज्ञातः । एतदेव व्याख्यानयति-

[भा.३५७०] कामं पम्हुठं नो चत्तं पुन भावतो इमम्हेहिं ।
इति बेंति समणुन्ने इच्छा कज्जेसु सेसेसु ।।

वृ- येषां स उपधिर्विस्मरणतः पतितस्तेषामन्तिकं स नीयते नीत्वा वेदं भण्यते । यथार्य युष्माद्विस्मरणातः पतितोऽस्माभिश्चानीतस्ततो गृह्यतामिति एवमुक्ते ते प्राहुः कामं नोऽस्माकं विस्मरणतः पतितमिदमुपकरणं परंभावत इदमस्माभिस्त्यक्तस्त्रिविधं त्रिविधेन व्युत्सृजति तमिति भावः । एवं ब्रुवति उपधिस्ते यदि संभोगिकास्तेन च विना संस्तरति तर्हि स येषां सत्कस्ते परिष्ठापयन्ति । एतेन इच्छाकज्जेसु इति व्याख्यातम् । सम्प्रति सेसेसुत्ति व्याख्यायते शेषा असांभोगिकास्तेष्वपि कार्येष्विच्छा । इयमत्र भावनाअन्यसांभोगिकैरानीते तैश्च प्रतिषेधे यदि यैरानीतस्ते तैन विना न संस्तरति । अन्यश्चोपधिर्दुर्लभो न लभ्यते वा तदा तैः समनुज्ञातं परिभुञ्जते । एतावता अप्पबहुसंथरंतम्मिति व्याख्यातं तदेवं संविग्रानां विधिरीदानीमसंविग्रानामुपधिविधिरुच्यते-

[भा.३५७१] पक्खिगापक्खिगा चेव हवंति इयरे दुहा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संविग्गपक्खगेणेति इयरेसिं न गेण्हती ।।

वृ- इतरे असंविग्ना द्विविधास्तद्यथा संविग्नपाक्षिकाश्चासंविग्न पाक्षिका इत्यर्थः । तत्र यः संविग्न-पाक्षिकस्य सम्बन्धी उपधिस्तं स्वयं वानयति अन्यस्य वा हस्ते प्रेषयति सन्देशयति वा यस्त्वि-तरेषामसंविग्नानामुपधिस्तं पतितं दृष्ट्वा न गृह्णन्ति । अत्रैवापवादमाह-

[भा.३५७२] इयरे वि होज्ज गहणं आसंकाए अनिज्जमाणंमि ।
किह पुन होज्जा संका इमेहिं उ कारणेहिं तु ।।

वृ- इतरस्मिन्नप्यसंविग्नपाक्षिक सम्बन्धिन्युपधावसंविग्नपाक्षिकसम्बन्धित्वे नाज्ञायमाने आशङ्कयाग्रहणं भवेत् । सूरिराह-एभिर्वक्ष्यमाणैः कारणैस्तान्येवाह ।

[भा.३५७३] ण्हाणादो सरणे वा अहवसमावत्तितो गयानेगा ।
संविग्गमसंविग्गा इति संकागेण्हंते पडियं ।।

वृ- जिनप्रतिमास्नान दर्शननिमित्तं आदिशब्दात् सङ्घः प्रयोजनेन वा केनापि समवसरणे मेलापके यदि वा एवमेव समापत्तितो गताः पुरतोऽनेके संविग्ना असंविग्नाश्च । तेषां च गच्छतां कस्याप्युपधे-र्विस्मरणतः पतितः स न ज्ञायते सम्यक् किं संविग्नानां केवलं स्यात् संविग्नानामपीति तं गृह्णाति ।

[भा.३५७४] संविग्गपुराणोवहि अहवाविहि सीवणा समावत्ती ।
होज्ज व असीवितो च्छियइति आसंकाए गहणं तु ।।

वृ- अथवा पुराण संविग्नोपधिः किमुक्तं भवति ? येषां सत्क उपधिः पतितस्ते पूर्वं संविग्ना आसीरन् पश्चादसंविग्नीभूताः स चोपधेः पूर्वसंविग्नसीवनेन सीवितः अथवा असंविग्नैरपि समापत्त्याविधि-सीवनिकया सीवितो यदि वा असीवित एव स भवेत्ततस्तं दृष्ट्वा आशंका भवति किं संविग्नानामुता-संविग्नानां तत आशङ्कयाग्रहणं भवति । सम्प्रति ग्रहणानन्तरविधिशेषमाह-

[भा.३५७५] ते पुन परदेसगते नाउं भुंजंति अहव उज्झंति ।
अन्ने उ परिठवणा कारणभोगो व गीएसु ।।

वृ- तमुपधिं गृहीत्वा येषां संविग्नानां सत्क उपधिस्ते परदेशं गतास्ततस्तान्परदेशं गतान् ज्ञात्वा कारणे समापतिते परिभुञ्जते । अथवा कारणाभावे परिष्ठापयन्ति । एवं कारणैरसंविग्नानमपि पतितमुपधिं गृह्णानो न प्रायश्चित्तभाग् भवति, अथ येषां सत्क उपधिः पतितो गृहीतस्तेषा संविग्ना अप्यन्येऽसांभोगिकास्तेषां देशान्तर गतानामुपधि् गृहीत्वा निष्कारणे परिष्ठापयन्ति । कारणत्ति यदि ते सर्वे गीतार्थानां च तेषामुपधिरस्ति यदि वा तादृश उपधिरन्यो दुर्लभस्तदा एवं कारणे परिभुञ्जते । अथ ते गीतार्थमिश्रास्तदा परिष्ठाप्यते परिज्ञाप्य वा अगीतार्थान् परिभुञ्जते । एतच्चान्यसांभोगिसत्कतया परिज्ञायते, द्रव्यपरिज्ञाने प्रागुक्त एव विधिः-

[भा.३५७६] बिइयपदे न गेण्हेज्जा संविग्गाणंपि एहिं कज्जेहिं ।
आसंकाए न नज्जइ संविग्गाण व इयरेसिं ।।

वृ- द्वितीयपदे अपवादपदे संविग्नानामपि पतितमुपधिमेभिर्वक्ष्यमाणैः कार्यैः कारणैर्न गृह्णीयात् तान्येवाह-न ज्ञायते किमेष संविग्नानामितरेषामसंविग्नानामित्याशङ्कया पतितं न गृह्णाति तथा -

[भा.३५७७] असिवगहियं व सोउं ते वोभयं व होज्ज जइ गहियं ।
उभेण अन्नदेसं व गंतुकामा न गेण्हेज्जा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- येषां ते उपधिस्ते अशिवे गृहीतो येन दृष्टः स नेति प्रथमो भङ्गः । येदृष्टस्तेऽशिवं गृहीता येषां सक्तस्ते न गृहीता अथवा उभयं गृहीतमिति तृतीयः । उभयमपि न गृहीतमिति चतुर्थः । तत्र चतुर्थभङ्गोऽपवादमधिकृत्य शून्यो न भवति । तत्रापवाद इति भावः । तत्र प्रथमभङ्गे न गृह्णाति अशिवोपहतत्वात् द्वितीयेऽपि न गृह्णाति । तदानीं तस्य तैग्रहणादशिवोपहतत्वात् तृतीयेभङ्गे सदृशेऽशिवे कारणेगृह्णाति विसदृशे सोमपुखादिलक्षणे न गृह्णाति । यदि वा अवमौदर्येण देशान्तरं गन्तुकामा न गृहणीयुः ।

[भा.३५७८] अह पुन गहियं पुव्वं नयदिट्ठं जस्स विच्चुयं तं तु ।
पवहावियन्नदेसं इमेण विहिणा विगिंचिज्ञा ।।

वृ- अत पुनर्गृहीतं पूर्वमुपकरणं न च स दृष्टो यस्य सत्कं तदुपकरणं विच्युतं विस्मरणतः पतितं यस्मात्पवनवेगेन धाविताः प्रधाविता अन्यदेशं तदनेन वक्ष्यमाणेन विधिना विवेचयेत् परिष्ठापयेत् ।

[भा.३५७९] दुविहा जायमजाया जाता अभियोगतह असुद्धाय ।
अभियोगादी च्छेत्तुं इयरं पुन अक्खुयं चेव ।।

वृ- सा पारिष्ठापनिका द्विविधा जाता अजाता च । तत्र जातानामअभियोगकृता विषकृता च । तत्राभियोगावशीकरणं । अथवा जाता अशुद्धा सा द्विविधा मूलगुणा अशुद्धा उत्तरगुणा शुद्धा च । तत्र जाता अभियोगकृता विकृता वा मूलगुणा शुद्धा उत्तरगुणा शुद्धा वा सा च्छेत्तुं भेत्तुं वा कर्तव्या इतरत् पुनरुपकरणमभियोगादि दोषरहितमक्षतं चैव परिष्ठापयितव्यम् । अत्र परः प्रश्नं करोति-

[भा.३५८०] पह निग्गया इदानिं विजाणणठाइ तत्थ चोदेइ ।
सुद्धासुद्धनिमित्तं कीरइ चिधं इमं तु तहिं ।।

वृ- पथं निर्गता आदिशब्दादशिवादिभिः कारणैर्निर्गताः परिगृह्यन्ते । तेषां शुद्धाशुद्धनिमित्तं यदत्र प्रागुक्ते विधौ प्रतिपादिते परोऽसहमानश्चोदयति प्रश्नयति पथनिर्गतादीनां पथनिर्गता मार्गप्रतिपन्नाः तेषां परिष्ठापितमिदमिति विज्ञानार्थां तत्रेदं वक्ष्यमाणं चिह्नं क्रियतामिति तदेवाह-

[भा.३५८१] एगादो तिन्निवली वत्थे कीरंति पाए चीराणि ।
छब्भंतु चोदगेनं इति उदिते बेंति आयरिओ ।।

वृ- मूलगुणैरशुद्धे वस्त्रे एकावलिरेकं चक्रं कृत्वा तत् परिष्ठाप्यते मूलगुणैरशुद्धे पात्रे एकं चीवरमेकं प्रस्तरं क्षिप्त्वा तत्परिष्ठाप्यतामुत्तरगुणैरशुद्धे द्वे चक्रे क्रियेयातां, पात्रे द्वे चीवरखण्डे द्वौ वा प्रस्तरौ क्षिप्येयातां, मूलगुणैरुत्तरगुणैश्च शुद्धे वस्त्रे त्रीणि चक्राणि क्रियेरन् । पात्रे त्रीणि चीवराणि त्रयो वा प्रस्तराः क्षिप्येरन् । इति अमुना प्रकारेण चोदकेनोक्ते आचार्यो ब्रूते किं तदित्याह-

[भा.३५८२] सुद्धमसुद्धं एवं होति असुद्धं च सुद्धवायवसा ।
तेनतिदुगेगगंथी वत्थे पायंमि रेहाउ ।।

वृ- एवं युष्मदुक्तप्रकारेण चक्रकरणे वातवशात् शुद्धमपि चक्रैकद्विकभङ्गतोऽशुद्धं भवति । अशुद्धमपि वातवशेन वक्रत्रिकभावतः सुद्धं भवति । पात्रमपि वातवशेन विधिस्तत्र कर्तव्यः । मूलोत्तरगुणशुद्धे वस्त्रे त्रया ग्रन्थयः कर्तव्याः । पात्रे तिस्रो रेखा उत्तरगुणैरशुद्धे वस्त्रे द्वौ ग्रन्थी पात्रे द्वे रेखे मूलगुणैरशुद्धे वस्त्रे एको ग्रन्थिः पात्र एका रेखा ।

[भा.३५८३] अद्धाणनिग्गयादी उवएसाणायण पेसणं वावि ।
अविकोविते अप्पणगं दट्ठे भिन्ने वित्तेय ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अध्वनि मार्गे निर्गता अध्वनिर्गता आदिशब्दात् आशिवादिभिर्या कारणैर्निर्गताः परिगृह्यन्ते। तेषामुपकरणे दग्धे वह्निना भस्मीकृते भिन्ने वा विविक्ते वा विस्मरणतः पतिते वास्तव्यास्तान् अध्वनिर्गतादीन् ब्रुवतेऽस्माकमुद्धरितानि वस्त्राणि न सन्ति। केवलमस्माभिरमुकप्रदेशे परिष्ठापितानी वर्तन्ते। तान्यानीय गृहीथ एवमुक्ते तेऽपि प्राघूर्णका ये गीतार्थास्तान् प्रेषयन्ति, वास्तव्या अपि च तेषां चिह्नानि उपदिशन्ति। यथा गर्तासमीपे तरुसमीपे तडागसमीपे कूपसमीपे इत्यादि। आणयणमिति अथैवं चिह्ने कथितेऽपि स्थानं न जानन्ति यदि वा न ते वास्तव्या ग्लानादिप्रयोजनैर्व्यापृतास्ततः स्वयमानीय प्रयच्छन्ति। ऐसणं वा वित्ति अथवा वास्तव्याः प्राघूर्णकानां देशनं ददति यथा अमुकप्रदेशे वस्त्रादिपरिष्ठापितमस्ति तदमीषां दर्शय अपिशब्दात् यदि ग्लानादिप्रयोजनैर्न व्यापृतास्तदा परिष्ठापिता भावे अन्यत् याचित्वा प्रयच्छन्ति। अविकोविए अप्पाणमिति आनीते परिष्ठापिते कोऽप्यकोविदोऽगीतार्थ उपहतमिति कृत्वा नेच्छेत्। तत्र प्राघूणकैर्वास्तव्यैर्वा तस्यात्मीयं वस्त्रं पात्रं दत्वा इतरत्स्वयं गृहीतव्यम्। अथ तदपि कश्चिदगीतार्थतया न गृह्णीयात्तर्हि तदानीं तं पुनः परिष्ठाप्यते।

[भा.३५८४] अद्धाण निग्गयादीना उपरित्तोवहीविवित्ते वा।
संपड्डुग भंडधारी पेसंती ते वियाणंते ॥

वृ- अध्वनिर्गतादीन् आदिशब्दादशिवादिकारणनिर्गतपरिग्रहस्तान् परितोपधीयान् परिमितोपधीयान् वा विविक्तोपधीन्वा विस्मरणतः पतितौपधीनित्यर्थः। उपलक्षणमेतत् दग्धोपधीन् वास्तव्या ज्ञात्वा कथंभूता वास्तव्या इत्याह-संपाण्डु (दु) गभाण्डधारिणो नामा यावन्मात्रमुपकरणमुपयुज्यते तावन्मात्रं धरन्ति शेषं परिष्ठापयन्ति। ते तान् तथाभूतान् ज्ञात्वा ब्रुवते अस्माकमुद्धरितानि वस्त्राणि न सन्ति। किन्त्वस्माभिरमुकप्रदेशे परिष्ठापितानि वर्तन्ते तानि गत्वा प्रतिगृह्णीतेति एवमुक्ते तथापि प्राघूर्णका जानते गीतार्थान् प्रेषयन्ति कथमित्याह-

[भा.३५८५] गड्डागिरितरुमादीणि काउ चिंधाणि तत्थ पेसंति।
अवियावठा सयं वा आणं तन्नं व मग्गंति ॥

वृ- अत्र प्राघूर्णकप्रेषितान् वास्तव्या गर्तागिरितर्वादीनि चिह्नानि कृत्वा प्रेषयन्ति यदि ग्लानादिभिरव्यापृताः स्वयमानयन्ति परिष्ठापिताभावेऽन्यद्वा मार्गयन्ति। साम्प्रतमविकोविए अप्पणगमिति -

[भा.३५८६] नीयंमि वि उवगरणे उवहमेयं न इच्छई कोइ।
अविकोविए अप्पणगं अनिच्छमाणो विविचंति ॥

वृ- नीतेऽप्युपकरणे कश्चिदविकोविद उपहतमेतदिति कृत्वा नेच्छेत्। तस्मिन्नपिकोविदे आत्मीनं वस्त्रादि समर्प्यते। अथ तदपि नेच्छति तदापरिष्ठापितमानीतं पुनर्विविचन्ति परिष्ठापयन्ति।

[भा.३५८७] असतीए अप्पणाविय झामियदिह वूढपडियमादीसु।
सुज्झति कयपयत्तो तमेव गेण्हं असढभावो।

वृ- येन पूर्वं तत्परिष्ठापितमानीतं तस्य पश्चादुपधिः कथमपि प्रदीपनकेन दग्धः हतो वा तस्करैः पानीयेन वा नद्यादिप्लवेन प्लावितः व्रजतो वा कथमपि विस्मरणतः पतित आदिशब्दात्प्रत्यनीकेनाऽपि वस्त्राणि फालितानि पात्राणि अनेकधाभिन्नानि ततो ध्यामितहतव्यूढपतितादिषूपकरणानि याच्यनीयानि। तेषामसत्यभावे कृतप्रयत्नस्तदेव पूर्वपरिष्ठापितं स्वयं गृह्णानः शुद्धोऽशठभाव इति कृत्वा।

मू. (२०१) *कप्पइ निग्गंथीण वा अतिरेगं पडिग्गहं अन्नमन्नस्सट्ठादूरमवि अद्धाणं परिवेहित्तए*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धारेत्तएवापरिग्गहितएवासोवाणंधारेस्सइ नो से कप्पइ तं अनापुच्छित्ता अनामंति य अन्नमन्नेसिंदाउं वा अनुप्पयाउं वा, कप्पइ से तं आपुच्छिय आमंतिय अन्नमन्नेसिं दाउं वा अनुप्पयाउं वा ।

[भा.३५८८] उवही दुरठाणे साहम्मि व तेन रक्खणा चेव ।
अनवत्तेते उइमं अतिरेगपडिग्गहे सुत्तं ।।

वृ- अनन्तरसूत्रेइदमुक्तं विस्मरणतः पतित उपधिर्दूरादप्यध्वन आनेतव्य इत्युपदेशः कृतो अन्येषां च विस्मरणः पतितं गृहीत्वा दूरेऽपि येषां सत्कस्तेषां दातव्योऽन्यथाऽदाने साधर्मिका चोरिका स्यात् । तत उपधौ दूराध्वनि साधर्मिकस्तैन्यरक्षणेऽनुवर्तमाने इदमप्याधिकृतं सूत्रमतिरेकपतद्रहविषयं दूराध्वाधिकारे साधर्मिकस्तैन्यरक्षणाधिकारेऽभिहितामित्येष सूत्रार्थः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-कल्पते निर्ग्रन्थानां निर्गन्थीनां वा अतिरेकमतिरिक्तं पतद्रहं अन्यस्य अर्थाय इदमविशेषितं वचनंसाधर्मिकस्यार्थायेति द्रष्टव्यं ।धारयितुंवा स्वयं वा परिग्रहितुंसोवाणंधारयिष्यतिइदंविशेषितवचनं अमुको गणी वाचकोऽन्यो वा विशेषनिर्दिष्टः साधुः तस्य भविष्यतीति भावः अहं वा नं धारयिष्यामि ममैव भवीष्यतीति भावः । अन्यो वाणमिति सर्वत्र वाक्यालङ्कारे धारयिष्यति । इदं विशेषितवचनं अमुको गणी वाचकोऽन्यो वा विशेषानिर्दिष्टः । साधुः यस्य कस्याप्यहं दास्यामि न वा से तस्य कल्पते । यस्य विशेषतो निर्दिष्टं अमुकस्य दातव्यं तं अनापृच्छय अनामन्त्र्य वा अन्येषां अन्येषां यदृच्छ्या दातुं वा अनुप्रदातुं वा, कल्पते से तस्य तान् आपृच्छय आमन्त्र्या च अन्येषामन्येषां दातुं वा अनुप्रदातुं वा एष सूत्राक्षरसंस्कारः । अधुना भाष्यकृत् सामान्यविशेषवचनरुपयोरुद्देशनिर्देशयोः स्वरुपमाह-

[भा.३५८९] साहम्मिय उद्देसो होइ इत्थि पुरिसाणं ।
गणिवायगनिद्देसो अमुगगणी वायए इयरो ।।

वृ- साधर्मिक इत्युद्देशी भवति स्त्रीणां पुरुषाणां वामिधानमिति निर्देशः । अथवा गणी वाचक इत्युद्देशः । अमुको गणी अमुको वाचक इतीतरो निर्देशः । सम्प्रति निर्युक्तिविस्तरः-

[भा.३५९०] ऊनातिरित्तधरणे चउरो मासा हवंति उग्धाया ।
आणाइणो य दोसा संघट्टणमादिपलिमंथो ।।

वृ- गणनया प्रमाणेन च ऊनस्यातिरिक्तस्य वा उपकरणस्यधरणे प्रायश्चित्तं चत्वारो मासा उद्घाता लघवः आज्ञादयश्च दोषास्तथा पात्रपरिकर्मणां कुर्वन् तज्ञातान् प्राणान् संघट्टयति आदिशब्दात् परितापयति अपद्रावयति वा ततस्तन्निमित्तमपि तस्य प्रायश्चित्तं तथा प्रतिदिवसमुभयकालं पात्राणि अन्यद्वातिरिक्तमुपकरणं प्रत्युपेक्ष्यमाणस्य परिमन्थः सूत्रार्थव्याघात तस्मात् गणनया प्रमाणेन च सूत्रोक्तमुपकरणं धारायितव्यं । तत्र पात्रमधिकृत्यातिरेकं व्याख्यानयित-

[भा.३५९१] दो पायाणुन्नाया अतिरेगं तइयं-पात्रं च माणातो ।
धारंते पाणकट्टणभारे पडिलेह पलिमंथो ।।

वृ- द्वे पात्रे तीर्थकरैरनुज्ञाते । तद्यथा-पात्रं मात्रं च । यदि तृतीयं पात्रं गृह्णाति तदा गणनयातिरेकं भवति । यच्च प्रमाणं पात्रस्योक्तं ततो यदि बृहत्तरं गृहाति तदा प्रमाणतोऽतिरेकं तत्र गणनया प्रमाणेन वातिरिक्तं पात्रं धारयति । परिकर्मखायां तज्ञातातज्ञातप्रमाणसंघट्टणमुपलणमेतत् । प्राणानां परितापनमपद्रावणं च तथाध्वनि तद्वहने भारः उभयकालं प्रतिदिवसं प्रतिलेखने परिमन्थः ।

[भा.३५९२] चोदेति अतिरेगे जइ दोसा तो धरेइ उभंतु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एक्कं बहूण कप्पइ हिंडंतु य चक्कवालेण ।।

वृ- अत्र परश्चोदयति यद्यतिरेकपात्रे गृह्यमाणेऽनन्तरोक्ता दोषास्ततोऽवमं गणनया हीनं पात्रं धारयतु । यथा यथाऽल्पोपधिता तथा तथा बहुबहुतरगुणसंभवात् । कथं तथा हीनं धारयत्वित्याह-एकं बहूनां पञ्चानां कल्पते ते च पञ्चजनाश्चक्रवालेन एकस्मिन् दिने एको द्वितीये द्वितीय इत्यादिरुपेण हिण्डंतामेतदेव स्पष्टयति—

[भा.३५९३] पंचण्हमेगपायं दसमेणं एक्कमेक्को पारेउ ।
संघट्टणादि एवं न होंति दुविहं च सिंओमं ।।

वृ- पञ्चानां जनानामेकं पात्रं भवतु । तेषां च मध्ये एकैकः क्रमेण चक्रवाललक्षणेन दशमेन पारयतु । यस्य यस्मिन् दिने पारणकं स तत्पात्रं गृहीत्वा हिण्डतामेवं च तेपां परिपाट्यादशमदशमातिक्रमे दिवसे वारके भवति । एवं च संघट्टनादिने दोषा न भवन्ति । किं च तेषां यद्विविधमवमौदर्यं द्रव्यावमौदर्यं पञ्चानामेकस्य पात्रस्य भावात् भावावमौदर्यं च दशमदशमातिक्रमेण पारणात् तत् गुणो भवति ।

[भा.३५९४] आहारे उवगरणे दुविहमेव होति तेसिं तु ।
सुत्ताभिहियं च कयं वेहारियलक्खणं चेव ।।

वृ- द्विविधं द्रव्यभावभेदतो द्विप्रकारमवमं भवति तेषामाहारे उपकरणे च आहारविषयं भावावममुपकरणविषयं द्रव्यावममित्यर्थः । सूत्रे चाभिहितवैहारिकाणां विहारे हितं वैहारिकं तेन गच्छतां लक्षणमल्पोपधिताऽल्पाहारता च तत्कृतं भवति । एतदेवाह-

[भा.३५९५] वेहारियाण मन्ने जहसिं जल्लेणमइलियं अंगं ।
मइलाय चोलपट्टा एगं पायं च सव्वेसिं ।।

वृ- मन्ये यथा अमीषां वैहारिकाणां जल्लेन शरीरोत्थेन मलेनमलिनमङ्गं यथा च मलिनाश्चोपलट्टास्तथा सर्वेषामेकं पात्रं भवति तत एकपात्रग्रहणे वैहारिकालक्षणं कृतं भवति । अत्राचार्य आह-

[भा.३५९६] जेसिं एसुवदेसो तित्थयराणं तु कोविया आणा ।
चउरोय अनुग्घाया नेगे दोसा इमे हुंति ।।

वृ- येषामेषउपदेशस्तैस्तीर्थकाराणामाज्ञा कोपितास्तीर्थकरैः पात्रद्वयस्य प्रत्येकमनुज्ञातात्तेषां च प्रायश्चित्तं चत्वारो मासाः अनुद्घाता गुरवः । यत इमे वक्ष्यमाणा अनेके दोषा भवन्ति तानेवाह-

[भा.३५९७] अद्धाणे गेलन्ने अप्पपर वयायभिन्नमायरिए ।
आदेस बालवुड्ढा सेहाखमगाय परिचत्ता ।।

वृ- अध्वनि ग्लानत्वेन आत्मा परश्च तैस्त्यक्तः । इयमत्र भावना-ये अध्वनिर्गता विस्मरणतः पतितोपधयः स्तेनापहतोपधयो वा भिन्नपात्रा वा तद्विषये आत्मा परो वा त्यक्तो भवति, । यदि तेषां पात्रं ददाति तदा आत्मा त्यक्तः पात्राभावे भिक्षाटनासंभवात्, । अथ न ददाति अध्वनिर्गतास्त्यक्ता अपि बहूनामेषां पात्रमित्युक्तं तत एकेन पात्रेण यदानीतं न तेन बहवोऽध्वनिर्गताः संस्तरेयुः तथा ग्लानविषयेऽप्यात्मापरो वा त्यक्तः स्यात्तथाहि-यदि ग्लानस्य ददाति तत्पात्रं तदात्मा त्यक्तोऽथन ददाति तदापरो ग्लान इति । अन्यस्याध्वनिर्गतानां ग्लानस्य वा तत्पात्रार्पणे स्वयं कुलालभाण्डं याचनीयं स्यात्तद्यानीतं यदिकथमपि भिद्यते तदा तन्मूल्यं दाप्येत कलहादयो वा दोषाः स्युः । वयायत्ति व्रतान्यपि च परित्यक्तानि स्युर्यतः प्रत्येकपात्रग्रहणे एकत्रसंसक्तभक्तं पानं वा गृहीत्वा प्रत्युपेक्षत प्रत्युपेक्ष्यान्यत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्षिपति । बहूनां त्वेकपात्राभ्यनुज्ञाते शीतोष्णानि संसक्तासंसक्तभक्तपानानि गृह्णतः प्राणानां विराधना तथा च व्रतानि परित्यक्तानि । भिन्नत्ति एकं पात्रं कदाचित् भिन्नं स्यात्तदा कुतोऽन्यत्तत्कालं लभ्यतेऽन्यत्र मार्गयतः स एव पलिमन्थदोषः कुलालभाण्डग्रहणे च प्रागुक्ता दोषास्तथा एकपात्रपरिग्रहे आचार्या आदेशाः प्राघूर्णका बालवृद्धाः शिक्षकाः क्षपकाश्च परित्यक्ता यत एकपात्रानीतमेकस्यात्मनो भवति । आचार्यानां किं ददातु कुत्र वा तेषां प्रायोग्यं गृह्णातु ततस्ते एवं परित्यक्ताः ।

[भा.३५९८] दंते तेसिं अप्पा जढो उ अदानं तं जढा जं च ।
कुञ्जा कुलालगहणं वयाजढापाणगहणंमि ।।

वृ- तेषामध्वनिर्गतानां च ददति आत्मा परित्यक्तो भवति । अदाने ते अध्वनिर्गतादयः परित्यक्ता यच्च तेषां पात्रं दत्वा स्वयं कुलालभाण्डग्रहणं कुर्यात् तत्राप्यनेके दोषास्ते च प्रागेव भाविता व्रतान्यपि त्यक्तानि भवन्ति । पानग्रहणे पानग्रहणं भक्तोपलक्षणं संसक्तभक्तपानग्रहण इत्यर्थः । भावना सर्वत्र प्रागेव कृता । पुनरपि परः प्रश्नयति-

[भा.३५९९] जइ होंति दोस एवं तम्हा एक्केक्क धारए ।
सुत्ते य एगभणियं सुत्ते य उवदेसणा वेण्हिं ।।

[भा.३६००] दिन्नञ्जरक्खिएहिं दसपुरनगरं उच्छु घरनामे ।
वासावासठिएहिं गुणनिप्पत्तिं बहुं नाउं ।।

वृ- एवमुक्तप्रकारेण बहुनामेकपात्राभ्यनुज्ञायां दोषा भवन्ति तस्मादेकैकः एकं पात्रं धारयेत् न मात्रकं, युक्तं चैतत् यतः सूत्रेऽप्येकं पात्रमनुज्ञातं तथा चोक्तं । जे निग्गंथे तरुणे बलवं से एगं पायं धरेज्जा नो बीयमिति । ततो ज्ञायते नानुज्ञातं तीर्थकरैर्मात्रकग्रहणं केवलमिदानीमार्यरक्षितैराचार्यैर्दशपुरनगरे इक्षुग्रहनाम्नि उद्याने वर्षावासस्थितैर्बह्वीं गुणनिष्पत्तिं ज्ञात्वा मात्रकस्योपदेशना दत्ता कृता सा च यैः कारणैः कृता तान्युपदर्शयति-

[भा.३६०१] दूरे चिक्खल्लो वुट्ठिकाय सज्झाय जाणपलिमंथो ।
तो तेहिं एस दिन्नो एवं भणंतस्स चउगुरुगा ।।

वृ- ते आर्यरक्षिता आचार्या दशपुरे नगरे नगरात् दूरे इक्षुगृहनाम्नि उद्याने वर्षारात्रं स्थिता मार्गे च कर्दमोऽतिप्रभूतो वर्षं तदप्यतिशयेन प्रभूतं पतति तत्र प्रायोग्ये आचार्यादीनां लभ्यमाने यदि न गृह्यते तदा ते परित्यक्ता भवन्ति । अथ गृह्यते तर्हि कुत्र पानीयं भैक्षं वा गृह्यतामथ नीत्वा प्रत्यागम्यते तदा कायानामप्कायहतिकायानां विराधना स्वाध्यायध्यानानां च परिमन्थो व्याघातस्ततस्तैरेतैः कारणैरेष मात्रकस्योपदेशो दत्तः, सूरिराह-यथोक्तकारणवशादार्यरक्षितैरेव मात्रकोऽनुज्ञातो न तीर्थकरैरिति एवं भणतो वदतस्तव प्रायश्चित्तं चत्वारो गुरुकाः तीर्थकरैरप्यनुज्ञातात् तच्चाग्रे दर्शयिष्यति । यदपि चोक्तम्- जे निग्गंथे तरुणे बलवं से एगं पायं धरेज्जा नो बीयमित्यादि सूत्रम् । तदपि गच्छनिर्गतविषयं न स्थविरकल्पाश्रितं न च तेन कारणजातेनार्यरक्षितैर्मात्रकानुज्ञाकृता तदेवैकं केवलं किन्त्वन्यदपि मात्रकानुज्ञायां कारणकदम्बकमस्ति तदेवाह-

[भा.३६०२] पाणदयखमणकरणे संघाडासति विकप्पपरिहारी ।
खमणा स हु एगागी गेण्हेति ऊ मत्तए भत्तं ।।

[भा.३६०३] थेराणे स विदिन्नो उदोवहि मत्तगो जिनवरेहिं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयरियादीणठा तब्भुवभोगो न इहराउ ।।

वृ- प्राणदयानिमित्तं कोऽपि साधुः क्षपणं कुर्यात् तस्य यः सङ्घाटकः स क्षपणं कर्तुं न शक्नोति न च तस्यान्यः संघाटको विद्यते । ततो यदि त्रयो जनाः संभूय भिक्षामटन्ति तदा जनानां विकल्पो भवति तस्य विपरिहरणाय एकाकि हिंडते सद्धितीयसंघाटकवतः साधोः प्राणदयार्थं क्षपणकरणे संघाटाभावे विकल्पपरिहारी क्षपणकरणसमर्थो भिक्षामेकाकी हिण्डमानः पतद्ग्रहे पानकं गृह्णाति । मात्रकं भक्तं अनेन कारणेन स्थविराणामोघोपधिरुपो मात्रको जिनवरैर्वितीर्णोऽनुज्ञातः औधनिर्युक्तौ तथाभिधानात् । एतेन यदुक्तं तीर्थकरैर्नानुज्ञातो मात्रक इति तन्मिथ्येत्यावेदितमत एव तस्यैवं ब्रुवतश्चतुर्गुरुकं प्रायश्चित्तं तथा तस्य मात्रस्योपभोग आचार्यादीनामाचार्यग्लानप्राघूर्णकबालवृद्धादीनामर्थाय यत्प्रायोग्यग्रहणाय उपलक्षणमेतत् संसक्तभक्तपाने शोधिकरणाय च प्रागुक्तकारणव्यतिरेकेण प्रायेणानुज्ञात इतरथा तूक्तकारणव्यतिरेकेण नानुज्ञात एतद्य परिभाव्य तत आर्यरक्षितौश्चिन्तितं प्रायः प्राणरक्षाय संसक्तभक्तपानविशोधिकरणाय च मात्रकपरिभोगोऽनुज्ञातस्तत्र भूयसां प्राणानामप्कायप्रभृतीनां संसक्तभक्तपानानं च वर्षासमये तत्र आर्यरक्षितैर्वर्षासु मात्रकपरिभोगोऽनुज्ञातः शेषकालं तु लोभप्रसङ्गनिवारणाय प्रतिषिद्धस्तथा चाह-

[भा.३६०४] गुणनिप्पत्ती बहुगी दगमासे होहितित्ति वितरंति ।
लोभे पसज्जमाणे वारेंति ततो पुनो मत्तं ।।

वृ- गुणनिष्पत्तिर्बह्वी दकमासे वर्षारात्रे भविष्यतीति तत्प्रारंभसमये भगवन्त आर्यरक्षिता मात्रकपरिभोगं वितरन्त्यनुजानन्ति । ऋतुबद्धे काले आचार्यादिप्रायोग्यग्रहणलक्षणं कारणमतिरिच्या-न्यत्कारणं समस्ति केवलं लोभ एव प्रसज्यते । तथा हि यत् उत्कृष्टं तत्तल्लोभेन मात्रके गृह्णाति तत इत्थं लोभे प्रसजति तन्निवारणायाचार्यादिप्रायोग्यग्रहणाभावे पुनर्मात्रकं तदा वारयन्ति ।

[भा.३६०५] एवं सिद्धं गहणं आयरियाईण कारणे भोगो ।
पाणदयठवभोगो बितिओ पुन रक्खियज्ञातो ।।

वृ- एवमुक्तप्रकारेण मात्रस्यग्रहणं सिद्धं यतः सूत्रे ओधनिर्युक्त्यादौ आचार्यादीनां कारणे आचार्यादिप्रायोग्यग्रहणेन कारणेन मात्रकस्य भोगोऽनुज्ञातो द्वितीयः पुनरुपभोग आर्यरक्षितात्प्राणदयार्थं प्रवृत्तः कारणाभावे तु मात्रकपरिभोगे प्रायश्चित्तं तदेवाह-

[भा.३६०६] जत्तियमित्ता वारा दिनेन आणेइ तित्तिया लहुगा ।
अठहिं दिनेहिं सपयं निक्कारणमत्तपरिभोगे ।।

वृ- निष्कारणं कारणाभावे मात्रकस्य परिभोगे यावन्मात्रान्वारान् दिवसेनैकेन तेन मात्रेणानयति तावतो लघुका मासास्तस्य प्रायश्चित्तमष्टभिर्दिनैः स्वपदं पुनर्व्रतारोपणं मूललक्षणमष्टमं प्रायश्चित्तमिति भावः ।

[भा.३६०७] जे बेंति घेत्तव्वो न म्मत्तओ जे य तं न धारेंति ।
चउ गुरुगा तेसिं भवे, आणादिविराहणा चेव ।।

वृ- ये ब्रुवते न ग्रहीतव्यो मात्रको ये च तं मात्रकं न धारयन्ति तेषां प्रत्येकं प्रायश्चित्तं भवति चत्वारो गुरुकाः आज्ञादयश्च दोषाः । प्राणविपक्षेः संयमविराधना वा अन्यद्य ।।

[भा.३६०८] लोए होइ दुगंछा वियारपडिग्गहेण उड्डाहो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयरियाई चत्ता, वारत्तथलीए दिट्ठंतो ।।

वृ- यदि येनैव पतद्ग्रहणे भिक्षामटति तेनैव विचारे विचारभूमौ गच्छति तर्हि लोके जुगुप्मायै जायते । तथा च सति भवति प्रवचनस्योड्डाह आचार्यदयश्च मात्रका परिभोगे त्यक्ता अत्रार्थे वारत्तस्थल्या दृष्टान्तः ।

[भा.३६०९] तम्हा उ धरेयव्वो मत्तो य पडिग्गहो य दोन्नते ।
गणनाए पमाणेन य एवं दोसा न होतिए ।।

वृ- यत एवं पात्रस्य मात्रकस्य चाऽधारणे दोषास्तस्मान्मात्रकं पतद्ग्रहश्च द्वावप्येतौ धारयितव्यौ । कथमित्याह-गणनामधिकृत्य एकैकः प्रमाणत ओघनिर्युक्त्यभिहितप्रमाणेन एवं चैते अनन्तरोदिता दोषा न भवन्ति ।

[भा.३६१०] जइ दोण्ह चेव गहणं अइरेगपरिग्गहो न संभवति ।
अह देइ तत्थ एगं हानी उड्डाहगादीया ।।

वृ- यदि द्वयोरेवपात्रत्रकमात्रयोर्ग्रहणं ततो अतिरेकोऽतिरिक्तः पतद्ग्रहो न संभवति तदभावाच्च कथमध्वनिर्गतादीनां पतद्ग्रहं ददाति । देयस्याभावादथात्मीयं तमेकं पतद्ग्रहमध्वगादीनां प्रयच्छति स्वयं तु केवलेन मात्रकेण सारयति तत आह-अथ तयोः पात्रकमात्रकयोर्मध्ये एकं पतद्ग्रहं ददाति तदा द्वितीयस्य हानिरिति येनैव भिक्षामटति तेनैवविचारभूमावपि गच्छतीति लोके जुगुसाप्रसङ्गतः प्रवचनस्योड्डाह आदिशब्दादाचार्यादयश्च तेन परित्यक्ता इति परिग्रहः तस्मादफलं सूत्रमनवकाशादिति आचार्यो ब्रवीति सुत्रनिपातः खल्वयं कारणिकः । किं तत्कारणमिति चेदत आह-

[भा.३६११] अतिरेगदुविहकारण अभिनवगहणे पुराणगहणे य ।
अभिनवगहणे दुविहे वावारिय अप्पच्छंदे य ।।

वृ- द्विविधेन प्रकारेण द्वाभ्यां कारणाभ्यामतिरेकस्यातिरिक्तस्य पतद्ग्रहस्य संभवस्तद्यथा-अभिनवग्रहणेन पुराणग्रहणेन च तत्र य त्तदभिनवग्रहणं तत् द्विविधं द्विप्रकारं तद्यथा-व्यापारिताश्च गृह्णन्ति । आत्मच्छन्दसा च गाथायां सप्तमी तृतीयार्थे प्राकृतत्वात् तच्च द्विविधमप्यभिनवग्रहणमेभिः कारणैर्भवति ।

[भा.३६१२] भिन्ने व ज्झामिए वापडिनीए तेन साणमादिहिते ।
सेहो य संपयासु य अभिनवगहणं तु पायस्स ।।

वृ- प्रमादतो भिन्नं वाग्रेतनं पात्रमग्निना वा ध्यामितं दग्धं प्रत्यनीकेन हृतं अभिन्नं वा स्तेनैः श्वादिभिर्वा हृतमादिशब्देनात्र शृगालादिपरिग्रहः । शैक्षका वा केचिदुपपन्नास्तेषु भाजनानि दातव्यानि एतैः कारणैर-भिनवस्य पात्रस्य ग्रहणं भवति ।

[भा.३६१३] देसे सव्वुवहम्मी अभिग्गही तत्थ होंति सच्छंदा ।
ते स सतिनिजोएज्ञा जे जोग्गादुविह उवहिम्मि ।।

वृ- तत्र तेषां व्यापारितानां स्वच्छन्दसां च मध्ये स्वच्छन्दसो भवन्ति । अभिग्रहिण अभिग्रहिकास्ते चाभिग्रहिका द्विविधा भवन्ति तद्यथा-देशे सर्वस्मिंश्चोपधावुत्पाद्ये किमुक्तं भवतीति एक एवमभिग्रहं प्रतिपन्ना यथा उपधिदेशं पात्रादिकं वयमुत्पादयिष्यामः । अपरे चैवं प्रतिपन्नाः सर्वमुपधिमुत्पा-दयिष्यामः । ते चाभिग्रहिका भाजनैः कार्यमन्येन चोपधिना कार्यमिति कृत्वा (ज्ञात्वा) तदुत्पादनाय अव्यापारिता एव गच्छन्ति । अत एव ते आत्मच्छंदस उच्यन्ते आत्मनैव प्रेरणाभावेनैव उपधेरानयनाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छन्दोऽभिप्रायो विद्यते येषां ते आत्मच्छंदस इति व्युत्पत्तेः । तेषामसत्यभावे ये योग्याः समर्था द्विविधे औधिके औपग्रहिके चोपधावुत्पाद्येतानाचार्यो निर्युक्ते व्यापारयति-

[भा.३६१४] दुविहाच्छिन्नमच्छिन्ना भणंति लघुकोय पडिसुण ते य ।
गुरुवयणं दुरे तत्थउ गहिए गहणे य जं वुत्तं ।।

वृ- आभिग्रहिका अपि आचार्यमापृच्छय पात्राणामानयनाय गच्छन्ति ये वा निर्युक्ता इति द्विविधास्तद्यथा । छिन्ना अच्छिन्नाश्चछिन्नानाम ये आचार्येण संदिष्टा यथा विंशतिः पात्राण्यानयितव्यानि, अच्छिनाना येषां न परिणामनिरोषः तत्र ये तावन्नियुक्तास्तेषां छिन्नानां विधिरुच्यते । तत्र च्छिन्नेषुत्रिभिः प्रकारैरतिरिक्तपतद्ग्रहसंभवः । तत्राद्येऽपि प्रकारे त्रयः प्रकारास्तद्यथा-एकः साधुः छिन्नानां सन्देशं श्रुत्वा तत्रैव समक्षमाचार्यस्य ब्रूते-क्षमाश्रमणा अनुजानीत युष्माकं योग्येषु परिपूर्णेषु पतद्ग्रहेषु लब्धेषु यद्यन्यान्यपि लभेरन् ततस्तान्यपि मम योग्यानि गृह्णन्तु एवं ब्रुवाणः शुद्धः । अथैवमाचार्यं नानुज्ञापयति किन्त्वेवमेतान् व्रजतो ब्रूते तर्हि तस्मिन्नेवं भणति प्रायश्चित्तं लघुको मासः ते चेत् व्रजन्तः प्रतिश्रृण्वन्ति ग्रहीष्याम इति तदा तेषामपि प्रायश्चित्तं प्रत्येकं लघुको मासः । द्वितीयो व्रजतस्तान् सांभोगिकान् दृष्ट्वा ब्रवीति क्व यूयं संप्रस्थितास्तैरवाचिपात्राणामानयनायाचार्येण प्रेषितास्ततस्तान् स ब्रूते-यावन्ति युष्माकं सन्दिष्टानि तावत्सु परिपूर्णेषु यद्यन्यानि यूयं लभध्वं ततोऽस्माकं कारणेन तान्यपि प्रतिगृह्णीत एवं भणति तस्मिन् प्रायश्चित्तं लघुको मासः । ते यदि प्रतिश्रृण्वन्ति तदा तेषामपि प्रत्येकं प्रायश्चित्तं लघुको मासः । तृतीयो लज्जालुतया न शक्नोति स्वयमाचार्यान् विज्ञपयितुं ततोऽन्येन विज्ञपयति । अथवा कोऽपि शठत्वेन अन्येन भाणयति तथा ये ते प्रेष्यन्ते ते ब्रुवते । यूयमाचार्यान् भणत युष्माकं परिपूर्णेषु लब्धेषु यद्यन्यान्यपि लभध्वं तदा मम कारणेन प्रतिगृह्णीत एवं भणति तस्मिन् प्रायश्चित्तं लघुको मासः तेऽपि यदीयः शठत्वेन भणयन्ति तस्य यदीच्छन्ति तर्हि तेषां प्रायश्चित्तं मास लघु । तस्मात्तैर्नेष्टव्यं यथा न भणाम इति लज्जालोर्वचनेन पुनराचार्यं भणति । तत्र यदा तत् समक्षमाचार्यो भणित आचार्येण च समनुज्ञातं तदा यल्लभ्यन्तेऽतिरिक्तं लक्षणयुक्तमयुक्तं वा तत्तस्यैव दातव्यं, द्वितीयं प्रकारमाह-गुरुवयणेत्यादि कोऽपि पथिगच्छतो दृष्ट्वा ब्रूते यथा ममापि योग्यानि भाजनानि गृह्णीत । तत्र यदि प्रत्यासन्नस्तदा तद्वचनं प्रतिग्राह्यं । किमुक्तं भवति-आसन्नप्रदेशात् प्रतिनिवृत्य गुरुः प्रच्छनीयो यथाऽमुकः साधुरेवं ब्रवीति ममाप्यर्थायभाजनानि प्रतिगृह्णीथ । अथवा तमेव त्वमेवाचार्यं विज्ञपय एवं कुर्वत्सु तेषु प्रायश्चित्तं मासलघु । अथ दूरे गतांस्तानसांभोगिकान् दृष्ट्वा ब्रूयुरस्माकमपि योग्यानि भाजनानि गृह्णीत ते ब्रूयुः प्रतिगृहीष्यामः । परं तत्र प्रमाणं गुरवस्तथा चाह-तत्र तु दूरगतानां प्रार्थने सति गृहीते च तद्योग्ये पात्रे गुरवः प्रमाणीकर्तव्याः । तृतीयो विंशतेरधिकं लक्षणयुक्तं पात्रं दृष्ट्वा स्वयं गृह्णाति एवं स्वयं ग्रहणे च यदुक्तं सूत्रे तत्संभवति अतिरिक्तं पात्रं संभवतीति गाथार्थः ।

[भा.३६१५] गिह्णह वी संपाते तिन्नि पगाराउ तत्थ अतिरेगो ।
तत्थेव भणइ एगो मज्झवि गेह्णइ जहाअज्जो ।।

वृ- गृहीतविंशतिपात्राणि इत्युक्ते तत्रातिरेकेत्रयः प्रकारा भवन्ति । एकस्तत्रैवाचार्यमनुज्ञाप्य ब्रूते । ममापि योग्यान्यार्य ! भाजनानि गृह्णीत ।

[भा.३६१६] आयरिए भणाहि तुमं लज्जालुस्स य भणंति ।
नाऊणवसठभावं नेच्छंति हरा भवेलहुगो ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अपरो अन्यं ब्रूते त्वमाचार्यान् भण यथा अमी आचार्येणानुज्ञाता अधिकान्यपि भाजनानि प्रतिगृह्णन्ति । तत्र यो लज्जालुतया आचार्यान् विज्ञपयितुं न शक्नोति तस्य कारणेन भणन्ति चाचार्यान् यदि च शठभावं तस्य ज्ञात्वा आचार्यान् विज्ञपयितुं नेच्छन्ति । इतरथा शठभावेऽपि ज्ञाते यदि विज्ञपयति तद तेषां प्रायश्चित्तं भवति लघुको मासः ।

[भा.३६१७] जइ पुन आयरिएहिं समयेव पडिस्सुयं भवति तस्स ।
लक्खणमलक्खणजुयं अतिरेगं जं तु तं तस्स ।।

वृ- यदि पुनस्तस्य लज्जालोः कारणेनाचार्यास्तस्य समक्षं विज्ञप्ता आचार्यैश्च स्वयमेव तस्य लज्जालोरतिरिक्तपात्रग्रहणं प्रतिश्रुतमङ्गीकृतं तदा यल्लभ्यते अतिरिक्तं पात्रं लक्षणयुक्तमलक्षणयुक्तं वा तत्तस्य दातव्यं । गत एकः प्रकारो द्वितीयं प्रकारमाह-

[भा.३६१८] बितितो पंथे भणंती आसन्ना गंतु विन्नवंति गुरुं ।
तं चेवपेसवंति दूरगयाणं इमे मेरा ।।

वृ- द्वितीयस्तान् पथिदृष्ट्वा भणति ममापि योग्यानि भाजनानि प्रतिगृह्णीत । एवं प्रार्थिता यदि ते आसन्ना वर्तन्ते तदा आगत्य गुरुं विज्ञपयन्ति यथा अमुकं साधुर्वदति मम योग्यानि भाजनानि प्रतिगृह्णीत अथवा तमेव साधुमभ्यर्थयमानं प्रेषयन्ति यथा त्वमेवाचार्यं विज्ञपय । तेषामेव कुर्वतां प्रायश्चित्तं मासलघु । दूरे गतानां पुनरियं वक्ष्यमांणा मर्यादा सामाचारी । तामेवाह-

[भा.३६१९] गेण्हासो अतिरेगं तत्थ पुन वियाणगा गुरु अम्हं ।
देंति तगं वन्नं साहारणमेव ठावेंति ।।

वृ- दूरगतान् सांभोगिकः साधुरवलोक्य ब्रूते अस्माकमपि योग्यं पात्रमाददीध्वम् । ततस्तैरिदं वक्तव्यमतिरिक्तं पात्रं गृहीष्यामस्तत्र पुनर्विज्ञायका अस्माकं गुरवस्तदेव बा अतिरिक्तं पात्रं दास्यंति । अन्यद्वा को जानाति कदाचिदतिरिक्तं पात्रं सुन्दरमिति कृत्वा स्वंय प्रतिगृह्णन्ति यस्य वा इष्टं तस्मै ददति, । एवं साधारणं स्थापयन्ति । उक्तो द्वितीयः प्रकारस्तृतीयमाह-

[भा.३६२०] तइतो लक्खणजुत्तं अहीयं वीसाए ते सयं गेण्हे ।
एए तिन्नि विगप्पा होंति अइरेगस्स नायव्वा ।।

वृ- तृतीयः प्रकारः पुनरयं तेप्रेषिताः साधवो विंशतेरधिकं पात्रं स्वयमेव गृह्णन्ति । एते त्रयो विकल्पा अतिरिक्तस्य पात्रस्य संभवाय ज्ञातव्याः । तदेवं व्यापारितानां च्छिन्नानिगतानि । साम्प्रतमाभिग्रहिकाणां च्छिन्नानि प्रतिपादयितुमाह-

[भा.३६२१] सच्छंद पडिन्नयणा गहिए गहणे य जारिसं भणियं ।
अलंथिर धुवधारणियं सोवा अन्नोयणं धरए ।।

वृ- स्वचछन्दा नाम आभिग्राहिकास्ते अव्यापारिता एवाचार्यानापृच्छय गतास्ते यदि च्छिन्ना संदिष्टास्ततस्तेषामपि सैव सामाचारी या प्राक् व्यापारितानां च्छिन्नानामुक्ता । पडिन्नयणत्ति प्रतिज्ञापना नाम विधिना पात्रादीनां मार्गणा कर्तव्येत्युपदेशदानं उद्गमादिशुद्धानि पात्रादीनि प्रतिग्राह्याणीत्यु-पदेशदानमिति भावः । तदा गृहीते ग्रहणे च यादृशं कल्पाध्ययनपीठिकायां भणितं तादृशं कर्तव्यं । तत्र यावन्ति संदिष्टान्याचार्येण तावन्ति गृहीतानि यदि न केनचित् भणितंपूर्वं यथा ममापि योग्यं पात्रं गृह्णीमो गृहीते स एव ग्राहकश्चिन्तयति । अहमाचार्यानुज्ञातं धारयिष्यापि । यदि वा स एवाचार्यो धारयिष्यति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यो वा साधुर्धारयिष्यति एवमतिरिक्त पतद्ग्रहसंभवः । सम्प्रति ग्रहणे गृहीते च यद्भणितं कल्प-पीठिकायां तदेव विनेयजनानुग्रहाय दर्शयति-

[भा.३६२२] उमंथपाणमादीगहणे तु विहिं तहिं पउंजंति ।
गहिए य पगासमुहे करेति पडिलेह दो काले ।।

वृ- अवमन्थमधोमुखं कृत्वा प्राणादीन् खोटनेन भूमौ यतनया पातयन्ति । अमुं विधिं तत्र ग्रहणे प्रयुञ्जन्ति । गृहीते च तानि पात्राणि प्रकाशमुखानि करोति । तथा द्वौ कालौ प्रातरपराह्णे च प्रत्युपेक्षते ।

[भा.३६२३] आनीतेसु उ गुरुणा दोसुं गहिएसु तो गया जह वुड्ढं ।
गेण्हंति उग्गहे खलु उमादीमत्तसेसेवं ।।

वृ- आनीतेषु तु भाजनेषु आचार्येण प्रधानं सुलक्षणं पात्रं मात्रकं च परिग्रहीतव्यं । ततो गुरुणा द्वयोर्गृहीतयोः शेषाणि भाजनानि यावत्तां दातव्यानि तावन्तो भागाः क्रियन्ते । ततो ये गतास्ते यथा वृद्धं यथा रत्नाधिकतया पतद्ग्रहान् गृह्णन्ति तदनन्तरं ये गतानामेवावमरत्नाधिकास्ते यथा रत्नाधिकतया मात्रकाणि गृह्णन्ति तदनन्तरं यैः पतद्ग्रहा न गृहीतास्ते अवमरत्नाधिकाः शेषाश्च साधवो यथा रत्नाधिकतया मात्रकाणि गृह्णन्ति तदनन्तरं यैः पतद्ग्रहा न गृहीतास्ते अवमरत्नाधिकाः शेषाश्च साधवो यथारत्नाधिकतया पतद्ग्रहान् मात्रकाणि च गृह्णन्ति । तदेवं व्यापारितानां स्वच्छन्दसां विच्छिन्नानि ।

[भा.३६२४] एमेव अच्छिन्नेसु विगहिए गरणे य मोत्तु अइरेगं ।
एत्तो पुराणगहणं वोच्छामि मेहिं उ पदेहिं ।।

वृ- एवमेव पूर्वोक्तेनैव प्रकारेणाच्छिन्नेषु ग्रहीतव्येषु गृहीते च ग्रहणे च विधिरनुसरणीयो मुक्त्वा अतिरेकं भवति अतिरिक्तपतद्ग्रहस्तत्र न संभवति । परिमाणकरणादिति तत्संभवविधिर्न वक्तव्यः । सम्प्रति पुराणग्रहणमेभिर्वक्ष्यमाणैः पदैर्वक्ष्यामि तान्येव पदान्याह-

[भा.३६२५] आगमगमकालगते दुल्लभतहिं कारणेहिं एएहिं ।
दुविहाए गमनेगा अनेगनिद्दिट्ठनिद्दिट्ठा ।।

वृ- आगमद्वारं गमद्वारं कालगतद्वारं दुर्लभद्वारमेतैः कारणैस्तत्र गच्छे पुराणग्रहणसंभवः । तत्र ये पात्राणि ददति ते द्विविधास्तद्यथा-एको वा अनेके वा येषामपि ददाति तेऽपि द्विविधा एको वा नेके वा दानं च निर्देशपूर्वकं यथा अमुकस्य दास्यापि । तत्र यदा एकस्य कस्यापि ददाति तदा तन्निर्दिशति अमुकस्य दास्यामि ये त्वनेके निर्दिष्टा वा अपरिमितसंख्याकतया निर्देशाकारणात् । एष द्वारगाथासंक्षेपार्थः ।

[भा.३६२६] भायणदेसाएंतो पाए घेत्तूण एति दाहंति ।
दाऊण वरो गच्छइ भायणदेसं तहिं घेत्थं (च्छं) ।।

वृ- भाजनदेशात् यस्मिन् देशे भाजनानि संभवन्ति तस्मात् देशादानन्दपुरादवागच्छन् आगन्तुकामः पूर्वकृतानि भाजनानि गृहीत्वा समागच्छति । साधुभ्यो दास्यामीति बुद्ध्यागतमागमद्वारमधुना-गमद्वारमाह-अपरः साधुरानन्दपुरादिकात् देशात् भाजनदेशं गन्तुकामस्तत्रान्यान्यपि पात्राणि गृहीष्यामि सुलभत्वादिति पुराणानि पात्राणि दत्वा समागच्छति । गतं गमद्वारमिदानीं कालगतद्वारमाह-

[भा.३६२७] कालगयंमि सहाए भग्गे वन्नस्स होइ अइरेगं ।
पत्तोलंबतिरेगे दुल्लभपाएविभे पंच ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- कस्यापि साधोः सहायः कालगतः प्रतिभग्नो वा ततस्तस्य पात्रमतिरिक्तं लम्बते इत्यन्यस्य द्वितीयस्य साधोरतिरिक्तं पुराणं पात्रं च भवति। गतं कालगतद्वारमधुना दुर्लभद्वारमाह-दुर्लभानि पात्राणि यस्मिन् देशे स दुर्लभपात्रस्तस्मिन्नपि इमानि वक्ष्यमाणानि पञ्च भाजनानि धारयेत्। तान्येवाह-

[भा.३६२८] नंदिंपडिग्गहविपग्गहे य तह कमढगंविमत्तो य।
पासवणमत्ततो विय तक्कज्ज परुपणा चेव॥

वृ- यस्मिन् देशे पात्राणि दुर्लभानि तत्रेमान्यतिरिक्तानि ध्रियन्ते तद्यथा-नन्दी पतद्ग्रहो विपतद्ग्रहः। कमढकं विमात्रकं प्रश्रवणमात्रकं च तत्कार्यप्ररुपणा चैवं कार्या, नन्दी पतद्ग्रहोऽतिशयेन महान्पतद्ग्रहस्तेनाध्वनि अवमौदर्ये परचक्ररोधे च प्रयोजनं तथा च कश्चित् ब्रूयात् दिने दिने युष्माकमहमेकं पात्रं भरिष्यामि। ततस्तत् नंदीपात्रं भार्यते एतेन कारणेन गच्छोपग्रहनिमित्तं धार्यते, विपतद्ग्रहः पतद्ग्रहात् किञ्चिदूनः स एतदर्थं धार्यते कदाचित्पतद्ग्रहो भिद्येत। अन्यच्च भाजनं तस्मिन् देशे दुर्लभं तत एतेन कार्यं भविष्यति, कमढकः सागारिकरक्षणाय ध्रियते च, तथा कदाचिदेकाकी जायते तत्र च भक्तं पतद्ग्रहे गृहीतं पानीयं मात्रके यत्र च भोजनकं रक्षणार्थमवतीर्णस्तत्र सागारिकास्तोत यत्रैव भुङ्क्ते तथा वसतिर्महती छोतिरिरिति जुगुप्सा क्रियेत्। ततस्तद्रक्षणाय कमढके भोजनं करोति। तथा विमात्रको मात्रकात् मनाक् समधिक ऊनतरो वा तत्र मात्रकः कदाचित् भिद्येतान्यच्च तत्र देशे भाजनं दुर्लभं। तत एतेन प्रयोजनं भविष्यतीति स ध्रियते प्रश्रवणमात्रकोऽपि सागारिकभयेन यतनाकरणाय ग्लानस्याचार्याणां चार्थाय ध्रियते। एषा कार्यप्ररुपणा। सम्प्रति दुविहाएगमणेगा।

[भा.३६२९] एगो निद्दिसएगं एगो अनेगा अनेग एगं वा।
नेगो नेगे ते पुन गणिवसभे भिक्खुखुड्डेय॥

वृ- ये पात्राणि प्रयच्छन्ति ते द्विविधास्तद्यथा-एको वा स्यादनेके वा येभ्योऽपि ददति पात्राणि तेऽपि द्विविधा एको वा स्यादनेके वा। तत्रैको नियमतो,ऽनेके विकल्पतो निर्देशा भवन्ति। अत्र चतुर्भङ्गिका, एको दाता एकंसम्प्रदानं निर्देशति आचार्यस्यमुकस्य वृषभस्य भिक्षोः क्षुल्लकस्य वा दास्यामि एष प्रथमो भङ्गः। एको अनेकान्निर्दिशतीति द्वितीयः। अनेके एकमिति तृतीयः। अनेकेऽनेकानिति चतुर्थः। ते पुनर्निर्देश्याः किं इत्याह-गणी वृषभो भिक्षुः क्षुल्लकश्च, गणी द्विविध आचार्य उपाध्यायश्च। एवमेते पञ्च भवन्ति या अपि स्त्रियो निर्दिशति ता अपि पञ्च तद्यथा-प्रवर्तिनी अभिसेव्वा (च्या) भिक्षुकी स्थविरा क्षुल्लका च। तथा चाह-

[भा.३६३०] एमेव इत्थिवग्गे पंच गमा अहव निद्दिसति मीसे।
वाउं वच्चति पेसेति वा वितिं ते पुन विसेसा॥

वृ- एवमेव अनेनैव संयतगतेन प्रकारेण स्त्रीवर्गे निर्दिश्यमाने पञ्च गमा भवन्ति। अथवा यत्रानेकान् निर्दिशति तत्र मिश्रान् निर्दिशति। संयतानपि निर्दिशतिं संयतीरपि तदेतदागमद्वारेऽभिहितम् सम्प्रतिगमद्वारे वक्तव्यं। तथापि तत्रैव नवरं दत्वा व्रजति प्रेषयति च अग्रेगतः नीते पुनर्विशेषः सचायं नीतानि भाजनाति समो निर्दिशति स समाने वा संयतस्य समानो वर्गः संयतवर्गोऽसमानः संयतीवर्गः अत्र च त एव चत्वारो भङ्गाः। तद्यथा-संयतः-संयतं निर्दिशति, संयतः संयतान्, संयताः संयतं, संयताः संयतान्। एवं समाननिर्दिशे चत्वारो भङ्गाः। एवमसमाननिर्देशेऽपि द्रष्टव्यास्तद्यथा संयतः संयतीं निर्दिशति, १, संयतः संयतीः २, संयताः संयतीं ३, संयताः संयती ४ एवं कालगते प्रतिभग्ने वा सहाये दुर्लभद्वारे च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रष्टव्यम् ।

[भा.३६३१] सच्छंदमनिद्दिठे पावणनिद्दिठमंतरादेंति ।
चउलहु आदेसो वा लहुगा य इमेसि अद्धाणे ।।

वृ- तत्र यदि न निर्दिष्टममुकानां वा दातव्यमिति तदा स्वच्छन्दो यस्मै रोचते तस्मै ददाति, । यदि पुनर्दिष्टं ततो य र्दिशति । एकमनेकान्मिश्रत्वात्तेषां दातव्यम् । एतन्निर्दिष्टे प्रापणं अथ यस्य निर्द्दिष्टं सोऽन्यत्र अन्तरा । अपान्तरालेऽअन्यस्मिन्ऽन्यस्मै ददाति तदा तस्मिन् अन्यस्मै ददाति प्रायश्चित्तं चत्वारो लघुका आदेशो वा अत्र विद्यते, मतान्तरमप्यस्तीति भावः । तदिदं केषांचिन्मतेनान्यस्य दानेऽनवस्थाप्यं तेषां प्रायश्चित्तमति अमीषां वक्ष्यमाणानामदाने चत्वारो लघवः केषामित्याह-

[भा.३६३२] अद्धाण बालवुड्ढे गेलन्ने जुंगिए सरीरेन ।
पायच्छिन्नासकरकन्न, संजतीणं पि एमेव ।।

वृ- अध्वनि वर्तमानानामध्वनिर्गतानामित्यथः । उपलक्षणमेतत् । तेनावमौदर्यनिर्गतानाम-शिवनिर्गतानामन्तरा विस्मरणतः पतितोपधीनां तथा बालस्य वृद्धस्य ग्लानस्य शरीरेण जुङ्गितस्य हीनस्य केनाङ्गेन हीनस्येत्यतआह-पादेनाक्ष्णा नासयाकरेण कर्णेन वा एवमेव संयतीनामप्यदाने प्रायश्चित्तं ।

[भा.३६३३] अद्धाणउम असिवेउ दूढाण वि न देंति जं पावे ।
बालस्सज्झोवाते थेरस्स सतीए जं कुज्जा ।।

वृ- अध्वनिर्गतानामवमौदर्यनिर्गतानामशिवनिर्गतानामुदुढानामन्तरा विस्मरणपतितस्तेना-पहृतोपधीनां यदि न ददाति प्रायश्चित्तं चत्वारो लघवः । यच्च भाजनैर्विना न प्राप्स्यन्ति तन्निमित्तमपि तस्य प्रायश्चित्तं गतमध्वद्वारं । तथा बालस्य उत्कृष्टमात्रकं दृष्ट्वा तद्विषये अध्युपपात उत्कृष्टोऽभिलाषो भवति । भूतेन वा ग्रस्यते, वृद्धस्याप्यदाने चत्वारो लघवः स हि भाजनानि याचितुं न शक्नोति ततोऽदाने यत् अधृत्या प्राप्नोति तन्निष्पन्नमपि तस्य प्रायश्चित्तमापद्यते । गतं बालवृद्धद्वारं च ।

[भा.३६३४] अतरंतस्स अदेंते तप्पडियरगस्स वाविजाहानी ।
जुंगितो पुव्वनिसिद्धो जाति वि देसे यरो पच्छा ।।

वृ- अतरतो ग्लानस्य तत् प्रतिचारकस्य च यदि न ददाति तदा प्रायश्चित्तं त एव चत्वारो लघवः । तथा भाजनमृते प्रतिचारकं वा विना या ग्लानस्य हानिस्तन्निमित्तमपि प्रायश्चित्तं । गतं ग्लानद्वारं, जुङ्गितद्वारमाह-जुङ्गितो द्विविधो जात्या शरीरेण च जात्या असांभोगिक, इतरं छिन्नपादो गतावक्षम इत्यादि । एष द्विविधोऽपि पूर्वमेव प्रतिषिद्धो यथा प्रव्राजयितुं न कल्पते, केवलं यो जातिजुङ्गितः स विदेशे कथमप्यज्ञाततया प्रवाजितः इतरः शरीरेण जुंगतिः प्रव्राजितः सन् पश्चात्स्यात् ।।

[भा.३६३५] जातिए जुंगितो पुन जत्थ न नज्जइ तं हि तु सो अत्थे ।
अमुगनिमित्तं विगलो इयरो जहिं नज्जइ तहिं ।।

वृ- यो जात्या जुंगितो विशेषः कथमप्यज्ञायते इतरः प्रव्राजनानन्तरं पश्चात् शरीरेण जुङ्गितो-ऽत्रामुकनिमित्तमेष विकलो जात इति ज्ञायते तत्र तिष्ठति । अन्यत्र तिष्ठतो लोकानामप्रत्ययो भवति । केचिदेवं मन्यन्ते पारदारकादिभिरपराधैः प्रव्रजितो जुङ्गित्त इति

[भा.३६३६] जे हिंडंता काए हंति जे वि य करेंति उड्डाहं ।
किन्नुहि (नहु) गिहि सामन्ने वियंगिता लोकसंकाऊ ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- ये जुङ्गिता हिण्डमानाः पादादिविकललया कायान् पृथिवीकायप्रभृतीन् ध्नन्ति येऽपि च दृश्यमाना च्छिन्ननासिकादयः प्रवचनस्योड्डाहं यांश्च दृष्ट्वा लोकस्य शङ्कोपजायते यथा किं न हु निश्चितं गृही सामान्ये व्यंगता अमी इति तेषां भाजनानि दातव्यानि अदाने चत्वारो लघवस्तथा हिण्डमाना यत् कायान् ध्नन्ति । यच्च प्रवचनस्योड्डाहकरणं तन्निष्पन्नमपि तस्य प्रायश्चित्तं तथा—

[भा.३६३७] पायच्छिन्नासकरकन्नजुंगिते जातिजुंगिते चेव ।
वोच्चत्थे चउ लहुगा सरिसे पुव्वं तु संमणीणं ।।

वृ- शरीरेण जुङ्गिता पञ्च तद्यथा-छिन्नपादो १ मक्षिकारेण २ वा च्छिन्नकरः ४ षष्ठो जातिजुङ्गितः । तत्र यदि षडपि जुङ्गितास्तत्र भाजनानि च दातव्यानि, अथ सर्वेषामपि भाजनानि न पूर्यंते तर्हि यावतां पूर्यंते तावतामुपन्यस्तक्रमेण दातव्यानि, विपर्यासे, उक्तक्रमव्यत्यासेन दाने प्रायश्चित्तं चत्वारो लघवः । अथ संयताः संयत्यश्च जुङ्गिताः सन्ति तत्र भाजनसंभवे सर्वेषामविशेषेण दातव्यं अथ तावन्ति भाजनानि न पूर्यन्ते, ततः संयतसंयतीसमुदाये च्छिन्नपादादिक्रमेण दातव्यम् । अथ संयतोऽपि छिन्नपादः संयत्यपि च्छिन्नपादा एवं सर्वत्र विभाषा कर्तव्या । तत्राह-सदृशे जुङ्गितत्वे पूर्वं श्रमणीनां दातव्यं पश्चात्सति संभवे संयतानामन्यथा विपर्यासे त एव चत्वारो लघवः ।। सम्प्रति निर्दिष्टस्य दाने विधिमाह—

[भा.३६३८] अह एते उ न हुज्रा ताहो निद्दिठ पायमूलं तु ।
गंतूण इच्छकारं काउं तो तं निवेज्रंति ।।

वृ- अथ एतेऽध्वनिर्गतादयः प्रागुक्ता न स्युस्ततो यस्य निर्दिष्टं तस्य पादमूलं गत्वा इदं पात्रं मयायुष्मन्निमित्तमानीतमिच्छाकारेण गृह्णीत । एवमिच्छाकारं कृत्वा निवेदयति समर्पयति

[भा.३६३९] अद्दिठे पुन तहियं पेसि अहवा वि तस्स अप्पाहे ।
अह उ न नज्रइ ताहे ओसरणे सुं तिसु विमग्गे ।।

वृ- अथ स न दृष्टो यस्य निर्दिष्टं ततो अन्यस्य हस्ते कृत्वा तत्र प्रेषयति । अथवा साधुं श्रावकं वा तत्र व्रजन्तं संदेशयति यथा तव योग्यं पात्रं मयानीतं इच्छाकारेणागत्य गृह्णीत प्रेषयत वा कमपि यो नयतीति । अथ पुनः स न ज्ञायते क्वापि तिष्ठतीति, ततस्त्रिषु क्षुल्लकेषु समवसरणेषु मृगयेत । इयमत्र भावना-अज्ञायमाने समाने समवसरणं साधुमेलापकरुपं गत्वा पृच्छयते यथा अमुकः कुत्र विद्यते तत्र यदि स्वरुपतो न दृष्टो नापि वार्तयोपलब्धस्तथापि द्वितीये समवसरणे पृच्छयते तथाप्यदृष्टेऽनुपलब्धे वा तृतीये पृच्छयते । एवं त्रिषु क्षुल्लकेषु समवसरणेषु मध्ये यत्रैकतरस्मिन् दृष्टस्तत्र तथैव समर्पयति । अथ न दृष्टः केवलमुपलब्धो वार्त्तयां यथाऽमुकस्थाने स तिष्ठतीति स तत्र स्वयं वा नयति । अन्यस्य वा हस्ते प्रेषयति । अथ त्रिष्वपि समवसरणेषु न दृष्टो नाप्युपलब्धस्त आह—

[भा.३६४०] एगे वि महंतंमि उ उग्घोसाऊण नाउ नेइ तहिं ।
अह नत्थि पवत्ती से ताहे इच्छाविवेगो वा ।।

वृ- महति समवसरणे पुनरेकस्मिन्नपि कुत्रामुक इत्युद्घोषणं कृत्वा यदि स्वयं दृष्टस्तत इच्छाकारपुरस्सरं तथैव समर्पयति । अथ वार्तयोपलब्धस्तर्हिं तत्र स्वयं नयति अन्यस्य वा हस्ते प्रेषयति संदेशयति वा अथ तत्रापि न दृष्टो नाप्युपलब्धस्ततो द्वितीयं वारं महत्समवसरणं न गच्छति किन्तु इच्छा स्वयं तत्पात्रं धारयति अन्यस्मै वा ददाति विवेगोवेति परिष्ठापयति वा अथ येषां ददतामेकस्यानेकेषां वा सकाशात् गृहीतव्यं ते किं सांभोगिका उतासांभोगिका एवं प्रश्ने कृते प्रथमत एकानेकप्ररुपणामाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३६४१] एगे उ पुव्वभणिए कारणनिक्कारेण दुविहभेदो ।
आहिंडगउहाणे दुविहा ते होंति एक्केक्क ।।

वृ- एकाकी द्विविधभेदः पूर्वमोधनिर्युक्तौ भणितस्तद्यथा-कारणे निष्कारणे च । पुनः साधवो द्विविधा-आहिण्डका अवधावने च । एकैके द्विविधा भवन्ति वक्ष्यमाणभेदेनेति गाथासमासार्थः । साम्प्रतमेनाभेव विवरीषुः प्रथमतः कारणनिष्कारणैकैकप्रतिपादनार्थमाह-

[भा.३६४२] असिवादीकारणिया निक्कारणिया च चक्कथूभादी ।
उवएस अनुवएसा दुविहा आहिंडगा हुंति ।।

वृ- अशिवादिभिरादिशब्दादवमौदर्यराजद्विष्टादिपरिग्रहः कारणैरेकाकिनः कारणिकाः, चक्रस्तूपादौ आदिशब्दात्प्रतिमानिष्क्रमणादिपरिग्रहस्तेषां वन्दनाय गच्छन्त एकाकिनो निष्कारणिका ये आहिण्डकास्ते द्विविधा भवन्ति तद्यथा उपदेशतोऽनुपदेशतश्च । तत्र ये उपदेशेन ते द्वादशसंवत्सराणि सूत्रं गृहीत्वा द्वादशसंवत्सराणि तस्यैव सूत्रस्यार्थं गृहीत्वा य आचार्यकं कर्तुकामः स द्वादशसंवत्सराणि देशदर्शनं करोति । तस्य व्रजतो जघन्येन संघाटको दातव्यः उत्कर्षेणानियताः साधवः येऽनुपदेशेन देशदर्शनं कुर्वन्ति ते चैत्यानि वन्दिष्यामहे इत्यवधिं कृत्वा व्रजन्ति ।

[भा.३६४३] ओहावंतो दुविहा लिंगे विहारे य होंति नायव्वा ।
एगागी छप्पेते विहारे तहिं दोसु समणुन्ना ।।

वृ- अवधाविनो द्विविधा-लिङ्गेन विहारेण च । लिङ्गेनोत्प्रव्रजितुकामा विहारेण पार्श्वस्थविहारेण विहर्तुकामा भवन्ति ज्ञातव्याः । षडप्येते कारणिंका १ निष्कारणिका २ औपदेशिका ३ अनौपदेशिका ४ लिङ्गेनावधाविनः ५ । विहारेणावधाविनश्च ६ प्रायेणैते एकाकिनो विहरन्ति गच्छन्ति वा औपदेशिका यद्यपि नियमतः ससहायास्तथापि येन गच्छान्निर्गतास्ते न एकाकिनो भण्यन्ते । इतरेऽपि पञ्च यद्यपि वृन्देन हिण्डते तथापि गच्छान्निर्गता एकाकिनः प्रोच्यन्ते । तत उक्तं षडप्येते विहारिण एकाकिनस्तर्हि तेषु षट्सु मध्ये द्वयोः समनोज्ञा द्वयोः सांभोगिकास्तद्यथा अशिवादिकारणिका उपदेशा हिण्डकाश्च तैरानतानि भाजनानि प्रहीतव्यानि, शेषैरानीतानां भजना कारणैगुह्यन्ते निष्कारणे नेति ।

[भा.३६४४] निक्कारणिएसुवदेसिए य आपुच्छिऊण वच्चंते ।
अनुसासंतिओ ताहे वसहा उ तहिं इमेहिं तु ।।

वृ- निष्कारणिकोऽनौपदेशिकश्च यद्यार्यमापृच्छय व्रजति तदा तत्र व्रजते एभिर्वक्ष्यमाणै-र्वचनैर्वृषभा अनुशासति । कैर्वचनैरित्याह-

[भा.३६४५] एसेव चेइयाणं भत्तिगतो जो तवंमि उज्जमती ।
इइ अनुसिठे अठिते अंसंभोगायारभंडंतु ।।

वृ- एष एव चैत्यानां भक्तिगतो भक्तिमुपनतो यस्तपसि द्वादशप्रकारे यथाशक्ति उद्यच्छति एवमनु-शिष्यमानो यदि तिष्ठति ततः सुन्दरं । अथ न तिष्ठति तर्हि यत्तस्य सांभोगिकमुपकरणं तन्निवर्त्यते इतरदसांभोगिकमाचारभाण्डं समर्प्यते । अथ कथमसांभोगिकमाचारभाण्डमुपजातमत आह-

[भा.३६४६] खग्गूडेणोवहयं अमणुन्ने सागयस्स वा जं तु ।
अंसभोगिय उवकरणं इहरा गच्छेतगं नत्थि ।।

वृ- यदुपकरणं खग्गूडेनोपहतं यदि वा यत् अमनोज्ञेभ्योऽसांभोगिकेभ्य आगतस्योपसंपन्नस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संबन्धि तत् असांभोगिकमुपकरणमाचारभाण्डमितरथा प्रकारद्वयव्यतिरिक्तेनान्येन प्रकारेण तकत् असांभोगि-कमुपकरणं गच्छे नास्ति न संभवति ।

[भा.३६४७] तिठाणे संवेगो सावेक्खो निवत्तो तद्दिवससुद्धो ।
मासोवुच्छविवेचण त चेव नुसठिमादीणि ।।

वृ- तस्य गच्छान्निर्गतस्य कदाचिन्निभिः स्थानैः संवेगः स्यात् । गाथायां सप्तमी प्राकृतत्वात् । एकवचनं समाहारत्वात् । तद्यथा-ज्ञानेन दर्शनेन चारित्रेण च । ततः संवेगसमापन्नः सापेक्षः प्रतिनिवर्तते । स च यदि तस्मिन्नेव दिवसे गच्छं प्रत्यागतस्तर्हि शुद्धः अथ मासं यावद्बहिरुषितस्तदा तदेव तदुपकरणस्य विवेचनं प्रायश्चित्तदानमनुशिष्ट्यादीनि च क्रियन्ते आदिशब्दादुपबृंहणादिपरिग्रहः ।

[भा.३६४८] अज्जेव पडिपुच्छं को दाहिइ संकियस्स मे उभए ।
दंसणे क उववूहे कं थिरकरे कस्स वच्छल्लं ।।

[भा.३६४९] सारेहिंति सीयंतं चरणे सोहिं च काहिति को मे ।
एवं नियत्तनुलोमं काउं उवहिं च तं देंति ।।

वृ- अद्यैव उभयस्मिन् सूत्रे अर्थे च शङ्कितस्य कः प्रतिपृच्छां दास्यति एषा ज्ञाने चिन्तना, । दर्शने कमहमिदानीमुपबृंहिष्यामि कं वा स्थिरीकरिष्यामि कस्या वा वात्सल्यमधुना करिष्यामि । चारित्रे चिन्ता मां चरणे सीदन्तमिदानीं कः सारयिष्यति । को वा मे प्रायश्चित्तस्थानमापन्नस्य शोधिं करिष्यति एवं चिन्तयन् संवेगमापन्नः ।; सम्प्रति निवर्तते तस्य प्रतिनिवृत्तस्य गच्छं प्रत्यागतस्यानुलोमना कर्तव्या धन्योऽसि त्वं येनात्मा प्रत्यभिज्ञात एवमनुलोमनां कृत्वा तस्य तमेवोपधिं प्रयच्छन्ति ।

[भा.३६५०] दुविह उहाविओ वसमा सारेंति भयाणि वा से साहिंति ।
अठारसठाणाइं हयरस्सिगयं कुसनिभाइं ।।

वृ- द्विविधमप्यवधाविनमाचार्यमापृच्छय व्रजन्तं वृषभाः सारयन्ति शिक्षयन्ति भयानि वा से तस्य साधयन्ति कथयन्ति रतिवाक्यचूलिकाभिहितानि अष्टादशस्थानरुपाणि हयरश्मिगजाङ्कुशनिभानि । एतया अनुशिष्ट्या अनुशासितो यदि तिष्ठति ततः सुन्दरमथ न तिष्ठति तर्हि यत् खग्गूडेनोपहत-माचारभाण्डं यद्वा असांभोगिकेभ्यः समागतस्योपसम्पन्नस्य सम्बन्धि तस्य दीयते अग्रेतनं तु सांभोगि-कमुपकरणं निवर्त्यते ।

[भा.३६५१] संविग्गमसंविग्गे सारुवियसिद्धपुत्तमनुसठे ।
आगमनं आनयनं तं वा घेत्तुं न इच्छंति ।।

वृ- संविग्नाः सांभोगिकाः असांभोगिका वा उद्यतविहारिणः असंविग्नाः पार्श्वस्थावसन्नकुसील-संसक्तयथाच्छन्दाः सारुपिकसिद्धपुत्रो नाम मुण्डितशिखो रजोहरणरहितोऽलावुपात्रेण भिक्षामटन् सभार्यो वा एतैरनुशिष्टस्य यदि आगमनं तत उपहतोपकरणस्य वा प्रायश्चित्तदानं ते वा संविग्नादयो गृहीत्वा तस्यानयनं कुर्वन्ति । अथ स आनयनं नेच्छति तदा वक्ष्यमाणो विधिः । एष गाथासंक्षेपार्थः ।

[भा.३६५२] संविग्गाण सगासे वुच्छो तेहिं अनुसासिय नियत्तो ।
लहुतो ना वा हम्मत्ति इयरे लहुगा उवहतो य ।।

वृ- यदि संविग्नानां समीपे उषितः तैश्चानुशिष्टः प्रतिनिवृत्तो वसतिं समागतः तदा तस्य प्रायश्चित्तं लघुको मासः । न च तस्योपधिरुपहन्यते यं चान्तरा लभते गृह्णाति चोपधिं सोऽपिनोपहन्यते संविग्नानां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समीपे उषितः संविग्न सहागमनाद्य । इतरे नाम असंविग्नाः पार्श्वस्थादयः सारूपिकसिद्धपुत्रश्च तेषां समीपे यद्युषितस्तैश्चानुशिष्टः प्रतिनिवृत्तः तस्यागतस्य प्रायश्चित्तं चत्वारो लघव उपकरणं च तस्योपहन्यते । यथाच्छन्दस्य सकाशे उषितस्य चतुर्गुरुकसम् । साम्प्रतमागमनद्वारमाह-

[भा.३६५३] संविग्गादनुसिट्ठो तद्दिवसनियत्तो जइवि न मिलेज्जा ।
न य सज्जइ वइयादिसु चिरेण विहुतो न उवहम्मे ॥

वृ- संविग्नैरादिशब्दादसंविग्नैश्चानुशिष्टो यदि त नोषितः किन्तु तस्मिन्नेव दिने प्रतिनिवृत्तो यद्यपि तस्मिन्नेव दिने न मिलति न च प्रव्रजिकादिषु सजति ततश्चिरेणाप्यागच्छतो हु निश्चितं तस्योपकरणं नोपहन्यते आनीयमानस्य तूपहन्यते । एतदेवाह-

[भा.३६५४] एगानियस्समुवणे मासो उवहम्मते य सो उवही ।
तेन परं चउ लहुगा आवज्जइ जं च तं सव्वं ॥

वृ- बलादानीयमान एकाकी समागच्छन् यदि रात्रौ स्वपिति तदा तस्यैकाकिनः स्वप्ने प्रायश्चित्तं लघुको मासः उपधिश्च तस्योपहन्यते । अथ तस्माद् दिवसात् परमपि लगति तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः । अथ व्रजिकादिष्वपान्तराले सजति यच्च तत्र प्राप्नोति तन्निष्पन्नं सर्वं तस्य प्रायश्चित्तमापद्यते ।

[भा.३६५५] संविग्गेहणुसिठो भणेज्ज जइ हं इहेव अच्छामि ।
भणति ते आपुच्छसु अनिच्छ तेसिं निवेयंति ॥

[भा.३६५६] सो पुन पडिच्छतो वा सीसे वा तस्स निग्गतो हुज्जा ।
सीसं समणुन्नायं गेण्हंतियरंमि भयणा उ ॥

वृ- संविग्नैरनुशिष्टो यदि ब्रूते अहमिहैव युष्माकं समीपे तिष्ठामि तदा स प्रष्टव्यो येषां समीपात्त-मागतस्तस्य शिष्यो वा त्वं भवति प्रातीच्छिको वा । तत्र यदि शिष्यस्तर्हि भण्यते-तान् आत्मीयान् आचार्यानापृच्छय स्वमुत्कलापय अथ स आप्रच्छनं नेच्छति तर्हि तेषां निवेदयन्ति । यथा यौष्माकीण शिष्योऽस्माकं पार्श्वे समागतो वर्तते स बहुधानुशिष्टः । परं प्रतिनिवर्तितुं नेच्छति किन्तु ब्रूते अहं युष्माकं पार्श्वे स्थास्यामि । एवं निवेदने कृते यदि ते समनुजानन्ति ततः प्रतीच्छन्ति । अथ नानुजानन्ति ततो न प्रतीच्छन्ति इतरो नाम प्रातीच्छिकस्तस्मिन् भजना । तामेव प्रतिपादयति-

[भा.३६५७] उद्दिठमनुद्दिठे उद्दिट्ठसमाणियंमि पेसंति ।
वायंति वणुन्नायं कडे पडिच्छंति उ पडिच्छं ॥

वृ- तस्य प्रातीच्छिकस्य प्रथमतः प्रश्नेन परिभाव्यते । किमेतस्य श्रुतस्कन्धादिकमुद्दिष्टमस्ति किं वा नेति । तत्र यद्युद्दिष्टं तदपि वा परिसमापतितं तदा न प्रतीच्छन्ति । किन्तु तेषामेव समीपे प्रेषयन्ति । तत्र यदि समनुजानन्ति यूयमेवैनं वाचयत । तदा तैः समनुज्ञातं वाचयन्ति अन्यथा न प्रतीच्छन्ति । अथोद्दिष्टश्रुतस्कन्धादिपरं कृतं समाप्तिं नीतं तदाकृते श्रुतस्कन्धादौ तं प्रतीच्छकं प्रतीच्छन्ति । अथ न किमप्युद्दिष्टमस्ति तदापि तमागतं प्रतीच्छन्ति । एष विहारेणावधावी भणितः ।

[भा.३६५८] एवं ताव विहारे लिङ्गोहावी वि होइ एमेव ।
सो किं तु संकिमसंकी संकिविहारे य एग गमो ॥

वृ- एवमुक्तेन प्रकारेण विहारे विहारावधावी उक्तो लिङ्गावधाविन्यप्येवमेव भवति स पुनर्लिङ्गावधावी द्विधा-शङ्की अशङ्की च । शङ्की नाम यस्यैवं संकल्पो यदि मम स्वजना जीविष्यंति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि वा तत्साधारणं धनमविनष्टं स्यात् यदि वा मां ते वदिष्यन्ति, निष्कामेति तदा उन्निष्क्रमिष्यामि, यदि पुनस्ते स्वजना मृता भवेयुस्तदा साधारणं विनष्टं न वा कश्चिन्मां वदेत् उन्निषअखामेति तदा पार्श्वस्थादिविहारमभ्युत्थास्यामि एवं संकल्पं कुर्वन् शङ्की । एवंरुपसंकल्पविकलोऽशङ्की । तत्र शङ्किनि लिङ्गावधाविनि विहारे च विहारवधाविनि एक एव गमः । किमुक्तं भवति ? यत् विहाराधाविन्युक्तं तत् लङ्गावधाविन्यपि शङ्किनि वक्तव्यमिति ।।

[भा.३६५९] संविग्गमसंविग्गे संकमसंकाए परिणए विवेको ।
पडिलेहणनिक्खिवणं अप्पणो अवाए अन्नेसिं ।।

वृ- स शङ्कि अशङ्की वा पथि अनुशिष्यमाणो यदि संविग्नेऽसंविग्ने वा परिणतो भवति वसति वा, तदा तस्योपकरणमुपहतमिति तस्य विवेकः कर्तव्यः । अथ स गतश्चिन्तयति एतदुपकरणं तेषामेव दास्यते मम वा भविष्यति तदा निष्कामतो वा उभयकालं प्रतिलेखयतो यतनया विनिक्षिपतस्तदुपकरणं नोपहन्यते । प्रत्यागच्छन्पुनर्यदि व्रजिकादिषु सजति तत उपहन्यते । अथ न सजति नोपहन्यते इति गाथासंक्षेपार्थः । सम्प्रत्यस्या एव विवरणमाह-

[भा.३६६०] घेत्तुण गारलिंगं वती व अवतीव जो उ ओहावी ।
तस्स कडिपट्टदाणंवत्थुं वासज्ज जं जोग्गं ।।

वृ- यो लिङ्गेनावधावी स द्विविधोऽगारलिंगं वा गृहीत्वा व्रजति स्वलिङ्गसहितो वा । तत्र योऽगारलिङ्गं गृहीत्वाऽवधावति तस्यैव विधिः पथि व्रजन् केनाप्यनुशिष्टो यदि निवर्तते उपतिष्ठते च मां प्रव्रजयेति तदा तस्य मूलं दीयते । स पुनरनगारलिङ्गं गृहीत्वा संप्रस्थितो व्रती वा स्यादव्रती वा अनुव्रतानि वा गृहीत्वा व्रजति वासन् इत्यर्थः । तस्योभयस्यापि कटीपट्टको दातव्यो वस्तु वासाद्य यद्योग्यं तद्दातव्यम् । किमुक्तं भवति मा प्रद्वेषं यायात् दारुणस्वभावो वा तत उपरि प्रावारणमपि दीयते । अथवा राजादिः प्रव्रजितस्तस्य सुन्दरे द्वे वस्त्रे दातव्ये । तदेवमगारलिङ्गावधावी भणितः । सम्प्रति स्वलिङ्गावधाविनमधिकृत्याह-

[भा.३६६१] जइ जीविहिंति जइ वा बिंति धनं धरति जइ व वोच्छंति ।
लिंगं मोच्छिति संका, पविट्ठवुच्छेव उवहम्मे ।।

वृ- स्वलिङ्गेन योऽवधावति स द्विधाशंङ्की शङ्की च । तत्र अशङ्की एवं संकल्पयति-यदि मम ते स्वजना जीविष्यन्ति यदि वा तत्साधारणं धनं धरते विद्यते वा मां वक्ष्यपि लिङ्गं मुञ्च उन्निष्क्रामेति तदा उन्निष्क्रामिष्यामि इत्येवं शंकावान् पथि केनाप्यनुशिष्टः सन् संविग्नानामसंविग्नानां वा उपाश्रये प्रविशति तदा तस्योपकरणमुपहन्यते तदेवं सशङ्कलिङ्गावधावी उक्तः ।। सम्प्रति निःशङ्कं लिङ्गावधावी भण्यते । निःशङ्को नाम य एवं संकल्पयति अवश्यतया उन्निष्क्रमितव्यमिति तस्य विधिमाह—

[भा.३६६२] समुदाने चारिगाण व भीतो गिहिपंत तवकरणं वा ।
न उवधिसे तेनो पविट्ठवुच्छेदितवहम्मे ।।

वृ- समुदानं भैक्षं तस्य भयेन किमुक्तं भवति यद्यहमिदानी लिङ्गं मोक्ष्यामि ततो न कोऽपि मह्यं दास्यति, । किन्तु मामुत्प्रव्रजितुं दृष्ट्वा मध्ये निलीना भविष्यन्ति ततः समुदानभयेन चारिकास्तेषां वा भयेन अथवा अन्तरा गृहस्थप्रान्ताः संयतभद्रकाः स्तेनास्तेषां वा भयेन उपधिं नीत्वा तेनोपधिना युक्तः स संविग्नानामसंविग्नानां उपाश्रय उपविष्ट उषितो वा तथापि प्रत्यगच्छतस्योपधिर्नोपहन्यते तेनाप्युपधिना समन्वितः स भावतो गृहस्थ इति कृत्वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३६६३] नीसंको वणुसठो नेहुवहिमहं खु उहाभि ।
संविग्गाणि य गहणं इयरेहिं विजाणगा गेण्हे ।।

वृ- वाशब्दो विकल्पान्तरे निःशङ्को व्रजन् संविग्नैरसंविग्नैर्वाऽनुशिष्टो यथा यदि त्वमुन्निष्क्रमिष्यसि किमुपधिं नयसि ततः स ब्रूते । अमुमुपधिं तेषां समीपं नयत अहं खु निश्चितमवधाविष्यामि । तत्र यदि संविग्नानां हस्ते प्रेषयति तदा तैरानीतस्य ग्रहणमथागीतार्थानां हस्ते प्रेषयति तदा तैरितैरानीतं यदि सर्वे गीतार्थास्ततो गृह्णन्ति परिभुञ्जते च, अथागीतार्थमिश्रास्तदा कारणिकानामेकाकिनां व्रजतां ददति परिष्ठापयन्ति वा ।

[भा.३६६४] नीसंकितोवि गंतूण दोहिं वि वग्गेहिं चोदितो एति ।
तक्खणनिंत न हम्मेतेहिं परिणयसुच्छ उवहम्मे ।।

वृ- निशङ्कितोऽपि गत्वा यदि द्वाभ्यां वर्गाभ्यां संविग्नैरसंविग्नैर्वा इत्यर्थः । चोदितोऽनुशिष्टः सन् तेषामुपाश्रयात् यदि तत्क्षण्मेव निर्गच्छति तदा तस्योपधिर्नोपहन्यते । अथ तत्क्षणं न निर्गच्छति वसति वा तदा उपहन्यते । अथवा यदि तस्यैवं परिणामो जायते अत्रैव तिष्ठामि तदापि तस्य तत्र परिणतस्योपधेर्घातः । ततस्तस्योपधिः कथमप्यागतइति कृत्वा परिष्ठाप्यते । सम्प्रति पडिलेहणनिक्खवणप्पणोट्ठाए अन्नेसिम् इत्यस्य व्याख्नमाह-

[भा.३६६५] अत्तट्ठा परट्ठा वा पडिलेहिय रक्खितो वि उ न हम्मे ।
एवं तस्स उ नवरि पवेस वइयासु भयणा ।।

वृ- स गतः सन् यदि चिन्तयति तेषामेवमुपकरणं दास्यते । अथवा मम भविष्यति एवमात्मार्थं वा उभयकालं प्रत्युपेक्षितो निरुपद्रवस्थाननिक्षेपणेन च रक्षितोऽपिशब्दः प्रागुक्तापेक्षया समुच्चये तुरधारणे भिन्नक्रमे च नैव हन्यते नवरं केवलं प्रत्यागच्छतो व्रजिकादिषु प्रवेशे भजना । किमुक्तं भवति ? सं प्रत्यागच्छन् यदि व्रजिकादिषु सजति तदोपहन्यते अथ न सजति नोपहन्यते ।

[भा.३६६६] अह पुन तेनुक्जीवितो सारुविय सिद्धपुत्तलिंगीणं ।
केइ भणंतु वहं मति चरणाभावातो तन्न भवे ।।

वृ- अथासौ अनुशिष्टोऽपि न प्रतिनिवृत्तः किं तु तेन लिङ्गेनोपजीवति भिक्षादि किमित्येवं शीलमुपजीवी सारुपिकत्वेन सिद्धपुत्रत्वेन वा स्थित इत्यर्थः । सारुपिको शिरो मुण्डो रजोहरणरहितो अलाबुपात्रेण भिक्षामटति सभार्योऽभार्यो वा, सिद्धपुत्रो नाम सकेशो भिक्षामटति वा न वा वराटकैः विटलकं करोति यष्टिं धारयति तस्य प्रत्युत्थितस्य यः पूर्व उपधिर्यच्च सारुपकत्वेन सिद्धपुत्रत्वेन वा तिष्ठता यदुत्पादितं तदुपहन्यते न वा तत आह : केचिद्भणन्ति सारुपिकसिद्धपुत्रलिङ्गनामुपकरणमुपहन्यते तन्न भवति कुत इत्याह-चरणाभावादुपहननमनुपहननं वा चरणवतामुपधिर्न च सारुपिकसिद्धपुत्रलिङ्गिनश्चरणवन्तः ।।

[भा.३६६७] सो पुन पच्छुट्ठितो जइ तं से उवहयं तु उवकरणं ।
असतीयवतो अन्नं उग्गोवेतिति गीयत्थो ।।

वृ- स पुनः प्रत्युत्थितो यदि तस्योपकरणमुपहतमथवा नास्ति तर्हि गीतार्थोऽन्यमुपधिमुद्गमयन् एति आगच्छति । कुत्र कुत्र स्थाने उत्पादयन् आगच्छतीत्याह-

[भा.३६६८] संजयभावियखेत्ते तस्स असतीए उ चक्खुवितिहवे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्स असती वेंटलहए, उप्पाएंतो उ सो एइ ।।

वृ- संयतभावितक्षेत्रं नाम यत्र क्षेत्रे संयतत्वेन स्थितस्तस्मिन् संयतभावितक्षेत्रे उत्पादयन् तस्यासत्यभावे चक्षुर्विटिहते दृष्ट्वा परिचिते तस्याप्यभावे विण्टलहते विंटलहतं नाम यत्र पूर्वं विण्टलैराहारोपधिशय्या उत्पादितास्तस्मिन् उत्पादयन् गच्छति ।

[भा.३६६९] जाणंति एसणं वा सावगदिट्ठी उ पुव्व झुसिया वा ।
विंटल भाविय तेणिंह, किं धम्मो न होइ गेण्हेज्जा ।।

वृ- स च उत्पादयति उत्पादनैषणादोषैर्विशुद्धं तांश्च दोषान् तेभ्यः कथयति । यदि वा संयतत्वेन विहतो दृष्ट्वा वा पूर्वं झुषिताः पचितास्ते श्रावकास्ते च ते एव दोषान् जानन्ति । ततो दोषविशुद्धं प्रयच्छन्ति । यच्च विष्टलहतं क्षेत्रं तत्र गीतार्थो यदि उत्पादयति तदादितः प्रतिब्रूते नाहमिदानीं वेण्टनं करिष्यामि यद्येवमेव ददध्वे ततः प्रतिगृह्णामि । एवमुक्त्वे यदि ते ब्रूवते किं युष्माकं मुधा दत्तेन भवति तस्माद्धर्म इति दद्मस्ततो गह्णाति ।

[भा.३६७०] एवं उप्पाणुं इयरं च विगिंचिऊण तो एति ।
असती जह लोभं विविंचमाणे इमा जयणा ।।

वृ- वक्ष्यमाणा यतना कर्त्तव्या । किमुक्तं भवति ? यत् तत् सांभोगिकं लभ्यते तस्य यत् सदृशम-सांभोगिकं तत् परिष्ठाप्यते । एतदेवाह-

[भा.३६७१] उवगयउग्गह लंभो उग्गहणं विविचमत्तए भत्तं ।
अप्पजत्ते तत्थ दवं उग्गहभत्तं गिहिमत्तेण ।।

[भा.३६७२] अपहुच्चंते काले दुल्लभदवभाविते वा खेत्तंमि ।
मत्तगदवेण धावइ मत्तगलंभेवि एमेव ।।

वृ- उपहतस्य असांभोगिकस्यावग्रहणस्य अवग्रहलाभे विवेचनं परिष्ठापनं कर्तव्यं । एवं च तस्य पतद्ग्रहसांभोगिको मात्रकमसांभोगिकं तत्र यदसांभोगिकं तस्मिन् भक्तं ग्राह्यं यच्च सांभोगिकं तत्र पानीयं ततो मात्रके तेन भक्तं ग्राह्यं पश्चात् पतद्ग्रहपानीयेन तस्य कल्पो दातव्यः । यदि मात्रके गृहीतेन भक्तेन न संस्तरणं तत्र मात्रकं द्रव्यं गृह्णाति । अवग्रहे पतद्ग्रहे भक्तं तत्र भुक्त्वा गृहस्थभाजनेन पानीयमानीय पतद्ग्रहस्य कल्पो देयः । अथ यावता कालेन गृहस्थात्त्यानीयमानीयते तावान्कालो न प्राप्यते दुर्लभं तत्र द्रवं ततो न यतस्तो गृहस्थेभ्यो द्रवं लभ्यते । यदि वा तत्क्षेत्रमभावितं संयतैस्तो गृहस्था न ददति भाजनं यत्र पानीयं गृह्यते तदामात्रकग्रहीतेनैव पानीयेन पतद्ग्रहो धाव्यते प्रक्षाल्यते । तथापि स नोपहन्यते । एवमेव अनेनैव प्रकारेण मात्रकस्यापि सांभोगिकस्य लाभे असांभोगिकस्य परिष्ठापनेन पतद्ग्रहे वा सांभोगिके विभाषा, कर्त्तव्या, तद्यथा पतद्ग्रहे भक्तं ग्राह्यं मात्रके पानीयमथ मात्रके संसक्तं भक्तं पानं वा गृहीतमाचार्यादिप्रायोग्यं वा पतद्ग्रहपानीयेनैव मात्रकं प्रक्षाल्यते, नोपहन्यते इति ।

[भा.३६७३] चोएइ सुद्ध असुद्धे संफासेणं तु तंतु उवहम्मे ।
भन्नइ संफासेणं जेसु वहम्मे न सिं सोही ।।

वृ- पश्चोदयति तत् शुद्धं भक्तं पानीयं वा अशुद्धे मात्रके वा पतद्ग्रहे वा प्रक्षिप्तं संस्पर्शिनोपहन्यते । ततः कथं शुद्धिरिति आचार्य आह भण्यते उत्तरं दीयते येषां संस्पर्शिनोपहन्यते तेषां न कदाचनापि शोधिरेतदेव भावयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा. ३६७४] लेवाऽहत्थच्छिक्के सहस अनाभोगतो व पक्खित्ते ।
अविसुद्धग्गहणंमि वि असुज्झसुज्झेज्ज इयरं वा ।।

वृ- यदि तव मतेनैवमुपधातस्तर्हि असांभोगिके भाजने यत् गृहीतं भक्तं पानं वा तेन लिप्ताभ्यां हस्ताभ्यां यत् सांभोगिकं भाजनं स्पृश्यते तदप्यसांभोगिकं जातं तत्संस्पर्शितोऽन्यान्यपि न च तत्कालं सर्वाण्यति परिष्ठापयितुं शक्यन्ते । न चान्यानि तावन्ति लभ्यन्ते ततो न कदाचनापि शुद्धिस्तथा सहसा नाम यत्त्वरमाणो असांभोगिकान् सांभोगिके प्रक्षिपति तदप्यसांभोगिकमुपजायते । अनाभोगो नाम एकान्तविस्मरणं तेनाप्यसांभोगिकात्सांभोगिके प्रक्षिप्ते तदप्यसांभोगिकं जायते । अविशुद्धं कथंचिदनाभोगतोऽविशुद्धस्योद्गमाद्यन्यतमदोषदुष्टस्य ग्रहणे तत् भाजनमशुद्धं स्यात् । न चैतष्यिते तस्मान्नसंस्पर्शमात्रेणोपहननमन्यच्च यथाऽशुद्धेन संस्पर्शतोऽशुद्धं भवति । तथा इतरदशुद्धं शुद्धेन संस्पर्शतः शुद्ध्येत् शुद्धीभूयात् । न्यायस्योभयत्रापि समानत्वात् । न चैतदस्ति तस्मात् यत्किंञ्चिदेतत्-

मू. (२०२) *अट्ठकुक्कुडिअंडगप्पमाणमेत्ते कवले आहारं आहारेमाणे निग्गंथे अप्पाहारे; दुवालसकुक्कुडिअंडगप्पमाणमेत्ते कवले आहारं आहारेमाणे निग्गंथे अवड्ढो मोयरिया, सोलस० दुभागपत्ते, चउवीस० तिभागपत्तंसिया ओमोयरिया एगतीसं किंचूणोमोयरिया, बत्तीसं पमाणपत्ते, एतो एगेनवि कवलेणं ऊणगं आहारं आहारेमाणे समणे निग्गंथे नोपकामभोइ त्ति वत्तव्वं सिया ।।*

[भा. ३६७५] लक्खणमतिप्पसत्तं अइरेगे वि खलु कप्पते उवही ।
इइ आहारेमाणं अतिप्पमाणे बहू दोसा ।।

वृ- अतिरेकोऽपि खलु कल्पते उपधिरित्युच्यमाने लक्षणमतिप्रसक्तं ततो मा अनेनैव प्रसङ्गेनाहारमप्यतिप्रमाणं कुर्यादिति हेतोराहारे मानमधिकृतसूत्रेणोच्यते यतोऽतिप्राणे गृह्यमाणे आहारे बहवो दोषाः । 'हाएज्ज व वामेज्ज व' इत्यादिरुपाः प्रकारान्तरेण सम्बन्धमाह-

[भा. ३६७६] अहवावि पडिग्गहगे भत्तं गेण्हंति तस्स किं मानं ।
जं जं उवग्गहे वा चरणस्स तगं तगं भणइ ।।

वृ- अथवेति प्रकारान्तरोपदर्शने, अपि शुद्धः सम्बन्धस्यैव समुच्चये पूर्वसूत्रेण प्रतिग्रहक उक्तः । तस्मिंश्च प्रतिग्रहके साधवो भक्तं गृह्णन्ति । तस्य भक्तस्य किं प्रमाणमित्यनेन प्रमाणमित्यनेन प्रमाणम-भिधीयते । अथवा किं सम्बन्धेन यच्चरणस्य चारित्रस्योपग्रहे वर्तते, तत्तत्सूत्रकारो वदति, । अनेन सम्बन्धेनायातस्यास्य व्याख्या अष्टौ कुकुड्यण्डकप्रमाणमात्रान् आहारमाहारयन् श्रमणो निर्ग्रन्थो-ऽल्पाहारो भण्यते द्वादश कुकुड्यएडकप्रमाणमात्रान् कवानाहारयन् अपार्धावमौदर्यः षोडश आहारयन् द्विभागश्चतुर्विंशतिकवलानाहारयन्-प्राप्तः एकविंशत् कवलान् आहारयन् किंचिद्नावमौदर्यः द्वात्रिंशककुक्कुड्यएडकप्रमाणमात्रान् कवलानाहारमाहारयन् श्रमणो निर्ग्रन्थः प्रमाणप्राप्तः इतर एकेनापि कवलेन ऊनमाहारमाहारयन् श्रमणो निर्ग्रन्थो न प्रकामभोजीति वक्तव्याः स्यात् । एष सूत्राक्षरसंस्कारः-

[भा. ३६७७] नियमाहारस्स सया बत्तीस इमे उ जो भवे भागो ।
तुं कुकुडिप्पमाणं नायव्वं बुद्धिमंतेहिं ।।

वृ- निजकस्याहारस्य सदा यो द्वात्रिंशत्तमो भागस्तत् कुक्कुटीप्रमाणं पदैकदेशे पदसमुदायोपचारात् । कुक्कुडिअएडकप्रमाणं ज्ञातव्यं बुद्धिमद्भिः । अत्रैव व्याख्यानन्तरमाह-

[भा. ३६७८] कुच्छियकुडीयकुक्कुडि, सरीरअंडगं महतीए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायइ देहस्स जउ पुव्वं वयणं ततो सेसं ।।

वृ- कुत्सिता कुटी कुकुटीशरीरमित्यर्थः । तस्यां शरीररूपायाः कुकुट्या अण्डकभिवाण्डकं मुखं केन पुनः कारणेनाण्डकं मुखमुच्यते तत आह-यतो यस्मात् चित्रकर्मणि गर्भे उत्पाते वा पूर्वं देहस्य वदनं मुखं निष्पद्यते । पश्चात् शेषं ततः प्रथमभावितया मुखमण्डकमित्युच्यते-

[भा.३६७९] थलकुक्कुडिप्पमाणं जं वा नायासिए मुहे खिवति ।
अयमन्नो सुविगप्पो कुक्कुडिअंडो वा न कवले ।।

वृ- इह कवलप्रक्षेपणाय मुखे विडम्बिते यदाकाशं भवति, तत्स्थलं भण्यते, स्थलमेव कुक्कुड्यण्डके स्थलकुक्कुड्यण्डकं तस्य प्रमाणं यदनायासिते मुखे कवलं प्रक्षिपति । किमुक्तं भवति ? यावत्प्रमाणमात्रेण कवलेन मुखे प्रक्षिप्यमाणेन मुखं न विकृतं भवति तत्स्थलकुक्कुड्यण्डकं प्रक्षिपति । किमुक्तं भवति ? यावत्प्रमाणमात्रेण कवलेन मुखे प्रक्षिप्यमाणेन मुखं न विकृतं भवति तत् स्थल-कुक्कुड्यण्डकं प्रमाणं गाथायामण्डकशब्दलोपः प्राकृतत्वात् अयमन्यः कुक्कुड्यण्डकोपमे कवले विकल्पः अयमन्योऽर्थः कुक्कुड्यण्डकप्रमाणमात्रशब्दस्यैत्यर्थः । एतेन कवलमात्रेणाष्टादिना संख्याद्रष्टव्या तदेवं कृता विषमपदव्याख्या भाष्यकृता । सम्प्रति निर्युक्तिविस्तरः—

[भा.३६८०] अठत्ति भणिऊणं छम्मासा हावत्तेउ बत्तीसा ।
नायं चोगवयणं पासाए होति दिठंतो ।।

वृ- अष्टाविति भणित्वा यावदवमौदर्यं तावदेतत्संस्तरतो मध्यं भणितं असंस्तरतः पुनर्द्वात्रिंशत्कं प्रमाणं भणितमुत्सर्गः पुनरयमुपदेशः षण्मासादारभ्य तावत् ह्रापयेत् यावत् द्वात्रिंशत्कवलाः । इयमत्र भावना यदि योगानां न हानिरुपजायते तदा षण्मासान् उपवासं कृत्वा पारणके एकं सिक्थमाहारयेत् । अथ तेना न संस्तरति ततः पारणके द्वे सिक्थे आहारयेत् । एवमेकैकसिक्थपरिवृद्ध्या तावन्नेयं यावदेकं लम्बनं कवलमित्यर्थः । तेनाप्यसंस्तरणे कवलपरिवृद्धिर्वक्तव्या । सा च तावत् यावदेकत्रिंशत्कवलाः । षण्मासानुपवासं कर्तुमशक्नुवन् एकेन दिवसेनोनं षण्मासक्षपणं कृत्वा एवमेव सिक्थकवलपरिवृद्धया पारणकं कुर्यात् । एवमेकैकहान्या षण्मासक्षपणं तावद्वक्तव्यं यावच्चतुर्थं कृत्वा पूर्वप्रकारेण सिक्थकवलपरिवर्धनेन पारणकं परिभावयेत् । अथ न संस्तरति ततो दिने दिने भुंक्त्वा तत्राप्येवमेव सिक्थादारभ्य यावद्वात्रिंशत्कवला इति अत्र चोदकवचनं यद्येवमष्टावित्यादि सूत्रोपनिबद्धं नाममात्रं प्रवचनमात्रमाचार्य आह-सिद्धिप्रासादनिर्मापणाय योगानां संधारणनिमित्तमेतन्मध्यमुपात्तं सूत्रेण ततो न कश्चिद्दोषः तथा चात्र प्रासादो भवति दृष्टान्तः स चाग्रे भावयिष्यते । सम्प्रति यदुक्तं छम्मास हायते उ बत्तीसा इति तद्भावनार्थमाह-

[भा.३६८१] छम्मासा खमणं तंभि सित्थादण्हा तु लंबनं ।
ततो लंबनवड्ढीए जावेक्कतीस संथरे ।।

[भा.३६८२] एक्कमेक्कं तु हावेत्ता दिनं पुव्वकमेणओ ।
दिने दिने उ सित्थादी जावेक्कतीस संथरे ।।

वृ- षण्मासक्षपणान्ते सिक्थमेकमादिशब्दात् असंस्तरणे द्वे त्रीणि चत्वारि इत्यादि परिग्रहोऽश्नातु भुंक्ते मे (न) संस्तरणे च सिक्थपरिवृद्धिस्तावत्कर्तव्या यावल्लम्बनं केवलो भवति तेनाप्यसंस्तरणे द्वात्रिंशदपि द्रष्टव्याः । परमेतत्कस्यापि कदाचिदन्यथाप्रकाममोजित्वदोषप्रसक्तेर्यत आह-एत्तो एगेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वि कवलेण ऊनगमाहारे माणे (ण) समणे निग्गंथे पगामरसभोइ त्ति वत्तव्वं सिया । इह प्रकामग्रहणेन निकाममपि सूचितमतो द्वे अपि व्याख्यानयति ।

[भा.३६८३] पगामं होइ बत्तीसा निकामं होइ निच्चसो ।
दुपविजहया ते उग्गही हवति वज्जिया ।।

वृ- द्वात्रिंशत्कवलाः प्रमाणं भवति त एव यन्नित्यशः सर्वकालं भुज्यते तन्निकामं एते द्वे अपि द्वात्रिंशत्कवलेभ्य एकेनापि कवलेनोनमाहारयता परित्यक्ते गृद्धिश्च वर्जिता भवति ।

[भा.३६८४] अप्पावड्ड दुभागो, मदेसणं नाममेत्तगं नामा ।
पइदिनमेक्कतीसं आहारे उत्ति जं भणइ ।।

वृ- यदि नाम प्रतिनमेकत्रिंशमपि कवलानाहारयदिति भणथ यूयं प्रतिपादयथ तर्हि यत् अल्पापार्धद्विभागावमौदर्यदिशनं तन्नाममात्रकं वचनमात्रकमेकत्रिंशतोऽपि कवलानां प्रतिदिवसमा-हारानुज्ञानात् । आचार्य आह-

[भा.३६८५] भणति अप्पहारा दओ समत्थस्स भिग्गहविसेसा ।
चंदायणादयोविव सुत्तनिवातो पगामंभि ।।

वृ- भण्यते उत्तरं दीयते, अल्पाहारादयः समर्थस्य सतोऽभिग्रहविशेषाश्चान्द्रायणादय इव सूत्रनिपातः । पुनरन्तिमौऽसमर्थस्य प्रकामनिकामनिषेधपर इत्यदोषः । ये चाल्पाहारादयोऽभिग्रह-विशेषास्ते बहूनां संयतसंयतीनां साधारणार्थं तथा चाह-

[भा.३६८६] अप्पाहारग्गहणं जेन य आवस्सयाण परिहानी ।
न वि जायइ तम्मत्तं आहारेयव्वयं नियमा ।।

वृ- अल्पहारग्गहणमपार्द्धाद्युलक्षणं तत इदं अल्पापार्द्धाद्याहारग्रहणमेतत् ज्ञापयति सिद्धिप्रासाद-निर्मापणाय व्यापार्यमाणानामावश्यकानां योगानां यावन्मात्रेणाहारेण परिहानिर्नोपजायते । तावन्मात्रं ततोऽभिग्रहविशेषमभिगृह्याहारयितव्यं । अत्रैन दृष्टान्तमभिधित्सुराह-

[भा.३६८७] दिठंतो अमच्चेणं, पासादेणं तु रायसंदिट्ठे ।
दव्वे खेत्ते काले भावेन य संकिलेसेइ ।।

वृ- पिव संक्लेशयति । इयं गाथाक्षरयोजना भावार्थस्त्वयम्-केनापि राज्ञा अमात्य आज्ञप्तः शीघ्रं प्रासादः कारयितव्यः । स चामात्यो द्रव्ये लुब्धः तान् कार्मकान् द्रव्यतः क्षेत्रतः कालतो भावतश्च संक्लेशयति । कथमित्याह-

[भा.३६८८] आलोयणा सक्कयं सुक्खं नोपगामं व दव्वतो ।
खेत्तानुचियं उण्हे काले उस्सूरभोयणं ।।

[भा.३६८९] भावे न देति विस्सामं निट्ठुरेहिं य खिंसइ ।
जे यं भित्तिं च नो देइ अकयदंडणा ।।

वृ- द्रव्यतोऽलवणमसंस्कृतं विशिष्टसंस्काररहितं, शुष्कं वातादिना शोषं नीतं वल्लचनकादि तदपि न प्रकामं न परिपूर्णं ददाति । क्षेत्रतो यत्तस्मिन् क्षेत्रे अनुचितं भक्तं पानं वा ददाति तथा उष्णे कर्म कारयति कालतउत्सूरे भोनं दापयति भावतो न ददाति विश्रामं, निष्ठुरैश्च वचनैः खिंसयति जितमपिच कर्मकरणतो लभ्यमपि वृतं मूल्यं न ददाति । एवं च सति ते कर्मकराः प्रासादमकृत्वापि नष्टाः पलायिता स्थितः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रासादोऽकृतो राज्ञा चैतत् ज्ञातं ततोऽमात्यस्य दण्डता कृता अमात्यपदाच्च्यावयित्वा तस्य सर्वस्वापहरणं कृतमिति एष दृष्टान्तः साम्प्रतमुपनयनमाह-

[भा.३६९०] अकरणे पासायस्स उ जह सो मच्चो उ दंडितो रन्ना ।
एमेवय आयरिए उवयणं होति कायव्वं ।।

वृ- यथा प्रासादस्याकरणे सोऽमात्यो राजा दण्डित एवमेवाचार्ये उपनयनं भवति कर्तव्यं, । तथैवं राजस्थानीयेन तीर्थकरेण अमात्यस्थानीयस्याचार्यस्य सिद्धिप्रासादसाधनार्थमादेशो दत्तः । स च कर्मकरस्थानीयानां साधूनां द्रव्यादिषु तत्करोति यथा ते सर्वे पलायन्ते तथा चाह-

[भा.३६९१] कज्जंयि वि नोविगति दयाति अंतं न तं च पज्जत्तं ।
खेत्ते खलु खेत्तादि, कुवसहिउब्भामगे चेव ।।

[भा.३६९२] तइयाए देति काले उमेवुसग्ग वादितो निच्चं ।
संगह उवग्गहे विय, न कुणइ भावे पयंडो य ।।

वृ- द्रव्यतः कार्येऽपि समापतिते न विकृतिं घृतादिकं ददाति भक्तमपि प्रान्तं दापयति तदपि च न च पर्याप्तं । क्षेत्रतः खलु क्षेत्रादीन् प्रेषयति स खलु क्षेत्रं नाम यत्र तु किमपि प्रायोग्यं लभ्यते आदिशब्दात् यत्र स्वपक्षतः परपक्षतो वापभ्राजना तदाहि परिग्रहः । कुवसतौ वा स्थापयति उद्भ्रामके वा ग्रामे यदा वा प्रेषयति । कालतः सदैव तृतीयायां भोजनं ददाति । अवमेऽपि दुर्भिक्षेऽप्युत्सर्गे वादिको नित्यं भावतः संग्रहज्ञानादिभिः उपग्रहं वस्त्रपात्रादिभिर्न करोति प्रचण्डश्च प्रकोपनशीलः ।

[भा.३६९३] लोए लोउत्तरे चेव दोवि एए असाहगा ।
विवरीयवत्तिणो सिद्धी अन्ने दोव विसाहगा ।।

वृ- लोके लोकोत्तरेऽपि च एतावनन्तरोक्तो द्वावप्यसाधकौ द्रव्यतो भावतश्च प्रासादस्य विपरीतवर्तिनः पुनरुभयथापि सिद्धिरिति कृत्वा अन्यौ द्वावपि द्रव्यतो भावतश्च प्रासादस्य साधकौ ।

[भा.३६९४] सिद्धी पासायवडिंसग्गस करणं चउव्विहं होइ ।
दव्वे खेत्ते काले, भावे य न संकिलेसेइ ।।

वृ- सिद्धि प्रासादावतंसकस्य करणं चतुर्विधं भवति । तद्यथा-द्रव्यतः, क्षेत्रतः कालतो भावतश्च । ततो गीतार्थो द्रव्यादिषु साधून् न संक्लेशयति ।

[भा.३६९५] एवं तु निम्मवंती तेवि अचिरेण सिद्धिपासायं ।
तेसिं पि इमो उ विही आहारेयव्वए होति ।।

वृ- एवं द्रव्यादिषु संक्लेशाकरणतस्ते साधवोऽचिरेण स्तोकेन कालेन सिद्धिप्रासादं निर्मापयन्ति तेषामपि सिद्धिः प्रासा दनिर्मापकानामाहारयितव्ये अयं न च वक्ष्यमाणो विधिस्तमेवाह-

[भा.३६९६] अद्धमसणस्स सव्वंजणस्स कुज्जा दवस्स दो भागं ।
वायपवियारणट्ठा छप्भागं ऊणयं कुज्जा ।।

वृ- अर्धमुदरस्य सव्यंजनस्य दधितक्रतीमनादिसहितस्याशनस्य योग्यं कुर्यात् । द्वौ भागौ द्रव्यस्य पानीयस्य योग्यौ षष्ठुं तु भांग वातप्रविचरणार्थमूनकं कुर्यात् । इयमत्र-भावना-उदरस्य षड्भागाः कल्पन्ते । तत्र त्रयोभागा अशनस्य स व्यञ्जनस्यद्वौ भागौ पानीयस्य षष्टो वातप्रविचारणाय । एतच्च साधारणे प्रावृट्काले चत्वारो भागा सव्यञ्जनस्याशनस्य पञ्चमः पानीयस्य षष्ठो वातप्रतीचाराय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उष्णकाले द्वौ भागावशनस्य सव्यञ्जनस्य । त्रयः पानीयस्य षष्ठो वातप्रविचारणायेति ।

[भा.३६९७] एसो आहारविही जह भणितो सव्वभावदंसीहिं ।
धम्मवासगजोगा जेन न हायंति तं कुज्ञा ।।

वृ- एष आहारविधिर्यथा सर्वभावदर्शिभिः सर्वज्ञैर्भणितो येन प्रकारेण धर्मनिमित्ता अवश्यकर्तव्या योगा न हीयन्ते तं कुर्यान्नान्यदिति ।

उद्देशकः-८-समाप्तः

मुनि दीपरत्नसागरेण संशेधिता सम्पादिता व्यवहार सूत्रे अष्टमोद्देशक स्य ।
(भद्रबाहुस्वामि रचिता निर्युक्तियुक्तं) संघदासगणि विरचितं भाष्यं ।
एवं मलयगिरि आचार्येण रचिता टीका परिसमाप्ता ।

उद्देशकः-९

व्याख्यातो अष्टम उद्देशोऽधुना नवम आरभ्यते । तस्य चेदमादिसूत्रं-

मू. (२०३) *सागारियस्स आएसे अंतो वगडाए भुंजति निट्ठिए निसिट्ठे पाडिहारए, तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ।*

मू. (२०४) *सागारियस्स आएसे अंतो वगडाए भुंजइ निट्ठिए निसिट्ठे अपडिहारिए; तम्हा दावए, एवं से कप्पइ पडिगाहेत्तए ।*

मू. (२०५) *सागारियस्स आएसे बाहिं वगडाए भुंजइ निट्ठिए निसट्ठे पाडिहारिए; तम्हा दावए, नो से कप्पइ पडिगाहेतए ।*

मू. (२०६) *सागारियस्स आएसे बाहिं वगडाए निट्ठिए निसट्ठे अपाडिहारिए; तम्हा दावए, एवं से कप्पइ पडिगाहेत्तए ।*

मू. (२०७) *सागारयिस्स दासे वा भयए वा अंतो वगडाए भुंजइ निट्ठिए निसट्ठे पडिहारिए तम्हा दावए नो से कप्पइ पडिगाहेत्ताए*

मू. (२०८) *(एवं) अपाडिहारिए....*

मू. (२०९) *सागारियस्स दासेवा भयएवा बाहिं वगडाए भुंजइ निट्ठिए निसट्ठे पडिगाहेत्तए ।*

मू. (२१०) *(एवं) अपाडिहारिए...*

[भा.३६९८] आहारो खलु पगतो घेतव्वो सो कहिं न वा कहियं ।
सागारियपिंडस्स इति नवमे सुत्तसंबंधो ।।

वृ- आहारः खल्वष्टमोद्देशके अन्तिमसूत्रे प्रकृतः । स कुत्र ग्रहीतव्यः कुत्र वा नेत्यनेन सूत्रेण प्रतिपाद्यते । इत्येष नवमे उद्देशके सागारिकपिण्डस्य प्रतिपादकं यत् आदिमं सूत्रं तस्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-सागारिको नाम शय्यातरस्तस्यादेश आयासकर आदेशो यदि वा आदेशित आदेशः अथवा आदेशत इति शब्दसंस्कारस्तस्य व्युत्पत्तिमग्रे वक्ष्यामः । स च नायको मित्रं प्रभुः परतीर्थिको वा द्रष्टव्यः । वगडा नाम परिक्षेपस्तस्यान्तर्मध्ये भुंक्ते पदार्थान् ओदनादीन्, किं विशिष्टानित्याह-निष्ठितान् निष्ठानीतान् निसृष्टान् प्रातिहारिकान् सागारिकान्सागारिभुक्तशेषान् तस्मात्परिनिष्ठितादिमध्यात् दापयति । न से तस्य कल्पते प्रतिग्रहीतुमेवं शेषाण्यपि त्रीणि सूत्राणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावनीयानि । एवं चत्वायदिशविषयाणि चत्वारि दासादिविषयाणि इह यत्र यत्र प्रातिहारिकं तत्र तत्र सागारिकपिण्ड इति न कल्पते । यत्र पुनरप्रातिहारिकं तत्र तत्र न सागारिकपिण्ड इति कल्पते, प्रथम-तृतीय-पञ्चम-सप्तम-सूत्रेषु सागारिकपिण्ड इति कृत्वा न कल्पते, द्वितीयचतुर्थषष्ठाष्टमसूत्रेषु न भवति सागारिकपिण्ड इति कल्पते, केवलं भद्रकप्रान्तदोषतो वर्ज्यते इति सूत्राष्टकभावार्थः ।

[भा.३६९९] आयासकरो आएसितो उ आवेसणं व आविसइ ।
सो नायगो सुही वा पभू व परतित्थिओ वावि ।।

वृ- आयासकर आदेशः आदिशतीत्यादेश इति व्युत्पत्तेः, आदिशितो वा आदेशः आदेश्यते सत्कारपुरस्सरमाकार्यत इत्यादेशव्युत्पत्तेः । अथवा आवेश इति शब्दसंस्कारस्तत्र व्युत्पत्तिमाह-आवेशनं वा शब्दः शब्दसंस्कारापेक्षया विकल्पते आविशतीत्यावेशः । आवेशनं नाम यस्मिन् स्थाने प्रविष्टेन सागारिकस्यायासो जन्यते, स आदेश आवेशो वा नाम ज्ञातिकः स्वजनः सुहृद् मित्रं प्रभुर्वा नायकः परतीर्थिको वापि, कृता विषमदव्याख्या भाष्यकृता । सम्प्रति निर्युक्तिविस्तरः ।

[भा.३७००] आएस-दास-भइए अट्ठहिं सुत्तेहिं मग्गणं जत्थ ।
सागारिय-दोसेहिं य पसंग-दोसेहिं य आगज्झो ।।

वृ- आदेशो यथोक्तरुपो दास आजन्मावधि किंकरो भृतकः कियत्कालं मूल्येन धृत आदेशश्च दासश्च भृतकश्च आदेशदासभृतकं तत्र च पिण्डस्याष्टभिः सूत्रैर्मार्गणा कृता । यत्र सागारिकदोषैः प्रसङ्गदोषैश्च भद्रकप्रान्तककृतैरग्राह्यो भवति । साम्प्रतमष्टानामपि सूत्राणां विभागमाह-

[भा.३७०१] तत्थादिमाइं चउरो आवेसे सुत्तमाहिया ।
दो चेव पाडिहारी अपाडिहारी भवे दोन्नि ।।

वृ- तत्र तेषामष्टानां सूत्राणां मध्ये आदिमानि चत्वारि सूत्राणि आदेशे प्रागुक्तस्वरुपे आख्यातानि, तत्रापि द्वे सूत्रे प्रातिहारिणि द्रष्टव्ये द्वे च सूत्रे अप्रातिहारिणि, प्रथम तृतीये प्रातिहारिणि, द्वितीये चतुर्थेऽप्रातिहारिणीत्यर्थः ।

[भा.३७०२] अंतो बहि वा वि निवेसणस्स आवसएणं व ठिए सगारे ।
भत्तं न एयस्स विसेसजुत्तं, तंमी दलंते खलु सुत्तबंधो ।।

वृ- निवेशनं गृहस्यान्तर्वहिर्वा स्थिते सागारिके शय्यातरे यदि आदेश एव आदेशः प्राघूर्णकस्तेन वा सह स्थिते यद्भक्तं विशेषयुक्तं विशेषतो निष्ठां नीतं तत्र एतस्य प्राधूर्णकस्य सम्बन्धि किन्तु सागारिकस्य ततस्तस्मित् ददति सूत्रसम्बन्धः सूत्रोपनिपातः । प्रातिहारिकभोजितया तस्मिन् ददाति प्रथमे तृतीये च सूत्रे न कल्पते सागारिकपिण्डत्वात् । द्वितीये चतुर्थे वा प्रातिहारिकभोजितया कल्पते । तदायत्वात्केवलं भद्रकप्रान्तदोषप्रसङ्गतो न गृह्यते । एतदेवाह-

[भा.३७०३] सागारियस्स दोसा दोसु दोसु पसंगतो दोसा ।
भद्दगपत्तादीया होइ इमे मुणेयव्वा, (दोसु पि कमेण नेयव्वा)

वृ- द्वयोः प्रथमतृतीययोः सूत्रयोः सागारिकस्य दोषात् शय्तरपिण्डत्वान्न कल्पते इति भावः । द्वयोर्द्वितीयचतुर्थयोः प्रसङ्गतो दोषा भद्रकप्रान्तादिकाः आदिशब्दादतिभद्रकातिप्रान्तादिपरिग्रहस्ते च इमे वक्ष्यमाणा भवन्ति ज्ञातव्याः । तानेवाह-

[भा.३७०४] एएण उवाएणं गिण्हंतो भद्द उग्गमेगतरं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्तो दुदिठधम्मा विनास गरिहा दिय निसिं वा ।।

वृ- भद्रकश्चिन्तयति साधव एतेनोपायेन मदीयं पिण्डं गृह्णन्ति, तत एवं चिन्तयित्वा उद्गमदोषाणामेकतरं दोषं कुर्यात्, यस्तु प्रान्तः स पापीयान् दुर्द्दष्टधर्मा तद्ग्रहं पिण्डग्रहणतो दिवा निशि वा कोपावेशतो विनाशं कुर्यात् गर्ही वा दिवानिशमिति ।

[भा. ३७०५] सुत्तंभि कप्पइ निय वुत्ते किं अत्थतो निसेहेह ।

एगयरदेसे कालियसुत्तनिवातो इमेहिं तु ।।

वृ- सूत्रे कल्पते इत्युक्ते किं यूयमर्थतो निषेधयथ । सूरिराह-एकतरदोषात्, भद्रकदोषप्रसङ्गात् प्रान्तदोषप्रसङ्गाद्वा इत्यर्थः । यद्येवं सूत्रे कस्मात्कल्पते इत्युक्तमत आह-अधिकृतस्य कालिकसूत्रस्य निपात प्रवर्तमानमेभिवक्ष्यमाणः कारणैः एतच्च ज्ञायते व्याख्यानात् कालिकश्रुतं च व्याख्यानप्रधानं -

[भा. ३७०६] जं जह सुत्ते भणियं तहेव तं जइ वियालणा नत्थि ।

किं कालियानुयोगो दिठो दिठ्ठिप्पहाणेहिं ।।

वृ- यत् यथा सूत्रे कालिके भणितं तद्यदि तथैव प्रतिपत्तव्यं । न पुनर्विचारणा काचिदस्ति, तर्हि द्दष्टिप्रधानैर्युगप्रधानैरित्यर्थः । किं कस्मात्कालिकानुयोगो द्दष्टः तस्मादतिविचारणा सा चात्र प्रागुक्तस्वरुपेति । तत्र युदक्तमेभिः कारणैः कालिकसूत्रनिपात इति तानि कारणान्याह-

[भा. ३७०७] अदिठ्ठस्स उ गहणं अहवा सागारियं तु वज्जेत्ता ।

अन्नो पेच्छउ मा वा पेच्छत्ति वा वि वच्चता ।।

वृ- यदि केनापि सागारिकसत्केन तत् दीयमानं न द्दश्यते तदस्याद्दश्यस्य ग्रहणं भवति । अथवा सागारिकं शय्यातरं वर्जयित्वा अन्यो दीयमानं प्रेक्षतां वा मा वा । अथवा सागारिकेऽपि प्रेक्षमाणे व्रजन्तो न तिष्ठन्ति केवलं दानवेलायां तद्द्दष्टिः परिहियते । तत उक्तं सूत्रे कल्पते इति, तदेवमादेशविषयं सूत्रचतुष्टयं भावयति ।

[भा. ३७०८] दास-भयगाण दिज्जइ उक्खित्तं जत्थ भत्तयं नियमं ।

तंमि वि सो चेव गमो अंतो बाहिं व देतंमि ।।

वृ- दासभृतकादिसूत्रचतुष्टयेऽपि प्रथमसूत्रे तृतीयसूत्रे च प्रातिहारिकभोजनात्तस्मिन् ददति सागारिकपिण्ड इति कृत्वा न कल्पते । यत्र पुनर्द्वितीयचतुर्थे च सूत्रे दासभृतकानामुत्क्षिप्तं हस्तोत्पाटितं नियतं भक्तकं दीयते दत्तं च तैः स्वगृहे नीयते तस्मिन्नपि दासभृतकादौ निवेशनस्यान्तर्वहिर्वा ददति तत्र सूत्रे स एव गमः प्रकारः कल्पते वस्तु, ततः परं भद्रकप्रान्तादिदोषप्रसङ्गतो न गृह्यते । यदा तु केनापि सागारिकः सत्केन द्दश्यते यदि वा सागारिकं मुक्त्वा अन्यः प्रेक्षतां वा तदागृह्यते । यद्येवं तर्हि सागारियस्स आदेशे वा दासे वा भयगे वा इत्यनेन प्रकारेण चत्वार्येव सूत्राणि कस्मान्न कृतानि, उच्यते ।

[भा. ३७०९] नियतानियय विसेसो आएसो होइ दासभयगाणं ।

अच्चियमनच्चिए वा विसेसकरणं पयत्तो वा ।।

वृ- आदेशो दासभृतकानां भवति नियतानां नियतकृतो विशेषः तथाह्यादेशः कोऽपि कदाचिदागच्छति ततस्तस्यानियतं दीयते दासभृतकानां नियतं तथा आदेशस्यार्चितं तथा आदेशस्यार्चितं सत्कारपुरस्कृतं दीयते दासभृतकानां सत्काराकरणतोऽनर्चितं तथा आदेशस्य भोजनविधिसम्पादनाय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

महान् प्रयत्नः संभ्रमगर्भो विधीयते । दासभृतकानां तु न तादृशः प्रयत्न इति दासभृतकसूत्रचतुष्टया-द्विश्लेषकरणं पृथक्करणं-

मू. (२११) *सागारियस्स नायए सिया सागारियस्स एगवगडाए अंतो एगपयाए सागारिंच चोपजीवइ तम्हा दावए नो से कप्पइ पडिगाहेत्तए ।*

[भा.३७१०] नीसट्ठ अपडिहारी समणुन्ना उ त्ति मा अइपसंगा ।
एगपए परपिंडं गेण्हे परसुत्त-संबंधो ।।

वृ- निसृष्टो दत्तोऽप्रतिहारी पिण्डः समनुज्ञात इति विचिन्त्य मा अतिप्रसङ्गत एकपदे एकस्यां तुल्यां शय्यातराद्व्यतिरिक्तस्य पिण्डं गृह्णीयादिति परसूत्रस्य परविषयसूत्राष्टकस्य सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या सागारिकज्ञातकः सागारिकस्वजनः स्यात् सागारिकस्य एकवगडाए एकस्मिन् गृहे सागारिकस्यान्तरे तस्यां प्रजायां चुल्यां । सागारिकं चोपजीवति तस्माद्दापयेत् । न से तस्य साधोः कल्पते प्रतिग्राहयितुं सागारिकासक्तचुल्लीदारुलवणाद्युपजीवनस्तस्य शय्यातरपिण्डस्य शय्यातरसत्कत्वात्, एवं शेषाण्यपि सप्तसूत्राणि भावनीयानि पाठःपुनस्तेषामेवं-

मू. (२१२) *सागारियस्स नायए सिया सागारियस्स एगवडाए अंतो सागारियस्स अभिनिपयाए सागारियं चोपजीवति, तम्हा दावए, नो से कप्पइ पडिग्गाहित्तए।*

मू. (२१३) *सागारियस्स नायए सिया सागारियस्स एगवडाए बाहिं सागारियस्स एगपयाए सागारिंच उपजीवति, जम्हा दावए, नो से कप्पइ पडिगाहेत्तए ।*

मू. (२१४) *सागारियस्स नायए सिया सागारियस्स एगवडाए बाहिं सागारियस्स अभिनिपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पति पडिगाहित्तए।*

मू. (२१५) *सागारियस्स नायए सिया सागारियस्स अभिनिवगडाए एगदुवाराए एगनिक्खमण-पवेसाए अंतो सागारियस्स एगपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ।*

मू. (२१६) *सागारियस्स नायए सिया सागारियस्स अभिनिव्वगडाए एगदुवाराए एगनिक्खमण-पवेसाए अंतो सागारियस्स अभिनिपयाए सागारियं च उवजीवति, तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ।*

मू. (२१७) *सागारियस्स नायए सिया सागारियस्स अभिनिव्वगडाए एगदुवाराए एगनिक्खमण-पवेसाए बाहिं सागारियस्स एगपयाए सागारियं च उवजीवइ, तम्हा दावए, नो से कप्पइ पडिगाहित्तए ।*

मू. (२१८) *सागारियस्स नायए सिया सागारियस्स अभिनिव्वगडाए एगदुवाराए एगनिक्खमण-पवेसाए बाहिं सागारियस्स अभिनिपयाए सागारियं च उवजीवइ, तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ।*

वृ- अत्र अभिनिव्वगडाए पृथग्गृहे एकद्वारे एकनिष्क्रमणप्रवेशे एकनिवेशनान्तर्वर्तित्वात्तया अभिनिपयाए इति अभि प्रत्येकं नियता विविक्ता प्रजा चुल्ली अभिनिप्रजा तस्यां, शेषं सुगमं -

[भा.३७११] पुरपच्छसंथुतो वावि नायतो उभयसंथुतो वावि ।
एगवगडा घरं तु पया उ चुल्ली समक्खया ।।

वृ- ज्ञातको नाम पूर्वसंस्तुतो यदि वा पश्चात्संस्तुतोऽथवा उभयसंस्तुतः स्वजनः, पूर्वसंस्तुतो नाम मातापितृपक्षवर्ती, पश्चात्संस्तुतो भार्यापक्षगत, उभयसंस्तुतस्तथा विधनात्रा सम्बन्धविशेषभावत उभयपक्षवर्ती, एकवगडा नाम एकं गृहं, प्रजा तु चुल्ली समाख्याता, प्रकर्षेण जायते पाकनिष्पत्तिर-स्यामिति प्रजेति व्युत्पत्तेः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३७१२] एगपए अभिनिपए अट्ठहिं सुत्तेहिं मग्गणा जत्थ ।
सागारियदोसेहिं पसंगदोसेहिं य अगज्झं ।।

वृ- एकस्यां प्रजायामभिनिप्रजायां प्रत्येकं विविक्तायां प्रजायामष्टभिः सूत्रैः पिण्डस्य मार्गणा यत्र येषु सूत्रेषु प्रथमतृतीयेषु पञ्चमसप्तमरुपेषु सागारिकदोषैर्द्वितीयचतुर्थषष्ठाष्टमेष्वथ प्रसङ्गदोषै र्भक्तपानमग्राह्यम् ।

[भा.३७१३] आइल्ला चउरो सुत्ता चउक्सालदवेक्खतो ।
पिहघरेसु चत्तारि सुत्ता एक्कनिवेसने ।।

वृ- आदिमानि चत्वारि सूत्राणि एकग्रहविषयाणि चतुःशाल्याद्यपेक्षातश्चतुःशालादावेव द्वयोः कुडम्बयोरवस्थानघटनात्अन्तिमानि चत्वारि सूत्राणि पृथग्गृहेषु तान्यप्येकस्मिन्निवेशने परिक्षेपे ।।

[भा.३७१४] सागारियस्स दोसा चउसु परसंगदोसा य ।
भद्दगपंतादीया चउसु पि कम्मेण नायव्वा ।।

वृ- चतुर्थप्रथमतृतीयपंचमसप्तमरुपेषु सूत्रेषु सागारिकस्य दोषाः शय्यातरपिण्डग्रहणे ते दोषास्तत्र ज्ञातव्या इत्यर्थः । चतुर्षु द्वितीयचतुर्थषष्ठाष्टमादिरुपेषु सूत्रेषु प्रसङ्गदोषाश्चतुर्ष्वपि सूत्रेणु यथोक्तक्रमेण ज्ञातव्या, भद्रकप्रान्तादिकृता आदिशब्दात् तरतमविशेषपरिग्राहकः । अथ कथं प्रथमतृतीयादिषु चतुर्षु सूत्रेषु शय्यातरदोषाः कथं चान्यत्रप्रसंगदोषास्तत्राह-

[भा.३७१५] दारुगलोणे गोरससूवोदग अंबिले य सागफले ।
उवजीवइ सागारियं एगपए वावि अभिनिपए ।।

वृ- दारु काष्टं लवमं गोरसं च प्रतीतं सूत्रो मुद्गादि उदकमाम्लं शाकफलानि च प्रतीतानि यस्मात्सागारियमिति षष्टयर्थे द्वितीया प्राकृतत्वात्सागारिकस्य सक्तानेकस्यां प्रजायां प्रत्येकं विविक्तायां वा प्रजायामुपजीवति तेन कारणेन सागारिकदोषाश्च प्रसजन्ति । एतेन सागारियं च उवजीवति इति व्याखातं । कस्मादेकां चुल्लीं प्रतिपद्यन्ते तत आह-

[भा.३७१६] भीयाइं करभयस्स य अंतो बाहिं व होज्ज एकपया ।
अभिनिपए वि न कप्पइ पक्खेवगमादिनो दोसा ।।

वृ- भीतानि, चुल्लीकरभयात्, गाथायां षष्ठी पञ्चम्यर्थे सम्बन्धविवक्षायां वा षष्ठी, यस्माच्चुल्लीकरभयात्तानि भीतानि तेन कारणेनान्तर्वहिर्वा तेषामेका प्रजा चुल्ली भवति । अभिनिप्रजायां तु सत्यां यद्यपि सागारिकसत्कमुपजीव्यते तथापि । निर्भिन्नचुल्लीकतया यत् गृह्यते तत्तेषामेव भवतीति सागारिकदोषा न भवन्ति । तथापि प्रसङ्गदोषतो न कल्पते तथा चाह-अभिनिप्रजायामपि न कल्पते यतो भद्रकप्रान्तकृताः प्रक्षेपादयो दोषाः, भद्रकः पक्षेपादीन् दोषान् कारयेत् । प्रान्तो विनाशप्रभृतीन्-

[भा.३७१७] जं देसी तं देमो एए घेत्तुं न इच्छते अम्हं ।
अहवा वि अकुलजोत्ति य गेण्हंति अदिट्ठमादीयं ।।

वृ- भद्रका ब्रूवते त्वं साधुभ्यः प्रभूतं देहि यद्दासि तद्वयं तव दास्यामः । यत एतेऽस्माकं गृहे नेच्छंति ग्रहीतुं गाथायामेकवचनं प्राकृतत्वात्, एवं भद्रककृताः प्रक्षेपादयो दोषाः अथवा प्रान्तो ब्रूते अकुलजा एते इति कृत्वा अदृष्टादिकं गृह्णन्ति । एवं गर्हा करोत्यतिप्रान्तो विनाशमपि, अत्रैवापवादमुपदर्शयति ।

[भा.३७१८] बिइयपदे उदिट्ठगहणं असती तव्वजिएण दिट्ठस्स ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिट्ठेवि पत्थियाण गहणं अंतो व बाहिं वा ।।

वृ- द्वितीयपदेनापवादपदेन यदि न केनापि दीयमानं दृष्टं तदा तस्यादृष्टस्य ग्रहणं, अथ सर्वथा केनाप्यदृष्टं न प्राप्यते तदा तदभावे तद्वर्जितेन दृष्टस्य ग्रहणं तथा प्रस्थितानां गन्तुं चलितानां सागारिकेण दृष्टेऽपि दर्शनेऽपि अन्तर्बहिर्वा ग्रहणं भवति ।

मू. (२१९) *सागारियस्स चक्कियासाला साहारणवक्कयपउत्ता, तम्हा दावए, नो से कप्पइ पडिगाहेत्तए ।*

मू. (२२०) *सागारियस्स चक्कियासाला निस्साहारणवक्कयपउत्ता, तम्हा दावए, एवं से कप्पति पडिगाहित्तए ।*

मू. (२२१)(२२२) *सागारियस्स ०—गोलियसाला०*

मू. (२२३)(२२४) *—बोधियसाला०*

मू. (२२५)(२२६) *—दोसियसाला०*

मू. (२२७)(२२८) *—सोमियसाला०*

मू. (२२९)(२३०) *—बोदियसाला०*

मू. (२३१)(२३२) *—गंधियसाला० जहा एवं से कप्पइ पडिगाहेत्तए ।*

[भा.३७१९] साधारणमेगपयत्ति किच्च तहियं निवारियं गहणं ।
इदमवि सामन्नं वि य साहारणसालसु यजोगो ।।

वृ- अनन्तरसूत्रेष्वेकस्यां प्रजायां साधारणमिति कृत्वा तत्र ग्रहणं निवारित्तं, इदमपि च वक्ष्यमाणं साधारणसालासु सामान्यं साधारणमतो निषिध्यते । अनेन सम्बन्धेनायातस्यास्य व्याख्या सागारिकस्य शय्यातरस्य चक्रिकाशाला तैलविक्रयशाला इत्यर्थः । सागारिकेणात्मना सह साधारणावक्रयप्रयुक्ता यत्तस्यां शालायां प्रक्षिप्यते । यश्च तस्य लाभः सागारिकेण साधारण इत्यर्थः । तस्मात् शालाया मध्यात् यत्साधूचित्तं तैलादिकमन्यो दापयति तत्से तस्य साधोर्न कल्पते इति प्रथमसूत्रार्थः । तथा सागारिकस्य चक्रिकाशाला तैलविक्रयशाला सा निस्साधारणा वक्रययुक्ता न किमपि सागारिकसाधारणं तत्र भाण्डं प्रक्षिप्तमस्तीति भावः तस्मात् निस्साधारणावक्रयशालामध्यात् दापयति एवं से तस्य साधोः कल्पते प्रतिगृहीतुं एष द्वितीय सूत्रार्थः । एवं बोलिकशालाबोधिकशालादौषिकशालासोत्तिकशाला-गन्धिकशालाबोदियशालासूत्राण्यपि भावनीयानि । सूत्रपाठस्त्वेवं द्रष्टव्यः । सागारियस्स गोलियसाला दावए एवं से कप्पइ पडिसाहारणा वक्कयपउत्ता तम्हा दावए नो से कप्पइ पडिगाहेत्तए, सागारियस्से गोलियसाला निस्साहारणा वक्कयपउत्ता तम्हा गाहित्तए । एवं वोधिकशालादिसूत्रपाठोऽपि द्रष्टव्यः ।

[भा.३७२०] तेल्लियगोलियगोणियदोसियसुत्तियबोहिकप्पासो ।
गंधिय सौंडियसाला जा अन्ना एवमादी उ ।।

वृ- चक्रिका नाम तैलिकास्तैलिकचक्रकारिणः । एवं गोलिका लावणिका दौषिकः सौत्रिकाः बोधिकाः कार्पासा गन्धिकाशाला शौण्डिकशाला अपि अन्या च या एवमादिका गन्धप्रधाना सा गन्धिकशालेत्युच्यते ।

[भा.३७२१] ववहारे उद्देसंमि नवमए जत्तिया भवे साला ।
तासिं परिपिंडियाणं साहारणवज्जिए गहणं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- व्यवहारे नवमे उद्देशक यावत्यः शालाः शालासूत्राणि भवन्ति विद्यन्ते तासां सर्वासां परिपिण्डितानामयं तात्पर्यार्थः । यत्र साधारणमविभक्तं क्रमाणकं तत्र प्रतिषेधः साधारणवर्जिते तु ग्रहणं । सम्प्रति साधारणशब्द-शालाशब्दव्याख्यानार्थमाह-

[भा.३७२२] साहारण सामन्नं अविभत्तमच्छिवसंथडेगट्ठं ।
सालत्ति आवनत्ति य पणिअ गिहं चेव एगट्ठे ।।

वृ- साधारणं सामान्यमविभक्तमच्छिन्नं संस्तृतमिति एकार्थ, एते सर्वेऽपि शब्दा एकार्थिका इत्यर्थः । शाला इति वा आपण इति वा पणितमिति वा गृहमिति वा एकार्थः ।

[भा.३७२३] साहारणा उ साला दव्वे मीसंसि आवणे भंडे ।
साहारणवक्कपउत्ते च्छिन्नं वोच्छं अच्छिन्नं वा ।।

वृ- साधारण तु शाला भण्यते मिश्रे द्रव्ये सति किमुक्तं भवति । अन्यस्यापि अन्यस्यापि तिला एकत्र मिश्रयित्वा पील्यन्ते पीलयित्वा च एकत्र विक्रोणन्ति । अथवा साधारणेनावक्रयेण युक्ते आपण भाण्डे वा क्रयाणके साधारण शाला भवति । तथा च्छिन्नमच्छिन्नं वा वक्ष्ये एष गाथासंक्षेपार्थः ।

[भा.३७२४] पीलंति एक्कतो वा विक्कंति य एक्कतो करिय तेल्लं ।
अहवावि चक्कएणं साहारणवक्कयं जाणे ।।

वृ- अन्यस्यान्यस्यं तिलानेकत्र संमीलयित्वा पीलयन्ति ततो विक्रीणन्ति अथवा पृथक् तिलान् पीलयित्वा तैलं कृत्वा एकत्र विक्रीणन्ति । तदेवं द्रव्ये मिश्रे साधारणावक्रयप्रयुक्ता शाला व्याख्याता । अथवान्यथा साधारणावक्रयप्रयुक्तेनि व्याख्यानयति । अथवा वक्रयेण भाटकेन या साधारणाशाला प्रयुक्ता व्यापारिता तत्र यल्लभ्यते भाण्डकं तत् शय्यातरस्यान्येषां वा शय्यातराणां साधारणमिति साधारणावक्रयप्रयुक्तं जानीहि । अत्र यथा कल्पते यथा वा न कल्पते तथा प्रतिपादयति ।

[भा.३७२५] पीलिय विरेडियंमी पुव्वगमेणं तु गहणमदिट्ठे ।
एगत्थ विक्कयंमी अमेलियादिट्ठ अन्नत्थ ।।

वृ- अन्यस्यान्यस्य तिलानेकत्र मीलयित्वा पीलयित्वा च तैले विरेचिते विभक्तीकृते पूर्वगमेन पूर्वप्रकारेण शय्यातरेणादृष्टे ग्रहणं भवति, दृष्टे तु न कल्पते, मा प्रक्षेपकं कुर्यादिति हेतोरन्यत्र नीतं तु कल्पत एव, तथा पृथक् एव तिलान् पीलयित्वा च एकत्र विक्रीणन्ति । तत एकत्र विक्रये यावन्मूल्यं मिलितमविभक्तमित्यर्थः तावन्न कल्पते इत्यर्थः । अमीलिते मूल्यकरणेन विभक्तीकृते सागारिकेणादृष्टं स तु कल्पते, दृष्टे प्रक्षेपदोषसंभवात् । अन्यत्र पुनः स्वयोगेन नीतं निःशङ्कं कल्पते ।

सांप्रतमापणंसाधारणावक्रयप्रयुक्तं व्याख्यानयति-

[भा.३७२६] जो उ लाभगभावेण पउत्तो होति आवणो ।
सा उ साहारणा होइ तत्थ घेत्तुं न कप्पइ ।।

वृ- यस्तु सागारिकेन लाभभागेन त्रिभागादिना आपणः प्रयुक्तो भवति स साधारणो भवत्यापणस्ततस्तत्र गृहीतुं न कल्पते । साम्प्रतं भाण्डं साधारणावक्रयप्रयुक्तं व्याख्यानयति-

[भा.३७२७] छेदे वा लाभे वा सागारितो जत्थ होइ आभागी ।
तं तु साधारणं जाणे सेसमसाहारणं होइ ।।

वृ- यत्र भाण्डे च्छेदे लाभे वा सागारिकार्द्धेन त्रिभागादिना वा आभागी भवति तत् भाण्डं साधारणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साधारणावक्रयप्रयुक्तं जानीयात् । एतद् व्यतिरिक्तं शेषं भाण्डमसाधारणं भवति । साधारणे च भाण्डं यावत् तं न विभज्यते, तावत्सागारिकपिण्डो, विभक्ते तु कल्पते तत्रापि प्रक्षेपदोषप्रसङ्गतो दृष्टेन कल्पते, अदृष्टे तु कल्पते । यदा तु सा शाला भाटकप्रदानेन गृहीता कालेन मया तवैतावत् दातव्यं । न च भाण्डं शय्यातरेण सह च्छेदे लाभे वा त्रिभागादिना साधारणं तत्राप्यसाधारणे अदृष्टे कल्पते दृष्टे तु प्रक्षेपदोषप्रसङ्गतो नेति । सम्प्रति च्छिन्नं वोच्छं अच्छिन्नं वा स्द इति व्याख्यानार्थमाह-

[भा.३७२८]　　सचित्तअवित्तमीसेण य जा प्पउंजए साला ।
तद्दव्वमन्नदव्वेण होइ साहारणं तं तु ।।

वृ- सचित्तेन अचित्तेन गाथायां सप्तमी तृतीयार्थे वा कृतत्वेन मिश्रेण च प्रयुज्यते । शाला किं विशिष्टेन सचित्तादिनेत्यत आह-द्रव्येण वा तद्द्रव्यं नाम यत् शालायां प्रक्षिप्तमस्ति अन्यद् द्रव्यं तद्व्यतिरिक्तं द्रव्यमियमत्र भावना । यत् शालायां प्रक्षिप्तं सचित्तमचित्तं मिश्रं वा कार्पासादि तस्य त्रिभागादि दातव्यम् । यदि वा यन्निष्पद्यते कर्पासादिभ्यो वस्त्रादिकमन्यत् तस्य त्रिभागादि दातव्यमिति तत् भवति -

[भा.३७२९]　　तद्दव्वमन्नदव्वेण वावि च्छिन्ने वि गहणमदिट्ठे ।
मा खलु पसंगदोसा संछोभ भतिं व मुचेज्जा ।।

वृ- तत् द्रव्यं यत् शालायां प्रक्षिप्तं अन्यद्द्रव्यं तद्व्यतिरिक्तं एतावता कालेन द्रव्यं वा मयैतावद्दातव्यमित्येवं तत् द्रव्येण अन्यद्रव्येण च्छिन्नेऽपि विभक्तीकृतेऽपि ग्रहणमदृष्टे शय्यातरेण कल्पते न दृष्टे; कुत इत्याह-मा खलु प्रसङ्गदोषाः स्युरिति कृत्वा एतदेव संच्छोभी नाम प्रक्षेपस्तं कुर्यात् भृतिं वा मूल्यं मुञ्चेत् यावदुपकुरुते साधूनां तावद्दस्व द्रव्यं, भृतिमध्यात् पातनीयमिति ।

[भा.३७३०]　　जंपि य न एइ गहणं फलकप्पासो सुरादि वा लोणं ।
फासंमि उ सामन्नं न कप्पए जं तहिं पडियं ।।

वृ- यद्यपि च प्रासुकतया ग्रहणं नागच्छति तद्यथा फलमाम्रादि कर्पासः सुरादिरादिशब्दात् सरकादिग्रहणं लवणं । एतान्यप्राशुकान्यपि कदाचित्कारणे गृह्यन्ते तत एवमुक्तं, प्रासुकमपि तु वस्त्रादि यत्तत्र शालायां शय्यातरेण सह साधारणं तु न कल्पते, तदेव दोषिकशालामधिकृत्य दर्शयति ।

[भा.३७३१]　　अंडजबोंडजवालज वागज तह कीडजाणवत्थाणं ।
नाणादिसागयाणं साधारणवज्जिते गहणं ।।

वृ- अण्डजानां वसरिसूत्रमयानां बोण्डजानां कर्पासिकसूत्रमयानां बालजानां कम्बलानां वल्कलजानां शणत्वम्मयानां कीटजानां वस्त्राणां नानादेशागतानां प्रयोजने समापतिते साधारणवर्जिते सागारिकेण सह साधारणरहिते आपणे ग्रहणं भवति दोषाभावात् । दृष्टादृष्टविभाषा प्राग्वत् ।।

मू. (२३३) *सागारियस्स ओसहीओ संथडाओ तम्हा दावए नो से कप्पइ पडिगाहेत्तए*

मू. (२३४) *सागारियस्स ओसहीओ असंथडाओ तम्हा दावए, एवं से कुप्पइ पडिगाहेत्तए ।।*

मू. (२३५) (२३६) *सागारियस्स अम्बफला जाव एवं से कप्पइ पडिगाहेत्तए ।*

[भा.३७३२]　　सागारियंमि पगते साहारणमोय समनुवत्तंते ।
उसहिफलसुत्ताणं वंजणनाणत्तओ जोगो ।।

वृ- सागारिके पूर्वसूत्रेभ्यः प्रकृते साधारणे समनुवर्तमाने तत्प्रस्तावमुपजीव्य औषधिफल-सूत्राणामुपनिपातः कृतः । यद्येवमयमर्थः पूर्व सूत्रेभ्य एव गते इति किमर्थममून्युपात्तानीत्यत आह

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

व्यञ्जननानात्वात्किमुक्तं भवति पूर्वं शालामधिकृत्य कल्पाकल्पविधिरुक्त इदानीं तु तान्येव व्यञ्जनान्यधिकृत्य सोच्यते । ततो व्यंजनैर्नानात्वभेदाददोषः, एष योगः सम्बन्धः । अस्य व्याख्या सागारिकस्य शय्यातरस्य औषधयो गोरसवत्यां संवृताः साधारणास्तस्मात् तन्मध्याद्दापयति सूपकारो कल्पते से तस्य साधोः प्रतिग्रहीतुं तथा सागारिकस्यौषधयोऽसंस्कृता असाधारणास्तस्माद्दापयति एवं से तस्य कल्पते प्रतिग्रहीतुमेवमाम्रफलसूत्रद्वयमपि भावनीयम् । सम्प्रति भाष्यप्रपञ्चः

[भा. ३७३३] गोरस गुल तिल्ल घतादि उसहीतो वा होंति जा अन्ना ।
सूअस्स कठलेणं तु ता संथडसंथडा हुंति ।।

वृ- सूतस्य (सूपकारस्य) काष्ठलयने इन्धनगृहे या गोरसगुडतैलघृताद्या औषधयोऽन्या वा या भवन्ति ता द्विविधाः सागारिकेण सह संस्कृताः साधारणा भवन्ति असंस्कृता वा असाधारणा वा । कथं पुनः साधारणास्तत आह-

[भा. ३७३४] धुव आवाह विवाहे जन्ने सद्धे य करडुय छन्ने य ।
विविहातो ओसहीउ वानीता भत्तसूत्तस्स ।।

[भा. ३७३५] जं दठं विदठं वा जो वा तह भत्तसेस उवारो ।
लभइ जइ सूवकारो अविरिक्कं पि हु न लब्भा ।।

वृ- ध्रुवं सर्वकालमुपस्करोति सूपकारो भोजिकानामावाहो दारकपक्षिणां, वीवाहो वधूपक्षिणां, यज्ञो नागयज्ञादि श्राद्धं धिग्जातिजनप्रतीतं, करडुकं मृतकभक्तं, क्षण इन्द्रमहादिरेतेषु सूपकार आनीयते तस्य भक्तभतस्य सूपकारकस्य विविधा औषधयः पूर्वभणिता उपनीता ढौकितास्तत यत् दग्धमीषत् विदग्धं वा प्रभूतं दग्धं यो वा तत्र भक्तशेषस्योद्धारो भक्तशेयं यत्रोद्धरितमित्यर्थः । तद्यदि लभते सूत्रकारस्ततस्तत्कल्पते, अविरिक्तं अविभक्तीकृतं तदापि दग्धविदग्धादि हु निश्रितं ग्रहीतुं दातुं वा न लभते, ततस्तं न कल्पत । एतदेवाह-

[भा. ३७३६] अविरिक्को खलु पिंडो सो चेव विरेइतो अपिंडो उ ।
भद्दगपंतादीया धुवा उ दोसा विरेकेवि ।।

वृ- अविरिक्तोऽविभक्तीकृतः खलु भवति पिण्डः सागारिकपिंडः स एव विरेचितः पृथक्कृतो भवत्यपिंडः सागारिकपिण्डो न भवतीति भावः । यद्येवं तर्हि स ग्राह्यस्तत आह-विरक्तेऽपि धुवाभद्रक-प्रान्तादिका दोषास्तस्मात्तत्रापि-

[भा. ३७३७] जा उ संथडियाओ सागारिय व संतिया न खलु कप्पे ।
जाओ असंथडियाओ सूतस्स य ताओ कप्पंति ।।

वृ- सागारिकसत्का असागारिकेण सह संस्तृतास्ताः खलु न कल्पन्ते यास्त्वसंस्तृताः सूतस्य सूप-कारस्य सम्बन्धितया जातास्ताः कल्पन्ते । तदेवमौषधिसूत्रद्वयं भावितमधुनाम्रफलसूत्रद्वयं भावयति-

[भा. ३७३८] वल्ली वा रुक्खो वा सागारियसंति उ भएज्ज परं ।
तेसि परिभोगकाले समणाण तहिं कहं भणियं ।।

वृ- वल्ली वा सागारिकसत्को वृक्षो वा सागारिकसम्बन्धिपरम्परस्यावग्रहं भजेत् । तत्र तेषां वल्लीवृक्षाणां फलपरिभोगकाले श्रमणानां कथं भणितं किं कल्पते किं वा न कल्पते इति एष गाथासंक्षेपार्थः । साम्प्रतमेनामेव व्याचिख्यासुः प्रथमतो वृक्षवल्लीव्याख्यानमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३७३९] फणसं व चिंच तलनालिकेरेमादी हवंति फलरुक्खा ।
लोमसिय तउसि मुद्दिय तंबोलादी य वल्लीतो ।।

वृ- पनस आम्रश्चिञ्चा विञ्जनिका आम्बिली इत्यर्थः । तलस्तालो नालिकेरी इत्येवमादयो भवन्ति फलवृक्षाः लोमसिका त्रपुषिका ताम्बूलीका इत्येवमादिका वल्ल्यः तदेवं वृक्षा वल्ल्यश्चोक्ताः ।

[भा.३७४०] परोग्गहं तु सालेणं अक्कमेज्ज महीरुहो ।
छिंदामित्ति य तेनुत्ते ववहारो तहिं भवे ।।

वृ- महीरुहो वृक्ष आम्रादिः सागारिकसक्तः । शालया गाथायां पुंस्त्वं प्राकृतत्वात् विवर्धमानः परावग्रहमाक्रमेत् । अत्र परो ब्रूते इयं शाखामदीयमवग्रहमाक्रामति । ततश्छिनह्मि एवं तेनोक्ते व्यवहारस्तत्र भवेत्कथमित्याह-

[भा.३७४१] सागारियस्स तहियं केवतिओ उग्गहो मुणेयव्वो ।
ववहार तिहा च्छिन्नो पासाय गडे बिती तिरिए ।।

वृ- सागारिकस्य शय्यातरस्य कियान् अवग्रहो ज्ञातव्य इति व्यवहारकारिभिश्चिन्तितं ततः शास्त्रं परिभाव्य व्यवहारस्त्रिधा ऊर्ध्वाधस्तिर्यगभेदतश्छिन्नः । तत्र ऊर्ध्वतोऽवग्रहस्य परिमाणे प्रासादो यावत्प्रमाणमूर्ध्वं प्रासादस्योक्तं तावदूर्ध्वमवग्रह इत्यर्थः । अधोऽवग्रह प्रमाणं पानीयं प्रमाणमित्यर्थः । तिर्यग्वृत्तिः एतदेवाह-

[भा.३७४२] उड्ढं अहे य तिरियं परिमाणं तु वत्थुणं ।
खायमुसियमीसं वा, तं वुच्छंति हो दिवं ।।

वृ- ऊर्ध्वमधस्तिर्यक्त्वपरिमाणं वास्तूनां भवति तच्च वास्तु त्रिधोदितं तद्यथा-खातमुच्छ्रितं मिश्रं च खातोच्छ्रितं तत्र ऊर्ध्वतः परिमाणमाह-

[भा.३७४३] अट्ठसयं चक्कीणं चोयट्ठी चेव वासुदेवाणं ।
बत्तीसं मंडलीए सोलसहत्था उ पागतिए ।।

वृ- अष्टाधिकं शतं हस्तानामूर्ध्वतश्चक्रवर्तिनां प्रासादो भवति । चतुःषष्टिर्वासुदेवानां द्वात्रिंशत् माण्डलिकस्य षोडशहस्ताः प्राकृतिके प्राकृतजनसम्बन्धिनि प्रासादे ।

[भा.३७४४] भवणुज्जाणादीनं एसुस्सेहो उ वत्थुविज्जाए ।
भणितो सिप्पिनिहिम्मि उ चक्कीमादीनि सव्वेंसि ।।

वृ- शिल्पिनिधौ वास्तुविद्यायां सर्वेषामपि चक्रवर्त्यादीनां भवनोद्यानादीनामेष उत्सेधो भणितस्ततः षोडशहस्ता ऊर्ध्वतोऽवग्रहस्य परिमाणमधो यावत् पानीयं तिर्यग्वृत्तिरिति ।

[भा.३७४५] एवं च्छिन्ने उ ववहारे परो भणइ सारियं ।
कप्पेमि हंते सालाई ततो भणइ (आह) सारितो ।।

वृ- एवमुक्तेन प्रकारेण व्यवहारे च्छिन्ने परः सागारिकं भणति कल्पयामि छिनह्मि अहं तवाम्रादिवृक्षसत्कं शाखादि, आदिशब्दात् प्रशाखापल्लवादिपरिग्रहस्तत आह सागारिकः ।

[भा.३७४६] मा से कप्पेहि सालादि दाहंते फलनिक्कयं ।
तत्थ च्छिन्ने अच्छिन्ने वा सुत्तसाफल्लमाहियं ।।

वृ- मा मम वृक्षस्य शाखादि कल्पय यतस्ते फलानि निष्क्रयं दास्यामि । तत्र एतावन्ति फलानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दातव्यानीति च्छिन्नं, सामान्यतः फलानि दातव्यानीत्यच्छिन्नंतत्र च्छिन्ने अच्छिन्ने वा यथायोगं सूत्रद्वयस्य साफल्यमाख्यातम् । अत्र पर आह-

[भा.३७४७] साहूणं व न कप्पइ सुत्तमाहु निरत्थयं ।
गेलन्नद्धाण उमेसु गहणं तेसि देसियं ।।

वृ- केचिदाहुः सूत्रद्वयमिदं निरर्थकं यतः साधूनामाम्राणि सचितत्वान्न कल्पन्ते । आचार्य आह- तेषामाम्रफलानां ग्लानत्वे अध्वनि शेषभिक्षाया अलाभे अवमौदर्ये च ग्रहणं देशितं कथितं महर्षिभिः । अतो न निरर्थकमिति-

[भा.३७४८] अविरिक्कसारिपिंडो विरिक्काविय सारि दिट्ठ न विकप्पे ।
अद्दिठ सारिएणं कप्पंति तहि घेत्तुं जे ।।

वृ- अविरक्तान्यविभक्तनि फलानि सागारिकपिंडस्ततो न कल्पते, विभक्तान्यपि च सागारिकेण दृष्टानि न वै कल्पन्ते ततो अदृष्टानि सागारिकेण ग्रहीतुं कल्पन्ते । जे इति पादपूरणे । उपसंहारमाह-

[भा.३७४९] एवं अत्तट्ठाए सयं परुढाण वावि भणियमिणं ।
इणमन्नो आरंभो समणट्ठा वाविए सम्मि ।।

वृ- एवमुक्तप्रकारेणात्मार्थमारोपितानां स्वयं वा प्ररुढानामिदमनन्तरोक्तं भणितम् । साम्प्रतमस्मिन् वृक्षे श्रमणार्थे वापिते अयं वक्ष्यमाणोऽन्य आरंभस्तमेव दर्शयति-

[भा.३७५०] वल्ली वा रुक्खो वा कोई रोएज्ज संजयठाए ।
तेसि परिभोगकाले समणाण तहिं कहं भणियं ।।

वृ- वल्लीर्वा वृक्षान्वा कश्चित्संयतानामर्थाय रोपयेत् । तत्र तेषां फलानां परिभोगकाले श्रमणानां कथं भणितं किं कल्पते किंवा न कल्पते इत्यर्थः । अत्र सूरिराह-

[भा.३७५१] तस्स कड निट्ठियादी चउरो भंगे विभावइत्ताण विसमेसु ।
जाण विसमं नियमा उ समो समग्गहणे ।।

वृ- तस्य कृतं तत्तस्य निष्ठितमिति प्रथमः, तस्य कृतमन्यस्य निष्ठितमिति द्वितीयः, अन्यस्य कृतं तस्य निष्ठितमिति तृतीयः, अन्यस्य कृतमन्यस्य निष्ठितमिति चतुर्थः । तत्र तस्य संयतस्य निमित्तं कृतमारोपितं वृक्षादि तथा तस्यैव संयतस्य निमित्तं निष्ठितं निष्टो नीतमचित्तीकृतमित्यिर्थः एष प्रथमभङ्गार्थः । एवं शेषाणामपिभङ्गानामर्थः परिभावनीयः, तत्र तस्य कृतं तस्य निष्ठितमिन्यादीन् चतुरो भङ्गान् विभाव्य विषमयोर्भङ्गयोर्गुह्णतोर्विषममसंयमं जानीयात्तन्निमित्तं निष्टानयनात् समयोर्द्वितीय-चतुर्थयोर्भङ्ग्योर्ग्रहणे समं संयमं जानीयात् अन्यनिमित्तं निष्ठितत्वात् । पर आह-ननु श्रमणार्थ स आरोपितस्ततः कथं द्वितीये भङ्गे कल्पते ? सूरिराह-

[भा.३७५२] कामं सो समणट्ठा वुत्तो तहवि य न होइ सो कम्मं ।
जं कम्मलक्खणं खलु इह हं वुत्तं न पस्सामि ।।

वृ- काममनुमन्यामहेस वृक्षः श्रमणार्थमारोपितः तथाप्यसौ कर्म न भवति यतो यत्कर्मलक्षणं खलु तीर्थकरगणधरैर्भक्तं, तदिह इ पाठ पूरणे, न पश्यामि किं तत्कर्म लक्षणमत आह-

[भा.३७५३] सचित्तभावविकलीकयंमि दव्वंमि मग्गणा होइ ।
कामग्गहणा उ दव्वे सचेयणे फासुभोईणं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यत्सचित्तभावविकलीकृतमचित्तीकृतं द्रव्यं तत्र प्रासुकभोजिनां मार्गणा भवति । तत आधाकर्मिकचिन्तापि तत्रैव युक्ता नान्यत्र सचेतने तु द्रव्ये का मार्गणा नैव काचित् सचित्ततया तस्य ग्रहणासंभवात्ततो न तदपेक्षया आधाकर्मिकत्वमिति, तदेवमारोपितरुपकृतनिष्ठितविषये कल्प्याकल्प्यविधिरुक्तः । सम्प्रति च्छिन्नरुपकृतनिष्ठितविषये तमाह-

[भा.३७५४] संजयहेउं छिन्नं अत्तट्ठोवक्खडं तु तं कप्पे ।
अत्तट्ठाच्छिन्नं पि हु समणा निट्ठियमकप्पं ।।

वृ- अत्रापि भङ्गचतुष्टयं तस्य कृतं तस्य निष्ठितं १ तस्य कृतमन्यस्य निष्ठितं २ अन्यस्य कृतं तस्य निष्ठितं ३ अन्यस्यकृतमन्यस्य निष्ठितं ४ । अत्र कृतं च्छिन्नंपाकादिकरणतो निष्ठां नीतम् । तत्र प्रथमभङ्गे सर्वथा न कल्पते । चतुर्थस्तु भङ्ग एकान्तशुद्धो द्वितीयभङ्गमधिकृत्य पूर्वार्धमाह-संयतहेतोःसंयतनिमित्तं च्छिन्नमात्मार्थमुपस्कृतं निष्ठां नीतं तत्कल्पते तृतीयभङ्गमधिकृत्याह-आत्मार्थं च्छिन्नमपि श्रमणार्थ-निष्ठितमकल्प्यं । सम्प्रति बीजान्युदकं चाधिकृत्याह-

[भा.३७५५] बीयाणी च बावेज्ञा अगडं व खणेज्ञ संजयट्ठाए ।
तेसि परिभोगकाले समणाणं तहिं कहं भणियं ।।

वृ- बीजानि शाल्यादि सत्कानि वपेत् अवटं च खानयेत् संयतार्थे, तेषां परिभोगकाले तत्र श्रमणानां कथं भणितं कल्प्यमकल्प्यं वा । सूरिराह-

[भा.३७५६] दुच्छड्डाणियं च उदयं जइ हेउं निट्ठियं च अत्तट्ठा ।
तं कप्पइ अत्तट्ठा कयं तु जइ निट्ठियमकप्पं ।।

वृ- अत्रापि प्रागिव भङ्गचतुष्टयं । तत्राद्यो भङ्ग एकान्तेनाशुद्धश्चरमस्त्वेकान्तशुद्धः द्वितीयभङ्गमधि-कृत्याह-यतिहेतोस्तण्डुला द्विच्छडीकृता उदकं वा संयतहेतोरवटादानीतं उभयसमपि च निष्ठितम-चित्तीकृतमात्मार्थे तत् कल्पते । तृतीयभङ्गमधिकृत्याह-कृतं द्विच्छटीकृतास्तण्डुला अवटादानीतं पानीयं निष्ठितं तु यतिनिमित्तं तदकल्प्यमिति पुनरपि पर आह-

[भा.३७५७] समणाण संजतीण व दाहामि जो किणेज्ञ अट्ठाए ।
गावीमहिसीमादी समणाण तहिं कहं भणियं ।।

वृ- श्रमणानां संयतीनां दुग्धादि दास्यामीति बुद्ध्या तेषामर्थाय गोमहिष्यादिकं यः क्रीणीयात्तत्र श्रमणानां कथं कल्प्यमकल्प्यं वा भणितं सूरिराह-

[भा.३७५८] संजयहेउं दूढा न कप्पए य सयमट्ठा ।
पामिच्चिय कीया वा जइ वि समणट्ठया धेनू ।।

वृ- यद्यपि च धेनुर्गोरुपा महिषीरुपा वा श्रमणार्थमयमित्यात्मीयां धेनुं दत्वा परकीया याचिता क्रीता वा यदि संयतहेतोर्दुग्धा ततो न कल्पते । अथ स्वयमात्मनोऽर्थाय दूग्धा तर्हि कल्पते ।

[भा.३७५९] चेइयदव्वं विभया करेज्ञ केई नरो सयट्ठाए ।
समणं वा सोवहियं विक्केज्ञा संजयट्ठाए ।।

वृ- चैत्यद्रव्यं चौराः समुदायेनापहृत्य तन्मध्ये कश्चिन्नर आत्मीयेन भागेन स्वयमात्मनोऽर्थाय मोदकादि कुर्यात् । कृत्वा च संयतानां दद्यात् ।

[भा.३७६०] एयारिसंमि दव्वे समणाण किंतु कप्पई धेत्तुं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चेइयदव्वेण कयं मुल्लेण वज्जं सुविहियाणं ।।

[भा.३७६१] तेन पडिच्छा लोए विगरहिया उत्तरे किमंग पुन ।
चेइय जइ पडिनीए जो गेण्हइ सावि हु तहेव ।।

वृ- एतादृशेन द्रव्येण, गाथायां सप्तमी तृतीयार्थे, यत् आत्मार्थे कृतं तत् श्रमणानां किं नु ग्रहीतुं कल्पते । सूरिराह-यच्चैत्यद्रव्येण यच्च वा सुविहितानां मूल्येनात्मार्थे कृतं तद्दीयमानं न कल्पते किं कारणमिति चेदुच्यते स्तेनानीतस्य प्रतीच्छा प्रतिग्रहणं लोकेऽपि गर्हिता किमङ्ग पुनरुत्तरे तत्र सुतरां गर्हिता यतश्चैत्ययतिप्रत्ययनीके चैत्ययतिप्रत्यनीकस्य हस्तात् यो गृह्णाति सोऽपि हु निश्चित्तं तथैव चैत्ययति-प्रन्यनीक एव । कस्मादित्याह-

[भा.३७६२] हरिया हडिया सा खलु ससत्तितो उग्गये हरा गुरुगा ।
एवं तु कया भत्ति न वि हानि जा विना तेन ।।

वृ- स खलु स्तेनानीतप्रतीच्छा हृताहृतिका भण्यते स्तेनैर्हृतस्य स्तेनहरणं हृताहृतिका यत एवं तस्मात्स्वशक्तितश्चैत्यद्रव्यं सोपधिकं वा श्रमणमुद्गमयेत् उत्पादयेत् । इतरथा प्रायश्चितं चत्वारो गुरुकाः । एवं च सति कृता भक्तिर्भवति । प्रवचनस्य या च तेन विना हानिः, सापि न भवति, पुनः पृच्छति-

[भा.३७६३] जा तित्थयराणं कया वंदन आविरसनादि पाहुडिया ।
भत्तीहिं सुरवरेहिं समणाण तहिं कहं भणियं ।।

वृ- या तीर्थकराणां सुरवरैर्भक्त्या वन्दना वर्षणादिका आदिशब्दात् पुष्पवृष्टिप्रकारत्रयादिकरणपरिग्रहः प्राभृतिका कृता तत्र श्रमणानां कथं भणितं । किं तत्र स्थातुं कल्पते न वा अत्र सूरिराह-

[भा.३७६४] जइ समणाण न कप्पइ एयं एगानि या जिनवरिंदा ।
गणहरमादी समणा अकप्पए न वि य चिट्ठति ।।

वृ- तस्यां प्राभृतिकायां श्रमणानामवस्थातुं कल्पते भगवतः प्रवचनातीतत्वात् । अन्यच्च यदि श्रमणानां न कल्पते तत एकाकिनो जिनवरेन्द्रा भवेयुर्यतो गणधरादयः श्रमणा अकल्पिकेनैव तिष्ठन्ति ।

[भा.३७६५] तम्हा कप्पइ ठाउं जह सिद्धायणंमि होइ अविरुद्धं ।
जम्हा उ न साहम्मी सत्था अम्हं ततो कप्पे ।।

वृ- तस्मात्कल्पते स्थातुं यथा सिद्धायतने भवत्यवस्थानमविरुद्धं, तथात्रापीति भावः । यस्मात् शास्ता तीर्थकरोऽस्माकं न साधर्मिकः प्रवचनातीतत्वात्ततः कल्पते एतदेवाह-

[भा.३७६६] साहम्मियाण अट्ठो चउव्विहो लिंगओ जह कुटुंबी ।
मंगल सासयभत्तीए जं कयं तत्थ आदेसो ।।

वृ- साधर्मिकाणामर्थाय कृतं न कल्पते, स च चतुर्विधस्तत्र लिङ्गतोऽसाधर्मिकस्तीर्थकरो यथा कुटुम्बी, ततस्तस्मिन्निमित्तं कृतं कल्पते, अन्यच्च भगवतां मङ्गलनिमित्तं शाश्वतो मोरस्तन्निमित्तं वा भक्त्या यत्क्रियते समवसरणमायतनं नत्रादेशोऽनुज्ञावस्थानस्येति भावः । सम्प्रत्यतिप्रसङ्गनिवारणार्थमाह-

[भा.३७६७] जइ वि य नाहाकम्मे भत्तिकयं तह विवज्जियं तेहिं ।
भत्ती खलु होति कया जिनान लोगेवि दिठं तु ।।

वृ- यद्यपि भक्तिकृतमायतनादि भवति तत्राधाकर्म तथापि तद्वर्जयद्भिः खलु भक्तिर्जिनानां कृता भवति । इदं तु लोकेऽपि दृष्टं तदेव दर्शयति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३७६८] बंधित्ता कासवतो वयणं अट्ठपुडसुद्ध पोत्तीए ।
पत्थिवमुवासते खलु वित्तिनिमित्तं भया चेव ।।

वृ- काश्यपः कौटुम्बिको वृत्तिनिमित्तं भयाद्वा पार्थिवमुवास्ते खल्वष्टपुट्या शुद्धया पोतिकया वदनं मुखं बध्वा एवमत्रापि पार्थिवस्थानीयायास्तीर्थकरप्रतिमाया भक्तिनिमित्तं नायतनं प्रविशन्ति को दोष इत्यत आह-

[भा.३७६९] दुब्भिगंध परिस्सावी तनुरप्पे सण्हाणिया ।
दुहा वायु वहो चेव तेन ठंति न चेतिए ।।

[भा.३७७०] तिनि वा कड्डए जाव थुतितो तिसिलोइय ।
तावत्थ अनुन्नायं कारणंमि परेण वि ।।

वृ- एषा तनुः स्नापितापि दुरभिगन्धप्रस्वेदपरिश्राविणी तथा द्विधा वायवोऽधोवायुनिर्गमः (१) उच्छ्वासनिःश्वासनिर्गमश्च (२) । तेन कारणेन चैत्ये चैत्यायतने साधवो न तिष्ठन्ति । अथवा श्रुतस्तवानन्तरं तिस्रः श्रुतीः त्रिश्लोकिकाः श्लोकत्रयप्रमाणा यावत्कर्षति तावत्तत्र चैत्यायतने स्थानमनुज्ञातं, कारणेन कारणवशात्परेणाप्यवस्थानमनुज्ञातमिति-

मू. (२३७) *सत्तसत्तमिया नं भिक्खूपडिमा एगूणपन्नए राइंदिएहिं एगेन छन्नउएणं भिक्खासएण अहासुत्तं अहाकप्पं अहामग्गं अहातच्चं अहासम्मं फासया पालिया तीरिया किट्टिया आणाए अनुपालिया भवइ ।।*

[भा.३७७१] सागारिय अग्गहणे अन्नाउंछं फुडं समक्खायं ।
सो होउ भिग्गहो खलु पडिमा य अभिग्गहो चेव ।।

[भा.३७७२] अन्नाउंछं विसुद्धं घेत्तव्वं तस्स परीमाणं किं ।
कालंमि य भिक्खासु य इति पडिमासुत्तसंबंधो ।।

वृ- पूर्वसूत्रेषु सागारिकपिण्डो न ग्राह्य इत्युक्तं सागारिकपिंडाग्रहणे स्फुटमज्ञातोञ्छग्रहः खलु भवत्यभिग्रहः प्रतिमाप्यभिग्रहं अभिग्रहप्रस्तावात्सागारिकसूत्रानन्तरं प्रतिमासूत्रस्योपनिपातः । अथवान्यथा सम्बन्धः सागारिकपिण्डप्रतिषेधतोऽज्ञातोञ्छविशुद्धं ग्रहीतव्यमित्याख्यातं, तस्य भिक्षाकालेषु किं परिमाणमिति प्रश्नावकाशमाशङ्क्य प्रतिमासूत्रमुपन्यस्तवान् । एष प्रतिमासूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-सप्तसप्तका दिनानां यस्याः सा सप्तसप्तकिकाः सप्तकशब्दककारस्य मकारः प्राकृतत्वात् । नमिति वाक्यालङ्कारे भिक्षुप्रतिमा एकोनपञ्चाशता रात्रिंदिवैरेकेन षन्नवतेन भिक्षाशतेन यथासूत्रं सूत्रानतिक्रमेण यावत्करणात्- 'अहाकप्पं अहामग्गं जाव किट्टिया अनुपालिया भवति' इति परिग्रहस्तत्र यथाकल्पं यथाविधि सूत्रोक्तविध्यनतिक्रमेणेत्यर्थः । यथामार्गं ज्ञानदर्शनचारित्राणामविराधनेन । अहातच्चंति यथातथ्यमेकान्ततः सूत्रानुसारेणापादितसत्यां अहासम्मं यथा सम्यक् त्रिविधेनापि योगेनापरिताम्यता सम्यक्करणं । स्पर्शिता सेविता । विराधना रक्षणतः। अत एव शोधिता अतीचारलेशेनाप्यकलङ्कनात् । तीरिता तीरं नीता पर्यन्तनीता इत्यर्थः । कीर्तिता आचार्याणां कथिता यथा प्रतिमा मया समाप्ता । आज्ञया तीर्थकरोपदेशेन अत्र पालिता भवति । एवमष्टाष्टकिका नवनवकिका दशदशकिका सूत्राण्यपि भावनीयानि-

मू. (२३८) *अट्ठअट्ठमियाणं भिक्खुपडिमा चउसट्ठिए राइंदिएहिं दाहिय अट्ठासिएहिं भिक्खासएहि*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहासुत्तं जाव अनुपालिया भवइ ।

मू. (२३९) *नवनवमियाणं भिक्खुपडिमा एगासीए राइंदिएहिं चउ हियपंचुत्तरेहिं भिक्खासएहि अहासुत्तं जाव अनुपालिया भवइ ।।*

मू. (२४०) *दस दसमियाणं भिक्खु पडिमा एगेणं राइंदियसएणं अद्धछट्ठेहिय भिक्खासएहिं अहा सुत्तं जाव अनुपालिया भवइ ।।*

वृ- विशेषस्तु पाठसिद्धः । एष सूत्रचतुष्टयसंक्षेपार्थः ।

[भा. ३७७३] अह सुत्तसुत्तदेसा कप्पो उ विधिए मग्गनाणादी ।
तच्च तु भवे तत्थं सम्मं जं अपरितंतेन ।।

[भा. ३७७४] फासियजोगतिएणं पालियमविराहि सोहिते चेव ।
तीरियमंतंपाविय किट्टिय गुरु कहणा जिनमाणा ।।

वृ- यथा सूत्रमिति सूत्रादेशात् यथाकल्पमित्यत्र कल्पो विधिर्यथामार्गमित्यत्र मार्गो ज्ञानादि । यथा तथ्यमित्यत्र तच्चं नाम तथ्यं, यथा सम्ममिति सम्यग् नाम यदपरिताम्यताकरणं, स्पर्शिता योगत्रिकेण सेविता पालिता अविराधिता शोधिताप्येवमेव अविराधनेनै वेत्यर्थः । तीरिता अंतं प्रापिता, कीर्तिता गुरुणां कथनतः आज्ञा जिनस्य तीर्थकृतः द्वितीया षष्ठ्यर्थः प्राकृतत्वात् ।

[भा. ३७७५] पडिमा उ पुव्वभणिया पडिवज्जइ को तिसंघयणमादी ।
नवरं पुन नाणत्तं कालच्छेए य भिक्खासु ।।

वृ- प्रतिमा भिक्षोः प्रतिमाः पूर्वमाचारदशासु भणिताः ताः कः प्रतिपद्यते ततः आह-तिसंघयणत्ति आद्येषु त्रिषु संहननेषु अन्यतर संहननोपेतः प्रतिपद्यते, चतुर्थादिषु तु संहननेषु वर्तमानो न प्रतिपद्यते । आदिशब्दात्सोऽपि सूत्रार्थतदुभयोपेतो गच्छे कृतपरिकर्मा सातिशयो न निरतिशयो निरतिशय इति परिग्रहः । तृतीयं च संहननं यावदार्यरक्षितस्तावदनुवृत्तं । ततः आरतो व्यवच्छिन्नं नवरं पुनर्नानात्वमत्र कालच्छेदे भिक्षासु च तत्र कालच्छेदमाह-

[भा. ३७७६] एगूणपन्नच्चउसट्ठि गासती सयं बोधव्वं ।
सव्वासिं पडिमाणं कालो एसत्ति तो होइ ।।

वृ- सप्तसप्तिकायाः काल एकोनपञ्चाशत् रात्रिं दिवानि अष्टा अष्टकिकायाः चतुःषष्टिर्नवनवकिकाया एकाशीतिर्दशदशकिकायाः शतं रात्रिंदिवानां बोद्धव्यं । सर्वाप्रतिमानामधिकृत-सूत्रचतुष्टयोपेतानामेष एतावान् भवति कालः । कथं पुनः सप्तसप्तकिका भवतीत्यत आह-

[भा. ३७७७] पढमाए सत्तगा सत्तपढमे तत्थ सत्तए ।
एक्केक्कं गेण्हई भिक्खं बिइए दोन्नि दोन्निओ ।।

[भा. ३७७८] एवमेक्केक्कियं भिक्खं छुब्भिज्जेक्केक्कसत्तगे ।
गेण्हती अंतिम जाव सत्तसत्त दिनेदिने ।।

वृ- प्रथमायां प्रतिमायां सप्तसप्तकिका भवन्ति । तत्र प्रथमे सप्तके प्रतिदिवसमेकैकां भिक्षां गृह्णाति । द्वितीये सप्तके प्रतिदिवसं द्वे द्वे भिक्षे । एवं तृतीयादिषु सप्तकेष्वेकैकेषु एकैकां भिक्षामयिकां प्रक्षिपेत यावदन्तिमे सप्तके दिने दिने सप्त सप्तभिक्षा गृह्णाति । इयमत्र भावना-तृतीये सप्तके प्रतिदिवसं । तिस्र-स्तिस्रो भिक्षा गृह्णाति । चतुर्थे चतस्रश्चतस्रः पञ्चमे पञ्च पञ्च, षष्ठे षट् षट्, सप्तमे सप्त सप्तेति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३७७९] अहवा एक्किक्कियं दत्तिजा सत्तक्केक्कसत्तए ।
आदेसो आत्थि एसोवि सीहविक्कमसन्निभो ।।

वृ- अथवा एष द्वितीयोऽप्यादेशो यथा एकैकस्मिन् सप्तके प्रत्येकं प्रथमदिनादारभ्य प्रतिदिवसमेकैकां वर्धयेत् यावत् सप्तमे दिवसे । इयमत्र भावना-प्रथमे सप्तके प्रथमे दिवसे दिवसे एकां भिक्षां गृह्णाति, द्वितीये द्वे, तृतीये तिस्रः, चतुर्थे चतस्रः, पञ्चमे पञ्च, षष्ठे षट् सप्तमे सप्त एवं द्वितीये तृतीये चतुर्थे पञ्चमे षष्ठे सप्तमे च सप्तके द्रष्टव्यं एव आदेशः सिंहविक्रमसंनिभः यथा सिंहो गत्वा गत्वा पृष्ठतः प्रलोकयते, एवमेषोऽपि सप्तके सप्तके पुनर्मूलतः परावर्तते । गतः कालच्छेदः । संप्रति भिक्षापरिमाणमाह-

[भा.३७८०] छन्नउयभिक्खसयं अट्ठासीया य दोसया हुंति ।
पंचुत्तरा य चउरो अच्छट्ठासया चेद ।।

वृ- सप्त सप्तकिकायां भिक्षापरिमाणं षन्नवतं, शतमष्टाष्टकिकामामष्टशीते द्वेशते भिक्षाणां, नवनवकिकायां पञ्चोत्तराणि चत्वारि शतानि, दशदशकिकायामर्धषष्ठानिशतानि भिक्षाणामिति ।

[भा.३७८१] उद्दिट्ठवग्गदिवसा मूलगुणसंजुया दुहा छिन्ना ।
मूलेणं संगुणिया मानं दत्तीण पडिमासु ।।

[भा.३७८२] पदगयसु वेयसुत्तरसमाहयं दलियमादिना ।
सहियं गच्छगुणं, पडिमाणं भिक्खमाणं मुणेयव्वं ।।

वृ- उद्दिष्टा ये च वर्गाः सप्त सप्तकिकादयः ते दिवसा मूलदिनसंयुताः सप्तादिदिनसन्मिश्राः तदनन्तरं द्विधा छिन्ना अर्धी क्रियन्ते इति भावअ । ततो मूलेन सप्तादिलक्षणेन संगुण्यन्ते संगुणिताः प्रतिमासु दत्तीनां परिमाणं भवन्ति तद्यथा-सप्तसप्तकवर्गदिवसा एकोनपञ्चाशत् ते मूलदिनैः सप्तभिर्युताः क्रियन्ते जाताः षट्पञ्चाशत्, ते अर्धीक्रियन्ते जाता अष्टाविंशतिः, सा मूलेन सप्तकेन गुण्यते आगतं षन्नवतं शतं । तथा अष्टाष्टकवर्गा दिवसा श्चतुःषष्टिः ते मूलदिनैः अष्टभिः संमिश्यन्ते जाताः द्वासप्ततिस्तस्या अर्धं क्रीयते जाता षट् त्रिंशत् सा मूलेन अष्टकेन गुन्नते आगते द्वेशते अष्टाशीते । एवं नवनवकिकायां दशदशकिकायां च यथोक्तं भिक्षापरिमाणमानेतव्यम् । अत्रैव करणान्तरमाह-

[भा.३७८३] गच्छुत्तर संविग्गे उत्तरहीणं पक्खिवे आदि ।
अंतिमधनमादिजुयं गच्छद्धगुणं तु सव्वधनं ।।

वृ- गच्छ उत्तरेण संवर्गे संवर्ग्यतेस्म, । संवग्गो गुणित इत्यर्थः । तस्मिन् उत्तरेण हीणे कृते आदिं प्रक्षिपेत् तत अन्तिमधनमागच्छति तदन्तिमधनमादियुतं क्रियते तदनन्तरं गच्छार्धगुणं ततः सर्वधनमागच्छति । तत्र सप्तसप्तकिकायां सप्त आदिः सप्त उत्तरं सप्त गच्छः । ततः सप्तलक्षणो गच्छ उत्तरेण सप्तकलक्षणेन गुण्यते जाताः एकोनपञ्चाशत् । सा उत्तरेण सप्तकेन हीना क्रियते कृत्वा च पुनरादिना सप्तकेनै व युताकर्तव्या । इदं कारणमन्यत्रपि व्यापकं तत एवमुक्तमन्यथाचोत्तरं हानावादिप्रक्षेपे च न कश्चिद्विशेषः तस्या एव एकोनपञ्चाशतो भावात् । तदन्तिमधनं सप्तमे सप्तके भिक्षापरिमाणमित्यर्थः । एतत् आदिना सप्तकेन युतं क्रियते जाता षट् पञ्चाशत् । सा गच्छार्धेन गुण्यते । अत्र गच्छः सप्तकः । स विषमत्वादर्धं न प्रयच्छति ततो गुण्यो राशिः षट्पञ्चाशल्लक्षणोऽर्धी क्लियते । जाता अष्टाविंशति । सा परिपूर्णेन सप्तकलक्षणेन गच्छेन गुण्यते, जातं षन्नवतं शतं । अष्टाष्टकिकायामष्टक आदिरष्टक उत्तरमष्टको गच्छः तत्राष्टकलक्षणो गच्छ उत्तरेणाष्टकेन युतं क्रियते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जाता चतुः षष्टिः सा उत्तर हीना आदियुता क्रियते । तथापि सैव । चतुः षष्टिरेतत् अष्टमेऽष्टके भिक्षापरिमाणं एतदादिना अष्टकेन युतं क्रियते जाता द्वासप्ततिः । सागच्छार्धेन चतुष्केन गुण्यते जाते द्वेशतेऽष्टाशीत्यधिके एवं नवनवकिकायां दशदशकिकायां च भावनीयं नवरं नवनवकिकायां नवक आदिर्नवक उत्तरं नवको गच्छो दशदशकिकायां दशक आदि दशकं उत्तरं दशको गच्छः ।

मू. (२४१) *दोपडिमाओ पन्नताओ, तंजहा खड्डिया वा मोयपडिमा महल्लिया वा मोयपडिमा ।*

मू. (२४२) *खुडियन्नं मोयपडिमं पडिवन्नस्स अनगारस्स कप्पइ, से पढमनिदाहकालसमयंसि वा चरमनिदाहकालसमयंसि वा बहिया गामस्स वा जाव रायहानीए वा वणंसि वा वनदुग्गंसिया वा पव्वयंसि वा पव्वयदुग्गंसि वा भोच्चा आरुभइ चोदसमेण पारेइ, अभोच्चा आरुभइ, सोलसमेणं पारेइ, जाए मोए आईयव्वे दिया आगच्छेइ ।*

मू. (२४३) *महल्लियणंमोयपडिमं जाव पव्वयदुग्गंसिवा, भोच्चा आरुभइ सोलसमेणं पारेइ, अभोच्चा आरुभइ अट्ठारसमेणं पारेइ जाए जाए मोए आइयव्वे दिया आगच्छइ ।*

[भा.३७८४] पडिमाहिगारपगते हवंति मोयपडिमा इमा दोन्नि ।
ता पुन गणम्मि वुत्ता इमा उ बाहिं पुरादीनं ।।

वृ- प्रतिमाधिकारः प्रकृतस्तः इमेऽपि द्वे मोकप्रतिमे इह भवतः प्रतिमाप्रस्तावादिमे अपि प्रतिमे अत्रोपन्यस्ते इति भावः । केवलमयं विशेषः । ता अनन्तरोदिताः प्रतिमा गणे स्थितस्योक्ता इमे पुनः पुरादीनां बहिः स्थितस्येति सम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-द्वे प्रतिमे प्रज्ञप्ते तद्यथा क्षुल्लिका च मोकप्रतिमा महती च मोकप्रतिमा मोक कायिकी । तदप्युत्सर्गप्रधानाप्रतिमा मोकप्रतिमा । तत्र क्षुल्लिकाणामिति प्राग्वत् । मोकप्रतिमां प्रपन्नस्यानगारस्य कल्पते से तस्य प्रथम निदाघकालसमये वा चरमनिदाघकालसमये वा बहिर्ग्रामस्य वा यावत्करणान्नगरादिपरिग्रहो राजधान्यां वा वने वा एकजातीयद्रुमसङ्घातो वनं, विदुर्गे वा नानाजातीयद्रुमसंघाते, पर्वते, प्रतीते, पर्वतविदुर्गे अनेकपर्वतसंघातरूपे मुक्त्वा यदि प्रतिमामारोहति प्रतिपद्यते, तदा चतुर्दशेन भक्तेन पारयति समापयति अथा भुक्त्वा आरोहति तदा षोडशकेन भक्तेन पारयति, तेन च जातं मोकं कायिकी पातव्यं आगमने च दिवा आगच्छति । एवं महत्या अपि प्रतिमायाः सूत्रं वाच्यं । विशेषोऽपि पाठसिद्ध एव ।

[भा.३७८५] सव्वातो पडिमातो साधुं भोयंति पावकम्मेहिं ।
एएण मोयपडिमा अहिगारो इहं तु मोएण ।।

वृ- मोचयति पापकर्मभ्यः साधुमिति मोकाउद्यादित्वादन्यदपि कुर्वन्ति सा चासौ प्रतिमा च मोकप्रतिमा । एतेनान्वर्थेन सर्वा अपि प्रतिमाः साधुं पापकर्मभ्यो मोचयन्तीति कृत्वा मोकप्रतिमाः प्राप्नुवन्ति । ततो विशेषप्रतिपादनार्थमिहाधिकारः । प्रयोजनं मोकेन मोका परित्यागप्रधाना प्रतिमा मोकप्रतिमेति । सम्प्रति विषमपदव्याख्यानमाह-

[भा.३७८६] एगदुमो होइ वनं एगजातीयजे जहिं रुक्खा ।
विवरीयं तु विदुग्गं एसे व य पव्वए विगमो ।।

वृ- एकद्रुम एकजातीया ये वृक्षास्ते यत्र विद्यन्ते तत् भवति वनं । नानाजातीयद्रुमरूपं विदुर्ग । एष एव गमः पर्वतेऽपि द्रष्टव्यः नानारूपपर्वतः पव्रतविदुर्ग । सम्प्रति येन विधिना बहिर्निर्गच्छति तं विधिमाह-

[भा.३७८७] निसज्जं च चोलपट्टं कप्पं घेत्तूणमत्तगं चेव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एगंते पडिवज्जति काऊण दिसाणं वालोयं ।।

वृ- निषद्यां सोत्तरां चोलपट्टकल्पं मात्रकं च कायिकिमात्रकं गृहीत्वा ग्रामादेर्बहि र्विनिर्गच्छति। विनिर्गत्यैकान्ते प्रतिमां प्रतिपद्यते । तत्र कायिकीसमागमे तां भात्रके व्युत्सृज्यानापाते असंलोके दिशं वा लोकं कृत्वा आपिवति । यद्यपि स ज्ञानातिशयाऽतिशयज्ञानेनैव जानाति सागारिकोऽस्ति न वेति तथापि सामाचारी पालिता भवत्विति कृत्वा दिशमालोकं कृत्वा व्युत्सृजत्यापिवति च ।

[भा.३७८८]　पाउणइ तं पवाए तत्थ निरोहेन जिज्झए दोसा ।
सिण्हाए परित्तणं व कुणति अच्चुण्हवाते वा ।।

वृ- तं कल्पं प्रतिवाते प्रवृत्ते प्रावृणोति तत्र च प्रावरणे कृते वातनिरोधेन यः प्रवाते वातसंपर्केणापादितो दोषः जीर्यते । यदि वा स कल्पः सिण्हादि परित्ताणं श्लक्ष्णादि सचित्तरजः परित्राणं करोति, । अथवा अत्युष्णे वाते वाति स प्रावृयते, मोकमाषिवेदित्युक्तं तत्र मोकस्वरुपमाह-

[भा.३७८९]　साभावियं च मोयं जाणइ जं वावि होइ विवरीयं ।
पाणबीयससणिद्धं ससक्खाधिराय न पिएज्जा ।।

वृ- स प्रतिमाप्रतिपन्नो यन्मोकं स्वाभाविकं यच्च भवति विपरीतं तत्सर्वं जानाति । तत्र स्वाभाविक-मापिवती । इतरत् विपरीतं प्राणसंसक्तं बीजसन्मिश्रसस्निग्धं सरजस्काधिराजकलितं न पिबति ।

[भा.३७९०]　किमिकुट्ठे सिया पाणा ते य उण्हाभितावियां ।
मोएण सह मेज्जण्हु निसिरेते उ छाहिए ।।

वृ- कृमिसंकुलं कोष्टमुदरं कृमिकोष्टे स्युः प्राणाः कृमिरुपास्ते चोत्रेनाभितापिताः सन्तो मोकेन कायिक्या सार्धमागच्छेयुस्ततस्तात् छायायां निसृजेत् । बीजादिप्रतिपादनार्थमाह-

[भा.३७९१]　बीयं तु पोग्गला सुक्का ससणिद्धा उ चिक्कणा ।
पडंति सिथिले देहे खमणुण्हाभितावियां ।।

वृ- बीजं नाम शौक्राः पुद्गलास्ते च द्विधा चिक्कणा अचिक्कणाश्च । तत्राचिक्कणा बीजग्रहणेन गृहीता-श्चिक्कणाः सस्निग्धा उच्यन्ते । ते उभयेऽपि शिथिले देहे क्षपणेनोष्णेन तापिताः सन्तः पतन्ति ।

[भा.३७९२]　पमेहकणिया तो य सरक्खं पाहु सूरयो ।
सो उ दोसकरो वुत्तो तं च कज्जं न साहए ।।

वृ- प्रमेधकणिकाः सरजस्कं पदैकदेशे पदसमुदायोपचारात् सरजस्काधिराजं प्राहुः सूरयः, स च सरजस्काधिराज आपीयमानो दोषकर उक्तः । तच्च कार्यं रोगविमुक्तिलक्षणं न साधयति । ततः सोऽपि न पीयते ।

[भा.३७९३]　बहुगा होइ मत्ता ऊ आइल्लेसे दिनेसु उ ।
कमेण हायमानी उ अंतिमे होइ वा न वा ।।

वृ- आदिमेषु कायिकी मात्रातो बह्वी भवति ततः क्रमेण हीयमाना अन्तिमे दिने भवति वा न वा ।

[भा.३७९४]　पडिणी अनुकंपा वा मोयं वद्धंति गुज्झगा केई ।
बीजादिजुयं जं वा विवरीयं उज्झाए सव्वं ।।

वृ- प्रत्युनीकोऽनुकम्पत इत्यनुकम्पता केचित् गुह्यका मोकं कायिकी वर्धयन्ति, यद्वा बीजादियुतं कुर्वन्ति, । सर्वमेतत् स्वाभाविकं न भवति । किन्तु विपरीतमतस्त्यजति सम्प्रति द्रव्यादितो मार्गणामाह-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

[भा.३७९५] दव्वे खेत्ते काले भावंमि य होइ सा चउविगप्पा ।
दव्वे उ होइ मोयं खेत्ते गामायाण बहिं ।

[भा.३७९६] काले दिया व रातो भावे साभाविवं व इयरं वा ।
सिद्धाए पडिमाए कप्पविमुक्को हवइ सिद्धो ।।

[भा.३७९७] देवो महड्ढितो वावि रोगातो ऽहवा मुच्चती ।
जायती कणगवन्नो उ आगते य इमो विही ।।

वृ-सा क्षुल्लिका मोकप्रतिमा चतुर्विकल्पा चतुराश्रिता भवति । तद्यथा द्रव्ये क्षेत्रे काले भावे च । तत्र द्रव्ये भवति मोकमापातव्यं, क्षेत्रे ग्रामादीनां बाहः काले दिवा रात्रौ वा । भावे तन्मोकं स्वाभाविकमितरद्वा । तत्र स्वाभाविकमाविपत(पिब) ति इतरच्यजति । अस्यां च प्रतिमायां सिद्धायां कश्चित्कालं कुर्वन् कर्मविमुक्तः सिद्धो भवति । यदि वा देवो महर्द्धिकः अथवा काले कारणाभावे रोगाद्विमुच्यते । शरीरेण कनकवर्णो जायते, 'पालितायां प्रतिमायामुपाश्रयमागतस्यायं वक्ष्यमाणो विधिस्तमेवाह-

[भा.३७९८] उण्होदगे य थोवे तिभागमद्धे तिभाग थोवे य ।
महुरगभिन्ना महुरगएक्केक्कं सत्तदिवसाइं ।।

वृ- उष्णोदकादिकमधिकृतगाथोपन्यस्तमुक्तक्रमेण एकैकं सप्तदिवसान् कुर्यादिति गाथापदयोजना । भावना त्वियम्-सप्तदिवसानुष्णोदकेन ओदनं भुंक्ते । च शब्दात् द्वितीयान् सप्तदिवसान् यूषमाण्डेन यापयेत् एतदेवाह-

[भा.३७९९] ओयणं सिणोदएणं दिने सत्त भुंजिउं ।
जूसमंडेण वा अन्न दिनो जावेइ सत्तओ ।।

वृ-पाठसिद्धं थोवत्ति अन्यान् तृतीयान् सप्तदिवसान् त्रिभागे उष्णादके स्तोकं मधुरमोल्लणं मिश्रयित्वा तेन सह भुंक्ते, तिभागेत्ति तदनन्तरमन्यान् सप्तदिवसान् मधुरस्योल्लणस्य त्रिभागं द्वौ भागावुष्णोदकस्य मीलयित्वा तेन सह भुंक्ते अद्धे इति ततः परमन्यान् सप्तदिवसानर्थ मधुरोल्लणस्य मिश्रयित्वा तेन सह कूरं भुंक्ते तिभागत्ति तदनन्तरमन्यात्सप्तदिवसान् त्रिभागमुष्णोदकस्य द्वौ भागौ मधुरोल्लणस्य मिश्रयित्वा तेन सह भुंक्ते । थोवेयत्ति ततः परमन्यान् सप्तदिवसान् मधुरोल्लणोस्तोकमुष्णोदकं प्रक्षिप्य तेन सह भुंक्ते । एवं पञ्चमसप्तकान् मधुरकभिन्नान् स्तोकोदकान् मधुरकसहितान् भुंक्ते । एतदेवाह-

[भा.३८००] मधुरोल्लणेण थोवेण मीसे तइयसत्तए ।
तिभागव्वजुयं चेव तिभागो थोवमिस्सियं ।।

वृ-पूर्वव्याख्यानुसारेणेयं गाथा स्वयं भावनीया अधिकार्थाभावात् तदन्तरमन्यान् मधुरकेण उल्लणेन सह उपलक्षणमेतत् । अन्यैर्वायूषप्रकारैः सह भक्तं भुंक्ते । ततः परमन्यान् सप्तसप्तकान् यानि तस्य व्याधेरविरुद्धानि तैर्दध्यादिभिः सह भावयित्वा भुंक्ते । तदनन्तरं सर्वप्रचारा भवति । एतदेवाह-

[भा.३८०१] महुरेणं सत्तन्ने भाविता उल्लणादिना ।
दहिंगादीन भावेत्ता ताहेव सत्त सत्तए ।।

वृ-अत्रादिशब्दादन्येषां यूषप्रकाराणां परिग्रहः । दहिंगादीण भावित्ता ताहे वा सत्त सत्तए व्याख्यातम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३८०२] एवमेसा उ खुड्डीया पडिमा होति समाणिया ।
भोच्चा रुभंते चोदसेणं, अभोच्चा सोलसेन तु ।।

वृ- एवमेषा क्षुल्लिका मोकप्रतिमा भवति सा च भुक्त्वा आरोहता प्रतिपद्यमानेन चतुर्दशकेन समानीता समाप्तिं नीता भवति । अभुक्ता प्रतिमानेन षोडशकेन आरुहन्ते इत्यत्र सप्तमी तृतीयार्थे प्रतिपत्तव्या । सम्प्रति महतीं मोकप्रतिमां व्याख्यातुमाह-

[भा.३८०३] एमेव महल्लीवि उ अट्ठारसिमेण नवरि निट्ठाति ।
परिहारो अट्ठदिवसा नहु रोगि वलिसस वा एसा ।।

वृ- एवमेव अनेनैव प्रकारेण महत्यपि मोकप्रतिमा द्रष्टव्या नवरं सा अष्टादशकेन निष्ठां याति, परिहार-स्तपोऽष्टौ दिवसान् न च स रोगी भवति प्रतिमाप्रभावात्, । यदि वा बलिन एषा प्रतिमा भवति नेतरस्य ।

[भा.३८०४] पडियत्ती पुन तासिं चरमनिदाधे व पढमसरए वा ।
संघयणधितीजुत्तो फासयति दोवि एयातो ।।

वृ- प्रतिपत्तिः पुनरेतयोः प्रतिमयोश्चरमनिदाये वा प्रथमशरदि वा एते च द्वे अपि प्रतिमे स्पर्शयति आद्यसंहननत्रयोऽन्यतमसंहननयुक्तो धृत्या च वज्रकुडयसमानः

मू. (२४४) *संखादत्तियस्स णं भिक्खुस्स पडिग्गह धारिस्स गाहावइ कुल-पिंडवाय पडियाए अनुपविट्ठस्स जावइयं केइ अंतो पडिग्गहंसि उवइत्तु दलएज्ञा, तावइयाओ दत्तीओ वत्तवं सिया, तत्थ से केइ छप्पएण वा दूसएण वा वालएण वा अंतो पडिग्गहंसि दलएज्ञा सावि णं सा एगादत्ती वत्तव्वं सिया, तत्थ से वहवे भुंजमाणा सव्वे ते सयं सयंपिंडं साविय अंतो पडिग्गहंसि उवित्ता दलएज्ञा सव्वाविणं सा एगा दत्ती वत्तवं सिया ।।*

मू. (२४५) *संखादत्तियस्स नं भिक्खूस्स पाणिपडिग्गाहियस्स जाव वत्तव्वं सिया ।*

[भा.३८०५] स साहियपतिन्नो उ नीरोगो दुहतो बली ।
मियं गेण्हइ सुद्धुच्छ सुत्तस्स समुप्पया ।।

वृ- स मोकप्रतिमिसाधकः साधितप्रतिज्ञो । नीरोगो द्विधातो धृत्वा संहनने च बली मितं दत्तिसंख्यया च परिमितं शुद्धमुंछं गृह्णाति ततो दत्तिपरिमाणप्रतिपादनार्थमन्यस्य सूत्रद्वयस्य समुत्यादः प्रवृत्तिर्गाथायां स्त्रीत्वं प्राकृतत्वात् । एष सूत्रसम्बन्धः । अनेन सम्बन्धेनायातस्यास्य व्याख्या-संख्यापरिमाणं दत्तिकायाः सूत्रं पुस्त्वमार्षत्वात् यावत् यावत् कश्चिदन्तः पतद्गृहे उवित्ता अवनस्य दद्यात् । तत्र तावत्यो दत्तयइति वक्तव्यं स्यात, किमुक्तं भवति ? एकस्यामपि भिक्षायामुत्पादितायां यावतो वारानच्छिद्य विच्छिद्य ददाति तावत्यस्तत्र दत्तय इति तत्र से तस्य साधोः कश्चित् छब्बकेन वंशदलमयेन दूष्येण वा वस्त्रेण वालकेन वा गोमहिष्यादिबालकृतेन गालनादिना अन्तः पतद्ग्रहे अवनस्य दद्यात् । सापि नमिति वाक्यालङ्कारे । एका दत्तिरिति वक्तव्यं स्यात् । तत्र से तस्य साधोर्वहवो भुंजाना भिक्षार्थं साधुमागतं दृष्ट्वा सर्वे ते स्वीयं पिण्डं संहृत्य एकं पिण्डं कृत्वा अन्तः पतद्गृहे उवित्ता अवनम्य दद्यात् । सर्वापि नमिति पूर्ववत् । एका दत्तिरिति वक्तव्यं । एतत्सूत्रं पतद्ग्रहवारिण उक्तं, । सम्प्रति पाणिपतद्ग्रह-विषयमाह पाणीत्यादि पाणिपद्ग्रहस्यापि विषये एवमेव सूत्रं वक्तव्यमिति सूत्रसंक्षेपार्थः ।

[भा.३८०६] हत्थेण व मत्तेण वि भिक्खा होइ समुज्ञया ।
दत्तितो जात्तिए बारे, खिवती होंति तत्तिया ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- हस्तेन वा मात्रेण वा या समुद्धता उत्पादिता भिक्षा सा भिक्षेत्युच्यते दत्तयः पुन स्तामेव भिक्षां यावतो वारानवच्छिद्य क्षिपन्ति तावत्यो भवन्ति-

[भा.३८०७] अव्वोच्छिन्न निवाया उ दत्ती होइ उ वेतरा ।
एगानेगासु चत्तारि विभागा भिक्खदत्तिसु ।।

वृ- अव्यवच्छिन्ननिपातात् तु दत्तिर्भवति इतरा या भिक्षा च भवति, भिक्षादत्तिषु च एकानेकासु विषये चत्वारो विकल्पास्तानेवाह-

[भा.३८०८] एगाभिक्खा एगा दत्ती एगाभिक्खअनेगा दत्तितो ।
नेगातोवि य एगा नेगातो चेव नेगातो ।।

वृ- एकाभिक्षा एका दत्तिरिति प्रथमो विकल्पः । एकाभिक्षा अनेका दत्तय इति द्वितीयः । अनेका भिक्षा एका दत्तिरिति तृतीयः । अनेकाभिक्षा अनेकादत्तय इति चतुर्थः । तत्र प्रथमभङ्ग एवं दायकेन व्यवच्छिन्ना भिक्षा दत्ता सा एका भिक्षा एका च दत्तिः, द्वितीयभङ्गेव्यवच्छिन्ना दत्ता, तृतीयभङ्गे सूत्रमिदम् तत्थ से बहवो भुंजमाणा इत्यादि जाव एगा सा दत्ती वत्तव्वं सिया अस्येयं भावना केचित् पथिकाः कर्मकरा वा एकत्रावकाशे पृथक् पृथक् उपस्कृत्य भुंक्ते भुञ्जते तेषामेकः परिवेषकः, साधुना तत्र च भिक्षार्थभागत्य धर्मलाभः समुत्सृष्टस्ततः सः परिवेषक आत्मीयान् ददामीतिव्यवसितस्तैरपि शेषकैः समं भण्यते प्रत्येकमस्मदीयमध्यादपि साधवे भिक्षां देहि ततस्तेन परिवेषकेण सर्वेषां सक्तान् गृहीत्वा एकत्र संमील्याव्यवच्छिन्नं दत्तं । एवमनेकाभिक्षा एकादत्तिरित्युपपद्यते । चतुर्थभङ्गे ध्येवमेव, नवरं व्यवच्छिन्नं दानमिति । अत्र दत्तिष्वेकानेकदायकभिक्षाभेदतोऽष्टौ भङ्गास्तान् उपदिदर्शयिषुः प्रथमतो एकानेकदायकभिक्षाविषयां चतुर्भङ्गीमाह-

[भा.३८०९] एमेव एगानेगे दायगमिभिक्खासु होइ चउभंगो ।
एगो एगं दत्ती एगो नेगाओ नेगएगा उ ।।
नेगा य अनेगातो पाणिसु पडिग्गहधरेसु । (गाथार्द्धः)

वृ- एवमेव अनेनैव प्रकारेण एकस्मिन् अनेकस्मिंश्च दायके एकानेकभिक्षासु चतुर्भङ्गी भवति । गाथायां पुंस्त्वं प्राकृतत्वात् तामेव चतुर्भङ्गीमाह-एको दायक एकां भिक्षां ददाति ?, एको अनेकाः २, अनेके एकां ३, अनेके अनेकाः ४ । एते चत्वारो भङ्गा पाणिषु पाणिभोजिषु पतद्ग्रहधरेषु च द्रष्टव्याः । अत्र यथा दत्तिष्वष्टौ भङ्गास्तथा दर्शयति-

[भा.३८१०] एगो एगं एक्कसि एगो एक्कं बहुसो उ वारे ।
एगोनेगा एक्क सि एगो नेगा य बहुसो य ।।

वृ- को दायक एकां भिक्षामेकवारं ददाति १, एको दायक एकां भिक्षां बहुशो वारान् विच्छिद्य २ ददाति २, एको दायको अनेका भिक्षा एकवारमव्यवच्छेदेन ददाति ३ एको दायकोऽनेका भिक्षा बहुशो वारान् विच्छिद्य विच्छिद्य ददाति ४ । एवमेकं दायकमधिकृत्य एकानेकभिक्षासु दत्तिविपया चतुर्भङ्गभिहिता । साम्प्रतमनेकान् दाकानधिकृत्य एकानेकभिक्षासु दत्तिविषयां चतुर्भङ्गीमाह-

[भा.३८११] नेगा एगं एक्कनि नेगाएगं च नेगसो वारे ।
नेगानेगाएक्कसि नेगा नेगा य बहुवारे ।।

वृ- अनेकेदायका एकां भिक्षामेकवारमव्यवच्छेदेन ददाति ४ । अनेके दायका एकां भिक्षामनेकशो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वारान् विच्छिद्य विच्छिद्य ददाति ६ । अनेके दायका अनेका भिक्षा एकत्र संपिण्डय एकवारं ददति ७ । अनेके दायका अनेका भिक्षा विच्छिद्य विच्छिद्य वहून् वारान् ददाति ८ ।

[भा.३८१२] पाणिपडिग्गहियस्सवि एसेव कमो भवे निरवसेसो ।
गणवासे निरवेक्खो सो पुन सपडिग्गहो भइतो ।।

वृ- पाणिपतद्ग्रहकस्यापि एष एवानन्तरोदितः क्रमो भवति निरवशेषो ज्ञातव्यः । स च पाणिपतद्ग्रभोजी गणवासे निरपेक्षाः स पतद्ग्रहो भजितो विकल्पितः कदाचिद्भवति कदाचिन्नेति ततस्तस्य पाणिपतद्ग्रहे भजिता

मू. (२४६) तिविहे उवहडेपन्नत्ते तंजहा सुद्धोवहडे, फलिओवहडे, संसट्ठोवहडे ।।

[भा.३८१३] दोण्हेगतरे पाते गेण्हती उ अभिग्गहाति दो वहडं ।
दुविहं एगविहं वा अभिहडसुत्तस्स संबंधो ।।

वृ- अनन्तरसूत्रद्वये पतद्ग्रहधारी पाणिपतद्ग्रहिकश्चोक्तस्तयोश्च पाणिपतद्ग्रहयोरन्यस्मिन् पात्रे पतद्ग्रही गृह्णाति उपहृतमपि त्रिविधं द्विविधमेकविधं वा, अभिगृही गृह्णातीत्याभिग्रहिक प्रस्तावादत्रोपहृतस्तत्र रुपोपक्षेपः । एषोभ्याहृतसूत्रस्य सम्बन्धः । सूत्राक्षरसंस्कारस्तत्वेवं त्रिविधमुपहूतं प्रज्ञप्तं तद्यथा शुद्धोपहूतं फलितोपहूतं संसृष्टोपहूतं च अमीषां पदानां व्याख्यानां करिष्यति-

[भा.३८१४] सुद्धे संसट्ठेया पलितोवहडे य तिविहमेक्केक्कं ।
तिन्नेगदुगातिन्निय तिगसंजोगो भवे एक्को ।।

वृ- उपहूतशब्दः प्रत्येकामभिसम्बन्ध्यते । त्रिविधमुपहूतं सूत्रेऽभिहितं । तद्यथा शूद्धोपहूतं, संसृष्टोपहूतं फलितोपहूतं च, एकैकं पुनस्त्रिविधं-यदवगृह्णाति, यच्च संहरति, यथास्ये प्रक्षिपति । एतदनन्तरसूत्रे वक्ष्यते, । अत्रैककसंयोगे त्रयो भङ्गास्तद्यथा शुद्धोपहूतं वा गृह्णाति १ फलितोपहूतं वा गृह्णाति २ संसृष्टोपहूतं वा गृह्णाति ३ द्विकसंयोगेऽपि व्यस्तद्यथा शुद्धोपहूतं फलितोपहूतं च १ शुद्धोपहूतं संसृष्टोपहूतं २ फलितोपहूतं संसृष्टोपहूतं च ३ त्रिकसंयोगे एकः शुद्धोपहूतं फलितोपहूतं संसृष्टोपहूतं च गृह्णाति । सर्वसंख्यया सप्त भङ्गा एतेषामेकतरमभिगृह्णाति अभिगृही ।

[भा.३८१५] सुद्धं तु अलेवकडं अहवणसुद्धोदनो भवे सुद्धं ।
संसट्ठआदत्तं लेवडमलेवडं चेव ।।

[भा.३८१६] फलियं पहेणयादी वंजणभक्खेहि वा विरइयं तु ।
भोत्तुमणस्सोपहियं पंचमपिंडेसणा एसा ।।

वृ- यत् अलेपकृतं काञ्जिकेन पानीयेन वा सम्मिश्रीकृतं तत् शुद्धं । अथवा शुद्धोदनो व्यञ्जनरहितो भवति शुद्धं, तदपि नियमादलेपकृतं संसृष्टं नाम भोक्तुकामेनात्तं गृहीतं । किमुक्तं भवति ? यत्स्थाले परिवेषितं । तत ग्रहणाय हस्तः क्षितो न तावदद्यापि मुखे प्रक्षिपति । अत्रान्तरे साधुरागतो भिक्षार्थं यत् लेपकृतमलेपकृतं वा संसृष्टमित्युच्यते फलितं नाम यत् व्यञ्जनैर्भक्ष्यैवा नानाप्रकारं विरचितं प्रहेणकादि प्रहेणकं लाभनकमादि शब्दात् सरजस्कानां दानाय कल्पितं परिगृह्यते । उपहृतशब्दस्यार्थमाह-यत्र भोक्तुमनस उपहूतमित्युच्यते एषा च पञ्चमी पिण्डेषणा ।

[भा.३८१७] सुद्धग्गहणेन पुन होइ चउत्थीवि एसणा गहिया ।
संसट्ठे उ विभासा फलियनियमा उ लेवकडं ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- शुद्धग्रहणेन चतुर्थ्यप्येषणा अल्पलेपकृता नामिका गृहीता द्रष्टव्या । संसृष्टे विभाषा कदाचित्तल्लेपकृतं कदात्तिन्नेति फलितं तु नियमाल्लेपकृतमेवेति ।

मू. (२४७) *तिविहे उग्गहिए पन्नत्ते जं च उगिण्हति जं च साहरइ जं च आसगंसि पक्खिवति ।*

[भा.३८१८] पगया अभिग्गहिया खलु सुद्धयरा ते य जोगवुड्ढीए ।
इति उवहडसुत्तातो तिविहं दुविहं च पग्गहियं ।।

वृ- प्रकृता खल्वनन्तरसूत्रे शुद्धोपहृतादिष्वभिग्रहास्ते चाभिग्रहाः शुद्धतरा भवन्ति । योगवृद्ध्या उत्तरोत्तरयोगवृद्धिकरणेन इति अस्मात्कारणात् उपहृत-सूत्रादनन्तरं त्रिविधं द्विविधं वा प्रग्रहीतमुक्तमनेन सम्बन्धेनापातस्यास्य व्याख्या त्रिविधमवग्रहीतं प्रज्ञप्तं । यदवगृह्णाति यच्च संहरति यच्च आस्यके प्रक्षिपति-

मू. (२४८) *एगे पुन एवमाहंसु दुविहे ओग्गहिएपन्नते तंजहा जं च ओग्गिण्हइ जं च आसगंसि पक्खिवइ ।।*

वृ- एके एवमाहुरेकेपुनरेवमाहु र्द्विविधमवग्रहीतं प्रज्ञप्तं यदवगृह्णाति यच्च संहृतमिति एष सूत्राक्षरसंस्कारः । सम्प्रति भाष्यविस्तरः

[भा.३८१९] पग्गहियं साहरियं पक्खियं तं च आसए तहय ।
तिविहे य दुविहं पुन पग्गहियं चेय साहरियं ।।

वृ- यत् प्रगृहीतं यच्च संहृतं यच्चास्ये प्रक्षिप्यमाणमेतत् त्रिविधमवगृहीतं द्विविधं पुनरवगृहीतमादेशानान्तरेणदं प्रगृहीतं संहृतं च अथादेसस्य किं लक्षणमत आह-

[भा.३८२०] वहुसुत्तमाइन्नं न उ बाहियन्नेहिं जुगपहाणेहिं ।
आदेसो सो उ भवे अहवावि नयंतरे विगप्पो ।।

वृ- यत् बहुश्रुतैराचीर्णं न चान्यैर्युगप्रधानैर्बाधितं स भवति नाम आदेशः । अथवा नयान्तरविकल्प आदेशः । तद्वशात्सूत्रमेवमुपन्यस्तमिति । साम्प्रतमवगृहीतादिपदव्याख्यानार्थमाह-

[भा.३८२१] साहीरमाणं गहियं दिज्जंतं जं च होइ पाउग्गं ।
पक्खेवए दुजुंछा आदेसो कुडमुहादीसु ।।

वृ- इह अनानुपूर्व्या ग्रहणं बन्धानुलोमतस्तत एवं द्रष्टव्यं गृहीतं नाम यत् दीयमानं यच्च भवति प्रायोग्यं संहृतं नाम संह्रियमाणं आस्ये प्रक्षिप्यमाणं प्रतीतं । अत्राह-ननु जं च आसगंसि पक्खिवइ इत्यस्यायमर्थः । यदास्यके मुखे प्रक्षिपति तथोच्छिष्टमिति लोके जुगुप्सा ततः कथं तत् गृह्यते । सूरिराह-आदेसो कूडमुहादीसु कुटो घटस्तस्य यन्मुखं तदादिष्वादिशब्दात् पिठरमुखादि परिगृहः । तत्र आदेशो व्याख्यानं । विमुक्तं भवति । पिठरमुखादीन्यधिकृत्य जं च आसगंसि पक्खिवति इति सूत्रं व्याख्यातमतो न कश्चिद्दोषः । अथ उपहृतसूत्रस्यावगृहीतसूत्रस्यच परस्परं कः प्रतिविशेषस्तत आह-

[भा.३८२२] उग्गहियामि विसेसो पंचमापिंडेसणातो छट्ठीए ।
तं पि हु अलेवकडं नियमा पुव्वुद्धडं चेव ।।

वृ- उपहृतसूत्रे पञ्चमी पिण्डेसणआ उक्ता अवगृहीतसूत्रे पुनरस्मिन् अयं विशेषो यत् पञ्चमपिण्डेषणातः परा या षष्ठी पिण्डेषणा तस्या अभिधानमिति तदपि बहू निश्चितं यल्लेपकृतं नियमाच्च पूर्वोध्धृतमिति । सम्प्रति दिज्जंतं च जं होति पायोग्गमित्यस्य व्याख्या-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३८२३] भुंजमाणस्य उक्खित्तं पडिसिद्धंतं च तेन उ।
जहन्नोवहडं तं तू हत्थस्स परियत्तणे ।।

वृ- परिवेषकः पटिकायां कूरं गृहीत्वा दक्षिणहस्तेन तलं प्रेषया यस्य दातुकामस्तस्य भाजने क्षिपामीते व्यवसितं तच्च तथा भुञ्जानस्योत्क्षिप्तं, तेन भुञ्जानेन प्रतिसिद्धं पर्याप्तं मा मह्यं देहि, । अस्मिन् देशकाले साधुना तत्र प्राप्तेन धर्मलाभितं ततः परिवेषको ब्रूते-साधाधारय पतद्रहं साधुना पात्रं धारितं । तत्रानेन प्रक्षिप्तं इदं हस्तस्य हस्तमात्रस्य परिवर्त्तनात् । गाथायां सप्तमी पञ्चम्यर्थे जघन्यमुपहूतं भवति । एतेन दीयमानमिति व्याख्यातं, यच्च भवति प्रायोग्यमित्यनेन शुद्धसंसृष्टयोः प्रागुक्तयोरन्यतरत् गृहीतम् । तदेवं जं च ओगिण्हइ इति व्याख्यातं । सम्प्रति जं च साहरियमिति व्याख्यानाय तत्साहरिएति गाथाशकलमुक्तं तद्भावयति-

[भा.३८२४] अह साहीरमाणं तु वट्टेउं जो उ दावए।
दलेव वलितो तत्तो छट्ठाएं सावि एसणा ।।

वृ- अथ वर्त्तयितुं संहूयमाणं यो दापयेत् तस्य वचनतः स परिवेषकः तस्मात्स्थानात् मनागप्यचलितो दद्यात् । एतत्संहियमाण-मुच्यते । एषापि षष्ठी एषणा द्रष्टव्या । जं च आसगंसि पक्खिवइ व्याख्या-

[भा.३८२५] भुत्तसेसं तु जं भूयो छुभंती पिठरे दए।
संवदंतीव अन्नस्स आसगंमि पकासए ।।

वृ- प्रल्हादननिमित्तं किलिञ्जादिभाजने विशाले उत्ताने च क्षिप्तं ततो भोक्तुमुपविष्टानां दत्वा यत् भुक्तशेषं तत् भूयः पिठरे क्षिपन्ती साधवे दद्यात् । यदि वा अन्यस्य भाजने प्रकाशके प्रकाशे आस्यके तस्य मुखे संवर्धयन्ती दद्यात् ।

<u>उद्देशकः - ९ - समाप्तः</u>

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहार सूत्रे नवमोद्देशकस्य (भद्रबाहुस्वामि रचिता निर्युक्तियुक्तं) संघदाणगणि विरचितं भाष्यं एवं मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

उद्देशकः १०

वृ- तदेवं व्याख्यातो नवम उद्देशकः । सम्प्रति दशम आरभ्यते । तत्र चेदमादिसूत्रं-

मू. (२४९) *दो पडिमाओ पन्नताओ तं जहा जवमज्झा य चंदपडिमा य वयरमज्झचंदपडिमा, जवमज्झं चंदपडिमं पडिवन्नस्स अनगारस्स मासं निच्चं वोसट्ठकाए चियत्तदेहे जे केई परीसहोवसग्गा समुवज्जंति तं जहा दिव्वा वा माणुस्सा वा तिरिक्खजोणिया वा अनुलोमा वा पडिलोमा वा तत्थ अनुलोमा ताव वंदेज्जा वा नमंसिज्जा वा सक्कारेज्जा वा सम्माणेज्जा वा कल्लाणं मंगलं देवयं चेइयं पज्जुवासेज्जा, पडिलोमा अन्नयरेणं दंडेण वा अट्ठिण वा जोएण वा वेत्तेण वा कसेण वा काए आउट्टेज्जा ते सव्वे उपन्ने समासहेज्जा समेज्जा तितिखिज्जा अहियासेज्जा जवमज्झण्हं चंदपडिमं पडिवन्नस्स अनगारस्स सुक्कपक्खस्स पडिवए कप्पइ एगा दत्ती भोयणस्स पडिगाहित्तए, एगा पाणस्स सव्वेहि दुप्पयचउप्पयादिएहि आहारकंखीहिं सत्तेहिं पडिनियत्तेहिं अन्नायउंछं सुद्धोवहडं कप्पइ से एगस्स भुंजमाणस्स पडिगाहित्तए नो दुण्हं नो तिण्हं नो चउण्हं नो पंचण्हं नो गुव्वीणीए नो बालवत्थाए नो दारग*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पेज्जमाणिए नो से कप्पइ अंतो एलुयस्स दोवि पाए साहड्डदल (य) माणीए पडिगाहित्तए अहपुन एव जाणेज्जा एगं पायं अंतो किच्चा एगं पायं बाहिं किच्चा एलुयं विक्खंभइत्ता एयाए एसणाए लभेज्जा आहारेज्जा एयाए एसणाए नो लभेज्जा नो आहारेज्जा, बीयाए कप्पंति दो दत्तीओ भोयणस्स पडिगाहित्तए दो पानगस्स सव्वेहिं दुप्पयचउप्पयाइएहिं आहारकंखीएहिं सत्तेहिं पडिनियत्तेहिं अन्नायं उंछं सुद्धोवहडं कप्पइ जाव नो आहारेज्जा एवं ततियाए तिन्नि जावपन्नरसिए पन्नरस, बहुलपक्खस्स पडिवए से कप्पइ चउदसदत्तीओ बीयाए तेरस्स जाव चउदसीए एगदत्ती भोयणस्स एगपानगस्स सव्वेहिं दुप्पयचउप्पय-जाव नो आहारेज्जा अमावसाए से य अभत्तट्ठभवई एवं खलु एसा जवमज्झचंदपडिमा अहासुत्तं जाव अनुपालिया भवइ, ।

मू. (२५०) *वइरमज्झण्हं चंदपडिमं पडिवन्नस्स अनगारस्स मासं निच्चं वोसठकाए चियत्तदेहे जाव अहियासेज्जा वइरमज्झण्हं चंदपंडिमं पडिवन्नस्स अनगारस्स बहुलपक्खस्स पडिवए कप्पइ पन्नरस्स दत्तीओ भोयणस्स पडिगाहितए, पन्नरस्स पाणगस्स सव्वेहिं दुप्पयचउप्पयजाव नो आहारेज्जा बीयाए से कप्पइ चउदस्स एवं अमावसाए एगा दत्ती सुक्का पडिवए से कप्पइ दो दत्तीओ बीयाए तिन्नी जाव चउदसीए पन्नरस्स पुन्नमीए अभत्तट्ठे भवइ एवं खलु एसा वइरमज्झचंदपडिमा अहासुत्तं जाव अनुपालिया भवइ ।*

[भा.३८२६] पगया अभिग्गहा खलु एस उ दसमस्स होइ संबंधो ।
संखा य समनुवत्तइ आहारे वावि अहिकारो ।।

वृ- प्रकृताः खलु नवमोद्देशकचरमसूत्रेष्वभिग्रहा अत्रापि ते एवाभिग्रहाः प्रतिपाद्या इत्येष दशमस्य दशमोद्देशकादिसूत्रस्य सम्बन्धः । अथवा नवमोद्देशकचरमानन्तरसूत्रे आहारे अभिहिता संख्या सा अत्राप्यनुवर्तते । तत आहारविषयसंख्याप्रस्तावाद्दशमोद्देशकादिसूत्रस्याधिकारप्रवृत्तिः । सूत्राक्षराणि सामान्यतः सुप्रतीतानि, विशेषस्तु भाष्यकारो व्याख्यानयति-

[भा.३८२७] जवमज्झ वयरमज्झा वोसठ चियत्त तिविह तीहिं तु ।
दुविहे वि सहइ सम्मं अन्नाउंछे य निक्खेवो ।।

वृ- यवमध्येतिपदं वज्रमध्येति पदं तथा व्युत्सृष्ट इति त्रिविधमुपसर्गं त्रिभिर्मनोवाक्कायैः सम्यक् सहते यदि वा द्विविधान् उपसर्गान् अनुलोमप्रतिलोमरूपान् त्रिभिः सम्यक् सहते । तथा अज्ञातोंछे च निक्षेप इति व्याख्येयमेप द्वारगाथासंक्षेपाथः । साम्प्रतमेनामेव विवरीषुः प्रथमतो यवमध्ये वज्रमध्येति-

[भा.३८२८] उवमा जवेण चंदेन वा जवमज्झं चंदपडिमाए ।
एमेव व बिइयाए, वइरं वज्जंति एगट्ठं ।।

वृ- यवमध्यचन्द्रपतिमाया यवेनोपमा चन्द्रेणच यवस्येव मध्यं यस्याः सा यवमध्या चन्द्रकारा प्रतिमा चन्द्रप्रतिमेतिव्युत्पत्तेः । एवमेव द्वितीयाया अपि वक्तव्यम् । वज्रमध्यचन्द्रप्रतिमाया वज्रेणोपमा चन्द्रेण वज्रस्येव मध्यं यस्याः सा वज्रमध्या चन्द्राकारा प्रतिमा चन्द्रप्रतिमा प्राकृतमधिकृत्य वज्रशब्दस्य पर्यायेण व्याख्यानप्राह- 'वइरं वज्जंति-एगट्ठं' इयमत्र भावना । शुक्लपक्षस्य प्रतिपदि चन्द्रविमानसदृशस्य पञ्चदशभागीकृतस्य एका कला दृश्यते । द्वितीयायां द्वे कले, तृतीयायां तिस्रः कला, एवं यावत् पञ्चदश्यां परिपूर्णाः पञ्चदश कलाः ततो बहुलपक्षस्य प्रतिपदि एकया कलया ऊनो दृश्यते चतुर्दश कला दृश्यन्ते । द्वितीयायां त्रयोदश तृतीयायां द्वादश यावदमावास्यायामेकापि न दृश्यते, तदेवमयं मास आदावूनो मध्ये

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्पूर्णोऽन्ते पुनरपि परिहीनो यथ्यादावन्ते च तनुको मध्ये विपुलः । एवं साधुरपि भिक्षां गृह्णाति शुक्लपक्षस्य प्रतिपदि एकां, द्वितीयस्यां द्वे, तृतीयस्यां तिस्रः यावत्पञ्जदश्यां पञ्चदश । ततो बहुलपक्षस्य प्रतिपदि पुनश्चतुर्दश द्वितीयायां त्रयोदश यावच्चतुर्दशश्यामेकाममावास्यायामुपोषितः । ततश्चन्द्राकारतया चन्द्रप्रतिमा आदावन्ते च भिक्षायास्तनुत्वान्मध्ये विपुलत्वात् यवमध्योपमित-मध्यभागा, तथाऽमूमेव यवमध्यां चन्द्रप्रतिमामधिकृत्यान्यत्रोक्तं ।

"एकैकां वर्धयेद् भिक्षां, शुक्ले कृष्णे च हापयेत् ।
भुञ्जीत नामावास्यायामेष चान्द्रायणविधिः ।।

वृ- वज्रमध्यायां चन्द्रेण प्रतिमायां बहूलपक्ष आदौ क्रियते तत एवं भावना । बहुलपक्षस्य प्रतिपदि चन्द्रविमानस्यैका कला दृश्यते, द्वितीयस्यां त्रयोदश, तृतीयस्यां द्वादश यावच्चतुर्दश्यामेका अमावास्यायामेकापि न, ततः पुनरपि शुक्लपक्षस्य प्रतिपदि चन्द्रविमानस्यैका कला दृश्यते, द्वितीयायां द्वे, यावत्पञ्चदश्यां पञ्चदशापि तदयं मास आदावंते च पृथुलो मध्ये तनुको वज्रमप्यादावन्ते च विपुलं मध्ये तनुकमेवं साधुरपि भिक्षा गृह्णाति बहुलपक्षस्य पतिपदि चतुर्दश द्वितीयस्यां त्रयोदश तृतीयस्यां द्वादश यावत् अमावास्यायामुपोषितः ततः पुनरपि शुक्लपक्षस्य प्रतिपदि एकां भिक्षां गृह्णाति द्वितीयस्यां द्वे यावत्पञ्चदश्यां पञ्चदशेति । तत एषापि चन्द्राकारतया चन्द्रप्रतिमा आदावन्ते विपुलतया मध्ये च तनुतया वज्रमध्योपमितमध्यभागा वज्रभागा वज्रमध्या एतदेव यवमध्यस्य चन्द्रप्रतिमामधिकृत्य सूचयन्नाह-

[भा.३८२९] पन्नरसे व उ काउं भागे तु सुक्कपक्खस्स ।
जा वड्डयए दत्ती हवइ ता चेव कालेन ।।

वृ- शशिनं शशिविमानं पञ्चदशभागान् कृत्वा यथा शुक्लपक्षस्यादित आरभ्य कलाः प्रतिदिवसं वर्धन्ते, । एवं दत्तयोऽपि आरभ्य या वर्ध्यते ता एव कालेन कृष्णेन पक्षेण क्रमेण हापयेत् । एवं विपरीत-क्रमेण वज्रमध्यचन्द्रप्रतिमायामपि द्रष्टव्यम् ।

[भा.३८३०] भत्तट्ठिओ व खमओ इयरवणे तासिं होइ पठवओ ।
चरिमे असद्धवं पुन होइ अभत्तठमुज्जवणं ।।

वृ- तयोर्यवमध्यवज्रमध्यप्रतिमयोः प्रस्थापक आरंभे इतरस्मिन् आरंभदिवसात् पाश्चात्ये दिने भक्तार्थो वा भवति, क्षपको वा चरमे चरमदिवसे पुनर्भक्ताविषये अश्रद्धवान् श्रद्धामपि न करोति । एतत् यवमध्यचन्द्रप्रतिमामधिकृत्योक्तं । उद्यापनं पुनर्द्वयोरप्यनयोरभक्तार्थमवसेयम् ।

[भा.३८३१] संघयणे परियाए सुत्ते अत्थे य जो भवे बलितो ।
सो पडिमं पडिवज्जइ जवमज्झं वयरमज्झं च ।।

वृ- संहनने आद्यत्रयस्यान्यनमस्मिन्पर्याये जन्मतो जघन्येन एकोनत्रिंशतिवर्षेषु उत्कर्षतो देशोनायां पूर्वकोट्यां प्रव्रज्यापर्यायेण जघन्यतो विंशतिवर्षेषु उत्कर्षतो देशोनायां पूर्वकोट्यां सूत्रमर्थश्च जघन्यतो नवमस्य पूर्वस्य तृतीयमाचारवस्तु उत्कर्षतः किञ्चिन्न्यूनानि दशपूर्वाणि । एवं संहनने पर्याये सति यः सूत्रेऽर्थे च भवति बलिको बलीयान् स प्रतिमां यवमध्यां वज्रमध्यां च प्रतिपद्यते, तदेवं यवमध्या वज्रमध्येति गतम् । इदानीं नित्यं व्युत्सृष्टकाय इति पदं व्याख्यायते-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३८३२] निच्चं दिवा य रातो पडिमाकालो वजत्तितो भणितो ।
दव्वंमि य भावंमि य, वोसठं तत्थिमं दव्वे ।।

वृ- नित्यं सदा दिवारात्रौ च अथवा यावान् प्रतिमाकालो भणितस्तावन्तं कालं व्युत्सृष्टकायः । तच्च द्विधा-द्रव्ये भावे च । तत्र द्रव्ये इदं वक्ष्यमाणं, तदेवाह-

[भा.३८३३] असिणाण भूमिसयणा अविभूसा कुलवधू पउत्थधवा ।
रक्खइ पतिस्स सेज्जं अनिकामा दव्ववोसठा ।।

वृ- कुलवधूः प्रोषितधवा अस्नाना भूमिशयना अकृतविभूषा एवं द्रव्यव्युत्सृष्टद्रव्या अनिकामा सकामा पत्युः शय्यां रक्षति एतद् द्रव्यव्युत्सृष्टं, भावव्युत्सृष्टमाह-

[भा.३८३४] वातियपितियसिंठियरोगायंकेहिं तत्थ पुठो वि ।
न कुणइ परिकम्मं सो किंचिवि वोसठदेहो उ ।।

वृ- तत्र यवमध्यायां वज्रमध्यायां वा चन्द्रप्रतिमायां स्थितो वातिकपैत्तिकश्लेष्मिकरोगातंकैः स्पृष्टोऽपि स व्युत्सृष्टदेहो न किञ्चिदपि परिकर्म करोति । सम्प्रति चियत्तदेहे इति व्याख्यायते तच्च त्यक्तं द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यत आह-

[भा.३८३५] जुद्धपराजियअट्टण फलहिय मल्ले निरुत्त परिकम्मे ।
गूहण मत्थियमल्ले तईयदिने दव्वंतो चत्तो ।।

वृ- इदं कथानकं प्रबन्धेनावश्यकटीकायामुक्तमिह तु ग्रन्थगौरवभयान्न लिख्यते । ततस्तस्मादवधारणीयम क्षरयोजना त्वेवम्-अट्टनो नाम मल्ल उज्जयिनीवास्तव्यः सोपारे पत्तने वृद्धतया पराजितस्तेनान्यो फलही मल्लो मार्गितः स सोपारके मात्सिकमल्लेन सह युद्धं दत्तवान् ततः फलही मल्ले निरुक्तं निरवेशषं परिकर्म क्रियते, । इतरस्तु मल्लो गर्वाध्माततया शरीरपीडां गूहयन् न किमपि परिकर्म कारितवान् । ततः परिकर्माकरणतस्तृतीये दिने मारितस्तेन परिकर्माकरणतो यस्त्यक्तो देहः स द्रव्यतस्त्यक्तः । भावतस्त्यक्तमाह-

[भा.३८३६] बंधेज्ज व रुंमेज्ज व कोई व हणेज्ज अहव मारेज्ज ।
वारेइ न सो भयवं, चियत्तदेहो अपडिबद्धो ।।

वृ- स प्रतिमाप्रतिन्नो भगवान् शरीरेऽप्यप्रतिबद्धो यदि कोऽपि बन्धीयात् अथवा रुन्ध्यात् यदि वा हन्यात् मारयेद्वा तथापि तं न निवारयति, एष भावतस्त्यक्तदेहः । ''जे केइ उवस्सगा' इति-व्याख्यानम्-

[भा.३८३७] दिव्वाहि तिन्नि चइहा बारस एवं तु होइ उवसग्गा ।
वोसठग्गहणेणं आयासंचेयणं गहणं ।।

वृ- उपसर्गास्त्रिविधास्तद्यथा-दिव्या मानुपास्तैर्यग्योनाश्च । एते त्रयोऽपि प्रत्येकं चतुर्धा । एवं तु सर्वसंख्यया भवन्त्युपसर्गा द्वादश, ननु चतुर्धा आत्मसंचेतनीया अप्युपसर्गा भवन्ति, ते कस्मात्सूत्रकृता नोक्तास्तत आह-व्युत्सृष्टग्रहणेनात्मसंचेतनग्रहणं । तत्र दिव्याद्युपसर्गभेदानाह-

[भा.३८३८] हासा पदोस वीमंसा पुढो वेसा य दिव्वया चउरो ।
हास पओस वीमंस कुसीला नरगया चउहा ।।

वृ- दिव्यका उपसर्गाश्चत्वारस्तद्यथा-हासात् क्रीडात इत्यर्थः । प्रद्वेषादवज्ञानात् पूर्वभवसम्बन्धा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिकृतात् । विमर्शात् किमयं स्वप्रतिज्ञातश्चलति न वेत्येवंरूपात् । पृथग् विमात्रापक्षस्यात्र हासादिष्वे-वान्तर्भावविवक्षणं कुशीलस्य प्रतिसेवना समाश्रयणं कुशीलप्रतिसेवना ततो यथा ईर्ष्याप्रोषितस्य गृहे रात्राबुषितस्य तद्भार्या चतुष्टयतः ।

[भा.३८३९] भयतो पदोस आहार तह अवच्चलेणरक्खट्टा ।
तिरिया होंति चउहा, एए तिविहावि उवसग्गा ।।

वृ- तैरश्चा भवन्त्युपसर्गाश्चतुर्धास्तद्यथा-भयेन श्वादिर्दशति, प्रद्वेषतो यथा चण्डकोशिको मर्कटादिर्वा, आहारहेतोर्यथा सिंहादिरपत्यलयनरक्षणार्थे यथा काक्यादिः । एवं त्रिविधा उपसर्गा उक्ताः सम्प्रति ये व्युत्सृष्टग्रहणेनात्मसंचेतनीया गृहीतास्तानुपदर्शयति-

[भा.३८४०] घट्टणय पवड थंभण लेसण चउहा उ आयसंचेया ।
ते पुन सन्निवयंती वोसठदारे न इहं तु ।।

वृ- चतुर्धा आत्मना संचिन्त्यन्ते ये ते इत्यात्मसंचेत्यास्तद्यथा-घट्टनतः प्रपतनतः स्तंभनतश्च श्लेष्मतश्च । तत्र घट्टनतो यथा चक्षुषि रजः प्रविष्टं तेन चक्षुर्दुःखयितुमारब्धं अथवा स्वयमेव चक्षुषि गलके वा किंचित्तु खीलप्रभृतिसमुत्थितं घट्टयति । प्रपतनतो यथा मन्दप्रयत्नेन चंक्रम्यमाणः प्रपतति, ततो दुःखाप्यते स्तंभनतो यथा तावदुपविष्ट आस्ते यावत्पादं सुप्तः स्तब्धो जातः । श्लेष्मनातो यथा पादं तावदाकुञ्चयावस्थितो यावत्तत्रं वातेन लग्नः अथवा नृत्तं शिक्षयामीति किंचिदङ्गमतिशयेन नामितं तच्च तत्रैवं लग्नमिति । ये पुनरात्मसंचेतनीया व्युत्सृष्टद्वारे निपतन्ति, न इह, ते उत्पन्ने सम्मं सहति खमइ तितिक्खेइ अहियासेइत्ति चत्वार्यप्येकार्थिकानि पदानि । तत्र सम्यक् सहनमाह-

[भा.३८४१] मन वयण कायजोगेहिं तहि उ दिव्वमादिए तिन्नि ।
सम्मं अहियासेइ, तत्थ सुण्हाए दिठंतो ।।

वृ- त्रिभिर्मनोवाक्कायये़ोगैः प्रत्येकं दिव्यादीन् त्रीनुपसर्गान् प्रत्येकं चतुर्भेदान् सम्यगध्यास्ते सहते । तत्र सहनं द्विधा-द्रव्यतो भावतश्च । तत्र द्रव्यसहने स्नुषया दृष्टान्तः । तमेवाह-

[भा.३८४२] सासूससुरुवकोसा देवरभत्तारमादि मज्झिमगा ।
दासादी य जहन्ना जह सुण्हा सहिय उवसग्गा ।।

वृ- श्वशुरश्वश्रूरेतावृत्कुष्टौ पूज्यत्वात्, देवरभर्तृका मध्यमा, दासादयो जघन्या यथा तत्कृता उपसर्गाः स्नुषया पोढास्तथा साधुनापि सोढव्या । इयमत्र भावना-स्नुषया अपराधे कृते तां श्वसुरः श्वश्रूश्च हीलयति । सा च हील्यमाना अतीव लज्जते । यद्यपि तानि दुःखोत्पादनानि वचनानि दुरध्यास्यानि तथापि सा तानि सम्यगध्यास्ते चिन्तयति च न सम्यक् अध्यासिष्ये ततः कस्य मेऽवध्वंसो भविष्यति स्नुषावारश्चापयास्यति देवरा अपि चोल्लुण्ठवचनानि भाषन्ते यद्यपि तेषां सा नो लज्जते तथापि न तानुल्लुण्ठन्ति किन्तु सम्यक् तद्वचनान्यध्यास्ते । दासा अपि च तां स्नुषामुल्लुण्ठयन्ति तथापि किमेतेषां वचनान्यहं गणयामीत्यवगणया सम्यगध्यास्ते न प्रतिवचनं ददाति । एतद् द्रव्यसहनं । यत्सा धुर्द्वादशविधानप्युपसर्गान् कर्मविनिर्जरणार्थं सम्यगध्यास्ते एतदेवाह-

[भा.३८४३] सासुससुरोवमा खलु दिव्वा दियरोवमा य मानुसा ।
दासत्थाणी तिरिया तह सम्मं सो हियासति ।।

वृ- तथा वधूदृष्टान्तोक्तप्रकारेण श्वश्रूश्वशुरोपमान् दिव्यान् उपसर्गान्, देवरोपमान् मानुषान्,

दासस्थानीयान् तैश्चान् उपसर्गान् सम्यगध्यास्ते । सम्प्रति दुविहे वेत्यस्य व्याख्यानार्थमाह-

[भा.३८४४] दुहावेते समासेन सव्वे सामन्नकंटगा ।
विसयानुलोमिया चेव तहेव पडिलोमिया ।।

वृ- अथवा एते उपसर्गाः श्रामण्यस्य कंटका इव श्रामण्यकंटकाः सर्वे समासेन द्विधा प्रतिपादिता-स्तद्यथा विषयानुलोमिका इन्द्रियविषयानुलोमिकास्तथैव प्रतिलोमिका इन्द्रियविषयप्रतिलोमिकाः ।

[भा.३८४५] वंदन-सक्कारादी अनुलोमा बंधवहण पडिलोमा ।
तेवि य खमती सव्वे एत्थं रुक्खेण दिट्ठंतो ।।

वृ- वन्दनसत्कारादयोऽनुलोमा बन्धवधप्रभृतयः प्रतिलोमास्तानपि सर्वान् क्षमते, अत्र वृक्षेण दृष्टान्तस्तमेवाह-

[भा.३८४६] वासी-चंदन-कप्पो जह रुक्खो ईय सुहदुहसमो उ ।
रायदोसविमुक्को सहई अनुलोमपडिलोमे ।।

वृ- वासीचन्दनकल्पा यस्य स वासीचन्दनकल्पोऽथवा कल्पस्तुल्यवाची ततोऽयमर्थः वास्यां वास्या तक्षणे, चंदने चन्दनेनानुलेपने कल्पस्तुल्यो वासीचन्दनकल्पो यथा वृक्षो भवति इत्येवमनुना प्रकारेण रागद्वेषविमुक्तो अत एव सुखदुःखसमो अनुलोमप्रतिलोमान् उपसर्गान् सम्यक् सहते ।

साम्प्रतमन्नाउंछमित्यस्य व्याख्यानमाह-

[भा.३८४७] अन्नाउंछं दुविहं दव्वे भावे य होइ नायव्वं ।
दव्वुंछन्नेगविहं लोगरिसीणं मुनेयव्वं ।।

वृ- अज्ञातोञ्छं द्विविधं तद्यथा द्रव्ये भावे च । तत्र द्रव्योञ्छमनेकविधं लोकर्षीणां तापसानां ज्ञातव्यं । तदेवानेकविधं द्रव्योञ्छमाह-

[भा.३८४८] उक्खल क्खलए दव्वी दंड संडासए य पोत्तीय ।
आमे पक्के य तहा दव्वोंछ होइ निक्खेवो ।।

वृ- तापसा उंछवृत्तयः । उद्खले च्छंटितेषु तन्दुलेषु ये परिशाटिताः शालितन्दुलादयस्तान् उच्चित्य रन्धन्ति, खलएत्ति खलधान्ये मर्दिते संव्यूढे च यत् शटितं तत् उच्चिन्वन्ति, दव्वीति धान्यराशेर्यदेकया दर्व्या उत्पाट्यते तत् गृह्णन्ति, एवमन्यत्रापि प्रतिदिवसं दण्डत्ति स्वामिमननुज्ञाप्य यत् धान्यराशेरेकया यष्ट्या उत्पाद्यते तत् गृह्णन्ति, एत्तदेवमन्यत्रापि प्रतिदिवसं । संडासए इति अंगुष्ठप्रदेशिनीभ्यां यत् गृह्यते शाल्यादिकं तावन्मात्रं प्रतिगृहं गृह्णन्ति, यद्यपि बहुकं पश्यति शाल्यादि तथापि न मुष्टिं भृत्वा गृह्णन्ति । पोत्तीयत्ति स्वामिनमनुज्ञाप्य धान्यराशौ पोतिं क्षपन्ति तत्र यत्पोतौ लगति तत् गृह्णन्ति, एवमन्यत्रापि । तथा आमं पक्वं वा यच्चरकादयो भिक्षाप्रविष्टा मृगयन्ते । एष भवति द्रव्योञ्छे निक्षेपः ।

[भा.३८४९] पडिमापडिवन्ने एस भयवमज्ज किर एतिया दत्ती ।
आदियतित्ति न नज्जइ अन्नाउंछं तवो भणितो ।।

वृ- प्रतिमाप्रतिपन्न एष भगवान् अद्य किल एतावतीर्दत्तीरादत्ते इति न ज्ञायते तेन तस्य भगवतस्तपो अज्ञातोंछं भवति । एतदेव सविस्तरं भावयति-

[भा.३८५०] दव्वादभिग्गहो सो दव्वे सुद्धुंछमेत्ति या दत्ती ।
एलुगमेत्तं खेत्ते गेण्हइ तइयाए कालम्मि ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- तदज्ञातोछं तपो द्रव्याद्यभिग्रहो द्रव्याभिग्रहः क्षेत्राभिग्रह : कालभिग्रहो भावाभिग्रहश्च । तत्र द्रव्ये द्रव्याभिग्रहो यत् शुद्धमुंछं गृह्णाति, शुद्धं नाम अलेपकृत् तदपि शुद्धमुंछं गृह्णाति उपनीतं नानुपनीतं तेन पञ्चानामाद्यानां पिण्डैषणानामग्रहणमुपरितन्योश्च द्वयोरेकतरस्या अभिग्रह इत्यावेदितं द्रष्टव्यम् । तथा एतावत्यो दत्तयोऽद्य मया ग्राह्या एष द्रव्याभिग्रहः । क्षेत्रे क्षेत्रविषयेऽभिग्रहे यदेलुकमात्रं विष्कंभ्य गृह्णाति । अत्रापीयं समाचारी यदि द्वावपि पादावेलुकस्यान्तरस्तदा न कल्पते, तत्रेदं कारणं यद्युच्च एलुकस्तदा कस्य पादौ प्रतिष्ठितौ न दृश्यते, किं बीजादौ प्रतिष्ठितावुत नेति तस्मादेलुकं विष्कंभ्य यदि नीचे एलुके पाश्चात्यः पादः पतितः शुद्धयति यथा न बीजादौ प्रतिष्ठित इति तदा कल्पते, अत्युच्चे तु न कल्पते इति काले कालाभिग्रहे तृतीयस्यां पौरुष्यां यदिभक्षामटति । सम्प्रति द्रव्याभिग्रहे विशेष-

[भा.३८५१] अन्नाउंछं एगोवनीय निज्जूहिऊण समणादी ।
अगुव्विणिं अबालंती एलुगविक्खंभणे दोसा ।।

वृ- स प्रतिमाप्रतिपन्नो भगवान् अज्ञातोंछं गृह्णाति, तदप्येकेनोपनीतं न द्विप्रभृतिभिस्तथा श्रमणादीन् आदिशद्वात् द्विपदचतुष्पदादींश्च निर्यूह्यातिवाह्य भिक्षाभटति । तथा तां ददतीं भिक्षामगुर्विणीमभ्युपगच्छति । अबालां च क्षीराहारबालवर्जितां तथा एलुकविष्कंभणे दोषा भवंति ते चाग्रे वक्ष्यन्ते एष द्वारगाथासंक्षेपार्थः । साम्प्रतमेनामेव विवरीषुः प्रथमतोऽज्ञातोंछमाह-

[भा.३८५२] अनाउञ्छं च सुद्धं च पंच काऊण अग्गहं ।
दिन दिने अभिगिएहे तासिमन्नयरीय उ ।।

वृ- पञ्चानामाधानां षिण्डैषणानामग्रहणं कृत्वा तयोरन्तिमयोरन्यतरस्याश्च ग्रहणं कृत्वा दिने दिनेऽज्ञातोंछं च शुद्धं चाभिगृह्णाति । साम्प्रतमेकोपनीतमित्यस्य व्याख्यानमाह-

[भा.३८५३] ए गस्स भुंजमाणस्स उवनीयं तु गेण्हइ ।
न गेण्हे दुगुमादीणं अचियत्तं तु मा भवे ।।

वृ- एकस्य भुंजमनिस्य उपनीतं भगवान् गृह्णाति न द्विकादीनां द्वयोस्त्रयाणां चतुर्णां पंचानां वा उपनीतं न गृह्णाति, । कस्मादिति चेन्मा भूदप्रीतिरितिहेतोः । अधुना निज्जूहिऊण समणादी व्याख्या-

[भा.३८५४] अडंतो भिक्खकालंमी घासत्थी वसभादओ ।
वज्जेइ होज्ज मा तेसिं आउरत्तेन अप्पियं ।।

वृ- भिक्षाकाले वृषभादयो ग्रासार्थिनोऽटन्ति । ततस्तान् वर्जयति मा तेषामातुरत्वेनाप्रीतिकं भूयादिति हेतोः । एतदेवाह-

[भा.३८५५] दुपय चउप्पय पक्खी किविणातिहि समण साणमाईया ।
निज्जूहिऊण सव्वे अडइ भिक्खं तु सो ताहे ।

वृ- भिक्षाकाले द्विपदाश्चतुष्पदाः पक्षिणः कृपणातिथयः श्रमणा श्वादयश्च भिक्षार्थमटन्ति ततस्तान् सर्वान् निर्यूह्य तदनन्तरं स भगवान् भिक्षामटति । कथमतिवाह्येत्यत आह-

[भा.३८५६] पुव्विं चरइ तेसिं नियट्टिचारेसु वा अडइ पच्छा ।
जत्थ भवे दोन्नि काला चरइ तत्थ अतितित्थिते ।

वृ- तेषां श्रमणानां पूर्वं वा चरति यदि वा तेषु श्रमणादिषु निवृत्तचारेषु पश्चादटति, एतद्य तस्मिन् क्षेत्रे द्रष्टव्यं यत्र त्रयो भिक्षा काला यत्र तु द्वौ भिक्षाकालौ तत्र अतीत्यिते अतिक्रान्ते श्रमणादौ गच्छति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३८५७] अनारद्धे अन्नेसु मज्झे चरति संजओ ।
गेण्हेत दंतयाणं तु वज्जयंतो अपत्तियं ।।

वृ- यदि प्रथमभिक्षाकालप्रारंभे एव भिक्षामटति तदा दायकानामप्रीतिस्ततः प्रथमे भिक्षाकाले अतिक्रान्तप्राये द्वितीये च भिक्षाकाले अन्ये श्रमणादिभिरनारब्धे स भगवान् प्रतिमामतिपन्नः संयतश्चरति, कथंभूतः सन्नित्याह-गृह्णतां ददतां चाप्रीतिकं वर्जयन् । साम्प्रतमगुर्विणीमित्यादि व्याख्यानयति-

[भा.३८५८] नवमासगुव्विणीं खलु गचछे वज्जइ इयरो सव्वा उ ।
दारं खीराहारं गच्छो वज्जे इयरो उ सव्वंपि ।।

वृ- नवमासगुर्विणीं खलु गच्छो गच्छवासी वर्जयति । इतरो गच्छनिर्गतः प्रतिमाप्रतिपन्नादिकः सर्वा अपि गुर्विणीर्वर्जयति । तथा गच्छो गच्छवासी क्षीराहारं बालं वर्जयति, इतरस्तु सर्वमपि बालम् । साम्प्रतमेलुगाविक्खंभणे दोसा इत्यस्य व्याख्यामाह-

[भा.३८५९] गच्छगयनिग्गए वा लहुगा गुरुगा य एलुगा परतो ।
आणादिणो य दोसा दुविहा य विराधना इणमो ।।

वृ- एलुकात्परतः साधुरतिगच्छति, उपलक्षणमेतत् यदि साधुरेलुकं विष्कंभयति आसन्ने वा प्रदेशे एलुकस्य तिष्ठति, तदा गच्छगतस्य प्रायश्चितं चत्वारो लघुकाः, गच्छनिर्गतस्य चत्वारो गुरुकाः, तत आज्ञादय आज्ञाभङ्गादयो दोषा द्विविधा च विराधना-आत्मविराधना संयमविराधना च इयं वक्ष्यमाणा ।

[भा.३८६०] संक गहणे इच्छा दुन्निविठा अवाउडा ।
निहणुक्खननविरेगे तेने अविदिन्न पाहुडए ।।

[भा.३८६१] बंधवहे उद्दवणे य खिंसणा आसीयावणा चेव ।
उव्वेवग कुरुंडिय दीने अविदिन्न वज्जणया ।।

वृ- एलुकात्परतो यदि गच्छति, तदा स्तैन्ये मिथुने या लोकस्य शङ्का स्यात् तदनन्तरं च ग्रहणं तथा यस्या गृहमभ्यन्तरं प्रविष्टस्तस्याविषयेऽस्य साधोः किन्तु, इच्छा येनाभ्यन्तरं गत इति लोकस्याशङ्का स्यात् तथा दुर्निविष्टा अप्रावृत्ता वा मध्ये आगारी स्यात्तस्या लज्जा स्यात्, दोषाश्चान्ये शङ्कादयः तथा मध्ये गृहस्वामी हिरण्यादेर्निधानं करोति, उत्खननं वा परस्परं विरेचनं, तत्र स्तेनोऽयमिति शङ्का स्यात्, तथा अतिभूमिप्रवेशनं तीर्थकृद्भिर्गृहस्थैश्चा-वितीर्णमननुज्ञातं । ततोऽदत्तादानदोषः तस्मात् कस्मादति भूमिमेष प्रविष्ट इति गृहस्थः प्राभृतमधिकरणं कुर्यात्तथा बन्धं निगडादिभिर्वधं कशादिभिस्ताडनं अपद्रावणं जीविताद्व्यपरोपणं, तथा खिंसना हीलना, यथैते वराका अलभमाना अन्तः प्रविशन्ति, आसियावणा चेवत्ति आसीयावणा नाम निष्काशयितुमासादनं किमुक्तं भवति गले गृहीत्वा बहिर्वने निक्षिपति, तथा स व्रती धिग् इव प्रविष्टस्तासामगारीणामुद्वेजको भवति । तथा कुरुंडितो नाम उपचारक इत्युच्यते तं शङ्कमाना गृहिणो वधबन्धनादीनि कुर्युरेतैः कारणैरवितीर्णस्यातिभूमिप्रवेशनस्य वर्जना । एष द्वारगाथासमासार्थः । साम्प्रतमेतदेव विवरीषुः प्रथमतः शङ्काद्वारमाह-

[भा.३८६२] पच्छित्ते आदेसा संकियनिस्संकिए य गहणादी ।
तेन्ने चउत्थे संकिय गुरुगा निस्संकिए मूलं ।।

वृ- एलुकात्परतः प्रवेशे स्तैन्यविषये चतुर्थे चतुर्थव्रतविषये वा शङ्का स्यात् । तस्यां च शङ्कायां सत्यां निःशङ्किते जनस्य जाते प्रायश्चित्ते प्रायश्चित्तविषये आदेशौ प्रकारौ तावेव दर्शयति, शङ्किते चत्वारो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरुकाः, निःशंकिते मूलमिति । तथा ग्रहणादयश्च शंकायां दोषास्तानेव कथयति-

[भा. ३८६३] गेण्हण कड्ढण ववहार पच्छकडुड्डाह तहा य निव्विसए ।
किं उ हु इमस्स इच्छा अब्भिंतरमइगतो जेन ।।

वृ- गृहणं स्तेनः पारदारको चेति बुद्धया प्रतिग्रहणं ततो राजकुलं प्रतिकर्षणं तदनन्तरं राजकुले - व्यवहरणं । ततः पश्चात्कृतकरणं । वतमोचमित्यर्थः । एवं च सति महान् प्रवचनस्योड्डाहः । तथा निर्विषय आज्ञाप्ये तद्वारगाथायां तु ग्रहणे इति कर्षणादीनामु पलक्षणं ।। गतं ग्रहणद्वारमिच्छाद्वारमाह- किं तु इति वितर्को हुरिति निश्चित्तं यस्या गृहमभ्यन्तरमतिगस्तस्या विषयेऽस्य साधोरिच्छा येनेत्थमभ्यन्तरं सहसा प्रविष्ट इति । अधुना दुर्निविष्टा अप्रावृतेति पदद्वयं व्याख्यानयति-

[भा. ३८६४] दुनिविट्ठा व होज्जा, अवाउडा वा अगारी उ ।
लज्जिया सावि होज्जा ही संका वा से समुब्भवे ।।

वृ - मध्ये आगारी दुर्निविष्टा वा भवेत् अप्रावृता वा भवेत् ततः सहसा साधोरभ्यन्तरप्रवेशे सापि लज्जिता भवेत् । शङ्का वा से तस्याः समुद्भवेत् । तामेवाह-

[भा. ३८६५] किं मन्ने घेत्तुकामो एस ममं जेन तेतिए दूरं ।
अन्नो वा संकेज्जा गुरुगा मूलं तु निस्संके ।।

[भा. ३८६६] आउत्थ परा वावी उभयसमुत्था व होज्ज दोसा उ ।
उक्खणनिहणविरेगं तत्थ किंचि करेज्जाहि ।।

वृ- किं मन्ये एष संयतो मां ग्रहीतुकामो येन एतद्दूरमागच्छति । अन्यो वा एवं शङ्केत, तत्र शङ्कायां सत्यां तस्य प्रायश्चित्तं चत्वारो गुरुकाः, निःशंकिते तस्य वा जाते मूलं प्रायश्चित्तं, आत्मोत्थः परस्मात् उभयसमुत्था दोषा भवेयुः । सम्प्रति निहणुक्खन्नेत्यादि व्याख्यानयति-उक्खणणेत्यादि तत्र गृहस्थो गृहमध्ये हिरण्यादेरुत्खननं वा कुर्यात् निधानं परस्परं विवेकं वा विरेचनं किंचित्कुर्यात्ततः किमित्याह-

[भा. ३८६७] दिट्ठं एएण इमं साहेज्जा मा उ एस अन्नेसिं ।
तेनोत्ति व एसो ऊ संका गहणाइ कुज्जाही ।।

वृ- दृष्टमेतेन साधुना इदं हिरण्यादि उत्खन्यमानादिकं, ततो मा एष अन्येषां कथयेत् । यदि वा एष स्तेन इति शङ्कया ग्रहणादि ग्रहणवधबन्धनादि कुर्यात् । साम्प्रतमवितीर्णपदव्याख्यानार्थमाह-

[भा. ३८६८] तित्थगरगिहत्थेहिं दोहिं वि अतिभूमिपविसणमदिन्नं ।
कीसे दूरमतिगतो अ संखडं बंधवहमादी ।।

वृ- तीर्थकरेण गृहस्थेन च द्वाभ्यामप्यतिभूमीप्रवेशनमदत्तं, तीर्थकरेणादत्तमतिभूमिं न गच्छेज्जा इत्यादि वचनात्, गृहस्थेनाप्रीतिकरणात्, प्राभृताद्द्विारकलापमाह-कस्माद्देतदूरमयमागत इति गृहस्थो संखडं कलहं कुर्यादतिरोषाद्बन्धवधादिकं । सम्प्रति खिंसाद्वारमाह-

[भा. ३८६९] खिंसेज्ज एए अलभंय वरागं अंतो पविसंति ।
गलए घित्तूण वणंमि निच्छुभेज्जाहि बाहिरतो ।।

वृ- खिंसेत हीलवेत् गृहस्थो यथा एते वराका अलभमाना मध्ये प्रविशन्ति । आसियावणद्वारमाह- गलके गृहीत्वा बहिर्वने निक्षिपत्, । उद्वेजकद्वारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३८७०] ता उय आगारीतो वीरल्लेणेव तासिया उ सउणी ।
उद्वेवं गच्छेजा कुरुंडितो नाम उवचरओ ।।

वृ- यथा वीरल्लेण त्रासित्ता शकुनिका उद्वेगं गच्छति, तथा ताः अप्यगार्यः सहसान्तः प्रविष्टेन साधुना त्रासिताः सत्य उद्वेगं गच्छेयुः, कुरुंडितद्वारमाह-कुरुंटितो नाम उपचारकस्तदा शंकया च वधबन्धनादि कुर्यात्-

[भा.३८७१] अहवा भणेज्ज एते गिहिवासंमिवि अदिट्ठकल्लाणा ।
दीना अदिन्नदाना दोसे ते नाउ नो पविसे ।।

वृ- अथवा ब्रूयात् गृहवासेऽप्येते अदृष्टकल्याणा दीना अदत्तदाना आसीरन् तेन मध्ये प्रविशन्ति । उपसंहारमाह-एतान् दोषान् ज्ञात्वा नो मध्ये प्रविशेत् । अत्र चोदकः प्राह-यदि एलुकविष्कम्भे एते दोषा अन्तः प्रविष्टे सविशेषास्तत एलुकविष्कंभसूत्रमफलं स्यात्तत आह-

[भा.३८७२] उंबरविक्खंभमविज्जति दोसा अतिगयंमि सविसेसा ।
तहवि अफलं न सुत्तं सुत्तनिवाओ इमो जम्हा ।।

वृ- यद्यपि उम्बरविष्कम्भेदोषा अतिगतेमध्यप्रवेशे सविशेषास्तथापिसूत्रमफलं न भवति, यस्मादयं सूत्रनिपातः ।सूत्रविषयः स्वयमेव दर्शयति-

[भा.३८७३] उज्जाण घडा सत्थो सेना संवट्ट वय पवादी वा ।
बहि निग्गमणा जन्ने भुंजइ य जहिं पहियवग्गो ।।

वृ- उज्जाणत्ति औद्यानिक्यां निर्गतो जन उद्याने भुंक्ते, घटाभोज्यं नाम महत्तरानुमहत्तरा-दिर्बहिरावासितः सार्थो वणिक् सार्थः, सेना स्कन्धावारः, संवर्तो नाम यत्र विषमादौ भयेन लोकः संवर्तीभूतस्तिष्ठति, व्रजिका गोकुलं प्रपा पानीयशाला, सभा ग्रामजनसमवायस्थाने एतेषु स्थानेषु ये भुञ्जते जनास्तथा बहिर्निर्गमनेन यज्ञपाटे वा यत्र वा पथिकवर्गो भुंक्ते एतेषु स्थानेषु प्रतिमाप्रतिपन्नो हिण्डते तत्रानेन विधिना ग्रहीतव्यम् ।

[भा.३८७४] पासट्ठितो एलुगमेत्तमेव पासति निवेयरे दोसा ।
निक्खमणपवेसणे विय अवियत्तादी जढा एवं ।।

वृ- तत्र गत्वा निष्क्रमणप्रवेशौ वर्जयित्वा ईषदेकपार्श्वे तिष्ठति यथा एलुकमात्रं पश्यति । नोत्क्षेप-निक्षेपविरेचनानि ततो वधवन्धादयः प्रागुक्ता दोषा परिहृता भवन्ति । तथा निष्क्रमणे प्रवेशे च ये अप्रतीत्यादयो दोषास्तेऽप्येवं परित्यक्ताः ।

[भा.३८७५] असतीए पमुहकोट्ठग सालाए मंडवे रसवतीए ।
पासट्ठितो अगंभीरे एलुगविक्खंभमेत्तंमि ।।

वृ- औद्यानिकी घटादीनामसत्यभावे यः शालायाः प्रमुखे कोष्टको विशालो यत्र दूरस्थितैरपि एलुक उत्क्षेपनिक्षेपौ च दृश्येते मण्डपे वा यत्र परिवेषणं रसवत्यां वा महानसेऽगंभीरेऽतिप्रकाशे तत्रापि निष्क्रमणप्रवेशौ वर्जयित्वा यत्र उत्क्षेपनिक्षेपौ न दृश्येते । एलुकविष्कंभमात्रे क्षेत्रे एकपार्श्वे स्थित्वा भिक्षामादत्ते । एष एलुकसूत्रस्य विषयः ।

मू. (२५१) *पंचविहे ववहारे पन्नत्ते, आगमे सुए आणा धारणा जीए । तत्थ आगमे सिया आगमेन ववहारं पट्ठवेज्जा (१) नो से तत्थ आगमे सिया, जहा से तत्थ सुए सिया, सुएणं ववहारं पट्ठवेज्जा (२),*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नो से तत्थ सुए सिया, जहा से तत्थ आणा सिया आणाएणं ववहारं पठवेज्जा३ नो से तत्थ आणासिया, जहा से तत्थ धारणासिया, धारणाएणं ववहारं पट्ठवेज्जा४, नो से तत्थ धारणा सिया, जहा से तत्थ जीए सिया, जीएणं ववहारं पठवेज्जा५ । ए एहिं पंचहिं ववहारेहिं ववहारं पठवेज्जा तं आगमेणं सुएणं आणाएणं धारणाएणं जीएणं जहाजहा आगमे सुए आणा धारणा जीए तहा तहा ववहारं पठवेज्जा से किमाहु भंते ? आगमबलिया समणा निग्गंथा इच्चेयं पंचविहं ववहारं जया जया जहिं जहिं तया तया तहिं तहि अनिस्सि ओवसियं ववहारमाणे समणे निग्गंथे आणाए आराहए भवइ ।

[भा.३८७६] बहु आगमितो पडिमं पडिवज्जइ आगमो इमो वि खलु ।
सव्वं व पवयणं ववहारविसयत्थं ।।

[भा.३८७७] खलियस्स व पडिमाए ववहारो कोत्ति सो इमं सुत्तं ।
ववहारविहिन्नू वा पडिवज्जइ सुत्तसंबंधो ।।

वृ- अनन्तरसूत्रे प्रतिमाभिहिता तां च प्रतिमां प्रतिपद्यते बह्वागमिकः अयमपि पञ्चविधोऽपि व्यवहारः खल्वागमः तत आगमप्रस्तावात्प्रतिमासूत्रानन्तरं व्यवहारसूत्रमवादि, सव्वे वत्यादि वाशब्दः सम्बन्धस्य प्रकारान्तरोपदर्शने सर्वं प्रवचनं प्रावचनिकश्च व्यवहारविषयस्थं व्यवहारविषयान्तर्गतमतोऽवश्यं व्यवहारो वक्तव्य इति व्यवहारसूत्रम्, अथवा प्रतिमायां स्थितस्य प्रतिमायाः स्खलितस्य को व्यवहारः किंकर्तव्यमिति प्रश्नमाशंक्य स व्यवहारः पञ्चविध इत्यादिकमिदं सूत्रमुपन्यस्तं, यदि वानन्तरसूत्रे प्रतिमाः प्रतिपद्यते इत्युक्तं ताश्च प्रतिपद्यते व्यवहारविधिज्ञो नेतर इति प्रतिमासूत्रादनन्तरं व्यवहारसूत्रस्य सम्बन्धः । सूत्राक्षरसंस्कारः सुप्रतीतो, विशेषव्याख्यां तु भाष्यकृत्करिष्यति । तत्र 'तत्थ आगमे सिया आगमेन व्यवहारं पट्ठवेज्जा' इत्यादि अस्य व्याख्यामाह-

[भा.३८७८] सो पुन पंचविगप्पो आगम सुय आण धारणा जीए ।
सेतंमि ववहरंते उप्परिवाडी भवे गुरुगा ।।

वृ- स पुनर्व्यवहारः पञ्चविधः प्रज्ञप्तस्तद्यथा आगमः श्रुतमाज्ञा धारणा जीतमिति । तत्र सति आगमादौ व्यवहारे यदि उत्परिपाट्या उत्क्रमेण व्यवहरति तदा प्रायश्चित्तं चत्वारो गुरुकाः । इयमत्र भावना, आगमे विद्यमाने यद्यन्येन सूत्रादिना व्यवहरति तदा चतुर्गुरुकं, यदा पुनरागमो न विद्यते तदा श्रुतेन व्यवहर्तव्यम् श्रुते विद्यमाने यद्याज्ञादिभिर्व्यवहरति तदा चतुर्गुरुकं प्रायश्चित्तं, यदा श्रुतमिति न विद्यते तदा आज्ञया व्यवहर्तव्यम् आज्ञायां विद्यमानायां यदि धारणया प्रस्थापयति तदा चतुर्गुरुकं, आज्ञाया अभावे धारणया व्यवहर्तव्यं यदि पुनर्धारणायां सत्यां जीतेन व्यवहरति तदा चतुर्गुरुकं, धारणाया अभावे जीतेन व्यवहर्तव्यमिति । तत्र 'से तत्थ आगमे सिया' इत्यादिकस्य सूत्रावयवस्यायमर्थः । तत्र तस्मिन् व्यवहारपञ्चकमध्ये से तस्य साधोरागमः स्यात्तर्हि आगमेन व्यवहारं प्रस्थापयेत् । व्यवहारेर्निश्शेषः सूत्रादिभिरेतदेवाह-

[भा.३८७९] आगमव्यवहारी आगमेन ववहरेइ सो न अन्नेणं ।
न हि सूरस्स पगासं दीयपगासो विसेसेइ ।।

वृ- स आगमव्यवहारी आगमेन व्यवहरति नान्येन श्रुतादिना, तस्य ततो हीनत्वादेतदेव प्रतिवस्तूपमया दर्शयति, न हि सूर्यस्य प्रकाशं दीपप्रकाशो विशेषयति, न सूर्यप्रकाशात् दीपप्रकाशोऽधिकतरः किन्तु हीन इत्यर्थः । एवमिहापि यादृशी विषय आगमस्य नैतादृशः शेषाणां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहारमिति; आह-यस्मिन् काले गौतमादिभिरिदं सूत्रं कृतं 'ववहारे पञ्चविहे पन्नत्ते' इत्यादि तदा आगमो विद्यते ततः किं कारणमाज्ञादयोऽपि सूत्रे निबद्धाः । अत्राह-

[भा.३८८०] सुत्तमनागयविसयं खेत्तं कालं च पप्प ववहारो ।
होहिंति न आइल्ला जा तित्थं ताव जीतो उ ।।

वृ- सूत्रमनागतविषयं भविष्यति स तादृशः कालो यस्मिन्नागमो व्युच्छेत्स्यति ततः शेषैर्व्यवहारैर्व्यवहर्तव्यं । तत्रापि व्यवहारः क्षेत्रं कालं च प्राप्य यो यथा संभवति तेन तथा व्यवहरणीयमिति । किमुक्तं भवति ? यस्मिन् यस्मिन् काले यो यो व्यवहारो व्यवच्छिन्नो अव्यवच्छिन्नो वा तदा तदा प्रागुक्तेन क्रमेण व्यवहर्तव्यं तथा यत्र यत्र क्षेत्रे युगप्रधानैराचार्यैर्या या व्यवस्था व्यवस्थापिता तया अनिश्रोपश्रितं व्यवर्हतव्यम् । अन्यच्चाद्याश्चत्वारो व्यवहारा न यावत्तीर्थे च भविष्यन्ति जीतस्तु व्यवहारो यावत्तीर्थं तावद्‌भवितेति जीतोपादानम् । सम्प्रति 'आणाए आराहेइ' इत्यस्य - व्याख्यानमाह-

[भा.३८८१] दव्वे भावे आणा खलु सुयं जिनवराणं ।
सम्मं ववहारमाणो उ तीह आराहओ होति ।।

वृ- आज्ञा द्विविधा-द्रव्ये भावे च द्रव्ये राजादीनामाज्ञा, भावाज्ञा खलु श्रुतं जिनवराणां, तत्र सम्यक् पञ्चविधान्यतमेन व्यवहारेण प्रागुक्तनीत्या व्यवहरन् तस्या आज्ञाया आराधको भवति तदेवं व्याख्याता आज्ञा । सांप्रतमाराधनामाह-

[भा.३८८२] आराधना उ तिविहा उक्कोसा मज्झिमा जहन्नाओ ।
एग दुग तिग जहन्नं दुतिगट्ठभवा उ उक्कोसा ।।

वृ- आराधना त्रिविधा-उत्कृष्टा मध्यमा जघन्या च । तत्रोत्कृष्टाया आराधनायाः फलमेको भवः, मध्यमाया द्वौ भवौ, जघन्यायास्त्रयो भवाः । अथवा यदि तद्‌भवे मोक्षाभावस्तदा उत्कृष्टाया आराधनायाः फलं जघन्यं संसरणं द्वौ भवौ, मध्यमायास्त्रयो भवाः, जघन्याया उत्कृष्टा अष्टौ भवाः ।

तदेवं भाष्यकृता सूत्रव्याख्या कृता । सम्प्रति निर्युक्तिविस्तरः-

[भा.३८८३] जेन य ववहरइ मुनी जं पी य ववहरइ सो वि ववहारो ।
ववहारो तहिं वप्पो, ववहरियव्वं तु वुच्छामि ।।

वृ- येन मुनिर्व्यवहरति स आगमादिव्यवहारो व्यवह्रियतेऽनेनेति व्यवहार इति व्युत्पत्तेर्यदपि य व्यवहर्तव्यं मुनिर्व्यवहरति सोऽपि व्यवहारः कर्मणि घञः समानयनात्तत्र यो व्यवहारः करणपक्षरुपः संस्थाप्यः पश्चाद्वक्ष्यत इति भावः व्यवहर्तव्यं तु वक्ष्यामि । प्रतिज्ञातमेव निर्वाहयति-

[भा.३८८४] आभवंते य पच्छित्ते ववहरियव्वं समासतो दुविहं ।
दोसु बि पणगं पणगं आभवणाए अहीगारो ।।

वृ- व्यवहर्तव्यं समासतो द्विविधं तद्यथा आभवत् प्रायश्चित्तं च । तत्र द्वयोरपि आभवति प्रायश्चित्ते च प्रत्येकं पंचकं तत्राधिकारः प्रयोजनमिदानीमाभावनया एष द्वारसंक्षेपगाथार्थः ।

साम्प्रतमेनामेव व्याचिख्यासुः प्रथमतो 'दोसुपि पणगं पणगं' इत्यस्य व्याख्यानमाह-

[भा.३८८५] खेत्ते सुय सुहदुक्खे मग्गे विनए य पंचहा होइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सचित्ते अचित्ते खेत्ते काले य भावे य ।।

वृ- आभवत्पञ्चधा पञ्चप्रकारं भवति । तद्यथा-क्षेत्रे श्रुते सुखदुःखे मार्गे विनये च प्रायश्चित्तमपि पञ्चधा। सचित्ते अचित्ते क्षेत्रे काले भावे च । एष प्रतिद्वारगाथासमासार्थः । तत्र क्षेत्रे तावदाभवत् प्राह-

[भा.३८८६] वासासु निग्गयाणं अट्ठसु मासेसु मग्गणा खेत्ते ।
आयरियकहण साहण नयने गुरुगा य सच्चित्ते ।।

वृ- अष्टासु ऋतुबद्धेषु मासेषु विहरतां वर्षासु विषये क्षेत्रे मार्गणा भवति क्षेत्रमार्गणा, यच्च निर्गतानां साधूनां क्षेत्रं प्रत्युपेक्ष्य प्रत्यागतानामाचार्यस्य पुरतः क्षेत्रगुणकथनं तच्च गच्छान्तरागतप्राघूर्णिकसाधुभिराकर्ण्य निजाचार्यसमीपं गत्वा तस्य कथनं तत्र नयने प्रायश्चित्तं, तत्र गतैः सचित्ते गृह्यमाने चत्वारो गुरुकाः । साम्प्रतमेनामेव गाथां विवृणोति-

[भा.३८८७] उउबद्धे विहरंता वासा जोग्गं तु पेहए खेत्तं ।
वत्थव्वा य गता वा उव्वेक्खित्ता नियत्ता वा ।।

वृ- ऋतुबद्धे काले विहरन्त आचार्यप्रायोग्यं क्षेत्रं प्रत्युपेक्ष्यन्ते, वास्तव्या वा क्षेत्रप्रत्युपेक्षणायोपेत्य गता, यदि वा तस्मात् क्षेत्रान्निवृत्ताः केचित् स्वगच्छसाधव समागताः ।

[भा.३८८८] आलोएंते सोउं साहंते अप्पणो गुरुणो ।
कहणंमि होइ मासो गयाण तेसिं न तं खेत्तं ।

वृ- ते वास्तव्या गताः क्षेत्रंप्रत्युपेक्ष्य समागताः ततो वा क्षेत्रान्निवृत्ता आचार्याणां पुरत आलोचयन्ति । क्षेत्रस्य गुणान् कथयन्ति । तत्र चान्य अन्यस्मात्प्राघूर्णकाः समागतास्ते च तान् तथा आलोचयतः श्रुत्वा गत्वा आम्मनो गुरोराचार्यस्य साहयन्ति कथयन्ति । ततो ब्रुवते यावते तत्र न तिष्ठन्ति तावद्वयं तिष्ठामः। एवं कथने तेषां प्रायश्चित्तं लघुको मासो भवति, न च गतानां तेषां तत्क्षेत्रमाभवति-

[भा.३८८९] सामत्थण निज्जविए पयभेदे चेव पंथ पत्ते य ।
पणवीसादि गुरुगा गणिणो ग्गहेण वा जस्स ।

वृ- तत् श्रुत्वा यद्याचार्याः सामत्थयन्ति संप्रधारयन्ति तत्क्षेत्रं गच्छाम इति तदा तेषां प्रायश्चित्तं पञ्चविंशति दिनानि, निर्याचित्तं नाम अवश्यं गन्तव्यमिति तन्निर्नयनं तत्र लघुको मासः पदभेदे क्रियमाणे गुरुको मासः पथि व्रजतां चतुर्लघुकं, क्षेत्रं प्राप्तानां चतुर्गुरुकं, एतत् प्रायश्चित्तं गणिन आचार्यस्य यस्य च्चाग्रहेण ते आचार्या व्रजन्ति । तस्याप्येतदेव प्रायश्चित्तं । न च तत् क्षेत्रं तेषामाभवति । तत्र गत्वा यदि सचित्तमाददति तदा प्रायश्चित्त चत्वारो गुरुकाः । आदेशान्तरेणानवस्याप्यमचित्ते उपधिनिष्पन्नं तस्मादविधिरेष न कर्तव्यः । तथा चाह-

[भा.३८९०] एसा अविही भणिया तम्हा एवं न तत्थ गंतव्वं ।
गंतव्वं विहीए पडिलेहेऊण तं खेत्तं ।।

वृ- यस्मादेषो अनन्तरोदितोऽविधिर्गाथायां स्त्रीत्वं प्राकृतत्वादेवं तत्र न गन्तव्यं । किंतु विधिना क्षेत्रं प्रत्युपेक्ष्य गन्तव्यम् ।

[भा.३८९१] खेत्तपडिलेहणविही पढमुद्देसम्मि वन्निया कप्पे ।
सव्वे व इहोद्देसे खेत्तविहाणंमि नाणत्तं ।।

वृ- क्षेत्रप्रत्युपेक्षणविधिः कल्पे कल्पाध्ययने प्रथमोद्देशे वर्णितः । स एवेह अस्मिन्नपि व्यवहारस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दशमे उद्देशके द्रष्टव्यो नवरमत्र क्षेत्रविधाने क्षेत्रभेदकथने नानात्वं इहाधिकं क्षेत्रभेदकथनमित्यर्थः ।

[भा. ३८९२] चतुगुणोववेयं तु खेत्तं होइ जहन्नगं ।
तेरसगुणमुक्कोसं दोण्हं मज्झंमि मज्झिमगं ।।

वृ- चतुर्भिर्गुणैर्वक्ष्यमाणैरुपेतं भवति क्षेत्रं जघन्यं, त्रयोदशगुणमुत्कृष्टं, द्वयोर्जघन्योत्कृष्टयोर्मध्ये मध्यमकं । तत्र जघन्यं चतुर्गुणोपेतमाह-

[भा. ३८९३] महती विहारभूमी वियारभूमीय सुलभवित्ती य ।
सुलभा वसही य जहिं जहन्नगं वासखेत्तं तु ।।

वृ- यत्र महती विहारभूमी भिक्षापरिभ्रमणभूमिर्महती च विचारभूमिस्तथा यत्र वृत्तिर्भिक्षा सुलभा वसतिश्च सुलभा तत् जघन्यं वर्षाक्षेत्रं । सम्प्रति त्रयोदशगुणानाह-

[भा. ३८९४] चिक्खल्लपाणिथंडिल वसही गोरस जनाउले विज्जे ।
उसह निचयाहिवती पासंडा भिक्खसज्झाए ।।

वृ- चिक्खल्लत्ति यत्र प्रायो भूयान् कर्दमो न विद्यते, न च भूयांसः संमूर्छिच्छमाः प्राणा यत्र च स्थण्डिलमनापातासंलोकं, महास्थण्डिलं च ईप्सितायां दिशि, तथा यत्र प्रचुरं गोरसं, भूयान् जनः सोऽप्यतीव भद्रकः, तथा यत्र वैद्या भद्रकाः, सुलभानि च औषधानि, कुटुम्बिनां भूयांसो धान्यनिचयाः, अधिपतिर्नाम राजा स भद्रकः, पाषण्डैरनपमानं, भैक्षं सुलभं तृतीयस्यां पौरुष्यां पर्याप्तं लभ्यते । अन्यास्वपि पौरुषीयु यदि कार्यं, ततो लभ्यते भिक्षा स्वाध्यायोऽपि च वसतावन्यत्र च शुध्यति । ईद्दशं क्षेत्रं प्रत्युपेक्ष्यमवश्यमनुज्ञापयितव्यं । एतदेवाह-

[भा. ३८९५] खेत्तपडिलेहणविही खेत्तगुणा चेव वन्निया एए ।
पेहेयव्वं खेत्तं वासो जोग्गं तु जं कालं ।।

वृ- क्षेत्रप्रत्युपेक्षणविधिः क्षेत्रगुणाश्च एतऽनन्तरोदिता वर्णितास्तत्र कस्मिन् काले वर्षायोग्यं क्षेत्रं प्रत्युपेक्षितव्यमनुज्ञापयितव्यमत आह-

[भा. ३८९६] खेत्ताण अनुन्नवणा जेट्ठामूलस्स सुद्धपडिवए ।
अहिगरणो मानो मा मनसंतावा नहा हुंति ।।

वृ- ज्येष्ठमूलस्य मासस्य शुद्धप्रतिपदि शुक्लपक्षे प्रतिपदि क्षेत्राणामनुज्ञापना भवति । किं कारणमत आह-अहिगरणो इत्यादि अन्येपि तत्राजानन्तस्तिष्ठेयुस्ततो ततो द्वयोरधिकरणं भवेत, तथा स्वपक्षेभ्यो-ऽपमानं भूयात् । तथा च सति महान्मनःसन्तापः प्रेरिता वयं परिभूताः स्म । इति । अथवा कलहप्रवृत्ताव-युक्तवचनैर्मनःसंतापः स्यात्तस्मात् ज्येष्ठामूलं शुद्धप्रतिपदि कर्तव्या । तथानुज्ञापना एतदेवाह-

[भा. ३८९७] एएहिं कारणेहिं अनागयं चेव होइ अनुन्नवणा ।
निग्गमपवेसणंमि य पेहंताण विहि वुच्छं ।।

वृ- एतैरनन्तरोदितैः कारणैरनागतमेव भवति क्षेत्रस्यानुज्ञापना, सम्प्रति तेषां क्षेत्रं प्रेष्यमाणानां निर्गमे प्रवेशे च विधिं वक्ष्यामि प्रतिज्ञातमेव करोति ।

[भा. ३८९८] केई पुव्वं पच्छा व निग्गया पुव्वमतिगया खेत्तं ।
समसीमंत पत्ताण मग्गणा तत्थिमा होइ ।।

वृ- केचित् क्षेत्रत्रत्युपेक्षणाय पूर्वनिर्गताः केचित् पश्चान्निर्गतास्तथा प्रवेशे पूर्वमतिगताः प्राप्ताः क्षेत्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केचित्तत्र समकालं सीमानं प्राप्तानामियं वक्ष्यमाणा मार्गणा भवति । अनया गाथयान्यपादत्रयेण समकं किल चतुर्भङ्गी सूचितास्ततस्तामेव दर्शयति-

[भा.३८९९] पुव्वं विनिग्गतो पुव्वमतिगतो पुव्वनिग्गतो पच्छा ।
पच्छा निग्गतो पुव्वं, तु अतिगतो दोवि पच्छा वा ।।

वृ- जातावकेवचनमतो बहुवचनं द्रष्टव्यं पूर्वं निर्गताः पूर्वमेव समकं प्राप्ताः १ पूर्वं निर्गताः पश्चादेकतरे प्राप्ताः २ पश्चाद्विनिर्गताः पूर्वं प्राप्ताः ३ एकतरे पश्चाद्विनिर्गताः पश्चादेव च तत् क्षेत्रमतिगताः ४ ।

[भा.३९००] पढमभंगे इणमो उ मग्गणा पुव्वणुन्नवे जइ तु ।
ता तेसि होइ खेत्तं अह पुन अच्छंति दप्पेण ।।

वृ- तत्र भङ्गचतुष्टयमध्ये प्रथमके भङ्गे इयं मार्गणा भवति । यदि पूर्वमेव समकं निर्गतैः पूर्वमेव च समकं तत्क्षेत्रं प्राप्तैः पूर्वमेघ च समकमनुज्ञापयन्ति तदा तेषां भवति साधारणक्षेत्रमथ पुनः समकं प्राप्ता अपि एकतरे दर्पेण तिष्ठन्ति, दर्पो नाम निष्कारणं, तदा यैः पूर्वमनुज्ञापितं तेषां तत्क्षेत्रं नेतरेषाम् ।

[भा.३९०१] खेत्तमतिगयामोत्ति वीसत्थ जइ अत्थहे ।
पच्छा गयणुन्नवए, तेसिं खेत्तं वियाहियं ।।

वृ- क्षेत्रमतिगताः प्राप्ताः स्म इति यदि विश्वस्ता आसीरन् न क्षेत्रानुज्ञापनाय यतन्ते तदा आसतां पूर्वप्राप्ताः किन्तु पश्चाद्गताः अपि ये तेभ्यः पूर्वमनुज्ञापयन्ति क्षेत्रं तेषां तत् क्षेत्रं व्याख्यातं कथितम् ।

[भा.३९०२] गेलन्न वाउलाणं तु, खेत्तमन्नस्स नो भवे ।
निसिद्धो खमतो चेव तेन तस्स न लब्भते ।।

वृ- ग्लानत्वेन आकुलानां पूर्वं समकं प्राप्तानामपि समकं पूर्वं वानुज्ञापनमभूत्तदा कारणे स्थितत्वात्तेषामाभवति तत्क्षेत्रमन्यस्य पूर्वं प्राप्तपूर्वानुज्ञापकस्य वा, तथा क्षपको निष्कारणे क्षेत्रप्रत्युपेक्षणाय न प्रवर्तयितव्यो निषेधात्तेनाकारणेन तस्य क्षपकस्य यत्क्षेत्रं तेन क्षपकेणयदनुज्ञापितं क्षेत्रमित्यर्थः तत्तैर्न लभ्यते, किन्तु यैः पश्चादप्यागतैरनुज्ञापितं तेषां तत्क्षेत्रं, अथ कारणे क्षेत्रप्रत्युपेक्षणाय क्षपकः प्रवर्तितस्तदा तेनानुज्ञापितं ते लभन्ते क्षेत्रं, तथा क्षपकस्य पारणके व्याकुला इति नानुज्ञापयन्ति । तदा न तेषां तत्क्षेत्रं, किन्तु यैरनुज्ञापितं तेषामिति तदेवं गतः प्रथमो भङ्गः । सम्प्रति द्वितीयं तृतीयं च भङ्गमधिकृत्य विवक्षुरिदमाह-

[भा.३९०३] पुव्वविनिग्गया पच्छा, पविट्ठा पच्छा य निग्गया ।
पूव्विं कयरेसिं खेत्तं, तत्थ इमा मग्गणा होइ ।।

वृ- पूर्वं विनिर्गताः पश्चादन्यापेक्षया क्षेत्रे प्रविष्टाः, अपरे पश्चाद्विनिर्गता अन्यापेक्षया पूर्वं प्रविष्टाः, कतरेषां तेषां क्षेत्रं भवति मार्गणा । तमेवाह-

[भा.३९०४] गेलन्नादीहिं कज्जेहिं पच्छाइंताण होति खेत्तं तु ।
निक्कारण ठिया ऊ पच्छातिता उ न लभंति ।।

वृ- पूर्वं विनिर्गताः सन्तो यदि ग्लानादिभिः कारणैः पश्चादागच्छन्ति तदा तेषां पश्चादतियतामागच्छतां भवति क्षेत्रं । अथ निष्कारणं यत्र तत्र वा स्थितास्तेन पश्चात् आगतास्तदा ते पश्चादागच्छतो न लभंते क्षेत्रम्, गतो द्वितीयभङ्गस्तृतीयमधिकृत्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३९०५] पच्छविनिग्गओविहु दूरासन्ना समा व अद्धाणा ।
सिग्घगती उसभावा पुव्वं पत्तो लभति खेत्तं ।।

वृ- गाथायामेकवचनं स्पर्धकस्वाभ्यपेक्षया पश्चाद्विनिर्गतोऽपि हु निश्चितं दूरात् आसन्नात् समाद्वा स्वभावात् शीघ्रगतिरिरिति कृत्वा पूर्वं प्राप्तस्तदा स लभते क्षेत्रम् ।

[भा.३९०६] अह पुन असुद्धभावो गतिभेदं काउ वच्चती पुरतो ।
मा एए गच्छंती पुरओ ताहे न लभति ।।

वृ- अथ पुनर्मा एत अन्ये पुरतो गच्छन्ति यास्यन्तीति एवमशुद्धो भावो गतिभेदे कृत्वा पुरतो याति तदा स पुरोगाम्यपि न लभते क्षेत्रं भावस्याशुद्धत्वात् ।

[भा.३९०७] समयंपि पत्थियाणं सभावसिग्घगतिणो भवे खेत्तं ।
एमेव य आसन्ने, दूरठाणीण जो एति ।।

वृ- समकमपि विवक्षितान् प्रस्थितानां मध्ये यः स्वभावशीघ्रगतिः सन् पुरतो याति तस्य तत्क्षेत्रं एवमासन्ने आसन्नाध्वनीतो दूराध्वनतो वा यः पुरतः समागच्छति अनुज्ञापयति च स लभते क्षेत्रम्-

[भा.३९०८] अहवा समयं पत्ता, समयं चेव अनुन्नविते दोहिं ।
साहारणं तु तेसिं दोण्हवि वग्गाण तं होइ ।।

वृ- अथवा आसन्नात् दूरात् समाद्वा अध्वनः समकमेव तत् क्षेत्रं प्राप्ताः समकमेव द्वाभ्यामपि वर्गाभ्यां तत् क्षेत्रमनुज्ञापितं तदा तयोर्द्वयोरपि वर्गयोः साधारणं तत् क्षेत्रं, गतस्तृतीयो भङ्गश्चतुर्थे तु भङ्गे यदि पूर्वप्रविष्टैः सह समकमनुज्ञापितं तदा साधारणं अथ पश्चात्प्राप्तैरपि पूर्वमनुज्ञापितं तदा तेषामिति । तदेवमुक्ता चतुर्भङ्गिकी, सम्प्रति 'समसीमं तू पत्ताण' इत्येतद्व्यानमाह-

[भा.३९०९] अहवा समयं दोण्हि वि सीमं पत्ता उ तत्थ जे पुव्विं ।
अनुजाणावे तेसिं न जे उ दप्पेण अच्छंति ।।

वृ- अथवेति प्रागुक्तापेक्षया प्रकारान्तरे द्वावपि वर्गौ समकं सीमानं प्राप्तौ तत्र ये पूर्वमनुज्ञापयन्ति तेषां तत्क्षेत्रं, न ये दर्पेण निष्कारण मेवमेव तिष्ठन्ति तेषामिति, सीमाग्रहणद्वारगाथायामुद्याना-दीनामुपलक्षणं तेन तद्विषयामपि मार्गणामाह-

[भा.३९१०] उज्जानगामदारे वसहिं पत्ताण मग्गणा एवं ।
समयमणुन्ने साहारणं तु ते न लभंति जे पच्छा ।।

वृ- उद्यानं ग्रामद्वारं ग्रामग्रहणं नगरादीनामुपलक्षणं तथा वसतिं समकं प्राप्तानामेवमुक्तप्रकारेण मार्गणा कर्तव्या । तामेव दर्शयति । यदि समकमनुज्ञापयन्ति ततः साधारणं, ये पुनः पश्चादनुज्ञापयन्ति ते न लभन्ते ।

[भा.३९११] ते पुन दोन्नी वग्गा गणि आयरियाणं होज्ज ।
दोण्हं गणिणं य होइज्ज दोण्हं तु आयरियाणं ।।

वृ- तौ पुनर्द्वौ वर्गौ द्वयोर्गण्याचार्ययोर्भवितां, गणी नामात्र वृषभः एको वर्गो वृषभस्यापर आचार्यस्य, अथवा द्वयोर्गणिनोर्यदि वा द्वयोराचार्ययोर्द्वौ वर्गाविति तत्रेयं मार्गणा-

[भा.३९१२] अच्छंति संथरे सव्वे गणीनीति असंथरे ।
जत्थ तुल्ला भवे दोवी तत्थिमा होति मग्गणा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- यदि तत्र क्षेत्रं संस्तरणं तदा सर्वेऽपि तिष्ठन्ति । अथ सर्वेषामसंस्तरणं तदा असंस्तरणे गणी वृषभो निर्गच्छति आचार्यस्तिष्ठति । अथ द्वावपि वर्गौ तुल्यौ द्वावपि गणिनौ द्वावप्याचार्यो वा तदा तत्रेयं भवति मार्गणा । तामेवाह-

[भा.३९१३] निष्फन्न तरुण सेहे जुंगिय पायच्छिनासकरकन्ना ।
एमेव संजतीणं नवरं वुड्ढीसु नाणत्तं ।।

वृ- एकस्य निष्पन्नपरिवार एकस्यानिष्पन्नो यस्य निष्पन्नः स गच्छतु इतरस्तिष्ठतु, अथ द्वयोरपि परिवारो निष्पन्नः केवलमेकस्य तरुण एकस्य वृद्धः वृद्धास्तिष्टन्तु इतरे गछन्तु, अथ द्वयोरपि तरुणा वृद्धा वा नवरमेकस्य शैक्षा अपरस्य चिरप्रव्रजिताः तत्र ये चिरप्रव्रजितास्ते गच्छन्तु इतरे तिष्ठन्तु, अथ द्वयोरपि शैक्षाश्चिरप्रव्रजिता वा, केवलमेकस्य जुङ्गितपादाक्षिनाशाकरकर्णा, अपरस्याजुङ्गितास्तत्र जुङ्गितास्तिष्ठन्त्वितरे गच्छन्तु, अथ द्वयोरपि जुङ्गितास्तत्र ये पादजुङ्गितास्ते तिष्ठन्त्वितरे गच्छन्तुः, सम्प्रति संयतीनां प्रवर्तिन्या अभिषेकायाश्च मार्गणा कर्तव्या । ततस्तामाह- एवमेव अनेनैव प्रकारेण संयतीनां मार्गणा कर्तव्या, नवरं वृद्धासु नानात्वं तच्चेदं तरुणीवृद्धानां तरुण्यस्तिष्ठन्ति वृद्धा गच्छन्ति, शेषं तथैव । सम्प्रति संयतानां संयतीनां च समुदायेन मार्गणां करोति-

[भा.३९१४] समणाण संयतीण य समणी अच्छंति नेति समणा उ ।
संजोगें वि य बहुसो अप्पाबहुअं असंथरणे ।।

वृ- श्रमणानां संयतीनां चैकत्र स्थानेऽवस्थितानामसंस्तरणे श्रमण्यस्तिष्ठन्ति निर्गच्छन्ति श्रमणाः, संयोगे च बहुशः प्रवर्तमानेष्वसंस्तरणेऽल्प बहुपरिभाव्य वक्तव्यम् । तथैव यत्र संयता जुंगिताः श्रमण्यो वृद्धास्तत्र जुंगितास्तिष्ठन्ति श्रमण्यो निर्गच्छन्ति । एवं गुरुलाघवं परिभाव्यं स्वबुद्ध्या भावनीयं । सम्प्रति क्षेत्रिकाक्षेत्रिकाणां संस्तरणयोर्मार्गणां करोति ।

[भा.३९१५] एमेव भत्तसंतुठा तस्सालंभंमि अप्पभू निंति ।
जुंगियमादीएसु य वयंति खेत्तीण ते तेसिं ।।

वृ- एवमेव अनेनैव प्रकारेण क्षेत्रिकाक्षेत्रिकाणमपि संस्तरणेऽसंस्तरणे च भावनीयं । तच्चैवं यदि संस्तरणं तदा क्षेत्रिका अपि तिष्ठन्तु अक्षेत्रिका अपि नवरमक्षेत्रिका भक्तसंतुष्ठास्तिष्ठन्तु । सचित्तमुपधिं च न लभन्ते 'तस्साल्लभंमित्ति' तस्य भक्तस्य अलाभे असंस्तरणे इत्यर्थः । अप्रभवोऽक्षेत्रिका निर्गच्छन्ति । अथाक्षेत्रिका जुङ्गिता आदिशब्दादजङ्गमा वा, तदा तेष्वक्षेत्रिकेषु जुङ्गितादिषु क्षेत्रिणो व्रजन्ति जुङ्गितादयस्तिष्ठन्तु, येषां च सम्बन्धिनस्ते जुङ्गिता वृद्धा वा न तेषां तत्क्षेत्रमाभवति उपलक्षणमेतत् । तेनादेशिनां कुडुक्कादीनां च नाभवति क्षेत्रम् ।

[भा.३९१६] पत्ताण अनुन्नवणा सारूविय सिद्धपुत्त सन्नी य ।
भोईय महयर न्नाविय निवेयण दु गाउयाइं ।।

[भा.३९१७] सगामसन्नि असति पडिवसभे पल्लिए व गंतूणं ।
अम्हं रुइयं खेत्तं नायं खु करेह अन्नेसिं ।।

वृ- क्षेत्रप्रत्युपेक्षकाणां यत्र वर्षारात्रः कर्तव्यस्तत् क्षेत्रं प्राप्तानामनुज्ञापना भवत्यमीषां कर्तव्या तानेवाह-सारूपिकसिद्धपुत्रौ प्रागभिहितौ संज्ञिनो गृहीतानुव्रतदर्शनश्रावकाः भोजिको ग्रामस्वामी महत्तरा ग्रामप्रधानाः पुरुषा नापिता नखशोधका वारिका इत्यर्थः, एतेषामनुज्ञापना कर्तव्या यथा वयमत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वर्षारात्रं कर्तुकामास्तद्यथान्ये केचित्साधव आगच्छेयुस्तदा तेषामेतत् यूयं कथयतेति 'दुगाउयाइं' चेत्यादि यदि तत्र स्वग्रामे संज्ञी श्रावको न विद्यते तदा द्वे गव्यूते गत्वा प्रतिवसभे अन्तरपल्ल्यां वा गत्वा यदि श्रावकोऽस्ति ततस्तस्य निवेदना कर्तव्या । यथास्माकमिदं रुचितं क्षेत्रमेतत् ज्ञातमन्येषां कुरुतेति ।

[भा.३९१८] जयणाए समणाणं अनुन्नविता वसंति खेत्तबहिं ।
वासावासट्ठाणं आसाढे सुद्धदसमीए ।।

वृ- यतनया सारूपिकादिकं सन्तमनुज्ञाप्य क्षेत्रस्य बहिर्वसन्ति वर्षावासस्थानं पुनराषाढे शुद्धदशम्यां । सम्प्रति जयणाए इत्यस्य व्याख्यानमाह-

[भा.३९१९] सारूवियादि जयणा अन्नेसिं वावि साहए बाहिं ।
बाहिं वा वि ठिया संता पायोग्गं ताधि गेण्हए ।।

वृ- सारूपिकादीनामन्येषां वा यत्साधयति कथयति एषा यतना इयं च प्रागेवोक्ता । अथवा पूर्वगाथाप्रथमार्धस्यैवं व्याख्या-सन्तं सारूपिकादिकमनुज्ञाप्य क्षेत्रस्य बहिर्यतनया वसन्ति । तत्र तामेव यतनामाह-बहिर्वापि स्थितास्तत्र वर्षाप्रायोग्यमुपधिं गृह्णन्ति उत्पादयन्ति तच्चैवं संघाटकाः सर्वासु दिक्षु प्रत्यासन्नं प्रेक्षन्ते । एकैकश्च सङ्घाट आत्मनः परिपूर्णमुपधिमुत्पादयति । एकस्य च जनस्याधिकस्येति।

[भा.३९२०] दोण्हं जतो एगस्सा निप्पज्जइ तत्तियं बहिठियाओ ।
दुगुणप्पनुवासबहिं संथरे पल्लिं च वज्जंति ।।

वृ- द्वयोरूपधिर्यस्मादेकस्यान्यस्य निष्पद्यते उपधिरात्मनश्च संघाटस्य तदपेक्षया द्विगुणस्तावन्मात्रमुपधिं वर्षायोग्यं सर्वासु दिक्षुः बहिःस्थिता उत्पादयन्ति यदि पुनः संस्तरन्ति तदा बहिः प्रतिवृषभग्रामान् अन्तरपल्लीं च वर्जयंति न तत्र गच्छन्ति-

[भा.३९२१] उच्चारमत्तगादी छारादी चेव वासपाउग्गं ।
संथार फलगसेज्जा तत्थ ठिया चेव नुन्नवणा ।।

वृ- तथा तत्र बहिः स्थिता एव उच्चारमात्रकादि आदिशब्दात् प्रश्रवणमात्रकपरिग्रहस्तथा क्षारादि आदिशब्दात् डगलगादिपरिग्रहः वर्षाप्रायोग्यं तथा संस्तारकफलकशय्या अनुज्ञापयति । अथ कस्मात्सर्वेषां सारूपिकादीनामनुज्ञापना क्रियते ? उच्यते एकस्य कथिते कदाचित्सोऽसद्भूतः स्यात्ततोऽनुज्ञापितमननुज्ञापितमेव जायते, सर्वेषां पुनः कथिते यदि केचिदसद्भूता भवन्ति तदेते ये शेषाः सन्तस्ते अन्येषां साधूनामागतानां कथयन्ति । ते च बहिस्तिष्ठन्ति, प्रतिवृषभे अंतर पल्लयां वा तत्र यां न भोक्ष्यन्ते।

[भा.३९२२] पुन्नो य तेसिं तहि मासकप्पे, अन्नं च दूरे खलु वासजोगं ।
ठायंति तो अंतरपल्लियाए, जं एस काले य न भुंजिहत्ती ।।

वृ- पूर्णः खलु तेषां तत्र वर्षाप्रायोग्यतया संभाविते क्षेत्रेऽथवा आषाढशुद्धदशमी । अन्यच्चापि दूरे अन्यच्च वर्षाकालयोग्यं क्षेत्रं दूरे तत्र आषाढशुद्धदशमी प्रविक्षणार्थं यामेष्यति काले न भोक्ष्यन्ते तस्यामन्तरपल्ल्यामुपलक्षणमेतत् प्रतिवृषभे वा ग्रामे तिष्ठन्ति । अत्र आषाढशुद्धदशम्यां वर्षायोग्ये क्षेत्रे समागच्छन्ति ।

[भा.३९२३] संविग्गबहुलकाले एसा मेरा पुरा य आसी य ।
इयरबहुले उ संपइ पविसंति अनागयं चेव ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- एषा मर्यादा पुरा संविग्नबहुले काले आसीत् । सम्प्रति इतरबहुले पार्श्वस्थादिबहुले अनागतमेव प्रविशन्ति । किं कारणमत आह-

[भा.३९२४] पेहिए न हु अन्नेहिं पविसंता य पठिया ।
इयरे उ कालमासज्ज पल्लेजा परिवड्डिया ।।

वृ- अन्यैः प्रेक्षितक्षेत्रे नहु नैवायतार्थिनो मोक्षार्थिनः प्रविशन्ति, इतरे तु पार्श्वस्थादयः कालमासाद्य परिवर्धिताः पूर्वप्रत्युपेक्षितक्षेत्रानपि प्रेरयेयुस्ततोऽनागतमेव प्रविशन्ति । तत्रार्थे कल्पित-मुदाहरणमाह-

[भा.३९२५] रुन्नं तगराहारं वएहिं कुसुमसुयं तेहिं ।
उज्जान पडिसवत्तीहिं वत्थूला हिवयंतीहिं ।।

वृ- तगराहारे आम्रकास्तगराहाराम्रकास्तैराम्रोद्यानप्रतिसपत्नैर्बत्थूलैः वृतिकरणाय स्थाप्यमानैगार्थायां स्त्रीत्वं प्राकृतत्वात् वयमाच्छदिता इति हेतोः कुसुमाश्रुभिर्मुच्यमानैः रुदितम् । इयमत्र भावना तगराहारे पूर्वं बहव आम्रा आसीरन् स्तोका वत्थूलास्ततो लोकेन वत्थुलानाच्छिद्य तैराम्रोद्यानस्य वृत्ति कृतास्तत्र बब्बूलफलपतनतो बब्बूला जातास्तैः परिवर्धमानैः शालिसस्यमिव तृणैराम्रा विनाशितास्तत उत्प्रेक्षितमाम्रोद्यानप्रतिसपत्नैर्बब्बूलैर्वृत्तिकरणाय स्थाप्यमानैर्वयमाच्छादिता नूनमेतैरिति कुसुमाश्रुमोक्षणेनाम्रै रुदितमिति अत्रोपनयमाह ।

[भा.३९२६] एवं पासत्थमादी उ कालेण परिवड्डिया ।
पेलेज्जा माइठाणेहिं सोच्चाहीतं इमे पुनो ।।

वृ- एवं आम्रस्थानीयान् वत्थूलस्थानीयाः पार्श्वस्थादयः कालेन परिवर्धिताः संतो मातृस्थानैः प्रेरयंति, किं विशिष्टाः पार्श्वस्थादय इत्याह-

[भा.३९२७] सोच्चा उड्डी अनापुच्छा, माया पुच्छा जयट्ठिते ।
अजयट्ठिए भंडंते ततिए समणुन्नया दोएहं ।।

वृ- एके श्रुत्वा उपेत्य समागताः अपरे अनापृच्छाः समाययुरथवा मायापृच्छाः एते द्वयेऽप्ययतस्थिता स्तृतीयायतस्थितास्तत्राद्यानां द्वयानां भण्डमानानां कलहयतां गाथायां सप्तमी षष्ठ्यर्थे बहुवचने एकवचनं प्राकृतत्वान्न किंचिदाभाव्यं । तृतीये यतस्थिते समनोज्ञता साधारणं क्षेत्रमेष द्वारगाथासमासार्थः । साम्प्रतमेनामेव विवरीषुः प्रथमतः सोच्चा उड्डीति पदं व्याख्यानमति ।

[भा.३९२८] गुरुणो सुंदरखेत्तं साहंतं सोच्च पाहुणो ।
नएज्ज अप्पणो गच्छं । एस आउट्टिया ठितो ।।

वृ- गुरोराचार्यस्यात्मीयस्य क्षेत्रं प्रत्युपेक्ष्य समागतैः सुदरं क्षेत्रमिति कथ्यमानं श्रुत्वा प्राघूर्णिक आत्मनो गच्छं तत्र नयति । एष श्रुत्वा उपेत्य स्थित उच्यते । सम्प्रत्यनापृच्छां च दर्शयति ।

[भा.३९२९] पेहितमपेहितं वा ठायइ अन्नो अपुच्छियं खेत्तं ।
गोवालवत्थवाले पुच्छइ अन्नो उ दुपुच्छी ।।

वृ- प्रेक्षितमिदं क्षेत्रमन्यैरप्रेक्षितं वेत्यन्योऽनापृच्छय तिष्ठति अन्यः पुनर्दुःपृच्छी ये न किमपि जानते तान् गोपालवत्सपालान् पृच्छति अन्यैरिदं क्षेत्रं प्रत्युपेक्षितं किं वा नेति ।

[भा.३९३०] अविहिठिया उ दोवेते ततिओ पुच्छिउं विहीए ठितो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सारुवियमादि काउं वितन्नेहिं न पेहियं ।।

[भा.३९३१]　　तं तु वीसरियं तेसिं पउत्था वावि ते भवे ।
खेत्तिओ य तहिं पत्तो तत्थिमा होइ मग्गणा ।।

वृ- तावनन्तरोदितौ द्वावपि श्रुत्वोपेत्य स्थितोऽनापृच्छया मायापृच्छया च स्थित इत्येवं लक्षणावविधिस्थितौ, तृतीयः पुनः सारुपिकभादि कृत्वा सूत्रोक्तेन विधिना पृष्ट्वा स्थितः । यतस्तेषां सारूपिकादीनां यत् पूर्वैरनुज्ञापितं तत् विस्मृतम् । अथवा येऽनुज्ञापितास्ते प्रोषिता अभवन् । अन्ये च स्वरूपं न जानते ततस्ते ब्रुवते अन्यैर्न प्रेक्षितमिदं क्षेत्रमिति येन च पूवसंघाटकप्रेक्षणेन क्षेत्रं प्रत्युपेक्षितं स क्षेत्रिकसूत्रप्रास्तस्तत्रेयं वक्ष्यमाणा भवति मार्गणा । तामेवाह-

[भा.३९३२]　　आउट्टिताठितो जे न तस्स नामंपि नेच्छिमो ।
अणापुच्छिय दुप्पुच्छी भंडंते खेत्तकारणा ।।

वृ- तत्र य उपेत्य स्थितस्य नामापि नेच्छामः । सर्वथा सर्वज्ञाज्ञा प्रतिकूलतया दुर्गृहीतनामधेयत्वात् । यस्त्वनापृच्छी दुःपृच्छी वा तौ द्वावपि क्षेत्रकारणेन भण्डीते कलहं कुरुतः ।

[भा.३९३३]　　अहवावि दोवि भंडंते जयणाए ठिएण ते ।
खेत्तितो दोवि जेउण भत्तं देह न उग्गहं ।।

वृ- अथवा द्वावपि तौ यतनास्थितेन सह भण्डते ततो व्यवहारे जाते क्षेत्रिकः सूत्रोक्तेन विधिना तौ जित्वा तयोर्भक्तं ददाति, अनुजानाति नत्ववग्रहं सचित्तमुपधिं वा नानुजानातीति भावः ।

[भा.३९३४]　　तइयाण सयं सोच्चा सड्ढादी एव पुणियं ।
होइ साहारणं खेत्तं दिठंतो खमएण ऊ ।।

वृ- तृतीयानां यतनास्थितानां तद्वचनतः क्षेत्रिकः स्वयं श्रुत्वा श्राद्धादीन्वा पृष्ट्वा ज्ञातं स्वरूपं यथा पृष्ट्वा विधिनैते स्थिता इयमत्र भावना क्षेत्रिकेण यतना स्थिता अपि पृष्टाः किं भवन्तोऽत्र स्थितास्ते-ऽवादिपुर्वयमत्र पृष्ट्वा स्थिताः परं न केनापि कथितं यथान्यैरनुज्ञापितमिदं क्षेत्रमिति ततस्तेन क्षेत्रिकेण श्राद्धादयः पृष्टास्तेऽप्यूचुर्यतो युष्माभिरनुज्ञापितं तदस्माकं विस्मृतं, यदि वा वयं प्रोषिता अभूमयेऽप्येतैरनुज्ञापितास्तैरप्यस्माकं कथितं यथैतैर्वयमनुज्ञापिता इति, एवं तेषां यथास्थिते स्वरूपे ज्ञातेसाधारणमुभयेषां भवतिक्षेत्रं, विधिना पृच्छातो यतनास्थितानामपि शुद्धत्वात्, अत्र दृष्टांतः क्षपकेण पिंडनिर्युक्तिप्रसिद्धेन यथा पायसक्षपको विधिना शुद्धं गवेषयन् आधाकर्मण्यपि शुद्धस्तथा इमे यतना स्थिता अपि एतदेवाह-

[भा.३९३५]　　सुद्धं गवेसमाणो पायसखमतो जहा भवे सुद्धो ।
तह पुच्छिउ ठायंता सुद्धा उ भवे असढभावा ।।

वृ- यथा पायसस्य क्षीरान्नस्य प्रतिग्राहकः पायसक्षपकः शुद्धं गवेषयन् आधाकर्मण्यपि पायसे गृह्यमाणे शुद्धस्तथा विधिना पृष्ट्वास्तिष्ठन्तोऽशठभावाः शुद्धा भवन्ति । अत्रैव प्रकारान्तरमाह-

[भा.३९३६]　　अतिसंथरणे तेसिं उवसंपन्ना उ खेततो इयरे ।
अविहिठिया उ दोवी अहवा इमा मग्गणा अन्ना ।।

वृ- अतिसंस्तरणे संस्तरणातिक्रमेण तेषां क्षेत्रिकाणामितरे यतना स्थायिनः क्षेत्रत उपसम्पन्ना द्वौ पुनः प्रागुक्तावाविधिस्थितौ तेषामथवा इयमन्या मार्गणा तामेवाह-

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

[भा.३९३७] पेहेऊणं खेत्ते केई ण्हाणादि गंतु तु सरणं ।
पुच्छंताण कहंती अमुगत्थ वयं तु गच्छामो ।।

वृ- केचित्साधवो वर्षारात्रयोग्यं क्षेत्रं प्रत्युपेक्ष्यानुज्ञाप्य चेदं चिन्तयन्ति, यथाऽत्र प्रत्यासन्नेषु स्थानेषु समन्ततो बहवो गच्छाः क्षेत्राणि च वर्षाप्रायोग्याणि तत्र प्रचुराणि न सन्ति, समासंन्नश्च वर्षाकालस्ततो मा केचिदन्येऽजानन्तोऽत्र तिष्ठेयुरिति स्नानादिसमवसरणे सर्वेऽपि मिलिता भविष्यन्तीति तत्रगत्वा सर्वेषां विदितं कुर्मः । एतच्चिन्तयित्वा तदनन्तरं स्नानादिसमवसरणं गत्वा तेषां पृच्छतां कथयन्ति अमुकत्र वयं वर्षाकरणाय गच्छाम इति ।

[भा.३९३८] घोसणय सोच्च सन्निस्स पच्छिणा पुव्वमतिगए पुच्छा ।
पुव्वठिते परिणते एत्थ भणंते न से इच्छा ।।

वृ- प्रागुक्तं घोषणां श्रुत्वा कोऽपि धर्मकथालब्धिसम्पन्नो धर्मश्रद्धिकास्तत्र श्रावका भूयांसः तिष्ठन्तीति परिभाव्य निर्मर्यादस्तत्र पूर्वतरं गतो गत्वा च संज्ञिनः संज्ञिवर्गस्य प्रेक्षणा संस्तवधर्म-कथादिभिरात्मीकरणं ततः पश्चादागताः क्षेत्रिकास्तैः स पृष्टो युष्माकमग्रे कथितं ततः कस्मादिह त्वमागतः स तूष्णीक आसीत् । तत क्षेत्रिकैरुक्तं गच्छत यूयं, सम्प्रत्यपि श्रावकवर्गश्च तस्मिन् पूर्वस्थिते परिणत आसीत् ततः पश्चात् ब्रूते मा निर्गच्छतु वयं द्वयोरपि वर्तिष्यामहे । अत्र यत् क्षेत्रिकाणामाभवति । न से तस्य निर्मर्यादस्य वा इच्छा प्रभवति । साम्प्रतमिमामेव गाथां व्याचिख्यासुः प्रथमतो घोषणकं भावयति-

[भा.३९३९] बाहुल्ला संजयाणं उवग्गो यावि पाउसे ।
ठियामो अमुगे खेत्ते घोसण न्नोन्न साहणं ।।

वृ- संयतानां समन्ततः प्रत्यासन्नेषु बाहुल्यात् उपाग्रश्चातिप्रत्यासन्नश्च अपिशब्दादन्यानि च वर्षाप्रायोग्याणि क्षेत्राणि न सन्ति ततो मा अन्ये प्रविशन्त्विति स्नानादिसमवसरणे घोषणादिमन्योन्य-कथनं कृतवन्तो यथा वयममुकक्षेत्रे स्थिताः स्म इति घोषणस्यैव प्रकारान्तरमाह-

[भा.३९४०] विभिज्जंते च ते पत्ता, ण्हाणादीसु समागमो ।
पहु प्पत्ते य नो काले सन्ना घोसणयं ततो ।

वृ- साधूनां स्नानादिषु समागमे यो यत आगतः स तत्र संस्थितस्ते च विवक्षिताः क्षेत्रमनुज्ञाप्य तत्र प्राप्तास्तत्र यदेकैकगच्छस्य समीपे गत्वा क्रमेण कथ्यते तदा कालो न प्राप्यते उत्सूरस्य भवनात्ततो ये सङ्घसमवायाः चैत्याद्वा संप्रस्थितास्तान् आसन्नान् कृत्वा मेलापके मेलयित्वा महता शब्देन घोषणकं कुर्वते । यथा शृणुत साधवोऽस्माभिरमुकं क्षेत्रं वर्षानिमित्तमनुज्ञापितमिति सोच्चा सन्निसेत्यादि व्याख्यानार्थमाह-

[भा.३९४१] दानादि सड्ढ कलियं सोऊण तत्थ कोइ गच्छेज्जा ।
रमणिज्जं खेत्तंति य धम्मकहा लद्धि संपन्नो ।।

वृ- तत् घोषणकं श्रुत्वा कोऽपि धर्मकथालब्धिसम्पन्नो दानादिप्रधानश्राद्धकलितं तत् रमणीयं क्षेत्रमिति कृत्वा तत्र गच्छेत्-

[भा.३९४२] संथव कहाहि आऊट्टिऊण अत्ती करेइ ते सड्ढे ।
तेवि य तेसु परिनया इयरेवि तेहिं अनुपत्ता ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- संस्तवेन धर्मकथाभिश्च तान् श्राद्धान् आवर्त्य आवर्ज्य आत्मीकरोति तेऽपि च श्राद्धास्तेषु परिणता इतरेऽपि च क्षेत्रिकास्तत्रानुपश्चात्प्राप्ता-

[भा.३९४३] नीहत्ति तेन भणिते सड्ढे पुच्छंति तेवि य भणंति ।
अच्छह भंते दोण्हवि न तेसि इच्छाएं सच्चित्तं ।।

वृ- तैः क्षैत्रिकैर्निर्गच्छतेति भणिते ते पूर्वागताः श्राद्धान् पृच्छन्ति यामो (न) वयं निष्काश्य-मानास्तिष्ठामः ।तेऽपि च श्राद्धाः क्षेत्रिकान् समागत्य भणन्ति आसीध्वं भदन्त यूयं द्वयेऽपि, यतो द्वयोरपि वयं वर्तिष्यामहे तत्र तेषां पूर्वगतानामिच्छया सचित्तमुपलक्षणघेतदुपधिश्च न भवति किंतु क्षेत्रिकाणामेवेति ।

[भा.३९४४] असंथरे अनिंताणं कुलगणे संघे य होइ ववहारो ।
केवइयं पुन खेत्तं होइ पमाणेण बोधव्वं ।।

वृ- असंस्तरे अन्यत्रासंस्तरणे पुनरनिर्गच्छतां कुले गणे सङ्घे च भवति व्यवहारः किं पुनः क्षेत्रं भवति प्रमाणेन बोद्धव्यम् ।तत्राह-

[भा.३९४५] एत्थ सकोसमकोसं मूलनिबद्धं गाममभुयंताणं ।
सच्चित्ते अच्चित्ते मीसे य विदिन्नकालम्मि ।।

वृ- अत्र क्षेत्रमार्गणायां तत्क्षेत्रं मासप्रयोग्यं वा तत् सक्रोशमक्रोशं च ।तत्र यत् सक्रोशं तत्पूर्वादिषु दिक्षु प्रत्येकं सगव्यूतमूर्ध्वमधश्चार्धक्रोशं अर्धयोजने च समन्ततो यस्य ग्रामाः सन्ति, अक्रोशं नाम यस्य मूलनिबन्धात्परतः षण्णां दिशामन्यतरस्यामेकस्यां द्वयोस्तिसृषु वा दिक्षु अटवीजलश्वापदस्तेन-पर्वतनदीव्याघातेन गमनं भिक्षाचर्या च न संभवति ।तन्मूलनिबद्धमात्रम्क्रोशं तं ग्राममभुञ्चतां, किमुक्तं भवति तस्मिन् सक्रोशेऽक्रोशे वा क्षेत्रे स्थितानामृतुबद्धे काले निष्कारणमेकैको मासकल्पो वितीर्णोऽनुज्ञातः ।कारणेन पुनर्भूयानपि कालो, वर्षासु निष्कारणं चत्वारो मासाः कालो वितीर्णः, । कारणेन पुनरतिप्रभूतोऽपि, एवं वितीर्णे काले सचित्ते अचित्ते मिश्रे वावग्रहो भवति ।नावितीर्णे काले, तेषामसंस्तरणे अनिर्गच्छतां तत् साधारणं भवति क्षेत्रं तत्र चायं क्षेत्रव्यवहारः ।

[भा.३९४६] अत्थि हु वसहुग्गामा कुदेसनगरोवम सुहविहारो ।
बहु गच्छुवग्गहकरा सीमाच्छेएण वसियव्वं ।।

वृ- विवक्षितस्य स्थानस्य समन्ततः सन्ति वृषभग्रामाः ।किं विशिष्टा इत्याह कुदेशनगरोपमा बहुग-च्छोपग्रहकारिणस्तेषु सीमाच्छेदेन वस्तव्यं ।तत्र वृषभक्षेत्रं द्विविधमृतुबद्धे वर्षाकाले वा एकैकं त्रिविधं, तद्यथा-जघन्यं मध्यममुत्कृष्टं च, तत्र ऋतुबद्धे जघन्यमाह-

[भा.३९४७] जहियं च तिन्नि गच्छा पन्नरसुभया जना परिवसंति ।
एयं वसभखेत्तं तव्विवरीयं भवे इयरं ।।

वृ- उभौ जनौ आचार्यौ गणावच्छेदकश्च तत्राचार्य आत्मद्वितीयो गणावच्छेदी आत्मतृतीयः सर्वसंख्यया पञ्च इद्दशा यत्र त्रयो गच्छाः साधुसंख्यया पंचदश परिवसन्ति ।एतत् जघन्यमृतुबद्धे काले वृषभक्षेत्रं ।तद्विपरीतं यत्र तादृशाः पञ्चजना न संस्तरन्ति, तत् भवति इतरत् न वृषभक्षेत्रं भवतीति भावः उत्कृष्टं वृषभक्षेत्रं ।यत्र द्वात्रिंशत्साधुसहस्राणि संस्तरन्ति यथा ऋषभस्वामिकाले ऋषभशासनस्य गणधरस्य, जघन्योत्कृष्ठयोर्मध्ये मध्यमं वर्षाकाले यत्राचार्य आत्मतृतीयो गणावच्छेदीत्वात्मचतुर्थः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सर्वसंख्यया सप्त । एवं प्रमाणा यत्र च ये गच्छाः संस्तरंति एतत् जघन्यं वर्षाकालप्रायोग्यं, वृषभक्षेत्रं उत्कृष्टं मध्यमं च यथा ऋतुबद्धे काले इदृशेषु बहुगच्छोपग्रहकरेषु वृषभग्रामेषु सत्सु यदि वा एतेष्वेव साधारणेषु क्षेत्रेषु न परस्परं भण्डनं कर्तव्यं सचित्तादिनिमित्तं, किंतु सीमाच्छेदेन वस्तव्यं, ।

[भा.३९४८] तुब्भंतो मम वाहिं तुज्झ सचित्तं ममेतरं वावि ।
आगंतुगवत्थव्वा थी पुरिसकुलेसु व विरेगो ।

वृ- परस्परं वागन्तिको व्यवहार एवं कर्तव्यः । मूलग्रामस्यान्तर्मध्ये यत् सचित्तादि तत् युष्माकं, अस्माकं तु बहिः प्रतिवृषभादिषु अथवा युष्माकमुभयत्रापि सचित्तमस्माकमितरत् अचित्तं यदि वा युष्माकमागन्तुका अस्माकं वास्तव्या अथवा युष्माकं स्त्रियोऽस्माकं पुरुषा यदि वा एतेषु कुलेषु यो लाभः स युष्माकमेतेषु तु कुलेष्वस्माकमिति ।

[भा.३९४९] एवं सीमच्छेदं करंति साहरणंमि खेत्तंमि ।
पुव्वं ठितेसु जे पुन पद्दा एज्जा हि अन्ने उ ।।

वृ- एवमुक्तेन प्रकारेण साधारणे क्षेत्रे सीमाच्छेदं कुर्वन्ति ये पुनरन्ये तत्र पूर्वे स्थितेष्वन्येषां क्षेत्राणामभावे समागच्छन्ति ।

[भा.३९५०] खेत्ते उवसंपन्ना ते सव्वे नियमसो उ बोधव्वा ।
आभव तत्थ तेसिं सचित्तादीण किं भवे ।।

वृ- ते सर्वे नियमसो नियमेन क्षेत्रत उपसम्पन्ना ज्ञातव्याः । अथ तत्र क्षेत्रे तेषां तथा स्थितानां सचित्तादीनां मध्ये किमाभाव्यं भवति किं वा नेति तत्राह-

[भा.३९५१] नालपुरुस संथुय मित्ता य वयंसया सचिते ।
आहारमत्तगतिगं संथारगा वसहि मचित्ते ।।

[भा.३९५२] उग्गहंमि परे एयं लभते उ अखेत्तितो ।
वत्थगादि विदिन्नं तु कारणंमि वि सोलभे ।।

वृ- नालबद्धाः पूर्व संस्तुताः, पश्चात्संस्तुता मित्राणि वयस्याश्च एतत्सचित्ते परे परकीये अवग्रहे अक्षेत्रिको लभते । अचित्ते आहारमशनादिकं मात्रकत्रिकमुच्चारमात्रकं प्रश्रवणमात्रकं खेलमात्रकं च, संस्तारकं परिशाटिरूपं वा वसतिं च वस्त्रादिकं पुनर्दत्तं लभते, कारणेऽनिस्तरणादिलक्षणे पुनरदत्तमपि, ।

[भा.३९५३] दुविहा सुयोवसंपय अभिधारेंते तहा पढंते य ।
एक्केक्काविय दुविहा अनंतर परंपरा चेव ।।

वृ- द्विविधा श्रुतसम्पत् तद्यथा-अभिधारयति पठति च एकैका द्विविधा-अनन्तरा परम्परा च । तत्राभिधारयत्नानन्तरा नाम एकः साधुः किंचिदाचार्यमभिधारयति योऽसावभिधार्यमाणः सन् । किंचिदन्यमभि संधारयति, परंपरा नाम एको यतिः कंचिदाचार्यमभि संधारयति सोऽप्यभिधार्यमाणोऽन्यमभि धारयति सोऽप्यन्यं, सोऽप्यन्यमेवमनियतं परिमाणं । तदेवाह-

[भा.३९५४] एत्थं सुयं अहीहमि, सुयवं सो य अन्नहं ।
वच्चंतो सोभिधारंतो सोवि अन्नत्तमेव वा ।।

[भा.३९५५] दोण्हं अनंतरा होति, तिगमादी परंपरा ।
सड्ढाणं पुनरेंतस्स केवलं तु निवेयणा ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अत्र अस्य पार्श्वे श्रुतमध्येष्ये इति कश्चिदभिधारयन् व्रजति, सोऽपि श्रुतवान् अन्यत्राभिधारयन् व्रजति। सोऽप्यन्यं यदि वा तमे वाभिधारयति। तत्र द्वयोरनन्तरा श्रुतोपसम्पद्भवति त्रिकादीनां तु परम्परा स्वस्थानं पुनरागच्छः केवलं तस्याभिधारितस्य निवेदना कर्तव्या, यथाहं स्वस्थानं गच्छामीति साम्प्रतमनन्तरायां परम्परायां चामिधारणायामाभवन्तमाह-

[भा.३९५६] अच्छिन्नोवसंपयाए गमनं सह्वाण जत्थ वा च्छिन्नं।
मग्गणकहण परंपर छम्मीसं चेव वल्लिदुगं॥

वृ- अच्छिन्नोपसम्पन्नमभिधार्यमाणो यदन्यं वाभिधारयति तस्य हि लाभो नान्येन च्छिद्यते तस्यामभिन्नोपसम्पदि योऽभिधारयतां लाभः स स्वस्थानं गच्छति, योऽभिधारितस्तस्यान्येनाच्छिन्नः सन् गच्छतीत्यर्थः। अथ च्छिना उपसम्पत् तत आदित आरभ्य यत्र सर्वेषां लाभो गच्छति, इहाभिधारयन् योभिधारितस्तं प्रति संप्रस्थितः स चापान्तराले यदन्यमभिधारयति, आत्मीये वा गच्छे निवर्तते, तदा यदभिधारयता पथिं लब्धं सचित्तं तदभिधारितस्य स्वयं वा गत्वा समर्पयति। अन्यस्य वा हस्ते प्रेषयति,। अथ नार्पयति, स्वयमन्यप्रेपणेन वा, तत्राह-मग्गणेत्यादि तत्र कहण परंपरत्ति यैः स दृष्ट आगच्छन् तैर्यः पूर्वमभिधारितस्तस्य परंपरकेणाख्यातं, यथा युष्मानभि धारयिता तेन संप्रस्थितेन सचित्तेन लब्धं ततो युष्माकं तेन न प्रेषितं; । मग्गणत्ति स चैतत् श्रुत्वा तं मार्गयति। क्व गतो भवेन्मम सचित्तद्दारीति मृगयमाणैश्च स्नानादिसमवसरणे दृष्टः पृष्टश्च यथाऽमुककाले अस्मानभिधारयता समागच्छता सचित्तं लब्धं तन्मह्यं देहि-यदि न ददाति, तदा बलात् व्यवहारेण दाप्यते, मायानिष्पन्नश्च तस्य गुरुको मासः प्रायश्चित्तं, सचित्ते चत्वारो गुरुकाः अचित्ते उपधिनिष्पन्नं स पुनरभिधारयन् यैः सचित्तैः सोऽभिधार्यते तेषां मध्ये किं लभते इत्याह-छम्मीसं चेव वल्लि दुगमिति षट्नालबद्धानि निर्मिश्राणि लभते, मिश्रं च एवं रूपं निर्मिश्रमिश्रलक्षणं वल्लिद्विकं लभते, । साम्प्रतमेनामेव गाथां विवृण्वन्नाह-

[भा.३९५७] अभिधारेंते पढंते वा च्छिन्नाए गतियंतए।
मंडलीए उ संठाणं, वयते नो उ मज्झिमो॥

वृ- अभिधारयति पठति वा यो लाभः सच्छिन्नायामुपसम्पदि अन्तके पर्यन्ते तिष्ठति सर्वेषां लाभस्तत्र विश्राम्यतीत्यर्थः। मण्डल्यां तु यो लाभः स स्वस्थानं लभते व्याख्यातुरुपतिष्ठत इत्यर्थः। न तु मध्यमे मण्डलीमध्यवर्त्तिनि कस्मादित्याह।

[भा.३९५८] जो उ मज्झिल्लए जाति नियमा सो उ अंतिमं।
पावत्ते तिन्नि भूमि तु पानियं व पलोट्टियं॥

वृ- यो मण्डली मध्यवर्तिनि लाभो याति, सोऽपि नियमादन्तिमं व्याख्यातृलक्षणं वा प्राप्नोति, निम्नभूमि पानीयं प्रलोठितं पूर्वं षट् निर्मिश्राण्युक्तानि तानि सम्प्रति दर्शयति -

[भा.३९५९] माया पिता य भाया भगिनी पुत्तो तहेव धूया य।
एसा अनंतरा खलु निम्मीसा होंति वल्ली उ॥

वृ- माता पिता भ्राता भगिनी पुत्रो दुहिता च एषा खल्वनन्तरा निर्मिश्रा भवति वल्ली।

[भा.३९६०] सेसाण उ वल्लीणं परलाभो होइ दोन्नि चउरो वा।
एवं परंपराए विभास तत्तो य जा परतो॥

वृ- शेषाणां तु वल्लीनां यो लाभो भवति द्वे पुत्रदुहितरौ यदि वा चत्वारि मातृपितृभ्रातृभगिनीरुपाणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समस्तोऽपि परलाभोऽपि धारितस्य लाभ इत्यर्थः । एवं परम्परायामपि विभाया कर्तव्या, । ततोऽपि या चरतो वल्ली तस्य याः परतस्ताः सर्वा अपि परलाभः; । सम्प्रति मिश्रवल्लीप्रतिपादनार्थमाह-

[भा. ३९६१] माउम्माया पिया भाया भगिनी एवं पिउणो वि ।
पुत्तो धुया य तहा भाउयमादी चउण्हंपि ।।

[भा. ३९६२] अट्ठे व पज्ञयाणां चउवीसं भानुभगिनि सहियाति ।
एवइच्चियमाउल सुयादयो परयरा वल्ली ।।

वृ- मातुर्माता पिता भ्राता भगिनी च । एवं पितुरपि चत्वारि वक्तव्यानि तद्यथा माता पिता भ्राता भगिनी च भ्रात्रादीनां चतुर्णो प्रत्येकं द्वौ द्वौ द्रष्टव्यो तद्यथा पुत्रो दुहिता च भ्रातुः पुत्रो दुहिता, भगिन्या अपि पुत्रो दुहिता च, अष्टौ च प्रार्यकाणि भ्रातृभगिनीसहितानि तद्यथा मातामह्या अपि माता पिता भ्राता भगिनी, पितामहस्यापिमातापिता भ्राता भगिनी । सर्व संख्यया मिश्रवर्णा चतुर्विंशतिः अष्टावार्यकाणि अष्टौ प्रार्यकाणि अष्टौ च मात्रादिचतुष्टयस्य प्रत्येकं द्विधा भवनात्तथा चाह एतावत्येव मिश्रवल्ली मातुलसुतादयः परतरा वल्ली ते च मातुलसुतादयो यदि तमपि धारयन्ति तदा स लभते आचार्यमभिधारयन्ति तदा आचार्यस्य, ये पुनः परतरे स्वजना ये चान्ये ते सर्वेऽनभिधारयतो वा आचार्यस्य वा भवन्ति-

[भा. ३९६३] दुविहो अभिधारंतो दिठसदिठो य होंति नायव्वो ।
अभिधारेज्जंतगसं तएहिं दिठो य अन्नेहिं ।।

वृ- अभिधारयन् द्विविधो द्रष्टव्यस्तद्यथा-दृष्टोऽदृष्टश्च । तत्र दृष्टोऽभिधार्यमाणसत्कैः साधुभिरन्यैर्वा अदृष्टो न केनापि दृष्टः ।

[भा. ३९६४] सच्चित्ते अंतरा लद्धे जो उ गच्छति अन्नहिं ।
जातं पेसे सयं वावि नेइ तत्थ अदोसवं ।।

वृ- सचिते अन्तरा पथि लब्धे योऽभिधारयन् अन्यत्र गच्छति, स्वगच्छं वा प्रतिनिवर्तते, तत्र यस्तत् सचित्तं लब्धमभिधारितस्य प्रेषयति स्वयं वा नयति, सोऽदोषवान् ।

[भा. ३९६५] जो उ लद्धं वए अन्नं सगणं पेसएइ वा ।
दिठा वा अदिठा वा मायी होंति विदोन्नि वी ।।

वृ- यस्तु सचित्तं लब्ध्वा अन्यमाचार्य व्रजति, स्वगणं वा तत्सचित्तं प्रेषयति । दृष्टोऽदृष्टो वा सन् तौ दृष्टादृष्टरुपौ द्वावपि मायिनौ भवतः ।

[भा. ३९६६] ण्हाणाइएसु तं दिस्सा पुच्छा सिठे हरंति से ।
गुरुगा चेव सचित्ते अचित्ते तिविहं पुन ।।

वृ- परम्परया कथमपि श्रुतं यथाऽमुकोऽस्मानभिधार्य समागच्छत् अन्तरा पथि सचितं लब्धवान्, परं सोऽन्यत्र गतः स्वगणं वा गतवान् ततस्तं मृगयमाणैस्तैः स्नानादिसमवसरणेषु तं दृष्ट्वा पृच्छा कृता यथा त्वममुके कालेऽस्माकमभिधार्य समागच्छन्नंतरा सचित्तमुत्पादित वान् । तेन च यथावस्थितं शिष्टं ततः स तस्य सकाशात्तम् सचित्तं हरति । अथ स न ददाति तर्हि व्यवहारेण दाप्यते मायाप्रत्ययश्च तस्य गुरुको मासः प्रायश्चित्तं सचित्तापहरणे चत्वारो गुरुकाः, अचित्ते पुनस्त्रिविधे जघन्योपधिनिष्पन्नं मध्यमोपधिनिष्पन्नमुकुष्टोपधि निष्पन्नं च । अत्रैवान्यकर्तुकविधिशेषसूचकं गाथाद्वयम् ।।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

[भा.३९६७] दुविहो अभिधारंतो दिठमदिठ्ठो व होइ नायव्वो ।
अभिधारिज्जंतगसं एहिं दिठो वा अन्नेहिं ।।

[भा.३९६८] दिठो माई अमाई एवमदिठ्ठो वि होइ दुविहो उ ।
अमाई उ अप्पिणितीसाईउ न अप्पिणे जो उ ।।

वृ- आद्यगाथा व्याख्यानं प्राग्वत् । दृष्टो द्विविधो मायी अमायी च । एवमदृष्टोऽपि द्विविधो भवति-मायी अमायी च । तत्र अमायी लब्धं सचित्तादिकमर्पयति यस्तु मायी स नार्पयति । ततः स बलवान् व्यवहारेण दाप्यते शेषं तथैव ।

[भा.३९६९] एवं ता जीवंते अभिधारेंतो उ एइ जो साहू ।
कालगते एयम्मि उ इणमन्नो होइ ववहारो ।।

वृ- एवं तावत् जीवत्यभिधार्यमाणे योऽभिधारयन् साधुरागच्छति तस्य व्यवहारः, कालगते पुनरेतस्मिन्नभिधार्यमाणेऽयमन्यो भवति व्यवहारः । तमेवाह-

[भा.३९७०] अप्पत्ते कालगते, सुद्धमसुद्धे दिंतअदिंते य ।
पुव्विं पच्छा निग्गय संतमसंते सुते बलिया ।।

वृ- कंचिदाचार्यमभिधारयन् संप्रस्थितस्तत्र यं गच्छमभिधार्य संप्रस्थितस्तमप्राप्ते एव स आचार्यः कालमतोऽत्र च त्रयः प्रकाराः पुव्वं पच्छा निग्गयत्ति स यदैवाभिधारयन् निर्गतस्तदैव कालगत आचार्यः । १ अथवा पूर्वमभिधारयन् निर्गतः पश्चादाचार्यः कालगतः २, यदि वा पूर्वमाचार्यः कालगतः स पश्चादभिधारयन् निर्गतः ३ । अत्र प्रथमे प्रकारे यत्तेनाभिधारयता पथि सचित्तादि लब्धं, तत्कालगताचार्य शिष्याणामाभवति । द्वितीये प्रकारे लब्धेऽलब्धे वा सचित्तादिके यद्युपरताः स्थविरास्तदापि तत्सचित्तादि तच्छिष्याणामाभवति । तृतीये प्रकारेऽभिधारयता दूरादागच्छता तावन्न ज्ञातं यावत्तं गच्छं प्राप्तस्ततो यन्निमित्तं स तत्रागतस्तत् श्रुतं यदि तस्य शिष्यस्यास्ति तदा स तत् श्रुतं तस्मै दातुमिच्छति । ततः कालगताचार्याणामेव तत् सचित्ताद्याभवति, । अथ तत् श्रुतं नास्ति न वा ददति तदा न लभन्ते काल-गताचार्यशिष्याः सचित्तादिकं; आह-किं कारणं तृतीयेऽपि प्रकारे कालगताचार्यशिष्याणामेवाभवति तत आह-बलियत्ति बलवन्ती श्रुताज्ञा तत् श्रुतं तदवस्थामेव यन्निमित्तं तेनाभिधारितं शुद्धमशुद्धे अदिन्तदिंते य इति यत्कालगताचार्यस्य शिष्याणामाभवति तद्यद्यभिधारको ददाति तदा शुद्धो अप्रायश्चित्तीत्यर्थः । अथ न ददाति तदा अशुद्धः प्रायश्चित्तभाग् भवतीत्यर्थः । तत्र सचित्तस्यादाने प्रायश्चित्तं चत्वारो गुरुकाः, आदेशान्तरेणानवस्थाप्यमचित्ते उपधिनिष्पन्नं योऽपि वानाभाव्यमादत्ते तस्याप्येवमेव प्रायश्चित्तम् । सम्प्रति पुव्विं पच्छानिग्गते संतमसंते इत्यस्य किंचिद् व्याख्यानमाह-

[भा.३९७१] लब्धे उवरया थेरा तस्स सिस्साण सो भवे ।
मए वि लभते सीसो जइ से अत्थि देइ वा ।।

वृ- तत्र प्रथमप्रकारेऽभिहितं प्राक् तथैव द्वितीये प्रकारे लब्दे उपलक्षणेतत् । अलब्धे वा सचित्ते स्थविरा उपरतास्ततः स सचित्तादिको लाभस्तस्य शिष्याणामाभवति । तृतीये पुनः प्रकारे मृतेऽप्य-भिधारिते लभते शिष्यो यदि से तस्य श्रुतमस्ति ददाति वा, अथवा नास्ति न ददाति वा तदा न लभते । एतावता संतमसंते इत्यपि व्याख्यातं उपसंहारमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[भा.३९७२] एवं नाणे तह दंसणे य सुत्तत्थ तदुभए चेव ।
वत्तण संधणगहणे नवनव भेया य एक्केक्के ।।

वृ- एवमुक्तप्रकारेण ज्ञाननिमित्तमधिधार्यमाणे यद्राभवति तत् भणितं, तथा तेनैव प्रकारेण दर्शनेऽपि दर्शनप्रभावकशास्त्राणामप्यर्थायाभिधार्यमाणो आभवत् प्रतिपत्तव्यं, । तत्र ज्ञानार्थं दर्शनार्थं वा योऽभि-धार्यते, स सुत्तत्थतदुभए चेवत्ति सूत्रार्थतया अर्थार्थतया तदुभयार्थतया तत्र च सूत्रार्थतया अधिधारण तद्वर्तनार्थतया सन्धनार्थतया ग्रहणमिति, एवं त्रयो भेदाः । सूत्रार्थतया अर्थार्थतया तदुभयार्थतया च प्रत्येकं द्रष्टव्याः सर्वसंख्यया ज्ञानेदर्शने च प्रत्येकं नवनवभेदास्तथा चाह-नवनवभेया एक्केक्के ।

[भा.३९७३] पासत्थमगीयत्था उवसंपज्जत्ति ते उ चरणठा ।
सुत्तोवसंपयाए जो लाभो सो उ तेसिं उ ।।

वृ- ये पार्श्वस्थादयोऽगीतार्थाश्चरणार्थमुपसम्पद्यते तेषां चरणोपसम्पन्निमित्तं कमप्यभिधायरन् समागच्छतां श्रुतोपसम्पदि चान्तरो यो लाभो भवति स तेपामभिधार्यमाणानां भवति, नालबद्धवल्लीद्विकं तु तेपामभिधारयतामिति ।।

[भा.३९७४] गीयत्था ससहाया असमत्ता जं तु लहंति सुहदुक्खी ।
सुत्तत्थे अतक्कंत समत्तकप्पी उ न दलंति ।।

वृ- ये पुनः पार्श्वस्थादयो गीतार्थाः ससहाया संभोगनिमित्तमालोचनां दास्यामइत्यभिधारयन्तः सूत्रार्थान् अतर्कयन्तोऽनपेक्षमाण आगच्छन्तोऽन्तरा यल्लभन्ते, सचित्तमचित्तं वा येऽपि च गीतार्था असमाप्ता असमाप्तकल्पा आगच्छन्तो लभन्ते यच्च एकाकी एकाकिदोपपरिवर्जनार्थमुपसम्पत्तुकामो लभते यच्च समाप्तकल्पिनस्ते तेषामेव भवन्ति । न तु येषां समीपं प्रस्थितास्तेषामेवं निर्ग्रन्थीनामपि द्रष्टव्यम् ।

[भा.३७९५] अभिधारिज्जंत अपत्ते एस वुत्तो गमो खलु ।
पढंते उ विहिं वुच्छं सो उ पाढो इमो भवे ।।

वृ- एषोऽनन्तरोदितः खलु गमः प्रकारोऽभिधार्यमाणेऽप्राप्ते उक्तः । अत ऊर्ध्वं तु प्राप्ते सति पठति विधिं वक्ष्यामि, स च पाठोऽयं वक्ष्यमाणो भवति तमेवाह ।।

[भा.३७९६] धम्मकहा सुत्ते या कालिय तह दिट्ठिवाय अत्थे य ।
उपसंपयसंजोगे दुगमाइ जहुत्तरं बलिया ।।

वृ- धर्मकथायां सूत्रे कालिके तथा दृष्टिवादे अर्थे च पाठार्थमुपसम्पद्भवति तत्र सूत्रतोऽर्थतश्च सूत्रार्थयोश्च स्वस्थाने द्विकादिसंयोगे यथोत्तरं बलिका बलवन्तः सूत्रचिन्तायां परम्परं सूत्रं पाठयत् अर्थचिन्तायां परम्परमर्थं व्याख्यानयन् सूत्रार्थयोरेव परस्परं चिन्तायामर्थप्रदाता बलीयानिति भावः ।

[भा.३९७७] आवलिया मंडलिकमो पुव्वुत्तो च्छिन्नच्छिन्न भेदेणं ।
एसासु उवसंपय एत्तो सुहदुक्खसंपयं वोच्छं ।।

वृ- या सा श्रुतोपसम्पत् परंपराप्ता आवलिका ज्ञातव्या यात्वनन्तरा सा मण्डली सा च अच्छिन्ना कथमिति चेदुच्यते यस्मादभिधारकस्य लाभोऽन्येनाच्छिन्नः सन्नभिधार्यमाणमागच्छति । ततोऽच्छिन्नो लाभयोगात् सा उपसम्पदच्छिन्नेत्युच्यते या चावलिका सा छिन्ना यतस्तस्यां यो लाभ आदित आरभ्य परम्परया छिद्यमानोऽन्तिमेऽभिधार्येऽन्यमनभिधारयति विश्राम्यति ततः सा च्छिन्नोपसम्पत् । एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्छिन्नाच्छिन्नभेदेनावलिका मण्डलिकाक्रमः पठत्यपि पूर्वोक्ते द्रष्टव्यः । तदेवमुक्तैषा श्रुतोपसम्पत् अत ऊर्ध्वं सुखदुःखोपसम्पदं वक्ष्ये । तामेवाह-

[भा.३९७८] अभिधारे उवसंपन्नो दुविहो सुहदुखितो मुनेयव्वो ।
तस्स उ किं आभवती सचित्ताचित्त लाभस्स ।।

वृ- सुखदुःखितो द्विविधो ज्ञातव्यस्तद्यथा-अभिधारयतीत्यभिधारो अभिधारयत् उपसम्पन्नः सुखदुःखोपसम्पदं प्राप्तः तस्य द्विविधस्यापि सचित्तलाभस्याचित्तलाभस्य वा मध्ये किमाभवतीति च वक्तव्यम् । अथ कः सुखदुःखोपसम्पदमुपपद्यते तत आह-

[भा.३९७९] सहायगो तस्स उ नत्थि कोती सुत्तं च तक्केइ न सो परत्तो ।
एगानिए दोसगणं विदित्ता सो गच्छमज्झेइ समत्तकप्पं ।।

वृ- तस्य सहायकः कोऽपि न विद्यते न च परस्मात्सूत्रमपेक्षो स्वयं सूत्रार्थपरिपूर्णत्वात् । केवलमेकाकिनी दोषगणं विदित्वा स गच्छं समाप्तकल्पमभ्येति अभ्युपगच्छति । तत्रोपसम्पन्नमधिकृत्याभवद्व्यवहारमाह-

[भा.३९८०] खित्ते सुहदुक्खी उ अभिधारंताइं दोन्नि वी लभति ।
पुरपच्छसंथुयाइं हेट्ठिल्लाणं च जो लाभो ।।

वृ- सुखदुःखी सुखदुःखोपसम्पदमुपसम्पन्नः क्षेत्रे परक्षेत्रेऽपि एतदर्थमेव क्षेत्रग्रहणमन्यथैतन्निरर्थकं स्यात् द्वयान्यपि पूर्वसंस्तुतानि वाभिधार्यन्ते । लभन्ते ये च तेन दीक्षिताः तेषामधस्तनानां यो लाभः सोऽपि तस्यापि भवति । सम्प्रति क्षेत्रे इत्यस्य विवरणमाह-

[भा.३९८१] परखेत्तंमि वि लभति सो दोवी तेन गहणखेत्तस्स ।
जस्स वि उवसंपन्नो सोवि य से न गिण्हए ताइ ।।

वृ- मातापितृप्रभृतीनि श्वश्रूश्वशुरप्रभृतीनि च यदि तं सुखदुःखोपसम्पन्नमभिधारयन्त्युपतिष्ठन्ते व्रतग्रहणाय परक्षेत्रेऽपि लभते इति प्रतिपत्तिः स्यादित्येवं लक्षणेन कारणेन क्षेत्रस्य ग्रहणं कृतमन्यथा न कमप्यर्थ पुष्णाति यस्यापि समीपे स उपसम्पन्नः सोऽपि तानि न गृह्णाति सूत्रादेशतोऽनाभाव्यत्वात् ।

[भा.३९८२] परखेत्ते व समाणे अतिकमंतो वा न लभति असन्निं ।
छंदेण पुव्वसन्नी गाहियस्स समादियो लभइ ।।

वृ- परकीय क्षेत्रे तिष्ठन् व्यतिक्रमन् वा यस्तस्य सुखदुःखोपसम्पन्नस्य उपतिष्ठति स यदि असंज्ञी अविदितपूर्वस्तदा तमसंज्ञिनं न लभते, केवलं स क्षेत्रिकस्याभवति, यः पुनः पूर्वसंज्ञी पूर्वविदितस्वरुपस्तं पूर्वसंज्ञितं च्छन्देन लभते यदि स वल्लीसम्बन्धो भवति तं च सुखदुःखितमभिधारयति तदा लभते । अथ तं नामिधारयति । अभिधारयन्नपि च वल्लीसबन्धो भवति, ततो यस्य समीपे सुखदुःखोपसम्पदं जिघृक्षुः संप्रस्थितस्तस्याभवति । गाहियस्स समादिसो लभते इति, यदि स सुखदुःखितेन सम्यक्त्वं ग्राहितः आदिशब्देन मद्यमांस विरतिं वा ततः पश्चात्प्रव्रज्या परिणाम परिणतः स यद्यपि वल्लीद्विकं सम्बन्धो न भवति तथापि यदि तस्य सुखदुःखितस्य समीपे उपतिष्ठते तदा स तं लभते । एतदेव सविशेषमभिधित्सुराह-

[भा.३९८३] सुह दुक्खिएण जऊ पक्खेव सामितो नहिं कोई ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेति अभिनिक्खामिं सोउ क्खेत्तिस्स आभवइ ।।

वृ- तेन सुखदुःखितेन यदि तत्र परक्षेत्रे कोऽप्युपशमितः सम्यक्त्वं ग्राहितो भवति तत्कालमेव ब्रूते- अभिनिष्क्रमामि प्रवज्यां प्रतिपद्ये तदा क्षेत्रिणः क्षेत्रिकस्याभवति न तु सुखदुःखितस्य ।।

[भा. ३९८४] अह गुण गाहितो दंसण ताहो स होति उवसंपंतस्स ।
कम्हा जम्हा सावए तिन्नि वरिसाणि पुव्वदिसा ।।

वृ- अथ पुनर्दर्शनं सम्यक्त्वं तेन सुखदुःखितेन पूर्वग्राहितस्तः स तस्य उपशमयतः सद्देशनया प्रतिबोधितः स आभवति कस्मादिति चेदत आह-यस्मात् श्रावके त्रीणि वर्षाणि पूर्वदिग् भवति पूर्वापन्नता भवति ।

[भा. ३९८५] एएण कारणेण सम्मद्दिठं तु न लभते खेत्ती ।
एसो उवसंपन्नो अभिधारेंतो इमो होइ ।।

वृ- एतेन कारणेन सम्यग्दृष्टिं पूर्वग्राहितसम्यग्दर्शनं क्षेत्री क्षेत्रिको न लभते, एष सुख-दुःखोपसम्पदमुपसम्पन्न उक्तः । साम्प्रतमभिधारयन् वक्तव्यः । सोऽयं वक्ष्यमाणो भवति ।

[भा. ३९८६] मग्गण कहणपरंपर अभिधारेंतेण मंडली च्छिन्ना ।
एवं खलु सुह दुक्खे सच्चित्तादी उ मग्गणा कया ।।

वृ- सुखदुःखनिमित्तमन्यं गच्छमुपसंपद्यमानस्य मार्गणा भवति, । कुत्र स गच्छो विद्यते गवेषयन् गच्छति, ततः केनापि तस्य कथनं भवति, यथामुकस्थाने स गच्छोऽस्तीति, ततस्तेनाभिधारयता परम्परा आवली च्छिन्ना, अनन्तरा मण्डली अच्छिन्ना प्रागिव परिभाव्या, परिभाव्य च यत् यस्माभवति तत्तस्मै दातव्यं, इयमत्र भावना-आवलिकायां मण्डल्यां वा वल्लीद्विकमभिधारयत आभवति, शेषं तु यत्स लभते तत्तेनाभिधारितस्य भवति, । तदपि च परम्परया व्रजदन्तिमस्याविधार्यमाणस्य विश्राम्यति, मण्डल्यामन्येनाच्छिद्यमानो लाभोऽनन्तरस्याभिधार्यमाणस्योपतिष्ठति । एवमुक्तेन प्रकारेण सुखदुःखोपसम्पदभिजिघृक्षोरभिधारयतः सचित्तादौ मार्गणा कृता, सम्प्रति प्रतिकारेण सुखदुःखोपसम्पदमुपसम्पन्ने अभिधारयति सचित्तादौ मार्गणां करोति ।

[भा. ३९८७] जइ से अत्थि सहाया जइ वावि करेंति तस्स तं किच्चं ।
तो लभते इहरा पुन तेसि मणुन्नाण साहारं ।।

वृ- यदि स तस्य सुखदुःखोपसम्पन्नस्य सहायाः सन्ति यदि वा त एव येषां समीपे उपसम्पन्नस्तस्य तत्कृत्यं वैयावृत्त्यादि कुर्वन्ति तदा यत्तस्योपतिष्ठन्ति तं लभते इतरथा पुनस्तेषां समनोज्ञानां सांभोगि-कानां साधारणं तद्भवति ।

[भा. ३९८८] अपुण्णा कप्पिया जे उ अन्नोन्नमभिधारए ।
अन्नोन्नस्स लाभो उ तेसिं साहारणो भवे ।।

वृ- अपूर्णकल्पिकानाम गीतार्था असहाया य अपूर्णकल्पिका अन्योन्यमभिधारयन्ति अन्योन्यस्य सुखदुःखोपसम्पदं प्रतिपद्यते तेषां यो लाभः सोऽन्योऽन्यस्य परस्परस्य साधारणो भवति ।

[भा. ३९८९] जाव एक्केक्कगो पुन्नो ताव तं सारवेइओ ।
कुलाइथविरगाणं वा देंति जो वावि सम्मतो ।।

वृ- यावत्तेषामेकैकस्य पूर्णो गच्छो भवति, किमुक्तं भवति यावदेकैकस्य प्रत्येकं गच्छो नोपजायते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तावत्तमभ्युपपन्नगच्छमेकतरे सारयन्ति । येषामवग्रहे वर्तन्ते, अथ ते सारयन्तः परिताम्यन्ति तदा कुलस्थविराणामादिशब्दात् गणस्थविराणां सङ्घस्थविराणां वा तान् ददति अर्पयन्ति यो वा कोऽपि तेषां सम्मतस्तस्य समर्पयति । गता सुखदुःखोपसम्पत् । सम्प्रति मार्गोपसम्पद्वक्तव्या तथा चाह-

[भा.३९९०]　सुखदुक्खे उवसंपयए सा खलु वण्णिया समासेणं ।
अह एतो उवसंपय मग्गोग्गह वज्जिए वुच्छं ।।

वृ- एषा अनन्तरोदिता खलु उपसम्पद्वर्णिता समासेन सुखदुःखे । अथानन्तरमत ऊर्ध्वं मार्गे अवग्रहवर्जिते वक्ष्ये, मार्गोपसम्पदं वक्ष्ये इत्यर्थः । अत्र चेयं व्युत्पत्तिर्मार्गदिशनायोपसम्पत् मार्गोपसम्पत्।

[भा.३९९१]　मग्गोवसंपयाए गीयत्थेणं परिग्गहीयस्स ।
अगीयस्सवि लाभो का पुन नवसंपया मग्गे ।।

वृ- मार्गोपसम्पदि प्रतिपन्नायामगीतार्थस्यापि सतो गीतार्थेन परिगृहीतस्य लाभो भवति, अन्यथा अगीतार्थस्य न किंचिदाभवतीति वधनान्न कोऽपि लाभः स्यात्, का पुनरुपसम्पत् मार्गे इति चेदत्त आह-

[भा.३९९२]　जह कोइ मगन्नू अन्नं देसं तु वज्जती साहू ।
उपसंपज्जइ उ तगं तत्थण्णो गंतुकामो उ ।।

वृ- यथेति मार्गोपसम्पत्प्रदर्शने यथा कश्चित्साधुर्मार्गज्ञोऽन्यं देशं व्रजति तत्र देशेऽन्यो गन्तुकामस्तकं साधुमुपसम्पद्यते, अहमपि युष्माभिः सह समागमिष्यामि । अथ कीदृशो मार्गोपदर्शननिमित्तमुपसम्पद्यते

[भा.३९९३]　अव्वत्तो अविहाडो अदिठदेसी अभासितो वावि ।
एगमनेगे उवसंपयाए चउभंगो जा पंथो ।।

वृ- अव्यक्तो वयसा अविहाडोऽप्रगल्भः अदृष्टदेशी अदृष्टपूर्वदिशान्तरोऽभाषिको देशभाषा-परिज्ञानविकलः सा चोपसम्पद् एकस्यानेकस्य च तत्र चतुर्भङ्गी । तद्यथा-एकक एकं संपद्यते १ एकमनेकः २ अनेकमेकः ३ अनेकमनेकः ४ सा चोपसम्पत् तावत् यावत्पन्थाः । किमुक्तं भवति यावत्पन्थानं व्रजति ततो वा प्रत्यागच्छतीति । एतदेव सविशेषमभिधित्सुराह-

[भा.३९९४]　गयागते गयनियत्ते फिडियगविठे तहेव अगविट्ठे ।
उब्भामग सन्नायग नियट्ट अदिट्ठे अभासीय ।।

वृ- अव्यक्ता अविहाडा अदेशिका अभाषिका वा अन्यं साधुमुपसंपद्यते, अस्माकममुकप्रदेशेन यथा वा यत्र तेषां गन्तव्यं तत्र ये विवक्षितसाधोरन्ये ऽव्यक्तविहाडादयो गन्तुकामास्तान् ब्रुवते वयं युष्याभिः सह गमिष्यामस्तत्र यत्र गन्तुकामास्ततो यदि प्रत्यागच्छन्ति तदैतत् गतागतमित्युच्येत तस्मिन् मार्गोपसम्पत् गयनियत्ते इति अनुसंपन्ना एववात्मीयेन व्यक्तविहाडादिना समं गतास्तस्य च कालगततया प्रति भग्नत्वादिना वा कारणेन प्रत्यागन्तव्यं नाभवत्ततः प्रत्यागच्छन्तस्तं साधुमुपसंपद्यते। एषा गतनिवृत्ते मार्गोपसम्पत्तथा फिडियगविट्ठे तहेव अगविठे इति स्फिटितो नाम नष्टः तत आह उब्भामगेत्यादि उद्भ्रामकभिक्षाचर्यया अदृष्टपूर्वे विषये गतस्ततो न जानाति कुतो गन्तव्यमिति स्फिटितः। अथ स्वज्ञातयो गवेषमाणाः समागतास्तत स्तस्मात् स्थानादृष्टपूर्वे विषये नष्टः ततः स्फिटितस्तथा अभाषकोऽदृष्टपूर्वे विषये पृष्टो पृष्टतो लग्नो याति, परं मिलितुं न शक्नोति, स (च) दृष्ट्वा पि प्रतिपृच्छनीयदेशभाषामजानन् न प्रतिपृच्छति, ततो यथा तत्परिभ्रष्टो नश्यति, स च नष्टो गवेषणीयः।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तत्र स्फिटिते गवेषिते तथैव चागवेषिते अभावेन मार्गणा कर्तव्या।

तत्र तदेव गवेषयतां वाभवनमनाभवनमाह-

[भा.३९९५] उवणट्ठ अन्नपंथेण वा गयं अगेवसित न लभंति।
अगवेट्ठोति परिणत गवेसमाणा खलु लभंति ।।

वृ- उपेत्य स्वज्ञातिकान् दृष्ट्वा उपनष्टो अन्येन वा यथा स विवक्षिते स्थाने गतो भविष्यतीत्येवं संकल्पा ये मार्गोपदेशनायोपसम्पन्नास्ते यदि तं न गवेषयन्ति, तदा तेऽगवेषयन्तस्तस्य सत्कं न किंचिल्लभन्ते, यदि पुनरद्यापि न गवेषित इति परिणते चेतसि प्रयत्नं विधाय गवेषयन्ति, तदा तस्यादर्शनेऽपिखलु तत्सत्कं लभन्ते, । अथोपसम्पद्यमानानां किमाभवति किं वा नेत्यत आह-

[भा.३९९६] अम्मापिति संबद्धा मित्ता य वयंसगा य जे तस्स।
दिट्ठा भट्ठा य तहा मग्गुवसंपन्नतो लभति ।।

वृ- व्रजन्तः प्रत्यागच्छन्तो वा यत्ते उपसम्पद्यमानाः सचित्तादिकमुत्पादयन्ति तत्सर्वं मार्गोपदेशकस्य नेतुराभवति, ये पुनर्मातापितृसम्बद्धा नालबद्धवल्लीद्विकमिति भावः ।मित्राणि वयस्या दृष्टा भाषिताश्च ये तमभिधारयन्ति तान्मार्गोपसम्पन्नो मार्गोपसम्पदं प्रतिपन्नो लभते । तदेवं गता मार्गोपसम्पत् ।

[भा.३९९७] विनयोपसंपयातो पुच्छणसाहण अपुच्छगहणे य।
नायमनाये दोन्निवि नमंति पक्किल्लसाली वा ।।

वृ- अत ऊर्ध्वं विनयोपसम्पद्वक्तव्या इति शेषः । स चैवं कारणतो वा केचिद्विहरंतोऽकारणतो वा केचिद्विहरन्तो ऽदृष्टपूर्वदिशं गतास्तैर्वास्तव्यानां सांभोगिकानां समीपे प्रच्छनं कर्तव्यम् । यथा कानि मासप्रायोग्यानि क्षेत्राणि कानि वर्षावासप्रायोग्याणि । एवं पृष्टैरपि साधनं कथनं कर्तव्यमन्यथा वक्ष्यमाणप्रायश्चित्तप्रसक्तैरथ तथैवागन्तुका न पृच्छन्ति तदा तेषामपि प्रायश्चित्तं, गहणे यत्ति सचित्तादिकस्य ग्रहणे सति परस्परं निवेदनं कर्तव्यं, यथैतत्सचित्तं वा लब्धं यूयं गृह्णीतेति अनिवेदने असमाचारी तथा नाएत्ति ते आगन्तुका वास्तव्याश्च परस्परं जानन्ति । तथा यतन्ते न प्रमादिनः अनाएत्ति न जानन्ति, कियन्तस्ते किंवा प्रमादिनस्तत्र ज्ञाता न ज्ञाता वा द्रव्यादिभिः परीक्ष्योपसम्पद्येरन् नान्यथा, दोन्निवि नमंतित्ति ते च परीक्षापूर्वकमुपसम्पद्यमाना द्वयोरपि परस्परं नमन्ति किमुक्तं भवति रत्नाधिकस्य प्रथमतोऽवमरत्नाधिकेनालोचना दातव्या पश्चात् रत्नाधिकस्य । अत्र पक्वशालयो दृष्टान्तः । यथा पक्वशालयः परस्परं नमन्ति तथात्रापीति भावः ।

साम्प्रतमेनामेव गाथां विवरीषु प्रथमतः पुच्छणसाहण अपुच्छत्ति व्याख्यानार्थमाह-

[भा.३९९८] कारणमकारणे वा अदिट्ठदेसं गया विहरमाणा।
पुठाविहारखेत्ते अपुठ लहुतो य जं वावि ।।

वृ- कारणे अशिवादिलक्षणे अकारणे विहारप्रत्ययं सुखविहारो भविष्यतीति बुद्धया विहरन्तो यथा सुखमक्लेशेन सूत्रार्थान् कुर्वन्तोऽदृष्टपूर्व देशं गतास्तत्र च तेषां सांभोगिकाः सन्ति, ततस्तैरागन्तुकैस्ते वास्तव्याः सांभोगिकाः पुच्छाविहारखेत्तेत्ति मासकल्पप्रयोग्यानि वर्षाकल्पप्रायोग्यानि वा विहारक्षेत्राणि प्रष्टव्यास्तानि च तैः कथयितव्यानि, । यदि न पृच्छन्ति, पृष्टा वा ते न कथयन्ति तदा द्वयानामपि प्रत्येकं प्रायश्चित्तं लघुको मासः, । यच्च पृच्छामन्तरेण वा स्तेन स्वापदादिभ्यो अनर्थं साधवः प्राप्नुवन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तन्निष्पन्नमपि तेषां द्वयानामपि प्रायश्चित्तमधुना गहणे य इति अस्य व्याख्यानमाह-

[भा.३९९९] सचित्तंमि उ लद्धे अन्नोन्न अनिवेयणे लहुगो ।
ववहारेण उ हाउं पुनरवि दानं नवरं मासो ।।

वृ- यत्ते आगन्तुका वास्तव्या वा सचित्तं लभंते उपलक्षणमेतदचित्तं वा तस्मिन् लब्धे अन्योन्यस्य निवेदना कर्तव्या यथैतन्मया सचित्तमचित्तं वा लब्धं यूयं प्रतिगृह्णीत । एवं निवेदने कृते द्वितीयो न गृह्णाति, परं सामाचारी एषेत्यवश्यं निवेदनं कर्त्तव्यमनिवेदने प्रायश्चित्तं लघुको मासः । एतदेव सविशेषमाह-ववहारेण उ इत्यादि न निवेदयति तदा असमाचारी प्रतिषेधनार्थं व्यवहारेणागमप्रसिद्धेन तत् हृत्वा मासलघुप्रायश्चित्तं दत्वा तस्यैव पुनः प्रतियच्छन्ति । सम्प्रति नायमनाये इत्यस्य व्याख्यानमाह-

[भा.४०००] नाए व अनाए वा होइ परिच्छविही जहा हेठा ।
अपरिच्छणंमि गुरुगा जो उ परिच्छाए अविसुद्धो ।।

वृ- ज्ञाते अज्ञाते वा भवति द्रव्यादिभिः परीक्षा विधिर्यथाधस्ताद्भणितस्तथा कर्तव्यः । यदि पुनरपरीक्ष्योपसम्पद्यते योऽपि च गच्छः परीक्षायामविशुद्धः प्रमादीति कृत्वा तमपि ये उपसम्पद्यन्ते तेषां प्रत्येकं प्रायश्चित्तं चत्वारो गुरुकाः । सम्प्रति दोन्निवि नमन्तीत्यत्र मतान्तरमाह-

[भा.४००१] केई उ भणंति उमो नियमेन निवेइ इच्छ इयरस्स ।
तं तु न जुज्जइ जम्हा, पक्किल्लग सालिदिठंतो ।।

वृ- केचित् ब्रुवते नियमेनाऽवमोऽवमरत्नाधिको निवेदयति इतरस्य रत्नाधिकस्य इच्छा यदि प्रतिभासेत ततो निवेदयति, नो चेन्नेति तच्च न युज्यते यस्मात्पक्वशालिदृष्टान्त उपन्यस्तः स चोभयनमनसूचक इति । सम्प्रति द्वयोर्नमनमाह-

[भा.४००२] वंदना लोयणा चेव तहेव य निवेयणा ।
सेहेण उवउत्तंमि इयरो पच्छ कुव्वती ।।

वृ- शैक्षेण अवमरत्नाधिकेन वन्दने आलोचनायां तथैव च निवेदने सचित्तादेः कृते पश्चादितरो रत्नाधिकस्तस्य पुरतो वन्दनमालोचनां निवेदनं च करोति । सम्प्रति क्षेत्रश्रुतसुखदुःखे मार्गविनयोपसम्पत्सु यदाभाव्यं तदुपदर्शयति ।

[भा.४००३] सुयसुहदुक्खे खेत्ते मग्गे विनउवसंपयाए य ।
बावीसपुव्वसंथुय वयंस दिट्ठा भट्ठे य सव्वे य ।।

वृ- श्रुतोपसम्पदि उपसम्पद्यमाना द्वाविंशतिं लभन्ते । तद्यथा-षट् अमिश्रवल्ल्यां माता पिता भ्राता भगिनी पुत्रो दुहिता इत्येवं रुपान्, षोडशमिश्रवल्यां तद्यथा-मातुर्माता पिता भ्राता भगिनी । एवं पितुरपि, भ्रात्रादीनां चतुर्णा प्रत्येकं द्वौ द्वौ तद्यथा-पुत्रो दुहिता च । सुखदुःखोपसम्पदि पूर्वसंस्तुतान् मातापितृसम्बन्धान् उपलक्षणमेतत् मित्रवयस्यप्रभृतीति च क्षेत्रोपसम्पदि वयस्यान् । इदमप्युपलक्षणं पूर्वसंस्तुतान् पश्चाच्च संस्तुतान् नालबद्धवल्लीद्विकं च लभते । मार्गोपसम्पदि दृष्टाभाषितान् च शब्दाद्वल्लीद्विकं मित्राणि च विनयोपसम्पदि सर्वान् लभते नवरं निवेदयति । एतदेवाह-

[भा.४००४] खेत्ते मित्तादीया सुतोपसंपन्नतो उ छल्लभते ।
अम्माउ पिउ संबद्धो सुहदुक्खी इयरो दिट्ठो ।।

वृ- क्षेत्रे उपसम्पद्यमानो मित्रादीन् लभते, आदिशब्दात् पूर्वपश्चात्संस्तुतान् नालवल्लीद्विकमाहारं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्रकत्रिकं संस्तारं वसतिं चेति परिग्रहः, श्रुतोपसम्पन्नं लभते षट् मात्रादिकान् मिश्रां च वल्लिं मातृपितृसम्बद्धां सुखदुःखोपसम्पन्नो मातापितृसम्बन्धान् लभते वयस्यादीन् च, इतरो मार्गोपसम्पन्नो दृष्टान् दृष्टाभाषितानुपलक्षणमेतत् वल्लिद्विकं मित्राणि च लभते विनयोपसम्पन्नस्याभाव्यं सुप्रतीतमिति न व्याख्यातम् ।

[भा.४००५] इच्चेयं पंचविहं जिनान आणाए कुणइ सठाणे ।
पावइ धुवमाराहं तव्विवरीए विवच्चासं ।।

वृ- इत्येवं पञ्चविधक्षेत्रश्रुतादिभेदतः पञ्चप्रकारमाभवद्व्यवहारं स्वस्थाने आत्मीये स्थाने यथा क्षेत्रोपसम्पदि यत् उपसम्पद्यमानस्य वा भवति तत्तथैव व्यवहारति । एवं शेषेष्वपि स्थानेषु वक्तव्यं जिनानामाज्ञया करोति परिपालयति स ध्रुवमन्ते आराधनां प्राप्नोति, जिनाज्ञया परिपालितत्वात् । तद्वद्विपरीत आभवद्व्यवहारविपर्यासकारी विपर्यासं प्राप्नोति नाराधनामन्तकाले प्राप्नोतीति भावः ।

[भा.४००६] एच्चेसो पंचविहो ववहारे आभवंति तो नाम ।
पच्छित्ते ववहारं सुण वच्छ समासओ वुच्छं ।।

वृ- इत्येष आभवतिकोनाम व्यवहारः पञ्चविध उक्तः । अत ऊर्ध्वं प्रायश्चित्ते व्यवहारं समासतो वक्ष्ये, तच्च वत्स वक्ष्यमाणं शृणु ।

[भा.४००७] सो पुनचउव्विहो दव्वखेत्तकालभावे य ।
सचित्ते अचित्ते य दुविहो होइ दुव्वंमि ।।

वृ- स पुनः प्रायश्चित्तव्यवहारश्चतुर्विधस्तद्यथा द्रव्ये क्षेत्रे काले भावे च । तत्र द्रव्ये पुनर्द्विविधो भवति। तद्यथा-सचिते अचित्ते च । तत्र प्रथमतः सचित्ते विवक्षुरिदमाह-

[भा.४००८] पुढविदगअगनिमारुय वणस्सइ तसेसु होइ सचित्ते ।
अचित्ते पिंड उवही दसपन्नरसेव सोलसगे ।।

[भा.४००९] संघट्टण परियावण उद्दवणा वज्जणा एसट्ठाणं ।
दानं तु चउत्थादी तत्तियमित्ता व कल्लाणे ।।

वृ- पृथिव्यादीनां संघट्टनादौ प्रत्येकं यथापत्तिप्रायश्चित्तं तत् स्वस्थानमित्युच्यते, । तच्च छक्काय चउसु लहुया इत्यादिना प्रागेवाभिहितमिदं तु दानप्रायच्छित्तमभिधीयते, । किं तदित्याह-चतुर्थादि, तद्यथा-पृथिव्यादिकं वनस्पतिपर्यन्तमेकेन्द्रियमपद्रावयति जीविताद्व्यपरोपयति तदा अभक्तार्थः । द्वीन्द्रियमपद्रावयतः षष्ठं त्रीन्द्रियमपद्रावयतोऽष्टमं चतुरिन्द्रिये दशमं, पञ्चेन्द्रिये द्वादशमम्, । तत्तियमित्ता च कल्लाणे इति अथवा यस्य यावन्ति इन्द्रियाणि तस्य तावन्ति कल्याणानि प्रायश्चित्तं, तद्यथा-एककल्याणकमेकेन्द्रियाणां परितापने, द्वे कल्याणके द्वीन्द्रियाणां पूर्वार्द्धमित्यर्थः । त्रीणि कल्याणकानि त्रीन्द्रियाणामेकाशनकमिति भावः । चतुरिन्द्रियाणामाचाम्लं पञ्चेन्द्रियाणामभक्तार्थः । अथवेदं वर्जनायां सचित्ते प्रायश्चित्तं ।

[भा.४०१०] अहवावि अट्ठारसगं पुरिसे इत्थीसु वज्जिया वीसुं ।
दसगं य नपुंसेसुं आरोवणवन्निया तत्थ ।।

वृ- वर्जना नाम प्रव्राजनायां निषेधस्तत्र पुरुषे अष्टादशकं वर्जितं स्त्रीपु वर्जिता विंशतिर्दशकं नपुंसकेषु । तत्राह अथवा आरोपणाप्रायश्चित्तं प्राक्कल्पाध्ययने सप्रपञ्चमभिहितमिति ततोऽवधार्य,।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अचिते पिण्डउवही इत्यादि अचित्ते प्रायश्चित्तं पिंडे पिंडविषयमुपधिविषयं च क्वकेत्याह-दशके षोडशके च । इयमत्र भावना-पिण्डमुपधिं वा दशभिरेषणादोषैः पञ्चदशभिरुद्गमदोषैरिहाध्यपूरकस्य मिश्रेऽन्तर्भावविवक्षणं तु पञ्चदशभिरित्युच्यत्ते, षोडशभिरुत्पादनादोषैरविशुद्धं गृह्णानस्य प्रायश्चित्तं तदपि च प्राक्कल्पाध्ययनेऽभिहितमिति न भूयो भण्यते । तदेवं सचित्ते अचित्ते इति द्वारद्वयं गतम् ।

[भा.४०११] जनवयअद्धाणरोधए मग्गादीए य होंति खेत्तंमि ।
दुब्भिक्खे य सुभिक्खे दिया व रत्तो व कालंमि ।।

वृ- जनपदे अध्वनि रोधकेमार्गातीते च यत् प्रायश्चित्तं तत्क्षेत्रे क्षेत्रविषयं, भवति, । इयमत्र भावना-जनपदेऽपि च सन् संस्तरन्नपि चाध्वानं प्रतिपन्नानां यः कल्पस्तमाचरति, । अध्वानं प्रतिपन्नो वा न यतनां करोति दर्पेण वाध्वानं प्रतिपद्यते, तथा रोधकेऽपिसेनासूत्रे यो विधिरभिहितस्तं न करोति, मार्गातीतं क्षेत्रातिक्रान्तमशनादिकमाहारयति, । एतेषु यत्प्रायश्चित्तं तत् क्षेत्रविषयमिति, । सम्प्रति कालद्वारम्-दुर्भिक्षे सुभिक्षे, दिवारत्रौ च काले कालविषयं किमुक्तं भवति, । सुभिक्षेऽपि काले संस्तरन्नपि दुर्भिक्षकल्पमाचरति, यदि वा दुर्भिक्षे अयतनां करोति, तथा दिवसे यः कल्पस्तं रजन्यामाचरति, रजन्यामपि यः कल्पस्तं दिवा दिवसकल्पमूनमधिकं वा करोति, एवं रात्रिकल्पमपि । एतेषु यत्प्रायश्चित्तं तत्कालविषयम् । साम्प्रतमेनामेव गाथां विवृणोति ।।

[भा.४०१२] वसिमे वि अ विहिकरणं संथरमाणं मखित्तपच्छितं ।
अद्धाणे उ अजयणं पवज्जणा चेव दप्पेणं ।।

[भा.४०१३] कालंमि उ संथरणे पडिसेवइ अजयणाव एमंसि ।
दियनिसिमेराकरणं उणाहियं वावि कालेन ।।

वृ- वसिमेऽपि संस्तरन्तोऽपि यदविधिकरणं तन्निष्पन्नं क्षेत्रप्रायश्चित्तं तथा अध्वनि प्रयन्ने अयतनायां अध्वनः प्रपदने वा दर्पेण यत् प्रायश्चित्तं तथा काले सुभिक्षे संस्तरणेऽपि दुर्भिक्षकल्पं समाचरति दुर्भिक्षे वा समापतिते अयतना दिवानिका मर्यादाया अकरणं दिवस्य कल्पस्य रात्रौ रात्रिकल्पस्य दिवसे समाचरणमिति भावो यदि वा दिवसकल्पस्य रात्रिकल्पस्य ऊनमधिकं वा करणं तन्निष्पन्नं कालविषयं प्रायश्चित्तं, भावविषयमाह-

[भा.४०१४] जोगतिए करणतिए दप्पपमायपुरिसभावंमि ।
एएसिं तु विभागं वुच्छामि अहानुपुव्वीए ।।

वृ- योगत्रिकं एनोवाक्कायलक्षणं, करणत्रिकं करणकारणानुमोदनारुपं, दर्पो निष्कारणमकल्पप्रतिषेवनं, प्रमादः पञ्चविधः, पुरुषो गुर्वादिलक्षणो वक्ष्यमाण एतेषु यत्प्रायश्चित्तं तद्भावविषयं, साम्प्रतमेतेषामेव पदानां विभागमहं समासेन वक्ष्ये । तत्र योगत्रिककरणत्रिकभावनामाह-

[भा.४०१५] जोगतिए करणतिए सुभासुभे तिविहकालभेएण ।
सत्तावसिं भंगा दुगुणा वा बहुतरा वावि ।।

वृ- योगत्रिके करणत्रिके प्रत्येकं शुभे अशुभे च त्रिविधकालभेदेन संचार्यमाणे सप्तविंशतिर्भङ्गाः, भवन्ति । द्विगुणा वा बहुतरा वा तद्यथा मनसा करोति १ मनसा कारयति २ मनसा कुर्वन्तमनुजानाति ३ । एवं वचसा ३ कायेन च ३ सर्वसंख्यया नव एते चातीतानागतः वर्तमानरुपकालत्रिके चिंत्यमानाः सप्तविंशतिर्भवन्ति । एते चाशुभव्यापारसमाचरणविषये, तथा च शुभव्यापारासमाचारविषयेऽपि

द्रष्टव्याः । यथा मनसा न करोति कालप्राप्तमपि शक्तावपि च सत्यां शुभं व्यापारं १ न च कारयति २ कुर्वन्तं नानुजानीते ३ इत्यादि तथैव उभयमीलने चतुःपञ्चाशत् । तत उक्तं द्विगुणा वा एते एकएक्संयोगे द्विकत्रिकसंयोगे च बहुतरा भवन्ति । ते चावश्यक टीकायां प्रत्याख्यानचिन्तायामिव भावनीयास्ततोऽवादि बहुतरा वापि, अय मनसा कथं करणं कारणमनुमननं वा तत आह-

[भा.४०१६] वावे महमंबवनं मनसकरणं तुहो अनुत्तेवि ।
अणजाणसु जावुप्पइ मनकारणमो अवारेंते ।।

वृ- कोऽपि संयतः कश्चित् प्रदेशं दृष्ट्वा चिन्तयति अस्मिन्नवकाशे अहमाम्रवनं वपामि । यद्यापि तेन तथा चिन्तयित्वा नोप्तमाम्रवणं तथापि तत्तेन मनसा कृतमपि मनसा करणं तथा केनचित् गृहस्थेन संयत उक्तो यथा संयत ! यदित्वमनुजानासि तत एतस्मिन्नवकाशे आम्रवणं वपामि तस्मादनुजानीहि येनोप्यते इति । एवमुक्ते यदि न निवारयति तदा अनुक्तोऽपि मनसा कारापणं द्रष्टव्यमेतदेव भावयति-

[भा.४०१७] मागहा इंगिएणं तु पेहिएण य कोसला ।
अद्धुत्तेण उ पंचाला नाणुत्तं दक्खिणावहा ।।

[भा.४०१८] एवं तु अनुत्ते वि मनसा कारावणं तु बोधव्वं ।
मनसाणुन्ना सा हु चूयवणं वुत्तवुप्पति वा ।।

वृ- मागधा मगधदेशोद्भवाः प्रतिपन्नमप्रतिपन्नं वा इङ्गिताकारविशेषेण जानन्ति, कौशलाः प्रेक्षितेन अवलोकितेन, पञ्चालाः अर्धोक्तेन, नानुक्तं दक्षिणापथाः किन्तु साक्षाद्वचसा व्यक्तीकृतं ते जानते, प्रायो जडप्रज्ञत्वात्, । तत एवं सति वचसानुक्तेऽपि निवारणाभावात् मनसा कारापणं बोद्धव्यम् । सम्प्रति मनसानुज्ञातं भावयति चूतवनमुप्तं पूर्वमारोपितं, यदि वा उप्यते आरोप्यमाणं तिष्ठतीति कृत्वा साधुश्चिन्तयति । शोभनं यदिह चूतवनमुप्तमुप्यते वा एषा मनसानुज्ञा ।

[भा.४०१९] एवं वयकायम्मी तिविहं करणं विभासबुद्धीए ।
हत्थदिसन्नच्छोटिं इय काये कारणमणुन्ना ।।

वृ- एवमुक्तप्रकारेण वचसि काये च त्रिविधं करणं करणकारणानुमननलक्षणं स्वबुद्ध्या विभाषेत तत्र वचसि सुप्रतीतं काये तु दुर्विभावमिति तद्भावनामाह-इत्थादि हत्यादि । अत्रापि कायेन स्वयं करणमिति प्रतीतं ततः कारणमाह-हस्तादिसंज्ञा कायेन गाथायां सप्तमी तृतीयार्थे कारणं तथा च्छोटिं नखच्छोटिकां ददतः कायेन अनुज्ञा ।।

[भा.४०२०] एवं नवभेएणं पाणाइवायमादिगे उ अइयारो ।
निरवेक्खाण मनेवि पहित्तियरेसि उभएन ।।

द्रयाणमिकार एवमुक्तेन प्रकारेण नवभेदेन समाहारोयं नवभिर्भेदैः प्राणातिपातादिके अतीचारे यत्प्रायश्चित्तं च्चित्ते प्रायश्चित्तं । मिति भावः । तत्र निरपेक्षाणां प्रतिमाप्रतिपन्नादीनां मनसाप्यतीचारसेवने
[भा.४०१ मतरेषां गच्छस्थितानामुभयेन वा कायेन चातीचारसेवने प्रायश्चित्तमिति ।

[भा.४०२१] वायामवग्गणादी धारण डेवण य होइ दप्पेण ।
पंचविह पमायंमी जं जहि आवज्जई तं तु ।।

वृ- यन्निष्कारणं व्यायाम वल्गनादि करोति यदि वा धावनं वेपनं बा, लोष्ट्रादेः प्रक्षेपणं तद्विषयं प्रायश्चित्तं भवति ज्ञातव्यं, दर्पेण तथा पंचविधे पञ्चप्रकारे प्रमादे यं प्रमादमापद्यते यत्र तद्भवति

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

प्रमादविषयं प्रायश्चित्तं । सम्प्रति पुरुषानाह-

[भा.४०२२] गुरुमाईया पुरिसा तुल्लवराहे वि तेसि नाणत्तं ।
परिणामगाइया वा इड्ढिमनिक्खंत असहू वा ।।

[भा.४०२३] पुमं वाल थिरा चेव कयजोग्गा य सेयरा ।
अहवा सभावतो पुरिसा होंति दारुण भद्दगा ।।

वृ- गुर्वादयः पुरुषास्तेषां तुल्येऽप्यपराधे प्रायश्चित्तमधिकृत्य भवति नानात्वं । अथवा त्रिविधाः पुरुषाः परिणामकादयः परिणामिका अपरिणामका अतिपरिणामिकाश्च । तेषामपि तुल्येऽप्यपराधे प्रायश्चित्तमथवान्यथा भवति । अथवा अनेकविधा पुरुषाः, तद्यथा-ऋद्धिमन्निष्क्रान्ताः अऋद्धिमन्निष्क्रान्ताश्च असहाः ससहाश्च पुरुषाः पुरुषाः स्त्री नपुंसकानि च बालास्तरुणाश्च स्थिरा अस्थिराश्च कृतयोगाश्च सेतरा नाम सप्रतिपक्षा एतेषामपि तुल्येऽप्यपराधे पुरुषभेदेन प्रायश्चित्तभेदः अथवा स्वभावतः पुरुषा द्विविधा भवन्ति तद्यथा दारुणा भद्रकाश्च । तत्र तुल्येऽप्यपराधे दारुणानामन्यत् प्रायश्चित्तमन्यत् भद्रकाणामिति । सांप्रतमुपसंहारमाह-

[भा.४०२४] पायच्छित्ता भवंते य ववहारे सो समासतो भणितो ।
जेणं तु ववहरिज्जइ इयाणि तं तू पवक्खामि ।।

वृ- एषोऽनन्तरोदितः प्रायश्चित्ते आभवति च प्रत्येकं पञ्चविधो व्यवहारः समासतो भणितः इदानीं तु येन व्यवह्रियते तं व्यवहारं प्रवक्ष्यामि । प्रतिज्ञातमेव करोति ।

[भा.४०२५] पंचविहो ववहारो दुग्गतिभयचुरगेहिं पन्नत्तो ।
आगम सुय आणा धारणा य जीए य पंचमए ।।

वृ- येन व्यवह्रियते स व्यवहारो दुर्गतिभयचूरकैर्दुर्गतिभयविध्वंसकैः पञ्चविधः प्रज्ञप्तस्तद्यथा आगमः श्रुतमाज्ञाधारणा जीतं च पञ्चमः ।

[भा.४०२६] आगमतो ववहारो सुणह जहा धीरपुरिसपन्नत्तो ।
पच्चक्खो य परोक्खो सो वि य दुविहो मुनेयव्वो ।।

वृ- तत्रागमतो व्यवहारो तथा धीरपुरुषैः प्रज्ञप्तस्तथा शृणुत स आगमतो व्यवहारो द्विविधो ज्ञातव्यस्तद्यथा-प्रत्यक्ष परोक्षश्च ।

[भा.४०२७] पच्चक्खो वि य दुविहो इंदियजो चेव नोव इंदियजो ।
इंदियपच्चक्खो वि य पंचसु विसएसु नेयव्वो ।।

वृ- प्रत्यक्षोऽपि द्विविधस्तद्यथा-इन्द्रियजो नोइंद्रियजश्च । तत्र इन्द्रियजः प्रत्यक्षः पञ्चसु रूपादिषु विषयेषु ज्ञातव्यः ।

[भा.४०२८] नोइंदियपच्चक्खो ववहारो सो समासतो तिविहो ।
ओहि मणपज्जवे या केवलनाणे य पच्चक्खे ।।

वृ- यस्तु नो इन्द्रियजः प्रत्यक्षो व्यवहारः समासतस्त्रिविधस्तद्यथा-अवधिप्रत्यक्षं, मनःपर्यवप्रत्यक्षं, केवलज्ञानप्रत्यक्षं । तत्रावधिप्रत्यक्षमाह-

[भा.४०२९] उही गुणपच्चइए जे वट्टंती सुयंगवी धीरा ।
ओहि विसयनाणत्थे जाणसु ववहारसोहिकरे ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ- अवधिर्द्विधा भवप्रत्ययो गुणप्रत्ययश्च । तत्र संयतानां गुणप्रत्यय एव न भवप्रत्ययस्तत आह-अवधौ गुणप्रत्यये ये वर्तन्ते श्रुताङ्गविदो धीरास्तान् अवधिविषयज्ञानस्थान् जानीतं व्यवहारशोधिकरान् शुद्धव्यवहारकारिणः ।

[भा.४०३०] उज्जुमती विउलमती जे वट्टंती सुयंगवी धीरा ।
मनपज्जवनाणत्थे जाणसु ववहारसोहिकरे ।।

वृ- ये ऋजुमतौ विपुलमतौ वा मनःपर्यवज्ञाने श्रुताङ्गविदो धीरा वर्तन्ते तान्मयःपर्यवज्ञानस्थान् जानीत व्यवहारशोधिकरान् शुद्धव्यवहारकारिणः ।

[भा.४०३१] आदिगरा धम्माणं चारित्तवरनाणदंसणसमग्गा ।
सव्वत्तगणाणेणं ववहारं ववहरंति जिना ।।

वृ- ये धर्मयोः श्रुतधर्मस्य चारित्रधर्मस्य चादिकरास्तत्प्रथमतया प्रवर्तनशीलाश्चारित्र-वरज्ञानदर्शनसमग्रास्ते जिनाः सर्वत्रगज्ञाने व्यवहारं व्यवहरन्ति । उक्तः प्रत्यक्षः । सम्प्रति परोक्षमाह-

[भा.४०३२] पच्चक्खागमसरिसो होति परोक्खो वि आगमो जस्स ।
चंदमुही विव सोवि हु आगमो ववहारवं होइ ।।

वृ- यद्यपि पूर्वादिकं श्रुतं तथापि यस्यागमश्चतुर्दशपूर्वादिकः परोक्षोऽपि प्रत्यक्षागमसदृशः प्रत्यक्षावध्यादितुल्यरूपो भवति सोप्यागमव्यवहारवान् वक्तव्यो भवति । यथा चन्द्रसदृशमुखी कन्या चन्द्रमुखीति एतदुक्तं भवति यद्यपि पूर्वाणि श्रुतं नागमतुल्यानीति (तदपि) तैर्व्यवहरन् आगमव्यवहारवान् उच्यते इति । सम्प्रत्यागमस्य व्याख्यानमाह-

[भा.४०३३] नायं आगमयंति एगट्ठं जस्स सो परायत्तो ।
सो परोक्खो वुच्चइ तस्स पएसा इमे हुंति ।।

वृ- ज्ञानमागमितमित्येकार्थमेवं च ज्ञानमागम इत्येकार्थमापतितं । तत्र यस्य स आगमोऽपराधीनः स प्रत्यक्ष उच्यते । स चावध्यादिरूपो यस्य तु परायत्तः स परोक्ष उच्यते । स च चतुर्दशपूर्वादिसमुत्थस्तस्य परोक्षस्यागमस्य प्रदेशाः प्रतिभागा भेदा इत्यर्थः । इमे वक्ष्यमाणा भवन्ति । तानेवाह-

[भा.४०३४] पारोक्खं ववहारं आगमतो सुयधरा ववहरंति ।
चोदसदसपुव्वधरा नवपुव्वियगंधहत्थी य ।।

वृ- ये श्रुतधराश्चतुर्दशपूर्वधरा दशपूर्वधरा नव पूर्विणो वा गन्धहस्तिनो गन्धहस्तिसमानाः से आगमतः परोक्षं व्यवहारं व्यवहरन्ति । अत्राक्षेपपरिहारावभिधित्सुराह-

[भा.४०३५] किह आगम ववहारी जम्हा जीवादयो पयत्था उ ।
उवलद्धा तेहिं तू सव्वेहिं नयविगप्पेहिं ।।

वृ- कथं केन प्रकारेण साक्षात् श्रुतेन व्यवहरन्तः आगमव्यवहारिणः प्रोच्यन्ते सूरिराह-यस्मात् जीवादयः पदार्थास्तैश्चतुर्दशपूर्वधरादिभिः सर्वे नयविकल्पैर्नैगमादिनयभेदैरुपलब्धाः एतदेव सविशेषमाह-

[भा.४०३६] जह केवली वि जाणइ दव्वं च खेत्तं च कालभावं च ।
तह चउलक्खणमेवं सुयनाणीमेव जाणाति ।।

वृ- यथा केवली केवलज्ञानेन सर्वं द्रव्यं सर्वं क्षेत्रं कालं भावं च सर्वात्मना स्वपरपर्यायभेदभिन्नं जानाति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं श्रुतज्ञान्यापि चतुर्लक्षणं द्रव्यक्षेत्रकालभावरूपं श्रुतबलेन जानाति । तत एतेऽप्यागमव्यवहारिण उच्यन्ते एतदेवं प्रस्तुतं प्रायश्चित्त-शुद्धयधिकारमधिकृत्य योजयति ।

[भा.४०३७] पणगं मासविवड्ढी मासगहानी य पणगहानी य ।
एगाहे पंचाहं पंचाहे चेव एगाहं ।।

[भा.४०३८] रागदोसविवड्ढिं हाणिं वा नउ देंति पच्चक्खी ।
चोद्दसपुव्वादीवि हु तह नाउं देंति हीनहियं ।।

वृ- यथा प्रत्यक्षिणः प्रत्यक्षागमज्ञानिनस्तुल्पेऽप्यपराधे पञ्चक पञ्चक योग्ये एकस्य पञ्चकं ददति । अपरस्य रागद्वेषविवृद्धिमुपलभ्य मासेन मासाभ्यां मासैर्वा वृद्धिं प्रयच्छन्ति । उपलक्षणमेतत् मूलमनवस्थाप्यं पाराञ्चितं वा यच्छन्ति । यथा तुल्येऽपि पाराञ्चितं योग्यापराधे एकस्य पाराञ्चितमपरस्यानवस्थाप्यं मूलं च्छेदं वा मासेन मासाभ्यां मासै र्वा हान्या तपो वा च शब्दात् पञ्चकं यावदन्ते नमस्कार सहितं हा दुष्ठुकृतं हा दुष्ठुकारितं हा दुष्ठु अनुमोदितमित्येवं वैराग्यभावनातो रागद्वेषहानिं भूयसीमति भूयस्तारामुपलभ्य प्रयच्छन्ति, तथा कस्यचित् मासप्रतिसेवनायामल्पां रागद्वेषहानिमुपलभ्य पञ्चकहान्या मासिकं ददति पञ्चविंशतिं दिनानि ददतीत्यर्थः । तथा एकाहंनाम अभक्तार्थं प्रतिसेविते पञ्चाहं ददति पञ्चाहे वा प्रतिसेविते एकाहमुपलक्षणत्वादाचाम्लमेकाशनं पूर्वार्द्धं निर्विकृतं पौरुषीं नमस्कारसहितं वा प्रयच्छन्ति । एवं चतुर्दशपूर्वादयोऽपि हु निश्चितं रागद्वेषहानिवृद्धी उपलभ्य हीनमधिकं वा प्रायश्चित्त ददति । अत्र परस्य प्रश्नमुदीरयति-

[भा.४०३९] चोदगपुच्छा पच्चक्खनाणिणो थोवं कह बहुं देंति ।
दिठंतो वाणियए जिनचोदस पुव्विए धमए ।।

वृ- चोदकस्यात्र पृच्छा प्रत्यक्षज्ञानिनो जिनादयः स्तोकेऽपराधे कथं बहु प्रयच्छन्ति प्रायश्चित्तमुपलक्षणमेतत् भूयसि वापराधे स्तोकमत्र सूरिराह-दृष्टान्तोऽत्र वणिजा दृष्टव्यः । तथा भूयः परस्य पृच्छा जिनादयः केवलज्ञानादिबलेन परस्य भावं जानते चतुर्दशपूर्विणस्तु कथं येन स्तोकेऽपि बहु, बहावपि स्तोकं ददति । सूरिराह-अत्र धमको दृष्टान्तः तत्र प्रथमतो वणिगदृष्टान्तं भावयति-

[भा.४०४०] जं जह मोल्लं रयणं तं जाणइ रयणवाणितो निउणो ।
थोवं तु महल्लसस्व कासइ अप्पस्स वि बहुं तु ।।

वृ- यथा निपुणो रत्नवणिक् यत् रत्नं यथा मूल्यं तत्तथा सम्यक् जानाति । ज्ञात्वा च कस्यचित् महतोऽपि रत्नस्य स्तोकं मूल्यं ददाति, कस्यचिदल्पस्याप्यद्भुतगुणोपेतस्य बहु, इमामेव दृष्टान्तभावनां प्रकारान्तरेणाह-

[भा.४०४१] अहवा कायमणिस्स उ सुमहल्लस्स विउ कागणी मोल्लं ।
वइरस्स उ अप्पस्स वि मोल्लं होती सयसहस्सं ।।

वृ- अथवेति प्रकारान्तरे रत्नपरीक्षको वणिक् काचमणेः सुमहतोऽपि मूल्यं काकिनीं करोति । वज्रस्य तु रत्नस्याल्पस्यापि मूल्यं तेन क्रियमाणं शतसहस्रं भवति । अत्रोपनयमाह-

[भा.४०४२] इय मासाण बहूण विरागदोसप्पयाए थोवं तु ।
रागदोसोवचया पणगे विउ तो बहुं देंति ।।

वृ- इति अमुना दृष्टान्तप्रकारेण बहुनामपि मासानां योग्येऽपराधे वैराग्यभावनाच्छलतो रागद्वेषाल्पतया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्तोकं प्रायश्चित्तं ददति, सिंहव्यापादकस्येव, रागद्वेषोपचयात् पञ्चकेऽप्यपराधे बहुप्रायश्चित्तं ददति । अधुना जिन चोद्दसपुव्विएधमए इत्यस्य व्याख्यानमाह-

[भा.४०४३] पच्चक्खी पचक्खं पासइ पडिसेवगस्स सो भावं ।
किए जाणइ परोक्खी नायमिणं तत्थ धमएणं ।।

वृ- प्रत्यक्षी जिनादिः प्रत्यक्ष प्रतिसेवस्य भावं जानाति, परोक्षी चतुर्दशपूर्वादिः कथं जानाति येन सोऽपि तथैव व्यवहरति ? सूरिराह- तत्र तस्मिन् विषये ज्ञातमुदाहरणमिदं वक्ष्यमाणं धमकेन शंस्वध्यामात्रा तदेव दर्शयति-

[भा.४०४४] नालीधमएण जिना उवसंहारं करेंति पारोक्खे ।
जह सो काणं जाणइ सुएण सोहिं तहा सोउं ।।

वृ- जिनास्तीर्थकृतः परोक्षे आगमे उपसंहारं नालीधमकेन कुर्वन्ते इयमत्र भावना-नाडिकायां गलन्त्यामुदकगलनपरिमाणतो जानाति एतावत्युदके गलिते यामो दिवसस्य रात्रेर्वागत इति ततोऽन्यस्य परिज्ञानाय शङ्खं धमति । तत्र यथा सोऽन्यो जनः शङ्खस्य शब्देन श्रुतेन कालं वा यामलक्षणं जानाति तथा परोक्षागमगामिनोऽपि शोधिमालोचनां श्रुत्वा तस्य यथावस्थितं भावं जानन्ति । ज्ञात्वा च तदनुसारेण प्रायश्चित्तं ददति । अथ कीदृशास्ते श्रुतज्ञानिनो ये प्रत्यक्षज्ञानिन इव शोधिं जानन्ति । तत आह-

[भा.४०४५] जेसिं जीवाजीवा उवलद्धा सव्वभावपरिणामा ।
सव्वाय नयविहीहिं केन कयं आगमेन कयं ।।

वृ- येषां श्रुतबलेन सर्वे जीवा अजीवाश्च उपलब्धा द्रव्यतः सर्वेषामपि च भावनां पदार्थानामुपलब्धाः श्रुतज्ञानविषयाः परिणामाः पर्यायाः कैरित्याह-सर्वैर्नैगमादिभिनर्यविकल्पैस्ते प्रत्यक्षज्ञानिन इव परस्य शोधिं जानन्ति । अत्र परप्रश्नः केन कृतं तत् श्रुतज्ञानं यस्येदृशं माहात्म्यमत आह आगमेन केवलज्ञानेन कृतमेतावेवाक्षेपपरिहारौ भावयति-

[भा.४०४६] तुं पुन केन कयं सुयनाणं जेन जीवमादीया ।
नज्जंति सव्वभावा केवलनाणीण तं तु कयं ।।

वृ- यत्पुनः श्रुतज्ञानं केन कृतं, येन जीवादयः सर्वे भावा ज्ञायन्ते । सूरिराह केवलज्ञानिभिः कृतं गाथायां षष्ठी तृतीयार्थे प्राकृतत्वात् तदेवं यथा श्रुतज्ञानिनोऽपि जानन्ति तथा प्रतिपादितमधुना शोधिविधिमाह-

[भा.४०४७] आगमतो ववहारं परसोच्चा संकियंमि उ चरित्ते ।
आलोइयंमि आराधना अनालोइए भयणा ।।

वृ- आगमतः प्रत्यक्षज्ञानी वापरे परस्मिन् व्यवहारं करोति । परस्यालोचनां श्रुत्वा नान्यथा । तत्र यदि कलुषितचारित्रतया न सम्यगालोचयति, किंत्वामर्यादामतिक्रम्य वर्त्तते, तदा शंकितमिति भिन्नमिति वा कलुषितमिति वा एकार्थं चारित्रे सति न सम्यगनेनालोचितमिति ज्ञात्वा तं ब्रूते अन्यत्र गत्वा शोधिं कुरु यदि पुनः सम्यगालोचयति तदा ददाति प्रायश्चित्त अथ यदि प्रत्यक्षागमज्ञानिनः परोक्षागमज्ञानिनो वा सर्वभावपरिज्ञानात्ततः कस्मात्तस्य पुरत आलोच्यते, किंतु तस्य समीपमुपगम्य वक्तव्यम् अपराधान्मे भवन्तो जानते तस्य शोधिं प्रयच्छत तत आह-आलोइयादि । आलोचिते बहुगुणसंभवतः सम्यगाराधना भवति । अनालोचित आराधनाया भजना विकल्पना कदाचिद्भवति कदाचिन्नेति । एतच्चाग्र भावयिष्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्रागमतो ववहारं परे सोद्धेति व्याख्यानयति-

[भा.४०४८] आगमववहारी छव्विहो वि आलोयणं निसामेत्ता ।
देति ततो पच्छित्तं पडिवज्जइ सारिउं जइ य ।।

वृ- आगमव्यवहारी षड्विधोऽपि परस्यालोचनां निशम्य ततः प्रायश्चित्तं ददाति, । यदि च कमप्य-पराधं विस्मृतः स्मारितः सन् सम्यक् प्रतिपद्यते तदा स्मारयति च । अन्यथा तस्यालोचनामेव न ददाति ।

[भा.४०४९] आलोइय पडिक्कंतस्स होइ आराधना सुनियमेन ।
अनालोयंमि भयणा किह पुन भयणा हवइ तस्स ।।

वृ- पूर्वमपराधजातमालोचित्तं ततस्तस्मात् प्रतिक्रान्तस्य अपुनःकरणतया प्रतिनिवृत्तस्य नियमेन पर्यन्ते सम्यगाराधना भवति । अनालोचिते पुनर्भजना । आह-कथं पुनरनालोचिते तस्याराधना-विषयभजना भवति । अत्राह-

[भा.४०५०] कालं कुव्वेज्ज सयं अमुहो वा हुज्ज अहव आयरितो ।
अप्पत्ते पत्ते वा आराधन तहवि भयणेवं ।।

वृ- कोऽपि आलोचनां ग्रहीष्यामीत्यालोचनापरिणामपरिणत आलोचनाग्रहणाय सम्प्रस्थित आलोचनार्हसमीपं, स च तमप्राप्त एवापान्तराले स्वयं कालं कुर्यात् । यदि वा पासोऽपि रोगवशादमुखो जातोऽथवा तस्याप्राप्तवत एव स आलोचनार्ह आचार्यः कालगंतो, यदि वा प्राप्तवतोऽप्यमुखो जातः । ततः स एवमालोचनां परिणतः आलोचनाया असंभवेऽपि काले कुर्वन्नाराधको यदि पुनर्न सम्यगालोचनापरिणामपरिणितस्तदा सोऽनाराधकः स च तथा कालगतो दीर्घसंसारी भवति, एवमाराधना आलोचना हि प्राप्तेऽप्राप्ते वा भजनया भवति ।

सम्प्रत्यागमव्यवहारिणामपि पुरत आलोचनायां गुणानुपदर्शयति ।

[भा.४०५१] अवराहं वियाणंति तस्स सोहिं च जद्दवी ।
तहा वि आलोयणा वुत्ता आलोयंते बहुगुणा ।।

वृ- यद्यप्यागमव्ययहारिणस्तथालोचकस्यापराधं विजानन्ति शोधिं च तथापि तेषामपि पुरत आलोचना दातव्या उक्ता तीर्थकरगणधरैर्यत आलोचयति बहवो गुणास्तथाह्यालोचनाचार्येण स आलोचकः प्रोत्साह्यते यथा वत्स, त्वं धन्यस्त्वं सभाग्यः यदेवं मानं निहत्यात्महितार्थतया स्वरहस्यानि प्रकटयति । महादुष्करमेतत्, एवं च स प्रोत्साहितः सन् वर्धमानपरिणामः सम्यग् निःशल्यो भूत्वा यथावस्थितमालोचयति शोधिं च सम्यक् प्रतिपद्यते, । ततः पर्यन्ते आराधना स्तोककालेन च मोक्षगमनमिति । अथ कथमागमिनो व्यवहारं प्रयुंजते तत आह-

[भा.४०५२] दव्वे हिं पज्जवेहिं य कमक्खेत्ते कालभावपरिसुद्धं ।
आलोयणं सुणेत्ता तो ववहारं पउंजंति ।।

वृ- द्रव्यैः सचित्तादिभिः पर्यायैस्तषामेव सचित्तादिद्रव्यामाणवस्थाविशेषैः परिणामविशेषैस्तथा क्रमतः क्षेत्रतः कालतो भावतश्च परिशुद्धामालोचनां श्रुत्वा ततस्तदनन्तरं व्यवहारं शोधिव्यवहारं प्रयुज्जते नान्यथा, तत्र यदि सचित्तं सेवित्वा सचित्तमेवालोचयति तदा द्रव्यशुद्धा सा आलोचना यदा तु सचित्तं प्रतिसेव्याचित्तमालोचयति तदा द्रव्याशुद्धा, तथा यामवस्थामुपगतं सचित्तं प्रतिसेव्य तामवस्थागतं तदालोचयति तदा सा पर्यायशुद्धा; यदान्यामवस्थामुपगतं प्रतिसेव्यान्यावस्थामालोचयति तदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यायाशुद्धा तथा यदि प्रतिसेवनानुलोममालोचयति तदा सा क्रमशुद्धा उत्क्रमेणालोचयतः क्रमाशुद्धा। तथा यद्यत्र जनपदेऽध्वनि वा प्रतिसेवितं तत्तथैव आलोचयतः क्षेत्रशुद्धा आलोचना जनपदे प्रतिसेवितमध्वनि कथयतः क्षेत्राशुद्धा । यथा यत् यदा दुर्भिक्षे सुभिक्षे वा दिवारात्रौ वा प्रतिसेवितं तत्तदालोचयतः कालशुद्धा सुभिक्षे प्रतिसेव्य दुर्भिक्षे कथयतो रात्रौ वा प्रतिसेव्य दिवसे कथयतः कालाशुद्धा । तथा येनानाभोगादिना सेवितं तं भावं कथयतो भावशुद्धा, उपेत्य प्रतिसेव्यानाभोगादिना कथयतो भावाशुद्धा । सम्प्रति भावमेवोपदर्शयति-

[भा.४०५३] सहसा अन्नाणे न व भीएण व पेल्लिएण व परेण ।
वसनेन पमादेन व मूढेन व रागदोसेहिं ।।

वृ- तेन प्रतिसेवकेन सहसा अज्ञानेन वा परेण वा प्रेरितेन वा व्यसनेन वा द्यूतादिना प्रमादेन वा मूढेन वा रागद्वेषाभ्यां वा प्रतिसेव्य यदि तथैवालोच्यते प्रायश्चित्ताय मे ददाति नान्यथेति वाक्यशेषः ।

[भा.४०५४] पुव्वं अपासिउणं छुढे पायंमि जं पुणो पासे ।
न य तरइ नियत्तेउं पायं सहसा करणमेयं ।।

वृ- पूर्वमग्रेतनप्रदेशे कुलिङ्गिनमदृष्ट्वा क्षिप्ते उत्पादिते पादे यत्पुनः पश्यति कुलिङ्गिनं समापतितं न पादं निवर्तयितुं शक्नोति तत एवं यत्तस्य व्यापादनमेतत्सहसाकरणं । साम्प्रतमज्ञानमाह-

[भा.४०५५] अन्नयरपमाएणं असंपउतस्स नोवउत्तस्स ।
इरियाइसु भूयत्थे अवट्टतो एयमन्नाणं ।।

वृ- पञ्चानां प्रमादानामन्यतरेणापि प्रमादेनासंप्रयुक्तस्याक्रोडीकृतस्यात एव ईर्यादिषु समितिषु भूतार्थेन तत्वतोऽवर्तमानस्य यद्भवनमेतदज्ञानं अधुना भीएण व पेल्लिएण व परेण इत्यस्य व्याख्यानमाह-

[भा.४०५६] भीतो पलायमाणो अभियोगभएन वावि जं कुज्जा ।
पडितो वाऽपडितो वा पेलिज्जउ पेल्लिउ पाणे ।।

वृ- अभियोगभयेन भीतः पलायमानो यत् कुर्यात् प्राणव्यपरोपणादि तत् भीतेनेति द्रष्टव्यम् । तथा परेण प्रेरितः सन्पतितोऽपतितो वा प्राणान् द्वीन्द्रियादीन एकेन्द्रियान्वा प्रेरयेत ।

सम्प्रति व्यसनादिपहानि व्याचष्टे ।

[भा.४०५७] जूयादि होइ वसनं पंचविहो खलु भवे पमादो उ ।
मिच्छत्तभावना उ मोहो तह रागदोसा य ।।

वृ- द्युतादि भवति व्यसनं, प्रमादः खलु मद्यादिभेदाद्भवति पञ्चविधः, मिथ्यात्वं भावना मोहः रागद्वेषाः सुप्रतीताः ।

[भा.४०५८] एएसिं ठ्ठाणाणं अन्नयरे कारणे समुप्पन्ने ।
तो आगमवीमंसं करेंति अत्ता तदुभएणं ।।

वृ- एतेषामनन्तरोदितानां सहसाप्रभृतीनां स्थानानामन्यतरस्मिन्कारणे समुत्पन्ने सति आलोचनायां प्रदत्तायामागमविमर्शमासा उभयेन सूत्रार्थलक्षणेन कुर्वन्ति । यथायं सहोऽयमसहः अयमेतावता शोत्स्यति अयं नेति । अथवा किमनेन सम्यगालोचितं किं वा नेति ।

साम्प्रतमागमविमर्शमिव व्याख्यानयति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४०५९] जइ आगमो य आलोयणा य दोन्नि विसमं तु निवयंति।
एसा खलु वीमंसा जो व सहू जेण वा सुज्झे ॥

वृ. यद्यागमश्चालोचना च एते द्वे अपि समकं परस्परमविसंवादिता निपततौ यथैव तस्याग-मस्तथैवेतरस्यालोचना यथैव तस्यालोचना तथैवागमिन आगमः। एष खलु आगमविमर्श उच्यते। अस्मिन् सति शोधिं ददति नान्यथा यदि वा यः सहोऽसहो वा येन वा यः शुद्धयति। एतत्परिभावनमागमविमर्शः। सम्प्रत्याप्तशब्दव्याख्यानमाह-

भा. [४०६०] नाणमादीनि अत्ताणि, जेन अत्तो उ सो भवे।
रागदोसप्पहीणो वा, जे व इट्ठा विसोधीए ॥

वृ. ज्ञानादीनि ज्ञानदर्शनचारित्राणि येनाप्तानि स भवत्याप्तः ज्ञानादिभिराप्यते स्म आप्त इति व्युत्पत्तेः यो वा रागद्वेषप्रहीणः स आप्तः। यदि वा ये इष्टाः शोधौ शोधिविषये ये आप्ताः।

भा. [४०६१] सुत्तं अत्थो उभयं आलोयण आगमो व इति उभयं।
जं तदुभयंति वुत्तं वत्थ इमा होइ परिभासा।

वृ. सूत्रमर्थ इत्युभयं तेनागमविमर्शं कुर्वन्ति किमयं सह इत्यिद अथवा आलोचनामागशविमर्शं विदधति। यथा किं यथावस्थितास्या लोचना किं वा नेति। तत्र यत्तदुभयमित्युक्तं। तत्र इयं वक्ष्यमाणा परिभाषा भवति। तामेवाह-

भा. [४०६२] पडिसेवणाइयारे जइ नाउट्टइ जहक्कमं सव्वे।
न हु देंती पच्छित्तं आगम ववहारिणो तस्स ॥

वृ. यदि प्रतिसेवनातिचरान् यथाक्रमं सर्वान् यदि नाकुट्टयति नालोचयति तदा तस्याग-मव्यवहारिणः प्रायश्चित्तं न ददति। यदि पुनः प्रतिसेवनातिचारान् यथाक्रमं सर्वान् आकुट्टयति आलोचयति तदा तस्यागमव्यवहारिणः प्रायश्चित्तं ददति।

भा. [४०६३] कहेहि सव्वं जो वुत्तो जाणमणो वि गूहति।
न तस्स दित्ते पच्छित्तं, बिंति अन्नत्थ सोहय।

वृ. यान् सर्वानालोचयन् कथय सर्वं मा निगूहयेति य उक्तः सन् जानानोऽपि गूहयति तस्य प्रायश्चित्तमागव्यवहारिणो न ददति। किन्तु ब्रुवते अन्यस्य समीपे गत्वा शोधय, शोधिं गृहाण।

भा. [४०६४] न संभरति जो दोसे सब्भावा न य मायया।
पच्चक्खी साहए ते न माइणो उ न साहए ॥

वृ. यो दोषान् सद्भावतो न स्मरति न मायया, तस्य प्रत्यक्षी, प्रत्यक्षागमज्ञानी कथयति।

भा. [४०६५] जइ आगमतो व आलोयणा व दोवि विसमं निवइयाइं।
न हु होंति पच्छित्तं आगम ववहारिणो तस्स ॥

वृ. यद्यागम आलोचना च एते द्वे अपि विषमं निपतिते यथा तेनालोचितं तथागमज्ञानी तस्यातीचारं न प्रेक्षते किन्त्वन्यादृशमूनमधिकं वा इत्यर्थः। तदा तस्यागमव्यवहारिणः प्रायश्चित्तं न ददति।

भा. [४०६६] जइ आगमोय आलोयणा य दोन्निवि समं निवडियाइं।
देंति ततो पच्छित्तं आगमववहारिणो तस्स ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. यद्यागम आलोचना च एते द्वे अपि समं निपतिते यथापराधमालोचनामागमज्ञानी पश्यतीत्यर्थः। ततस्तस्यागमव्यवहारिणः प्रायश्चित्तं ददाति। अथ कीदृश आलोचनार्हः कीदृशो नेत्याह-

भा. [४०६७] अट्ठारसेहिं ट्ठाणेहिं जो होइ अपरिनिट्ठितो।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए॥

वृ. अष्टादशसु वक्ष्यमाणेषु स्थानेषु गाथायां तृतीया सप्तम्यर्थे यो भवति अपरिनिष्ठितः सम्यगऽपरिज्ञानी स तादृशो व्यवहारं व्यवहर्त्तुं नालमर्थः-

भा. [४०६८] अट्ठारसेहिं ट्ठाणेहिं जो होइ परिनिट्ठितो।
अलमत्थो तारिसो होइ ववहारं ववहरित्तए।

वृ. अष्टादशसु वक्ष्यमाणेषु स्थानेषु यो भवति परिनिष्ठितः। सम्यग् ज्ञाता त तादृशो व्यवहारं व्यवहर्त्तुमलमर्थः पर्याप्तो भवति।

भा. [४०६९] अट्ठारसेहिं ट्ठाणेहिं जो होति अपतिट्ठितो।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए।

भा. [४०७०] अट्ठारसेहिं ट्ठाणेहिं जो होति सुपतिट्ठितो।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए।

वृ. श्लोकद्वयमपि पूर्ववत्, नवमरप्रतिष्ठितः तेषु सम्यगवर्त्तमानः, प्रतिष्ठितस्तेषु सम्यग् वर्त्तमानः। सम्प्रति तान्येवाष्टादशस्थानान्याह-

भा. [४०७१] वयछक्ककायछक्कं अकप्पो गिहिभायणे पलियंको।
गोयरनिसिज्ज न्हाणे भूसा अट्ठारसट्ठाणे॥

वृ. व्रतषट्कं प्राणातिपातमृषावादादत्तादानमैथुनपरिग्रहरात्रिभोजनलक्षणं, कायषट्कं पृथिव्यप्तेजोवायुवनस्पतिसलक्षणं, अकल्पः पिण्डशय्या वस्त्रपात्ररूपं चतुष्टयमकल्पनीयं गृहिभाजनं कांस्यपात्रादिः, पल्यङ्कः शय्याविशेषो गृहस्थोचितो गोचरनिषद्यागोचरगतस्य निषदनं, स्नानं देशतः सर्वतो वा शरीरस्य प्रक्षालनं विभूषामण्डनमष्टादशं स्थानमधुना परिनिष्ठितप्रतिष्ठितशब्दयोरर्थमाह-

भा. [४०७२] परिनिट्ठितो परिन्नाया परिट्ठिओ जो ट्ठितो उ तेसिं भवे।
अविऊ सोहिं न याणेइ अट्ठितो पुण अन्नहा कुज्जा॥

वृ. परिनिष्ठितो नाम यथायोगं विधेयतया वा सम्यक् परिज्ञातः प्रतिष्ठितो, यस्तेष्वाष्टादशसु स्थानेष्वागमानुसारतोऽविधायकतयावस्थितोऽथापरिनिष्ठितोऽप्रतिष्ठितो वा, को दोषो येन तस्यालोचनार्हत्वप्रतिषेधस्तत आह-अविद्वान् अपरिनिष्ठितः शोधिं न जानाति, अप्रतिष्ठितो निःशूकतया मा ममपि गुरुतरं प्रायश्चित्तमापतेदिति भयतो वान्यथा व्यवहारं कुर्यात्तेनोभयोरप्यालोचनार्हत्यप्रतिषेधः।

भा. [४०७३] बत्तीसाए ट्ठाणेसु जो होइ अपरिनिट्ठितो।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए॥

भा. [४०७४] बत्तीसाए ट्ठाणेसु जो होइ परिनिट्ठितो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

भा. [४०७५] बत्तीसाए ठ्ठाणेसु जो होइ अपतिट्ठितो ।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

भा. [४०७६] बत्तीसाए ठ्ठाणेसु जो होइ सुपतिट्ठितो ।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

वृ. श्लोकचतुष्टयमपि पूर्ववत् । सम्प्रति तान्येव द्वात्रिंशत् स्थानान्याह-

भा. [४०७७] अट्ठविहा गणिसंपय एक्केक्का चउव्विहा मुनेयव्वा ।
एसो खलु बत्तीसा ते पुण ठ्ठाणा इमे हुंति ॥

वृ. गणिन आचार्यस्य सम्पदष्टविधा अष्टप्रकारा एकैका च भवति चतुर्विधा ज्ञातव्या, एस खलु द्वात्रिंशत् स्थानानि भवन्ति । तत्र यानि सम्पदोऽष्टौ स्थानानि तानीमानि भवन्ति । तान्येवाह-

भा. [४०७८] आयारसुयसरीरे वयणे वायणमती पउगमती ।
एतेसु संपया खलु अट्ठमिया संगहपरिन्ना ॥

वृ. आचारे श्रुते शरीरे वचने वाचनाया मतौ प्रयोगमतौ एतेषु स्थानेषु स्मपदो भवन्ति । ताश्च सर्वसंख्यया सप्त, अष्टमिका सम्पत्संग्रहपरिज्ञा ।

भा. [४०७९] एसा अट्ठविहा खलु एक्केक्कीए चउव्विहो भेदो ।
इणमो उ समासेणं वुच्छामि अहानुपुव्वीए ॥

वृ. एषा अनन्तरोदिता अष्टविधा खलु सम्पत्तदेकैकस्याश्च सम्पदश्चुर्विधोऽयं वक्ष्माणो भेदः तं समासेन यथानुपूर्व्या परिपाट्या वक्ष्यमि प्रतिज्ञामेव निर्वाहयति-

भा. [४०८०] आयार संपयाए संजमधुवजोगजुत्तया पढमा ।
बिइया य असंप्पगहिया अनिययवित्ती भवे तइया ।

भा. [४०८१] तत्तो य वुड्ढसीले आचारे संपया चउब्भेया ।
चरणं तु संजमो उ तहियं निच्चं उवउत्तो ॥

वृ. आचारसम्पद्यावान्तरभेदश्चतस्रः सम्पदस्तद्यथा-प्रथमा संयमध्रुवयोगयुक्तमा, द्वितीया असंप्रग्रगहिता संप्रग्रहरहितता, तृतीया भवत्यनियतवृत्ति स्ततश्चतुर्था यत् वृद्धशीलो वर्त्तते । एषा आचारे संपच्चतुर्धा । तत्र संयमध्रुवयोगयुक्तता नामसंयमश्चरणं तस्मिन् ध्रुवं नित्यं योगे युक्तत्ता उपयुक्तत्ता संयमध्रुवयोगयक्तत्ता । असंप्रग्रहिता नाम जात्यादिमदैरनुत्सिक्तत्ता ।

भा. [४०८२] आयरितो बहुस्सुत्तो तवसि जच्चादिगेहि व मएहिं ।
जो होइ अनुस्सित्तो असंपग्गहितो भवे सो उ ॥

वृ. आचार्योऽहं वहुश्रुतोऽहं तेजस्वी अहमिति मदैर्जात्यादिभिर्वा मदैर्यो भवत्यनुसिक्तः स भवत्यसंप्रग्रहितो मदसंप्रग्रहरितत्वात् अनियतवृत्तिता अनियतचारिता । तथा चाह-

भा. [४०८३] अनिययचारी अनिययवित्ती अगिहितो वि होइ अनिकेतो ।
निहुय स भवे अचंचल नायव्वो वुड्ढसीलत्ति ॥

वृ. अनियतवृत्तिर्नाम अनियतचारी अथवा अग्रहिकोऽविद्यमाननिकेतोऽनियतवृत्तिस्तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निवृत्त एतदेव व्याचष्टे-अचञ्चलो वृद्धशीलो ज्ञातव्यः उक्ता आचारसम्पच्चतुर्धाः ।

भा. [४०८४] बहुसुय परिचियसुत्ते विचित्तसुत्ते य होइ बोधव्वे ।
घोसविसुद्धिकरे वा चउहा सुयसंपया होइ ॥

वृ. श्रुतसम्पच्चतुर्धा चतुःप्रकारा भवति, तद्यथा-बहुश्रुतः परिचितसूत्रः विचित्रसूत्रो घोष-विशुद्धिकरः । सम्पत्सद्वतोभेदेनाभिधानं श्रुतश्रुतववतोः कथंचिद्‌भदेदात् । एवमुत्तरत्र पूर्वं च परिभावनीयं । तत् बहुश्रुतमाह-

भा. [४०८५] बहुसुत्तजुगपहाणे अब्भिंतर बाहिरं सुयं बहुहा ।
होइ व सद्दग्गहणा चारित्तं वि सुबहुयंपि ॥

वृ. यस्य बहुधा बहुप्रकारमभ्यन्तमङ्गप्रविष्टं बाह्यमङ्गं बाह्यश्रुतं भवति विद्यते । घोषविशुद्धिकर इत्यत्र च शब्दग्रहणात् सुबहुककं चारित्रमपि यस्य स युगप्रधानो बहुश्रुतः ।

भा. [४०८६] सगनामं व परिचियं उक्कमउक्कमतो बहूहिं विगमेहिं ।
ससमयपरसमएहिं य उस्सग्गोववायतो चित्तं ॥

वृ. यथा श्रुतं उत्क्रमतः क्रमेण च तथा क्रमेण उत्क्रमेण वा एकैकपदमोचनेन इत्यादिभिरपि बहुनिर्गमैः स्वनामेव स्वाभिधानिव परिचितं सूत्रं सपरिचितसूत्रस्तथा यस्य स्वसमयपरसमया-भ्यां स्वसमयपरसमयवक्तव्यताभ्यामुत्सर्गापवादेन उत्सर्गानुविद्धमपवादानुविद्धं विचित्रं सूत्रं सविचित्रसूत्रः । घोषविशुद्धमाह-

भा. [४०८७] घोसा उदत्तमादी तिहिं विसुद्धं तु घोसपरिसुद्धं ।
एसा सुत्तोवसंपय सरीरउवसंपयं अतो वुच्छं ॥

वृ. घोषा उदात्तादयस्तैर्विशुद्धं घोषविशुद्धं तत्करणशीलो घोषविशुद्धिकरः एषा चतुर्धा श्रुतोपसम्पत् । अत ऊर्ध्वं शरीरोपसम्पदं वक्ष्ये । तामेवाह-

भा. [४०८८] परीणाहो तह अनुत्तप्पया सरीरंमि ।
पडिपुण्ण इंदियएहिं य थिरसंघयणो य बोधव्वो ॥

वृ. शरीरस्य आरोहः समपरिणाहः तथा अनुतप्यता अलज्जनीयता तथा परिपूर्णमिन्द्रयैः स्थिरसंहननश्चतुर्थो बोद्धव्यः । तत्रारोहपरिणाहमाह ॥

भा. [४०८९] आरोहो दिग्घत्तं विक्खंभो वि जइ तेत्तितो चेव ।
आरोह परिणाहे उवसंपया एस नायव्वा ॥

वृ. आरोहो दीर्घत्वं परिणामो विष्कंभो विशालता । तत्र यावनारोहस्तवान् यदि विष्कंभो भवति तदा एषा उपसम्पत् आरोहपरिणाहे ज्ञातव्या । अनुतप्यतामाह-

भा. [४०९०] तवु लज्जाए धाऊ अलज्जणीयो अहीन सव्वंगो ।
होइ अनुतप्पे सो अविगलइंदियपडिपुण्णे ॥

वृ. त्रपुधातुर्लज्जायां वर्तते त्रपौपि लज्जायामिति वचनात् । तत उत्प्राबल्येन त्रप्यते येन तत् उत्त्रप्यं । न उत्त्रप्यमनउत्त्रप्यमलज्जनीयं तथा च शरीरशरीरमतोरभेदमधिकृत्याह-अलज्ज-नीयः किमुक्तं भवति अहीनसर्वाङ्ग एष भवत्यनुत्त्रप्यः । तथा अविकलानि स्पष्टं सम्पूर्णानि इन्द्रियाणि यस्य सोऽविकलेन्द्रियः । परिपूर्णः परिपूर्णेन्द्रिय उच्यते । स्थिरसंहननमाह-

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

भा. [४०९१] पढमगसंघयणथिरो बली य सरीरो च होइ नायव्वो ।
एसा शरीरसंपया एत्तो वयणंमि वुच्छामि ॥

वृ. प्रथम संहननः स्थिरः स्थिरसंहननो ज्ञातव्यः । एषा चतुःप्रकारा शरीरसम्पदुक्ता । अत ऊर्ध्वमिदानीं वचने सम्पदं व्याख्यामि तामेवाह-

भा. [४०९२] आदेज्ज महुरवयणो य अनिस्सियं वयणो तहा असंदिद्धो ।
आदेज्जगब्भवक्को अत्थवगाढं भवे महुरं ॥

भा. [४०९३] अहवा अफरुसवयणो खीरासवमादिलद्धिजुत्तो वा ।
निस्सिय कोहाईहिं अहवावी रागदोसेहिं ॥

वृ. आदेज्जति पदैकदेशे पदसमुदायोपचारादादेयवचन इति द्रष्टव्यमेवमन्यत्रापि । तथा मधुरवचनोऽनिश्रितवचनोऽसन्दिग्धोऽसन्दिग्धवचनः । तत्रादेय आदेयवचनो नाम ग्राह्यवाक्यः । अर्थावगाढं भवति मधुरं, मधुरं वचनं यस्यासौ मधुरवचनः । अथवा अपरुपवचनो यदि वा क्षीराश्रवादिलब्धियुक्तो मधुरवचनः । तथा निश्रितं क्रोधादीनामथवा रागद्वेषाणां निश्रामुपगतं गाथायां तृतीयाकरणविवक्षातो न निश्रितं वचनं यस्य स तथा असन्दिग्धवचनमाह-

भा. [४०९४] अव्वत्तं अफुडत्थं अथ बहुत्ता व होति संदिद्धं ।
विवरीयमसंदिद्धं वयणे सा संपया चउहा ॥

वृ. अव्यक्तवचो व्यक्ताया अभावतः अस्फुटार्थमक्षराणां सन्निवेशविशेषतो विवक्षितार्थसम्पदाकत्वाभावात्, अर्थबहुत्वाद्वा भवति । सन्दिग्धं तद्विपरीतमसंदिग्धं तद्वचनं यस्य सोऽसंदिग्धवचनः । एषा वचने सम्पच्चतुर्धा चतुःप्रकारा । सम्प्रति वाचनासम्पदं चतुःप्रकारामाह-

भा. [४०९५] वायणभेया चउरो विजिओद्देसण, समुद्दिसणयाओ ।
परिनिव्वय निवायाए निज्जवणे चेव अत्थस्स ॥

वृ. वाचनाया भेदाश्चत्वारस्तद्यथा-विचिन्त्य सम्यक् योग्यतां परिनिश्चित्योद्देशनं १, विचिन्त्यैव समुदेश (नं) समुद्देशनता च २, तथा परिनिर्वाप्य वाचयति ३, अर्थस्य निर्यापना ४ । तत्र विचिन्त्योद्देशनाह-

भा. [४०९६] तेणेव गुणेणं तू वाएयव्वा परिक्खिउंसी ।
सा उद्दिसति वियाणेउं जं जस्स उ जोग्गं तं तस्स ॥

वृ. अयमस्य वाचना योग्योऽयमयोग्य इति तेनैव वाचनाविषयेन गुणेन शिष्याः परीक्ष्य वाचयितव्या नान्यथा ततो यत् यस्य योग्यं तत्तस्य विज्ञाय उद्दिशति । अत्रैव प्रकारान्तरमाह-

भा. [४०९७] अपरिणामगादी वियाणिउ अभयाणे न वाएंत्ति ।
जह आममट्टिय घडे, अंबेव नछुब्भती खीरं ॥

वृ. अपरिणामिकादीन आदिशब्दादतिपरिणामिकपरिग्रहः छेदसूत्राणामभाजनानि विज्ञाय न वाचयति नोद्देतीत्यर्थः । यथा आमे अपक्वे मृत्तिका घटे पक्के वा अम्लेन क्षीरं क्षिप्यते ।

भा. [४०९८] जइ छुब्भती विनस्सइ नस्सइ वा एवमपरिणामादी ।
नोद्देसे च्छेयसुत्तं समुद्दिसे वाचितं चेव ॥

वृ. यद्यम्ले क्षीरं क्षिप्यते तदा विनश्यते यदि वा आममृत्तिकाघटे घटस्य भङ्गतो विनश्यति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवमपरिणामादौ च्छेदसूत्रं विनश्यति नश्यति वा ततो नोद्दिशति एषा विचिन्त्योद्देशनता, समुद्दिशेदपि तदेव योग्यं नान्यत्। एषा विचिन्त्य समुद्देशन्।

भा. [४०९९] परिनिव्वविया वाए जत्तियमेत्तं तु तरइ उप्पेउं।
जाहगदिट्ठंतेणं परिचिते ताव तामुद्दिसति ॥

वृ. परिनिर्वाप्य वाचयति। किमुक्तं भवति ? जाहकदृष्टान्तेन यावन्मात्रमवग्रहीतुं शक्नोति तावन्मात्रमग्रतेनपरिचिते उद्दिशति। एषा परिनिर्वाप्य वाचना, अर्थस्य निर्यापणामाह-

भा. [४१००] निज्जवग्गो अत्थस्स जो वियाणाइ अत्थ सुत्तस्स।
अत्थेण व निव्वहती अत्थंपि कहेइ जं भणियं ॥

वृ. अर्थस्य निर्यापक इति यद्भणितं तस्यामर्थः। यो नाम सूत्रस्यार्थं कथ्यमानं विजानाति यदि वा अर्थेन निर्वहति अर्थावधारणाबलेन सूत्रपातो निर्वाहमुपयाति तस्यार्थमपि कथयति, आस्तां सूत्रं ददातीत्यपि शब्दार्थः। सम्प्रति मतिसम्पदं चतुर्भेदामाह-

भा. [४१०१] मइसंपयचउभेया उग्गह ईहा अवाय धारणा य।
उग्गहमति छब्भेया तत्थ इमा होइ नायव्वा ॥

वृ. मतिसम्पच्चतुर्भेदा। तद्यथा-अवग्रह इहा अवायः धारणा च। तत्रावग्रहमवग्रहः अनिर्देश्य सामान्यमात्रग्रहणमीहनमीहा अवग्रहीतस्यार्थस्यासद्भूतविशेष परित्यागेन सद्भूविशेषादानाभिमुखो बोधविशेषः। अवायो निश्चयः। धारणा स्मृतिस्तत्रावग्रहमतिरियं वक्ष्यमाणे षड्भेदा भवति ज्ञातव्या। तामेवाह-

भा. [४१०२] खिप्प बहुविहं व धुवअनिस्सिय तह य होई असंदिद्धं।
उगेण्हइ एविहा अवायमवि धारणा चेव ॥

वृ. १ क्षिसं २ बहु ३ बहुविधं ४ ध्रुव ५ निश्रित ६ असन्दिग्धमवगृह्णाति। एवं अवग्रहस्य षट् भेदं एवं षट् भेदा ईहा अवायो धारणापि च प्रत्येके ज्ञातव्या। तत्र क्षिप्रमवग्रहं व्याख्यानयति।

भा. [४१०३] सीसेण कुतित्थीप व उच्चरियमेत्तमेवाउगिण्हे।
तं खिप्पं बहुगं पुण पंच व छ स्सत्त गंथसया ॥

वृ. शिष्येन कुतीर्थिना वा यत् उच्चरितमात्रमेवावगृह्णाति तत् क्षिप्रमवग्रहणमुच्यते। बहुकं पुनरवग्रहणमिदं यत् पञ्च षट् सत्त वा ग्रन्थशतान्येकवारमवगृह्णाति;

भा. [४१०४] बहुहानेगपयारं जह लिहति वधारए गणेइ विया,
अक्खाणगं कहेइ सद्दसमूहं व नेगविहं ॥

वृ. बहुविधमवग्रहणं नाम अनेकप्रकारं यथा स्वयं लिखति अन्येन भण्यमानमवधारयति। अन्यच्च संख्येयवस्तु गणयति। अथवा नानापुरुषाश्रितं नानातोद्याश्रितं वा शब्दसमूहमनेकविधं अनेकप्रकारं प्रत्येकमवगृह्णाति एतत् बुहविधमवग्रहण्।

भा. [४१०५] न विस्सरति धुवं ता अनिस्सियं जत्र पोत्थए लिहिया,
अनभासियं च गेण्हए निस्संकिय होइ संदिद्धं ॥

वृ. यत्रैव विस्मरति तत् ध्रुवम्। अनिश्रितं नाम यत्र पुस्तके लिखितमपेक्षते अभाषित वा परैर्व्याजेन उदीरितं वा यदवगृह्णाति तदनिश्रितं, निःशङ्कितं भवत्यसन्दिग्धं। एवं ग्रहणस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

षड्भेदाः । साम्प्रतमीहादीनां षड्भेदान् प्रत्येकं योजयन्नाह-

भा. [४१०६] उग्गहियस्स उ ईहा ईहिता पच्छा अनंतरमवातो ।
अवगते एच्छ धारण तीए विसेसो इमो नवरं ॥

वृ. अवग्रहीतार्थस्य विषये ईहा प्रवर्त्तते, ईहाया अपि उक्तप्रकारेण षड्भेदा भावनीयाः । ईहिते सति पश्चादनन्तरमवाय उपजायते । ततस्तस्याप्युक्तपप्रकारेण षड्भेदाः । अवगते सति पश्चाद्धारणातस्तस्या अपि षडेभेदाः नवरं तस्यां धारणायामयं वक्ष्यमाणो विशेषस्तमेवाह-

भा. [४१०७] बहु बहुविहं पुराणं दुद्धरमनिस्सिय तहेव असंदिद्धं ।
पोराण पुरा वायितं दुद्धरनयभंगगुवलिता ॥

वृ. बहु बहुविधं पौराणं दुर्धरमनिश्रितं तथैवासन्दिग्धं धरणमिति धारणायाः षड्भेदास्तत्र बहुबहुविधाऽनिश्रिताऽसन्दिग्धानि तथैव पौराणं नाम यत् पुरा चिरकालो वाचितं । दुर्द्धरं नाम नयभंगैर्वागुपिलत्वान्महता कष्टेन धार्यम् सम्प्रति प्रयोगमतिसम्पदं चतुर्भेदामाह ।

भा. [४१०८] एत्तो उ पउगमती चउव्विहा होइ आनुपुव्वीए ।
आयपुरिसं व खेत्तं वत्थुं वि य पउंजए वायं ॥

वृ. अत ऊर्ध्वं प्रयगमतिश्चतुर्धा आनुपूर्व्या परिपाट्या वक्ष्यते । तामेवाह-आत्मानं पुरुषं क्षेत्रं वस्तु दितित्वा ज्ञात्वा वादं प्रयुंक्ते उपलक्षणमेतत् । धर्मकथादिकं वा तत्रात्मद्वारमाह-

भा. [४१०९] जाणति पयोगभिसजो वाही जेनातुरस्स छिज्जइ ।
ओइय वातो य कहा वा नियसत्ति नाउ कायव्वा ॥

वृ. यथा प्रयोगभिषक् येनौषधेनातुरस्य व्याधिः च्छिद्यते तत् जानाति ज्ञात्वा च तत् प्रयुंक्ते इत्येवमधुना प्रकारेण निजशक्तिं ज्ञात्वा वादो धर्मकथा वा कर्तव्या नान्यथा । गतं आत्मद्वारम्

भा. [४११०] पुरिसं उवासगादी अहवावी जाणगा इयं परिसं ।
पुव्वं तु गमेऊणं ताहे वातो पतोत्तव्वो ॥

वृ. पुरुषमुपासकादि कथमथवा ज्ञापिकादिकां विद्यां वा पर्षद् पूर्वं गमयित्वा पश्चात् वादः प्रयोक्तव्यो नान्यथा । गतं पुरुषद्वारमधुना क्षेत्रद्वारमाह-

भा. [४१११] खेत्तं मालवमादी अहवावी साहुभावियं जं तु ।
नाऊण तहा विहिणा वातो य तहिं पतोत्तव्वो ॥

वृ. क्षेत्रं मालवादिकं यद्वा साधुभावितं तत्तथारूपेण ज्ञात्वा विधिना जिनभणितेन वादः प्रयोक्तव्यो नान्यथा । गतं क्षेत्रद्वारं । वस्तुद्वारमाह-

भा. [४११२] वत्थुं परवादी उ बहु आगमितो न वा च नाऊणं ।
रायावरायमच्चो दारुणभद्दस्स भावोत्ति ॥

वृ. वस्तु परिवादी बह्वागमिको न वा यदि वा राजा राजामात्यो वा दारुणस्वभावो भद्रस्वभावो वा इति ज्ञात्वा वादः प्रयोक्तव्यः तदेवमुक्ता प्रयोगमतेः सम्पच्चतुःप्रकारा । सम्प्रति संग्रहपरिज्ञां चतुःप्रकारामाह-

भा. [४११३] बहुजनजोग्गं खेत्तं पेहे तह फलगपीढमादिन्नो ।
वासासु एए दोन्नि वि काले य समाणए कालं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४११४] पूए अहो गुरुंमि य चउहा एसा उ संगह परिण्णा।
एएसिं तु विभागं वुड्डामि अहानुपुव्वीए॥

वृ. वर्षासु बहुजनयोग्यं क्षेत्रं प्रेक्षयति तथा फलकपीठं समाहारो द्वन्द्वः। पीठफलकानीत्यरर्थथः। यद्वर्षासु एते द्वे अपि पीठफलके आचीर्थे तथा काले स्वाध्यायादिसम्बन्धिनि प्रासवसरे तं कालं स्वाध्यायादिना समनायति। तथा यथा गुरुरत्नाधिकतरं पूजयति एषा चतुर्धा संग्रहपरिज्ञा। साम्प्रतमेतेषां पादानां विभागं यथानुपूर्व्या क्रमेण वक्ष्यते तमेवाह-

भा. [४११५] वासे बहुजनजोग्गं विचिन्नं जंतु गउपाओग्गं।
अहवा वि बाल दुब्बल गिलाण आदेसमादीणं॥

वृ. बहुजनयोग्यं नाम विस्तीर्णं यतः समस्तस्यापि गच्छस्य प्रायोग्यं अथवा बालदुर्बलग्लानादेशादीनां प्रायोग्यं बहुजनयोग्यं। एवंभूतक्षेत्राप्रत्युपेक्षणे दोषानाह-

भा. [४११६] खेत्ते असति असंगहिया ताहे वच्चंति ते उ अन्नत्थ।
न उ मइल्लेति निसेज्जा पीढफलगाण गहणंमि॥

वृ. बहुजनयोगस्य क्षेत्रस्य असति अभावे ते साधवोऽसंगृहीता भवन्ति ततस्तेऽन्यत्र गच्छान्तरे व्रजन्ति, तस्मादवश्यं बुहजनयोग्यं क्षेत्रं वर्षासु प्रत्युपेक्ष्ं, तथा पीठफलकादीनां ग्रहणे तु नैव मलिनयति न मलिनीभवन्ति निषद्याः संस्तारकादिरूपाः।

भा. [४११७] वियरे न तु वासासुं अन्नकाले उ गम्मते नत्थ।
पाणासीयलकुंथादिया ततो गहण वासासु॥

वृ. न चान्यत्संस्तारकादिवर्षासु साधूनां वितरति श्रावकजनस्तथा समाचार्यभावात् अथान्यत्र क्षेत्रान्तरे गम्यते यत्र न पानीयस्पन्दस्तत आह-अन्यत्र गम्यते काले ऋतुबद्धेन वर्षासु भूमेः शीतलायाः प्राणाःकुन्थ्वादयः संमूर्च्छिंन्ति ततो ग्रहणं वर्षासु पीठफलकानामेतेन आचीर्णे द्वे अपी वर्षास्विति व्याख्यात्। सम्प्रति काले य समाणए कालमित्यस्य व्याख्यानमाह-

भा. [४११८] जं जंमि होइ काले कायव्वं तं समाणए तंमि।
सज्झाया पह उवही उप्पायण भिक्खमादी य॥

वृ. यत् स्वाध्याय उपकरणस्य प्रत्युपेक्षा उपधिरुत्पादनं भिक्षादिकं च यस्मिन् काले कर्त्तव्यं तस्मिन् काले समानयति। एष तृतीयः संग्रहपरिज्ञाभेदः। चतुर्थमाह-

भा. [४११९] अह गुरु जेणं पव्वावितो उ जस्स व अहीति पासंमि।
अहवा अहागुरू खलु हवति रायनियतरागा उ॥

वृ. येन प्रव्रजितो यस्य वा पार्श्वेऽधीतः स यथा गुरुरथवा गुरवो नाम ये तस्य रत्नाधिकतरास्तेषां पूजनामाह-

भा. [४१२०] तेसिं अब्भुट्ठाणं दंडग्गह तह य होइ आहारे।
उवहि वहणं विस्सामणं य संपूयणा एसा॥

वृ. तेषां यथा गुरूणामेषा संपूजना आगच्छतामभ्युत्थानं दण्डस्य ग्रहणं तथा भवत्याहारे आहारस्य काले प्रायोग्यस्य सम्पादनमुपधिर्वहनं विश्रामणं च। उपसंहारमाह-

भा. [४१२१] एसा खलु बत्तीसा एयं जाणाति जो ट्ठितो वेत्थ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ववहारे अलमत्थो अहवावि भवे इमेहिं तु ॥

वृ. एषा अनन्तरोदिता खलु स्थानानां द्वात्रिंशत् एतेषां यो जानाति यो वाऽत्र स्थितः स व्यवहारे अलमर्थः । अथवा एषु षड्त्रिंशत्संख्येषु वक्ष्यमाणेषु स्थानेषु ज्ञाता स्थितो वा व्यवहार-समर्थो भवति । एतदेवान्वयव्यतिरेकत आह-

भा. [४१२२] छत्तीसाए ठ्ठाणेहिं जो होइ अपरिनिट्ठितो ।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

भा. [४१२३] छत्तीसाए ठ्ठाणेहिं जो होइ परिनिट्ठितो ।
अलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

भा. [४१२४] छत्तीसाए ठ्ठाणेहिं जो होइ अपतिट्ठितो ।
नलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

भा. [४१२५] छत्तीसाए ठ्ठाणेहिं जो होइ सुपतिट्ठितो ।
अलमत्थो तारिसो होइ ववहारं ववहरित्तए ॥

वृ. श्लोकचतुष्टयमपि प्राग्वत् । सम्प्रत्येनामेव षट्त्रिंशतमाह-

भा. [४१२६] जा भणिया बत्तीसा तं च्छोढूण विनयपडिवत्तिं ।
चउभेयं तो होही छत्तीसा एस ठ्ठाणाणं ॥

वृ. या पूर्वं स्थानानां द्वात्रिंशदुक्ता तस्यां चतुर्भेदां विनयप्रतिपत्तिं प्रक्षिप्यते, तत एषां स्थानानां षट्त्रिंशद्भवति ज्ञातव्या ।

भा. [४१२७] बत्तीसवण्णिय विय वोत्थं चउभेयविनयपडिवत्तिं ।
आयरियोऽतेवासिं जह विनयित्ता भवे निरिणो ॥

वृ. द्वात्रिंशत्प्राग् वर्णितैव ततः सम्प्रति वक्ष्यामि चतुर्भेदां विनयप्रतिपत्तिं । यथा-चार्योऽन्तेवासिनं विनयित्वा विनयं ग्राहयित्वा निरुणो भवति तामेव चतुर्भेदां विनयप्रतिपत्तिमाह-

भा. [४१२८] आयारे सुय विनए विक्खेवण चेव होइ बोधव्वे ।
दोसस्स निग्धाए विनए चउहेस पडिवत्ती ॥

वृ. आचारे विनयः श्रुतविनयः विक्षेपणे चैव विनयो भवति बोद्धव्यः । विक्षेपणाविनयः दोषनिर्धातविनयश्च । एषा चतुर्धा विनये प्रतिपत्तिस्तत्राचारविनयमाह-

भा. [४१२९] आयारे विनओ खलु चउव्विहो होइ आनुपुव्वीए ।
संजमसामाचारी तवे य गणविहरणा चेव ॥

भा. [४१३०] एगल्लविहारे या सामाचारी य एस चउभेया ।
एयासिं तु विभागं वुड्ढामि अहानुपुव्वीए ॥

वृ. आचारे आचारविषयः खलु विनयश्चतुर्विधो भवति अनुपूर्व्या परिपाट्या तद्यथा-संयम-सामाचारी, तपः सामाचारी, गणविहरणसामाचारी, एकलविहारसामाचारी । एवमेषा चतुर्भेदा सामाचारी । एतासां सामाचारीणां विभागं यथानुपूर्व्या वक्ष्यामि ।

भा. [४१३१] संयममायरति सयं परं व गाहेति संयमं नियमा ।
सीयंते उज्जयचरणं च उववूहे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. स्वयं संयममाचरति परं च नियमात् संयमं ग्राहयति। तथा संयमविषये सीदति स्थिरि-करणं उद्यतचरणं तु उपबृंहयति। एषा संयमसामाचारी। सम्प्रति संयममेव कथयति-

भा. [४१३२] सो सत्तरसो पुढवादियाण घट्ट परिताव उद्दवणं।
परिहरियव्वं नियमा संजमगो एस बोधव्वो॥

वृ. स संयमः सप्तदशः सप्तदशप्रकारो विस्तरतः। संक्षेपतः पुनः पृथिव्यादीनां षण्णां कायानां घट्टनं परितापनमपद्रावणं न नियमात्परिहर्तव्यमित्येष संयमो बोद्धव्यः। संयमक इति प्राकृतत्वास्त्वार्थो कप्रत्ययः उक्ता संयमसामाचारी। तपःसामाचारीमाह-

भा. [४१३३] पक्खियपोसहिएसुं कारयति तवं सयं करोति य।
भिक्खायरियाए तहा निजुंजति परं सयं वावो॥

वृ. पाक्षिकेऽर्धमासपर्वणि पौषधिकेषु च अष्टम्यादिषु पर्वसु परं तपः कारयति स्वयमपि च करोति। तथा भिक्षाचर्यायां परं नियुंक्ते प्रयोजनामपेक्ष्य स्वयमपि भिक्षाचर्यां गच्छति-

भा. [४१३४] सव्वंमि बारसविहे निउंजइ परं सयं च उज्जुत्तो।
गणसामायारीए गणं विसीयं तु चोएति॥

वृ. सर्वास्मिन् द्वादशविधे तपसि यथायोगं परं नियुंक्ते, स्वयं च सर्वत्र यथाशक्ति उद्यु-क्तः। एषा तपःसामाचारी। गणसामाचार्यां गणं विपीदन्तं चोदयन्ति कथमित्याह-

भा. [४१३५] पडिलेहण पप्फोडण बालगिलाणाइ वेयव्वइ चेव।
सीदंतं गाहेई सयं च उज्जुत्तो एएसु॥

वृ. प्रत्युपेक्षणं चक्षुषा निरीक्षणं प्रस्फोटनमाखोटादिकमेतयोर्बालग्लनादिवैयावृत्त्ये च सीदन्तं प्रत्युपेक्षणादि ग्राहयति कारयति। स्वयं च एतेषु स्थानेषु सततमुद्युक्त उक्ता गणसामाचारी, साम्प्रतमेककविहारसामाचारीमाह-

भा. [४१३६] एगल्लविहारादी पडिमा पडिवज्जती सयण्णं व।
पडिवज्जावे एवं अप्पाण परं च विनएती॥

वृ. एककविहारदय आदिशब्दात्प्रतिमागतविशेषानुष्ठानपरिग्रहः। एवं भूताः प्रतिमाः स्वयं प्रतिपद्यन्ते अन्यं च प्रतिपादयति। एवं आचारविनयमात्मानं परं च विनयति, गत आचार-विनयः। सम्प्रति श्रुतविनयमाह-

भा. [४१३७] सुत्तं अत्थं च तहा हिय निस्सेयं तहा पवाएइ।
एसो चउव्विहो खलु सुयणिओ होइ नायव्वो॥

वृ. सूत्रं प्रवाचयति तथा अर्थमपि हितं यत् यस्योचितं तत्तं प्रवाचयन्ति नेतरत्। तथा निःशेषं परिपूर्णमेष चतुर्विधः खलु श्रुतविनयो भवति ज्ञातव्यः। एतमेव व्याचष्टे-

भा. [४१३८] सुत्तं गाहेइ उज्जुत्ते अत्थं च सुणावए पयत्तेण।
जं जस्स होइ जोग्गं परिणामगमाइणं तु हियं॥

भा. [४१३९] निस्सेसमपरिसेसं जाव समत्तं तु ताव वाएइ।
एसो सुयविण्णतो खलु वोच्छ विक्खेवणाविनयं॥

वृ. उद्युक्तः सन् शिष्यं सूत्रं ग्राहयति। एष सूत्रग्राहणविनयः तथा प्रयत्नेन शिष्यमर्थं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रावयति एषोऽर्थश्रावणविनयः परिणामकादीनां यत् यत् यस्य भवति योग्यं तत्तु तस्य हितं सूत्रतोऽर्थतश्च ददाति। एष हितप्रदानविनयः। तथा निःशेष किमुक्तं भवति यावत्समाप्तं भवति तावद्वाचयति। एष निःशेषवाचनाविनयः। उपसंहारमाह-एष चतुर्विधः खलु श्रुतविनयोऽत ऊर्ध्वं विक्षेपणाविनयं वक्ष्ये। प्रतिज्ञा करोति।

भा. [४१४०] अदिट्ठं दिट्ठं खलु दिट्ठं साहम्मियत्तविनएणं।
चुयधम्म ट्ठावे तस्से व हियट्ठमब्भुट्ठे ॥

वृ. अदृष्टं अदृष्टधर्माणं दृष्टमिव दृष्टपूर्वमिव धर्मं ग्राहयति। दृष्टं दृष्टपूर्वकं श्रावकं साधर्मिकत्वविनयेन विनयति प्रव्राजयतीत्यर्थः। तथा च्युतधर्मं धर्मात्प्रभ्रष्टं पुनर्धर्मे स्थापयति। तथा तस्यैव चारित्रधर्मस्य वृद्धये हितमभ्युतिष्ठति ४। तत्र प्रथमभेदव्याख्यानार्थमाह-

भा. [४१४१] विन्नाण भावंमी खिवि पेरणे विक्खत्तु परसमया।
ससमयं तेणमभिच्छुभे अदिट्ठधम्मं तु दिट्ठंवा ॥

वृ. विशब्दो नानाभावे क्षिपप्रेरणे परसमयाद्विनिक्षिप्य नानाप्रकारं प्रेर्यादृष्टधर्माणं दृष्टं वेति वाशब्द उपमायां। दृष्टधर्माणमिव स्वसमयान्तेन स्वसमयाभिमुखभिक्षिपति। एनमेव चरमपदं-

भा. [४१४२] धम्मसभावो सम्मं दंसणं तु जेण पुव्वि न उ लद्धं।
सो होइ दिट्ठपुव्वो तं गाहेई पुव्वदिट्ठंमि व ॥

वृ. धर्मस्वभावः सम्यग् दर्शनमित्येकार्थं तत्सम्यग् दर्शनं येन पूर्वं न लब्धं स भवत्यदृष्टपूर्वोऽदृष्टपूर्वधर्मस्तं पूर्वदृष्टमिवाविविक्तो विश्रान्ततया पूर्वोपलब्धमिव धर्मं ग्राहयति। अदृष्टं दृष्टमित्यस्यान्यथा व्याख्यानमाह।

भा. [४१४३] जह भायरं च पियरं वा मिच्छादिट्ठंपि गाहिसम्मत्तं।
दिट्ठपुव्वो सावग साहम्मि करेति पव्वावे ॥

वृ. अदृष्टं अदृष्टं पूर्वदृष्टमिव धर्मं ग्राहयति। किमुक्तं भवति ? यथा भ्रातरं पितरं वा सम्यक्त्वं ग्राहयति एवमदृष्टपूर्वं मिथ्यादृष्टमपि सम्यक्त्वं ग्राहयति-दिट्ठसाहम्मियत्ति विनएण इत्यस्य व्याख्यानमाह-दृष्टो नाम दृष्टपूर्वः। स च श्रावकस्तं साधर्मिकत्वविनयेन शिष्ययति साधर्मिकं करोति प्रव्राजयतीत्यर्थः। चुयधम्मधम्मे ठावए इत्यस्य व्याख्यानमाह-

भा. [४१४४] चुयधम्मो चरित्तधम्मातो दंसणातो वा।
तं ट्ठावेइ तहिं चिय पुणो वि धम्मे जहोदिट्ठो ॥

वृ. च्युतधर्मो नाम भ्रष्टधर्मः। धर्माद्भ्रष्टो भ्रष्टधर्मः। राजदन्तादिदर्शनात् धर्मशब्दस्य परिनिपातः। कस्मात् च्युत इत्याह-चारित्रधर्मात् दर्शनाद्वा तं च्युतधर्माणं तत्रैव चारित्रधर्मे सम्यग् दर्शने वा यथोचिते पुनः स्थापयति। एष तृतीयभेदश्चतुर्थभेदमाह-

भा. [४१४५] तस्सत्ती तस्सेव उ चरित्तधम्मस्स वुड्ढिहेतुं तु।
वारेयणेसणादी न य गिण्हे सयं हियट्ठाए ॥

वृ. तस्सेव हियट्ठमब्भुट्ठे इति तस्येति तस्यैव चारित्रधर्मस्य वृद्धिहेतोरनेषणादि वारयति। हितार्थमभ्युत्तिष्ठतीति हितार्थाय न च स्वयमनेषादि गृह्णाति हितार्थयित्युपलक्षणं तेन हिताय सुखाय क्षेमाय निःश्रेयसाय आनुगामिकोऽभ्युत्तिष्ठतीति द्रष्टव्यं। ततो हितादिपदानां व्याख्यानम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४१४६] जं इह परलोगे वा हितं सुहं तं खमं मुणेयव्वं ।
निस्सेयस मोक्खाय उ अनुगच्छते जं तु ॥

वृ. यत् यस्मात्कारणात् तदभ्युत्थानमिह लोके वा हितं तेन हितमित्युच्यते । सुखं इह परलोके सुखकरणात् । क्षेममैहिकपारत्रिकप्रयोजनक्षमत्वात् । निःश्रेयसं कल्याणकारिकत्वात् । अनुगामि यन्मोक्षाय अनुगच्छति सम्प्रति दोषनिर्घातविनयमभिधित्सुः प्रथमतो दोषनिर्घातशब्दार्थमाह–

भा. [४१४७] दोसा कसायमादी बंधो अहवा वि अट्ठपयडीतो ।
निययं व निच्छियं बाधातो विनासो य एगट्ठा ॥

वृ. दोषाः क्रोधादयः । अथवा बन्धोऽष्टप्रकारो यदि वा पूर्ववद्वा अष्टौ कर्मप्रकृतयो दोषास्तेषां नियतं निश्चितं व्याघातो विनाश इत्येकार्थं दोषनिर्घातः । साम्प्रतमस्य भेदानाह–

भा. [४१४८] कद्धस्स कोहविनयण दुट्ठस्स य दोसविनयणं जं तु ।
कंखिय कंखाच्छेदो आयप्पणिहाण चउहेसो ॥

वृ. क्रुद्धस्य क्रोधविनयनं, दुष्टस्य यत् दोषविनयनं कांक्षिते कांक्षाच्छेदः । तथा आत्मप्रणिधानमित्येष दोषनिर्घातश्चतुर्धा । तत्र प्रथमं भेदमाह–

भा. [४१४९] सीयघरम्मिव दाहं वंजुलरुक्खो व जह उ उरगविसं ।
कुद्धस्स तहा कोहं पविनेती उवसमेतित्ति ॥

वृ. शीतगृहमिव जलयन्त्रगृहमिव दाहं तथा वञ्जुलवृक्ष उरगविषयं प्रविनयति यथा क्रुद्धस्य क्रोधं प्रविनयति किमुक्तं भवति ? उपशमयति–

भा. [४१५०] दुट्ठो कसायविसए हि मानमाया सभाव दुट्ठो वा ।
तस्स पविनेइ दोसं नासयए धंसए वत्ति ॥

वृ. कषायैर्विषयैर्यादि वा मानमायाभ्यामथवा स्वभावेन दुष्टस्तस्य दोषं प्रविनयति । अस्यैवार्थमाह–नाशयति ध्वंसते इति तृतीये भेदव्याख्यानार्थमाह–

भा. [४१५१] कंखा उ भत्तपाने परसमए अहव संखडीमादी ।
तस्स पवयणेइ कंखं संखडि अन्नापएसेणं ॥

वृ. यस्य भक्तपाने कांक्षा परसमये वा । अथवा संख्यादौ तस्य कांक्षा प्रविनयति स्फेटयति । संखड्यां संखडी कांक्षामन्यापदेशेनापनयति चतुर्थमात्मप्रणिधानरूपं भेदमाह–

भा. [४१५२] जो एएसु न वट्टइ कोहे दोसे तहेव कंखाए ।
सो होइ सुप्पणिहितो सोहणपरिहाणजुत्तो वा ॥

वृ. एतेषु क्रोधे दोषे तथा कांक्षायां न वर्त्तते स भवति सुप्रणिहित आत्मप्रणिधानवान् । उपसंहारमाह–

भा. [४१५३] छत्तीसेयाणि ट्ठाणाणि भणियाणनुपुव्वसो ।
जो कुसलो एएहिं ववहारी सो समक्खातो ॥

वृ. एतान्यन्तरोदितानी स्थानानि षट्त्रिंशदानुपूर्व्या क्रमशः क्रमेण भणितानि यस्तेषु कुशलः स व्यवहारी आगमव्यवहारी समाख्यातः पुनरपि यादृशा आगमव्यवहारिणस्तादृशानाह–

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४१५४] अट्ठहिं अट्ठारसहिं व दसहिं य ठ्ठाणेहिं जे अपरोक्खा।
आलोयण दोसेहिं छहियं ठ्ठाणेहिं जे अपरोक्खा॥

भा. [४१५५] आलोयणठाणेहि छहियं ठाणेहिं जे अपरोक्खा।
पंचहि नियंठेहि पंचहि य चरित्तमंतेहि॥

वृ. अष्टसु आचारवत्तत्वप्रभृतिपु स्थानेषु अष्टादशसु व्रतषट्कप्रमुखेषु दशसु च प्रायश्चित्त-स्थानेषु ये अपरोक्षाः प्रत्यक्षज्ञानिनः तथा दशसु आलोचनादोषेषु वा ये अपरोक्षविज्ञानाः प्रत्यक्ष-विज्ञानिनः। तथा दशस्वालोचनागुणेपु षट्सु च स्थानेषु अनन्तरभाविपु ये अपरोक्षाः साक्षात् ज्ञानिनस्तथा पञ्चसु पुलकादिपु निर्ग्रन्थेषु पञ्चसु चारित्रवत्सु सामायिकादिसयमवस्तु ये प्रत्यक्ष-ज्ञानिनस्ते आगमव्यवहारिणः। एतदेव गाथाद्वयं व्याचिख्यासुराह-

भा. [४१५६] अट्ठाया खमादी वयछक्कादी एवइ अट्ठरसा।
दसविह पायच्छित्ते आलोयण दोसदसहिं वा॥

वृ. अष्टौ स्थानानि आचारवत्यादीनि तानि च प्रागभिहितानी वालोचनार्हत्वनिबन्धनानि। तथा चोक्तं स्थानाङ्गे-अट्ठहिं ठ्ठाणेहिं जाति संपन्ने भवति तो आलोयणारिहो तं जहा आयारव-मित्यादि। अष्टादशस्थानादिव्रतषट्कादीनि भवन्ति पुनरष्टादशग्रहणमेतेषु अपराधास्तेषु प्रायश्चित्तविधिपरिज्ञानप्रतिपत्त्यर्थं दशस्थानानि दशविधिमालोयणपडिक्कमणेत्यादिरूपं प्राय-श्चित्तं आलोचनादोषेषु दशसु अकम्पयिता इत्यादिरूपेषु तथा-

भा. [४१५७] छहिं काएहिं वएहि व गुणेहिं आलोयणाए दसहिं च।
छट्ठाणावडिएहिं छहि चेव उ जे अपरोक्खा॥

वृ. षट्स्विति कायेषु व्रतेषु वा तथा आलोचनायाः सम्बन्धिषु गुणेषु दशसु जातिसम्पन्न-प्रभृतिषु। उक्तं च स्थानाङ्गे-दसहिं ठ्ठाणेहिं संपन्ने अरिहइ अन्नदोसमालोइत्तए। तं जहा-जातिसम्पन्ने कुलसम्पन्ने इत्यादि तथा षट्सु स्थानेष्विति षट्स्थानपतितेषु स्थानेषु ये अपरोक्षाः साक्षाद्वेदितारः कियन्ति षट्स्थानपतितानि स्थानानीत्यत आह-

भा. [४१५८] संखादीआ ठ्ठाणा छहिं ठ्ठाणेहिं पडियाण ठ्ठाणाण।
जे संजया सरागा सेसा एक्कंमि ठ्ठाणंमि॥

वृ. षट्सु स्थानेष्वनन्तभागवृद्धा असंख्यातभागवृद्धा संख्यातभागवृद्धा संख्यातगुणवृद्धाऽ-संख्यातगुणवृद्धानन्तगुणवृद्धेषु यानि पतितानि स्थानानि तेषां सम्बन्धिनो ये सरागाः संयतास्ते वेदितव्याः। षट्स्थानपतितेषु सरागसंयता वर्तन्ते इति भावः। तेषां च तानि षट्स्थानपतितानि स्थानानि संयमस्थानानि संख्यातीतानि असंख्येयलोकाकाशप्रदेशप्रमाणानि अत एव सरागसंयतानां केषाञ्चिद्वर्द्धते केषाञ्चित् हीयते केषाञ्चित् वर्धते हीयते च। ये तु शेषवीतराग-संयतास्ते एकस्मिन् स्थाने हि तथाहि न तेषां चारित्रं वर्धते नापि हानिमुपगच्छति। कषायाणाम-भावात्, किन्त्ववस्थितमेकमेव परमप्रकार्षप्राप्तं संयमस्थानमिति एतेषां वस्तूनां ये साक्षाद्वेदि-तारस्ते आगमव्यवहारिणस्तथा चाह-

भा. [४१५९] ए आगम ववहारी पन्नंता रागदोस नीहूया।
आणाए जिणिंदाणं जे ववहारं ववहरंति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. रागद्वेषनिभृता रागद्वेषाव्यापाररहिता आगमव्यवहारिणः प्रज्ञप्ता ये जिनेन्द्राणामाज्ञया व्यवहारं व्यवहरन्ति ।

भा. [४१६०] एवं भणिते भणती ते वोच्छिन्ना उपसंपयं इहइं ।
तेसु य वोच्छिन्नेसु नत्थि विसुद्धी चरित्तस्स ॥

भा. [४१६१] देंतावि न दीसंती न विकरेंता उपसंपयं केई ।
तित्थं च नाण दंसण निज्जवगा चेव वोच्छिन्ना ॥

वृ. एवं प्रागुक्तेन प्रकारेण भणिते चोदको भणति व्यवच्छिन्ना खल्विह भरतक्षेत्रे साम्प्रतमागव्यवहारिणस्तेषु च व्यवच्छिन्नेषु चारित्रस्य विशुद्धिर्नास्ति सम्यक् परिज्ञानभावतो यथावस्थितशुद्धिदायकाभावात् । अन्यच्च मासिकं पाक्षिकमित्यादि प्रायश्चित्तं ददतोऽपि न केचित् दृश्यन्ते नापि केचित्तथा रूपं प्रायश्चित्तं कुर्वन्तस्ततो ददतां कुर्वतां वा भावे सम्प्रति तीर्थं ज्ञानदर्शनं ज्ञानदर्शनात्मकमनुवर्तते नानुचारित्रात्मकं यतश्चारित्रस्य पर्यन्तसमये निर्यापका एव यथावस्थितशोधिप्रदानत उत्तरोत्तरचारित्रनिर्वाहका एव व्यवच्छिन्नाः । सम्प्रत्येतदेव विभावयिषुः प्रथमतश्चारित्रस्यशुद्धिर्नास्तीति भावयति-

भा. [४१६२] चोद्दसपुधव्वराणं वोच्छेदो केवलीण वुच्छेए ।
केसिं वी आदेसो पायच्छित्तं पि वोच्छिन्नं ॥

वृ. केवलिनां व्यवच्छेदे सति तदनन्तरं स्तोकेन काले चतुर्दशपूर्वधराणामपि व्यवच्छेदो भवति । ततः शोधिदायकाभावान्नास्ति शुद्धिश्चारित्रस्य, अन्यच्च केषांचिदमयादेशो यथा प्रायश्चित्तमपि व्यवच्छिन्नं । एतदेव भावयति -

भा. [४१६३] जं जत्तिएण सुज्झइ पावें तस्स तहा देंति पच्छित्तं ।
जिन चोद्दसपुव्वधरा तव्विवरीया जहिच्छाए ॥

वृ. जिनाः केवलिप्रभृतयश्चतुर्दशपूर्वधरा यत्पापं यस्य यावता प्रायश्चित्तेन शुद्धयति तस्य तावन्मात्रं प्रायश्चित्तं ददति ये तु तद्विपरीताः कल्पव्यवहारनिशीथधरास्ते आगमव्यवहाराभावात् यदृच्छया प्रायश्चित्तं दद्युः । कदाचिन्नयुनं कदाचिदधिकं वा ततः परमार्थतः सम्प्रति प्रायश्चित्तं व्यवच्छिन्नं तद्वयवच्छेदान्निर्यापका अपि चारित्रस्य व्यवच्छिन्ना एतदेव स्पष्टयति-(भावयति)

भा. [४१६४] पारगमपारगं वा जाणंते जस्स जं च करणिज्जं ।
देइ तहा पच्चक्खी धुणक्खरसमो उ पारोक्खी ॥

वृ. एष संवरीतुकामः पारगामी भविष्यति । एष नेति । पारगमपारगं वा प्रत्यक्षागमव्यवहारिणः सम्यग् जानते यश्च यस्य करणीयं कर्तुं शक्यं तस्य तत् ज्ञात्वा तथा ददति तथा ते पारापारगादिज्ञानं समस्थितास्ततस्तादृशमुपायमुपदिशन्ति येन स पारगामी भवति । यथा चाराधक उपजायते यस्तु परोक्षी परोक्षज्ञानी स धृणाक्षरसमः किमुक्तं भवति धुणाक्षरवत् । यदृच्छया ततः कदाचित्त पापशुद्धिर्नावश्यमिति । अन्यच्च तस्य परोक्षज्ञानिनः प्रायश्चित्तं ददतो महत्प्रायश्चित्तं पापं तथा चाह-

भा. [४१६५] जायऊणाहिएदाने वुत्ता मग्गविराधना ।
न सुज्झेइ वि देंतो उ असुद्धो कं च सोहए ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. स हि परोक्षज्ञानी यदृच्छया व्यवहरन् कदाचिदूनमधिकं वा प्रायश्चित्तं दद्यात् ततो वा ऊनाधिके प्रायश्चित्ते दाने मार्गविराधना मोक्षपथसम्यग्दर्शनज्ञानचारित्रविराधना जिनैरुक्ता तया स दाता न शुद्धयति। स्वयमशुद्धश्च कथमन्यं शोधयेदिति भावः अथ सोऽपि सूत्रबलेन प्रायश्चित्तं ददाति तत्कथं शोधयेदिति भावः तदप्यसम्यक् सूत्रार्थस्थाप्यपरिज्ञानात् तथा चाह-

भा. [४१६६] अत्थ पडुच्चसुत्तं अनागयं तं तु किंचिआमुसति।
अत्थोवि कोइसुत्तं अनागयं चेव आमुसति॥

वृ. अर्थं प्रतीत्य किंचित्सूत्रमनागतमेव भवति, किंचित्पुनः सूत्रं स्वस्थानगतं वा अर्थमामृशति, विचित्रासूत्रस्य वृत्तिरिति वचनात् अर्थोपि कश्चित् सूत्रमनागतं वामृशति, एतच्च सम्यग् जानति चतुर्दशपूर्वधराः गतान्ये ततः संप्रति सूत्रार्थस्थाप्यज्ञानात् न प्रायश्चितदानशुद्धिस्तद-भावाच्चानिर्यापकाणामप्यसिद्धिः संप्रति देता वि न दीसंति इत्यादि व्याख्यार्थमाह-

भा. [४१६७] देंतावि न दीसंती मास चउमासिया उ सोहीतो।
कुणमाणे य विसोहिं न पासिमो संपइ केइं॥

वृ. मासिकीं चातुर्मासिकीं उपलक्षणमेतत्। पञ्चमासिक्यादिमपि वा शोधिं सम्प्रति केचित् ददतोऽपि न दृश्यते। नापि काश्चित् तां मासिकीं चातुर्मासिकीं वा कुर्वाणान् संप्रति पश्यामः।

भा. [४१६८] सोहीए य अभावे देंताण य करेंतगाण अभावे।
वट्टइ संपइ काले तित्थं सम्मत्तनाणेहिं॥

वृ. उक्तप्रकारेण शोधेरभावे शोधिं ददता कुर्वतां वा अभावे सम्प्रति काले तीर्थं वर्तते सम्यक्त्वज्ञानाभ्यां।

भा. [४१६९] एवं तु चोइयम्मी आयरितो भणइ न हु तुमे नायं।
पच्छित्तं कहियंतू किं धरती किं व वोच्छिन्नं॥

वृ. इदमुक्तेन प्रकारेण चोदिते प्रश्ने कृते सति आचार्यो ब्रूते नहु नैव त्वया ज्ञातं तथा प्रायश्चित्तं प्रथमतः कोक्तं वा संप्रति प्रायश्चित्तस्य धरते विद्यते किं वा व्यवच्छिन्नं तत्र प्रथमतो यत्र प्रायश्चित्तमभिहितं तदभिधित्सुराह-

भा. [४१७०] सव्वं पि य पच्छित्तं पच्चक्खाणस्स ततिय वत्थुंमि।
तत्तो वि य निच्छूढा पकप्पकप्पो य ववहारो॥

वृ. सर्वमपि प्रायश्चित्तं नवमस्य प्रत्याख्यानाभिधस्य पूर्वस्य तृतीये वस्तूनि तत एव च निर्व्यूढं दृष्टं प्रकल्पो निशीथाध्ययनं, कल्पो व्यवहारश्च। सम्प्रति किं धरती किं च वोच्छिन्न-मित्यस्य व्याख्यानार्थमाह-

भा. [४१७१] सपयरूवण अनुसज्जणा य दसचोद्दस अट्ठ दुप्पसेह।
अत्थि न दीसइ धणिएण विना तित्थं च निज्जवए॥

वृ. स्वपदं नाम निजं स्थानं तच्च प्रज्ञापकस्य प्रायश्चित्तं तथा हि चारित्रस्य प्रवर्तकः प्रज्ञापक उच्यते। प्रज्ञापनां चातीवाप्रायश्चित्तदान इति स्वपदं प्रज्ञापकस्य प्रायश्चित्तं तस्य प्ररूपणा कर्तव्या। तथा यावच्चतुर्दशपूर्विणः तावद्दशानांमपि प्रायश्चित्तानामनुपजना अष्टा-नामन्तिमविकल्पानां यावत् दुःप्रसभ आचार्यस्तावदनुपंजना यदप्युच्यते ददतः कुर्वाणा वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शोधिं न दृश्यते केचनेति तदप्युक्तं यत आह-अत्थिति संति तेपि केचन न दृश्यंते उपायेन वहनात्। अत्र च विनेति दृष्टान्तो धनिकेन वक्तव्यः। तथा तीर्थं च चारित्रसहितमनुवर्तते यदप्युक्तं निर्यामको नास्तीति तदप्ययुक्तं यत आह-निज्जवएंति निर्यापकोऽस्ति। एष-द्वारगाथासंक्षेपार्थः। साम्प्रतमेनामेव विवरीषुः सपय परूवणेत्यस्य व्याख्यानमाह-

भा. [४१७२] पन्नवगस्स उ सपयं पच्छित्तं चोयगस्स तमनिट्टं।
तं संपयं पि वज्जइ जहा तहा मे निसामेहि॥

वृ. प्रज्ञापकस्य स्वपदं प्रायश्चित्तमेतत् प्रागेव भावितं। तच्चोदकस्यानिष्टं नास्तीति मा रूढं तथा युक्तं यतः साम्प्रतमपि तद्विद्यते यथावद्विद्यते तथा कथ्यमानं निशामय-

भा. [४१७३] पासाय सउ निम्मं लिहाविहं चित्तकारागेहि जहा।
लीलाविहूणं नवरं आगारो होइ सा चेव॥

वृ. चक्रवर्तिनो वर्धकिरत्नेन प्रासादो निर्मापितस्तमन्ये राजानो दृष्ट्वा आत्मीयन् वर्धकीनादिशन्ति यथा चक्रवर्तिनः प्रासाद ईदृशान् अस्माकं प्रासादान् कुरुत ते च ब्रुवते देव स तादृशः प्रासादोऽस्मार्भिन दृष्टस्ततः कप्यालेख्य दर्शयन्तु येन तं दृष्ट्वा तदनुरूपान् प्रासादान्निर्मापयामस्ततस्तै राजभिश्चक्रवर्तिनगरे प्रविष्टैः स्वकीयैश्चित्रकारैः प्रासादस्य निर्मापणां फलकेषु लिखापीतं निजनिजप्रधानवर्धकीनां समर्पितं तैरपि तदनुरूपाः प्रासादा निर्मापिताः परं यादृशी लीला चक्रवर्ती प्रासादस्य न तादृशी तेषां तथा चाह तेषां प्राकृतवर्धकिनिष्पादितानां प्रासादानां निर्मापणं, नवरं लीलाविहीनं जातमाकारः, पुनर्भवति स एव यादृशश्चक्रवर्तिप्रासादसस्यय एतदेव किंचिद्भावयति।

भा. [४१७४] भुंजइ चक्की भोए पासए सिप्पि रयणनिम्मविए।
किं च न कारेइ तहा पासाए पगय जनोवि॥

वृ. चक्री चक्रवर्ती शिल्पिरत्ननिर्मापिते वर्धकिरत्ननिष्पादिते प्रासादे स्थितः सन् भोगान् भुंक्ते, तं च तथा दृष्ट्वा किं प्राकृतजनोऽपी प्राकृतराजलोकोऽपि तथा प्रासादान् न कारयति कारयत्येवेति भावः, परं न तादृशस्तेषां रूपविशेषः ततः किमित्याह-

भा. [४१७५] जह रूवादिविसेसा परिहीना होंति पागयजनस्स।
न च तेन होंति गेहा एमेव इमंपि पासामो॥

वृ. यथा प्राकृतजनस्य प्राकृतवर्धकिलोस्य तथारूपः सम्यक् परिज्ञानाभावतो रूपादिविशेषाः कर्तव्यतया परिहीनाः प्रासादानां भवन्ति, न च ते न भवन्ति गेहाः प्रासादा एवमिदमपि प्रायश्चित्तं पश्यामः। एतदेव भावयति-

भा. [४१७६] एमेवय पारोक्खी तयानुरूवं तु सो वि ववहरति।
किं पुण ववहरियव्वं पायबित्तं इमं दसहा॥

वृ. एवमेव वर्धिकी दृष्टान्तगतेन प्रकारेण तदनुरूपं प्रत्यक्षागमव्यवहारानुरूपं परोक्षी परोक्षज्ञानी व्यवहारति किं पुनर्व्यवहर्तव्यसूच्यते इदं वक्ष्यमाणं दशधा दशप्रकारं प्रायश्चित्तं। तदेवाह-

भा. [४१७७] आलोयण पडिक्कमणे मीस विवगे तहा वि उस्सग्गो।
तवच्छेयमूल अनवट्ठिया य पारंचिए चेव॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. आलोचनां प्रायश्चित्तं प्रतिक्रमणं मिथ्यादुष्कृतप्रदानलक्षणं मिश्रमालोचनाप्रतिक्रमणात्मकं विवेकः परिष्ठापनं व्युत्सर्गः तपश्चतुर्थादिषण्मासपर्यन्तं। च्छेदप्रव्रज्यापर्यायस्य दिनैर्मासैर्वा परिहानिः। मूलं पुनर्व्रतारोपणं। अनवस्थाप्यं पारञ्चितं च अमीषां च दशानां स्वरूपं प्रपञ्चतः पीठिकायामुक्तं कल्पाध्ययने वा। ततस्तस्मादवधार्य तदेवं सपयपरूवणेति गतमधुना अनुसज्जणा य दस चोद्दस अट्ठदुप्पसेह इत्यस्य व्याख्यानमाह-

भा. [४१७८] दस जा अनुसज्जंती चोद्दसपुव्वीए पढमसंघयणं।
तेण परेण द्गुविहं जातित्थं ताव बोधव्वं॥

वृ. यावत्प्रथमं संहननं चतुर्दशपूर्वी च तावद्दशप्रायश्चित्तानि अनुपजन्तिस्य। एतौ च प्रथमसंहननचतुर्दशपूर्विणौ समकं व्यवच्छिन्नौ तयोश्च व्यवच्छिन्नयोरनवस्थाप्यं पाराञ्चितं च व्यवच्छिन्नं। ततः परेणानवस्थाप्यपाराञ्चितव्यवच्छेदादर्वाक् अष्टविधप्रायश्चित्तं तावदनुपजतु अनुवर्तमानं बोद्धव्यम्। यावतीर्थं तीर्थव्यवच्छेदकाले च दुःप्रसभो नाम सूरिर्भविष्यति तस्मिन् कालगते तीर्थं चारित्रं च व्यवच्छे दयति। यदप्युक्तं देंता वि न दीसन्ति इत्यादि तत्राह-

भा. [४१७९] दोसु उ वोच्छिन्नेसु अट्ठविहं देंतया करेंतु य।
न वि केई दीसंति वयमाणे भारिया चउरो॥

वृ. द्वयोरनवस्थाप्यपाराञ्चितयोरथवा प्रथमं संहननचतुर्दशपूर्विणो व्यवच्छिन्नयोरष्टविधं प्रायश्चित्तं ददतः कुर्वतौ वा केचित् न दृश्यन्ते इति वदति परस्मिन् प्रायश्चित्तं चत्वारो भारिता गुरुगासाः।

भा. [४१८०] दोसु वि वोच्छिन्नेसु अट्ठविहं देंतया करेंता य।
पच्चक्खं दीसंते जहा तहा मे निसामेहि॥

वृ. द्वयोरन्तिमयोः प्रायश्चित्तोः प्रथमसंहननचतुर्दशपूर्विणोर्वा व्यवच्छिन्नयोरष्टविधं प्रायश्चित्तं ददतः कुर्वतश्च प्रत्यक्षं दृश्यन्ते यथा तथा मम कथयतो निशामय-

भा. [४१८१] पंचेव य निग्गंथा खलु पुलाग बकुसा कुसील निग्गंथा।
तह य सिणाया तेसिं पच्छित्त जहक्कमं वोच्छं॥

वृ. पंचैव खलु निर्ग्रन्था भवन्ति तद्यथा-पुलाको बकुशः कुशीलः निर्ग्रन्थः स्नातकश्च। एतेषां च स्वरूपं व्याख्या प्रज्ञप्तेरवसेयं। एतेषां प्रायश्चित्त यथाक्रमं वक्ष्ये प्रतिज्ञां पूरयति-

भा. [४१८२] आलोयण पडिक्कमणे मीसविवेगे तहेव विउस्सग्गे।
एए छ पच्छित्ता पुलागनियंठुस्स बोधव्वा॥

वृ. आलोचना २ प्रतिक्रमणं २ मिश्रं ३ विवेकः ४ तपः ५ व्युत्सर्ग ६ एतानि षट् प्रायश्चित्तानि पुलाकनिर्ग्रन्थस्य बोधव्यानि।

भा. [४१८३] बउसपडिसेवगाणं पायच्छित्ता हवंति सव्वेवि।
थेराण भवे कप्पे जिनकप्पे अट्ठहा होति॥

वृ. सेवकयोर्बकुशस्य प्रतिसेवनाकुशीलस्य च सर्वाण्यपि प्रायश्चित्तानि भवन्ति। तौ च बकुशप्रतिसेवनाकुशीलौ स्थविराणां कल्पभवतो जिनकल्प उपलक्षणमेतत्। यथालन्दकल्पै च तयोः प्रायश्चीत्तमष्टधा भवति अनवस्थाप्यपाराञ्चितयोरभावात्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४१८४] आलोयणा विवेगो य नियंठुस्स दुवे भवे।
विवेगो य सिणायस्स एमेया पडिवत्तितो ॥

वृ. आलोचनाप्रायश्चित्तं विवेकप्रायश्चित्तमित्येते द्वे प्रायश्चित्ते निर्ग्रन्थस्य भवतः। स्नातकस्य केवल एको विवेकः एवमेताः पुलाकादिषु प्रतिपत्तयः।

भा. [४१८५] पंचेव संजया खलु नायसुणए कहिया जिनवरेणं।
तेसिं पायच्छित्तं अहक्कमं कित्तइसामि ॥

वृ. ज्ञातसुतेन जिनवरेण वर्धमानस्वामिना पञ्चैव खलु संयताः कथितास्तेषां यथाक्रमं प्रायश्चित्तं कीर्त्तयिष्यामि। तदेव कीर्तयति-

भा. [४१८६] सामाइसंजयाणं पायच्छित्ता च्छेदमूलरहियट्ठा।
थेराण जिणाणं पुण तवमंतं छव्विहं होइ ॥

वृ. सामायिकसंयतानां स्थविराणां स्थविरकल्पिकानां च्छेदमूलरहितानि शेषाण्यष्टौ प्रायश्चित्तानि भवन्ति, जिनानां जिनकल्पिकानां पुनः सामायिकसंयतानां तपः पर्यन्तं षड्विधं प्रायश्चित्तं भवति ॥

भा. [४१८७] छेदोवट्ठावणिए पायच्छित्ता हवंति सव्वेवि।
थेराण जिणाण पुण मूलत अट्ठहा होइ ॥

वृ. छेदोपस्थापनीये संयमे वर्त्तमानानां स्थविराणां सर्वाण्यपि प्रायश्चित्तानि भवंति, जिन-कल्पिकानां पुनर्मूलपर्यन्तमष्टधा भवति,

भा. [४१८८] परिहारविसुद्धीए मूलं ता अट्ठाति पच्छिता।
थेराणं जिणाणं पुण छव्विहं छेयादिवज्जं वा ॥

वृ. परिहारविशुद्धके संयमे वर्तमानानां स्थविराणां मूलान्तान्यष्टौ प्रायश्चित्तानि भवन्ति, जिनानां पुनः च्छेदादिवर्ज्यं षड्विधं।

भा. [४१८९] आलोयणा विवेगो य तइयं तु न विज्जती।
सुहुमे य संपराए अहक्खाए तहेव य ॥

वृ. सूक्ष्मसंपराये यथाख्यते च संयमे वर्त्तमानानामालोचना विवेक इत्येवं रूपे द्वे प्रायश्चित्ते भवतस्तृतीयं तु न विद्यते, ततः प्रस्तुते किमायातमिति चेदत आह-

भा. [४१९०] बउसपडिसेवया खलु इत्तरिच्छेया य संजया दोन्नि।
जातित्थणुसंजत्ती अत्थि हु तेणं तु पच्छित्तं ॥

वृ. निर्ग्रन्थचिन्तायां बकुशः प्रतिसेवकः प्रतिसेवनाकुशील इत्येतौ द्वौ निर्ग्रन्थो संयतचिन्तायां इत्वरीत्वरसामायिकवान् च्छेदं च्छेदोपस्थाप्यश्चेति द्वौ संयतौ यावत्तीर्थं तावदनुषजतोऽनुवर्त्तेते तेन ज्ञायते। अस्ति सम्प्रत्यपि प्रायश्चित्तं, गतमस्तीति द्वारमधुना न दीसइ धणिएण विनेति व्याख्यानार्थमाह-

भा. [४१९१] जइ अत्थि न दीसंति केइ करेंति तत्थ वणिज्ज दिट्ठंतो।
संतमसंते विहिणा मोयंता दोवि मुच्चंति ॥

वृ. चोदकः प्राह- यद्यस्ति प्रायश्चित्तं ततः कस्मात्केचित् कुर्वन्तो न दृश्यन्ते। सूरिराह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपायेन कुर्वन्ति ततो न दृश्यन्ते तथा चात्र धनिकेन दृष्टान्तो धारके सत्यसति च विभवे तौ च धारकौ द्वावपि सद्विभवसाद्विभवौ विधिना मोच्यमानौ ऋणान्मुच्येते। एतदेव भावयति-

भा. [४१९२] संभवविभवो उ जाहे मग्गितो ताहे देति त सव्वं।
जो पुण असंतविभवो तत्थ विसेसो इमो होइ॥

वृ. धनिकस्य द्वौ धारकौ संभवतस्तद्यथा-सद्विभवोऽसद्विभवश्च। तत्र यः सद्विभवः सदैव याच्यते तत्सर्वं दातव्यं ददाति। यः पुनरसद्विभवस्तत्रायं वक्ष्यमाणो विशेषो भवति। तमेवाह-

भा. [४१९३] निरवेक्खो तिन्नि चयती अप्पाण धनागमं च धारणगं।
सावेक्खो पुण रक्खइ अप्पाणधनं च धारणगं॥

वृ. धनिको द्विधा-सापेक्षो निरपेक्षश्च। तत्र सापेक्षो नाम यो धारकादसद्विभवात् धनमुपायेन गृह्णाति, निरपेक्षः कर्कशग्रहेण धनस्य गृहीता तत्र निरपेक्षस्त्रीणि त्यजति, तद्यथा-आत्मानं धानगमं धारकं च। सापेक्षः पुनस्त्रीण्यपि रक्षयति। आत्मानं धनं धारणकं च कथमित्याह-

भा. [४१९४] जो उ असंते विभवे पाए घेत्तूण पडइ पाडेणं।
सो अप्पाण धणंपि य धारणगं चेव नासेति॥

वृ. यो धनिको निरपेक्षोऽसद्विभवे असद्विभवस्य पदौ गृहीत्वा आत्मीयपादेन सह बध्वा पातेन पतित स आत्मानं धारणकं च नाशयति ततः स क्लिश्यमानो धनिकं जीविताद्व्यपरोप्य नश्येत्। यदि वात्मानं विनाशयेत् यद्वा उभयमपि ततस्त्रयस्यापि विनाशः।

भा. [४१९५] जो पुण सहती कालं सो अत्थं लभते रक्खई तं च।
न किलस्सइ सयंपी एव उवातो उ सव्वत्थ॥

वृ. यः पुनर्धनिको धारणकमसद्विभवं ज्ञात्वा उपायेनास्माद्धनमुपादेयमिति विचिन्त्य कालं सहते वक्ष्यमाणप्रकारेण कालं विलंबयति सोऽर्थं तं च धारणकं रक्षति, न च स्वयमपि विलश्यति। एवमुपायः पुरुषेण सर्वत्र कर्तव्यः। अथ कथं कालं सहते इत्याह-

भा. [४१९६] जो उ धारेज्ज वद्धंतं असतं विभवा सयं।
कुणमाणो उ कमंतु निव्विसे करिसावणं॥

भा. [४१९७] अणमप्पेण कालेणं सो तगं तु विमोयए।
दिट्ठंते सो भणितो अत्थोवणउ इमो तस्स॥

वृ. यो धारणको रूपकशतं दातव्यं धनिकानुमत्या प्रतिमासं वा काकिनी वृद्ध्या वर्धमानं धारयति। स्वयं वासद्विभवो धनिकस्य गृहे कर्म कुर्वन् कार्षापणं निवेशयति धनिकस्य प्रवेशयति सोऽल्पेन कालेन तत् ऋणं मोचयति। एष दृष्टान्तोदयमर्थोपनयस्तस्य।

भा. [४१९८] संतविभवो वि तुल्ला धिसंघयाण हि जे उ संपन्ना।
ते आवण्णा सव्वं वहंति निरनुग्गहं धीरा॥

वृ. ये धृतिसंहनननाभ्यां सम्पन्ना युक्ताः सद्विभवैस्तुल्यास्ते धीराः सर्वमापन्नप्रायश्चित्तं निरनुग्रहमनुग्रहरहितं वहन्ति।

भा. [४१९९] संघयण धिती हीना असंतविभवेहिं होंति तुल्ला उ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरवेक्खो जइ तेसिं देति ततो ते विनस्संति ॥

वृ. ये पुनर्धृतिसंहननाभ्यां हीनास्ते असद्विभवैस्तुल्यास्तेषां यदि निरपेक्षः सन् यन्निरवशेषं प्रायश्चित्तं ददाति ततस्ते विनश्यति। तथाहि तत्प्रायश्चित्तं निरवशेषं वोढुमशक्नुवन्तस्तपसा कृशीकृता जीवितादपगच्छेयुः।

भा. [४२००] ते तेन परिच्चत्ता लिंगविवेगं तु काउ वच्चंति।
तित्थुदो अप्पा एगाणि य तेण चत्तो य ॥

वृ. यदि वा ते प्रायश्चित्तभग्ना लिङ्गविवेकं कृत्वा व्रजन्ति ततस्तन निरवशेषप्रायश्चित्तदात्रा परित्यक्ता यथैवमेके एवमन्येऽप्येवमपरेपि ततः सर्वसाधुव्यपगमतस्तीर्थस्योच्छेदस्तथा तेनाचार्येण निरवशेषंअ प्रायश्चित्तं साधूनां ददता प्रायश्चित्तभग्नभयात् साधूनामपगमत आत्मा एकाकीकृतः एकाकितया च त्यक्तश्च शब्दात् गच्छोऽपि त्यक्तस्तथाहि साधूनामपगमे बालवृद्धग्लानादीनामुपग्रहेन कोऽपि वर्तते। ततस्तेऽपि तेन तत्त्वतः परित्यक्तास्तथा अवधाविताः सन्तो ये दीर्घकालं संसारमादि(वि)हिण्डिष्यंते सोऽपि तन्निमित्त इति तस्य महत्पापं तदेव निरपेक्षस्य दोष उक्तः। सम्प्रति सापेक्षस्य गुणमाह-

भा. [४२०१] सावेक्खो पवयणम्मी अनवत्थपसंगवारणाकुसलो।
चारित्तरक्खणत्थं आवोउित्ती पउवि सज्झे ॥

वृ. यः पुनराचार्यः प्रवचने सापेक्षोऽनवस्थाप्रसङ्गवारणाकुशलः स चारित्रस्य रक्षार्थं भवति तीर्थस्य चाव्यवच्छेदस्तथोपायेन साधयतीत्यर्थः उपायमेवाह-

भा. [४२०२] कल्लाणगमावन्ने अतरंते जहक्कमेण काउं जो।
दसकारेंति चउत्थे तद्दिगुणायंबिलतते वा ॥

भा. [४२०३] एक्कासणए पुरिमड्ढ निविगती चेव विगुणविगुणा ट।
पत्तेयासहुवा करेइ वा सन्निगासं तु ॥

वृ. पञ्च अभक्तार्थाः पञ्च आचाम्लानि पञ्च एकाशनकानि पञ्चपूर्वार्धानि पञ्च निर्विकृतिकानि एतत् पञ्चकल्याणं तत् जयेष्ठापन्ना यथाक्रमेण च कर्तुमशक्नुवन्तस्तान् दश चतुर्थान् कारयन्ति तथाप्यशक्नुवस्तद्विगुणाचाम्लवान् तपः कारयति विंशतिमायामाम्लानि कारयन्तीत्यर्थः। एवमेकाशने पूर्वार्ध निर्विकृतीर्द्विगुणाः कारयन्ति। किमुक्तं भवति ? विंशत्यायामाम्ले कारणाशकेतौ अशीति पूर्वार्द्धानि कारयन्ति। तत्राप्यशक्तौ षष्ठिशतं निर्विकृतिकानां कारयन्ति। एतत् पञ्चसु कल्याणेष्वेकैकं कल्याणं प्रत्येकमव्यवच्छित्य कर्तुमर्हस्यासमर्थस्य दातुमुक्तमथवायमन्यो विकल्पः करिति व सन्निगासं तु। सन्निकाशं सन्निभं वा कारयति। इयमत्र भावना-यत्तत्पञ्चकल्याणमापन्नस्तन्यमध्यादाद्यं द्वितीयं तृतीयं वा कल्याणकमेकतरं यथाक्रमेण वहति शेषमायाम्लादिभिः प्रदर्शयति। पुनरन्यथानुग्रहप्रकारमाह-

भा. [४२०४] चउतियदुगकल्लाणं एगकल्लाणगं च कारेती।
जं जो उत्तरति तं तस्स देंति असहुस्स भासंति ॥

वृ. यदि वा पञ्चकल्याणकमुक्तस्वरूपं यथाक्रमेण व्यवच्छित्त्या कर्तुमशक्नुवन्तं चतुःकल्याणकं कारयति। तदप्यशक्नुवन्तं त्रिकल्याणकं यथाप्यसमर्थतया द्विकल्याणकं कारयति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं बहुना यत् यः कर्त्तुं शक्नोति, तस्य तद्ददति नाधिकमाबाधासंभवात् अथैकमपि कल्याणं कर्त्तुं न शक्नोति तदा तस्यासहस्य सर्वं भाषयित्वा एकभक्तार्थं दीयते। अथवा एकमायामाम्लं यदि वा एकमेकाशनकमथवैकं पूर्वार्धमथवा निर्विकृतिकं अथ न किंचिद्ददति तदा अनवस्थाप्रसङ्गः। एतदेव स्पष्टयति-

भा. [४२०५] एवं सदयं दिज्जति जेणं सो संजमे थिरो होति।
न य सव्वहा न दिज्जति अनवत्थपसंगदोसातो॥

वृ. एवममुना प्रकारेण सानुकम्पं दीयते प्रायश्चित्तं येन स संयमे स्थिरो भवति न च सर्वथा न दीयते, अनवस्थाप्रसङ्ग दोषात्। अत्र दृष्टान्तो बालकतिलस्तेनकद्वयेन। एको कप्पट्ठतो अंगोहलिं काऊण रमंतो तिल्लरासिम्मि निम्मज्जितो बालतिलकाऊण न केइ वारितो तिला शरीरे लग्गा ततो सो सतिलो धरमागतो जननीए तिला दिट्ठा पक्खोडिया गहिया य ततो तिललोभेण पुणो अंगोहलेऊण दारगं पेसेइ। ततो कालेण तिले वि तेणावेइ। ततो सो पसंगदोसेण तेणो जातो रायपुरिसेहिं गहितो मारितो माउ दोसेण बालो वि एस तेणो जातो ति माऊथणच्छेया इमवराहं पाविया बितितो कप्पट्ठगो तहेव अंहोहलिं काऊण रमंतो तिलरासिंभि निमज्जितो सतिलो धरमागतो माऊए वारितो मा पुणो एवं कुज्जा। तिला य पक्खोडेऊण तिलरासिंभि पक्खित्ता सो कालंतरेण जीवियभोगाण अ भोगी जातो नेव जननी थणच्छेयादियमवराहं पत्ता

भा. [४२०६] दिट्ठंतो तेन एनं पसंगदोसेन जह वहं पत्तो।
पावंति अनेगाइं मरणाइं अवारियपसंगा॥

वृ. अनवस्थाप्रसङ्गदोषे दृष्टान्तं स्तेनकेन बालकेन तिलापहारिणा यथा प्रसङ्गदोषतो वधं प्राप्तस्तथा साधवोऽप्यनिवारितप्रसङ्गा अनन्तानि मरणानि प्राप्नुवन्ति।

भा. [४२०७] निब्भत्थणाए बितियाए वारितो जीवियाणं आभागी।
नेव य थणच्छेयादी पत्ता जननी य अवराहं॥

भा. [४२०८] इय अनिवारिय दोसा संसारे दुखसागरमुवंती।
विनियत्तपसंगा खलु करेंति संसारवोच्छेयं॥

वृ. द्वितीयया बालं तिलान् शरीरे लग्नानादाय समागतं निभर्त्सनया वारितस्ततः स जीवितानां जीवितसुखानामाभागी जातो नैव च जननी स्तनच्छेदादिकमपराधं प्राप्ता इति एवममुना दृष्टान्तद्वयगतेन प्रकारेणानिवारिता दोषाः संसारे दुःखसागरमुपयन्ति।

भा. [४२०९] एवं धरती सोही देंती करेंता वि एवं दीसंति।
जंपि य दंसणनाणे हि जा तित्थंति तं सुणसु॥

वृ. एवममुना प्रकारेण धरते विद्यते शोधिः तदा ददतः कुर्वन्तश्च शोधिमेवमुक्तप्रकारेण दृश्यन्ते। यदपि चोक्तं दर्शनज्ञानाभ्यां तीर्थं यातीति तदप्यमुक्तं यथा भवति तथा शृणुत युक्ततामेव कथयति-

भा. [४२१०] एवं तु भणंतेणं सेणियमादी वित्थाविया समणा।
समणस्स य जुत्तस्स य नत्थी नरएसु उववातो॥

वृ. यदि नाम ज्ञानदर्शनाभ्यां तीर्थं तर्हि प्रवचनं तच्च श्रमणेषु व्यवस्थितं तत एवं भणता

त्वया श्रेणिकादयोऽपि श्रमणा व्यवस्थापितास्तेषामपि ज्ञानदर्शनभावान्न चैतदुपपन्नं यत् श्रमणस्य श्रमणगुणैर्युक्तस्य नास्ति नरकेषूपपातः। अथ च श्रेणिकादीनां संभवात्।

भा. [४२११] जंपि जहु एक्कवीसं वाससहस्साणि होहिति तित्थं।
ते मिच्छासिद्धी वि सव्वगतीसुं व होज्जाहि॥

वृ. यदपि सूत्रे च भणितं एकविंशतिवर्षसहस्राणि तीर्थमनुवर्तमानं भविष्यति इति तदपि तन्मतेन मिथ्या प्राप्नोति। षट्स्वपि समासुज्ञानदर्शनभावतीश्चरकालमपि तीर्थानुषंजनप्रसक्ते र्यथा सर्वास्वपि च गतिषु सिद्धिरप्येवमनिवारितप्रसरा भवेत् सम्यग्दर्शनज्ञानयुक्तानां चारित्र-रहितानां सर्वगतिष्वपि जीवानां भावात्। ये चानुत्तरोपपातिनो देवास्ते नियमस्तद्भव-सिद्धि-गामिनो भवेयुः तेषामनुत्तरज्ञानदर्शनोपेतत्वात्। न चैतदिष्टं तस्मादिदमागतं यावच्चारित्रं

भा. [४२१२] पायच्छित्ते असंतंभि चरित्तंपि न वट्टती।
चरितंमिअसंतंमि तित्थे नो सचरित्तया॥

वृ. असति अविद्यधाने प्रायश्चित्ते चारित्रं न तिष्ठिति, प्रायश्चित्तमन्तरेण चारित्रस्य शुद्धेरभावात् चारित्रे चासति तीर्थस्य न चारित्रता।

भा. [४२१३] अचरित्तयाए तित्थस्स निव्वाणंमि न गच्छइ।
निव्वाणंमि असंतंमि सव्वा दिक्खा निरत्थया॥

वृ. तीर्थस्वाचारित्रतायां साधुर्निर्वाणं न गच्छति, असति च निर्वाणे सर्वा दीक्षा निरर्थका-

भा. [४२१४] न विना तित्थं नियंट्ठेहि नियंट्ठा वा अतित्थगा।
छक्कायसंजमो जाव ताव अनुसज्जणा दोण्हं॥

वृ. निग्रन्थैर्विना तीर्थं न भवति, तेनापि निर्ग्रन्था अतीर्थिकास्तीर्थरहिता भवन्ति परस्परव्यव-च्छिन्नतया एकस्यापरस्य भावात् निर्ग्रन्थग्रहणं संयतानामुपलक्षणं तत एतदपि द्रष्टव्यं। संयतैर्विना न तीर्थं नापि तीर्थमन्तरेण संयता निर्ग्रन्थाः संयताश्च प्रथमसंहननचतुर्दशपूर्वधरव्यवच्छेदेऽपि विद्यन्ते। यतो यावत् षट्कायसंयमस्तावत् द्वयानामनुषंजनानुवर्तमाना समास्ति षट्कायसंयमश्च प्रत्यक्षतोऽद्यापि लभ्यते ततः सन्ति निर्ग्रन्थाः सन्ति संयता इति प्रतिपत्तव्यं, तत्सत्वप्रतिपत्तौ च तीर्थं सचारित्रमित्यपि प्रत्येकं भव्यं चारित्रे सति प्रायश्चित्तमिति, अन्यच्च,

भा. [४२१५] सव्वण्णुहिं परूविय छक्कायमहव्वया य समितीतो।
सव्वेय य पन्नवणा संपति काले वि साहूणं॥

भा. [४२१६] ततो वच्चति तित्थं दंसणनाणेहिं न य सिद्धं तु।
निज्जवगा वोच्छिन्ना जंपि य भणियं तु तं न तहा॥

वृ. पूर्वसाधूनां सर्वज्ञैश्चारित्रस्य प्रतिपत्तये रक्षणाय च षट्कायानां महाव्रतानि समितयश्च प्ररूपिताः। सैव च प्रज्ञापना सम्यगाराध्यतथा सम्प्रति कालेऽपि साधूनामस्ति, तत उपसम्पन्नं सम्प्रतयपि चारित्रमस्ति। एवं च सिद्धं न तीर्थं ज्ञानदर्शनाभ्यां व्रजति, किन्तु ज्ञानदर्शनचारित्रै-रितिः, यदप्युक्तं निर्यापका व्यवच्छिन्ना इति तदपि न तथा कथमिति चेदतआह-

भा. [४२१७] सुण जह निज्जवगत्थीहि दीसंति जहा य निज्जविज्जंता।
इह दुविहा निज्जवगा अत्ताण परे य बोधव्या॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. श्रृणु यथा निर्यापकैर्निर्याप्यमाना दृश्यंते निर्यापकैर्निर्याप्यमाना इह द्विविधा निर्यापकास्तद्यथा-आत्मनः परस्य च उभयानप्याह-

भा. [४२१८] पातोवगमे इंगिनि दुविहा खलु होंति आयनिज्जवगा।
निज्जवगा उ परेण उ भत्तपरिन्ना य बोधव्वा॥

वृ. आत्मनिर्यापकाः खलु द्विविधा भवन्ति तद्यथा-पादपोपगमे इंगिनीमरणे च परेण पुनर्निर्यापना भक्तपरिज्ञायां बोद्धव्या।

भा. [४२१९] पाउवगमइंगिनि दोन्नि विचिट्ठं तु भावमरणाइं।
भत्तपरिण्णाए विहिं वुच्छामि अहानुपुव्वीए॥

वृ. पादपस्योपगमो यस्य तत् पादपोपगमं इङ्गिनीमरणं च द्वे अपि तावन्मरणे तिष्ठतः पश्चात् वक्ष्यमाणत्वात् सम्प्रति भक्तपरिज्ञायाविधिमानुपूर्व्या वक्ष्यामि। प्रतिज्ञातमेव निर्वाहयति-

भा. [४२२०] पव्वज्जादीकाउं नेयव्वं ताव जा आवोच्छित्ती।
पंच तुलेउणप्पा सा भत्तपरिण्णं परिणतो उ॥

वृ. प्रव्रज्यामादिं कृत्वा तावन्नेतव्यं यावदव्यवच्छित्ति किमुक्तं भवति ? प्रथमतः प्रव्रज्यां तदनन्तरं ग्रहणासेवनरूपां शिक्षां, ततः परं पञ्चमहाव्रतानि तदनन्तरमर्थग्रहणं ततोऽनियतो वासस्ततः परिपूर्णां गच्छस्य निष्पत्तिं कृत्वा तदनन्तरं तवेण सत्तेणसुत्तेण बलेण य। इत्येवं रूपाभिः पञ्चभिस्तुलनाभिरात्मानं तोलयित्वा भक्तपरिज्ञां प्रति परिणतो भवति।

भा. [४२२१] सपरक्कमे य अपरकम्मे य वाधाए आनुपुव्वीए।
सत्तत्थजाणएण समाहिमरणं तु कायव्वं॥

वृ. भक्तपरिज्ञारूपं नाममरणं द्विधा सपराक्रममपराक्रमं च। तत्र सपराक्रमं द्विविधं व्याघातिमं निर्व्याघातं च। तत्र सपराक्रमे एकैकस्मिन् व्याघाते कर्मणि धत्र प्रत्ययानयनात् व्याघातिमे चशब्दान्निर्व्याघाते च समुपस्थिते सूत्रार्थज्ञापकेन समाधिमरणं कर्तव्यं। एतदेव व्याचष्टे-

भा. [४२२२] भिक्खवियारसमत्थो जो अन्नगणं च गंतु वाएइ।
एस सपरक्कमो खलु तव्विवरीतो भवे इयरो॥

वृ. यः स्वस्य परस्य च निमित्तं भिक्षायां विचारे च गन्तुं समर्थो यदि वान्यगणं गत्वा वाचयति सभक्तप्रत्याख्यानं प्रतिपित्सुः पराक्रमस्तद्विपरीतो भिक्षादावसमर्थो भवति इतराऽपराक्रमस्तद्गतं मरणमपि यथाक्रमं सपराक्रममपराक्रमं च।

भा. [४२२३] एक्केक्कं तु दुविहं निव्वाधायं तहेव वाघायं।
वाघातो वि य दुविहो कालतियरो इयरो वा॥

वृ. तत्सपराक्रमगपराक्रमं च मरणमेकैकं द्विविधं निर्व्याघातं व्याघातं च। तत्र व्याघातो नाम यथा अच्छभल्लेन कालादौ ? (ओ?) ष्टौ च खादितौ, अथवा रोगे व्याघातः ततो मरणं प्रतिपद्यते। निर्व्याघातं यथोक्तव्याघातरहितं। व्याघातोऽपि च द्विविधः कालातिचार इतरश्च। कालमतिचरति अतिक्रामतीति कालातिचारः कालसहो। यतश्चिरेण मरणं यथा पूतिगोनशेन दृष्टस्य तं दृष्टकालमतीत्यविशति रात्रिदिवादिषु मरणं, इतरः कालानतिचारो यत्तद्दिवसमेव मर्तुकामो भक्तं प्रत्याचष्टे इति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४२२४] तं पुण अनुगंतव्वं दारेहिं इमेहिं आनुपुव्वीए।
गणनिसरणादिएंहि तेसि विभागं तु वुच्छामि॥

वृ. तेन पुनर्निर्व्याघातिरभिर्वक्ष्यमाणैर्गणान्निः सरणादिद्वारैरानुपुर्व्या क्रमेणानुगन्तव्यं तेषां च द्वाराणां विभागं वक्ष्यामि। तमेव वस्तुकाम आह-

भा. [४२२५] गण् निसरणे परगणे सिति संलेह अगीय असंविग्गो।
एगाभोगण अन्ने अनापुच्छपरिच्छ आलोए॥

भा. [४२२६] ठ्ठाण वसहीए सत्थे निज्जवगा दव्व दायणा चरिमे।
हानी अपरियंतनिज्जर संथारुवत्तणादीनि॥

भा. [४२२७] सारेत्तणयकवयं निव्वाधाएण चिंधकरणं तु।
अंतो बहि वाधातो भत्तपरिन्नाए कायव्वो॥

वृ. गणात् स्वगणान्निस्सरणा वक्तव्या परगणगमनं। तथा सितित्ति द्रव्यभावरूपानिः श्रेणिर्वक्तव्या। तथा संलेख संलेखना तथा अगीतस्य अगीतार्थस्य पार्श्वे न भक्तप्रत्याख्यातव्यं तथा असंविग्गेत्ति। असंविग्नस्यापि समीपे न प्रत्याख्यातव्यं। तथा एगत्ति एको निर्यापको न कर्तव्यः। किन्तु बहवः, परतो वा भक्तं प्रत्याख्यातुकामस्य विषये आभोगनं कर्तव्यम्। तथा अन्यो यदि भक्तं प्रत्याख्यातुमुद्यतस्तर्हि यदि निर्यापकाः पूर्यन्ते तदा स प्रतिष्यते, शेषकालं नेति, तथा आचार्येण गच्छस्यानापृच्छया स भक्तप्रत्याख्यानं न प्रतिपादयितव्यः। तथा तेन भक्तं प्रत्याख्यातुकामेन गच्छस्य गच्छेनापि तस्य परीक्षा कर्तव्या। तथा भक्तपरिज्ञां प्रतिपत्तुकामेन नियत आलोचना दातव्या। तथा प्रशस्ते स्थाने प्रशस्तायां वसतौ भक्तपरिज्ञा प्रतिपत्तव्याः। तथा निर्यापका गुणसम्पन्नाः समर्पणीयाः। तथा आलोचना चरमकाले तस्य भक्तप्रत्याख्यातुकामस्य द्रव्यदर्शनं प्रधानसमस्ताहारद्रव्योपदर्शनं विधेयं। हाणित्ति भक्तं प्रत्याख्यातुकामस्य प्रतिदिवसमाहारस्यानिर्विधेया तथा अपरिश्रान्ताः सर्वकर्मणि प्रतिचारका वर्तन्ते। निज्जरत्ति निर्जरा वक्तव्या तथा संस्तारको यादृशो.भवति कृतभक्तप्रत्याख्यानस्यहाकर्तव्यस्ताहशो वक्ष्यते। तथा तस्य कृतभक्तप्रत्याख्यानस्योद्वर्तनादीनि यथा समाधिकरणीयानि तथा प्रथमद्वितीयपरीषहाभ्यां त्याजितः स्मारयित्वा स्वं स्वरूपं (मा)नर्थत्वादिलक्षणं कवचं कवचभूतमशनं प्रयोक्तव्यम्। तथा जीवतो मृतस्य च तस्य चिन्हकरणं विधेयं, एतं निर्व्याधाते भक्तपरिज्ञाव्याघाताभावेन प्रतिपत्तव्यं। अथान्तर्ग्रामादिबहिरुद्यानादिपु भक्तपरिज्ञाया व्याघातः संजातस्ततोगीतार्थानामुपायो भवति कर्तव्यः। एष द्वारगाथा। साम्प्रतमेतदेव विवरीषुराह-

भा. [४२२८] गणनिसरणंमि उ विही जो कप्पे वण्णितो समासेणं।
सो चेव निरवसेसो भत्तपरिन्नाए दसमंमि॥

वृ. गणनिस्सरणे यो विधिः कल्पे कल्पाध्ययने सप्तविधः सप्तप्रकारो वर्णितः स एव व्यवहारो दशमे उद्देशके भक्तपरिज्ञायां भक्तज्ञानाधिकारो निरवशेषो वक्तव्यः। गणनिस्सरणं द्वारं गतमिदानीं परगणद्वारं परगणे गत्वा भक्तप्रत्याख्यानं कर्तव्यम्।

भा. [४२२९] किं कारणं चंकमणं थेराण इहं तवो किलंताणं।
अब्भुज्जयंमि मरणे कालुणियाज्झाणवाधातो॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. किं कारणं स्वगणादपक्रमणं क्रिया सूरिराह-स्थविराणामाचार्याणां संलेखनातपोभिः क्लान्तानामिह स्वगणे अभ्युद्यते भक्तपरिज्ञा लक्षणमरणे समुपस्थितानां शिष्याणां आचार्यानुरागेण रोदनक्रन्दनादीनि कुर्युः। रोदनादिकं च तेषामाकर्ण्याश्रुपातं दृष्ट्वा तेषामुपरि कारुण्यमुपजायते। ततो व्याधातः। अन्यच्च-

भा. [४२३०] सगणे आणाहानी अप्पत्ति य होइ एवमादीयं।
परगणगुरुकुलवासो अप्पत्ति य वज्झितो होइ॥

वृ. यो गणधरः स्थापितस्तस्याज्ञां केचित् कुर्वन्ति तथा केषांचिदपकरणनिमित्तमप्रीतिरादिशब्दान् गणभेदो बालादीनामुचिताद्यकरणदर्शनमित्यादि परिग्रहः। तत एवं स्वगणे आज्ञाहारनिरप्रीतिरसेवनादिकं ध्यानव्याघातकारणमुपतिष्ठते। ततः, परगणे गत्वा भक्तप्रत्याख्यानं प्रतिपद्यते। यत एवं गुरुकुलवास आसेवितो भवति। किं विशिष्ट इत्याह-प्रीतिवर्जितोऽप्रीतिश्च समस्तापि परिहृता भवतीति भावः। अप्रीत्यादिकं यथा स्वगणे भवति तथा प्रदर्शयति।

भा. [४२३१] उवगरणनिमित्तं तु वुग्गहं दिस्सवा विगणभेयं।
बालादी थेराण व उचियाकरणंमि वाघातो॥

वृ. उपकरणनिमित्तं साधूनामाचार्ये कृतभक्तप्रत्याख्याने व्युद्ग्रहः कलहो भवति। अथवा तं गणधरं केचिन्न मन्यन्ते ततः स्वस्वपक्षे परिग्रहो गणभेदस्तत एवमुपकरणनिमित्तं गणभेदं दृष्ट्वा उपलभ्य तथा बालादीनां बालवृद्धासहग्लानादीनां स्थविराणां चात्र विकरणे उचितकरणादर्शनेऽप्रीतिरुपजायते। तथा चाप्रीत्या ध्यानव्याघातः। अयं च परगणे प्रतिपन्ने गुणः।

भा. [४२३२] सिनेहो पेलवो होइ निग्गते उभयस्स उ।
आहच्च वावि वाधातो वा सेहादि विउब्भमो॥

वृ. स्वगणान्निर्गतोभयस्यापि गणस्याचार्यस्य वा स्नेहः परस्परं पेलवः प्रतनुर्भवति। अन्यच्च आहच्च-काचित् प्रथमपरीपहेनत्याजितस्य भक्तपरिज्ञां यो व्याघातेऽपि विलोपः स्यात्, तस्मिन् व्याधातेन स्वगणात् शैक्षकादीनां व्युद्ग्रहो जायते आघातपरिज्ञानाभावात्। अथवा विपरिणामोऽपि स्यात्, तथाहि स्वगुणे स्थितं भग्नपरिज्ञं जानन्ति। ज्ञात्वा च सर्वा अपि प्रतिज्ञा एतेषामीदृशा एवेति विपरिणामं गत्वा संयमं लोपयन्ति। सम्प्रति सीतिद्वारमाह-

भा. [४२३३] दव्वसिती भावसिती अनुयोगधराण जेसिमुवलद्धा।
न हु उड्ढगमनकाड्ढा हेट्ठिल्लपयं पसंसंति।

भा. [४२३४] संजमट्ठाणेणं कंडगाणालसाविती विसेसाणं।
उवरिल्लपयकमलं भावसिती केवलं जाव॥

वृ. सितिनाम ऊर्ध्वमधो वा गच्छतः सुखोत्तरोवतारहेतुः पन्थाः। सा द्विधा-द्रव्ये भावे च। तत्र द्रव्येशितिर्निःश्रेणिः सा द्विधा ऊर्ध्वगमने च तत्र अधोगमने च तत्र ययाधस्तनात् भूमिग्रहादिष्ववतीर्यते साऽधो गमने, ययोर्ध्वपरिमाणे आरुह्यते सा ऊर्ध्वगमने, भावशीतिरपि द्विधा प्रशस्ताऽप्रशस्ता च। तत्र यैर्हेतुभिस्तेषामेव संयमस्थानानां संयमकंडकानां लेश्यापरिणामविशेषाणां वा अधस्तात् संयमस्थानेष्वपि गच्छति, सा अप्रशस्ता भावशीतिः यैः पुनर्हेतुभिस्तेषामेव संयमादिस्थानानामुपरितनेषूपरितनेषु विशेषेष्वध्यारोहति, सा प्रशस्तोच्चोपरितन एव क्रमेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावशीतिस्तावदद्रष्टव्यं। यावत्केवलज्ञानं, तत्र येषामनुयोगधराणामाचार्याणामेवं द्रव्ये भावे च शीतिरुपलब्धा भवति, ते न हु नैव ऊर्ध्वगमने कार्ये कर्तव्येऽधस्तनपदं प्रशंसन्ति। न तासु सपदगमनायाशुभव्यवसायप्रवृत्तिमातन्वते किंतु शुभेषु व्यवसायेष्वारोहन्ति। गतं सीतिद्वारं।

भा. [४२३५] उक्कोसा य जहन्ना दुविहा संलेहणा समासेन।
छम्मासा उ जहन्ना उक्कोसा बारससमा उ ॥

वृ. संलेखना समासेन द्विविधा प्रज्ञप्तास्तद्यथा-उत्कृष्टा जघन्या चशब्दात् मध्यमा च। तत्र जघन्या षण्मासा उत्कृष्टा द्वादशसमा द्वादशवर्षा।

भा. [४२३६] चिट्ठउ जाव जहन्ना, उक्कोसं तत्थ ताव वोच्छामि।
जं संलहिउण मुनी साहंती अत्तणो अत्थं ॥

वृ. तत्र तयोर्जघन्योत्कृष्टयोर्मध्ये जघन्यतो वेति। अनुपश्चाद्वक्ष्यमाणत्वादुत्कृष्टं तावद्वक्ष्यामि यदित्यव्ययं यथा मुनय आत्मानं संलिख्यात्मनोऽर्थं साधयन्ति तामेवाह-

भा. [४२३७] चत्तारि विचित्ताइं विगई निज्जूहियाइं चत्तारि।
एगंतरमायामे नाति विगिच्छेय विगेहे ॥

वृ. चत्वारि वर्षाणि विचित्राणि विचित्रतपांसि करोति। किमुक्तं भवति ? चत्वारि वर्षाणि यावत्कदाचित् चतुर्थं कदाचित् षष्ठं कदाचिदष्टममेवं दश द्वादशादीन्यपि करोति, कृत्वा च पारणकं सर्वकामगुणितेनाहारेण पारयति ततः परमन्यानि चत्वारि वर्षाण्युक्तप्रकारेण विचित्र-तपांसि करोति। विकृतिनिज्जूहितानि किमुक्तं भवति विचित्रं तपः कृत्वा पारणके निर्विकृतिकं भुंक्ते। उत्कृष्टरसवर्जं च ततः परतोऽन्ये द्वे वर्षे एकान्तरमायामं करोति। एकान्तरं चतुर्थं कृत्वा आयामेन पारयति। एवमेतानि दश वर्षाणि गतानि एकादशस्य वर्षस्यादेशान् नातिविकृष्टं तपः कृत्वा आयामेन परिमितं भुंक्ते, नातिविकृष्टं नाम तपश्चतुर्थं षष्ठं वावगन्तव्यम्। ततः परमन्यान् विकृष्टं तपः कृत्वा मा शीघ्रमेव मरणं यायासमिति कृत्वा पारणके परिपूर्णश्राण्या आयामं करोति विकृष्टं नामाष्टमादिकं साम्प्रतमेतदेव व्याचिख्यासुराह-

भा. [४२३८] संवच्छराणि चउरो होंति विचित्तं चउत्थमादीयं।
काउण सव्वगुणियं पारेई उग्गमविसुद्धं ॥

वृ. आदिमानी चत्वारि संवत्सराणि विचित्रं तपः चतुर्थादिकं भवति। तच्च कृत्वा पारयति भुंक्ते सर्वगुणितं सर्वगुणितमाहारमुद्गमविशुद्धम्।

भा. [४२३९] पुनरवि चउरन्ने उ विचित्तकाउण विगतिवज्जं तु।
पारेइ सो महप्पा निद्धं पणियं च वज्जेइ ॥

वृ. पुनरप्यन्यानि चत्वारि वर्षाणि विचित्रं तपः कृत्वा स महात्मा विकृतिवर्जं पारयति। तत्रापि स्निग्धं प्रणीतं चोत्कृष्टरसं वर्जयति।

भा. [४२४०] अन्नातो दोन्नि समा चउत्थकाऊण पारेति।
आयामं कज्जिएणं तु ततो अवक्कसमं इमं कुणइ ॥

वृ. अन्यद्वे समे वर्षे चतुर्थं कृत्वा आयामं पारयति। एवं दश वर्षाणि गतानि। ततः परम-न्यामेकां समां वर्षमिमां वक्ष्यमाणां काञ्जिकेनायामपारणकेन करोति, कथमित्याह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४२४१] तत्थेकं छम्मासं चउत्थ छट्ठं तु काउ पारेइ।
आयंबिलेण नियमा बिइए छम्मासिए विगिट्ठि॥

भा. [४२४२] अट्ठमदसमदुवालसकाऊणायंबिलेण पारेइ।
अन्नेकहायणं तू कोडिसहियं तु काऊण॥

वृ. तत्र एकादशे वर्षे एकमाद्यं पण्मासं यावत् चतुर्थं षष्ठं वा कृत्वा नियमादायमोन पारयति। द्वितीये षण्मासे विकृष्टमष्टमं दशमं द्वादशं वा कृत्वा आयामाम्लेन पारयति। एवमेकादशवर्षाणि गतानि। अन्यमेकं द्वादशं हायनं कोटीसहितं कृत्वा किमित्याह-

भा. [४२४३] आयंबिल उसुणोदेण परिहावेंतो आनुपुव्वीए।
जह दीवे तेल्लवत्ती खउसमं तह सरीराउ॥

वृ. आयामो च उण्णोदकेन पारयति। अयमत्र सम्प्रदायो-द्वादशो वर्षे कोटी सहितं प्रत्याख्यानं चतुर्थविषयं कृत्वा प्रथमं पारणकमायामेनोष्णोदकेन करोति, द्वितीयं पारणकं निर्विकृतिकेन, तृतीयं पुनरायामेन यथोक्तरूपेण चतुर्थं निर्विकृतिकेन। एवमेकान्तरितं पारणकेष्वायामं करोति। कोटीसहितं नाम प्रथमदिवसे पुनरभक्तार्थं कृत्वा पारयति। एतच्चतुर्थे कोटीसहितं प्रत्याख्यानं। एवं षष्ठाष्टमादि कोटीसहितान्यपि भावनीयानि अथवायमन्यो द्वितीयः प्रकार एकस्मिन् दिने चतुर्थं कृत्वा द्वितीये दिवसे पारयति तृतीये दिवसे पुनश्चतुर्थं करोति चतुर्थे दिवसे पारयति, एतच्चतुर्थकोटीसहितमेवं षष्ठं कृत्वा पारयति पुनः षष्ठं करोति, ततः पारयति एवमष्टमादिकोटीसहितान्यपि भावनीयानि। हावेंतो आणुपुव्वीए इति तस्मिन् द्वादशे वर्षे पारणकेषु यथाक्रममेकैकं कवलं हापयन् पारयति यावदेकं कवलं। ततः शेषेषु पारणकेषु क्रमश एकेन शिक्थेनोनमेकं कवलमाहारयति। द्वाभ्यां शिक्थाभ्यां त्रिभिः शिक्थैरेवं यावदन्ते एकसिक्थमाहारयति। कस्मादेवं करोतीति चेदत आह-यथा दीपे सममेककालं तैलवर्त्तिक्षयं भवति तथा शरीरायुषः समकं क्षयः स्यादिति हेतोः।

भा. [४२४४] पच्छित्तहायणे रूवचउरो धारे त्तु तेल्लयं इसा।
निसिरेज्जा खलमल्ले किं कारणगल्लधरणं तु॥

भा. [४२४५] लुक्खता सुहजत्तं माहु खुभेज्जइ तेन धारेइ।
माहु नमोक्कारस्स अपच्चलो सो हवेज्जाहि॥

वृ. तस्मिन् पश्चिमे द्वादशे हायने येऽन्तिमाश्चत्वारो मासास्तेष्वेकैकस्मिन् पारणके एकान्तरितं तैलं गंडूषं चिरकालं धारयति। धारयित्वा खेलमल्लके सक्षारे निसृजति त्यजति। ततो वदनं प्रक्षालयति। किं कारणं गल्ले गंडूपधारणं क्रियते उच्यते-मा मुखयन्त्रं रूक्षत्वाद्वातेन क्षुभ्येतैकत्र संपिण्डीभूयते तथा च सति मा स नमस्कारस्य भणनेऽप्रत्यलोऽसमर्थो भवेदिति हेतोर्गल्ले तैलधारणं करोति।

भा. [४२४६] उक्कोसगा उ एसा संलेहा मज्झिमा जहन्ना या।
संवच्छर छम्मासा एमेव य मासपक्खेहिं॥

वृ. एषा अनन्तरोदिताः संलेखा संलेखना उत्कृष्टा भणिता। मध्यमा संलेखना संवत्सरप्रमाणा एव प्रागुक्तेन प्रकारेण द्वादशभिर्मासैः परिभावनीया-जघन्या एषा षण्मासा द्वादशभिः

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

पक्षैर्वर्षस्थाने मासान्पक्षांश्च स्थापयित्वा तपोविधिः प्रागिव निरवशेष उभयत्रापि भावनीयम्

भा. [४२४७] एत्तो एगतरेणं, संलेहणं खवेसु अप्पाणं।
कुज्जा भत्तपरिण्णं इंगिनि पाओवगमणं वा ॥

वृ. एतेषामुत्कृष्टमध्यमजघन्यानां संलेखनानामेकतरेण संलेखनेनात्मानं क्षिपयित्वा कुर्यात् भक्तपरिज्ञामिङ्गिनीमरणं पादपो गमनं वा, गतं संलेखनाद्वारमधुना अगीतद्वारमाह-

भा. [४२४८] अग्गीयसगासंमी भत्तपरिएणं तु जो करेज्जाहि।
चउ गुरुगा तस्स भवे किं कारणिज्जेणिमे दोसा ॥

वृ. गीतार्थस्य समीपे भक्तप्रत्याख्यातव्यं, यस्त्वगीतस्वागीतार्थस्य सकाशे समीपे भक्त-परिज्ञा भक्तप्रत्याख्यानं करोति तस्य प्रायश्चित्तं चत्वारो गुरुकाः किं कारणमुच्यते येन कारणेन इमे वक्ष्यमाणादोषास्तेन कारणेन तत्र तानेव दोषानाह-

भा. [४२४९] नासेती अग्गीतो चउरंगं सव्वलोयसारंगं।
नट्ठंमिय चउरंगे न हू सुलभं होइ चउरंगं ॥

वृ. अगीतो अगीतार्थो निर्यापकस्तस्यकृतभक्तप्रत्याख्यानस्य चतुरङ्गं चतुर्णामंगानां समाहाश्चतुरङ्गं वक्ष्यमाणं कथंभूतमित्याह-सर्वलोकसाराङ्गं अङ्गवरं प्रधानमित्यनर्थान्तरं सर्वेषामपि त्रयाणामपि लोकानां यानि अङ्गानि तेषां सारमिति विशिष्टमङ्ग प्रधानं सर्वलोकसारांगं नष्टे च चतुरङ्गे न पुनः सुलभं प्रापं भवति चतुरङ्गं, किन्तु चुल्लकादिदृष्टान्तैरतिशयेन दुःप्रापं तताऽगीतस्य समीपे भक्तं न प्रत्याख्येयम्-

भा. [४२५०] किं पुन तं चउरंगं जं नट्ठं दुल्लहं पुणो होइ।
मानुस्सं धम्मसुत्ती सद्धा तव संजमे विरियं ॥

वृ. किं पुनस्तच्चतुरङ्गं यन्नष्टं सत् पुनर्दुर्लभं भवति। सूरिराह-मानुष्यं मानुषत्वं धर्मश्रुतिं धर्मश्रवणं श्रद्धा तपसि संयमे च वीर्यमिति।

भा. [४२५१] किह नासेति अगीतो पढमबितिएहिं अट्टितो सो उ।
उहासे कालियाए तो निद्धम्मोत्ति छड्डेज्जा ॥

वृ. कथं केन प्रकारेण सोऽगीतार्थस्तस्य चतुरङ्गं नाशयति। सूरिराह प्रथमद्वितीयाभ्यां श्रुत्पिपासालक्षणाभ्यां परीषहाभ्यामर्चितः पीडितः स भक्तप्रत्याख्याता कदाचित् कालिकायां रात्रौ भक्तं च पानं च अवभाषेत, याचेत। ततः सोऽगीतार्थो न कल्पते इति कृत्वा न दद्यात्, चिन्तयति च भक्तं प्रत्याख्याय पुनर्याचते भक्तं तत्रापि रात्रौ एष निर्धर्मा असंयताभूत इति कृत्वा तं त्यजेत् त्यक्त्वा गच्छेत् ॥

भा. [४२५२] अंतो वा बाहिं वा दिवा य रातो य सो विचित्तो उ।
अट्ट दुहट्टवसट्टो पडिगमनादीनि कुज्जाहि ॥

वृ. अन्तरुपाश्रयस्य यदि वा बहिरुपाश्रयस्य दिवा वा रात्रौ वा तेनागीतार्थेन विविक्तः सन् आर्तः दुःखार्तः वशार्तः सः प्रतिगमनादीनि प्रतिगमनं नाम प्रतिभञ्जनं व्रतमोक्षमित्यर्थः।

आदिशब्दात् मृत्वा कुगतिविनिपातान्वा कुर्यात्तांश्च कुगतिविनिपातानेवाह-

भा. [४२५३] मरिऊणट्टज्झाणो गच्छे तिरिएसु वणयरेसुं वा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संभरिऊण य रुट्ठो पडिनीयत्तं करेज्जाहि ॥

वृ. स आर्तध्यानो मृत्वा तिर्यक्षु वा तिर्यग् योनिषु गच्छेत् यदि वा वनचरेषु वानमन्तरेषु मध्ये स समुत्पद्येत्तत्र जातिं स्मृत्वा त्यक्तौऽहं तस्यामवस्थायामिति रुष्टः सन् बहुविधं प्रत्यनीकत्वं कुर्यात्।

भा. [४२५४] अहवा विसव्वरीए मोयं दिन्नाहि जायमाणस्स।
सो दंडियादि हुज्जा रुट्ठो साहे निवादीणं ॥

भा. [४२५५] कुज्जा कुलादि पत्थारं सो वा रुट्ठो उ गच्छे।
मिच्छत्तं तप्पयं च दीहं भमेज्ज संसारकंतारे ॥

वृ. अथवा सर्वपर्यापनीयं याचमानस्य रात्रौ पानीयं नास्तीति मोकं प्रश्रवणं सोऽगीतार्थो दद्यात्। स च दण्डिकादीनां सम्बन्धी निष्क्रान्तः स्यात् ततः स धातुवैषम्येन रुष्टः सन् अवधावेत्। अवधाव्य च नृपादीनां कथयेत्ततः प्रवचनस्य महानुड्डाहः। यदि वा स राजादिस्तत्पक्षपतितः सोऽपि वा स्वयं रुष्टकुलादिप्रस्तारं कुलस्य गणस्य वा विनाशं कुर्यात्। यद्यपि च एवमादयो दोषा न भवन्ति। तथा प्रथमद्वितीयपरीषहाभ्यां परितप्यमानोऽसमाधिना मृतो दुष्कर(रा)मपि कृत्वान्तक्रियां कल्पविमानोपपत्तिं वा न प्राप्नुयात्। किन्तु वानमन्तरादिषूपपद्येत यदि वा कषायपीडितो दृष्टिविषः सर्पो जायेत। गच्छे मिच्छत्तमिति इह भवे वा मिथ्यात्वं गच्छेत् तत्प्रत्ययं च मिथ्यात्वप्रत्ययं च दीर्घसंसारकान्तारं भ्रमेत्।

भा. [४२५६] सो उ विविंचिय दिट्ठो संविग्गेहिं तु अन्नसाहूहिं।
आसासियमनुसिट्ठो भरणो वि पडिवन्नं ॥

वृ. स प्रत्याख्यातभक्तो भक्तं याचमानो अगीतार्थः साधुर्विविक्तः परित्यक्तोऽन्यैः संविग्नैगीतार्थसाधुर्मिदृष्टस्ततस्तैराश्वासित आश्वास्य च अनुशिष्टोऽतिशयेन दूरमुत्साहितस्ततो यत् अभ्युद्यतमरणं त्यक्तं तत्पुनरपि तेन प्रतिपन्नं ततः सुगति भागी जातः।

भा. [४२५७] एए अन्ने य तहिं व दोसा य पच्चवाया य।
एएहिं कारणेहिंऽगीयत्थ न कप्पति परिण्णा ॥

वृ. यस्मादेतेऽनन्तरोदिता अन्ये चानुक्ता वहवो दोषाः प्रत्यवायाश्चागीतार्थस्य समीपे भक्तपरिज्ञाप्रतिपत्तौ तस्मादेतैः कारणैरगीतार्थस्य समीपे परिज्ञा भक्तपरिज्ञा न कल्पते। संविग्नगीतार्थानां च समीपे बहवो गुणास्तस्मात्तन्मार्गणा कर्तव्या। सा च द्विधा-क्षेत्रतः कालतश्च।

भा. [४२५८] पंच व छ सत्तसए अहवा एत्तो वि सातिरेगतरे।
गीयत्थपायमूलं परिमग्गेज्जा अपरितंतो ॥

वृ. पञ्च षट् सप्त वा योजनशतान्यथवा इतोऽपि सातिरेकतराणि योजनशतानि संविग्नपादमूलमपरिश्रान्तो अनिवृत्तो मृगयते। उक्ता क्षेत्रतो मार्गणा। कालत आह-

भा. [४२५९] एक्कं च दोव तिन्नि च उक्कोसं बारसेव वासाणि।
गीयत्थ पायमूलं परिमग्गेज्जा अपरितंतो ॥

वृ. एको द्वे त्रीणि वा उत्कर्षतो द्वादशवर्षाणि यावदपरिश्रान्तो अनिर्विन्नो गीतार्थपादमूलं परिमृगयते।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४२६०] गीयत्थ दुल्लभं खलु पडुच्च य काले तु मग्गणा एसा।
ते खलु गवेसमाणा खेत्ते काले य परिमाणं ॥

वृ. गीतार्थो दुर्लभो यस्मिन् काले तं गीतार्थदुर्लभं कालं प्रतीत्याश्रित्य एषानन्तरोदिता क्षेत्रतः कालतश्च मार्गणाभिहिता ते खलु गीतार्थं गवेषयन्तः क्षेत्रविषये कालविषये च परिमाण-मुत्कुष्टमेतावत् कुर्वन्ति।

भा. [४२६१] तम्हा गीयत्थेणं पवयण गहियत्थ सव्वसारेणं।
निज्जवगेण समाही कायव्वा उत्तमट्ठंमि ॥

वृ. यस्मात् क्षेत्रतः कालतश्च गीतार्थमार्गणायामेतावानादरः कृतस्तस्मात्तेन गीतार्थेन प्रवचन-गीतार्थसर्वसारेण प्रवचनस्य गृहीतोऽर्थस्य सर्वसारो येन स तथा तेन निर्यापकेण उत्तमार्थे व्यवस्थितस्य समाधिः कर्तव्या। गतमगीतार्थद्वारमसंविग्नद्वारमाह-

भा. [४२६२] असंविग्गसमीवे वी पडिवज्जंतस्स होइ गुरुगा उ।
किं कारणं तु जहिं जम्हा दोसा हवंति इमे ॥

वृ. असंविग्नसमीपेऽपि भक्तपरिज्ञां प्रतिपद्यमानस्य भवन्ति चत्वारो गुरुकाः प्रायश्चित्तं। किं कारणं यत्र यस्मादिमे वक्ष्यमाणा दोषा भवन्ति तानेवाह-

भा. [४२६३] नासेति चउरंगं सव्वलोयसारंगं।
नट्ठंमि उ चउरंगं न हु सुलभं होंति चउरंगं ॥

वृ. नाशयत्यसंविग्नश्चतुरङ्गं मानुषत्वादिरूपं सर्वलोकसाराङ्गसर्वलोकप्रधानतराङ्गेन हु नैव सुलभं प्रापं भवति चतुरङ्गं नाशयतीत्यत आह-

भा. [४२६४] आहाकम्मि य पानग पुप्फासीया बहु जने नायंल।
सेज्जा संथारो वि य उवही वि य होइ अविसुद्धो ॥

वृ. असंविग्नो बहुजनस्य यथा तथा वा ज्ञातं करोति यथा एष कृतभक्तप्रत्याख्यानस्ततः स आधाकर्मिकं पानमानयति पुष्पाणि च ढौकयति। सेचनं च चन्दनादिना करोति। तथा शय्या संस्तारक उपधिश्च तेनानीतोऽविशुद्धो भवति।

भा. [४२६५] एते अन्ने य तहिं बहवे दोसा य पच्चवाया य;
एएण कारणेणं असंविग्गे न कप्पइ परिन्ना ॥

वृ. एतेऽनन्तरोदिताऽन्ये चानुक्ता बहवो दोषाः प्रत्यवायाश्च तत्र प्रत्यवायाः प्रागिवास-माधिमरणतो वानमन्तरेषूत्पादितो नृपादिकथनतो वा वेदितव्या एतेन कारणेनासंविग्नेऽसंविग्नस्य समीपे परिज्ञा न कल्पते। किन्तु संविग्नस्यान्तिके ततः क्षेत्रतः कालतश्च मार्गणामाह-

भा. [४२६६] पंचेव छ सत्तया अहवा एत्तो वि सातिरेगं।
संविग्गपायमूलं परिमग्गिज्जा अपरितंतो ॥

वृ. इयं क्षेत्रतः कालत आह-

भा. [४२६७] एक्कं व दोव तिन्नि व उक्कोसं धारसेव वासाणि।
संविग्गपायमूलं परिमग्गिज्जा अपरितंतो ॥

भा. [४२६८] संविग्ग दुल्लभं खलु कालं तु पमुच्च मग्गणा एसा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते खलु गवेसमाणा खेत्ते काले य अपरिमाणं ॥

वृ. यस्मादेवं क्षेत्रतः कालतश्च मार्गणायामादरः कृतः ।

भा. [४२६९] तम्हा संविग्गेणं पवयणगहियत्थ सव्वसारेणं ।
निज्जवगेण समाही, कायव्वा उत्तमट्ठंमि ॥

वृ. गाथा चतुष्टयमपि प्राग्वत् । गतं संविग्नद्वारमिदानीमेकद्वारमेको निर्यापको न कर्तव्यः । किन्तु बहवोऽन्यथा विराधनादिदोषप्रसङ्गात्तमेवोपदर्शयति,

भा. [४२७०] एक्कंमि उ निज्जवगे विराधना होइ कज्जहानी य ।
सो सेहा वि य चत्ता पावयणं चेव उम्माहो ॥

वृ. एकस्मिन् निर्यापके संयमविराधना आत्मविराधना च भवति, । तथा हि-कृतभक्तप्रत्याख्याननिमित्तं पानकग्रहणायाटन् यदा क्वापि न लभते, तदा माभत पश्चात् ग्लानस्यासमाधिरित्याधार्कमिकमपि पानकं गृह्णीयादिति संयमविराधना, निरन्तरमेकस्य क्लिश्यमानस्यात्मविराधना तथा कार्यहानिश्च भवति । तथाहि मरणसमये समाध्युत्पादनाय सोपेक्षते । स च कदाचित्तत्समये पानकादिनिमित्तमन्यत्र गतो भवेत् तथा स भक्तप्रत्याख्यानस्त्यक्तः शैक्षा अपि च त्यक्ताः प्रवचनतस्त्यक्तमुड्डाहश्चोपजायते । एतद्विभावनार्थमाह-

भा. [४२७१] तस्सट्ठ गतोहासणादि अदाने सो परिच्चत्तो ।
दाउं व अदाउं वा भवंति सेहा व निद्धम्मा ॥

वृ. तस्य प्रत्याख्यानभक्तस्यार्थाय पानकादीनां मागणाय गतो निर्यापकस्तस्य समीपे शैक्षकोऽपरिणतो वा मुक्तस्तस्य समीपे उहासणेति भक्तं याचितं ते च शैक्षकादयो न कल्पते । एतस्य च भक्तं कृतप्रत्याख्यानत्वादिति न ददति दाने च सोऽसमाधिना मरणं प्राप्नुयदिति चैतदेवमेव हिंसादिप्रत्याख्यानान्यपि ततः कल्पन्ते हिंसादयोऽपीति निर्धर्माणो जायंते ।

भा. [४२७२] कूयइ अदिज्जमाणे, मारेन्ति बलत्ति पवयणं चत्तं
सेहा य पडिगया जणे अवण्णं पयासेंति ॥

वृ. तैः शैक्षकैरेवादीयमाने भक्ते स महत्ता शब्देन कूजति यथा मामेते बलान्मारयन्ति इत्येवमुक्तेन प्रकारेण प्रवचनं त्यक्तं । तथा शैक्षा ये प्रतिगताः प्रतिभग्नाः सन्तो जनेऽवज्ञां प्रकाशयन्ति । एष उड्डाहः । गतमेकद्वारमाभोगेन द्वारमाह-

भा. [४२७३] परतो सयं व नच्चा पारगमिच्छंत्ति अपारगे गुरुगा ।
असती खेमसुभिक्खे निव्वाघाएण पडिवत्ती ॥

वृ. भक्तं प्रत्याख्यातुकामः कोऽपि समागतस्ततः आचार्येणाभोगः कर्तव्यो यावदस्य भक्तप्रत्याख्यानं समाप्तिमुपयाति तावदशिवाद्युपद्रवो नगरादीनां वोत्थानं भविष्यति किं वा नेति, तच्च कथं ज्ञातव्यं ते (तत्) स्वयमाचार्यस्यातिशयोऽस्ति तेन ज्ञातव्यं, यदि वा निमित्तमासोगमीमथवा स्वयं देवता कथयति यथा कंचनपुर गाथा इत्यादि । अथ स्वतोऽतिशयो निमित्तं वा नास्ति तर्हि येषां ते स्वयं प्रष्टव्याः एवं स्वतः परतो वा अशिवादीनां नगरोत्थानादीनां वा भावमवबुद्धय पुनरिदं ज्ञातव्यं । किमेष प्रत्याख्यानस्य पारगो भविष्यति किं वा नेति । तत्र यदि पारगतो ज्ञायते ततस्तं पारगमिच्छन्ति अथ चापारगं नेच्छन्ति, तथा अपारगे इष्यमाणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायश्चित्तं चत्वारो गुरुकाः। अथ स्वस्य परस्य चातिशयादिर्न विद्यते ततोऽसति अविद्यमाने आभोगे यदि क्षेमं सुभिक्षं तदा निर्व्याघातेन प्रतिपत्तिः कारयितव्या, वर्षाकाले प्रतिपत्तिः कार्यते इत्यर्थः। एतदेवाह-

भा. [४२७४] सव्वेव चिरं वासो वासावासे भवसि नं।
तेन तस्स विसेसेन वासासु पडिवज्जाणा॥

वृ. वर्षारात्रे वर्षोदककर्दमादिकारणतश्चतुरः पञ्चषट् वा मासानुग्रामादीनामुत्थानं न भवति, क्षेमं सुभिक्षं च स्वभावो वर्तते तपस्विनां च वर्षावासे चिरं वासः स्वयमेव प्रवृत्तस्तेन कारणेन तस्य भक्तप्रत्याख्यातुकामस्य विशेषतो भक्तप्रत्याख्यानप्रतिपादनके कर्तव्या, पूर्वमिदमुक्तं स्वयं देवता कथयति तच्च निदर्शनमाह-

भा. [४२७५] कंचनपुरगुरु अन्ना देवय रुवणा य पुच्छ कहणा य।
पारणगखीररुहिरं आमंतण संघानसणया॥

वृ. कलिङ्गेषु जनपदेषु काञ्चनपुरे नगरे बहुश्रुताः बहुशिष्यपरिवाराः केचिदाचार्याः विहरंति, ते अन्यदा शिष्येभ्यः सूत्रपौरुषीं अर्थपौरुषीं च दत्वा संज्ञाभूमौ गतास्ते च गच्छन्तोऽपांतराले अतिशये महापादपस्याधः कांचिद्देवतां स्त्रीरूपेण रुदन्तीं पश्यन्ति। एवं द्वितीयतृतीयदिनेऽपि ततो गुरुभिर्जातशङ्कैः पुष्टं कस्मात् रोदिषि। तस्याः कथनमहमेतस्य नगरस्याधिष्ठात्री। एतच्च सर्वं नगरमचिराज्जलप्रवाहेण विनंक्ष्यति। अत्र च बहवः स्वाध्यायवन्तो वर्तन्ते ततो रोदिमि। कोऽत्र प्रत्यय इति पृष्टे सा प्राह-अमुकस्य क्षपकस्य पारणके क्षीरं रुधिरंभविष्यति, तच्च यत्र गतानां स्वभावीभूतं भविष्यति तत्र क्षेमम् वसितव्यमिति। एवमुक्ता सा, एतद्वितीयदिने क्षपकस्य पारणके क्षीरं रुधिरीभूतं। ततः समस्तस्यापि संघप्रधानवर्यस्यामंत्रणं पर्यालोचनं च ततोनशनं समस्तस्यापि सङ्घस्येति। यदि पुनरशिवाद्युत्थाने विज्ञाते यदि भक्तं प्रख्यापयति तदा सगच्छसाधवः प्रवचनं च तेन त्यक्तं कथमित्याह-

भा. [४२७६] असिवादीहिं वहंता तत्थ च कारणं च संजया चत्ता।
उवहिं विनायच्छम्मण चत्तो सो पवयणं चेव॥

वृ. यदि अशिवाद्युपद्रवं ग्रामाद्युत्थानं च ज्ञात्वा भक्तं प्रख्यापयति तदा तस्मिन् निर्यापिते एवाशिवाद्युत्थाने जाते यदि संयतास्तत्प्रतिबन्धतो न निर्गच्छन्ति। गच्छन्तो वा यदि तं कृतभक्त-प्रत्याख्यानं तस्योपकरणं च वहंति तदा ते संयता अशिवादिभिः कारणैस्तमुपकरणं च वहन्त-स्त्यक्ताः अथोपधिं विनिर्वहन्ति त्यक्त्वा वा सर्वथा पलायन्ते तदा स भक्तप्रत्याख्याता परित्यक्तः। स च त्यक्तः सन् उड्डाहं कुर्यात्। मां त्यक्तवा ते गता इति तदा प्रवचनस्य महती हीलनेति प्रवचनं त्यक्तं तस्मादशिवाद्युत्थाने अपारगे च तस्मिन् ज्ञाते स भक्तं न प्रत्याख्यातयितव्यः।

गतमाभोगेन द्वारमिदानीमन्यद्वारमाह-

भा. [४२७७] एगो संथारगतो बिइतो संलेहे तइय पडिसेहो,
अपहुच्चंत समाही तस्स वा तेसिं च असतीए॥

वृ. यदि तत्र द्वौ जनावग्रे स्तस्तद्यथा एकः संस्तारगतः संस्तारगतो नाम संलिख्यकृत-प्रत्याख्यानो द्वितीयः संलिखति संलेखनां करोति तथा तृतीयो यद्यन्य उपतिष्ठति तर्हि तस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तृतीयस्य प्रतिषेधः कर्तव्यः । किं कारणमिति तेदत आह-अपहुच्चतेत्यादि, न प्रभवन्ति न प्राप्यन्ते त्रयाणामपि योग्या निर्यापका न च संस्तरन्ति। ततोऽप्रभवः अप्राप्यमाणेषु तेषु संस्तारण-स्यास्य वा सति तस्य तृतीयस्य तयोर्वाग्रेतनयोस्तेषां वा निर्यापकाणां असमाधिरुपजायते । प्रथमं सन्ति बहवो निर्यापकाः संस्तरन्ति च तदा न कश्चिदनन्तरो दोषः प्रसजतीति तृतीयामपि प्रतीच्छन्ति ।

भा. [४२७८] हवेज्ज जइ वाधातो बितियं तत्थ ठावए।
चिलिमिलि अंतरा चेव बहिं विदावए जनं ॥

वृ. यदि तस्य कृतभक्तप्रत्याख्यानस्य व्याघातो भवेत् व्याघातो नाम प्रत्याख्यानेनासंस्त-रणं स च बहिः सर्वत्र ज्ञातो दृष्टश्च भूयसा लोकेन एष कृतभक्तप्रत्याख्यान इति, ततः एषा यतना कर्तव्या। योऽसौ द्वितीयः संलेखनां कुर्वन् तिष्ठति स तत्र स्थाप्यते तस्यान्तरा चिलिमिलि कर्तव्या। ततो यदि यै र्ज्ञातो दृष्टः ते वन्दकाः समागच्छेयुः तदा स तेषां न दर्शयितव्यः किन्तु ते भण्यन्ते बहिः स्थिता यूय वन्दध्वमिति । एवं बहिः स्थितं जनं वन्दापयेत् । गतमन्यद्वारम्

भा. [४२७९] अनापुच्छा एगस्स पडिच्छेवं जती गुरू गुरुगा।
चत्तारि वि विन्नेया गच्छमनिच्छंते जं पावे ॥

वृ. गच्छस्यानापृच्छया यदि तं भक्तं प्रत्याख्यातुकामं गुरुः प्रतीच्छति अभ्युपगच्छति तदा तस्य प्रायश्चित्तं चत्वारो गुरुका विज्ञेयाः गच्छे वाऽनिच्छति स भक्तप्रत्याख्याता यत्प्राप्नोति असमाधिप्रभृतिकं तन्निमित्तमपि तस्य प्रायश्चित्तं(ततः) गच्छ आपृष्टव्याः । किं कारणमिति चेदुच्यते। स गच्छसाधवः सर्वं परिभ्रमन्तो जानते, यथा एतस्मिन् क्षेत्रे एतत्सुलभमेतत् दुर्लभं ततो मुखः पृच्छति किमेतस्मिन् क्षेत्रे यानि कृतभक्तप्रत्याख्यानस्य समाधिकरणानि द्रव्याणि तानी सुलभानि किं वा दुर्लभानि। तत्र यदि सुलभानि तत् भक्तप्रत्यख्यानं प्रतिपाद्यते। अथ दुर्लभानि तर्हि प्रतिषिध्यते। अन्यत्र गत्वा प्रतिपद्यस्वेति, अनापृच्छायां दोषानाह-

भा. [४२८०] पानगादीनि जोगाणि जानि तस्स समाहिए।
अलंभे तस्स जा हानी परिक्कोसा य जायणे ॥

भा. [४२८१] असंथरं अजोग्गा वा जोग्गावाही व ते भवे ।
एसणाए परिक्कोसा जाया तस्स विराधना ॥

वृ. गणस्यानापृच्छायां यानि तस्य कृतभक्तप्रत्यख्यानस्य समाहिते समाधाननिमित्तानि पानकादीनि योग्यानि आदिग्रहणेन भक्तपरिग्रहः तेषामलाभे तस्य प्रत्याख्यातुः यदि निःसमाधिः परिभ्रंश उपजायते, यश्च गच्छसाधूनां योग्या पानकादेर्याचने परिमार्गणे परिक्लेशस्तथा असंस्तरः संस्तरणाभावे यः परिक्लेशो अयोग्या वा तत्र निर्यापका भवेयुः योगवाहिनोप्येते तत्र योगवाहिनां समाधिकारकाणि पानकादीन्युद्गमानि शुद्धानि मृगयमाणानां यः परिक्लेशो वाऽयोग्य-निर्यापकसंपर्कतस्तस्य कृतप्रत्याख्यानस्य विराधना अनागाढदिपरितापना असमाधिमरणादिकं तत्सर्वं तन्निमित्तमतो गच्छस्य पृच्छा कर्तव्या। गतमनापृच्छाद्वारमधुना परीक्षाद्वारमाह-

भा. [४२८२] अपरिच्छाणंपि गुरुगा दोण्हवि अन्नोन्नयं जहा कमसो।
होइ विराधना दुविहा एक्को एक्को वजं पावे ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. यो भक्तं प्रत्यख्यातुकामस्तेन गच्छसाधवः परीक्षितव्याः किमेते भाविता इति गच्छ-साधुभिरपि स परीक्षणीयः। किमेष निस्तारको भवेत् किं वा नेति, आचार्येणापि परीक्षित-व्यः। अन्योन्यं पुनर्यथा क्रमशो वक्ष्यमाणक्रमेणपरीक्षणे द्वयोरपि गच्छस्य भक्तं प्रत्यख्यातुकाम-स्य च प्रायश्चित्तं प्रत्येकं चत्वारो गुरुकाः। तथा अपरीक्षणे भवति द्विविधा विराधना, आत्म-विराधना संयमविराधना च, तत्र गच्छस्यात्मविराधनाऽसमाधिमरणतः प्रत्यवायसंभवात् भक्त-प्रत्यख्यातुः आत्मविराधना असमाध्युत्पादात् संयमविराधना गच्छस्याभावितत्वेन एषणाया असंभवात्। एक्को एक्को व जं पावे एको गच्छे यमनर्थं प्राप्नोति एको वा स भक्तप्रत्याख्याता तन्निमित्तमपि तस्य प्रायश्चित्तमापद्यते-

भा. [४२८३]　　तम्हा परिच्छेणं तु दव्वे भावे य होइ दोण्हंपि।
　　　　　　　　संलेहे पुच्छदायण दिट्ठंतो अवच्चकोंकणए॥

वृ. यत एवपरीक्षणे प्रायश्चितं दोषाश्च तस्माद्द्वयोरपि परस्परं द्रव्ये भावे च भवति परीक्षणं तच्चैवं भक्तं प्रत्यख्यातुकामेन परीक्षानिमित्तं गच्छसाधवो भणिता यथा आनयत मम योग्यं कलमशालिकूरं कथितं क्षीरं, ततो भक्ष्येऽथवाऽन्यद्‌भोजनं प्रणीतं यत्स्वभावतो रुचिकरं तत् आनयतेति याचते तत्रैवं याचने यदि ते हसन्ति कृष्णमुखा वा जायन्ते तदा ज्ञेयमभाविता एते इती तेषां समीपे न प्रत्याख्यातव्यमथ ते ब्रुवते यद् भणसि तत् कुर्म इति तदा ज्ञेयं योग्य एते इति, तथा गच्छसाधुभिः परीक्षानिमित्तं कलमशालिकूरप्रभृतिकमुत्कृष्टं द्रव्यमानेतव्यं, तस्मिन्ना-नीते यदि स ब्रूते-अहो सुन्दरमानीतं भुञ्जेऽहमिति तदा ज्ञातव्यमेष आहारलुब्ध इति न निस्तरिष्यति वक्तव्यश्च स यदा त्वमाहारगृद्धिं त्यक्ष्यसि तदा ते भक्तपरिज्ञायां योग्यता भविष्यति नान्यदा। अथ स तमुपनीतमाहारं जुगुप्सते किं ममैतेनाहरितेन पर्याप्तं नाहामाहारयामीति तदा ज्ञातव्यमेष निस्तरिष्यति तस्मिन् वक्तव्यं प्रत्याख्याहि, वयं ते निर्यापका इति इह तु याचितस्य द्रव्य-सम्पादनमसम्पादनं च सा गच्छस्य द्रव्यतः परीक्षा यत्पुनः सकषायित्वमकषायित्वं वा ज्ञायते तद्‌भावपरीक्षणं। तथा भक्तप्रत्यारूयातुरप्यानीतसुन्दरस्य ग्रहणमग्रहणं वा द्रव्यतः परीक्षणं, भावतो गृद्धयगृद्धिपरिज्ञानमिति आचार्यस्य तत्परीक्षणमाह संलेहपुच्छइत्यादि यदा स आचा-र्याणामुपस्थितो भवति भक्तप्रत्याख्यातेनाहं तिष्ठामि। तदा स आचार्येण प्रष्टव्यः किमत्र संलिखितं त्वया न वेति ततः स चिन्तयति पश्यति मे अस्थिचर्मावशेषं शरीरं तथापि प्रश्नयति संलिखितं न वेति। एवं चिन्तयित्वा क्रोधे दर्शिते क्षिप्रमङ्गुलिं भंक्त्वा दर्शयति पश्य, यत्र किंचिन्मद्यं (रक्तं) मांसं वा द्रक्ष्यसि भवति संलिखितं किं वानेति। एवमुक्ते गुरुराह-न तेद्रव्यसंलेखं पृच्छामि कृशशरीरंप्रत्यक्षत एवोपलभ्यमानत्वात्। किन्तु भावसंलेखं। स चाद्यापि न विद्यते इति भावसंलेखं कुरु। श्रूयतां चात्र दृष्टान्तोऽमात्यकोंकणविषये।

साम्प्रतमेनामेव गाथां व्याचिख्यातुर्गच्छपरीक्षामाह-

भा. [४२८४]　　कलमोयणपयकढियादि दव्वे आनेहि मित्ति उदिते।
　　　　　　　　भावे कसाइज्जंती तेसि सगासे न पडिवज्जे॥

वृ. कलमोदनं कलमशालिकूरं पयो दुग्धं क्वथितमादिशब्दात् अन्यस्याप्यभीष्टस्य, भोजनस्य परिग्रहो मम योग्यमानयतेति द्रव्ये उदिते यदि भावे भावतः कषायन्ति कषायं कुर्वन्ति।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

ततस्तेषां समीपे भक्तपरिज्ञां न प्रतिपद्यते, अयोग्यत्वात्।

भा. [४२८५] अह पुन विरूवरूवे आनीय दुगुंच्छियभणंतत्रं।
आनेसुवत्ति ववसिए पडिवज्जति तेसि तो एसो ॥

वृ. अथ पुनर्विरूपरूपे अनेकप्रकारे आहारे आनीते जुगुप्सते भणन्ते भणंत्यन्यमाहार-मानयामस्तथैव नेतुं व्यवसितस्तेषां पार्श्वे प्रतिपद्यते। यथाभिलषितवस्तुसम्पादकया तेषां योग्यत्वात्। सम्प्रति गच्छस्य तत् परीक्षामाह-

भा. [४२८६] कलमोयणे अपयसा अन्नं च सभाव अनुमयं जस्स।
उवनीयं जो कुत्थइ तं तु अलद्धं पडिच्छंति ॥

वृ. कलमोदनं कलमशालिकूरं पयसा सहोपनीतमिति अन्यद्वा तस्य स्वभावतोऽनुमतं तस्य तदुपनीतं सत् यः कुत्सते(कुत्सयते) निन्दति किं ममैतेन कार्यमिति तमलुब्धमिति ज्ञात्वा प्रतिच्छन्ति। यस्तु कलमौदनादिके उपनीते अहो सुन्दरमहं भुञ्जे इति स लुब्ध इति न प्रत्येष-णीयः। आचार्यस्य तत्परीक्षामाह-

भा. [४२८७] अज्जो संलेहो ते किं कतो न कओत्ति एवमुदीयंमि।
भत्तं अंगुलिदावे पेच्छह किं कतो न कतो ॥

वृ. अयं संलेखस्त्वया किं कृतो वेत्येवसुदिते अङ्गुलिं भंक्त्वा दर्शयति। प्रेक्षस्व किं कृतः कि वा न कृत इति तत आचार्य आह-

भा. [४२८८] न हु ते दव्वसंलेहं पुच्छि पासामि ते किसं।
किसे ते अंगुली भग्गा भावसंलेहमाउरो ॥

वृ. न हु नैव ते तव द्रव्यसंलेखं पृच्छामि यतः पश्यामि ते कृशं शरीरं तस्मात्किमिति त्वया अङ्गुलिर्भग्रा पृच्छामि भावसंलेखं, मा क्रोधवशादातुरो भव। सम्प्रति दिट्ठंतोऽमच्चकोंकणए इत्येतद्भावयति

भा. [४२८९] रन्ना कोंकण मच्चा दोवि निव्विसया कया।
दोड्डिए कंचियं छोढुं कोंकणे तक्खणा गतो ॥

भा. [४२९०] भंडीओ वइल्लएकाए अमच्चो जा भरेति उ।
ताव पुन्नं तु पंचाहं नलिए निहणं गतो ॥

वृ. केनापि राज्ञा एकः कोंकणकोऽपरोऽमात्य एतौ द्वावपि कस्मिंश्चदपराधे समकमा-ज्ञप्तौ। यदी पञ्चाहाभ्यन्तरे निर्विषयौ न व्रजतस्तोऽवश्यं वध्याविति तत्र कोङ्कणको दोग्धिके तुम्बके काञ्जिकं काञ्जिकपयांसि क्षित्वा तत् क्षणात् गतः अमात्यः पुनर्यावत् भण्डी ग्रन्थी वलीवर्दान् कायानुकापौती बिभर्त्ति तावत् पूर्णं पञ्चाहमिति नलिके शूलिकामारोपिता निधनं गतो विनाशं प्राप्तः,। यथा सोऽमात्यः कुटुम्बोपकरणप्रतिबद्धो विनाशमुपगतः। एवं त्वमपि भावप्रतिबद्धो नाराधनाजीवितं प्राप्स्यसि तस्मात्।

भा. [४२९१] इंदियाणि कसाए य गारवे य किसे कुरु।
न चेयं ते पसंसामो किसं साहु सरीरगं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. इन्द्रियाणि चक्षुरादीनि कषायान् क्रोधप्रभृतीन् गौरवाणि ऋद्धिगौरवप्रमुखाणि कृशानि (कुरु) न चेदं ते साधोः कृशं शरीरकं प्रशंसामो भावसंलेखव्यतिरेकेण द्रव्यसंलेखस्यापि किञ्चित्करत्वात्। गतं संलेखनाद्वारमिदानीमालोचनाद्वारमाह-

भा. [४२९२] आयरियपायमूलं गंतूणं सइ परक्कमे।
तहि सव्वेण अत्तसोही कायव्वा एस उवएसो ॥

वृ. तत्तो द्रव्यसंलेखना भावसंलेखनानन्तरं भक्तं प्रत्याख्यातुकामेन सर्वेण स्वयं शोधिं जानताऽजानता च सति पराक्रमे आचार्यपादमूले गत्वा शोधिः कर्तव्या। एष तीर्थकृतां गण-भृतां चोपदेशः तत्र स्वयं शोधिं जानन्तः प्रत्याह-

भा. [४२९३] जह सकुसलो वि वेज्जो अन्नस्स कहेइ अत्तणो वाहिं।
वेज्जस्स य सो सोउंतो पडिकमं समारभते ॥

भा. [४२९४] जाणंतेण वि एवं पायच्छित्तविहिमप्पणो निउणं।
तह वि य पागडतरयं आलोएयव्वयं होइ ॥

वृ. यथा सुकुशलोऽपि वैद्योऽन्यस्यात्मनो व्याधिं कथयति सोऽपि वैद्यस्य श्रुत्वा व्याधिकथनं ततः प्रतिकर्म समारभते। एवं प्रायश्चितविधिमात्मनो निपुणं जानतापि तथापि प्रकटतर-मालोचयितव्यं भवतीति कृत्वा अन्यस्य समीपे आलोचयितव्यं। ततोऽप्यनेन किं कर्तव्यम्

भा. [४२९५] छत्तीसगुणसमन्नागएण तेन वि अवस्स कायव्वा।
परिपक्खिया विसोही सुट्ठुविवहार कुसलेणं ॥

वृ. तेनाप्यनेनाचार्येण षट्त्रिंशद्गुणसमन्वागतेन षट्त्रिंशद्गुणा अट्ठविहा गणिसंपय इत्यादिना प्रोगेवाभिहिताः। सुष्ठुअपि व्यवहारकुशलेन परपक्षिका परपक्षे गता विशोधिरवश्यं कर्तव्या। कथं पुनरात्मनः शोधिजातमप्यालोचयदित्याह-

भा. [४२९६] जह बालो जपंतो कज्जमकज्जं च उज्जुयं भणइ।
तं तह आलोइज्जा मायामयविप्पमुक्को उ ॥

वृ. अथ बालो जल्पेन् कार्यमकार्यं च ऋजुकममायं भणति तथा मायामदविप्रमुक्त-स्तत्कार्यमकार्यं वा गुरोः पुरत आलोचयेत्। सम्प्रति मायानिर्धातने उपदेशमाह-

भा. [४२९७] उप्पन्ना उप्पन्ना माया अनुमग्गतो निहंतव्वा।
आलोयणनिंदणगरहणेहिं न पुनो अवितहेत्ति ॥

वृ. उत्पन्ना उत्पन्ना माया मार्गतः पष्ठे लग्नेन आलोचननिन्दनगर्हनैर्निहन्तव्या। कथमित्याह-न पुनरेवं द्वितीयं वारं करिष्यामीति प्रतिपत्त्या, संप्रत्यालोचनायां ये गुणा भवन्ति तानुपदर्शयति;

भा. [४२९८] आयारविनयगुण कप्पदीवणा अत्तसोहि उजु भावो।
अज्जवमद्दवलाघव तुट्ठीपल्हायजननं च ॥

वृ. आलोचनायां दत्तायामाचारः पञ्चविध आसेवितो भवति, विनयगुणश्च प्रवर्तितो भवति, कल्पदीपनानामवश्यमालोचयितव्यो अतीचार इत्यस्य कल्पस्य प्रकाशनमन्येषामुपदर्शनं, ततस्तेऽप्यन्ते एवं कुर्वन्ति। तथा आत्मनो विशोधिर्निःशल्यता कृता भवति। तथा ऋजुसंयम-स्तस्य भावो भवनं तत्कृतं भवति,। तथा आर्यभवमार्यत्वं, मार्दवममानत्वम् लाघवमलोभत्वमेतानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतानि भवन्ति। तथा आलोचिते सति निःशल्यीभूतोऽहमिति तुष्टिरुपजायते। तथानालेचितऽतीचारे सशल्योऽहमिति या मनस्यऽधृतिः (तस्याः) परिदाहापगमात् प्रल्हादजननं प्रल्हादोत्पादः, शीतीभवनं भवति। कः पुनः सोऽपि अतिचारः कुतो वा प्रभृत्यालोचयितव्यमताह-

भा. [४२९९] पव्वज्जादी आलोयणा उ तिण्हं चउक्कगवि सोही।
जह अप्पणो तह परे कायव्वा उत्तमट्ठंमि ॥

वृ. त्रयाणां ज्ञानदर्शनचारित्राणां अतीचारेषु प्रव्रज्यादेरारभ्य यावदुत्तमार्थाभ्युपगमस्तावदालोचना दातव्या कथमित्याह-चतुष्कः विशोध्या एकैकस्मिन् द्रव्यतः क्षेत्रतः कालतो भावतश्चातीचारविशुद्धया पुनः कथमित्याह-यथात्मनः सम्यक् ज्ञेयतया तिष्ठति तथा परस्मिन् आलोचना कर्तव्या देशतः सर्वतो न किंचिदपि गूहीतव्यमिति भाव उत्तमार्थे उत्तमार्थप्रतिपतौ कर्तव्यतायां तत्र ज्ञाननिमित्तं द्रव्यतोऽतीचारालोचनामाह-

भा. [४३००] नाणानिमित्तं आसेवियं तु वितहं परूवियं वावि।
चेयणमचेयणं वा दव्वं सेसेसु इमगं तु ॥

वृ. ज्ञाननिमित्तं सचित्तं अचित्तं द्रव्यमुद्गमाद्यशुद्धं तथा सचेतनमचेतनं वा वितथं प्ररूपितं भवेत्तद्यथा-सचित्तमचित्तं वा सचित्तमिति एतत् द्रव्यतोऽतीचारालोचनं शेषेषु तु क्षेत्रादिष्विदमतीचारालोचनं तदेवाह-

भा. [४३०१] नाणनिमित्तमद्धाणमेति उमे य अच्छति तदट्ठा।
नाण व आगमेस्संति कुणंति परिकम्मणं देहे ॥

भा. [४३०२] पडिसेवति विगतीतो मज्झदव्वो व एसति वि वत्ती।
वायंतस्सवि किरियाइ कया पणगाइहाणीए ॥

वृ. ज्ञाननिमित्तमध्वानं पन्थानमिति प्रतिपद्यते अध्वानं प्रतिपन्ने च यस्तचित्तमकल्पिकमयतनया यतनया वा च तत् आलोचयति, । इदं क्षेत्रतोऽतीचारालोचनं। तथाऽवमेऽपि दुर्भिक्षेऽपि तदर्थं ज्ञानार्थं तिष्ठति, तत्र च तिष्ठिता यदकल्पिकमासेवितमयतनया यतनया वा तदालोचयति, इदं कालतोऽतीचारालोचनम्। भावत आह-नाणं चेत्यादि ज्ञानमहमागमिष्यामि ग्रहीष्यामीति हेतोर्देहे शरीरस्य परिकर्म करोति, यथा व्याख्याप्रज्ञेसेर्महाकल्पश्रुतस्य वा योगं वोढुकामो घृतं पिबति, प्रणीतं चाहारमुपभुङ्क्ते। तत्र या अयनता कृता, अथवा कश्चिद्रोग आसीत्। मा स तत्काले उद्रेकं यायादिति परिकर्म करोति, तच्च कुर्वता या अयतना कृता निर्विकृता विकृतीर्नानाप्रकारा निरन्तरं प्रतिसेवते तत्रापि या अयतना कृता मेघ्यानि द्रव्याणिनामयैर्मेधा उपक्रियते। तानि द्रव्याणि एपयता परिमार्गयता पिबता वा या अयतना व्यधायि तथा वाचयतो वाचनाचार्यस्य पञ्चकादिहान्या क्रिया कृता अपि शब्दात्पञ्चकादिहान्यातिक्रमेण वा या कृता क्रिया तामप्यालोचयन्ति। तदेवं ज्ञाननिमित्तं द्रव्याद्यतीचारालोचनमुपदर्शितमधुना दर्शननिमित्तं चारित्रनिमित्तं चाह-

भा. [४३०३] एमेवदंसणम्मि वि सद्दहणा नवरि तत्थ नाणत्तं।
एसण इत्थी दोसो वयातिचरणे सिया सेवा ॥

वृ. एवमेव अनेनैव प्रकारेण ज्ञानगतेन प्रकारेण दर्शनेऽपि दर्शननिमित्तमपि द्रव्याद्यतीचार-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञातमालोचयितव्यं नवरं तत्र नानात्वं दर्शनं नाम श्रद्धानं चरणेऽपि चारित्रेऽपि स्यादियमतीचारता सेविता, तद्यथा-एषणायामेषणाविषये दोषोपेतबसतिविषये व्रतविषयो वेति।

सम्प्रत तिण्हं चउक्कमविसोही इथ्यस्यान्यथा व्याख्यातुमाह-

भा. [४३०४] अहवा तिगसालंबेण दव्वमादी चउक्कमाहच्च।
आसेवियं निरालंतोव्व आलोअए तं तु ॥

वृ. अथवेति प्रकारान्तरे त्रिकसालंबेनोपेतेन द्रव्यादिचतुष्कं द्रव्यक्षेत्रकालभावलक्षणमाहच्च कदाचित्। अकल्पनीयमयतनया यतनया वा सेवितमथवा निरालम्बको ज्ञानाद्यालम्बनरहितो द्रव्यादिचतुष्कमकल्पिकमासेवितवान्। एतेनैतत् ख्यापितं यत् प्रतिसेव्यते किञ्चिदकल्पिकं तत् दर्पतः कल्पतो भावतः परमपरप्रकारान्तरमस्तीति एतेत् आलोचयेत्।

भा. [४३०५] पडिसेवणातियारा जइ वीसरिया कहं चिहुज्जाणु।
तेसु कह वट्टियव्वं सल्लुद्धरणंपि समणाणं ॥

वृ. प्रतिसेवनातिचारा यदि कथमपि विस्मृता भवेयुस्तेषु शल्योद्धरणे कर्त्तव्ये कथं श्रमणेन वर्तितव्यं। सूरिर्वर्तनप्रकारमाह-

भा. [४३०६] जे मे जाणंति जिना अवराहे जेसु जेसु ट्ठाणेसु।
तेहिं आलोएउं उवट्ठितो सव्वभावेणं ॥

भा. [४३०७] एवं आलोएंतो विसुद्धभावपरिणामसंजुत्तो।
आराहओ तह वि सो गारव पडिकुंचना रहितो ॥

वृ. यान्ममापराधान् येषु येषु स्थानेषु जिनाःकेवलिनो भगवन्तो जानन्ति तानहं सर्वभावेन सर्वात्मना आलोचयितुमुपस्थितः परं न स्मरामि वचसा न प्रकटीकर्तुं शक्नोमि,। तस्माज्जिन-दृष्टान्तमेव प्रमाणमित्यालोचयितव्यं। यद्यप्येवं संमुग्धाकारमालोचयति। तथापि स गौरव-प्रतिकुञ्चनारहितो विशुद्धेन भावपरिणामेन संयुक्त एवमालोचयेत् आराधकः प्रतिकुञ्चना नाम माया, गतमालोचनाद्वारमधुना प्रशस्तस्थानद्वारमाह-

भा. [४३०८] ट्ठाणं पुन केरिसगं होइ पसत्थंतु जस्स जं जोग्गं।
भण्णति जत्थ न होज्जा कारणस्स उ तस्स वाघातो ॥

वृ. तस्य भक्तं प्रत्याख्यातुर्यत्प्रशस्तं योग्यस्थानं तत् कीदृशं सूरिराह-भण्यते यत्र तस्य कृतभक्तप्रत्याख्यानस्य ध्यानव्याघातो भवति तान्युपदर्शयति।

भा. [४३०९] गंधव्वनट्टजड्डो स्स चक्कजन्तग्गिकम्म पुरुसे य
नंतिक्क रयग देवडडोंब पाहिडिग रायपहे ॥

भा. [४३१०] चारगकोट्ठग वट्ठाण, कप्पपुप्फदगसमीवं मि,
आरामे अहवियटे नागधरे पुव्वभणिए य ॥

वृ. गन्धर्वशालायं यत्र गन्धर्विकाः संगीतं कुर्वन्ति तत्र गन्धर्वशालासमीपे वा न स्थातव्यं ध्यानव्याघातभावात्। तथा नृत्यशालासमीपे वा तत्राप्युक्तदोषसंभवात्। तथा जड्डो हस्ती अश्वस्तुरङ्गमो हस्तिशालासमीपे वा तुरंगमशालासमीपे वा हस्तिकादिविरूपशब्दश्रवणतो ध्यानव्याघातभावात् तथा चक्रशालायां तिलपीडनशालायां तिलपीडनशालासमीपे वा जन्तति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इक्षुयंत्रशालायाम् इक्षुपीडनशाला समीपे वा तिलादिदर्शनतः कर्मकरगानशब्दशर्वणतो वा ध्यानभङ्गोपपत्तेः अग्निकर्म लोहकारकर्म तच्छाला अग्निकर्मलोहकारकर्मशालायां अग्निकर्मशालासमीपे वा पुरुषः कुंभकारः कुंभकारशालायां कुंभकारशालासमीपे वा अग्निपरितापतो लोहकुट्टनादिशब्दश्रवणतो बाध्यते व्याघातसंभवात् तथा नन्तिक्ताः छिपास्तच्छालासमीपे वा रजकशालायां रजकशालासमीपे वा देवडशालायं समीपे वा जुगुप्सादोषात् डोम्बलंखकास्तेऽपि गायन्ति। अथवा चण्डालविशेषगायना डोम्बास्तेषां शालायां तच्छालासमीपे वा जुगुप्सादोषात्। गानशब्दश्रवणतो ध्यानव्याघातभावाच्च तथा पाडहिक-शालायां पाडहिकसमीपे वा वादित्रशब्दश्रवणतो ध्यानव्याघातः राजपथे समीपे वा राज्ञ आगच्छता गच्छता वा समृद्धिदर्शनतो निदानकरणप्रसक्तेः, तथा चारको गुप्तिगृहं तत्र तस्य समीपे धारयता शब्दश्रवणतो ध्यानव्याघातभावात् कोष्ट्राका नाम वट्टानां शाला, कोष्ट्रके कोष्ट्रकसमीपे वा वट्टा अपि गायन्ति, विरूपरूपाणि च भाष्यते, ततो ध्यानव्याघातः, तथा कल्पपालाः सुरादिविक्रयकारिणो मद्यपा वा तेषां शालायां तच्छाला समीपे वा यसस्तत्र मत्तप्रमत्ता गायन्ति पूत्कुर्वन्ति ततो ध्याने व्याघातसंभवः तथा क्रकचके यत्र काष्ठानि क्रकच्यन्ते क्रकचसमीपे वा। काष्टक्रकचशब्दश्रवणतः कारपत्रिकगानशब्दश्रवणतो ध्यानभ्रंशोपपत्तेः पुप्फफलदगसमी-वम्मित्ति पुष्पसमीपे फलसमीपे उदकसमीपे वा पुष्पादिदर्शनतः तद्विषयाभिलाषोपपत्तेः। तथा आरामे तत्राप्यनन्तरोदितदोषप्रसङ्गात् यथा विकटं नाम असंगुप्तद्वारम्(च)। तत्र पानके पाने कायिक्यादि परिस्थापने च सागारिकसंभवात् तथा नागगृहे उपलक्षणमेतत्। यक्षगृहादिषु तत्रापि भूयसां लोकानां नानाविधविकुर्वितवेषाणामागत्यागत्यगाननर्तनकरणात्तथा च सति ध्याने व्याघातसंभवः। यदि वा नागदयोऽनुकम्पया प्रत्यनीकतया विमर्शेन वा अनुलोमान् प्रतिलो-मान्वा उपसर्गान् कुर्युः। पूर्वभणिते च प्राक्कल्पाध्ययनाभिहिते च भक्तप्रत्याख्यातुकामे तदेव भावयति।

भा. [४३११] पढमबिइएसु कप्पे उद्देसेसु उवस्सया जे उ।
विहिसुत्ते य निसिद्धा तव्विवरीए गवेसेज्जा॥

वृ. कल्पे कल्पाध्ययने द्वितीयतृतीययोरुद्देशयोर्विधिसूत्रे च आचाराङ्गे शय्याध्ययने अवग्रह-प्रतिमास्थाननिषीदनके च ये उपाश्रया निषिद्धास्तेषुनस्थातव्यं। किन्तु तद्विपरीतान् प्रदेशान् गवेषयेत्। तथा -

भा. [४३१२] उज्जाणरुक्खमूले सुन्नघरअनिसट्ठ हरिय मग्गे य।
एवं विहे न ट्ठायइ हुज्जा समाहीए वाघातो॥

वृ. उद्याने वृक्षमूले शून्यगृहे अनिसृष्टे अननुज्ञाते हरिते हरिताकुले मार्गे च अन्यस्मिन्नपि च एवंविधे स्थाने न तिष्ठति भक्तप्रत्याख्याता, यतस्तत्र समाधेः व्याघातो भवति।

गतमप्रशस्तस्थानद्वारमधुना प्रशस्तवसतिद्वारमाह-

भा. [४३१३] इंदियपडिसंचारो मनसंखोभकरणं जहिं नत्थि।
चाउस्सालादि दुवे, अनुन्नवेउण ट्ठायन्ति॥

वृ. यत्र इन्द्रियप्रतिसंचारो न भवति, किमुक्तं भवति ? यत्र अनिष्टा इष्टा वा शब्दा न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रूयन्ते, नापीष्टानिष्टानि रूपाणि। एवं गन्धादिप्यपि भावनीयं। मन:संक्षोभकरणं च तत्र नास्ति, तत्र चतु:शालादिके द्वे वसती अनुज्ञाप्य प्रतिग्राह्ये आदिशब्दात् त्रिशालद्विशालादिपरिग्रह: वसतिद्वयं च गृहित्वा एकत्र भक्तप्रत्याख्याता स्थापत्ये अपरत्र शेषा गच्छ साधव: किं कारणमिति चेदुच्यते अशनादीनां गन्धेन भक्तप्रत्याख्यातुरभिलाषो माभूतिदि हेतो:।

भा. [४३१४] पानगजोग्गाहारे उ ठन्ति से तत्थ जत्थ न उ इंति।
अपरिणया व सो वा अप्पच्छयगेहिं रक्खट्ठा॥

वृ. पानकं योग्यमाहारं च से भक्तप्रत्याख्यातुस्तत्र प्रदेशे वृषभा: स्थापयन्ति यत्र न तु नैव अपरिणता: साधव: सँ वा भक्तप्रत्याख्याता समागच्छन्ति। किं कारणं तत्र स्थापयन्तीत्यत आह-अप्रत्ययगृद्धिरक्षार्थं कृतभक्तप्रत्याख्याने‌ऽस्य दीयमानं दृष्ट्वा मा भूदपरिणतानामप्रत्ययो भक्तप्रत्याख्यातस्तु तत् दृष्ट्वा गृद्धिरिति हेतो:। अथाह-यदि तेन भावतस्त्यक्त आहारस्तत: कथं तस्य गृद्धिरुपजायते। तत आह-

भा. [४३१५] भुत्तो भोगी पुरा जोवि गीयत्थो वि य भाविओ।
संते साहारधम्मेसु सो पि खिप्पं तु खुब्भए॥

वृ. योऽपि पुरा पूर्वं भुक्तभोगी गीतार्थो भावितोऽपि च सोऽपि सत्सु आहारधर्मेषु आहार-ग्रहणधर्मेषु क्षिप्रं शीघ्रमाहारदर्शनत: क्षुभ्यति, स्वप्रतिज्ञां विलुप्याहारं याचते। तथा-

भा. [४३१६] पडिलोमानुलोभा वा विसया जत्थ दूरतो।
ट्ठावेत्ता तत्थ से निच्चं कहणा जाणेगस्सवि॥

वृ. यत्र पडिलोमा अनुलोमा वा विषया: दूरतस्तत्र तं स्थापयित्वा सेतस्य ज्ञानतोऽपि नित्यं कथना भवति। गतं वसतिद्वारमिदानिं निर्यापक द्वारमाह-

भा. [४३१७] पासत्थोसन्नकुसीलट्ठाण परिवज्जिया उ निज्जवगा।
पियधम्मवज्जभीरू गुणसम्पन्ना अपरितंता॥

वृ. पार्श्वस्थाऽवसन्नकुशीलस्थानपरिवर्जिता: प्रियधर्माणोऽवद्यभीरवो गुणसम्पन्ना अपरि-त्रान्ता अपरिश्रान्ता निर्यापका अथ पुनस्ते निर्यापिकास्तस्य कृतभक्तप्रत्याख्यानस्य किं कुर्वन्ति कियंतो वा इष्यन्ते-

भा. [४३१८] उच्चत्त १ दार २ संथार ३ कहग ४ वादीअ ५ अग्ग दारम्मि। ६
भत्तो ७ पाण ८ विआरे ९ कहग १० दिसो १२ जे समत्था य॥

वृ. ये तं कृतभक्तप्रत्याख्यानं उद्वर्तयन्तन्ति परावर्तयन्ते च चत्वार: (१) ये अभ्यन्तरमूले तिष्ठन्ति तेऽपि चत्वार: (२) संस्तारकारका अपि चत्वारो ३ येऽपि तस्य धर्मं कथयन्ति, तेऽपि चत्वार: ४ वादिनो लोकस्योल्लण्ठवचनप्रतिकारिणश्चत्वार: ५ अग्रद्वारे ये तिष्ठन्ति तेऽपि चत्वार: ६ ये योग्यं भक्तमानयन्ति ते चत्वार: ७ पानकस्यापि तद्योग्यास्यानेतारश्चत्वार: ८ उच्चारपरिष्ठापकाश्चत्वार: ९ प्रश्रवणपरिष्ठापका अपि चत्वार:। १० बहिर्लोकस्य धर्म-कथकाश्चत्वार: ११ चतसृष्वपि दिक्षु साहस्त्रकमल्लाश्चत्वार:। १२ एते द्वादशचतुष्कका अष्टा-चत्वारिंशद्भवन्ति कीदृशा पुनरमी निर्यापका इत्यत आह-

भा. [४३१९] जो जारिसतो कालो भरहेरवएसु होइ वासेसु।

ते तारिसया तइया अडयालीसं तु निज्जवगा ॥

वृ. यो यादृशः कालो भरतेष्वैरावतेषु च वर्षेषु भवति ते तादृशास्तत्कालानुरूपाणो निर्यापका अष्टचत्वारिंशदवसातव्याः ।

भा. [४३२०] एए खलु उक्कोसा परिहायंता हवंति तिन्ने व ।
दो गीयत्था तईए असुन्नकरणं जहन्नेणं ॥

वृ. एतेऽनन्तरोदितसंख्याकाः खलु उत्कर्षा उत्कृष्टास्तथैककपरिहान्या परिहीयमानास्तावद्भवन्ति यावज्जघन्येन कृतभक्तप्रत्याख्यानेन सह त्रयः । तत्र द्वौ गीतार्थौ निर्यापकौ तृतीयो भक्तप्रत्याख्याताः तत्रायं च विधिरेकस्य गीतार्थस्य भक्तपानमार्गणाय गमनं, द्वितीयेन तृतीये तृतीयस्य भक्तप्रत्याख्यातुरशून्यकरणमेकस्तत्पार्श्वे तिष्ठित्यपरो भक्तपाने मार्गणाय गच्छतीति भावः । गतं निर्यापकद्वारमधुना दव्वदायणे चरिमे इत्यस्य द्वारस्य व्याख्यानार्थमाह-

भा. [४३२१] तस्स य चरिमाहारो इट्ठो दायव्वो तन्हाछेयट्ठा ।
सव्वस्स चरिमकाले अतीव तण्हा समुप्पज्जे ॥

वृ. भक्तप्रत्याख्यास्य सर्वस्यापि चरमकाले अतीवतृष्णा आहारकांक्षा समुत्पद्यते तेन तस्य भक्तप्रत्याख्यातुकामस्य तृष्णाच्छेदार्थमाहारकांक्षा व्यवच्छेदाय इष्टश्चरमाहारो दातव्यः ।

भा. [४३२२] नवविगति सत्तउयणा अट्ठारसवंजणुच्च पानं च ।
अनुपुव्विविहारीणं समाहिकामाण उवहरिउं ॥

वृ. नवविकृतयोऽनवगाहिमदशमाः शाल्यादिभेदतः सप्तविधओदनोऽष्टादशव्यञ्जनानि शास्त्रप्रसिद्धानि उच्चरमतिप्रशस्यं पानं द्राक्षापानादि एतत्सर्वमनुपूर्वी । विहारिणामानुपूर्व्या शनैराहारमोचनेन भक्तप्रत्याख्यानं प्राप्तवतां समाधिकामानां समाधिमभिलषतां समाधिकरण निमित्तमुपहृत्य दत्वा तस्य तृष्णाव्यवच्छेदः क्रियते अथवा

भा. [४३२३] कालसहावानुमतो पुव्वं झुसितो सुओ व दिट्ठो वा ।
ज्झोसिज्जइ सो से तह जयणाए चउव्विहाहारो ॥

वृ. कालानुमतः स्वभावानुमतश्च तेन यः पूर्वमाहारो योषितः सेवतः स कथं साधुभिर्ज्ञातव्यः । ईदृश एतस्य काल स्वभावानुमतः आहारः श्रुतो वा कस्यापि कथनतो दृष्टो वा कदाचित्साक्षाद्दर्शनात् परिज्ञाको यथैतस्य ईदृश आहारो रोचत इति । स चतुर्विधोऽशनपानखादिमस्वादिमरूपो यतनया प्रथमत उद्गमादि शुद्धस्य लाभे पञ्चकपरिहान्या याचित्वा से तस्य भक्त प्रत्याख्यातुकामस्य जोष्यते दीयत इत्यर्थः । अथ को गुणस्तस्य चरमाहारेण दत्तेनेत्यत आह-

भा. [४३२४] तन्हाछेयम्मि कए न तस्स तहियं पवत्तए भावो ।
चरमं च जे स भूंजइ सद्धा जननं दुपक्खेवि ॥

वृ. तेन चरमाहारेण प्रदत्तेन तृष्णाच्छेद आहारकांक्षा व्यवच्छेदे कृते न भूयस्तत्राहारविषये तस्य भाव इच्छाया प्रवर्तते । वक्ष्यमाणवैराग्यभावनाप्रवृत्तेः तथा चरमाहारमेष भुङ्क्ते इति श्रद्धाजननं द्विपक्षेऽपि भक्तप्रत्याख्यातनिर्यापकाणां चेत्यर्थः । तथाहि भक्तप्रत्याख्याता इदं चिन्तयति । अमयभ्युद्यतमरणसमुद्रस्य तीरं प्राप्तो दुर्लभमेतत् निस्तीर्णोऽहं संसारादिति गाढतरं ध्यानमुपागतो भवति निर्यापका अप्येवं चिन्तयन्ति-वयमेवाभ्युद्यतमरणस्य तीरे प्राप्ता भविष्यामो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्मादेतस्य चरमाहारदाने गुणास्तस्मादवश्यं स दातव्यः । अथ तृष्णाव्यवच्छेदः केनाकारेण तस्य वैराग्यभावना प्रवर्तत इति आह–

भा. [४३२५] किं च तन्नोवभुत्तं मे परिणामासुइं सुइं ।
दिठसारो सुहं ज्झाति चोयणे सेव सीयति ॥

वृ. चरमाहारे प्रदत्ते तृष्णाव्यवछेदे च जाते स एवं वैराग्यमापन्नश्चिन्तयति । किं वा तदस्ति भोज्यं यत्पूर्वगृहवासे प्रव्रज्यापर्याये वा मया नोपभुक्तं परं शुध्यते तत् भुङ्क्तं परिणामात् परिणामवशेन अशुचिः संजायते तथा आहारसंज्ञोपयुक्तो जीवः कर्मणा बन्धको भषति । तथा आहारगृद्धे निवृत्तः सुखभागी, एवं प्रत्यक्षत आगमतश्च दृष्टः सार उपलब्धतत्व सुखं धर्मध्यानं ध्यायते, तथा यदि च आहारे प्रदत्ते भूयः तत्रैवनुबन्धतः प्रसीदति तदेतस्य तदा सीदत एपैवाधिकृत-श्लोकार्थरूपा चोदना प्रज्ञापना कर्तव्या झोसिज्जइ सो से तह जयणाए चउव्विहारो

भा. [४३२६] तिविहं तु वोसिरोहिइ सो ताहे उक्कोसगाइं दव्वाइं ।
मग्गित्ता जयणाए चरमाहारं पदंसंति ॥

वृ. त्रिविधं मनसा वाचा कायेन भक्त प्रत्याख्यातुकाम आहारं व्युत्सृक्ष्यति । तत उत्कृष्टानि द्रव्याणि यतनया उद्गमादिशुद्धलाभे पञ्चकपरिहान्या याचित्वा चरममाहारं तस्य प्रदर्शयन्ति ।

भा. [४३२७] पासित्तु तानि कोई तीरप्पत्तस्स किं मम तेहिं ।
वेरग्गमनुप्पत्तो संवेगपरायणो होइ ॥

वृ. तानि उत्कृष्टानि द्रव्याणि दृष्ट्वा कश्चित्तीरप्राप्तस्याभ्युपगमरणसमुद्रपारमुपागतस्य ममैतैः किं कार्यमित्येवं वैराग्यमनुप्राप्तः संवेगपरायणः सर्वथा निवृत्ताहाराभिलाषो भवति ।

भा. [४३२८] सव्वं भोच्चा कोई मणुन्नरसपरिणतो भवेज्जाहि ।
तं चेवनुबंधंतो देसं सव्वं च गेहीए ॥

वृ. कोऽपि पुनः सर्वमुत्कृष्टं भुक्त्वा मनोज्ञरसपरिणत उत्कृष्टरसगृद्धो भवति । ततो देशं सर्व्वं वा गृद्ध्यात्तमेवोत्कृष्टमाहारमनुबध्नन् अभिलषन् तिष्ठति ।

भा. [४३२९] विगती कयानुबंधे आहारनुबंधिणाएवोच्छेदो ।
परिहायमाणदव्वे गुणवुड्ढि समाहि अनुकंपा ॥

वृ. विकृतीषु कृतो योऽनुबन्धस्तस्मिन् सति आहारानुबन्धनायां च सत्यां तस्य विकृत्यनुबन्धस्याहारनुबन्धस्य च किंच नोवभुत्तं मे परिणामासुइं इति प्रकारेण व्यवच्छेदः कर्तव्यः । सम्प्रतिहानिद्वारमाह–परिहायमाणा इत्यादि यानि चरमाहारद्रव्याण्यानीतानि तानि तद्विपयमनुबन्धं कुर्वन्तः परिणामतो द्रव्यतश्च परिहीयमानानि कर्तव्यानि । अथ कि कारणं यदाहारे अनुबन्धं कुर्वन्तो भक्तं पानं च दीयते । उच्यते–गुणवुड्ढिसमाहिअनुकंपा इति स भक्तं प्रत्याख्यातुकामोऽनुकम्पनीयोऽनुकम्प्यमानस्यासमाधिमरणप्रसक्तेस्ततोऽनुकम्पते, आहारे प्रदत्ते सति तस्य समाधिरुपजायते । समाधितश्च प्रज्ञापयितुं शक्यः प्रज्ञापितश्चाहारव्यवच्छेदं करिष्यति । ततोऽभ्युद्यतमरणे गाढं ध्यानोपगतस्य गुणवृद्धिः कर्मनिर्जरा भवति । अथ चरमाहारे द्रव्याणां परिणामतो द्रव्यतश्च परिहानिः कथं कर्तव्येत्यतआह–

भा. [४३३०] दविय परिणामतो वा हवंति दिनेदिने जाव तिन्नि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बिंति न लब्भंति दुलभे सुलभंमि अहो इमा जयणा ॥

वृ. चरमाहारद्रव्याणि द्रव्यसंख्या परिमाणतश्च दिने दिने तावत्त्रीणि दिनानि तत्र परिणामतो दिने दिने स्तोकतरमानयंति। द्रव्यपरिहानिः पुनरेवं। यदि क्षीरं चरमाहारार्थतया समानीतं ततो द्वितीयदिवसे तन्नानयन्ति किन्तु दध्यादिकं। अथ चरमाहारार्थतया दध्यानीतं ततो द्वितीयदिने क्षीराद्यानयन्ति, न तु दधि। एवं द्रव्यपरिहानिस्त्रिन् दिवसान् ततः परतः किञ्चिदानीयते। तत्र दुर्लभद्रव्यविषये एवं ब्रुवते न लभ्यते, सुलमे तु द्रव्य इयं वक्ष्यमाणा यतना भवति। तामेवाह-

भा. [४३३१] आहारे ताव च्छिदाहि गेहिं तोणिं चइस्ससि।
जं वा भुत्तं न पुव्वं ते, तीरं पत्तो तमिच्छसि ॥

वृ. आहारे आहारविषयां तावत् गृद्धिच्छिद्धि ततः शरीरं त्यक्ष्यसि नान्यथा यथा पूर्वं त्वया निस्पृहतया न भुक्तस्तदानीमभ्युद्यतमरणसमुद्रस्य तीरं प्राप्त इच्छसि एवमनुशासनेन तस्या-हाराकांक्षा विनिवर्त्येते। गतं हानिद्वारमिदानीं अपरित्रान्तद्वारमाह-

भा. [४३३२] वट्टंति अपरितंता दिया व रातो स सव्वपडिकम्मं।
पडियरगा गुणरयणा कम्मरयं निज्जरेमाणा ॥

वृ. प्रतिचरका गुणरत्नाः रजो निर्जरयतस्यस्य कृतभक्तप्रत्याख्यातस्य प्रतिकर्मणि दिवारात्रौ वा परित्रान्ता वर्तन्ते।

भा. [४३३३] जो जत्थ होइ कुसलो सो उ न हावेइ तं सइ बलंमि।
उज्जुत्ता सन्नियोगे तस्स वि दीवेंति तं सद्धां ॥

वृ. यो यत्र प्रतिकर्मणि भवति कुशलः, स तत् प्रतिक्रर्म सति वले न हापयति। किन्तु सर्वेपि स्वस्वनियोगे उद्युक्तास्तथा वर्तन्ते, तद्यथा तस्यापि कृतभक्तप्रत्याख्यानस्य तामभ्यु-पगतमरणसमुद्रतीरप्राप्तत्वविषयां श्रद्धां दीपयति।

भा. [४३३४] देहवियोगो खिप्पं वहेज्ज अहवा वि कालहरणेणं।
दोण्हंपि निज्जरा वद्धमाणगच्छो उ एयट्ठा ॥

वृ. तस्य कृतभक्तप्रत्याख्यानस्य देहवियोगः क्षिप्रं वा भवेदथवा कालहरणेन तथापि स्वस्व-नियोगद्युक्तैस्तैर्भवितव्यं, एवं च द्वयानामपि प्रतिचारकाणां प्रतिचर्यस्य च प्रवर्धमाना निर्जरा कर्मनिर्जरा भवति, । गच्छो ह्येतदर्थं परस्परोपकारेणोभयेषां निर्जरा स्यादित्येमर्थमासेव्यते गतं परित्रान्तद्वारमधुना निर्जराद्वारमाह-

भा. [४३३५] कम्ममसंखेज्जभवं खवेइ अनुसमयमेव आउत्तो।
अन्नतरगम्मि जोगे सज्झायंमी विसेसेणं ॥

वृ. अन्यतरस्मिन् योगे प्रतिलेखनादिरूपे आयुक्तः उपयुक्तः सन् अनुसमयमेव प्रतिक्षणमेव कर्म असंख्येयभवोपार्जितं क्षपयति, । कर्मणोऽनन्तकालमनवस्थानाभावदसंख्येनभवमित्युक्तं स्वाध्याये पुनरायुक्तः सन् विशेषेण कर्म क्षपयति।

भा. [४३३६] कम्ममसंखेज्जभवं खवेई अनुसमयमेव आउत्तो।
अन्नंतरगंमि जोगे काउस्सग्गे विसेसेणं ॥

भा. [४३३७] कम्ममसंखेज्जभवं खवेइ अनुसमयमेव आउत्तो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नतरगंमि जोगे वेयावच्चे विसेसेण ॥

भा. [४३३८] कम्ममसंखेज्जभवं खवेइ अनुसमयमेव आउत्तो ।
अन्नतरगंमि जोगे विसेसउ उत्तमट्ठंमि ॥

वृ. गाथात्रयमपि प्राग्वत् । नवरमुत्तमार्थे प्रतिपन्नस्य वैयावृत्ये च विशेषतः कर्मनिर्जरा भवतीति विशेषत उभयत्रापि यतितितव्यं । निर्जराद्वारं संस्तारकद्वारमाह-

भा. [४३३९] संथारो उत्तमठे भूमीसिलाफलगमादि नायव्वा,
संथारपट्टमादी दुगवीराई बहूवावि ॥

वृ. उत्तमार्थे व्यवस्थितस्य संस्तारको दातव्यो भूमिर्भूमिरूपः, शिला वा प्रधानशिला-तलरूपः । एतौ द्वावपि अस्फुटता च झुपिरौ कर्तव्यौ, तत्र स्थितो वा निषन्नो वा यथासमाधि तिष्टतु, फलकं वा संस्तारको ज्ञातव्यः । तच्च फलकमेकाङ्गिकमानेतव्यं, तस्याभावे द्व्यादि फलकात्मकः । तस्याप्यभावे निरन्तरकं त्र्यात्मको ज्ञातव्यः एतत् आदिशब्दस्य व्याख्यानं, । इदानीमास्तरणमाह-संस्तारकोत्तरपट्ट इत्येतत्प्रस्तरणमुत्सर्गतो अपवादत आह-बहूवावि यदि सोत्तरपट्टसंस्तारकमात्रे तस्यासमाधिरुपजायते तदा बहून्यपि प्रस्तार्यते तस्य कल्पप्रभृतीति-

भा. [४३४०] तह वि असंथरमाणे कुसमादीणिंसु अझुसिरतणाई ।
ते ससइ संथाराण झुसिरतणाइ ततो पच्छा ॥

वृ. अथ कल्पप्रभृति संस्तरणेपि तस्यासमाधिरुपजायते तजा कुशादीनि दर्भादीनि अझुषि-राणि तृणानि प्रस्तार्यन्ते, । तेषामसत्यभावे २६ असंस्तरणे वा सति ततः पश्चात् झुषिराणि अपि तृणान्यानीयन्ते ।

भा. [४३४१] कोअव पावारग नवय तूलिआलिंगिनी अभूमीए ।
एमेव अनहियासे संथारमाइपल्लंके ॥

वृ. यदि तृणेष्वपि प्रस्तारितेषु न समाधिस्तदा कोयवो देअट्ठीए प्रस्तार्यते तत्रापि समाधि-रनुत्पादे प्रावरणकस्तत्राप्यसमाधौ नवतं जीर्णं तत्रापि समाध्यलाभे तूली आलिङ्गिनी चोभयतः प्रस्तार्यते । एतत्सर्वं भूमौ कर्तव्यमथैवमपि नाध्यास्ते न समाधिं प्राप्नोति तदा संस्तारकादि-पूर्वक्रमेण पल्यङ्के प्रस्तारणीयं यावत्पर्यन्ते तूलिका उभयते आलिङ्गिनी वा गतं संस्तार-कद्वारभिदानीमुद्वर्तनादिद्वारमाह-

भा. [४३४२] पडिलेहणसंथारं पानगउच्चत्तणाइ निग्गमनं ।
सयमेव करेइ सहू असहूस्स करेंति अन्नेउ ॥

वृ. यो कृतभक्तप्रत्याख्या सहः समर्थःस स्वयमेवात्मीयस्योपकरणस्य प्रत्युपेक्षणं संस्तारकं संस्तारकप्रदानं पानकं पानकरणमुद्धर्तनादि उद्वर्त्तनाप्रवर्तनेऽन्तः प्रदेशात् बहिः प्रदेशादन्तः प्रवेशनं करोति । असहस्य असमर्थस्य पुनः अन्ये सर्वं कुर्वन्ति, कथमित्याह-

भा. [४३४३] कायोवचितो बलवं निक्खमणपवेसणं च से कुणइ ।
तह अविसहमाणं संथारगयं तु संचारे ॥

वृ.कायेन(यो)शरीरेणोपचितो बलवान् स तस्यान्तः प्रदेशाब्दहिर्निष्क्रमणं बहिःप्रदेशान्तः प्रवेशनं करोति, च शब्दादन्यच्चोद्वर्तनादिकं प्रवर्तनादिकं संचार्यमाणोऽपि सोऽवष्टंभतः संचार्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ तथापि स न विसहते न समाधिं प्राप्नोति तदा तं तथाप्यविषहमाणं संस्तारगतं संचारयन्ति-

भा. [४३४४] संथारो मउओ तस्स समाहिहेउं तु होइ कायव्वो।
तह वि य अविसहमाणो समाहिहेउं उदाहरणं॥

वृ. समाधिहेतोः समाधेरुत्पादनाय यस्तस्य संस्तारको मृदुको भवति कर्तव्यो यावत्पल्यङ्के तूल्या आलिङ्गनपट्टिकायाश्च समास्तरणमिति तथापि अविषहमाणे समाधिमलभमाणे समाधि-हेतोः समाधिसम्पादनाय इदं वक्ष्यमाणमुदाहरणं प्रोत्साह्यतेऽनेनेत्युदाहरणं प्रोत्साहनं कर्तव्यं।

भा. [४३४५] धीरपुरिसपन्नत्ते सप्पुरिसनिसेविए परमरम्मे।
धन्ना सिलायलगया निरवेयक्खा निव्वज्जन्ति॥

वृ. धन्यां केचन धीरपुरुषप्रज्ञप्ते तीर्थकरगणधरप्ररूपिते सत्पुरुष निषेविति तीर्थकरादि-भिरासेविते परमरम्ये शिलातले गता व्यवस्थिता निरपेक्ष्याः परापेक्षारहिता निर्वाप्यन्ते नितरामभ्यु-द्यतमरणं प्रपद्यन्ते।

भा. [४३४६] जति ताव सावयाकुल गिरिकंदर विसमकडयदुग्गेसु।
सोहिंत्ति उत्तिमट्ठं धितिधणियसहागया धीरो॥

भा. [४३४७] किं पुन अनगारसहायगेण अन्नेनं संगहबलेन।
परलोइए न सक्का साहेउं उत्तमो अट्ठो॥

वृ. यदि तावत् धृतिरेव केवला धणियमत्यर्थं सहायो येषां ते धृतिधनिनः सहायका धीराः श्वापदाकुलेषु गिरिकन्दरेषु विषमेषु कटकेषु विषमेषु च दुर्गेषु उत्तमार्थं साधयन्ति। किं पुनरनगारसहायकेन परलोकेन परलोकार्थिनो अन्योन्यसंग्रबलेन शक्य साधयितुमुत्तमार्थः इति

भा. [४३४८] जिनवयणमप्पमेए महुरं कन्ना हुतिं सुणेतूणं।
सक्का हु साहू मज्झे संसारमहोयहिं तरिउं॥

वृ. जिनवचनमप्रमेयं मधुरं ललितपदविन्यासात्मकत्वात् कर्णयोराहुतिमिव कर्णाहुतिं पावकस्य घृताहुतिरिव कर्णयोराप्पा(प्या)यमिति भावः शृण्वतां साधुमध्ये स्थितानां अक्लेशेन शक्यः संसारमहोदधिः तरितुमिति।

भा. [४३४९] सव्वे सव्वद्धाए सव्वन्नू सव्वकम्मभूमीसु।
सव्वगुरु सव्वमहिया सव्वे मेरुंमि अहिसित्ता॥

भा. [४३५०] सव्वाहिं वि लद्धीहिं सव्वे वि परीसहे पराइत्ता।
सव्वे वि य तित्थयरा पातोवगया उ सिद्धिगया॥

वृ. सर्वे सर्वज्ञाः सर्वासुकर्मभूमिषु सर्वस्यामद्धायामतीतानागतरूपायां सर्वगुरवः सर्वमहिताः सर्वे मेरावभिषिक्ताः सर्वे आमर्षौषध्यादिभिलब्धिभिरुपेताः सर्वे च तीर्थकराः तीर्थप्रवर्तन-शीलाः सर्वान् परीषहान् पराजित्य पादपोपगताः सिद्धिं गताः।

भा. [४३५१] अवसेसा अनगारा अतीय पडुप्पन्नणा गया सव्वे।
केइ पादोवगया पच्चक्खाणं गिणिं केई॥

वृ. सर्वेऽपि च अनगाराः अतीताः प्रत्युत्पन्ना अनागताश्च केचित्प्रथमसंहननोपेताः पाद-पोपगताः केचित्प्रत्याख्यानं भक्तपरिज्ञां केचिदिङ्गिनीं प्रतिपन्नाः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४३५२] सव्वातो अज्जातो सव्वे वि य पढमसंघयण वज्जा ।
सव्वे य देसविरया पच्चक्खाणेण उ मरंति ॥

वृ. सर्वा अप्यार्यिकाः सर्वेऽपि च प्रथमसंहननवर्जाः सर्वेऽपि च देशविरताः प्रत्याख्यानेन भक्तपरिज्ञारूपेण वा म्रियंते ।

भा. [४३५३] सव्वसुहप्पभवा उ जीवियसारा उ सव्वजनगातो ।
आहाराउ रयणं न विज्जइ हु उत्तमं लोए ।

वृ. सर्वस्य सुखस्य प्रभव उत्पादकारणं सर्वसुखप्रभवस्तस्मात् जीवितसारादन्नं वै प्राणा इति वचनात्सर्वस्य गतो जनकः तस्मादाहारमन्तरेण कस्याप्युत्पत्तेरभावात् । इत्थंभूतादाहाराद्, अन्यदुत्तमं रत्नं लोके न विद्यते किन्त्वाहार एव सर्वोत्तमं रत्नं रत्नत्वमेव भावयति ।

भा. [४३५४] विग्गहगए य सिद्धे य मोत्तुं लोयंमि जत्ति या जीवा ।
सव्वे सव्वावत्थं आहारे हुंति उवउत्ता ॥

वृ. विग्रहगतान् विग्रहगत्यापन्नान् सिद्धांश्च मुक्त्वा शेषा यावन्तो लोके जीवास्ते सर्वे सर्वावस्थं सर्वास्ववस्थास्वाहारे उपयुक्ता भवन्ति । तत आहारः परमन्नम् ।

भा. [४३५५] तं तारिसयं रयणं सारं जं सव्वलोअरयणाणं ।
सव्वं परिच्चइत्ता पादोवगया पविहरंति ॥

वृ. यत्सर्वलोके रत्नानां मध्ये सारं तेषु सत्स्वपि तृप्तेरभावात् आहाररूपं रत्नं तत्तादशं सर्वं परित्यज्य धन्याः पादपोपगताः प्रविहरन्ति ।

भा. [४३५६] एयं पादोवगमं निपरिकम्मं जिनेहिं पन्नत्तं ।
जं सोऊण खमओ वक्सायपरक्कमं कुणइ ॥

वृ. एतत्पादपोपगमं मरणं जिनैर्निःप्रतिकर्म प्रज्ञप्तं यत् श्रुत्वा क्षपको व्यवसायपराक्रमं करोति । गतमुद्वर्तनादिद्वारमधुना सारेऊण य कयमितिद्वारव्याख्यानार्थमाह-

भा. [४३५७] कोई परीसहेहिं वाउलि वेयणट्टिउ वावि ।
उहासेज्जकयाती पढमं बितीयं च आसज्ज ॥

वृ. कश्चित्प्रथमाद्वितीयपरीषहाभ्यां व्याकुलितो ध्यानाच्चालितो यदि वा वेदनया पीडया अदिर्तः पीडितोऽवभाषेत याचेत्कदाचित् प्रथममनशनं द्वितीयं वा पानकमासाद्याधिकृत्य ततः किं कर्तव्यमत आह-

भा. [४३५८] गीयत्थमगीयत्थं सारेउं मतिविवोहणं काउं ।
तो परिबोहयछट्ठे पढमे पगयं सिया बिइए ॥

वृ. स भक्तप्रत्याख्यानः कदाचित् प्रान्तदेवतयाधिष्ठितोवभाषेत, ततः परिज्ञानमित्तं स्मरणं कारयितव्यः भण्यते त्वं गीतार्थोऽगीतार्थो वा अथवा दिवसो वर्त्तते रात्रि वा तत्र यदि समस्तमवितथं ब्रूते, तदा ज्ञायते न प्रांतदेवतयाधिष्ठितः किन्तु परीषहत्याजितो याचते, तदेवं गीतार्थमगीतार्थं चात्मानं स्मारयित्वा स्मरणोत्पादनेन यथावस्थितमतिविबोधनं कृत्वा ततः प्रतिबोध्य षष्ठे रात्रिभोजने प्रथमे अशने प्रकृतं स्यात् । द्वितीये वा पानके विमुक्तं भवति । अशने पानके च याचिते तस्य भक्तपानात्मकः कवचभूत आहारो दातव्यः । अथ किं कारणं प्रत्याख्याप्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुनराहारो दीयते। तत आह-

भा.[४३५९] हंदि परीसहचमू जोहेयव्वा मणेण काएण।
तो मरणदेसकाले कवयभूओ उ आहारो ॥

वृ. हंदीति चोदकामन्त्रणे ! हे चोदक परीषहचमूः परीषहसेना मनसा कायेनोपलक्षणमेतत् वाचा च योधेन योधयितव्या ततस्तस्याः पराजयनिमित्तं मरणदेशकाले मरणसमये योधस्य कवचभूत आहारो दीयते। एतदेव विभावयिपुरिदमाह-

भा.[४३६०] संगामदुगं महसिलरहं मुसले चेव परूवणा।
असुरसुरिंदावरणं, चेडग एगो गहं सरस्स ॥

वृ. चेटकस्य कोणिकस्य च परस्परं विग्रहे कोणिकपक्षे संग्रामद्वयमसुरेन्दोरऽमरः कृतवान् तद्यथा-महाशिलाकंटकं रथमुशलं च तस्य प्ररूपणा यथा व्याख्याप्रज्ञप्तौ तथा कर्तव्या। असुरेन्द्रेण च शक्रेण कोणिकस्यावरणं कृतं कठिनवज्रमयप्रतिरूपके स क्षिप्त इत्यर्थः। ततश्चेटकस्य एकः सारथिः कोणिकवधाय शरस्य कनकप्रवहणविशेषरूपस्य यद्ग्रहं कृतवान्।

भा.[४३६१] महसिलकंटे तहियं वट्टंते कोणिउ उरहिएण।
रुक्खग्गविलग्गेण पट्ठे पहउ उ कनगेणं ॥

भा.[४३६२] उप्फिडिउ सो कनगो कवयावरणंमि तो तउ पडिउ।
तो तस्स कोणिएण सीसं छिन्नं खुरप्पेणं ॥

वृ. ततो महाशिलाकण्टके संग्रामे वर्तमाने कोणिकश्चेटकस्य रथिकेन निरन्तरशरमोक्षणतः आच्छादितः परं ते सर्वेऽपि शराः कठिनप्रतिरूपकेऽभ्यट्य बहीः पतितं ततो वृक्षमारुह्य तद्विलग्नेन कोणिकः पृष्टे कनकेन प्रवहणविशेषेण प्रहतः सोऽपि कवचावरणे कठिनप्रतिरूपके उत्स्फट्य पतितः ततः कोणिकेन तं तथाध्यवसायं वृक्षविलग्नमवलोक्य कोपावेशात्तस्य शिरः क्षुरप्रेण च्छिन्नम्।

भा.[४३६३] दिट्ठंतस्सोवणउ कवयत्थाणी इहं तहाहारो।
सत्तू परीसहा खलु आराधनरज्जथाणीया ॥

वृ. एषो अनन्तरोदिषो दृष्टान्तोऽयं तस्योपनयः-कवचस्थानीय इह तथा रूप आहारः, शत्रवः परीषहा राज्यस्थानीया आराधना यथा शत्रुपराजयाय कवचमारोप्यते सङ्ग्रामे, तथा परीषहजयाय चरमकाले दातव्य आहारः। अत्रैव दृष्टान्तान्तरमाह-

भा.[४३६४] जह वा उंढिय पादे पाउं काउण हत्थिणो पुरिसे।
आरुहइ त(ह)प्परिण्णी आहारेणं तु ज्झाणवरं ॥

वृ. यथा वा कोऽपि हस्तिनमारोढुमशक्तो हस्तिनं पादमाकुञ्चापयति, आकुञ्चाप्य तस्मिन् पादे आत्मीयं पादं कृत्वा हस्तिनमारोहति तथा परिज्ञी भक्तपरिज्ञावान् आहारेण ध्यानवरमुत्तमं ध्यानमारोहति।

भा.[४३६५] उवकरणेहिं विहूणो जह वा पुरिसो न साहए कज्जं।
एवाहार परिण्णी दिट्ठंता तत्थिमे हुंति ॥

वृ. यथा पुरुष उपकरणैर्दात्रादिभिर्विहीनो न साधयति लवनादिकं कार्यमेवमाहारमन्तरेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिज्ञी भक्तपरिज्ञावान् परीपहपराजयं, तत्रेमे वक्ष्यमाणा दृष्टान्ता भवन्ति। तानेवाह–

भा. [४३६६] लावए पावए जोहे संगामे पंथगेवि य।
आउरे सिक्खए चेव दिट्ठंतो कवएवि य॥

भा. [४३६७] दात्तेण नावाए आउह पहेणोसहेहिं च।
उवकरणेहिं च विना जह संखमसाहगा सव्वे॥

वृ. यथा प्रथमश्लोकोक्ता लावकादयः सर्वे यथासंख्यं दात्रादिभिर्द्वितीयगोथोक्तैर्विना न साधकास्तयाहि लावको दात्रेण विना लवितुं न शक्नोति प्लोवको नावा विना नद्यादिकं लङ्घयितुं, संग्रामयोध आयुधैर्विनाशत्रुपराजयं, पथिकः पन्थानं गन्तुं उपानम्द्यां विना, आतुरः प्रगुणी भवितुमोपधैर्विना, शिष्यको वादित्रकर्मादि वादित्रादिभिरुपकरणैर्विना।

भा. [४३६८] एवाहारेण विना समाहिकामो न साहए समाहिं।
तम्हा समाहि हेउ दायव्वो तस्स आहारो॥

वृ. एवं समाधिकाम आहारेण विना समाधिं न साधयति यस्मात्समाधिहेतोस्तस्याहारो दातव्यः। अत्राक्षेपपरिहारावाह–

भा. [४३६९] सरीरमुज्झियं जेनं को संगो तस्स भोयणे।
समाधिसंधणा हेउं दिज्जए सो उ अन्नए॥

वृ. अथ येन शरीरमुज्झितं तस्य भोजने कः संयोगो येन तत् याचते, उच्यते न च जीविता–शनिमित्तमाहारं याचते, किन्तु समाधिमसहमानस्तत एतदस्माभिर्ज्ञात्वा मा तस्यासमाधेर्व्याघातो भूयादिति समाधिसन्धानहेतोः आहारे अन्तःसमये दीयते केन विधिनेत्यत आह–

भा. [४३७०] सुद्धं एसित्तु ट्ठावेत्ति हानीतो वा दिने दिने।
पुव्वुत्ताए उ य जयणाए तं तु गोवेति अन्नेहिं॥

वृ. शुद्धमुद्गमादिदोषरहितमेषित्वा गवेषित्वा स्थापयन्ति। हानौ वा शुद्धलाभे दिने दिने पूर्वोक्तया पञ्चकहानिलक्षणया पतनया गवेषयित्वा तत् अन्यत्र गोपयन्ति गोपयित्वा यदि प्रतिदिनसंशुद्धस्य यतनया वा अलाभे पर्युषितमपि क्रियते। ततो यथावसरं प्रयच्छन्ति।

भा. [४३७१] निव्वाघाएणेवं कालगए विगिंवणाए विहि पुव्वं।
कायव्वं चिंधकरणमचिंधकरणे भवे गुरुवा॥

वृ. एवमुक्तेन प्रकारेण निर्व्याघातेन व्याघाताभावेन कालगते तस्य विधिपूर्वं विवेचना परिष्ठापना कर्तव्या, तथा कर्तव्यम् चिह्नकरणमचिह्नकरणे चिह्नकरणस्याभावे प्रायश्चित्तं चत्वारो गुरुकाः। तच्च चिह्नकरणं द्विधा शरीरे उपकरणे च तत्र शरीरे भक्तं प्रत्याख्यानुकामेन क्रियते चोलपट्टश्चाग्रतो मुखे च मुखपोतिका चिह्नकरणाभावे दोषानाह–

भा. [४३७२] सरीरे उवगरणंमि य अचिंधकरणंमि सो उ राईनिओ।
मग्गणगवेसणाए गामाणं घायणं कुणइ॥

वृ. शरीरे उपकरणं च अचिह्नकरणे चिह्ने अकृतेऽयमन्यो दोषः। स कालगतो रत्नाधिकः स्यात्। तं चाकृतचिह्नं भद्राकृतं दृष्ट्वा केचित् गृहस्थाश्चिन्तयन्ति केनाप्यप गृहस्थो बलात्कारेण मारयित्वा व्यक्तः। ततस्तैर्दण्डिकस्य कथितं सोऽपि दण्डिकः श्रुत्वा कैश्चिन्मारितो भवेदिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां मार्गणगवेषणार्थे तत्प्रत्यासन्नग्रामाणां पञ्चानां दशानां वा घातनं दण्डनं कुर्यात्।

सम्प्रति अन्तर्बहिर्व्याघात इति द्वारमाह-

भा. [४३७३] न पगासिज्ज लहुत्तं परीसह उदएण हुज्ज वाघातो।
उप्पन्ने वाघाते जो गीयत्थाण उववातो ॥

वृ. स भक्तप्रत्याख्याता गृहिणां न प्रकाश्यते। यतः कदाचित्परीषहस्योदयेन प्रत्याख्यानस्य व्याघातो विलोपः स्यात्, ततः समस्तस्यापि प्रवचनस्य लघुता जायते, उत्पद्यते च व्याघाते यो गीतार्थानामुपायः स प्रयोक्तव्य इति वाक्यशेषः।

भा. [४३७४] को गीयाण उवाओ संलेहगतो उ विज्जए अन्नो।
अत्थहतो जो अन्नो इतरे उ गिलाण पडिकम्मं ॥

भा. [४३७५] वसमो वा ठ्ठाविज्जइ अन्नसास्सतीए तंमि संथारे।
कालगउत्तिय काउं संज्झाकालम्मि नीणंति ॥

वृ. भक्तप्रत्याख्याता द्विविध एकोऽनेकश्च। ते द्विविधा ज्ञाता अज्ञाताश्च। ज्ञातो नाम दण्डिकादीनां प्राकृतजनानां च विदितस्वरूपो यथा यावज्जीवमेव भक्त प्रत्याख्यातवान् तद्विपरीतोऽज्ञातः। तत्र यदि ज्ञातो भक्तपरिज्ञां न निस्तरति,तदा को गीतार्थानामुपायः प्रयोक्तव्यः ? उच्यते-तदा स जवनिकान्तरितः स्थापितो यो वान्य उत्सहते स स्थाप्यते इतरस्य तु भक्तपरिज्ञाव्याघातवतो ग्लानपरिकर्म क्रियते। अथान्यसंलेखगतो न विद्यते नाप्यन्यः कश्चिदुत्सहते तदान्यस्यासत्यभावे वृषभः स्थाप्यते। तस्मिन् पूर्वभक्तप्रत्याख्यापकसक्ते संस्तारे ततो जवनिकान्तरितया लोकवन्दापनादि यतनया स करोति। यस्तु भक्तपरिज्ञाविलोपवान् सोऽल्पसागारिकमेकांते ध्रियते धृतस्य च ग्यानपरिकर्म तावत् क्रियते यावत् प्रथमालिकां करोति ततो जनमध्ये रात्रौ स कालगत इति प्रकाशः। स्वयं गमनेन सहायप्रदानतो वा सन्ध्याकाले तं निष्काशयन्ति। एतदेव भावयति -

भा. [४३७६] एवं तन्नायम्मी दंडगमादीहिं होइ जयणा उ।
सयं गमनपेसणं वा खिसण चउरोनुग्धाया ॥

वृ. एवमुक्तेन प्रकारेण दण्डिकादिभिर्ज्ञायते भवति यतनां ज्ञातव्या प्रथमालिकाकरणे च स्वयं सर्वेषां साधूनां गमनं भवति। यदि वा स सहायस्यान्यत्र तस्य प्रेषणं यस्तु तं भक्तप्रत्याख्यानप्रतिभग्न एष इति तस्य प्रायश्चित्तं चत्वारो मासा अनुद्घाता गुरुकाः। यस्तु न ज्ञातः स यदि न निस्तरति तथापि न प्रवचनस्योड्डाहः। गतं सपराक्रमं भक्तप्रत्याख्यानमपराक्रममाह-

भा. [४३७७] सपरिक्कमे जो उ गमो नियमा अपरक्कमंमि सो चेव।
नवरं पुन नाणत्तं खीणे जंघाबले गच्छे ॥

वृ. सपराक्रमे भक्तप्रत्याख्याने यो गमोऽभिहितः स एवापराक्रमेऽपि नियमाद्वेदितव्यो नवरं पुनरिदं नानात्वमपराक्रमां क्षीणे जङ्घाबले भवति स्वगच्छे च। तथाहि क्षीणजङ्घाबले वृद्धत्वेन मर्तुकामः स गच्छे भक्तं प्रत्याचष्टे। सम्प्रति व्याघातिममाह-

भा. [४३७८] एमेव आनुपुव्वी रोगायंकेहिं नवरि अभिभूतो।
बालमरणंपि सिया मरिज्जउ इमेहिं हेउहिं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. एवमेवानेनैव प्रकारेणानुपूर्व्या क्रमेण व्याघातिमं प्रतिपत्तव्यं नवरं रोगातंकैरभिभूतः सन् तत् प्रतिपद्यते। एतावान् विशेषः, यदि पुनरेभिर्वक्ष्यमाणैर्हेतुभिर्भ्रियेत तदा तत् व्याघातिमं बालमरणमपि स्यात्। तानेव हेतुनाह-

भा. [४३७९] वालच्छभल्ल विसविसूइकाए आयंकसन्निकोसलए।
उसास गद्द रज्जु उम सिवे घाए संबद्धो॥

वृ. व्यालो गोनसादिरच्छभल्लरुक्षो विषं विसूचिकाश्च प्रतीताः आतङ्कक्षयादिव्याधिः संज्ञिकोशलके कोशलश्रावके प्रत्यनीके संजात उच्छवासिरोधो गृध्रप्रष्टकरणरज्वा उत्कलंबनं अवमे दुर्भिक्षे अशिवे घातो विद्युदादिभिरभिघातः। संबद्धं वातेन हस्तपादादिजातमेतैर्हेतु-भिर्व्याघातिमं बालमरणमपि भवति। कथमित्याह-

भा. [४३८०] बालेन गोणसादी खदितो हुज्जा सडिउमारद्दो।
कन्नोट्ठनासिगादी विभंगया वच्छभल्लेहिं॥

वृ. व्यालेन गोनसादिना स खादितो भवेत्ततः शटितुमारब्धवान् बालमरणमपि कुर्यात्, यदि वा अच्छभल्लेन रुक्षेण कर्णौष्टनाशिकादीनि विभग्नानि भवेयुस्ततो बालमरणमाश्रयतो विहादिहेतूनाह-

भा. [४३८१] विसेण लद्धो होज्जा वा विसूइगा वा से उट्ठिया।
आयंको वा कोई खइमादी उट्ठिया होज्जा॥

भा. [४३८२] तिन्निउ वारा किरिया तस्स कय हवेज्ज नो उ उवसंतो।
जहवोमे कोसलेणं सण्णिणा पंचसयाइं साहूणं॥

भा. [४३८३] रुद्धाइं अहंजं, भत्तं तु तुज्झ दाहामो,
लाभंतरं च नाउं लद्धेणं धन्नविक्कीयं॥

वृ. विषेण वा कश्चित् लब्धो भवेत् विसूचिका वा से तस्य उपस्थिता। आतङ्को वा कोऽपि क्षयादिस्तस्योत्थितो भवेत् तस्य च त्रीन् वारान् क्रिया कृता परं नोपशान्तस्ततो बालमरणं प्रतिपद्यते। तथा वा अवमे दुर्भिक्षे कोशलेन संज्ञिना श्रावकेण साधूनां पञ्चशतान्यन्यत्र गच्छन्ति निरुद्धानि, यथाहं भक्तं युष्माकं दास्यामि। तेन च पापीयसा लुब्धेन लाभान्तरालं लाभविशेषं ज्ञात्वा धान्यं विक्रीतं। ततः। किमित्याह-

भा. [४३८४] तेनो उ वितिच्छेयं ऊसासनिरोहमादीनि कयाइ।
अनहीयसिं तेहिं तु वेयणसाहूहिं उमंमि॥

वृ. ज्ञात्वा वृत्तिच्छेदं दुर्भिक्षे वेदनामनध्यासीतैरसहमानैरुच्छ्वासनिरोधादीनि कृतानि केचिदुच्छ्वासनिरोधकरणोतोऽपरे गृध्रपृष्टकरणतोऽन्ये रज्वा वैहायसविधानतो बालमरणं प्रतिपन्नवन्तः।

भा. [४३८५] अभिघातो वा विज्जु गिरिभित्ती कोणयाइ वा हुज्जा।
संबद्धहत्थपायाइ तेन वातेन होज्जाहि॥

वृ. प्रतिघातो विद्युता गिरिभित्तेः पतन्त्या गिरिकोणकाद्वा पततो भवेत्ततो बालमरणमथवा हस्तपादादयो वातेन सम्बद्धा भवेयुः। तत्र आश्रयते बालमरणं तथा चाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४३८६] एएहिं कारणेहिं पंडिअमरणं तु काउसमत्थो ।
ऊसासगद्धपट्ठं रज्जुग्गहणं व कुज्जाहि ॥

वृ. एतैरनन्तरोदितैर्व्यालभक्षणप्रभृतिभिः कारणैः पण्डितमरणं यथोक्तप्रत्याख्यानरूपं कर्तुमसमर्था उच्छ्वासनिरोधं गृध्रपृष्ठं रज्जुग्रहणं या कुर्युः । अथ किमिति ते व्यालभक्षितादय आत्मानं घातयन्ति । उच्यते -

भा. [४३८७] अनुपुव्विहिरीणं उस्सग्ग निवाइयाणं जा सोही ।
विहरंतए न सोही भणिया आहारलोवेण ॥

वृ. ये व्यालाच्छभल्लादि कृतव्याघातरहितास्तेषामानुपूर्व्या ऋतुबद्धे मासकल्पेन वर्षावासचतुर्मासकल्पेन विहारिणामुत्सर्ग निपातिनामुत्सर्गनिपातिनामुत्सर्गेण संयममनुपालयतां या चारित्रशोधिर्भवति सा व्यालाच्छभल्लादि व्याघातवति विहरति न भणिता शोधिर्न भवतीत्यर्थः कस्मान्न भवतीत्यत आह-आहारलोपेन ते हि व्यङ्गत्वादिकारणेन न शक्नुवन्ति परिपूर्णामुत्तरगुणविशुद्धिं कर्तुं, ततो यथावस्थिताहारविलोपतो बालमरणमभ्युपगच्छन्ति तदेवमुक्तं भक्तप्रत्याख्यानमिदानीमिङ्गिनीमरणमाह-

भा. [४३८८] पव्वज्जादी काउं नेयव्वं जाव होत वोच्छित्ती ।
पंचतुलेऊण ततो इंगिनीमरणं परिणओ उ ॥

वृ. प्रव्रज्यादिकं प्रव्रज्याशिक्षाग्रहणं व्रतारोहणमर्थग्रहणमनियतं वासं गच्छस्य परिपूर्णस्य निवृर्त्ति गच्छनिवृत्तिकरणेन च तीर्थस्याव्यवच्छेदः कृतस्तत आह तावत् ज्ञातव्यं यावद् भवति-(अ) व्यवच्छित्तिः । तत्पर्यन्तं कृत्वा पञ्च च तपः । सूत्रसत्त्वैकत्वबललक्षणानि तोलयित्वा सं इङ्गिनीमरणं परिणतः प्रतिपन्नो भवति । अथ भक्तपरिज्ञातोऽस्यां को विशेष इत्याह-

भा. [४३८९] आयप्परपडिकम्मं भत्तपरिन्नाए दो अनुन्नाया ।
परिवज्जिया इंगिनि चउव्विहाहारविरई या ॥

वृ. भक्तपरिज्ञायां द्वे अपरिज्ञाते तद्यथा-आत्मना स्वयं परिकर्म परेण च, इङ्गिनी पुनः परिवर्जिता परेण परिकर्म न कार्यते तथा भक्तपरिज्ञायां चतुर्विधस्य त्रिविधाहारस्य विरतिर्भवति । इङ्गिन्यां तु नियमाच् चतुर्विधाहारविरतिः । परपरिकर्मविवर्जनमेव भावयति-

भा. [४३९०] ट्ठाणनिसीय तुयट्टण इत्तरियाइं जहा समाहीए ।
सयमेवय सो कुणती उवसग्गपरीसह हियासी ॥

भा. [४३९१] संघयणधितीजुत्तो नवदसपुव्वा सुएण अंगा वा ।
इंगिनिपातोवगमं नीहारी वा अनीहारी ॥

वृ. स्थानमूर्ध्वस्थानं, निषदनमुपवेशनं, त्वग् वर्तनं शयनं, एतानि, चत्वारकाणि स यथा समाधिः स्वयमेव करोति न तु परतः कारयति । तथा दीव्यादीन् उपसर्गान् चक्षुरादिपरीषहांश्च सम्यगध्यास्ते सहते, । तथाहि-चतुर्विधाहारप्रत्याख्यानान्नास्यपानकमपि भवति, नाप्यपवादतश्चरमाहारदानमिति तथा संहनने तु त्रयाणामाद्यानामन्यतमेन धृत्या च युक्तस्तथा श्रुतेन सूत्रतो यस्य पूर्वाणि नव दश वा केवलानि अङ्गानि स इङ्गिनीमरणं प्रतिपद्यते । गतमिङ्गिनीद्वारमधुना

22/32

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादपोपगमनमुच्यते तदपि प्रव्रज्यादितोर्थाव्यवच्छेदपर्यन्तं कृत्वा पञ्च तपः सूत्रादि तोलयित्वा च प्रतिपद्यते। तत्र नियमतो निःप्रतिकर्म निश्चलंया,तथाहि-ऊर्ध्वस्थानेन उपवेशनेन पार्श्वेण वाऽन्येन वा येन स्थानेन स्थितः स यावज्जीवमपि तेन स्थानेन तिष्ठति न पुनरन्यत्स्थानं तस्य कर्तुं तस्य स्वप्रयोगेण कल्पते। तच्च द्विधा-निर्हारिमं नाम यत् ग्रामदीनामन्तः प्रतिपद्यते ततो हि मृतस्य स ततस्तस्य शरीरं निष्काशनीयं भवति। अनिर्हारितं नाम यत् ग्रामादीनां बहिः प्रतिपद्यते, । सम्प्रति पादपोपगमस्य निरुक्तमाह-

भा. [४३९२] पातोवगमं भणियं समविसमे पायवो जहा पडितो।
नवरं परप्पउगा कंपेज्ज जहा चल तरुव्व ॥

वृ. पादपपोगमं नाम भणितं यथा समे विषमे वा पादपः पतितस्तथैवावतिष्ठते तथा यो यथा समे विषमे वा पतितः स यावज्जीवं तथा तिष्ठति। नवरं परप्रयोगात् कम्पेत यथा तरुः परप्रयोगाच्चलः। पादपस्येवोपगमोऽभ्युपगमः पतनस्य यत्र तत्तथेति व्युत्पत्तिः।

भा. [४३९३] तसपाणबीयरहिए विच्छिन्नवियार थंडिल विसुद्धे।
निद्दोसा निद्दोसे अवेंति अब्भुज्जया मरणं ॥

वृ. विशुद्धे स्थण्डिले निर्दोषे निर्दोषत्वमेवाह-त्रसप्राणबीजरहितेऽविस्तीर्णविचारे विपुलप्रचारे यत्र कृष्यमाणस्याप्यस्थण्डिलगमनदोषा न भवन्ति। तत्र निर्दोषाः साधवोऽभ्युद्यतमरणं पादपोपगमनमरणमुपयन्ति प्रतिपद्यन्ते।

भा. [४३९४] पुव्वभवियवेरेणं देवो साहरति कोवि पायाले।
मासो चरमसरीरो न वेयणं किंचि पाविहिति ॥

वृ. पूर्वभवकर्मवैरेण कोऽपि देवस्तं प्रतिपन्नपादपोपगमनं पातालकलशेषु संहरेत्। नासौ चरमशरीर न कांचिदपि वेदनां प्राप्स्यतीति कृत्वा स तथा हतः सम्यक् तमुपसर्गं सहते। न केवलमेनमन्यानापि तथा चाह-

भा. [४३९५] उत्पन्ने उवसग्गे दिव्वे मानुस्सए तिरिच्छे य।
सव्वे पराइणित्ता पाओवगया परिहरंति ॥

वृ. उत्पन्नान् उपसर्गान् दिव्यान्मानुषान् तैरश्चांश्च सर्वन् पराजित्य पादपोपगताः प्रवितरन्ति।

भा. [४३९६] जह नाम असीकोस अन्नो कोसे असीवि खलु अन्ने।
इय मे अन्नो देहो अन्नो जीवोत्ति मन्नेति ॥

वृ. यथा नाम असिः खड्गं कोशे प्रत्यागारे वर्तते। तत्रान्यः पृथग् खलु कोशोऽन्यो असिरिति। एवममुना दृष्टान्तप्रकारेण ममान्यो देहोऽन्यो जीवः पर अ प्रभवति देहेन जीव इति न काचिन्मे क्षतिरिति मन्यते। तथा मननाच्च सम्यक् उपसर्गान् सहते।

भा. [४३९७] पुव्वावरदाहिणउत्तरेहिं वाएहिं आवयंतेहिं।
जह न वि कंपइ मेरू तह ते ज्झाणाओ न चलंति ॥

वृ. यथा मेरुः पूर्वापरदक्षिणोत्तरैर्वा तैरापतद्भिर्न च कम्पते तथा ते पादपोपगता उपसर्गनिपातेऽपि ध्यानान्न चलन्ति।

भा. [४३९८] पढमंमि य संघयणा वट्टंतो सेलुकुड्डु समाणा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसिं पिय वुच्छेदो चोद्दसपुव्वीण वुच्छेए ॥

वृ. प्रथमे च ऋषभनाराचलक्षणसंहनने वर्तमाना धृत्या शैलकुड्यसमानाः पादपोपगमनं प्रतिपन्नाः पादपोपगमनं प्रतिपद्यन्ते। तेषामपि च पादपोपगमप्रतिपत्तृणां चतुर्दशपूर्विव्यवच्छेदे व्यवरच्छेदो भवेत्।

भा. [४३९९] दिव्वमनुया उ दुग तिग अस्से पक्खेवगं सिया कुज्जा।
वोसट्ठ चत्तदेहो अहाउयं कोइ पालेज्जा ॥

वृ. देवा मानुष्या वा अनुलोभानि प्रतिलोभानि वा द्रव्याणि द्विकमनुलोभप्रतिलोमलक्षणो-भयसहितं तदेवत्रिकमथवा सचित्तमचित्तं वा द्विकं तदेव हि मिश्रसहितं त्रिकं तस्य द्विकस्य त्रिकस्यवा आस्ये मुखे प्रक्षेपं कुर्युः। स तेन द्वारेण मुखे प्रक्षिप्तेन व्युत्सृष्टः प्रतिबन्धाभावत-स्त्यक्तपरिकर्मकरणतो देहो येन स व्युत्सृष्ट त्यक्तदेहः। कोऽपि यथायुर्यथावस्थितमात्मीयमायुः पालयति द्विकत्रिकाहारव्याख्यानार्थमाह-

भा. [४४००] अनुलोभा पडिलोमा दुगं तु उभयसहिया तिगं होति।
अहवा चित्तमचित्तं दुगं तिगं मीसगसमग्गं ॥

वृ. अनुलोमानि द्रव्याणि प्रतिलोमानि चेति द्विकं तान्येवोभयसहितानि त्रिकमथवा सचित्त-मचित्तमिति द्विकं तदेव मिश्रसमग्रं त्रिकमिति।

भा. [४४०१] पुढविदग अगनिमारुय वणस्सइ तासु कोवि साहरइ।
वोसट्ठचत्तदेहो अहाउयं कोवि पालेज्जा ॥

वृ. कोऽपि पादापोपगमं प्रतिपन्नं पृथिव्यां पृथिवीकायमध्ये उदके अप्कायेऽग्नौ मारुते वायुकाये वनस्पतिषु त्रसेषु च संहरन्ति। स च तथा संहृतो व्युत्सृष्टत्यक्तदेहो यथायुः कोऽपि पालयति।

भा. [४४०२] एगंतनिज्जरा से दुविहा आराधना धुवा तस्स।
अंतकिरियं व साहू करेज्ज देवोववत्तिं वा ॥

वृ. एकान्तेन स तथास्थितस्य निर्जरा भवति तथा तस्य ध्रुवा द्विविधा सिद्धिगमनयोग्या कल्पोपपत्तियोग्या चाराधना यया साधुरन्तक्रियां वा कुर्यात् देवोपपत्तिं वा।

भा. [४४०३] मज्जणगंधं पुप्फोवयार परिचारणं सिया कुज्जा।
वोसट्ठ चत्तदेहो अहाउयं कोइ पालेज्जा ॥

वृ. केचित् रूपातिशयलुब्धाः तस्य कृतपादपोपगमस्य मज्जनं स्नानं ततः पटवासादिगन्धं तदनन्तरं पुष्पोपचारं ततः परिचारणं गले लगित्वा परिशयनपरिचुम्बनादिरूपं स्यात्। कदाचित् कुर्यात्। तत्र स व्युत्सृष्टत्यक्तदेहो यथायुः कोऽपि पालयति। अरिक्तद्विष्टः सन सम्यक्ततत्सहमानो यावज्जीवमवतिष्ठते।

भा. [४४०४] पुव्वभविय पेम्मेण देवो देवकुरु उत्तरकुरासु।
कोई तु साहरेज्ज सव्वसुहार जत्थ अनुभावा ॥

वृ. पूर्वभविकेन पेम्णा कोऽपि देवो यत्र अनुभवाः सर्वे शुभास्तासु देवकुरुषूत्तरकुरुषु वा संहरेत्। स च तथा तत्र संहृतो व्युत्सृष्टत्यक्तदेहो यथायु कोऽपि पालयति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४४०५] पुव्वभवियपेम्मेणं देवो साहरइ नागभवणंमि।
जहियं इट्ठा कंता सव्वसुहा होंति अनुभावा॥

वृ. पूर्वभविकेन प्रेम्णा कोऽपि देवो यत्र सर्वेषु शुभा अनुभावा इष्टाः कान्ताश्च भवन्ति। तत्र नागभवने संहरेत्। सोऽपि तत्र तथैवावतिष्टते।

भा. [४४०६] बत्तीसलक्खणधरो पातोवगतो य पागडसरीरो।
पुरिसव्वेसिणि कण्णा राइ विइण्णा उ गेण्हेज्जा॥

वृ. द्वात्रिंशल्लक्षणधरः पादपोपगतः सन् प्रकटशरीरो जातस्तं पुरुषद्वेषिणी कन्या राजवितीर्णा राज्ञा अनुज्ञाता सती गृह्णीयात्। गृहीत्वा किं करोत्यत आह-

भा. [४४०७] मज्जनगंधं पुप्फोवयारपरिचारणं सयं कुज्जा।
वोसट्ठ चत्तदेहो अहाउयं कोवि पालेज्जा॥

वृ. अस्य व्याख्या प्राग्वत्। तथा-

भा. [४४०८] नवंगसुत्त परिबोहियाए अट्ठारसतिविसेसकुसलाए।
वायत्तारिकला पंडियाए चोसट्ठि महिलागुणेहिं॥

वृ. द्वे अक्षीणि द्वौ कर्णौ द्वौ नाशापुटौ द्विजिह्वा स्पर्शने नवमं मनः। एतानि नव अङ्गानि यावदद्यापि यौवनं न भवति तावत्सुप्तानि भवन्ति। न खलु तदानीमेतेषामतीवाऽभिष्वङ्गा सुखं भवति, ततः सुप्तानीति व्यपदिश्यन्ते। यौवने तु प्राप्तकलस्य गुणेन प्रतिबुद्धानि जायन्ते। नवाङ्गानि सुप्तानि प्रतिबोधितानि यया सा तथा तया तथा अष्टादश देशीभाषास्तासु मध्ये यस्य यत्र कामरतिविशेषस्तत्र कुशलतया तथा द्वासप्तप्रतिकलापण्डितया चतुःषष्ट्या महेलागुणैरुपेतया, नवाङ्गादि व्याख्यानं तावदाह-

भा. [४४०९] दो सोआ नेत्तमादी नवंग सुत्ता हवंती एए उ।
देसी भास द्वारसती विसेसा उ इगवीसं॥

भा. [४४१०] कोसल्लमेक्कवीसंइविहं तु गुणेहिं जुत्ताए।
रूवजोव्वणविलास लावन्नकलियाए॥

वृ. द्वे श्रोत्रे द्वे नेत्रे आदिशब्दान्नाशान्नाशापुटद्वयजिह्वास्पर्शन मनसां परिग्रह एतानि नवकं नवसंख्यानि सुप्तानिभवंति, देशीभाषा अष्टादश ताः शास्त्रप्रसिद्धा रतिविशेष एकोनविंशति-तमः,। तत्र कोशलमेकविंशतिविधं शास्त्रप्रसिद्धं। एवमादिभिर्गुणैर्युक्तया तथा रूपयौवन-विलासलावण्यकलितया च।

भा. [४४११] चउकण्णंमि रहस्से रागेणं रायदिन्नपसराए।
तिमिमयरेहिं व उदही, न खोभिओ जो मनो मुनित्तो॥

भा. [४४१२] जाहे पराजिया सा न समत्था सीलखंभणं काउं।
नेऊण सेलसिहरं तो से सिलमुंचए उवरिं॥

वृ. चतुःकर्णे रहस्ये रागेणानुरागेण राजदत्तप्रसराया गृह्यते गृहीत्वा चानेकप्रकारसंक्षोभ आपद्यते तत्र यन्मुनेर्मनस्तत् न याति। तिमिमकरैर्वोदधिर्न क्षोभितः ततो यदा सा पराजिता न शीलखण्डनं कर्तुं समर्था तदा रोषात् शैलशिखरं नीत्वा से तस्योपरि शिलां मुञ्चति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४४१३] एगंतं निज्जरा से दुविहा आराधना धुवा तस्स।
अंतकिरियं व साहू करेज्ज देवोववतिं य ॥

वृ. इयं प्राग्वत्।

भा. [४४१४] मुनिसुव्वयंतेवासी खंदगदाहे य कुंभगारधडे।
देवी पुरंदरजसा दंडयपालक मरुओ य ॥

वृ. कुम्भकारकृते नगरे दण्डकिर्नाम राजा तस्य देवी पुरन्दरयशाः। पालको नाम मरुकः पुरोहितः। तत्र भगवतो मुनिसुव्रतस्वामिनो अन्तेवासी स्कन्दको नाम विहारक्रमेण गतः स स्वशिष्याणां यन्त्रपीडनेन मरणं विशेषतो बालक्षुल्लकस्योपलभ्य संजातकोपो यंत्रपीडन-मारितोऽग्निकुमारेषूत्पद्यजातिं स्मृत्वा समस्तस्यापि देशस्य दाहं कृतवान् शिष्यास्तु समाधिं प्राप्ता मृत्युमुपागतास्तथा चाह-

भा. [४४१५] पंचसया जंतेन रुट्ठेण पुरोहिएण मलियाइं।
रागद्दोसतुलग्गं समकरणं चित्तयत्ताणं ॥

वृ. रागद्वेषतुलाग्रं समकरणं समभावं चिन्तयतां साधूनां पञ्चशतानि रुष्टेन पुरोहितेन यन्त्रेण मलितानि (पीलितानि) तथापि न तेषां मनागपि ध्यानविक्षोभोऽभवत्। एवमन्यैरपि सोढव्यं।

भा. [४४१६] जं तेन ककएण सत्थेण व सावएहिं विविहेहिं।
देहे विद्धिस्संते न हु ते ज्झाणाओ फिट्टंति ॥

वृ. यन्त्रेण क्रकचेन शस्त्रेण वा खङ्गादिना स्वापदैर्वा विविधैः शृगालिकाप्रभृतिभिर्देहं विध्यस्यमाने न हु नैव ते पादपोपगता ध्यानात् स्फिटन्ति परिभ्रश्यन्ति।

भा. [४४१७] पडिनीययाए कोई अग्गिं से सव्वतो पदेज्जाहि।
पादोवगए सन्ते जह चाणक्कस्स व करीसे ॥

वृ. पादपोपगते सति कोऽपि प्रत्यनीकतया से तस्य सर्वतः सर्वासु दिक्षु अग्निं प्रदद्यात्। यथा चाणकस्य करीषमध्ये व्यवस्थितस्य सुबंधुनामामात्यः सर्वतोऽग्निं प्रदीपितवानिति।

भा. [४४२८] पडिनीययाए कोई व मंसे कीलएहिं विहुणत्ता।
महुघयमक्खिय देहं पिपीलियाणं तु देज्जाहि ॥

वृ. प्रत्यनीकतया कोऽपि से तस्य पादपोपगमनस्य कीलकैर्लोहमयैश्चर्मविधून्य तदनन्तरं तं मधुघृतम्रक्षितदेहं कृत्वा पिपीलिकानां दद्यात्। तथापि सम्यक् सहेत तत्र सहने दृष्टान्तमाह-

भा. [४४२९] जह सो चिलायपुत्तो वोसट्ठ निसट्ठ चत्तदेहो उ।
सोणियगंधेन पिवीलियाहिं वालंकिओ धीरो ॥

वृ. यथा स चिलायपुत्तो निसृष्ठमतिशयेन व्युत्सृष्टत्यक्तदेहः शोणितगन्धेन पिपीलिका-भिश्चालांकृतश्चालिनीकृतो धीरो मनागपि ध्यानाच्चलितवान्न; एवं सर्वैरपि सोढव्यम्।

अन्यदृष्टान्तमाह-

भा. [४४२२] जह सो कालायवेसितो वि मोग्गल्लसेलसिहरम्मि।
खइओ विउव्विऊणं देवेन सियालरूवेण ॥

वृ. यथा स ब्रह्मचर्याध्ययनप्रसिद्धकालादवैश्यो मोद्गलशैलशिखरे स्थितो देवेन शृगालरूपं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विकुर्वित्वा(य) शृगालरूपेण खादितो भक्षितः तथापि स सम्यगधिसोढवान्। एवं सर्वैरपि सोढव्यम्।

भा. [४४२१] जह सो वंसिपएसी वोसट्ठ चत्तदेहो उ।
वंसीपत्तेहिं विनिग्गएहिं आगासमुक्खित्तो ॥

वृ. साधुरेकः पादपोपगतः स प्रत्यनीकैरुत्क्षिप्य वंशीकुडगस्योपरि मुक्तोऽधस्ताच्च वंशा उत्थितास्तैर्वंशैःप्रवर्धमानैः स साधुर्विद्धो दूरमुत्क्षिप्य आकाशं प्रापितः सम्यक् सोढवान् अक्षरगमनिका त्ववेम्-यथा स वंशी वंशीप्रदेशैः क्षिप्तो निसृष्टमतिशयेन व्युत्सृष्टस्त्यक्तदेशो वंशी पत्रैरंकुररूपैर्विनिर्गतैर्दूरमाकाशमुत्क्षिप्तो वेदनां सोढवान्। एवं सर्वैरपि सोढव्यम्।

भा. [४४२२] जहवंतीसुकुमालो वोसट्ठनिसट्ठ चत्तदेहो ऊ।
धीरो सपेल्लयाए सिवाए खतितो तिरत्तेण ॥

वृ. यथा अवन्तिसुकुमालो व्युत्सृष्टस्त्यक्तदेहो धीरः सपेल्लयाए पेल्लकसहितया बालसपुत्रभाण्डसहितया शिवया शृगाल्या त्रिरात्रेण रात्रित्रिकेण भक्षितः सम्यक् सोढवान्।

एवमन्यैरपि सोढव्यम्।

भा. [४४२३] जह ते गोहट्ठाणे वोसट्टनिसट्ठ चत्तदेहागा,
उदएण चोज्झमाणा वियरम्मि उ संकरे लग्गा ॥

वृ. ग्रामासन्नप्रदेशे केचित्साधवः पादपोपगतास्तता यथा ते गोष्टस्थाने प्रदेशविशेषे निसृष्टं निस्सहतया व्युत्सृष्टस्त्यक्तदेहा आन्तरिक्षेण पतितेनोदकेन उह्यमाना वितरके नद्याः श्रोतसि शंकरे लग्नाः सम्यग् वेदनां सहमानाः कालगताः। एवं शेषैरपि सोढव्यमेतदेवाह-

भा. [४४२४] बावीसमानुपुव्वी तेरिक्खमनुया व भंसणत्थाए।
विसयानुकंपरक्ख करेज्ज देवा व मनुओ वा ॥

वृ. द्वाविंशति परीषहान् आनुपूर्व्या पश्चादानुपूर्व्या अनानुपूर्व्या वा तिर्यञ्चो मनुष्या वा चारित्रभ्रंशनार्थमुदीरयंस्तथा देवा मनुष्या वा विषयाणामिन्द्रियविषयाणा प्रत्यनीकतया अनिष्टानामनुकम्पया इष्टानामुदीरणमनुकम्पया रक्षणं कुर्युः। तत्रारिक्तद्विष्टः सन् सम्यक् सहेत।

भा. [४४२५] जह सा बत्तीसघडा वोसट्ठनिसट्ठ चत्तदेहा उ।
वीराधातेन उ दारिएण दियलंभि उलइया ॥

वृ. यथा सा द्वात्रिंशत् गोष्ठीपुरुषा इत्यर्थः व्युत्सृष्टस्तत्प्रतिबन्धपरित्यागेनानिसृष्टातिशय त्यक्तो मनागपि परिचेष्टा अकरणात् देहो यया सा तथा पादपोपगताघ्रातेन तृसेन द्वीपान्तरवासिना म्लेच्छेन दृष्टा ततः कल्ये ममैते भक्ष्यं भविष्यंतीति चिन्तयित्वा वृक्षं विलग्नापयित्वा दियलंभि बलीएव ते उलइया। अवलंबिता ते सम्यग् वेदनां सहमानाः कालगताः उपसंहारमाह-

भा. [४४२६] एवं पातोवगमं निप्पडिकम्मं तु वण्णितं;
समए तित्थयरगणहरेहिं य साहु वि य सेवि य ॥

वृ. एतत्पादपोपगमं सूत्रे आगमे निःप्रतिकर्मवर्णितं तीर्थकरैर्गणधरैः शेषसाधुभिश्चोत्तमधृतिसंहननोपेतैः उदारं स्फीतं यथा भवत्येवमासेवितं। अत्र चायं क्रमो यःपादपोपगमनस्येङ्गिनीमरणस्य च करणे असमर्थः स भक्तप्रत्याख्यानं करोति। ततोऽपि यः समर्थतर

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पादपोपगमनं च कर्तुमसमर्थः स इग्निनीमरणं ततोऽपि समर्थतरः पादपोगमं एतानि च मरणानि कुर्वन्तो यथा यथोपरितनमरणस्तथा तथा महानिर्जरतरा मूलोपसंहारमाह-

भा. [४४२७] एसागमववहारो जहोवएसं जहक्कमं कहिओ ।
एत्तो सुयववहारं सुण वच्छ जहानुपुव्वीए ॥

वृ. एषोऽनन्तरोदित आगमव्यवहारो यथोपदेशं यथाक्रमं विकथित अत ऊर्ध्वं यथानुपूर्व्या परिपाट्य कथ्यमानं श्रुतव्यवहारं च शृणु तमेव कथयति-

भा. [४४२८] निज्जूढं चोद्दसपुव्विएण जं भद्दबाहुणा सुत्तं ।
पंचविहो ववहारो दुवालसंगस्स नवतीतं ॥

वृ. यत् भद्रबाहुस्वामिना चर्तुदशपूर्विकेण चतुर्दशपूर्वधरेण पञ्चविधो व्यवहारः पञ्चविधव्यवहारात्मकं निर्व्यूढं द्वादशाङ्गस्य नवनीतमिव नवनीतं मथितस्य नवनीतमेव द्वादशाङ्गस्य सारमित्यर्थः । एतेन द्वादशाङ्गान्निर्व्यूढमावेदितव्यम् तत् सूत्रं श्रुतमुच्यते तेन व्यवहारः श्रुतव्यवहारः ।

भा. [४४२९] जो सुयमहिज्जइ बहुं सुतत्थं च निउणं न याणेइ ।
कप्पे ववहारंमिय सो न पमाणं सुयहराणं ॥

भा. [४४३०] जो सुयमहिज्जइ बहुं सुत्तत्थं च निउणं विजाणाति ।
कप्पे ववहारंमि य सो उ पमाणं सुयहराणं ॥

वृ. यः कल्पव्यवहारे च सूत्रं बह्वधीतेन सूत्रार्थं निपुणं न जानाति स व्यवहारविषये न प्रमाणं श्रुतधराणां, यस्तु कल्पे व्यवहारे च सूत्रं बह्वधीते सूत्रार्थं च निपुणं विजानाति, स प्रमाणं व्यवहारे श्रुतधराणां ।

भा. [४४३१] कप्पस्स य निज्जुत्तिं ववहारस्स व परमनिउणस्स;
जो अत्थतो न याणइ ववहारी सो न णुन्नातो ॥

भा. [४४३२] कप्पस्स य निज्जुत्ति ववहारस्स व परमनिउणस्स ।
जो अत्थतो वियाणइ ववहारी सो अणुन्नातो ॥

वृ. कल्पस्य कल्पाध्ययनस्य व्यवहारस्य च परमनिपुणस्य यो निर्युक्तिमर्थतो न जानाति स व्यवहारी नानुज्ञातः । यस्तु कल्पस्य व्यवहारस्य च परमनिपुणस्य निर्युक्तिमर्थतो जानाति स व्यवहारी अनुज्ञातः ।

भा. [४४३३] तं चेवनुमज्जते ववहारविहिं पउंजंति जहुत्तं ।
एसो सुअववहारी पन्नत्तो धीरपुरिसेहिं ॥

वृ. कुलादिकार्येषु व्यवहारे उपस्थिते यद्भगवता भद्रबाहुस्वामिना कल्पव्यवहारात्मकं सूत्रं निर्यूढं तदेवानुमज्जननिपुणतरार्थं परिभावनेन तन्मध्ये प्रवशिन् व्यवहारविधिं यथोक्तं सूत्रमुच्चार्य तस्यार्थं यः प्रयुंक्ते स श्रुतव्यवहारी धीरपुरुषैः प्रज्ञप्तः ।

भा. [४४३४] एसो सुयववहारो जहोवएसं जहक्कमं भणितो ।
आणाए ववहारं सुण वच्छ जहक्कमं वुच्छं ॥

वृ. एष श्रुतव्यवहारो यथोपदेशं यथाक्रमं कथितः अत ऊर्ध्वमाज्ञया व्यवहारं यथाक्रमं यथा वक्ष्ये तं च वक्ष्यमाणं वत्स शृणु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४४३५] समणस्स ऊत्तमट्ठे सल्लुद्धरणकरणे अभिमुहस्स।
दूरत्था जत्थ भवे छत्तीसगुणा उ आयरिया ॥

वृ. श्रमणस्य उत्तमार्थे भक्तप्रत्याख्याने व्यवसितस्य यत् किमति शल्यमनुध्धृतमास्त तदुद्धरणकरणे अभिमुखस्य तत्र प्रायश्चित्तव्यवहारे षट्त्रिंशद्गुणा आचार्या दूरस्था भवेयुस्तत्राज्ञया व्यवहारः कथमित्याह-

भा. [४४३६] अपरक्कमो सि जाओ गंतुंजे कारणं च उप्पन्नं।
अठारसमन्नयरे वसणगतो इच्छिमो आणं ॥

वृ. स आलोचयितुकामश्चिन्तयति साम्प्रतमहमपराक्रमो जातोऽस्मि ततस्तेषां समीपे गन्तुं न शक्नोमि कारणं च मम तत् पार्श्वगमननिमित्तं समुत्पन्नं यतोऽष्टादशानां व्रतषट्कादीनां अन्यतरस्मिन्नतीचारे व्यसनगतः पतितस्तस्मादिच्छाम्याज्ञाव्यवहारमिति। एतदेव सविशेषं भावयति।

भा. [४४३७] अपरकम्मो तवस्सी गंतु जे सोहिकारगसमीवं।
आगंतुं न वाएई सो सोहिकारोवि देसाउ ॥

वृ. स आलोचयितुकामस्तपस्वी शोधिकारकसमीपे गन्तुमपराक्रमो। यस्यः समीप शोधिः कर्तव्या सोऽपि देशादालोचयितुः समीपमागन्तुं न शक्नोति।

भा. [४४३८] अह पट्ठवेइ सीसं देसंतरगमणनट्ठचेट्ठागो।
इच्छामज्जो काउं सोहिं तुब्भं सगासम्मि ॥

वृ. अथानंतरमालोचयितुकामो देशान्तरगमननष्टचेष्टाक आलोचनाचार्यस्य समीपे शिष्यं आर्य! युष्माकं सकाशे शोधिं कर्तुमिच्छामीत्येतत्कथयित्वा प्रेषयति।

भा. [४४३९] सोवि अपरक्कमगती सीसं पेसेइ धारणाकुसलं।
एयस्स दानि पुरओ करेइ सोहिं जहावत्तं ॥

वृ. सोऽपि आलोचनाचार्योऽपराक्रमगतिर्न विद्यते पराक्रमो गतौ यस्येति विग्रहः शिष्यं धारणाकुशलं प्रेषयति यस्त्वालोचयितुकामेन प्रेषितस्तस्य सन्देशं कथयति।

यथेदानीमेतस्य पुरतो यथावृत्तां शोधिं कुरु।

भा. [४४४०] अपरक्कमो य सीसं आणापरिणामगं परिच्छेज्जा।
रुक्खे य बीय काए सुत्ते वा मोहणाधारिं ॥

वृ. स आलोचनाचार्योऽपराक्रमः शिष्यमाज्ञापरिणामकं परीक्षेत किमेष आज्ञापरिणामकः किं वा नेति। आज्ञापरिणामको नाम यत् आज्ञाप्यते तत्कारणं न पृच्छति किमर्थमेतदिति किन्त्वाज्ञयैव कर्तव्यतया श्रद्दधाति। यदत्र कारणं तत् पूज्या एव जानते एवं यः परिणामयति स आज्ञापरिणामकस्तत्परीक्षा च वृक्षे बीजकाये च वक्ष्यमाणरीत्या कर्तव्या। आज्ञापरिणामत्वं परीक्ष्य पुनरिदं परीक्षणीयं यथा किमेषोऽवग्रहेण समर्थो धारणासमर्थश्च किं वा नेति। तत्राध्ययनादिपरीक्षया सूत्रे चशब्दादर्थे वाऽमोहनं मोहरहितं समस्तमासमन्तात् धारयतीत्येवं शीलोऽमोहनाधारी तं परीक्षेत तत्र वृक्षेणाज्ञापरिणामित्वपरीक्षामाह-

भा. [४४४१] दट्ठुमहंते रुक्खोअ गणिउ चेइ विलगगउं डेव।
अपरिणयवेति तहिं न वट्टइ रुक्खेवि आरोढुं ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४४४२] किं वा मारेयव्वो अहयंतो वेह डेव रुक्खाउ।
अतिपरिणामो भणती इयहेऊ अम्ह वेसिच्छा ॥

वृ. दृष्ट्वा महतो महीरुहान् गणिक आचार्यो ब्रूते-अस्मिन्नुच्चैस्त्वेन तालप्रमाणे वृक्षे विलग्य तत आत्मनं डिप, प्रपातं कुर्वित्यर्थः। एवमुक्तेन तत्रापरिणामको ब्रूते न वर्तते वृक्षे विलगितुं साधोः सचित्तत्वाद्वृक्षस्य प्रपातं च कुर्वन् आत्मविराधना भवति। स च भगवता निषिद्धा किं वाहं किमुपायेन मारयितव्योऽभिप्रेतो ब्रूथ-वृक्षादात्मानं डिपेति अतिपरिणामकः पुनरिदं भणति-इत्येवं भवतु करोमि प्रपातमिति भावोऽस्माकप्येषा इच्छा वर्तते।

भा. [४४४३] बेइ गुरू अहतंतू अपरिच्छियत्थे पभाससे एवं।
किं वमएतं भणितो आरुहरुक्खे सचित्ते ॥

वृ. अथानन्तरमतिपरिणामकं शिष्यं ब्रूते अपरीक्षिते अपरिभाषिते मद्वचनस्यार्थे त्वमेवमुक्त-प्रकारेण प्रभाषसे यथा करोमि प्रपातमस्माकमप्येषेच्छा वर्तते। अपरिणामकमधिकृत्य ब्रूते-त्वं वा मया किमेवं भणितो यथा सचित्ते वृक्षे आरोह येनोच्यते न वर्तते साधोर्वृक्षे विलगितु-मिति। किन्त्वेतन्मयोक्तं तदेवाह-

भा. [४४४४] तवनियमनाणरुक्खं आरुहिउं भवमहण्णवापन्नं।
संसारगम्म कूलं डेवे हंती मए भणितो ॥

वृ. तपो नियमज्ञानमयं वृक्षं भवार्णवापन्नं भवसमुद्रमध्यप्राप्तमारुह्य संसारगर्ता कूलं डिप उल्लङ्घयेति मया भणितः।

भा. [४४४५] जो पुन परिणामो खलु आरुह भणित्तो विसोवि चिंत्तेइ।
नेच्छंति पावमेते जीवाणं थावरादीणंपि ॥

भा. [४४४६] किं पुन पंचेंदीणं तं भवियव्वेत्थकारणेणं तु।
आरुहण ववसियं तू वारेइ गुरू ववत्थंतो ॥

वृ. यः पुनः खलु परिणाम आज्ञापरिणामकः स आरोहेति भणितश्चिन्तयति-नेच्छन्ति पापमेते मदीया गुरवो जीवानां स्थावराणामपि किं पुनः पञ्चेन्द्रियाणां तस्मादत्र कारणेन भवि-तव्यमेवं विचिन्त्यारोहणे व्यवस्थितः तमारोहणव्यवस्थितं गुरुरप्यवष्टभ्य बाहौ धृत्वा वारयति तदेवमुक्तं वृक्षे परीक्षणमधुना बीजेषु तदाह-

भा. [४४४७] एवानेह य बीयाइं, भणितो पडिसेहे अपरिणामो।
अइपरिणामगो पोट्टल बंधूण आगतो तहियं ॥

वृ. एवममुना प्रकारेण बीजानि आनयतेत्युक्ते अपरिणामः प्रतिषेधयति न कल्पन्ते बीजानि ग्रहीतुमिति यस्त्वतिपरिणामकः स बीजान पोट्टलं बध्या तत्र गुरुसमीपे समागतः।

भा. [४४४८] तेवि भणिया गुरूणं भणिया नेह अमलिबीयाइं।
नविरोह समत्थाहं सचित्ताइं व भणियाइं ॥

वृ. तावद्योऽपरिणामको गुरुणा भणितो मया भणितमानय अम्लिकाबीजानि काञ्जिकिनि बीजानि, यदि वा सचित्तानि विध्वस्तयोनिमयानि, यानि नविरोहसमर्थानि तान्यानयेति भणितानि।

भा. [४४४९] तत्थवि परिणामो तू भणती आनेसि केरिसाइं तु।

कत्तियमित्ताइं वा विरोहमविरोहजोग्गाइं ॥

वृ. तत्रापि यः परिणामकः स भणति कीदृशानि बीजान्यानयामि। विरोहयोग्यान्यविरोहयोग्यानि वा कियन्मात्राणि वा।

भा. [४४५०] सोवि गुरूहिं भणितो न ताव कज्जं पुणो भणिहामि।
हसितोव मए तासि वीमसंत्थ व भणितोसि ॥

वृ. सोऽप्याज्ञापरिणामको गुरुभिर्भणितो नं तावदिदानीं कार्यं यदा तु कार्यं भविष्यति तदा पुनर्भणिष्यामः। अथवा हासितोसि मया तावदिदानीं न पुनबीजैः प्रयोजनं यदि वा विमर्शार्थं तव विमर्शपरिक्षाणार्थं त्वमेव भणितोऽसि। सम्प्रत्यमोहनाधारि परीक्षामाह-

भा. [४४५१] पयमक्खमुद्देसं संधीसुतत्थ तदुभयं चेव।
अक्खर वंजण सुद्धं, जहा भणितं सो परिकहेइ ॥

वृ. पदमक्षरमुद्देशं सन्धिमधिकारविशेषं सूत्रमर्थं तदुभयं च अक्षरव्यञ्जनशुद्धं पूर्वमवग्राहयति। किमेष ग्रहणधारणायोग्यः किं वा नेति अवग्राह्य ततो ब्रूते उच्चारय प्रेक्षे किमपि गृहीतं न वा किं वा गृहतिमपि किं स्मृतं किं वा नेति। तत्र यदि यथा भणितं तथा सर्वं परिकथयति तदा ज्ञातव्य एष ग्रहणधारणे कुशल इति।

भा. [४४५२] एवं परिच्छिऊणं जोग्गं नाउण पेसवे तं तु।
वच्चाहि तस्सगासं सोहिं सोऊण आगच्छ ॥

वृ. एवं परीक्ष्य योग्यं ज्ञात्वा तं प्रेषयेत् सन्दिशति च ब्रज, तस्य साधोरालोचयितुकामस्य शोधिमालोचनां श्रुत्वा पुनरत्रागच्छ।

भा. [४४५३] अह सो गतो उ तहियं तस्स सगासम्मि सो करे सोहिं।
दुगतिगचउविसुद्धं तिविहे काले विगडभावो ॥

वृ. अथ प्रेषणानन्तरं यत्रालोचयितुकामो विद्यते तत्र गतस्तस्यागतस्य समीपे आलोचयितुकामः प्रशस्तेषु द्रव्यादिषु शोधिमालोचनां करोति। कथमित्याह-द्विकदर्शनातिचारं चारित्राचारमालोचयतीत्यर्थः। दर्शनग्रहणं ज्ञानग्रहणमपीति ज्ञानातिचारं चेत्यापि द्रष्टव्यम्। चारित्रातीचारालोचनेऽपि च द्विभेदा मूलगुणातिचारविषया उत्तरगुणविषया च तां करोति पुनस्त्रिकामाहारोपधीशय्याभेदत एकैकां त्रिप्रकारां चतुर्विशुद्धां प्रशस्तद्रव्यक्षेत्रकालभावोपेता त्रिविधे काले अतीते प्रत्युत्पन्ने च यत्सेवितमनागते च यत्सेविष्ये इत्यध्यवसितं विकयभावः प्रकटभावोऽप्रतिकुञ्चन इत्यर्थः ॥ सम्प्रति द्विकादिपदजातस्य व्याख्यानं किंचिदन्यथा किंचित्तदेव दर्शयति।

भा. [४४५४] दुविहं दप्पकप्पे तिविहं नाणाइणं तु अट्ठाए।
दव्वे खेत्ते काले, भावे य चउव्विहं एयं ॥

भा. [४४५५] तिविहे अतीअकाले पच्चुप्पन्ने विसेसियं जं तु।
सेविस्स वा एस्से पागडभावो विगडभावो ॥

वृ. द्विविधां शोधिं करोति दर्पे दर्पविषयां कल्पे कल्पविषयां। त्रिविधां ज्ञानादीनां ज्ञानदर्शनचारित्राणां अर्थायातीचारविशुद्धिलाभाय करोति। प्रशस्ते द्रव्ये प्रशस्ते क्षेत्रे प्रशस्ते काले प्रशस्ते भावे एतच्चतुर्विधं विशोधनं द्दष्टव्यं, तथा त्रिविधे अतीते प्रत्युत्पन्ने च काले यत्सेवितं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत् एष्यति काले सेविस्येऽहमित्यध्यवसितं तदविकटभावः प्रकटभाव आलोचयति।

भा. [४४५६] किं पुन आलोएई अतियारं सो इमो य अतियारो।
वयछक्कादी ते खलु नायव्वो आनुपुव्वीए॥

वृ. किं पुनस्तदालोचयति। सूरिराह-अतीचारं पुनरतीचारोऽयं वक्ष्यमाणो व्रतषट्कादिको व्रतषट्कादिविषयः खल्वानुपूर्व्या ज्ञातव्यस्तमेव दर्शयति।

भा. [४४५७] वयछक्कं कायछक्कं अकप्पो गिहिभायणं।
पलियकं निसेज्जा य सिणाणं सोभवज्जणं॥

वृ. व्रतषट्कं प्राणातिपातनिवृत्त्यादिरात्रिभोजनविरमणपर्यन्तं कायषट्कं पृथिव्याद्यकल्प-पिण्डादिको गृहिभाजनं कांश्यपात्र्यादि पल्यङ्कः प्रतीतो निषद्यागोचरप्रविष्टस्य निषदनं, अस्नानं देशतः सर्वतो वा स्नानस्य वर्जनं, भूषा परित्यागः एतत् विधेयतया प्रतिषेध्यतया वा यत् यथोक्तं नाचरितं तत् आलोचयति-

भा. [४४५८] तं पुन होज्जा सेविय दप्पेणं अहव होज्ज कप्पेण।
दप्पेण दसविहं तू इणमो वुच्छं समासेणं॥

वृ. तत्पुनर्विरुद्धं सेवितं दर्पेण अथवा कल्पेन तत्र यत् दर्पेण सेवितं तदिदं वक्ष्यमाणं दशविधं तदेव समासेन वक्ष्ये प्रतिज्ञामेव करोति-

भा. [४४५९] दप्प व अकप्प निरालंब वियत्ते अप्पसत्थ वीसत्थो।
अपरिच्छ अकडजोगी अनानुयावीय निस्संको॥

वृ. दर्पो निष्कारणं धावनवल्गनवीरयुद्धादिकरणं १। अकल्पोऽपरिणतपृथ्वीकायादि-ग्रहणमगीतार्थानीतोपधिशय्याहाराद्युमभोगश्च २। निरालम्बो ज्ञानाद्यालम्बनरहितप्रतिसेवनाको ३। वियत्तेति पदैकदेशे पदसमुदायोपचारात्त्यक्तकृत्यः संस्तरन्नपि सन्नकृत्यं प्रतिसेव्य त्यक्त-चारित्र इत्यर्थः ४। अप्रशस्तो बलवर्णादिनिमित्तं प्रतिसेवी, ५। विश्वस्तः स्वपक्षतः परपक्षतो वा निर्भयं प्राणातिपातादिसेवी ६। अपरीक्षी युक्तायुक्तपरीक्षाविकलः ७। अकृतयोगी अगीतार्थः। त्रीन् वारान् कल्पमेषणीयं चापरिभाव्य प्रथमवेलायामपि यतस्ततोऽल्पानेषणीय-मपि ग्राही ८। अननुतापी अपवादपदेन कायानामुपद्रवेऽपि कृते पश्चात् अनुतापरहितः ९। निःशङ्को निर्दयः इह परलोकशङ्कारहित इत्यर्थः १०।

भा. [४४६०] एयं दप्पेण भवे इणमन्नं कप्पियं मुनेयव्वं।
चउवीसई विहाणं तमहं वुच्छं समासेन॥

वृ. एतदनन्तरोक्तेन प्रकारेण सेवितं दर्पेण भवति। इदमन्यत्कल्पिकं चतुर्विंशतिविधानं ज्ञातव्यं तदहं समासेन वक्ष्ये तदेवाह-

भा. [४४६१] दंसणनाणचरित्ते तवपवयण समिति गुत्तिहेउ वा।
साहम्मिय वच्छल्लेण वावि कुलतो गणस्से वा॥

भा. [४४६२] संघस्सायरियस्स असहुस्स गिलाण बालवुड्ढस्स।
उदयग्गिचोर सावय भयकंतारावती वसने॥

वृ. दर्शने दर्शनप्रभावकं शास्त्रग्रहणं कुर्वन्नसंस्तरणे १। ज्ञाने सूत्रमर्णं चाधीयमानो असंस्तरणे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

२। चारित्रे अनेषणादोषतः स्त्रीदोषतो वा चारित्ररक्षणायः ततः स्थानादन्यत्र गमने ३। तपसि विकृष्टतपो निमित्तं धृतपानादि प्रवचने प्रवचनरक्षादिनिमित्तं विष्णुकुमारादिरिव वैक्रियकुर्वाणादि ५। समितावीर्यासमित्यादिरक्षणनिमित्तं चक्षुः सावद्यचिकित्साकरणादि ६। गुप्तौ भावितकारणतो विकटपाने कृते मनोगुप्तादिरक्षणनिमित्तमकल्पादि ७। साधर्मिकवात्सल्यनिमित्तं ८। कुलतः कार्यनिमित्तं ९। एवं गणकार्यनिमित्तः १०, सङ्घकार्यनिमित्तं ११, आचार्यनिमित्तं १२, असह-निमित्तं १३, ग्लाननिमित्तं १४, प्रतिषिद्धबालदीक्षितसमाधिनिमित्तं १५। प्रतिषिद्धवृद्धदीक्षित-समाधिनिमित्तं १६, उदके जलप्लवे १७, अग्नौ दवाग्न्यादौ १८, चौरे शरीरोपकरणापहारिणी १९। श्वापदे हिंसा व्याघ्रादावा पतित यद्वृक्षारोहणादि २०। तथा भये म्लेच्छादिसमुत्थे २१ कान्तारे अटव्यमानभक्तपानेऽध्वनि २२ आपदि द्रव्याद्यापत्सु २३। व्यसनं मद्यपानगीतगानादि-विषये पूर्वाभ्यासतः प्रवृत्ति २४। तत्र यद्यतनया प्रतिसेवते स कल्पः। एतदेवाह-

भा. [४४६३] एयन्नतरागाढे दंसणनाणे चरणसालंबो।
परिसेविउं कयाई होइ समत्थो पसत्थेसु॥

वृ. एतेषामनन्तरोदितानामन्यतरस्मिन् आगाढे समुत्थितदर्शनज्ञानचरणसालम्बः प्रतिसेव्या-कल्प्यप्रतिसेवना कृत्वा कदाचित्प्रशस्तेषु शुभेषु प्रयोजनेषु कर्तव्येषु समर्थो भवति।

तत एषा कल्पिका प्रतिसेवना।

भा. [४४६४] ठ्ठावेउ दप्पकप्पे हेट्ठा दप्पस्स दसपए ठ्ठावे।
कप्पस्स चउव्वीसति एतेसिमह ठ्ठारसपयाइं॥

वृ. प्रथमतो दर्पकल्पौ स्थापयित्वा तदनन्तरं दर्पस्याधस्तात् दर्पादीनि पदानि स्थाप्य (स्थापयित्वा ?) कल्पस्याधो दर्शनादीनि चतुर्विंशति पदानी तेषां दश चतुर्विंशति पदानामधो व्रतषट्कादोन्याष्टादशपदानि स्थापयेत् सम्प्रत्यालोचनाक्रममाह-

भा. [४४६५] पढमस्स य कज्जस्स य पढमेण पएण सेवियं जं तु।
पढमे छक्के अब्भितरं तु पढमं भवे ठ्ठाणं॥

वृ. इह प्रथमं कार्यं दर्पलक्षणं तस्य प्रथमतः स्थापयित्वा तस्य प्रथमस्य कार्यस्य सम्बन्धिना प्रथमेन दर्पलक्षणेन यत्सेवितं कथंभूतमित्याह-प्रथमे षट्के व्रतषट्करूपे अभ्यन्तरमन्तर्गतं तत्कतरदित्याह-प्रथमं प्राणातिपातलक्षणं भवेत्स्थानं। एवं मृषावादे अदत्तादाने मैथुने परिग्रहे रात्रिभोजन च वक्तव्यम्। पाठोऽप्येवमुच्चारणीयः।

भा. [४४६६] पढमस्स य कज्जस्स य पढमेन पएण सेवियं जंतु।
पढमे छक्के अब्भितरं तु बीयं भवे ठ्ठाणं॥

वृ. एवं तइयं भवे ठ्ठाणं जाव छट्ठं भवे ठ्ठाणं। एतदेव कथयन्नाह-

भा. [४४६७] पढमस्स य कज्जस्स य पढमेन पएण सेवियं जंतु।
पढमे छक्के अब्भितरंमि सेसुसुवि पएसु॥

वृ. अक्षरगमनिका प्राग्वत्। नवरं सेसेसु वि पएसु इति आद्यं पादत्रयमुञ्चता शेषेष्वपि मृषावादादिषु बिइयं भवे ठ्ठाणं तइयं भवे ठ्ठाणमित्यादि पदसंचारतो वक्तव्यम्।

भा. [४४६८] पढमस्स य कज्जस्स य पढमेन पएण सेवियं जंतु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बिइए छक्के अब्भितरंमि तु पढमं भवे ट्ठाणं ॥

वृ. प्रथमस्य कार्यस्य दर्पलक्षणस्य प्रथमेन पदेन दर्परूपेण यत्सेवितं द्वितीये षट्के कायषट्के अभ्यन्तरमन्तर्गतं तत्कतरदित्याह-प्रथमं पृथिवीकायलक्षणं भवेत् स्थानमेवमप्काये तेजस्काये वायुकाये वनस्पतिकाये त्रसकाये च यथाक्रमं बिइयं भवे ट्ठाणमित्यादिपदसंचारतः पूर्वक्रमेण पञ्चगाथा व्यक्त्वयाः। एतदेवाह-

भा. [४४६९] पढमस्स य कज्जस्स य पढमेन पएन सेवियं जंतु।
बिइए छक्के अब्भितरंमि सेसेसु वि पएसु ॥

वृ. इयमपि प्राग्वत्। नवरं सेसेसु इति शेषेष्वप्यप्कायादिषु वदेत्।

भा. [४४७०] पढमस्स य कज्जस्स य पढमेन पएन सेवियं जंतु।
तइए छक्के अब्भितरंमि तु पढमं भवे ट्ठाणं ॥

वृ. प्रथमस्य कार्यस्य दर्पलक्षणस्य प्रथमेन पदेन दर्परूपेण यत्सेवितं कथंभूतमित्याह-तृतीये षट्के अकल्पगृहिभाजनादिलक्षणे अभ्यन्तरमन्तर्गतं कतरदित्याह-प्रथमकल्पलक्षणं भवेत् स्थानमेवं गृहिभाजने पल्यङ्के निषद्यायां स्न्रे शोभायां च यथाक्रमं च बिइयं भवे ट्ठाणं तइयं भवे ट्ठाणमित्यादि पदसंचारतः पञ्च गाथा वक्तव्याः तथा चाह-

भा. [४४७१] पढमस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।
तइए छक्के अब्भितरंमि तु सेसेसु वि पएसु ॥

वृ. अक्षरगमनिका प्राग्वत्। तदेवं प्रथमस्य कार्यस्य प्रथमं पदं दर्पलक्षणं पदममुंचता अष्टादशपदानि। एवमकल्पादिभिरपि द्वितीयादिभिः पदैः संचारणीयानि पाठोऽप्येषं-पढमस्स य कज्जस्स य बीएण पएण सेवियं जं तु। पढमे छक्के अब्भितर तु पढमं भवे ट्ठाणमित्यादि सर्वसंख्या भङ्गानामशीतिशतम् तदेवं प्रथमं दर्परूपं विशुद्धमिदानीं द्वितीयं

भा. [४४७२] बिइयस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।
पढमे छक्के अब्भितरं तु पढमं भवे ट्ठाणं ॥

वृ. द्वितीयस्य कार्यस्य कल्पलक्षणस्य सम्बन्धिना प्रथमेन पदेन दर्शनलक्षणेन यत्सेवितं कथंभूतमित्याह-प्रथमे षट्के उभयषट्करूपे अभ्यन्तरमन्तर्गतकतरत्तदित्याह-प्रथमं प्राणातिपातलक्षणं भवेत् स्थानमेवं मृषावादे अदत्तादाने मैथुने परिग्रहे रात्रिभोजने च पूर्वक्रमेण यथाक्रमं पञ्च गाथा वक्तव्यास्तथा चाह-

भा. [४४७३] बिइयस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।
पढमे छट्ठे अब्भितरं तु सेसेसु वि पएसु ॥

वृ. अक्षरगमनिका प्राग्वत् द्वितीयषट्कं कायरूपमधिकृत्याह-

भा. [४४७४] बिइयस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।
बिइए छक्के अब्भितरं तु पढमं भवे ट्ठाणं ॥

वृ. अत्र प्रथम स्थानं पृथिवीकायलक्षणमेवमप्काये अग्निकाये वायुकाये वनस्पतिकाये त्रसकाये प्रागुक्तेन प्रकारेण पञ्च गाथा वक्तव्यास्तथा चाह-

भा. [४४७५] बिइयस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बिइए छक्के अब्भितरं तु सेसेसु वि पएसु ॥

वृ. प्रागवत् तृतीयकल्पादिषट्कमधिकृत्याह-

भा. [४४७६] बिइयस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।
तइए छक्के अब्भितरं तु पढमं भवे ट्ठाणं ॥

वृ. अत्र प्रथमं स्थानं कल्पलक्षणमेवं गृहिभाजने पल्लयङ्के निषद्यायां स्नाने शोभायां च प्रागुक्तप्रकारेण पञ्चगाथा वक्तव्याः। एतदेव सूचयति-

भा. [४४७७] बिइयस्स य कज्जस्स य पढमेन पएन सेवियं जं तु।
तइम छक्के अब्भितरं तु सेसेसु वि पएसु ॥

वृ. व्याख्या प्राग्वत्। तदेवं द्वितीयस्य कार्यस्य कल्पलक्षणस्य प्रथमं दर्शनरूपं पदममुञ्चता अष्टादशपदानि संचारितान्येवं ज्ञानादिलक्षणैर्द्वितीयादिभिरपि पदैस्त्रयोविंशतिसंख्याकैः प्रत्येकमष्टादशपदानि संचारयितव्यानि। सर्वसंख्या भंगाना द्वात्रिंशदधिकानि चत्वारि शतानि अष्टादशानां चतुर्विंशत्या गुणने एतावत्याः संख्याया भावात्।

सम्प्रति पढमस्स य कज्जस्स य इत्यादि पदव्याख्यानार्थमाह-

भा. [४४७८] पढमं कज्जं नाम निक्कारणं दप्पउ पढमं।
एवं पढमे छक्के पढमं पाणाइवादो मुनेव्यवो ॥

वृ. अत्र निष्कारणं नाम दर्पः प्रथमं पदं दर्पको दर्पः। शेषं सुगमम्।

भा. [४४७९] एवं मुसावातो अदिन्नादाण मेहुण परिग्गहो चेव।
बिइछक्के पुढवादी तइय छक्के अकप्पादी ॥

वृ. एवमुक्तप्रकारेण मृषावादोऽदत्तमदत्तादानं मैथुनं परिग्रहश्चशब्दात् रात्रिभोजनं च संचारणं द्वितीये षट्के क्रमेण पृथिव्यादयः संचारणीयास्तृतीये षट्के अकल्पादयः।

भा. [४४८०] निक्कारणदप्पेणं अट्ठारस चारियाइं एयाइं।
एवमकप्पादीसु वि एक्केक्के होंति अट्ठारस ॥

वृ. एवं निष्कारणस्य दर्पलक्षणस्य कर्यस्य सम्बन्धिना प्रथमेन पदेन दर्पेण एतानि व्रतषट्क-प्रभृतीन्याष्टादशपदानि संचरितानि। एवमकल्पादिष्वपि नवसु पदेषु एकैकस्मिन् प्रत्येकमष्टा-दशपदानि संचारयित्वानि भवन्ति।

भा. [४४८१] बिइयं कज्जं कारण पढमपयं तत्थ दंसण निमित्तं।
पढमछक्के वयाइं तत्थ वि पढमं तु पाणवहो ॥

वृ. द्वितीयं कार्यं नाम करणं कल्प इत्यर्थः। तत्र प्रथमं पदं दर्शननिमित्तं प्रथमं षट्कं व्रतानि, तत्र प्रथमं पदं प्राणवधः।

भा. [४४८२] दंसणममुयंतेन पुव्वकमेणं तु चारणीयाइं।
अट्ठारसट्ठाणाइं एवं नाणाइ एक्केक्के ॥

वृ. दर्शनं दर्शनपदं प्रथममुञ्चता पूर्वक्रमेणाष्टादशस्थानानि चारणीयानि। एवं ज्ञानादिरेकैकाः भेदः संचारयितव्यः।

भा. [४४८३] चउवीसठारसगा एवं एए हवंति कप्पंति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दस होंति अकप्पम्मी सव्वसमासेण मुण संखा ॥

वृ. एवमुक्तेन प्रकारेण कल्पे चतुर्विंशतिरष्टादशका भवन्ति चत्वारि शतानि द्वात्रिंशतानि भङ्गानां भवन्तीति भावः । अकल्पे दर्पे दशाष्टादशका भवन्ति अशीतिशतं भङ्गानां भवन्तीति भावः । एतां कल्पे दर्पे च सर्वसमासेन संख्यां जानीहि-

भा. [४४८४] सोऊण तस्स पडिसेवणं तु आलोअणा कमविहिं तु ।
आगमपुरिसजायं परियागबलं च खेत्तं च ॥

वृ. श्रुत्वा तस्यालोचनकस्य प्रतिसेवनामालोचनाक्रमविधिं च आलोचनाक्रमपरिपाटीं चावधारर्यय तथा तस्य यावानागमोऽस्ति तावन्तमागमं तथा पुरुषजातं तमष्टमादिभिर्भावितम-मावितं वा पर्यायं गृहस्थपर्यायो यावानासीत् यावांश्च तस्य व्रतपर्यायः तावन्तमुभयं पर्यायं बलं शारीरिकं तस्य तथा यादृशं तत् क्षेत्रमेतत्सर्वमालोचकाचार्यकथनतः स्वतो दर्शनतश्चावधार्य स्वदेशं गच्छति । तथा चाह-

भा. [४४८५] आहारेउ सव्वं सो गंतूणं पुणो गुरुसगासं ।
तेसि निवेदेइ तहा जहानुपुव्विं गतं सव्वं ॥

वृ. स आलोचनाकार्ये प्रेषितः सर्वमनन्तरोदितमासमन्तात् धारयित्वा पुनरपि स्वदेशागमनेन गुरुसकाशं गत्वा तेषां गुरूणां सर्वं तथा निवेदयति यथा आनुपूर्व्या परिपाट्या गतमवधारितम् ।

भा. [४४८६] सो ववहारविहण्णू अनुज्जित्ता सुत्तोवएसेणं ।
सीसस्स देइ आणं तस्स इमं देहि पच्छित्तं ॥

वृ. स आलोचनाचार्यो व्यवहारविधिज्ञः कल्पव्यवहारत्मके च्छेदश्रुते अनुमय्य पौर्वापर्या-लोचनेन श्रुततात्पर्यो निषण्णो भूत्वा श्रुतोपदेशेन रागद्वेषतोऽन्यथा तस्य पूर्वप्रेषितस्य स्वशिष्याज्ञां ददाति । यथा गत्वा तस्येदं प्रायश्चित्तं देहि । किं तदित्याह-

भा. [४४८७] पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता ।
नक्खत्ते भे पीडासुक्के मासं तवं कुणसु ॥

वृ. प्रथमस्य कार्यस्य दर्पलक्षणस्य सम्बन्धिनीं दर्पादिपदभेदतो दशविधां दशप्रकारामालोचनां निशम्याकर्ण्य परिभावितं यथा नक्षत्रशब्देनात्र मासः सूचितः । मासे मासप्रमेयप्रायश्चित्तविषयौ भवतः पीडाव्रतषट्कपीडा कायषट्कपीडा कल्पादिषट्कपीडा वा आसीत् सापि च सुक्केत्ति शुक्ले इति सांकेतिकी संज्ञेति उद्घातं मासं तपः कुर्यात् । यदि चातुर्मासं षण्मासं वा लघुप्रायश्चित्त-मापन्नो भवेत् तदेवं कथयति-

भा. [४४८८] पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता ।
नक्खत्ते भे पीमा चउमासतवं कुणसु सुक्के ॥

भा. [४४८९] पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता ।
नक्खत्ते भे पीला छम्मासतवं कुणसु सुक्के ॥

वृ. गाथा द्वयमपि व्याख्यातार्थम् ।

भा. [४४९०] एवं ताव उग्घाए अनुग्घाए चेव किण्हंमि ।
मासे चउमास छमासियाणि छेयं अतो वुच्छं ॥

वृ. एवमुक्तेन प्रकारेण तावदुद्धाते लघुरूपे मासचतुर्मासषण्मासलक्षणे प्रायश्चित्ते समापतिते ऽभिहितमनुद्धाते गुरुके समापतिते साम्येव मासे चतुर्मासषण्मासानि किण्हमीत्यनेन पदेन विशेषितानि वक्तव्यानि। तद्यथा-

भा. [४४९१] पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता।
नक्खत्ते भे पीला कण्णे मासं तवं कुज्जा ॥

भा. [४४९२] पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता।
नक्खत्ते भे पीला चउमास तवं कुणसु किण्हे ॥

भा. [४४९३]. पढमस्स य कज्जस्स य दसविहमालोयणं निसामेत्ता।
नक्खत्ते भे पीला छम्मास तवं कुणसु किण्हे ॥

वृ. छेयं अतो वोच्छामित्ति अतः परं च्छेदमुपलक्षणमेतत्। मूलादिकं च प्रायश्चित्तं वक्ष्ये।

भा. [४४९४] च्छिंदित्तु व भोयण गच्छंतु य तस्स साहूणो मूलं।
अव्वावडा ग गच्छे अबिइया वा पविहरंतु ॥

वृ. वा शब्दो विकल्पने अथवा यदि च्छेदप्रायश्चित्तमापन्नो भवति तदेवं संदिशति भोजनं छिंदतु। अत्र विशेषव्याख्यानार्थमिदं गाथाद्वयमाह-

भा. [४४९५] छब्भागंगुलपणगे दसरायतिभागअद्धपन्नरसे।
वीसाए ति भागूणं तु छब्भागूनं तु पणुवीसे ॥

भा. [४४९६] मास चउमास छक्के अंगुलचउरो तहेव छच्चेव।
एए छेयवियप्पा नायव्व जहक्कमेणं तु ॥

वृ. पञ्चके पञ्चरात्रि दिवप्रमाणे च्छेदे समापन्ने एवं संदेशं कथयति-भाजनस्वरूपस्यां-गुलषड्भागे छिन्दन्तु दशरात्रे च्छेदे समापतिते त्रिभागमंगुलस्य भाजनं च्छिन्दतु पञ्चदशे पञ्चदशरात्रे च्छेदे अर्धमंगुलस्य, विंशतौ विंशति रात्रिंदिवच्छेदे त्रिभागोनमंगुलं पञ्चविंशतौ पञ्चविंशतिरात्रिंदिव च्छेदे षड्भागोनमंगुलं मासे मासप्रमाणे च्छेदे प्राप्ते परिपूर्णमेकमंगुलं चतुर्मासे चत्वार्यंगुलानि षण्मासे षड्ंगुलानि छेद्यानि संदिशती। एवमेते यथाक्रमेण च्छेद-विकल्पाः संदेशा ज्ञातव्याः। गच्छंतु तस्स साहूणो मूलमिति यदि मूलं प्रायश्चित्तमापन्नो भवति तदेव संदशिति। योऽन्योऽसौ दूरे साधुर्गच्छाधिपतिर्विहरति तस्य मूलं समीपं गच्छन्तु तस्य समीपं गत्वा प्रायश्चित्तं प्रतिपद्यतामिति भावः। अव्वावडा व गच्छे इति अथानवस्थाप्यं प्रायश्चित्त-मापन्नस्तत एवं कथयत सन्देशं यथा गच्छे अव्यापृता भवत, कंचित्कालं गच्छस्य वर्तमाननि-कामवहन्तस्तिष्ठन्तु। अबिइया वा प्रविहरन्तु इति पाराञ्चितप्रायश्चित्तापत्तौ पुनरेवं संदिशति किंचित्कालमद्वितीयका एकाकिनः प्रविहरन्तु। तदेवं दर्पेण सेविते प्रायश्चित्तमधुना कल्पे यतनया सेविते प्राह-

भा. [४४९७] बिइयस्स य कज्जस्स य तहियं चउवीसतिं निसामेत्ता।
नमोकारे आउत्ता भवंतु एवं भणिज्जसि ॥

वृ. द्वितीयस्य कार्यस्य कल्पलक्षणस्य सम्बन्धिनीं चतुर्विंशति निशम्याकर्ण्य तत्रैवं संदिशति नमस्कारे भवन्त आयुक्ता भवन्तु। एवं भणेत् ब्रूयात्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४४९८] एवं गंतूण तहिं जहोवएसेण देहि पच्छित्तं।
आणाए एस भणितो ववहारो धीरपुरसेहिं ॥

वृ. एवमुक्तप्रकारेणाचार्यवचनमुपगृह्य तत्र गत्वा यथोपदेशेन ददाति प्रायश्चित्तमेष आज्ञया व्यवहारो धीरपुरुषैर्भाणितः ।

भा. [४४९९] एसाणाववहारो जहोवएसं जहक्कमं भणितो।
धारण ववहारो पुन सुण वच्छ जहस्कमं वुच्छं ॥

वृ. एष आज्ञाव्यवहारो यथोपदेशं यथाक्रमं भणितः कथितः । अत ऊर्ध्वं धारणाव्यवहारो वक्तव्यस्तं यथाक्रममहं वक्ष्ये इति शृणु ॥

भा. [४५००] उद्धारणं विधारणा संधारण संपधारणा चेव।
नाऊण धीरपुरिसा धारणववहारं तं बिंति ॥

वृ. धारणायाश्चत्वार्येकार्थिकानि। तद्यथा-उद्धारणा, विधारणा, संधारणा, संप्रधारणा च। तया धारणया च्छेदश्रुतार्थावधारणलक्षणया यः सम्यक् ज्ञात्वा व्यवहारः प्रयुज्यते, तं धारणा-व्यवहारं ब्रुवते, । सम्प्रति तेषामेव चतुर्णामेकार्थिकानां शब्दव्युत्पत्तिमाह-

भा. [४५०१] पाबल्लेण उवेच्च व उद्धियपयधारणा उ उद्धारा।
विविहेहिं पगारेहिं धारेयव्वं वि धारेउ ॥

भा. [४५०२] सं एगी भावस्सी दियकरणा तानि एक्कभावेन
धारेयत्थपयाणि उ तम्हा संधारणा होइ ॥

भा. [४५०३] जम्हा संपहारेउं ववहारं पउंजती।
तम्हा कारणा तेन नायव्वा संपहारणा ॥

वृ. उत्प्राबल्येन उपेत्य वा उद्धृतानामर्थपदानां धारणा उद्धारा विविधैः प्रकारैः विशिष्टं चार्थमुद्धृतमर्थपदं यया धारणया स्मृत्या धारयति सा विधारा विधारणा। तथा समशब्दं एकाकी भावे धृतानुधारणा तान्यर्थपदानि आत्मना सह एकभावेन यस्माद्धारयति तस्माद् धारणा संधारणा भवतिः, तथा यस्मात् सन्धार्य सम्यक् प्रकर्षेणावधार्य व्यवहारः प्रयुंक्ते तस्मात्कारणात्तेन शिष्येण सम्प्रधारणा भवति ज्ञातव्या। धारणाववहारे सो पउंजियव्वो।

भा. [४५०४] धारणाववहारे सो पउंजियव्वो केरिसे पुरिसे ॥
भन्नति गुणसंपन्ने जारिसए तं सुणेहिति ॥

वृ. एष धारणाव्यवहारः कीदृशे पुरुषे प्रयोक्तव्यः । सूरिराह भण्यते-यादृशे गुणसम्पन्ने प्रयोक्तव्यस्तं वक्ष्यमाणं शृणु तमेवाह-

भा. [४५०५] पयवण जसंसि पुरिसे अनुग्गह विसारए तवस्सिमि।
सुस्सुयबहुस्सुयंमि य विवक्कपरियागसुद्धम्मि ॥

वृ. प्रवचनं द्वादशाङ्गं श्रमणसंघो वा तस्य यस्य कीर्तिमिच्छति यः प्रवचनयशस्वी तस्मिन्, तथा यो दीयमानं प्रायश्चित्तं दीयमानव्यवहारं त्वानुग्रहं मन्यते सोनुग्राह विशारदोऽग्रहविशारद--स्तास्मिन्, तपस्विनि तथा श्रुतं शोभनमाकर्णितं बहुश्रुतं येन स बहुश्रुतः किमुक्त भवति ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य बह्वपि श्रुतं न विस्मृतिपथमुपयाति स श्रुतबहुश्रुतः। अथवा बहुश्रुतोऽपि सन् यस्तस्यो-पदेशेन वर्तते स मार्गानुसारि श्रुतत्वात् सुश्रुत बहुश्रुतः तथा तस्मिन् तथा विशिष्टो विनयौचित्या-न्वितो वाक् परिपाको विशुद्धिर्यश्च यस्मिन् पुरुषे प्रयोक्तव्यः। एतदेवाह-

भा. [४५०६] एएसु धीरपुरिसा पुरिसजाएसु किंचि खलिएसु।
रहिएवि धारयंता जहारिहं देंति पच्छित्तं ॥

वृ. एतेष्वनन्तरोदिते गुणसम्पन्नेषु पुरुषजातेषु किंचिन् मनाक् प्रमादवशान्मूलगुणविषये उत्तरगुणविषये वा स्खलितेषु रहितेऽपि असत्यप्यादिभे व्यवहारत्रये धीरपुरुषा अर्थपदानि कल्पप्रकल्पव्यवहारगतानि कानिचित् धारयित्वा यथार्हं ददति प्रायश्चित्तं।

सम्प्रति रहिएवि धारइत्ता इतस्य व्याख्यानमाह-

भा. [४५०७] रहिए नाम असन्ते आइल्लम्मि ववहारतियगंमि।
ताहेवि धारइत्ता वीमंसेऊण जं भणियं ॥

वृ. रहिते नाम असति अविद्यमानके व्यवहारत्रिके सति ततोपि धारयित्वा यद्भणिते भवति।किमुक्त भवति? विमृश्य पूर्वालोचनेन देशकालाद्यपेक्षया सम्यक् छेदश्रुतार्थं परि-भाव्य किमित्याह-

भा. [४५०८] पुरिसस्स अइयारं वियारइत्ताण जस्स जं जोग्गं।
तं देंति उ पच्छित्तं जेणं देंती उ तं सुणए ॥

वृ. पुरुषस्यातीचारं द्रव्यतः क्षेत्रतः कालतो भावतश्च विचार्य यस्य यदर्हं प्रायश्चित्तं तस्य तत् ददाति। आचार्यः प्राह-येन ददाति तत् श्रृणु। तदेवाह-

भा. [४५०९] जो धारितो सुत्तत्थो अनुओगविहीए धीरपुरिसेहि।
आलीणप्रलीणेहिं जयणाजुत्तेहिं दंतेहि ॥

वृ. यो नाम धीरपुरुषैरालीनप्रलीनैर्यनायुक्तैश्चानुयोगविधौ व्याख्यानवेलातां श्रुतस्य धारितोऽविस्मृतीकृतस्तेन ददति साम्प्रत मालीनादि पदानां व्याख्यानमाह-

भा. [४५१०] अल्लीणो नाणादिसु पदे पदे लीआ उ होंति पलीणा।
कोहादी वा पलयं जेसि गया ते पलीणा उ ॥

भा. [४५११] जयणाजुत्ता पयत्तवा दंतो जो उवरतो उ पावेहि।
अहवा दंतो इंदिय दमेण नोइंदिएणं च ॥

वृ. ज्ञानदिषु आ समन्तात् लीना आलीनाः पदे पदे लीना भवन्ति प्रलीयनाऽथवा येषां क्रोधादयः प्रलयं गतास्ते प्रलीनाः। प्रकर्षेण लीना लयं विनाशं गताः क्रोधादयो येषामिति व्युत्पत्तेः। यतनायुक्तो नाम सूत्रानुसारतः प्रयत्नवान् दान्तो यः पापेभ्य उपरतोऽथवा दान्तो नाम इन्द्रियदमेन नोइन्द्रियदमेन चान्यतः। तदेवं च्छेदश्रुतार्थधरणवशतो धारणाव्यवहार उक्तः।

भा. [४५१२] अहवा जेणन्नइया दिट्ठा सोही परस्स कीरंति।
तारिसयं चेव पुणो उप्पन्नं कारणं तस्स ॥

भा. [४५१३] सो तंमि चेव दव्वे खेत्ते काले य कारिणे पुरिसो।
तारिसयं अकरेंतो न हु सो आराहतो होइ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४५१४] सो तंपि चेव दव्वे खेत्ते काले य कारणें पुरिसे।
तारिसयं चिय भुया, कुव्वं आराहगो होइ ॥

वृ. अथवेति प्रकारान्तरे येनान्यदा परस्य शोधिः क्रियमाणा दृष्टा स तत् सर्व स्मरति। यथा एवं भूतेषु द्रव्यादिष्वेवंभूते कारणे जाते एवंभूतं प्रायश्चित्तं दत्तमिति पुनरन्यदास्य पुरुषस्योपलक्षणमेतदन्यस्य वा तादृशमेव पुनः कारणं समुत्पन्नं ततो यदि तस्मिन्नेव तादृश एवेत्यर्थः। द्रव्ये क्षेत्रे काले चशब्दाद्भावे च तादृश एव कारणे तस्मिन्नेव तादृशे वा पुरुषे तादृशः कुर्वन् रागेण वा दोषेण वा अन्यथा प्रायश्चित्तं ददानो वर्तते। तदा स न हु नैवं आराधको भवति। अथ स तस्मित्रैव द्रव्ये क्षेत्रै काले भावे च कारणे पुरुषे च तादृशं करोति, स तदा आराधको भवति, धारणा व्यवहारस्यैव पुनरन्यथा प्रकारमाह-

भा. [४५१५] वेयावच्चकरो वा सीसो वा देसहिंडगो वावि।
दुम्मेहत्ता न तरइ आराहेउ बहुं जो उ ॥

भा. [४५१६] तस्स उ उद्धरिऊण अत्थपयाइं देंति आयरियो।
जेहिं उ करेइ कज्जं आहारेन्तो उ सो देसं ॥

वृ. यथाचार्याणां वैयावृत्यकारो यो वा संमतः शिष्यो यस्तु वा देशहिण्डको देशदर्शनं कुर्वतः सहाय आसीत्। स समस्तच्छेदश्रुतार्थं दुर्मेधस्त्वान्नावधारयितु शक्नोति, ततस्तस्योध्धृत्यानुगृहात् कानिचिदर्थपदान्याचार्या ददति यैः स च्छेदश्रुतस्य देशमवधारयन् कार्यं करोति, एष धारणाव्यवहारः। उपसंहारमाह-

भा. [४५१७] धारणाववहारो सो जहक्कमं वन्नितो समासेन।
जीएणं ववहारं सुण वच्छ जहक्कमं वुच्छं ॥

वृ. एष धारणाव्यवहारो यथाक्रमं समासेन वर्णितः साम्प्रतं जीतेन व्यवहारं यथाक्रमं वक्ष्ये, तं वत्स वक्ष्यमाणं शृणु। तथा चाह-

भा. [४५१८] वत्तनुवत्तपवत्तो बहुसो अनुवत्तिउ महाजनेनं।
एसो य जीयकप्पो पंचमओ होइ ववहारो ॥

वृ. यो व्यवहारो वृत्त एकवारं प्रवृत्तो भूयः प्रवृत्तो वारद्वयं प्रवृत्त इति भावः तथा बहुशोऽनेकवारं प्रवृत्तः महाजनेन चानुर्तिते एष पञ्चमको जीतकल्पो व्यवहारो भवति।

वृत्तादिपदानां व्याख्यानमाह-

भा. [४५१९] वत्तोनामं एक्कसि अनुवत्तो जो पुणो बितिय वारं,
तइयवारं पवत्तो परिग्गहितो महाजणेण ॥

वृ. एक्कसिमेकवारं यः प्रवृत्तः स प्रवृत्तो नाम, यः पुनर्द्वितीयवारं प्रवृत्तः सोऽनुवृत्तः तृतीयवारं वृत्तः प्रवृत्तोऽनुवृत्तः प्रवृत्तोऽनुवर्तितो स परिगृहीतो महाजनेनात्र परस्य प्रश्नमाह-

भा. [४५२०] चोदेती वोच्छिन्नो सिद्धपहे तइयगम्मि पुरिसजुगे।
वोच्छिन्ने तिविहे संजमंमि जीएण ववहारो ॥

वृ. परश्चोदयति किं तृतीये पुरुषयुगे जम्बूस्वामिनाम्नि सिद्धिपथे व्यवच्छिन्ने च त्रिविधे संयमे परिहारविशुद्धप्रभृतिके जीतेन व्यवहारः। अत्र केचिदुत्तरमाहु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा. [४५२१] संघयणं संट्ठाणं च पढम जो य पुव्व उवओगो।
वक्हारे चउकंपि य चोद्दसपुव्वंमि वोच्छिन्न ॥

वृ. प्रथमसंहननं वज्रर्षभनाराचं। प्रथमसंस्थानं समचतुरस्त्र यश्चान्तर्मुहूर्तेन चतुर्दशानामपि पूर्वाणामुपयोगोऽनुप्रेक्षणं यच्चादिमं आगमश्रुताज्ञाधारणालक्षणं व्यवहारे चतुष्कमेतत्सर्वं चतुर्दश-पूर्विणी चतुर्दशपूर्वधरे व्यवच्छिन्नं। एतन्निराकुर्वन् भाष्यकृदाह-

भा. [४५२२] अहायरितो एवं ववहहारचउक्कं जे उ वोच्छिन्नं।
चउद्दसपुव्वधरम्मी घोसंती तेसिमनुग्घाया ॥

वृ. एवं परेणोत्तरे कृते आचार्यः प्राह-ये एवं प्रागुक्तप्रकारेण व्यवहारचतुष्कं चतुर्दशपूर्वधरे व्यवच्छिन्नं धोषयति तेषां प्रायश्चित्तं चत्वारो मासा अनुद्धाता गुरुका मिथ्यावादित्वात्, मिथ्यावादित्वमेव प्रविकटयिषुरिदमाह-

भा. [४५२३] जे भावा जहियं पुण चोद्दसपुव्वंमि जंबुनामे य।
वोच्छिन्ना ते इणमो सुणसु समासेन सीसंतो ॥

वृ. ये भावा यस्मिन् चतुर्दशपूर्विणि ये जम्बूनाम्नि व्यवच्छिन्नास्तान् समासेन शिष्यमाणा-निमान शृणुत। तानेवाह-

भा. [४५२४] मनपरमोहिपुलाए आहारग खवग उवसम्मे कप्पे।
संजमतियकेवलि सिज्झणा य जंबुम्मि वोच्छिन्ना ॥

वृ. मनःपर्यायज्ञानिनः परमावधयः पुलाको लब्धिपुलाकः आहारकः आहारशरीरलब्धिमान् क्षपकः क्षपकश्रेणिरुपशमे उपशमश्रेणिः कल्पो जिनकल्पः संयमत्रिकपरिहारविशुद्धिसूक्ष्म-सम्पराय: यथाख्यातलक्षणं केवलिनः सिधना चैते भावा जम्बूस्वामिनि व्यवच्छिन्नाः इह केवलिग्रहणेन सिज्झणा ग्रहणेन वा गतेन यत् उभयोपादानं ततः यः केवली स नियमात् सिध्यति। यश्च सिध्यति स नियमात्केवली सन्निति ख्यापनार्थम्।

भा. [४५२५] संघयण संट्ठाणं च पढमगं जो य पुव्वउवउगो।
एते तिन्नि वि अत्था चोद्दसपुव्विम्मि वोच्छिन्नाः ॥

वृ. प्रथमं सहननं संस्थानं यश्चान्तोमौहूर्तिकः समस्तपूर्वविषयउपयोगः एते त्रयोऽप्यर्था न जम्बूस्वामिनि तृतीयपुरुषयुगे व्यवच्छिन्नाः किन्तु चतुर्दशपूर्विणि भद्रबाहौ, व्यवहारचतुष्कं पुनः पश्चादप्यनुवृत्तं यत आह-

भा. [४५२६] केवलमनपज्जवनाणिणो य तत्तो य ओहिनाणजिना।
चोद्दसदसनवपुव्वी आगमववहारिणो धीरा ॥

भा. [४५२७] सुत्तेण ववहरंते कप्पववहारं धारिणो धीरा।
अत्थधरववहारंते आणाए धारणा ए य ॥

भा. [४५२८] ववहारचउक्कस्स, चोद्दसपुव्विम्मि छेदो जं।
भणियं तं ते भिन्ना, जम्हा सुत्तं अत्थो य धरए य ॥

वृ. केवलिनो मनः पर्यायज्ञानिनोऽवधिज्ञानजिनाश्चतुर्दशपूर्विणो दशपूर्विणो नवपूर्विणश्च एते षट् धीरा आगमव्यवहारिणः ये पुनः कल्पव्यवहारिणो धीरास्ते सूत्रेण कल्पव्यवहारगतेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहरन्ति। ये पुनच्छेदश्रुतस्यार्थधरास्ते आज्ञया धारणया च व्यवहरन्ति। छेदश्रुतस्य च सूत्रमर्थश्चाद्यापि धरते विद्यते दशपूर्वधरा अपि चागमव्यवहारिणस्ततो व्यवहारचतुष्कस्य चतुर्दशपूर्विणि व्यवच्छेद इति यद्‌भणितं तान्मिथ्या। अन्यच्च-

भा. [४५२९] तित्थोगालीएत्थं, वत्तव्वा होइ आनुपुव्वीए;
जे तस्स उ अंगस्स, वुच्छेदा जहिं विनिदिट्ठो ॥

वृ. तेषां मिथ्यावादित्वप्रकटनाय यो यस्यां यो यस्यान्यस्य वा यत्र व्यवच्छेदो निर्दिष्टः सा तीर्थोगालिरत्रानुपूर्व्या कमेण वक्तव्या, येन विशेषस्तेषां प्रत्यय उपजायते।

अथ कोऽसौ जीतव्यवहारं प्रयुञ्जीतेत्यत आह-

भा. [४५३०] जो आगमेन सुत्ते य सुन्नतो आणधारणाए य।
सो ववहारं जीएण कुणइ वत्तानुवत्तेण ॥

वृ. य आगमेन सूत्रेण च तथा आज्ञया धारणया च शून्यो रहितः स जीतेन वृत्तानुवृत्तेन, अस्य व्याख्यानं प्राग्वद्‌व्यवहारं करोति। वृत्तानुवृत्तत्वमेव भावयति-

भा. [४५३१] अमुगो अमुगत्थ कउ जह अमुयस्स अमुएण ववहारो।
अमुगस्सवि य तह कतो अमुगो अमुगेन ववहारो ॥

भा. [४५३२] तं चेवणुमज्जंतो ववहारविहिं पउंजति जहुत्तं।
जीएण एस भणितो ववहारो धीरपुरिस्सेहिं ॥

वृ. अमुको व्यवहारोऽमुके कारणे समुत्पन्ने अमुकस्य पुरुषस्यामुकेनाचर्येण यथा कृत एतेन वृत्तव्यं भावितं, तथैव वामुकस्य यादृशे एव कारणेनामुकेनाचार्येणामुको व्यवहारः कृतः एतेनानुवृत्तत्वमुपदर्शितं तमेव वृत्तानुवृत्तं जीतमनुमज्जन् आश्रयन् यथोक्तं व्यवहारविधिं यत् प्रयुक्ते एष जीतेन व्यवहारो धीरपुरुषैर्भणितः।

भा. [४५३३] धीरपुरिसपन्नत्तो पंचमगो आगमो वि उ पसत्थो।
पियधम्मवज्जभीरू पुरिसज्जायाणुचिन्नो य ॥

वृ. एष पञ्चमको जीतव्यवहारो धीरपुरुषप्रज्ञप्तस्तीर्थकरगणधरैः प्ररूपितः आगमपञ्चविधः व्यवहारसूत्रात्मकतया श्रुतज्ञानविदश्चतुर्दशपूर्विणस्तैः कालं प्रतीत्य प्रशस्तः प्रशंसितस्तथापि प्रियधर्मभिरवद्यभीरुभिः पुरुषजातैरनुचीर्णस्तस्मात्सत्यतया प्रत्येतव्यो अर्थतः सूत्रतश्चयथाक्रमं तीर्थंकरगणधरैरभिहितत्वात्। तथाहि-पञ्चविहे ववहारे पण्णत्ते इत्यस्य सूत्रस्यर्थः। तीर्थ-करैर्भाषितो गणधरैश्च श्रद्धाय सूत्रीकृतोऽत एवोतमैः पुरुषजातै आचीर्णस्ततः कथमत्र न प्रत्यय इति। अधुना जीतव्यवहारे निदर्शमाह-

भा. [४५३४] सो जह कालादीनं, अप्पडिकंतस्स निव्विगईयं तु।
मुहनंतफिडियपाणग असंवरणे एवमादीसु ॥

वृ. स जीतव्यवहारो यथेत्युदाहरणमात्रोपदर्शनकालादिभ्य आदिशद्वात् स्वाध्यायादिपरिग्रहो अप्रतिकान्तस्तस्य ते मुखानन्तिके मुखे पोतिकायां स्फिटितायां मुखपोतिकामन्तरेणेत्यर्थः। तथा पानकस्यासंवरणे पानाहारप्रत्याख्यानाकरणे निर्विकृतिकं प्रायश्चित्तम्।

भा. [४५३५] एगिंदियानंतवज्जे घट्टण तावण गाढगाढे य;

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निव्वितिगमादीयं जा आयामं तू उदावणे ॥

वृ. एकेन्द्रियम्यानन्तकायिकवर्जस्य पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनामित्यर्थः घट्टने अनागाढे तापने आगाढे च निर्विकृतिकादिकं यावदायामाम्लमप्रद्रावणे जीवितात् व्यपरोपणे इयमत्र भावना-पृथिवीकायिकाप्कायिकतेजस्कायकवायुकायिकप्रत्येकवनस्पतीनां घट्टने निर्विकृतिकमनागाढे परितापने पूर्वार्धमागाढपरितापने एकाशनमपद्रावणे आयामाम्लमिति।

भा. [४५३६] विगलिंदियघट्टण तावणा गाढगाढे तहेव उद्दवणा।
पुरिमड्डाइ कमेण नायव्वं जाव खमणं तु ॥

भा. [४५३७] पंचेंदिय घट्टण तावणा य गाढगाढे तहेव उद्दवणे।
एक्कासण जायामं खमणं तह पंचकल्लाणं ॥

वृ. विकलेन्द्रियाणां द्वीन्द्रियप्रभृतीनां घटने तापने अनागाढे आगाढे च तथा अपद्रावणे पूर्वार्धादिक्रमेण ज्ञातव्यं यावत्क्षपणं किमुक्तं भवति। घट्टने पूर्वार्धमनागाढपरितापने एकाशनं गाढपरितापने आयामाम्लमपद्रावणे क्षपणमिति, तथा पंचेंद्रियाणाकघट्टने एकाशनमनागाढ-परितापने आयामाम्लमागाढपरितापने अभक्तार्थमपद्रावणे पञ्चकल्याणं निर्विकृतिकपूर्वार्ध-एकाशनकायामाम्लक्षपणरूपम्।

भा. [४५३८] एमाईउ एसो नायव्वो होइ जीयववहारो।
आयरियपरंपरएण आवतो जाव जस्स भवे ॥

वृ. एवमादिक एष जीतव्यवहारो भवति ज्ञातव्यः यो वा यस्य आचार्यपरम्परकेणागतः से तस्य जीतव्यवहारो ज्ञातव्यः

भा. [४५३९] बहुसो बहुस्सुए हि जा वत्तो न य निवारितो होइ।
वत्तणुवत्तपमाणं जीएण कयं भवति एयं ॥

वृ. यो व्यवहारोबहुश्रुतै र्बहुशो अनेकवारं वृत्तः प्रवर्तितो न चान्यैर्बहुभिः श्रुतैर्भवति विद्यते निवारितः। एतेन वृत्तानवृत्तं जीतेन प्रमाणं कृतं भवति। स जीतव्यवहारः प्रमाणीकृत इति।

भा. [४५४०] जं जीतं सावज्जं न तेन जीएन होइ ववहारो।
जं जीयमसावज्जं तेन उ जीएन ववहारो ॥

वृ. यत् जीतं सावद्यं न तेन जीतेन भवति व्यवहारः, यत् जीतमसावद्यं तेन जीतेन व्यवहारः। अथ किं सावद्यजीतमित्यत आह-

भा. [४५४१] छारहम्मिहम्ममालापोट्टेण य रिंगणिं तु सावज्जं।
दसविह पायच्छित्तं होइ असावज्जं जीयं तु ॥

वृ. यत् प्रवचने लोके चापराधविशुद्धये समाचारितं क्षारावगण्डनं हडौ गुप्तिगृहप्रवेशनं खरमारोपणं पोट्टेण उदरेण रंगणं तु शब्दत्वात् स्वरारूढं कृत्वा ग्रामे सर्वतः पर्यटनमित्येवमादि सावद्यं जीतं, यत्तु दशविद्यमालोचनादिकं प्रायश्चित्तं तदसावद्यं जीतं अपवादतः कदाचित्साव-द्यमपि जीतं दद्यात्। तथा चाह-

भा. [४५४२] उसन्नबहूदोसे निद्धंधसे पवयणे य निरवेक्खो।
एयारिसंमि पुरिसे दिज्जइ सावज्जं जीयंपि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. उत्सन्नेन प्रायेण बदुदोषे निद्धंधसे सर्वथा निर्दये तथा प्रवचने पवचनविषये निरपेक्षे एतादशे पुरुषेऽनवस्थाप्रसङ्गनिवारणाय सा वद्यमपि जीते दीयते।

भा. [४५४३] संविग्गे पियधम्मे अप्पमत्ते य वज्जभीरुम्मि।
कम्हिइयमाइ खलिए देयमसावज्जं जीयं तु॥

वृ. संविग्ने प्रियधर्मिणी अप्रमत्तेऽवद्यभीरौ। कस्मिंश्चित्प्रमादशवशतः स्खलिते देयमसा-वद्यं जीतं-

भा. [४५४४] जं जीयमसोहिकरं न तेन जीएन होइ ववहारो।
जं जीयं सोहिकरं तेन उ जीएन ववहारो॥

वृ. यत् जीतमशोधिकरं न तेन जीतेन भवति व्यवहारः कर्तव्यः, यत्पुनः जीतं शोधिकरं तेन जीतेन व्यवहारो विधयेः, शोधिकराशोधिकरजीतप्रतिपादनार्थथमाह-

भा. [४५४५] जं जीयमसोहिकरं पासत्थपमत्तसंजयाईण्णं।
जइवि महाजनाइन्नं न तेन जीएण ववहारो॥

भा. [४५४६] जं जीयं सोहिकरं संवेगपरायणेन दत्तेग।
एगेन वि आइन्नं तेन उ जीएन ववहारो॥

वृ. यत् जीतं पार्श्वस्थप्रमत्तसंयताचीर्णमतएवाशोधिकरं तत् यद्यपि महाजनाचीर्थं तथापि न जीतेन व्यवहारः कर्तव्यः। तस्याशोधिकरत्वात् यत्पुनर्जीतं संवेगपरायणेन दान्तेन एकेना-प्याचीर्णं तत् शोधिकरं कर्तव्यम्।

भा. [४५४७] एवं जहोवदिट्ठस्स धीरविउद्देसियपसत्थस्स।
नीसंदो ववहारस्स कोवि कहिओ समासेण॥

वृ. एवमुक्तेन प्रकारेण पञ्चविधस्य धीरैस्तीर्थकरणधरैर्यथा यथा क्रमतः सूत्रतश्च दर्शितो विदश्चतुर्दशपूर्वधरास्तैः प्रशस्तः प्रशंसितस्तस्य निष्पन्दः कोऽपि कथितः समासेन विस्तरेणाभि-धातुमशक्तत्वात्। तथा चाह-

भा. [४५४८] को वित्थरेण वोत्थूण समत्थो निरवसेसिए अत्थे।
ववहारे जस्स मुहे हवेज्ज जीहासयसहस्सं॥

भा. [४५४९] किं पुण गुणोवएसो ववहारस्स उचिउ पसत्थस्स॥
एसो भे परिकहिओ दुवालसंगस्स नवनीयं॥

वृ. यस्य मुखे जिह्वा शतसहस्त्र जिह्वालक्षं भवेत्। सोऽपि को नाम व्यवहारे व्यवहारसूत्रस्य निरवशेषितान् वक्तुं समर्थो नैव कश्चित् किन्त्वेष व्यवहारस्य व्यवहारसूत्रस्य उचितः प्रशस्तस्य चतुर्दशपूर्वधरभद्रबाहुस्वामिना दत्तस्य गुणोपदेशो गुणोत्पादननिमित्तमुपदेशे भे भवतां कथितः किं विशिष्ट इत्याह-द्वादशाङ्गस्य नवनीतमित्यर्थः॥

मू. (२५२)चत्तारि पुरिसज्जाया पन्नत्ता। तं जहा-अट्ठकरे नामं एगे नो मानकरे, मानकरे नामं एगे नो अट्ठकरे, २। एगे अट्ठकरे वि मानकरे वि ३ एगे नो अट्ठकरे नो मानकरे ४,।

वृ. एतत्प्रभृतीनां च पुरुषजातसूत्राणामयं सम्बन्धः॥

भा. [४५५०] ववहारकोविदप्पा तदट्ठे नो पमायए जोगे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मा य हु तहुज्जमत्ते कुणमाणं एस संबंधो ॥

वृ. पञ्चविधव्यवहारकोविदात्मा तदर्थे व्यवहार्थे योमे न मनोवाकायान् प्रमादयति न व्यवहार-विषये प्रमादमाचरतीति भावः । मा च हु निश्चितं तस्मिन् व्यवहारे उद्यच्छति उद्यमं कुर्वति मानमहंकारं कार्षीदति ज्ञापयत्येवमादीनि सूत्राणि । एष पुरुषजातसूत्राणां सम्बन्धः ।

भा. [४५५१] पुव्वुत्ता व पुरिसजाया अत्थतो न वि गंथउ ।
तेसिं परूवणत्थं तदिदं सुत्तमागयं ॥

वृ. वा शब्दः प्रकारान्तरद्योतने अथवा अनेन व्यवहारेण सूत्रेण अर्थतः पुरुषजाता उक्ताः सूचिता न वै ग्रन्थत उक्ता तेषां प्ररूपणार्थं तादिदं सूत्रं पुरुषजातसूत्रमागतम् । अस्याक्षरगमनिका तु प्रतीता । विस्तरार्थं भाष्यकृदाह-

भा. [४५५२] पुरिसज्जाया चउरो वि भासियव्वा उ आनुपुव्वीए ।
अत्थकरे मानकरे उभयकरे नोभयकरे य ॥

वृ. अधिकृतभङ्गसूचिताश्चत्वारः पुरुषा इमे आनुपूर्व्या परिपाट्य विभाषितव्यास्तद्यथा-प्रथमभङ्गेऽर्थकरो, द्वितीयभङ्गे मानकरः, तृतीय उभयकरश्चतुर्थे नोभयकरः चतुष्टयं ।

भा. [४५५३] पडमतइया एत्थं तु सफला निप्फला दुवे इयरे ।
दिट्ठंतो सगतेना सेवता अन्नेरायाणं ॥

वृ. अत्र एषु चतुर्षु पुरुपेपु मध्ये प्रथमतृतीयौ सफलावितरौ द्वितीयचतुर्थौ निष्फलावेषु चतुर्ष्वपि दृष्टान्तोऽन्यराजानां सेवमानाः शकस्तेनास्तमेव दृष्टान्तमभिधित्सुराह-

भा. [४५५४] उज्जेनी सगरायं नीयागव्वा न सुट्ठु सेवेंति ।
वित्तियदानं चोज्जं निवेसया अन्ननिवे सेवा ॥

भा. [४५५५] धावयपुरतो तह मग्गतो य सेवइ य आसनं नीयं ।
भूमियंपि य निसीयइ । इंगियकारी उ पढमो ॥

भा. [४५५६] चिक्खल्ले अन्नया पुरतो उगतो से एगो नवरि सव्वतो ।
तुट्ठेण तहा रन्ना विती उ सुपुक्खला दिन्ना ॥

वृ. यदा कालिकाचार्येण शका आनीतास्तदा उज्जयिन्यां नगर्यां शको राजा जातः । तस्य निजकात्मीया एकेऽस्माकं जात्या सदृश इति गर्वात्तं राजानं न सुष्ठु सेवन्ते । ततो राजा तेषां वृत्तिं नादात् । अवृत्तिकाश्चते चौर्यं कर्तुं प्रवृत्ताः । ततो राज्ञा बहुभिर्जनैर्विज्ञप्तेन निर्विषयाः कृताः ततस्तै र्देशान्तरं गत्वा अन्यस्य नृपस्य सेवा कर्तुमारब्धा । तत्रैकः पुरुषो राज्ञो गच्छतो आगच्छतश्च पुरतो धावति तथा मार्ग तशश्च कदाचित्त धावति राज्ञः चोर्ध्वस्थितस्योपविष्टस्य वा पुरतः स्थितः सेवते यद्यपि चोपविष्टः सन् (ते) राजानुजानाति । तथापि स नीचमासनमाश्रयते । कदाचिच्च राज्ञः पुरतो भूमावपि निषीदति राज्ञश्चैङ्गितं ज्ञात्वाऽनाज्ञप्तोपि विवक्षितप्रयोजनकारी अन्यदा च राजा पानीयस्य कर्दमस्य मध्येन धावितः शेषश्च भूयान् लोको निःकर्दमप्रदेशेन गन्तुं प्रवृत्तः स पुनः शकपुरुषोऽश्वस्वाग्रतः पानीयेन कर्दमेन च सेव्यमान एकः से तस्य पुरतो धावति ततस्तस्य राज्ञा तृष्टेन सुपुष्फला अतिप्रभूता वृत्तिर्दत्ता ।

भा. [४५५७] बितिओ न करे अट्ठं मानं च करेइ जाइकुलमानी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न निवसति भूमीए न य धावति तस्य पुरतो उ ॥

वृ. द्वितीयः पुरुषोऽहमपि राजवंशिक इति गर्वात् न कमप्यर्थं राज्ञः प्रयोजनं करोति। जातिकुलमानी सन्मानं च भूयांसमात्मानि करोति न च भूमौ निवसति, न च तस्य राज्ञः पुरतो धावति। तृतीयमाह-

भा.[४५५८] सेवति नितोविदिन्नेवि आसनेपेसितो कुणइ अट्ठं।
बिइओभयकरो तइउ जुज्जइ य रणे समाभट्ठो ॥

वृ. तृतीय पुरुषो राजानं प्रथमपुरुषवत् सेवते नवरमश्वस्य पुरतो न धावति किन्तु पृष्टस्तथा ऊर्ध्वस्थितः सेवते, वितीर्णे आसने स्थितोऽप्युपविष्टोऽपि आसने सेवते, न भूमौ निषीदति। तथा प्रेषितः सन् अर्थं करोति नाप्रेषितो मानवशादिति। एवमेष उभयकरः, रणे न राजपुत्र इति समाभाषितो युध्यते।

भा.[४५५९] उभयनिसेहो चऊत्थो वेइय चउत्थेहिं तत्थ न उलद्धा।
विती इयरेहिं लद्धा दिट्ठं तस्सुवणतो उ।

वृ. चतुर्थे पुरुषे उभयस्य अर्थस्य मानस्य च निषेधः। तत्र द्वितीयचतुर्थाभ्यानं वृत्तिर्लब्धा दृष्टान्तस्य एव वक्ष्यमाण उपनयस्तमेवाह-

भा.[४५६०] एमेवायरिस्स वि कोइ अट्ठं करेइ न व मानं।
अट्ठो उ उच्चमाणो वेयावच्चं दसविहं तु ॥

भा.[४५६१] अहवा अब्भुट्ठाणं आसनकित्तिमत्तए य संथारो।
उववायबहुविहा इच्चादि एवंति अट्ठा उ ॥

वृ. एवमेव शकपुरुषदृष्टान्तगतेन प्रमाणेन कोऽप्याचार्यस्यार्थं करोति। न च मानं अर्थो वक्ष्यमाणसूत्रेणोच्यमानः कः पुनः स इत्याह-दशविधं वैयावृत्त्यमथवा समागच्छतो अभ्युत्थान-मासनदानं कृतिकर्मविश्रामणा यथा क्ष्वेलमुच्चारमात्रकस्य प्रश्रवणमात्रकस्य श्लेष्ममात्रकस्य चोपनयः संस्तारकस्य करणमुपपाताश्च समीपभवनलक्षणा बहुविधास्तत्प्रयोजनभेदतोऽनेक-प्रकारा इत्यादयो अर्था भवन्ति

भा.[४५६२] बितितो मानकरो ऊ को पुन मानो हवेज्ज तस्स इमो।
अब्भुत्थाणब्भत्थण होइ पसंसा य एमादी ॥

वृ. द्वितीयो भवति मानकरः कः पुनस्तस्य मान उच्यतेऽयं वक्ष्यमाणस्तमेवाह-अब्भुट्ठाण-मित्यादि। आगच्छतोऽभ्युत्थानं न कृतं यदि वा न मेऽभ्यर्थना, न वा कृता मम प्रशंसा इत्यादि।

भा.[४५६३] तइओ भय नोभयतो चउत्थ दोपि निप्फलगा।
सुत्तत्थो भयनिज्जरलाभो दोण्हं भवे तत्थ ॥

वृ. तृतीय उभयकरोऽर्थकरो मानकरश्चतुर्थो नोभयकरस्तत्र नो द्वितीयचतुर्थोभयनिर्जरा अलाभात्। तथाहि-न तयोराचार्याः सूत्रमर्थमुभयं वा प्रयच्छन्ति नापि ते निर्जरां प्राप्नुतः। द्वयोः प्रथमतृतीययोः सूत्रार्थोभयनिर्जरालाभोऽर्थकारितया सर्वस्यापि संभवात्। तस्मात् प्रथमतृतीयाभ्यामिव वर्तितव्यं न द्वितीयचतुर्थाभ्यमिव-

मू. (२५३) चत्तारि पुरिसज्जाया पन्नता तं जहा- गणट्ठकरे नामं एगे नो मानकरे १ मान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करे नामं एगे नोगणट्ठकरे २ एगे गणट्ठकरे वि मानकरे वि ३ एगे नो गणट्ठकरे नो मानकरे४ ।

वृ. अस्याक्षरगमनिका सुप्रतीता। प्रपञ्चो भाष्यकृदाह॥

भा.[४५६४] एमेव होंति भंगा चत्तारि गणट्ठकारिणो जइणो।
रन्नो सारूविय देवचिंतगा तत्थ आहरणं॥

वृ. एमेवानन्तरसूत्रोक्तप्रकारेण गणार्थकारिणोऽपि यतेश्चत्वारो भङ्गा भवन्ति। ते च सूत्रतः स्पष्टा एव। तेषु च चतुर्ष्वपि पुरुषजातेषु ये सारूपिका यतेः समानरूपधारिणो मुण्डितशिरस्का भिक्षाटनशीला इत्यादि प्रागुक्तस्वरूपा देवचिन्तका नाम ये शुभाशुभं राज्ञः कथयन्ति ते आहरणं दृष्टान्तस्तमेव भावयति-

भा.[४५६५] पुट्ठापुट्ठो पढमो उ साहइं न उ करेइ मानं तु।
बितिउ मानकरेइं पुट्ठो विना साहई किंचि॥

भा.[४५६६] तइओ पुट्ठो साहइ नो पुट्ठ चउत्थमेव सेवइ उ।
दो सफला दो अफला एवं गच्छे वि नायव्वा॥

वृ. प्रथमो राज्ञा पृष्टोऽपृष्टो वा यत्र शुभाशुभं वा साधयति, न मानं करोति, द्वितीयो मानं करोति, न च मानादेव पृष्टोऽपि किंचित् कथयति। तृतीयः पृष्टः नापृष्टश्चतुर्थः सेवते एव राजानं नेति। अत्र द्वौ प्रथमतृतीयो सफलौ द्वौ च द्वितीयचतुर्थावफलौ एवममुना दृष्टान्तगतेन प्रकारेण गच्छेऽपि द्वौ प्रथमतृतीयौ सफलौ द्वौ च द्वितीयचतुर्थावफलौ च ज्ञातव्यौ। तेषां चतुर्णामपि स्वरूपमाह-

भा.[४५६७] आहार उवहि सयनाइ एहिं गच्छस्सुपग्गहं कुणति।
बिइओ मानं उभयं च तइओ नोभय चउत्थो॥

वृ. प्रथम आहारोपधिशयनादिभिर्गच्छस्योपग्रहं करोति न च मानं, द्वितीयो मानः तृतीय उभयं गच्छस्योपग्रहं मानं च, चतुर्थो नोभयं गच्छस्योपग्रहं नापि मानमिति।

मू.(२५४) चत्तारि पुरिसज्जाया पन्नत्ता तं जहा- गणसंगहकरे नामं एगे नो मानकरे। एगे मानकरे नो गणसंगहकरे। एगे गणसंगहकरे वि मानकरे वि। एगे नो गणसंहकरे नो मानकरे॥

वृ. अत्र सम्बन्धमाह-

भा.[४५६८] सो पुन गणस्स अट्ठो संगहो तत्थ संगहो।
दुविहो दव्वे भावे नियगा उ दोन्नि आहारनाणादी॥

वृ. अनन्तरसूत्रे गणार्थकर उक्तः स पुनर्गणस्यार्थं वा संग्रहस्ततसंग्रहकरप्रतिपादनार्थमिदं सूत्रं। तत्र सङ्ग्रहो द्विधा-द्रव्यतो भावतश्च। तत्र द्रव्ये भावे च द्वौ त्रिको द्रष्टव्यौ तद्यथा-आहारादिकं द्रव्ये ज्ञानादित्रिकं भावे तदेवं संग्रहं व्याख्याय संग्रहकरत्वयोजनामाह-

भा.[४५६९] आहारोवहिसेज्जाइएहिं दव्वंमि संगहं कुणइ।
सीस परिच्छे वाए भावे न तरंति जाहे गुरू॥

वृ. द्रव्यतः संग्रहं करोति आहारोपधिशय्यादिभिरत्रादिशब्द आहारादीनां स्वगतानेकभेद-सूचकः। भावे न यदा गुरवः शक्नुवन्ति तथा शिष्यान् प्रतीच्छिकान् वा वाचयति। एष प्रथमः पुरुषः। द्वितीयो मानं करोतिन तु द्रव्यतो भावतो वा गणस्य संग्रहं, तृतीय उभयं, चतुर्थो नोभयमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२५५) चत्तारि पुरिसज्जाया पन्नत्ता तं जहा- गणसोहकरे नामं एगे नो मानकरे एगे मानकरे नो गणसोहकरे, एगे गणसोहकरे वि मानकरे वि, एगे नो गणसोहकरे नो मानकरे॥

भा.[४५७०] एवं गणसोहंमि वि चउरो पुरिसा हवंति नायव्वा।
सो भावेत्ति गणं खलु इमेहिं ते कारणेहिं तु॥

वृ. एवमुक्तेन प्रकारेण शोभायामपि कर्तव्यायां चत्वारः पुरुषा भवन्ति ज्ञातव्याः। तच्च सूत्रपाठसिद्धा एव। गणशोभाकरो नाम यो गणं शोभयति ते च गणं शोभापयन्ति शोभा खलु एभिर्वक्ष्यमानैः कारणैः प्रयोननैर्वादादिभिस्तानेव वाद्यादीन् दर्शयति-

भा.[४५७१] गणसोभी खलु वादी उद्देसे सो उ पढमए भणितो।
धम्मकहि निमित्ती वा विज्जातिसएण वा जुत्तो॥

वृ. गणं वादप्रदानतः शोभीयतीत्येवं शीलोः गणशोभी खलु वादी। स च वादेन यथा गणं शोभयति तथा प्रथमे उद्देशके भणितः न केवलं वादी गणशोभी किन्तु धर्मकथी। तथाहि- धर्मकथायां यथोक्तं स्वरूपमाक्षेपतः कथयतो जनयपि गणस्य महतीं शोभां तथा निमित्ती अतीतादिनिमित्त कथयतो विद्यातिशयेन वा युक्तो गुणशोभी महतोऽपि सङ्घप्रयोजनस्य विद्या- प्रभावतः साधनात्॥

मू. (२५६) चत्तारि पुरिसज्जाया पन्नत्ता। तं जहा- गणसोही करे नामं एगे नो मानकरे एगे मानकरे, नो गणसोहीकरे। एगे गणसोहिकरेवि मानकरे वि, एगे नो गणसोहि नो मानकरे॥

भा.[४५७२] एयं गणसोहीकरा चउरो पुरिसा हवंति विन्नेया।
किह पुण गणस्स सोहिं करेज्ज सो कारणेमेहिं॥

वृ. एवमुक्तेन प्रकारेण गणशोधिकाराश्चत्वारः पुरुषा भवन्ति विज्ञेयाः। कथं पुनः स प्रथम- स्तृतीयो वा गणस्य शोधिं कुर्यात्। सूरिराह-एभिर्वक्ष्यमानैः कारणैरोजस्वित्वादिभिस्तान्येवाह-

भा.[४५७३] एगदव्वेगघरएगालोअणाए सका उ।
उयस्सि सम्मओ संथुओ य तं दुप्पवेसं च॥

वृ. एकस्मिन् गृहेऽनेकैः संघाटकैः एकं द्रव्यं लब्धं। तद्यथा एकेन संघाटकेन एकस्मिन् गृहे पूपलिका लब्धा। अन्येनापि संघाटकेन तस्मिन्नेव गृहे तादृश्य एव पूपलिका लब्धाः। एवं तृतीयेन चतुर्थेन पञ्चमेन वा लब्धाः। तैः सन्निवृत्तैर्गुरुसमीपमागत्यालोचितं दर्शिताश्च पूपूलिका- स्ततो जाता सर्वेषां शङ्का जाता उद्‌गमाऽशुद्धा भवेयुः एवं शङ्किते गत्वा तद्‌गृहं द्रष्टव्यम्। किं युष्माकं गृहेऽद्य संखडिभत्तलाभनकं समागतमथवा प्राघूर्णकाः समागता यदि वा साधूनामर्थाय कृतः क्रीता वा। तेऽत्र च गृहे भिक्षावेलायां न कोऽपि प्रवेशं लभते। तत्र साधुरेक ओजस्वी गृहमानुषाणां संस्तुतः। संस्तुततया च तस्मिन् गृहे संमतो अनिवारितप्रसरस्तत् दुःप्रवेश गृहं प्रविशति। प्रविश्य च निःशंकितं करोति। अत्र योऽप्रेषितो गत्वा निःशङ्की(कृ)त्य समागच्छति स प्रथमपुरुषजातः यस्तु मानेन गच्छति॥

मू. (२५७) चत्तारि पुरिसज्जाया तंजहा- रूवं नामेगे जहइ नो धम्मं, धम्मं नामेगे जहइ नो रूवं एगे रूवंपि जहइ धम्मं पि जहइ, एगे नो रूवं जहइ नो धम्मं जहइ॥

वृ. अस्य सम्बन्धमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा.[४५७४] हेट्ठाणंतरसुत्ते गणसोही एस सुत्तसंबंधो।
सोहत्ति व धम्मोत्ति व एगट्ठं सो दुहा होइ॥

वृ. अधस्तनेऽनन्तरसूत्रे गणस्य शोधिरुक्ता। शोधिरिति वा धर्मो इति वा एकार्थः। स च धर्मो द्विधा भवति रूपतो भावतश्च। तत्र तत्प्रतिपादनार्थमिदं सूत्रमित्येष सूत्रसम्बन्धः।

भा.[४५७५] रूवं होति सलिंगं धम्मो नाणादियं तियं होइ।
रूवेण य धम्मेण य जढमजढे भंगचत्तारि॥

वृ. रूपं नाम भवति स्वलिंगं रजोहरणादिधर्मो ज्ञानादिकं त्रिकं रूपेण च त्यक्तेऽत्यक्ते च भंगाश्चत्वारः। तेन सूत्रपाठसिद्धा एव तेषां विषयभागमाह-

भा.[४५७६] रूवजढमन्नलिंगे धम्मजढे खलु तहा सलिंगम्मि।
उभयजढो गिहिलिंगे दुहितो सहिओ लिंगेन॥

वृ. रूपं त्यक्तं येन स धर्मस्वरूपत्यक्तः सुखादिदर्शनात्पाक्षिकः त्यक्तस्य परनिपातः। सोऽन्यस्य लिङ्गे द्रष्टव्यः। इयमत्र भावनाभावतो ज्ञानादित्रिकसमन्वितः कारणवशेनान्यलिङ्गं गृहलिङ्गं वा यः प्रतिपद्यते। अत्र निदर्शनं यथा-कोऽपि राजा महामिथ्यादृष्टिर्नास्तिकवादी वावदूकः पण्डिताऽभिमानी दर्शनिभिः सह वादं दत्वा तद्बुद्धिमुपजीव्य दर्शनिनो हीलयति। अन्यदा साधूनुपद्रावयितुं प्रवृत्तो मया सह वादो दीयतां। तत्रैकः साधुर्वादलब्धिसम्पन्नः खचरलब्धिमानभूत् सङ्घस्यापभ्राजनेति गृहिलिङ्गमन्यलिगं वा कृत्वा राज्ञः समीपे वादेनोपस्थितः प्रवृत्तो द्वयोरपि वादः। तत्र राजाऽल्पशक्तिकत्वात् स्वपक्षं निर्वाहयितुमशक्नुवन हीलनां तस्य कृतवान्। ततः स वाददर्पस्फेटनाय तस्य राज्ञो मूर्धानं पदेनाक्रम्याकाशेन वायुरिव पलायित्वा। स्वस्थानं गतः एतदेवाह-

भा.[४५७७] तस्स पंडियमानस्स बुद्धिलस्स दुरप्पणो।
मुद्धं पाएण अकम्म वादी वाउरिवागतो॥

वृ. तस्य नास्तिकवादिनो राज्ञः पण्डितमानिनो बुद्धिः परस्य बुद्धिं लात्युपजीवति इति बुद्धिलः तस्य दुरात्मनो मूर्धानं पादेनाक्रम्य वादी वायुरिव पलायित्वा स्वस्थानमागतः। एष प्रथमपुरुषो द्वितीयो धर्मत्यक्तो न रूपत्यक्त इत्येवं रूपः खलु स्वलिङ्गे सति प्रतिपत्तव्यः। स च पार्श्वस्थादीनामन्यतमो निष्कारणप्रतिसेवी अवधावितुकामो वा वेदितव्यः। तस्य भावतस्त्यक्तधर्मत्वात्स्वलिङ्गस्य च धारणादिति। उभयजढो गिहिलिङ्गे इति उभयत्यक्तो मिथ्यादृष्टिर्गृहिलिङ्गे वर्तमान उभयसहितः स्वलिङ्गेन सहितो ज्ञानादित्रिकोपेतः।

मू. (२५८) चत्तारि पुरिसज्जाया पन्नत्ता तं जहा-गणसंट्ठितिं नामेगे जहति नो धम्मं, एगे धम्मं जहति, नो गणसंट्ठितिं। एगे धम्मंपि जहति गणसंट्ठितिं पि एगे नो धम्मं जहति नो गणसंट्ठितिं॥

भा.[४५७८] गणसंट्ठिति धम्मे या चउरो भंगा हवंति नायव्वा।
गणसंट्ठिति असिस्से महकप्पसुयं न दायव्वं।

वृ. पूर्वप्रकारेण गणसंस्थितौ धर्मे च भङ्गाश्चत्वारो भवन्ति ज्ञातव्यास्ते च तत्र पाठसिद्धा एव गणसंस्थितिर्नाम गणस्य मर्यादा यथा अशिष्येऽयोग्ये शिष्ये महाकल्पश्रुतं न दातव्यम्। सम्प्रति चतुर्णामपि भङ्गाना विषयविभागमाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा.[४५७९] सातिसयं इयरं वा अन्नगणे ते न देयमज्झयणं।
पूइगणसंट्ठितितो करेति सच्छंदतो केइ॥

भा.[४५८०] देंतो दाता पढमो बितितो भंगो न कस्स इवि दंते,
जो पुन अपत्त दायी, तइओ भंगो पडिच्छए वा जो देंति॥

भा.[४५८१] उभयमवलंबमानं कामं तु तगंपि पुज्जामो।
सातिसयं देवेंदोपपातिकादि इतरद्धा॥

वृ. महाकल्पश्रुतमन्यद्वाध्ययनमन्यगणसक्तस्य न दातव्यमिति एवं प्रकारा गणसंस्थितिः स्वच्छन्दं तीर्थकरानुपदेशेन कुर्वन्ति। तत्रैवं गणसंस्थितौ कृतायां योऽन्यगणसक्तेऽपि पात्रे महाकल्पश्रुतादिकमध्ययनं ददाति तेन गणसंस्थितिस्त्यक्ता न धर्मस्तीर्थकरोपदेशेन वर्तमानत्वात्। एष हि भगवतां तीर्थकृतामुपदेशः सर्वस्यापि पात्रस्याविशेषेण दातव्या। यस्तु गणसंस्थितौ कृतायां न कस्यापि परगणसक्तस्य ददाति स द्वितीयः अपात्रस्य ददाति तं प्राप्य तृतीयो भङ्गः। तेन गणस्थितेस्तीर्थकराज्ञाखण्डनतो धर्मस्य च त्यक्तवात्। यस्त्वन्यथा व्यवच्छेदं पश्यन् मेधावी प्रवचनोपग्रहकरो भविष्यतीत्यादिगुणसमन्वितं प्रतीच्छिकमुपलभ्य तस्य स्वयमेवं निजं दिग्बन्धं कृत्वा सातिशयन्यद्वाध्ययनं ददाति। तमप्यास्तां प्रथमभङ्गवर्तिनमित्यपि शब्दार्थः। उभयं गणसंस्थितिधर्मं चावलम्बमानं पूजयामः। एष चतुर्थपुरुषः।

मू. (२५९) चत्तारि पुरिसज्जाया पन्नत्ता। तं जहा- पियधम्मं नामं एगे नो दढधम्मे नोपियधम्मे दढधम्मे नाम एगे पियधम्मे वि दढधम्मे वि, एगे नो पियधम्मे नो दढधम्मे॥

वृ. अस्य सम्बन्धमाह-

भा.[४५८२] धम्मो न जहियव्वो गणसंट्ठितिमिच्छतो पंससामो।
जस्स पिओ सो धम्मो सो न जहति तस्सिमो जोग्गो॥

वृ. अनन्तरसूत्रे इदमुक्तम्- गणसंट्ठिति नामेगे जहति नो धम्मं। तत्र यस्य प्रियो धर्मः। स एवं चिन्तयति धर्मो न त्यक्तव्यो गणसंस्थितिमत्र न प्रशंसामः एवं चिन्तयित्वा धर्मं न जहाति एष तस्य प्रियधर्मसूत्रस्य योगः। सम्प्रति प्रियधर्मादिव्याख्यानार्थमाह-

भा.[४५८३] वेयावच्चेण मुनी उवचिट्ठइ संगहेण पियधम्मो॥
उवचिट्ठइ दढधम्मो सव्वेसिं निरतिसयो य॥

वृ. प्रियधर्मा मुनिर्यावत् द्रव्यत आहारादिना भावतो वाचनादि येन संगृह्यते तावत् वैयावृत्येन तस्योपतिष्ठते। नान्यदा अन्यस्य वा दढधर्मः। सर्वेषामविशेषेण वैयावृत्येनोपतिष्ठते तावत्सर्वत्र निरतिचारः। सम्प्रति भङ्गयोजनामाह-

भा.[४५८४] दसविहवेयावच्चे अन्नयरे खिप्पमुज्जमं कुणइ।
अच्चंतमनिव्वाही धिति विरय किसे पढमभंगो॥

वृ. यो दशविधस्य वैयावत्यस्य वक्ष्यमानस्यान्तरस्मिन् वैयावृत्ये प्रियधर्मतया क्षिप्रमुद्यमं करोति, केवलमदृढधर्मतया अत्यन्तमनिर्वाही तस्मिन् धृतिवीर्यकृशे प्रथमभङ्ग।

भा.[४५८५] दुक्खेन उगाहिज्जइ बिइओ गहियं ते नेइ जा तीरं।
उभयतो कल्लाणो तइतो चरितो चरिमो अ परिकुट्ठो॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. द्वितीयस्तुनो प्रियधर्मत्वात् दुःखेन महता कष्टेन प्रथमतो वैयावृत्यं ग्राह्यते। गृहीतं तु यावत् प्रतिज्ञायास्तीरं तावन्नयति, उभयतः कल्याणस्तृतीयः, चरमे न प्रियधर्मो नापि दृढधर्म इत्येवं रूपो गच्छे प्रतिकुष्टो निराकृतः।

मू. (२६०) चत्तारि आयरिया पन्नत्ता, तं जहा- पव्वायणायरिए एगे नामं नो उवट्ठावण आयरिए, उवट्ठावणायरिए नामं एगे नो पव्वावणायरिए। एगे पव्वायणायरिएवि उवठावणायरि-एवि। एगे नो पव्वायणायरिए नो उवट्ठायणायरिए धम्मायरिए।

वृ. अस्य सम्बन्धमाह-

भा.[४५८६] अदढापियधम्मानं तव्विवरीए करेंति आयरिए।
तेसि विहाणंमि इमं कमेण सुत्तं समुदिट्ठं तु॥

वृ. अदृढधर्माणामप्रियधर्माणं चानुशासनाय स्थविराद्याचार्या व्याख्यानार्थमाह-

भा.[४५८७] पव्ववण उट्ठावण उभय नोभयमिति चउत्थो।
अत्तट्ठ परट्ठा वा पव्वावणा केवला पढमे॥

भा.[४५८८] एमेव य बितितो वी कवलमेत्तं उवठवे सो उ।
तइउ पुन उभयं पीयत्तठ परट्ठ वा कुणउ॥

भा.[४५८९] जो पुन नो भयकारी सो कम्हा भवति आयरियो उ।
भण्णति धम्मायरितो सो पुन गहितो वसमाने वा॥

वृ.प्रथमे प्रव्राजनाचार्यः द्वितीये द्वितीयभंगेन सूचितः उपस्थापनाचार्यः तृतीयभंगसूचित उभयः, प्रव्राजनोपस्थापनाचार्यः तत्र प्रथमस्यात्मार्थस्य पारर्थस्य केवला प्रव्राजना किमुक्तं भवति आत्मनिमित्ते परनिमित्ते वा यः केवलं प्रव्राजयति, स प्रथम प्रव्राजनाचार्य एवमेवानेनैव प्रकारेण द्वितीयः स केवलं मात्रं उपस्थापयति, यः प्रव्राजितस्य सत उपस्थापनामात्रं करोति स द्वितीय इत्यर्थः,। तृतीयः पुनरपि प्रव्राजनमुपस्थापनं वात्मार्थं परार्थं वा करोति, यः पुनर्नोभयकारी स चतुर्थः। अथ स कस्माद्भवत्याचार्यः उभयविकलत्वात्। सूरिराह- भण्यते स धर्माचार्यो धर्मदेशकत्वात् स पुनर्गृही श्रमणो वा वेदितव्यः। एवं च यत्राचार्यास्तथाह-

भा.[४५९०] धम्मायरि पव्वायण तहय उठावणा गुरूतइओ।
कोइ तिहिं संपन्नो दोहिं वि एक्केक्कएण वा॥

वृ. प्रथमो धर्माचार्यो यस्तत्प्रथमतया धर्मं ग्राहयति। द्वितीयः प्रव्राजनाचार्यो यः प्रव्राजयति। तृतीयोगुरुरुपस्थापनाचार्यो यो महाव्रतेषूपस्थापयति। तत्र कश्चिस्त्रिभिरपि सम्पन्नो भवति। तथाहि-कदाचित्स एवधर्मं ग्राहयति स एव प्रव्राजयति स एवोपस्थापयति। कश्चिद्द्वा-भ्यां। तद्यथा धर्मग्राहकत्वेन प्रव्राजनेन च अथवा धर्मग्राहकत्वेनोपस्थापनेन अथवा प्रव्राजनेनो-पस्थापनेन। केचिदेकैकेन गुणेन तद्यथा-कश्चित् धर्ममेव ग्राहयति कश्चित्प्रव्राजयत्येव कश्चिदुप-स्थापयत्येव

मु. (२६१) चत्तारि आयरिया पन्नत्ता तं जहा- उद्देसणायरिए एगे नामं एगे नो वायणायरिए, वायणायरिए एगे नामं एगे नोद्देसणायरिए। एगे उद्देसणायरिएवि वायणायरिएवि। एगे नोद्देस-णायरिए नो वायणायरिए॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. अमीषां स्वरूपमाह-

भा.[४५९१] एगो उद्देसए सुयं एगो वाएइ तेन उद्दिठं।
उदिसई वाएइ य धम्मायरिओ चउत्थो य ॥

वृ. एकः प्रथमः श्रुतमुद्दिशति न वाचयति। यथा मङ्गलबुद्ध्या प्रथमत आचार्य उद्दिशति तत उपाध्यायः,। अत्राचार्यः प्रथमभङ्गवर्ती उपाध्यायो द्वितीयभङ्गे। तथा चाह-एको द्वितीय उपाध्यायस्तेनाचार्येणोद्दिष्टं वाचयति। य एवोद्दिशति स एव वाचयति एष तृतीयः। उभयविकलश्चतुर्थो धर्माचार्यः

मू. (२६२) चत्तारि अंतेवासी पन्नता तं जहा- पव्वावणंतेवासी नाममेगे नो उवट्ठावणंतेवासी, उवट्ठावणंतेवासी नाममेगे नो पव्वावणंतेवासी, एगे पव्वावणंतेवासी वि उवट्ठावणंतेवासी वि एगे नो पव्वा वणंतेवासी नो उवट्ठावणंतेवासी

*मू. (२६३) चत्तारि अंतेवासी पन्नत्ता, तं जहा- उद्देसणंतेवासी*नामं एगे नो वायणंतेवासी वायणंतेवासीनामं एगे नो उद्देसणंतेवासी एगे उद्देसणंतेवासी वि वायणंतेवासी वि। एगे नोद्देसणंतेवासी नोवायणंतेवासी॥

अस्य सूत्रस्य सम्बन्धप्रतिपादनार्थमाह-

भा.[४५९२] पमुच्चायरियं होइं अतेवासी उ मेलणा।
अंतिगमज्झासमासन्नं समीवं चेव आहियं॥

वृ. अधस्तनानन्तरसूत्रे आचार्याः प्रोक्ताः। आचार्यं च प्रतीत्यान्तेवासी भवति। ततो अन्तेवासी सूत्रमित्येषामेलनासम्बन्धः। अत्रान्तेवासी तत्र योऽन्तशब्दव्याख्यानार्थमेकार्थिकान्याह-अन्तं नाम अन्तिकमध्यास आसन्नं समीपं चैवाख्यातं। तत्र वसतीत्येवं शीलोअन्तेवासी।

सम्प्रति भङ्गभावनार्थमाह-

भा.[४५९३] जह चेव उ आयरिया अंतेवासी वि होइ एमेव।
अंते य वसति जम्हा अंतेवासी ततो होइ॥

वृ. यथा चैव आचार्या उद्देशनादिभेदतश्चतुर्धा भवन्ति एवमेव अन्तेवासिनोऽपि यस्मादाचार्यस्यान्ते वसति तस्माद्भवत्याचार्यचतुर्द्धान्तेवासी। इयमत्र भावना-यो यस्यान्ते उद्देशनमेवाधिकृत्य वसति वर्तते सतं प्रत्युद्देशनान्तेवासी यस्यान्ते वाचनामेवाधिकृत्य वसति तस्य वाचनान्तेवासी। यस्तूद्देशनं वाचनां चाधिकृत्य यस्मान्ते भवति स तं प्रत्युभयान्तेवासी यस्यान्ते नोद्देशनं नापि वाचनामधिकृत्यान्ते वसति किन्तु धर्मश्रवणमधिकृत्य स तं प्रत्युभयविकलो धर्मान्तेवासी। एवं च त्रयोऽन्तेवासिनस्तथा धर्मान्तेवासी उद्देशनान्तेवसाी वाचनान्तेवासी च। तत्र कश्चित्त्रिभिरपि प्रकारैः समन्वितो भवति, कश्चिद् द्वाभ्यां कश्चिदकैकेन।

मू. (२६४) तओ थेरभूमीतो पन्नत्ता तं जहा- जातिथेरे सुयथेरे परियायथेरे य। सट्ठिवरिसजाए जातिथेरे ट्ठाणसमवायधरे सुयथेरे, वीसवासपरियाए परियायथेरे॥

भा.[४५९४] थेराणमंतिए वासो सो व थेरो इमो तिहा।
भूमिं निय ट्ठाणंति य एगट्ठा होंति कालो य॥

वृ. अनन्तरसूत्रे अन्तेवासिन उक्ताः। अन्तिके वासः स्थविराणां स च स्थविरोऽयं वक्ष्यमान-

स्त्रिधेत्यनेन प्रक्रमेण समापिततमित्येष सूत्रसम्बन्धः । सम्प्रत्यस्य व्याख्या-तिस्रः स्थविराणां भूमयः प्रज्ञप्ताः भूमिरिति स्थानमिति अवस्थारूपकाल इति त्रयोऽपि शब्दा एकार्थाः । उक्तं च थेरभूमिति वा थेरट्ठाणत्ति वा थेरकालोत्ति वा एगट्ठमिति ।

भा.[४५९५] तिविहम्मि य थेरम्मी परूवणा जा जहिं सए ट्ठाणे ।
अनुकंपसुए पूआ परियाए वंदनादीणि ॥

वृ. त्रिविधस्थविरे त्रिविधस्थविरविषये या यत्र स्वके स्थाने प्ररूपणा सा सूत्रतः कर्तव्या । तद्यथा-षष्टिर्वर्षजातो जातिस्थविरः स्थानसमवायधरः श्रुतस्थविरः विंशतिवर्षपर्यायः पर्यस्थविरस्तथा जातिस्थावरस्यानुकम्पा कर्तव्या । श्रुते श्रुतिस्थविरस्य पूजा पर्यायि पर्यायस्थविरस्य वन्दनादीनि साम्प्रतमेतान्येव त्रीणि कर्तव्यानि विस्तरेणाह-

भा.[४५९६] आहारोवहि सेज्जा संथारो खेत्तसंकमे ।
किति छंदानुवत्तीहिं नु वत्तंति थरेगं ॥

भा.[४५९७] उट्ठाणासनदानादी जोग्गाहार पसंसणा ।
नीया सेज्जाएनिदेसवत्तितो पूएइ संथुयं ॥

भा.[४५९८] उट्ठाणं वंदनं चेव गहणं दंडगस्स य ।
परियायथेरगस्स करेंति अगुरोवि ॥

वृ. जातिस्थविरस्य कालस्वभावानुमत आहारो दातव्यः । उपधिर्यावता संस्तरति तावत्प्रमानः शय्या वसतिः । सा ऋतुक्षमा दातव्या संस्तरको मृदुकः क्षेत्रसंक्रमे क्षेत्रान्तरे संक्रामयितव्ये तस्योपधिमन्ये वहन्ति । पानीयेन चानुकम्पते । उक्ता जातिस्थविरस्यानुकम्पा, श्रुतस्थविरस्य पूजामाह-किइ इत्यादि कृतिच्छदोनृवृत्तिभ्यां स्थविरं श्रुतस्थविरमनुवर्तयन्ति । किमुक्तं भवति ? श्रुतस्थविरस्य कृतिकर्मवन्दनकं दातव्यं, च्छन्दतश्च तस्यानुवर्तनीयम् । तथा उट्ठाणत्ति आगतस्याभ्युत्थानं कर्तव्यं, आसनप्रदानामादिशब्दात्, पादप्रमार्जनादिपरिग्रहः, । तथा योग्याहारोपनयं समक्षं परोक्षत्वात्प्रशंसना गुणकीर्तन, तथा तत्समक्षनीचशय्यायामवस्थातव्यम् । निर्देशवर्तिकत्वमेवं श्रुतं श्रुतस्थविरं पूजयेत् । तथा पर्यायस्थविरस्यागुरोरप्यप्रव्राजकस्यप्यवाचनाचार्यस्यापि आगच्छत उत्थानं (कुर्वन्ति) कुर्वीथाः । वन्दनकं च क्षमाश्रमणतो दण्डकस्य च ग्रहणमिति ।

मू. (२६५)ततो सेहभुमीओ पन्नत्ताओ तं जहा-सत्तराइंदिया चउमासिया छम्मासिया, छम्मासिया य उक्कोसिया चाउम्मासिया मज्झमिया सत्तराइंदिया जहन्ना ।

भा.[४५९९] तुल्ला भुमिसंखाविया च ट्ठावेंति ते इमे हुंति ।
पडिवक्खतो व सुत्तं परीयाए दीहहस्से य ॥

वृ. तुल्या भूमीसंख्या शैक्षिणकाणामिति कृत्वा अथवा पूर्वसूत्रे स्थविरा उक्ताः । ते च स्वयं स्थित्वा अन्थान् स्थापयन्ति । ते चाप्येवं स्थाप्यामाना इमे वक्ष्यमाना भवन्तीति तत्प्रतिपादनार्थमिदं सूत्रमथवा प्रतिपक्षत इद सूत्रपातितं । तद्यथा-पूर्वसूत्रे स्थविरास्तेषां च प्रतिपक्षाः शैक्षा यदि वा स्थविराणां दीर्घः पर्यायः शैक्षकाणां शैक्षकत्वेन ह्रस्व इति स्थविरसूत्रानन्तरं शैक्षकसूत्रम् । अस्याक्षरगमनिका प्राग्वत् । सम्प्रति शैक्षकाणां यद्वक्तव्यं तत्संसूचनाय द्वारगाथामाह-

भा.[४६००] सेहस्स तन्नि भूमीतो दुविहा परिणामगा दुवे जम्मा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्तजहंते संभुजणा य भूतितिय विवेगो ॥

वृ. शैक्षकस्य तिस्रो भूमयो वक्तव्याः । सूत्रोपात्तत्वात्तथा शैक्षका द्विविधाः परिणामका वक्तव्याः । द्वौ च जड्डौ तथा प्रात्राणि पात्रभूतान् त्यजति दोषा वक्तव्याः । संभोजना च तथा भूमित्रिकस्यं जलमूककरणजड्डलक्षणस्य विवेकः परित्यागो वक्तव्यः एष गाथाद्वारसंक्षेपार्थः । व्यासार्थस्तु प्रतिद्वारमभिधातव्यः । तत्र प्रथमतो भूमिद्वारमाह-

भा.[४६०१] सेहस्स तिन्निभूमी जहन्न तह मज्झिमा य उक्कोसा।
राइंदिव सत्त चउमासिया य छम्मासिया चेव ॥

वृ. शैक्षकस्य तिस्पो भूमयस्तद्यथा-जघन्या मध्यमा उत्कृष्टा च तत्र जघन्या सप्तरात्रिं दिवा, मध्यमा चातुर्मासिकी उत्कृष्टा षण्मासिकी।

भा.[४६०२] पुव्वोवट्ठपुराणे करणजयट्ठा जहन्निया भूमी।
उक्कोसा दुम्मेहं पमुच्च असद्दहाणं च।

वृ. पूर्वमुपस्थ उपस्थितः पूर्वोपस्थः स चासौ पुराणश्च पूर्वोपस्थपुराणस्तस्मिन् करणजयाय जघन्या भूमिर्भवति। इयमत्र भावना-यः पूर्वप्रव्रज्योत्प्रव्रजितः पश्चात्पुनरपि प्रव्रज्यां प्रतिपन्नवान् स सप्तमे दिवसे उपस्थापयितव्यः । तस्य दि यावद्भिर्दिवसैः पूर्वविस्मृतसामाचारीकरणमत्यन्तदुःप्रभवति। एष जघन्या भूमिर्दुर्मेधसमग्रदधानं च प्रतीत्य उत्कृष्टा षण्मासिकी भूमिः ।

भा.[४६०३] एमेव य मज्झमिया अनहिज्जंते य सद्दहंते य।
भावियमेहाविस्सविकरणजयट्ठाय मज्झमिया ॥

वृ. एवमुक्ते उत्कृष्टे च अनधियाने अश्रद्दधाने च माध्यमिकाः भूमिः प्रतिपत्तव्या। अथवा भावितस्यापि श्रद्दधानस्यापि मेधाविनश्चापि च करणजयार्थं मध्यमिका भूमिः ।

भा.[४६०४] आणा दिट्ठंतेन य दुविहो परिणामगो समासेणं।
आया परिणामो खलु तत्थ इमो होइ नायव्वो ॥

वृ. स द्विविधः परिणामको भवति तद्यथा आज्ञया दृष्टान्तेन, तत्र समासेन संक्षेपेण आज्ञापरिणामः खल्वयं वक्ष्यमानो भवति तमेवाह-

भा.[४६०५] तमेव सच्चं नीसंकं, जं जिणेहिं पवेइयं।
आणाए अक्खातो जिनेहिं परिणामगो ॥

वृ. तदेव सत्यं यज्जिनैः प्रवेदितमित्येवं यो निःशङ्कं श्रद्दधाति न च कारणं जानीते एष आज्ञया परिणामको जिनैराख्यातः । दृष्टान्तपरिणामकमाह-

भा.[४६०६] परोक्खं हेउगं अत्थं पच्चक्खेण उ साहयं।
जिनेहिं एस अक्खातो दिट्ठंतपरिणामगो ॥

वृ. परोक्षहेतुकं हेतुना लिङ्गेन गम्यं तं हेतुकमर्थं प्रत्यक्षेण प्रत्यक्षप्रसिद्धेन दृष्टान्तेन साधयन् आत्मबुद्धावारोपयन् यो वर्तते एष दृष्टान्तपरिणामको जिनैराख्यातो दृष्टान्तेन विवक्षितमर्थं परिणामयत्वात्मबुद्धावारोपयतीति दृष्टान्तपरिणामक इति व्युत्पत्तेस्तत्राज्ञापरिणामक आज्ञयैव कायान् श्रद्दधाति। दृष्टान्तपरिणामकस्तु दृष्टान्तेन श्रद्दधापयितव्य इति तस्य कायश्रद्धानोत्पाद-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नार्थमिदमाह-

भा.[४६०७] तस्सिंदियाणि पुव्वं सीसंते जइ उ ताणि सद्दहइ।
तो से नाणावरणं सीसइ ताहे दसविहं तु ॥

वृ. तस्य दृष्टान्तपरिणमास्य पूर्वमिन्द्रियाणि श्रोत्रादीनि शिष्यन्ति। तत्र यदि तानीन्द्रियाणि श्रद्धाति ततः तमेतस्य ज्ञानावरणं दसविधं शिष्यते। कथमित्याह-

भा.[४६०८] इंदियावरणं चेव नाणावरणाइयं।
तो नाणावरणं चेवमाहियं तु दुपंचहा॥

वृ. इन्द्रियावरणं ज्ञानावरणं च तत्रेन्द्रियावरणं नाम इन्द्रियविपयशब्दादिसामान्योपयोगावरणं, ज्ञानावरणं इन्द्रियविषयेष्वेव शब्दादिषु विशेषोपयोगावरणमिन्द्रियावरणं, ज्ञानावरणं च श्रोत्रेन्द्रिया-दिभेदतः प्रत्येकं पञ्चप्रकारमेव ज्ञानवरणं द्विपञ्चधा दशप्रकारमाख्यातम्। तानेव दश भेदा नाह-

भा.[४६०९] सोयावरणं चेव नाणावरणं च होइ तस्सेव।
एवं दुयभेएणं नायव्वं जाव फासतत्ति॥

वृ. श्रोतावरणं तथा तस्यैव श्रोतस्य ज्ञानावरणमेवं द्विकभेदेन तावत् ज्ञातव्यं यावत्स्पर्शस्तद्यथा-चक्षुरिन्द्रियावरणं चक्षुरिन्द्रियज्ञानवरणं घ्राणेन्द्रियावरणं घ्राणेन्द्रियज्ञानावरणं रसनेन्द्रियावरणं रसनेन्द्रियज्ञानावरणं स्पर्शेन्द्रियावरणं स्पर्शेन्द्रियज्ञानावरणमिति। साम्प्रतमिन्द्रियावरणस्य विज्ञानावरणस्य विषयविभागार्थमिदगाह-

भा.[४६१०] बहिरस्स उ विन्नाणं आवरियत्तउण सोयमावरियं।
अपटुप्पण्णो बालो अतिवुड्ढो तह असन्नी वा।

भा.[४६११] विन्नाणावरियं तेसिं कम्हा जम्हा उ तेसुणं तावि।
न वि जाणंते किमयं सद्दो संखस्स पगहस्स॥

वृ. बधिरस्य विज्ञानं श्रोत्रेद्रियविज्ञानमावृतं सामान्यतः शब्दमात्रश्रवणेऽपि तद्गतविशेषा-परिज्ञानात्। न तु श्रोत्रामावृतं सामान्यतः शब्दमात्रश्रवणात् तथा योऽपटुप्रज्ञो बालो यश्चातिवृद्धो यो वाऽसंज्ञी अमनस्कः पंचेन्द्रियः एतेषां विज्ञानमावृतं कस्मात् यस्मात् ते शृण्वन्तोऽपि नो वै जानते। किमयं शब्दः शंखस्य उत पटहस्येति।

भा.[४६१२] किं ते जीवमजीवाजीवत्ति य एव तेन उदियम्मि।
भण्णइ एव वियाणसु जीवा चउरिंदिया बिंति॥

वृ. किं ते बधिरादयो जीवा उताजीवास्तत्र जीवा एवेति तेनोदितं भण्यते एवं बधिरादिवत् चतुरिन्द्रिया अपि जीवा इति विजानीहि श्रोतावरणमात्रेण जीवत्वाप्रच्युतेः।

भा.[४६१३] एवं चक्खुदिय घाणिंदिय जिब्भिदियोवघाएहिं।
एक्केक्कगहाणीए जावउ एगिंदिया नेया॥

वृ. एवमेकैकहान्या एकैकन्द्रियपरिहानितः चक्षुरिन्द्रिय घ्राणेन्द्रिय जिह्वेन्द्रियोषघातैः क्रमेण त्रीन्द्रियादयः तावत् ज्ञेया यावदेकेन्द्रियाः चक्षुरिन्द्रियोपघाते त्रीन्द्रिया घाणेन्द्रियोपघातेऽपि द्वीन्द्रियाः जिह्वेन्द्रियोपघातेऽप्येकेन्द्रियाः। इह पूर्वं विज्ञानावरणेऽपीन्द्रियमनावृतमुक्त मिदानीमिन्द्रियावरणेऽपि विज्ञानमनावृतमुपदर्शयति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा.[४६१४] सन्निस्सिदियघाए वि तन्नाणं नावरिज्जइ।
विन्नाणं न तत्थ सन्नीणं विज्जमाणे वि इंदिए॥

वृ. संज्ञिन इन्द्रियघातेऽपि न ज्ञानमुपहतेन्द्रियज्ञानं नाव्रियते। एतच्चाग्रे भावयिष्यते। असंज्ञिनां पुनर्विद्यमानेऽपीन्द्रिये विज्ञानं नास्ति। यथोक्तं प्राक् यथा चाग्रे वक्ष्ये। एतदेव भावयति-

भा.[४६१५] जो जाणइ य जच्चंधो वन्ने रूवे विकप्पसो।
न ते वावरिते तस्स विन्नाणं तं तु चिट्ठइ॥

भा.[४६१६] पासत्ता वि न याणंति विसेसं वएणमादिणं।
बाला असन्निणो चेव विन्नाणावविरियम्मि उ॥

वृ. यो नाम जायन्धः स्पष्टचक्षुर्वर्णान् रूपाणि च विकल्पशोऽनेकप्रकारं जानाति तस्य नेत्रेऽप्यावृते तत् विज्ञानं तिष्ठति अन्धीभूतोऽपि वर्णविशेषान् रूपाविशेषांश्च तथैव स्पर्शतो जानातीत्यर्थः। तथा बाला असंज्ञिनश्च पश्यन्तोऽपि विज्ञाने आवृते वर्णादीनां विशेषं न जानन्ति। तदेवमिन्द्रियोपघातेऽपि न विज्ञानोपघातो विज्ञानोपघातेऽपि नेन्द्रियोपघात इति विज्ञानेन्द्रिययोर्भेद-स्तथैव तदावरणयोरपि भेद इति ज्ञानावरणं दशधा, सांप्रतमेकैकेन्द्रियहान्या यत् एकेन्द्रियत्वं पूर्वमुक्तं तद्भावयति-

भा.[४६१७] इंदिय उवधाएणं कमसो एगिंदि उव संवृत्तो।
अनुवहए बहुकरणे विसुज्झती उसहादीहिं॥

भा.[४६१८] अवविज्जए उवज्जिए य जह इंदिएहिं सो पुरिसो।
एस उवमा पसत्था संसारीर्णिदिय विभागे॥

वृ. कोऽपि पुरुषः क्रमशः क्रमेणेन्द्रियाणां श्रोत्रादीनामुपघातेन एकेन्द्रिय एव संवृत्तः। तत्र चानुपहते उपकरणे उपकरणेन्द्रिये पुनरौषधादिभिर्विशुद्ध्यति सर्वस्पष्टेन्द्रियो भवति। तत्र यथा स पुरुष इन्द्रियैरपचीयते उपचीयते च। एषा उपमा संसारिणामिन्द्रियविभागे प्रशस्ता तथैव संसारिणोऽपि पञ्चेन्द्रियाभूत्वा चतुरिन्द्रियास्त्रीन्द्रिया द्वीन्द्रिया एकेन्द्रियाश्च परिणमंति, पुन-र्द्वीन्द्रियास्त्रीन्द्रियाश्चतुरिन्द्रियाः पञ्चेन्द्रियाश्च भवन्तीत्यर्थः।

भा.[४६१९] परिणामतो जं भणियं जिनेहिं अह करणं न याणति।
दिठंते परिणामेण परिवाडी उक्कमकंमाणं॥

वृ. अथ यदुक्तं जिनैः परिणामतः संसारिणामिन्द्रियविभागस्तत्र कारणं न जानाति। एवं तेनोक्ते दृष्टान्तेन परिणाममधिकृत्य क्वचिदुत्क्रमपरिपाटी वक्तव्या। एतदेव सविस्तरमाह-

भा.[४६२०] चरिएण कप्पिएण व दिठंते न व तहा तयं अत्थ।
उवनेइ जहानुपरो पत्तियइ अजोग्गरूवम्मि॥

वृ. चरितेन कल्पितेन वा दृष्टान्तेन यथा तं विवक्षितमर्थमुपनयति। यथा परे अयोग्यरूपमपि प्रत्येति।

भा.[४६२१] दिठंतो परिणामे कहिज्जते उक्कमेण वि कयाइ।
जह ऊ एगिंदीण वणसइ कत्थई पुव्वं॥

वृ. दृष्टान्तान्परिणामयतीति परिणामस्तास्मिन् दृष्टान्तपरिणामके इत्यर्थः। कदाचिद्बोधो-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्पादानुगुण्येन उत्क्रमेणपि कथ्यते। यथा शस्त्र परिज्ञायामेकेन्द्रियाणां जीवत्वप्रसाधनविधौ पूर्वं प्रथमोद्देशके वनस्पतिः कथ्यते। अन्तिमे चोद्दशके वायुकायिकः। तत्र प्रथमत उत्क्रमेण वनस्पतीनां जीवत्वख्यापनार्थमाह-

भा.[४६२२] पत्तंति पुप्फंति फलं वदंती, कालं वियाणंति तहेंदियत्थे।
जाती य वुड्ढी य जरा य जेहिं, कहं न जीवा उ भवंति ते ऊ॥

वृ. ये पत्रयन्ति पत्राणि मुञ्चन्ति। पुप्फंति पुष्पभाजो भवन्ति फलं च ददति कालं च स्वपत्र-पुष्पफलनिमित्तं जानन्ति। इन्द्रियार्थांश्च गीतादीन् ये विजानन्ति बकुलादीनं तथा दर्शनात्। तथा तेषां जातिर्वृद्धिर्जरा च, ते कथं न जीवा भवन्ति? भवन्त्येवेति भावः। पुरुषादिधर्माणां सर्वेषामपि तत्रोपम्यमानत्वात्, प्रयोगश्च वनस्पतयो जीवा जातिजरावृद्ध्याद्युपेतत्वात् मनुष्यवत्-

भा.[४६२३] जाहे ते सद्दहिया ताहे कहिज्जंति पुढविकाइया।
जह उ पवालग लोणा उवल गिरीणं च परिवुड्ढी॥

वृ. यदा ते वनस्पतयो जीवत्येन श्रद्धिता भवन्ति तदा पृथिवीकायिका जीवाः (कथ्यन्ते, यथा) प्रवालादिषु परिवृद्धिर्दर्शनात्।

भा.[४६२४] कललंडरसादीया जह जीवा तहेव आउजीवावि।
जोइंगणखज्जुए वा जहुण्ह तह तेउ जीवावि॥

वृ. यथा कललं गर्भप्रथमावस्थारूपमण्डरस इत्येवमादयो जीवास्तथैवाप्कायजीवा अपि प्रतिपत्तव्याः, प्रयोगः अप्कायिका जीवा अनुपहत्वे सति द्रवत्वात् कललं च रसादिवत्। तथा यथा ज्योतिरङ्गणः स्वद्योतकः यथा वा ज्वरिते उषमेति स जीवनस्तथा तेजोजीवा अपि। प्रयोग-भावना त्वेवम्-तेजस्कायिका जीवा असूर्यकिरणत्वे सत्यूषमधर्मोपेतत्वात्।

भा.[४६२५] जाहे सद्दहिते तेऊ वाऊ जीवा से ताहे सीसंति।
सत्थपरिण्णाएवि य नुक्कमणं तु एयट्ठा॥

वृ. यदा तेजस्कायिकान् जीवत्वेन श्रद्दधाति तदा से तस्य वायवो जीवाः शिष्यन्ते तथा वायवो जीवा अपरे प्रेरितत्वे सति तिर्यग्गति गमनात् गवादिवत् शस्त्रपरिज्ञायामप्युत्क्रमकरणं पूर्वं वनस्पत्युद्देशस्यान्ते वायुकायिकोद्देशस्य करणमित्यर्थः। तदर्थं सुखेन जीवत्वप्रतिप्रत्त्यर्थं; उपसंहारमाह-

भा.[४६२६] एस परिणामगो भणितो अहुणा उ जम्मं वुच्छामि।
सो दुविहो नायव्वो भासाए सरीरजम्मो उ॥

वृ. एष द्विविधोऽपि परिणामक उक्तोऽधुना जड्डं वक्ष्ये। स जड्डो द्विविधो ज्ञातव्य, तद्यथा-भाषणायां भाषाजड्डः शरीरजड्डश्च।

भा.[४६२७] जलमुगएलमूगो मम्मणमूगो य भासजड्डो य।
दुविहो सरीरजड्डो तुल्लो करणे अनिपुणो अ।

वृ. भाषाजड्डस्त्रिविधस्तद्यथा-जडमूक एडकमूक मन्मनमूकश्च। शरीरजड्डो द्विविधस्तद्यथा-शरीरेण क्रियायामनिपुणश्च।

भा.[४६२८] पढमस्स नत्थि सद्दो जलमज्झे व भासए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बीयउ एलगो चेव अच्चंत वुच्चुयायइ ॥

वृ. अथ मत्स्यजलमूकस्य जलमध्ये इव भाषमाणस्य नास्ति शब्दः, द्वितीय एडमूकः एडकमिव वुच्छुयायते।

भा.[४६२९] मम्मणो पुण भासंतो खलए अंतरंतरा।
चिरेण नीति से वाया अविसुद्धा व भासते ॥

वृ. मन्मनः पुनर्भाषमाणो अन्तरंतरा स्खलित यदि वा तस्य भाषमाणस्य वाक् चिरेण तस्य निर्गच्छति अविशुद्धा वा। सम्प्रति वन्तजहंति द्वारमाह-

भा.[४६३०] दुविहेहिं जड्डदोसे विसुद्धं जो उ उज्जती।
काया चत्ता भवे तेनं मासा चत्तारि भारिया ॥

वृ. द्विविधेन जड्डदोषेन विशुद्धं य उज्झति तेन कायाः षट्कायास्त्यक्ता भवेयुः न संरक्षितास्तथास्य प्रायश्चित्तं चत्वारो गुरुका मासाः। एतेन संभोजनद्वारं व्याख्यातम्।

भा.[४६३१] कहिए सद्दहिए चेव उवविंति परिग्गहे।
मंडलीए उवद्धत्तु इमे दोसा य अंतरा ॥

वृ. षट्जीवनिकाये कथिते श्रद्धिते च पतत्गृहे उयवेन्ति पतगृहे तत्र समुद्देशाप्यते इत्यर्थः। एतदनुपस्थापितो भवति तदां तं मण्डल्यां समुद्देशयेत्। अन्तरा पुनर्भेद्यमाने इमे वक्ष्यमाणा दोषास्तानेवाह-

भा.[४६३२] पायस्स विराधन अतिहीदट्ठूण उद्धगमनं वा।
सेहस्स दुंगुच्छा सवे दुदिट्ठधम्मत्ति ॥

वृ. उत्पाट्यतो नयत आनयतो नयतो वा पात्रस्य विराधना स्यात्। यदि वा अतिथीन् दृष्ट्वा तस्य वंति वमनं प्रवर्तते गमनत्वात्त एव प्रदेशात् कुर्यात्। शैक्षकस्य वा जुगुप्सा जनेन क्रियते यथा केनापि दोषेण दुष्ट एष ततः पृथग् भुङ्क्ते। सर्वान्वा कश्चित् जुगुप्सीत यथा पात्रमप्येवंभूतं भोजनात् बहिः कुर्वन्ति अहो दुष्टधर्माण इति। सम्प्रति भूमित्तिय विवेगो इति व्याख्यानार्थमाह-

भा.[४६३३] जलमूग एलमुगो सरीरजड्डो य जो जायइ तुल्लो।
जं वुत्तंति विवेगो भूमित्तिय ते न दिक्खिज्जा ॥

वृ. यदुक्तम्-भूमित्रिकस्य विवेक इति। तस्यायमर्थः जलमूक एडमुकः शरीरजड्डश्च। योऽतिस्थूलस्तानेतान् त्रीन् न दीक्षयेत्।

भा.[४६३४] दुम्मेहमणतिसेसी न जाएती जो य करणतो जड्डो।
ते दुन्निवि तेन न सो दिक्खेइ सिया सो अतिसेसी ॥

वृ. दुर्मेधसंयतश्च करणतो जड्डस्तमनतिशेषी अनतिशायी न जानाति तेन कारणेन तौ द्वावपि स दीक्षयेत्। अथ स्यात्सौऽतिशेषी ततो न दीक्षयति।

भा.[४६३५] अहव न भासा जड्डुं जहाइति परं परागतं च्छउमो।
इयरंपि देसहिंडग असतीए वावि द्वविज्जा ॥

वृ.अथवा भाषाजड्डुत्ति दुर्मेधसं परं परागतं मातृपक्षपरं परागतं गुरुपक्षपरं परागतं च छद्मस्थो न त्यजति इतरमपि करणजड्डुं देशहिण्डकस्य देशदर्शनाय असति चान्यस्मिन् साधौ दीक्षयेदन्यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवेचयेत् न दीक्षयेत् दीक्षयन् वा परिष्ठापयेत्। अत्रैव मतान्तरं दुषयति-

भा.[४६३६] मासतुसानाएणं दुम्मेहतंपि केइ इच्छंति।
तं न भवति पलिमंथो नयावि चर विना नाणं॥

वृ. केचित्त माषतुषज्ञातेन दुमेधास्तमपि दीक्षितुमिच्छन्ति तत्र भवति यतो दुर्मेधसः पाठने स्वयं सूत्रार्थयोः पलिमन्थः न चापि तस्य ज्ञानं विना चरणं तत आत्मनः परस्य च केवलक्लेशान्न तद्दीक्षणमिति॥

भा.[४६३७] नातिथुल्लं न उज्झत्ति मेहावी जो अ वोवडो।
जलमुगमेलमुगं च परिठावेज्ज दोन्निवि।

वृ. नातिस्थूलं नोज्झयन्तीत्यर्थः। यश्च मेधावी बोब्बडो भाषाजडुस्तपि नोज्झति। जलमूकं मेडकमूकं द्वावप्येतौ परिष्ठापयेत् -

भा.[४६३८] मुत्तूण करणजड्डुं परिवट्टंति जाव सेस छम्मासा।
एक्केक्कं छम्मासो जस्स य दतुं विविंचएया॥

वृ. मुक्त्वा करणजड्डुं शेषं दुर्मेधसं भाषाजड्डुं यावत्षण्मासास्तावत् परिवर्तयन्ति अनुवर्तयन्ति। ततः परमन्यस्याचार्यस्य समर्प्यते। सोऽपि षण्मासान् परिवर्तयति तदनन्तरमन्यस्य सोऽपि षण्मासात्परमेकैकं तस्य षण्मासास्तत्र त्रयाणामाचार्याणां मध्ये यस्य समीपं संख्यां गृहीतवान्। यावन्तं दृष्ट्वा याचते ममैनं शिक्षां देहीति तस्य विवेचनं तस्य दानमित्यर्थः।

भा.[४६३९] तिण्हं आयरियाणं जोणं गाहेइ सीस तस्सेव।
जइ एत्तिएण गाहित्तो न परिट्ठावए ताहे॥

वृ. त्रयाणामाचार्याणां मध्ये यो ग्राहयति तस्यैव शिष्यः स दीयते। यदि एतावता आचार्यत्रिकेण परिपाट्य मिलित्वा ग्राहितो भवत्ति ततस्तदा न परिस्थाप्यते।

भा.[४६४०] देंति य जंगमथेराण वावि अहवा वि दत्तूणं जो उ।
भणती मज्झं कज्जं दिज्जति तस्सेव सो ताहे॥

वृ. अथवा अजङ्गमस्थविराणां स वैयावृत्यकरणाय दीयते यदि वा यस्तं दृष्ट्वा भणति-मम कार्यमेतेन तस्माद्दीयतामिति। ततस्तस्यैव दीयते-

भा.[४६४१] जो पुण करणे जड्डो उक्कोसं तस्स होइ छम्मासा।
कुलगणसंघनिवेयण एयं तु विहिं तहिं कुज्जा॥

वृ. यः पुनः करणे जड्डः तस्योत्कृष्टं परिपालनं भवति यावत् षण्मासाः। ततः परं कुलस्य गणस्य संघस्य वा निवेदनं क्रियते। स यत्करोति तत्प्रमाणमेतं विधिं कुर्यात्।

मू.(२६६)नो कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डगं वा खुड्डियं वा उणट्ठ वासजायं उवट्ठावेत्तए वा संभुज्जित्तएवा।

मू.(३६७)कप्पइ निग्गंथाणवा निग्गंथीण वा खुड्डगं वा खुड्डियं वा साइरेगअट्ठवासजायं उवट्ठावेत्त ए वा संभुञ्जित्तए वा।

वृ.अस्य संबंधप्रतिपादनार्थमाह-

भा.[४६४२] पवज्जा परियातो वुत्तो सेहो उ विज्जए जत्थ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जम्मण परियागस्स उ विजाणणट्ठा इमं सुत्तं ॥

वृ. प्रव्रज्यापर्यायाऽनन्तरसूत्रेणो क्तोयत्र शिष्यः स्थाप्यते। संप्रति तस्यैव जन्मपर्यायस्य विज्ञानर्थमिदं सूत्रमित्येष सम्बन्धः। सूत्राक्षरगमनिका-न कल्पते निर्ग्रन्थानां निर्ग्रन्थीनां वा क्षुल्लकं वा क्षुल्लिकां वा ऊनाष्टवर्षजातमुपस्थापयितुं वा संभोक्तुं वा मण्डल्यां, तथा कल्पते निर्ग्रन्थानां वा क्षुल्लंके वा क्षुल्लिकां वा सातिरेकाष्टवर्षजातमुपस्थापयितुं वा उपास्थाप्य मण्डल्यां संभोक्तु वा अथ कस्माद्नाष्टं वर्षजातस्योपस्थापनादि न कल्पते। अत आह-

भा.[४६४३] ऊणट्ठए चरित्तं न चिट्ठए चालणीए उदगं वा।
बालस्स य जे दोसा भणिया आरोवणा दोसा॥

वृ. ऊनाष्टकेनाष्टवर्षजाते बाले चालिन्यामुदकमिव चारित्रं न तिष्ठते तथा ये बालस्य दोषा भणिता या च बालस्योपस्थापने आरोपणा स प्रसजति। बालस्य दोषानाह-

भा.[४६४४] कायवइमनोजोगो हवंति तस्स न वड्डिया जम्हा।
संबंध अनाभोगे उमे सहसा ववादेणं॥

वृ. तस्य बालस्य कायवाङ्मनोयोगा यस्मादनवस्थिता भवन्ति तस्मान्नोपस्थापयेत। यत्रैवापवादमाह-सम्बन्धिनमनाभोगे अवमे दुर्भिक्षे सहसाकारेणं संभोजनेऽपवादेनोपस्थापयेत् ऊनाष्टवर्षजातमपि। तत्र सम्बन्धिद्वारव्याख्यानार्थमाह-

भा.[४६४५] भुंजिस्से समयासद्धिं नीयो निच्छइ संपयं।
सो अ नेहेण संबंधो कहं चिठेज्ज तं विना॥

वृ. एष बालको मया सह भोक्ष्यते इत्येव भणित्वा नीतो मण्डल्यां स च सम्प्रति तमाचार्यं विना भोक्तुं नेच्छति। स वाचार्यस्यस्नेहेन सम्बधस्ततः कथं प्रवज्यायां गृहीतायां सह भोजनं विना तिष्ठेत्, नैव तिष्ठोदिति भावः।

भा.[४६४६] अनुवट्ठविउ एसो संभुंजइ मा बुवेज्ज अपरिणयो।
ताहोवट्ठाविज्जइ तो नं संभुजए ताहे॥

वृ. तत्र हु निश्चितमपरिणता मा ब्रूयुरेव यथैषोऽनुपस्थापितो मण्डल्यां संभुङ्क्ते ततः स तदा उपास्थाप्यते तदनन्तरं संभोजनं-मण्डल्यामिति।

भा.[४६४७] अहव अनाभोगेण सहसक्कारेणं वावि हुज्ज संभुत्तो।
उमम्मि वि सहु तत्तो विप्परिणामं तु गच्छेज्जा॥

वृ. अथवा अनाभोगेन सहसाकारेण वा मण्डल्यां स युक्तो भूयात्। ततोऽस्य मा प्रापदन-वस्थाप्रसङ्ग इति तमूनाष्टवर्ष्जातमप्युपस्थाप्य मण्डल्यां संभोजयेत्। अवमे दुर्भिक्षे जाते मा विपरिणामं गच्छेदिति उपस्थाप्य मण्डल्यां संभोज्यते। एतदेव भावयति -

भा.[४६४८] अदिक्खायतो मा मे मं इमे पच्छभोजिनो।
अपरोहमिति भावेज्जा तेनावि सह भुंजते॥

वृ. इमे प्रच्छन्नभोजिनो मा मेऽवमे दुर्भिक्षे अदीक्षयन्ति अदीक्षां कर्तुमिच्छन्ति तेन कारणेनाहं परः कृत इति स भावयेत्। ततस्तेनापि सह झटित्येवोपस्थापितेन संभुंक्ते।

मू. (२६८)नो कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डगस्स वा खुड्डियाए वा अवज्जण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायस्स आयारपकप्पे नाम अज्झयणे उद्दिसित्तए।

मू. (२६९)कप्पइ निग्गंथाण वा निग्गंथीण वा खुड्डुगस्स खुड्डियाए वा वञ्जणजायस्स आयारपकप्पे नाम अज्झयणे उद्दिसित्तए॥

भा.[४६४९] लेहट्ठट्ठमचरिमे उवठामो पसंगओ।
उद्देसो सेससुत्तंपि सुत्तस्सेव उवक्कमो॥

वृ. रेखास्थं परिपूर्णमष्टमं वर्षं यस्य से रेखास्थाष्टवर्षस्तस्मिन् प्रमत्तसूत्रेणोपस्थापनाज्ञानातत्तो मा तत्प्रसङ्गत्तः शेषसूत्रमप्युद्दिशेदिती सूत्रस्याधिकृतस्य एष उपक्रमः सम्बन्धः। सूत्रस्य व्याख्या न कल्पते निर्ग्रन्थानां वा क्षुल्लकस्य वा क्षुल्लिकावा वा अव्यञ्जनजातस्य न व्यञ्जनान्युपस्थारोमाणि जातानि यस्य स तथा तस्य आचारप्रकल्पो नामाध्ययनं निशीथापरपर्यायमुद्देष्टं।

भा.[४६५०] अहिअट्ठामवरिसिस्स विओरवि पढितेन उकप्पा।
देंति अवंजणजातस्स वंजणाणं परूवणा॥

भा.[४६५१] जहा चरित्तं धारेउ ऊणठो वज्ज पच्चको।
तहावि वुक्कं वुड्डी उ अववायस्स नो सहू॥

वृ. अधिकाष्ठवर्षस्यास्य पठितेऽप्यचचारे अव्यञ्जनजातस्य अत्र व्यञ्जनानां प्ररूपणा कर्तव्या। सा च सूत्रव्याख्यायां कृता, न तु नैव सूरयः प्रकल्पमाचारप्रकल्पं नामाध्ययनं ददति। कुत इत्याह-जहेत्यादि यथा ऊनाष्ठा ऊनाष्टवर्षश्चारित्रं धारयितुमप्रत्यलोऽयमर्थः। तथा अजातव्यंजनतया अपक्कबुद्धिरपरिपाका या बुद्धिरपवादस्य धारणे न ददति; तथा कल्पते निर्ग्रन्थानाकनिर्ग्रन्थीनां वा क्षुल्लकस्य वा क्षुल्लिकाया वा व्यञ्जनजातस्य आचारप्रकल्पो नामाध्ययनमुद्देष्टुं अथ स्तोककालाद् दीक्षितश्चापि जातव्यञ्जनस्य दीयते न किंवा नेत्यतआह-

मू. (२७०)तिवासपरियायस्स समणस्सनिग्गंथस्स कप्पइ आयारपकप्प नामं अज्झयणे उद्दिसित्तए॥

वृ. जातव्यंजनस्यापि त्रिवर्षपर्यायस्य श्रमणस्य निर्ग्रन्थस्य कल्पते आचारप्रकल्पो नामाध्ययनमुद्देष्टुं यदि पुनस्त्रयाणां वर्षाणां आरत उद्दिशति ततस्तस्य प्रायश्चित्तं चत्वारो गुरुकाः। त्रिवर्षपर्यायस्याप्यपरिणामकस्यातिपरिणामकस्य चोद्दिशतश्चतुर्गुरुकं।

मू. (२७१)चउवासपरियागस्स समणस्स निग्गंथस्स कप्पइ सुयगडे नामं अंगे उद्दिसित्तए।

मू. (२७२) पंचवासपरियागस्स समणस्स निग्गंस्स कप्पति दसाकप्पववहारोओदिसित्ताएवि॥

मू. (२७३)अट्ठवासपरियागस्स समणस्स निग्गंस्थ कप्पति ठाणसमवाए उद्दिसित्तए॥

मू. (२७४)दसवासपरियागस्स समणस्स निग्गंस्स कप्पति विवाहे नामं अंगं उद्दिसित्तए॥

वृ. चतुर्वर्षपर्यायस्य श्रमणनिर्ग्रन्थस्य कल्पते सूत्रकृतं नामाङ्गमुद्देष्टुं पञ्चवर्षपर्यायस्य दशकल्पस्य व्यवहारा विकृष्टो नाम षड्भ्य आरभ्य नव वर्षाणि यावत् तत्पर्यायस्य स्थानं समवायस्य दशवर्षपर्यायस्य व्याख्याप्रज्ञप्तिः। पञ्चममङ्गमेतदेव सहेतुकं वक्तुकामो भाष्यकृदाह-

भा.[४६५२] चउवासे सुयगडं कप्पववहार पंचवासस्स।
विगट्ठ ठाणस्स समवातो दसवरिसविवाहपन्नत्ती॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वृ. चतुश्चतुर्वर्षपर्यायस्य सूत्रकृतं पञ्चवर्षस्य कल्पव्यवहारावुपलक्षणमेतत्। दशाश्रुत-स्कन्धश्चाविकृष्टपर्यायस्य स्थानं समवायश्च दशवर्षपर्यायस्य व्याख्याप्रज्ञप्तिमुद्दिशति।

किं कारणमेतावत् कालातिक्रमणे तत आह-

भा.[४६५३] चउवासो गाढमती न कुसमएहिं तु हीरए सो उ।
पंचवरिसे उ जोग्गो अववायस्सत्ति तो देंति॥

भा.[४६५४] पंचण्हुवरि विगिट्ठो सुयथेरा जेण तेन उ विगिट्ठो।
ठाणं महिड्ढयंति य तेनं दसवासपरियाए॥

वृ. सूत्रकृताङ्गे त्रयाणां त्रिषष्ट्यधिकानां पाषण्डिकशातानां दृष्टयः प्ररूप्यन्ते ततो हीनपर्यायो मतिभेदेन मिथ्यात्वं यायात्। चतुर्वर्षपर्यायस्य धर्मेऽवगाढमति र्भवति ततः कुसमयैर्नापहियते तेन चतुर्वर्षपर्यायस्य तदुद्देष्टुमनुज्ञातं तथा पञ्चवर्षोपवादस्य योग्य इति कृत्वा पञ्चवर्षस्य दश-कल्पव्यवहारान् ददति। तथा पञ्चानां वर्षाणामुपरि पर्यायो विकृष्ट उच्यते तेन कारणेन स्थाने समवाये नवाधीतेन श्रुतस्थविरा भवन्ति तेन कारणेन तदुद्देशनं प्रति विकृष्टपर्यायो गृहीतस्तथा स्थानं समवायश्च महर्धिकं प्रायेण द्वादशानामप्यङ्गानां तेन सूचनादिति तेन तत्परिकर्मितमतौ दशवर्षपर्याये व्याख्याप्रज्ञप्तिरुद्दिश्यते।

मू. (२७५) एक्कारसवासपरियागस्स समणस्स निग्गंस्स कप्पइ खुड्डिया विमानपविभत्ति महल्लिया विमानपवित्ती अंगचूलिया वंगचूलिया विवाहचूलिया नामं अज्झयणमुद्दिसित्तए॥

वृ. अस्य व्याख्या -

भा.[४६५५] एक्कारस वासस्स खुड्डीया महल्ली विमाणपविभत्ती।
कप्पइ य अंगवंगे विवाह चेव चूलीओ॥

भा.[४६५६] अंगाणमंगचूली महकप्पसुयस्स वग्गचूलीओ।
विवाहचूलिया पुण पुन्नत्तीए मुनेयवा॥

वृ. एकादशवर्षस्य क्षुल्लिकाविमानप्रविभक्तिर्यत्र कल्पेषु विमानानि वर्ण्यन्ते। महती-विमानप्रविभक्तिर्यत्र विमानान्येव विस्तरेणाभिधीयन्ते। अङ्गानामुपासकदशाप्रभृतीनां पञ्चानां चूलिका निरावलिका अङ्गचूलिका महाकल्पश्रुतस्य चूलिका, वर्गचूलिका व्याख्या पुनः प्रज्ञप्ते-र्व्याख्याप्रज्ञप्ते श्चूलिकामंतव्या।

मू. (२७६) बारसवासपरियागस्स समणस्स निग्गंथस्स कप्पइ। अरुणोववाए गरुलोववाए ववरुणोवाए वेसमणोववाए वेलंधरोववाए नामअज्झयणं उद्दिसिउं॥

भा.[४६५७] बारसवासे अरुणोववाय वरुणो य गरुल वेलंधरो।
वेसमनुववाए य तहाय ते कप्पइ उद्दिसिउं॥

वृ. द्वादशवर्षपर्यायस्य अरुणोपपातो वरुणोपपातो गरुडोपपातो वेलंधरोपपातो वैश्रमणो-पपातश्च। एतानि पञ्चाध्ययनानि उद्देष्टुं कल्पन्ते।

भा.[४६५८] तेसिं सिरिनामा खलु परियट्टंति एंति देवा उ।
अंजलि मउलिय हत्था नज्जावेत्ता दसदिसा उ॥

भा.[४६५९] नागावरुणो वासं अरुणा गरुला य वीयगं देंति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगंतूण य बेंती संदिसह कि करेमित्ति ॥

वृ. तेषामरुणोपपातादीनामध्ययनानां ये सदृशनामानः खल्वरुणादयो देवास्ते यदि तान् प्रणिधायाध्ययनानि परावर्तन्ते तदा ते अञ्जलिमुकुलितहस्ता दशापि दिश उद्योगतयन्ति समागच्छन्ति समागत्य च किङ्करभूताः पर्युपासते; तथा नामानो वरुणाश्च गन्धोदकादिवर्षं वर्षन्ति। अरुणो गरुडाश्च बीजकं सुवर्णं ददतः प्रत्यासन्नमागत्य च ब्रूवते सन्दिशत किं कूर्मो वयमिति।

मू. (२७७) तेरस वासपरियागस्स समणस्स निग्गंथस्स कप्पइ। उट्ठाणसुए समुट्ठाणसुए देविंदोववाए नागपरियावणियाए ॥

भा.[४६६०] तेरसवासे कप्पइ उट्ठाणसुए तहा समुट्ठाणे
देविंदं परियावण नागाण तहेव परियावणीया ॥

वृ. त्रयोदशवर्षस्य कल्पते उत्थानश्रुतं तथा समुत्थानं श्रुतं देवेन्द्रपरियापनिका नागानां तथैव परियापनिका नागपरियापनिका इत्यर्थः। साम्प्रतममीषामध्ययनानामतिशयमाह-

भा.[४६६१] परियट्टिज्जइ अहियं उट्ठाणसुयं तु तत्थ उद्वेइ।
कुलगामदेसनामादी समुट्ठाणसुए निविस्सत्ति ॥

भा.[४६६२] देविंदा नागा विय परियाणीमुवेंति ते दोवी।
चोद्दसवासुद्देसी महसुमिणभावणज्झयणं ॥

वृ. यत्र प्रणिधय उत्थानश्रुतं परावर्त्यते तत्र कुलग्रामदेशादि उत्ताष्ठति उद्वसीभवतीत्यर्थः। ततः कार्ये निष्पन्ने समुत्थानश्रुते परावर्त्यमाने ते कुलग्रामदेशादयः स्वस्थीभूय पुनर्निविशन्ति;। देवेन्द्रपरियापनिकायां परावर्त्यमानायां देवेन्द्रा नागपरियापनिकायां नागाः समागच्छन्ति।

मू. (२७८)चउदसपरियागस्स समणस्स निग्गंथस्स कप्पति सुमिणभावणा नामं अज्झयण-मुद्दिसित्तए ॥

वृ. चतुर्दशवर्षपर्यायस्य श्रमणस्य निर्ग्रन्थस्य कल्पते महास्वपनभावनानामाध्ययनमुद्देष्टुं चोद्दसवासुद्दिसए इत्यादि भाष्यगाथोत्तरार्धं सुप्रतीतमधुनाध्ययनार्थमाह-

भा.[४६६३] इच्छंती सुसुमिणा बायाला चेव हुंति महासुमिणा।
बायत्तरि सव्वसुमिणा वन्निज्जंते फलं तेसिं ॥

वृ. अत्र महास्वप्नभावनाध्ययने त्रिंशत्सामान्यस्वप्नाः द्वाचत्वारिंशन्महास्वप्ना वर्ण्यन्ते फलं च तेषां वर्ण्यन्ते।

मू. (२७९)पन्नरसवासपरियास्स समणस्स निग्गंथस्स कप्पइ चारणभावणा नामज्झयण-मुद्दिसित्तए ॥

भा.[४६६४] पन्नरसे चारणभावणंति उद्दिसिए उ अज्झयणं।
चारणलद्धी तहियं उपज्जंति तु अहियम्मि ॥

वृ. पञ्चदशे पञ्चदशवर्षपर्यायस्य चारणभावेनत्यध्ययनमुद्दिश्यते। तस्य कोऽतिशय इत्याह-चारणलब्धिः तस्मिन्नधीते उत्पद्यते येन वा तपसा कृता चारणलब्धिरुपजायते तदुपवर्ण्यते।

मू. (२८०) सोलसवासपरियायस्स समणस्स निग्गंथस्स कप्पइ ते अनिसग्गा नाम अज्झयणमुद्दिसित्तए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मू. (२८१)सत्तरसवासपरियायस्स समणस्स निग्गंथस्स आसीविसभावना नाममज्झयणमुद्दिसित्तए ॥

मू. (२८२)अट्ठारसवासपरियायस्स समणस्स निग्गंथस्स कप्पत्ति दिट्ठीविसभावणा नाममज्झयणमुद्दिसित्तए ॥

मू. (२८३) एगुणवीसवासपरियायस्स समणस्स निग्गंथस्स कप्पइ दिट्ठिवायनामंग उद्दिसित्तए ॥

मू. (२८४) विसतिवासपरियाए समणे निग्गंथे सवसुयाणुवाती भवति ॥

भा.[४६६५] तेअनिसज्जा सोलसआसीविसभावनं च सत्तरसे।
दिट्ठिविसमट्ठारस उगुणवीसे दिट्ठिवाओ उ॥

वृ. षोडशवर्षे तेजोनिसर्गोनामाध्ययनमुद्दिश्यते। सप्तदशे वर्षे आसीविसभावनामुद्दिश्यते। दृष्टीविषभावनामष्टादशे वर्षे एकोनविंशतितमे वर्षे दृष्टिवादोनाम द्वादशमङ्गमुद्दिश्यते।

साम्प्रत-मेतेषामध्ययनानामतिशयानाह-

भा.[४६६६] तेयस्स निसरणं खलु आसीविसत्तं तहेव दिट्ठिविसं
लद्धीतो समुप्पज्जे समहीएसुं तु एएसु॥

वृ. एतेषु तेजोनिसर्गप्रभृतिष्वध्ययनेषु यथाक्रमं तेजसो निस्सरणमासीविषत्वं दृष्टीविषमित्येव लब्धयः समुत्पद्यन्ते। इयमत्र भावना तेजोनिसर्गेऽध्ययनेऽधीतो तेजोनिस्सरणलब्धिरुत्पद्यते-येन वा तपसा कृता तेजोलब्धिर्भवति। तच्च उपवर्ण्यते, आशीविषसंभावनायां पठितायां आशीविषत्वलब्धेर्यैर्वा समाचरणैरासीविषतया कर्म बध्यते, तान्युपवर्ण्यन्ते। एवं दृष्टीविषभावनायामपि भावनीयम्।

भा.[४६६७] दिट्ठिवाए पुण होइ सव्वभावाण रूपणं।
नियमा सव्वसुयाणुवाइवीसइ वासे उ बोधव्वो॥

वृ. दृष्टिवादे पुनर्भवति सर्वभावनां रूपणं प्ररूपणं नियमात् विंशतिवर्षः पुनः सर्वश्रुतानुपाती भवति। सर्वमपि श्रुतं यथा भणितेन योगेन तस्य पठनीयं भवति। अथ कस्य तीर्थकरस्य काले कियन्ति प्रकीर्णकान्याभवन्त्यत आह-

भा.[४६६८] चउद्दसय सहस्साइं पइण्णगाणं तु वद्धमाणस्स।
सेसाण जत्तिया खलु सीसा पत्तेयबुद्धाओ॥

वृ. भगवतो वर्धमानस्वामिनः तीर्थे चतुर्दशप्रकीर्णकसहस्राण्यभवन् शेषाणां च तीर्थकृतां यस्य यावन्तः शिष्यास्तस्य तावन्ति प्रकीर्णकानि प्रत्येकबुद्धा अपि तस्य तावन्तः॥

भा.[४६६९] पत्तस्स पत्तकाले एयाणि जो उ उद्दिसे तस्स।
निज्जरलाभो विपुलो किह पुन तं मे निसामेह॥

वृ. पात्रस्य योग्यस्य परिणामकस्त्येयर्थः। एतेनापात्रेऽतिपरिणामके वा ददानो महती श्रुताशातनेति प्रतिपादितम्। प्राप्ते काले यथोदिते एतानि प्रकीर्णकानि य उद्दिशति तस्य सुविपुलो निर्जरालाभः कथं पुनः सविपुलो निर्जरालाभः। सूरिराह-तं विपुलं निर्जरालाभं कथ्यमानं निशमयत मेते कथयति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भा.[४६७०] कम्ममसंखेज्जभवं खवेइ अनुसमयमेव आनत्तो।
अन्नरयम्मि जोगे सज्झायम्मी विसेसेन॥

वृ. कर्म ज्ञानावरणीयादिकमसंख्येयभवोपार्जितमन्यतरकेऽपि योगे प्रतिलेखनादावायुक्तो अनुसमयमेव क्षपयति, विशेषतः स्वाध्याये आयुक्तः।

भा.[४६७१] आयारमादियाणं अंगाणं जाव दिट्ठिवातो उ।
एसविही विण्णेओ सव्वेसिं आनुपुव्वीए॥

वृ. आचारादिकानामङ्गानां यावत् दृष्टिवादो दृष्टिवादपर्यन्तानां सर्वेषामानुपूर्व्या एषोऽनन्तरोदितो विधिर्विज्ञेयः। पात्रस्योचिते काले यदुचितमङ्गं तद्दातव्यं, न शेषमित्यर्थः॥

मू.(२८५)दसविहे वेयावच्चे पन्नत्ते। तं जहा-आयरियवेयावच्चे। उवज्झायवेयावच्चे, थेरवेयावच्चे तवस्सि वेयावच्चे, सेहवेयावच्चे, गिलाणवेयावच्चे, साहम्मियवेयावच्चे, कुल-वेयावच्चे, गणवेयावच्चे, संघवेयावच्चे। आयरियवेयावच्चे करेमाणे समणे निग्गंथे महानिज्जरे महापज्जवसाणे भवति।

वृ.अस्याक्षरगमनिका नवरं वैयावृत्त्यं त्रयोदशभिः पदैस्तान्यग्रे वक्ष्यन्ते। तथा महानिर्जरः प्रतिसमयमनन्त्यनन्तकर्म परमाणुनिर्जरणात् महापर्यवसानसिद्धिगमनात्॥

भा.[४६७२] दसविह वेयावच्चं इमं समासेण होइ विन्नेयं।
आयरियउवज्झाए थेरे य तवस्सि सेहे य॥

भा.[४६७३] अतरंतकुलगणे या संघे साहम्मि वेज्जवच्चे य।
एतेसिं तु दसण्हं कायवं तेरसपएहिं॥

वृ. दशविधमिदं वक्ष्यमाणं समासेन विज्ञेयं। तद्यथा-आचार्यस्य उपाध्यायस्य स्थविरस्य तपस्विनः शैक्षकस्य अतरन् ग्लानस्तस्य संघस्य साधर्मिकवैयावृत्त्यं गाथायां सप्तमी सर्वत्र प्रति-पत्तव्या; एतेषां त्वाचार्यादीनां दशानामपि यथा योगं त्रयोदशभिः पदैर्वैयावृत्त्यं कर्तव्यं तान्येव त्रयोदशपदान्याह-

भा.[४६७४] भत्ते पाने सयनासने य पडिलेहण पायमच्छिमद्धाणे।
राया तेनं दंडग्गहे य गेलन्नमत्ते य॥

वृ. भक्तेन भक्तानयनेन वैयावृत्त्यं कर्तव्यं ?, १ पानीयेन पानीयानयनेन २, शयनेन शय्या संस्तारकेन ३ आसनेन आसनप्रदानेन ४ प्रतिलेखनेन क्षेत्रस्योपधर्वा प्रत्युपेक्षणेनापि। पाएत्ति पादप्रमार्जनेन यदि वा औषधपानेन अक्ष्णि अक्षिरोगिणो भेषजप्रदानेन ७। अध्वनि अध्वनं प्रपन्नानामुपग्रहेण ८ राजद्विष्टे निस्तारणेन ९। तेनत्ति शरीरस्तेनेभ्यश्च संरक्षणेन १०। तथा विचारादिभ्य आगतानां दण्डग्रहणात्॥, ग्लानत्वे जाग्रतो यत् योग्यं तत्सम्पादनेन १२। मत्तेयत्ति मातृकत्रिकढौकनेन १३। एतानि त्रयोदशपदानि॥

भा.[४६७५] जा जस्स होइ लद्धी तं तु न हावेइ संतविरयम्मि।
एयाणुत्तत्थाणी उपायं किंचित्थ वुच्छामि॥

वृ. या यस्य भवति लब्धिः स तां सति वीर्ये पराक्रमे न हापयेदेति। ख्यापनार्थं त्रयोदशपदा-न्युपात्तानि। एतानि चोक्तार्थानि सुप्रतीतानि तथापि किंचिदत्र विनेयजनानुग्रहाय वक्ष्यामि।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

भा.[४६७६] पायपरिकम्मपाए उसह भेसज्ज देइ अच्छीणं।
अद्धाणे उवगेण्हइ रायदुट्ठे य नित्थारे॥

वृ. पायत्ति पादपरिकर्म प्रमार्जनादि करोति यदि वा औषधं पाययन्ति। अच्छित्ति अक्षणो रोगे समुत्पन्ने भेषजं ददाति अध्वनी प्रतिपन्नान् उपगृह्णाति उपधिग्रहणो विश्रामणाकरणेन चोपष्टभ्नाति। राजद्विष्टे समुत्पन्ने ततो निस्तारयति।

भा.[४६७७] सरीरोवहि तेने हि सा रक्खति सति बलंमि संतंमि।
दडंग्गहणं कुणंती गेलन्ने यावि जं जोग्गं॥

वृ. शरीरस्तेनेभ्य उपधिस्तेनेभ्यश्च सति विद्यमाने बले सति विचारभूम्यादिभ्य आगतानां पर्यायादिवृद्धानां साधूनां दण्डग्रहणं करोति। ग्लानत्वे च जाते यत् योग्यं तत्सम्पादयति।

भा.[४६७८] उच्चारे पासवणे खेले मत्तयतिय त्तिविहमे य।
सव्वेसिं कायव्वं साहम्मिए तत्थिमो विसेसो॥

वृ. उच्चारे प्रश्रवणे खेले श्लेष्मणि मात्रकत्रिकमेतत्। त्रयोदशपदात्मकं वैयावृत्त्यं त्रिविधं मनसा वाचा कायेन च सर्वेषामाचार्यादीनां दशानामपि कर्तव्यम् तत्रायं साधर्मिके विशेषस्तमेवाह-

भा.[४६७९] होज्ज गिलाणो निन्हवो न यत्थ विसेसं जाणइ जनो उ।
तुब्भेत्थं पव्वतितो न तरति किं न कुणह तस्स॥

भा.[४६८०] ताहे मा उड्डाहो उत्तीहो तस्स फासुएणंति।
पडुयारेण करे निच्चो एत्ती एत्थ अह सीसो॥

वृ. कोऽपि निन्हवः कोऽपि ग्लानो भवेत् न च तत्र जने विशेषं जानाति एष निन्हव एते च सुसाधव इति ततो जनो ब्रूयात्-युष्माकमत्र प्रव्रजितो न तरति, न शक्नोति, तस्याः किन्तु कुरुत प्रतिजागरणं ततो माभूत प्रवचनस्योड्डाह इति तस्यापि प्रासुकेन प्रत्यवतारेण भक्तपानादिना वैयावृत्त्यं करोति। अथानन्तरमत्र शिष्यश्चोदयति। किं तदित्याह-तित्थगरवेयावच्चं किं वा न होति निज्जरतहियं अहवेति आयरितो अत्र तीर्थकरवैयावृत्त्यं कस्मान्न भणितं किंनु न कर्तव्यं किं वा तत्र निर्जरा न भवति एवं शिष्येणोदितो अथानन्तरमाचार्यो ब्रवीति-

भा.[४६८१] आयरियग्गहणेण तित्थयरो तित्थ होइ गहिओ उ।
किं वा न होयायरिउ आयारं उवदिसंतो उ॥

भा.[४६८२] निदरिसणत्थ जह खंदएण पुट्ठो य गोयमो भवयं।
केण उ तुह्मं सिट्ठंति धम्मायरिए पच्चाह॥

वृ. आचार्यग्रहणेन तत्र दशानां मध्ये तीर्थकरो गृहीतो दृष्टव्यः। अथ किं वा केन वा कारणेन न भवत्याचार्यो भवत्येवेति भावः। स्वयमाचारकरणं परेषामित्याचारोपदेशनमित्याचार्यशब्द-प्रवृत्तिनिमित्तं ततः तीर्थकरेऽपि समस्तीति भवति तीर्थकरः। आचार्योऽत्र निदर्शनार्थं। यथा स्कन्दकेन भगवान् गौतमः पृष्टः-केनेदं तव शिष्टं कथितमिति। स प्रत्याह-धर्माचार्येणेति।

भा.[४६८३] तह्मा सिद्धं एयं आयरियगहणेण गहिय तित्थयरो।
आयरियादी दसवी तेरस गुण होंति कायव्वा॥

भा.[४६८४] तीसुत्तरसयमेग ठाणण वन्नियं तु सुत्तंमि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वेयावच्चे सुविहियं निम्मं निव्वाणमग्गस्स ॥

वृ. यस्मात् युक्तिनिदर्शनं चास्ति तस्मात्सिद्धमेतत् आचार्यग्रहणेन तीर्थकरो गृहीतः। आचार्यदीनि च दशापि पदानि त्रयोदशगुणानि भवन्ति कर्तव्यानि। एकैकस्मिन् पदे त्रयोदशभिः पदैः वैयावृत्त्यकरणात्। एवं च सति वैयावृत्त्येवैयावृत्त्यविषये सूत्रे त्रिंशदुत्तरं स्थानानां शतं वर्णितं किं विशिष्टमित्याह- सुविहितानां प्रापणं निर्वाणमार्गस्य।

भा.[४६८५] ववहारे दसमए दसविह साहुस्स जुत्तजोगस्स।
एगंत निज्जरा से न हु नवरि कयम्मि सज्झाए ॥

वृ. व्यवहारे दशमे उद्देशके यत् दशविधं वैयावृत्त्यमुक्तं तस्मिन्साधोर्युक्तयोगस्यैकान्तनिर्जरा भवति। न हु नवरि केवलं स्वाध्याये कृते से तस्यैकान्तनिर्जरेति ॥

भा.[४६८६] एसोनुगमो भणितो अहुणा उ नउ सो य होइ दुविहो उ;
नाण नओ चरणनओ ते समासं तु वुच्छामि ॥

वृ. तदेवमेषोऽनुगमो भणितोऽधुना नयो वक्तव्यः। तत्र यद्यपि नयाः शतसंख्यास्तथापि ते सर्वे नयद्वये अन्तर्भवन्ति। तत्र आह- नयो द्विविधो भवति, ज्ञाननयश्चरणनयो नाम क्रियानयस्तयोः समासं संक्षेपं वक्ष्यामि। तमेवाह-

भा.[४६८७] नायंमि गिण्हियवे अगिह्वियव्वंमि चेव अत्थंमि।
जइयव्वमेव इई जो उवदेस सो नयो नाम ॥

वृ. ज्ञाने सम्यक् परिच्छिन्ने गृहीतव्ये उपादेये अग्रीहतव्येऽनुपादेये हेय इत्यर्थः। चशब्दः खलूभयो ग्रहीतव्याग्रहीतव्ययोरनुकर्षणार्थः उपेक्षणीयवस्तुसमुच्चार्थो वा एवकारस्त्ववधारणे। तस्य चैवं व्यवहितप्रयोगः। ज्ञात एव ग्रहीतव्ये अग्रहीतव्ये उपेक्षणीये च नाज्ञाते अर्थे ऐहिकामुष्मिकरूपे तत्र ऐहिको ग्रहीतव्यः स्त्रक् चन्दनादिः, अग्रहीतव्यो विषशस्त्रकंटकादिः, उपेक्षणीयस्तृणादिरामुष्मिको ग्रहीतव्यः सम्यग् दर्शनादिः, उपेक्षणीयो विवक्षया अभ्युदयादिस्तास्मिन्नर्थे यतितव्यमेवेति अनुस्वालोपात् एवममुनाक्रणे ज्ञानपुरस्सरणरूपेण ऐहिकामुष्मिकफलप्राप्त्यर्थिना सत्वेन यतितव्यं प्रवृत्त्यादिलक्षणो यत्नः कार्यः। इत्थं चैतदङ्गीकर्तव्यं सम्यक् ज्ञानप्रवर्तमानस्य फलविसंवाद दर्शनात्तथा चोक्तमन्यैरपि 'विज्ञप्तिः फलदा पुंसा न क्रिया फलदा मता। मिथ्याज्ञानात् प्रवृत्तस्य, फलसंवाददर्शनात् ॥" तथा मुष्मिक फलनार्थिनापि ज्ञात एव यतितव्यमागमोऽपि तथा प्रतिपादनात्। उक्तं च- "पढमं नाणं ततो दया एवं चिट्ठइ सव्वसंजए। अन्नाणी किं काही किं वा नाहीच्छेयपावगं" ॥ इतश्चैतदेवमङ्गीकर्तव्यं यस्मात्तीर्थकरगणधरैरगीतार्थानां केवलानां विहारक्रियापि निषिद्धा। तथा चागमः-

भा.[४६८८] गीयत्थो अ विहारो बीइतो गीयत्थमीसितो भणितो।
एत्तो तइय विहारो नाणुन्नातो जिनवरेहिं ॥

वृ. न खल्वन्धेनान्धः समाकृष्यमाणः सम्यक्पन्थानं प्रतिपद्यते इत्यभिप्रायः। एवं तावन्क्षायोपशमिकं ज्ञानमाधिकृत्योक्तम्। क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव प्रतिपत्तव्यं। यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षाप्रतिपन्नस्य तपश्चरणवतोऽपि न तावदपवर्गप्राप्तिरुपजायते यावज्जीवाजीवाद्यखिलवस्तुपरिच्छेदरूपं केवलज्ञानं नोत्पन्नमिति तस्मात् ज्ञानमेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रधानमैहिकामुष्मिकफलप्राप्तिकारणमिति स्थितं, इति जोउवदेस सो नयो नाम इति, एवमुक्तेन प्रकारेण य उपदेशो ज्ञानप्राधान्यख्यापनपरः स नयो नाम ज्ञाननय इत्यर्थः । उक्तो ज्ञाननयः । सम्प्रति क्रियानयावसरः । तद्दर्शनं चेदं क्रिकैव ऐहिकामुष्मिकफलप्राप्तिकारणं प्रधानं युक्ति-युक्तत्वात्। तथा चायमप्युक्तस्वरूपामेव स्वपक्षसिद्धये गायामाह-नायम्मि गिण्हियव्वे इत्यादि अस्याः क्रियानयदर्शनानुसारेण व्याख्या ज्ञति गृहीतव्ये चार्थे ऐहिकाष्मिकफलप्राप्ति कारणं अर्थिना यतितव्यमेव यस्मात् प्रवृत्त्यादिलक्षणप्रयत्नव्यतिरेकेण न ज्ञानवतोऽपि अभिलषितार्था-वाप्तिरुपजायते। तथा चोक्तमन्यैरपि-

क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम्।
यतःस्त्री भक्ष्यभोगज्ञो न ज्ञानात्सुखितो भवेत्॥

तथा आमुष्मिकफलार्थिनापि क्रियैव कर्तव्या। तथा च भगवद्वचनमप्येवमेव व्यवस्थितं।

चेइय कुलगणसंघे आयरियाण च पवयणसुए य।
सव्वेसुवि तेन कयं तवसंजममुज्जमंतेन॥

इतश्चेदमङ्गीकर्तव्यं यस्मात्तीर्थकरगणधरैः क्रियाविकलानां ज्ञानमपि विफलमेवोक्तम्।

सुबहुंपी सुयमहियं किं काहीचरणविप्पहीनस्स।
अंधस्स जह पलित्ता दीवसयसहस्सकोडी वि॥

इशि क्रिया विकलत्वात्तस्येत्यभिप्रायः। एवं तावत् क्षायोपशमिकं चारित्रमङ्गीकृत्योक्तं चारित्रं क्रियेत्यनर्थान्तरत्वात्। क्षायिकमङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव यस्मादर्हतो भगवतः समुत्पन्नकेवलज्ञानस्यापि तात्मुक्त्यवाप्तिः संभवति यावदखिलकर्मेन्धनानल भूता ह्रस्व-पञ्चाक्षरोद्गरणकालमात्रा सर्वसंवररूपा चारित्रक्रिया नावाप्येत ततः क्रियैव प्रधानमैहिका-मुष्मिकफलप्राप्तिकारणमिति। इति जो उपदेसो सो नयो नाम इति एवमुक्तेन प्रकारेण यः उपदेशः क्रियाप्राधान्यख्यापनपरः स नयो नाम क्रियानयः इत्यर्थः। उक्तः क्रियानयः। इत्थं ज्ञाननयक्रियानयस्वरूपं श्रुत्वा विदिततदभिप्रायो विनेयः संशयापन्नः सन्नाह-किमत्र तत्त्वं पक्षद्वयेऽपि युक्तिसंभवात्। आचार्य सह-

भा.[४६८९] सव्वेसिं पि नयानं बहुविहवत्तव्वयं निसामित्ता।
तं सव्वनयविसुद्धं जं चरणगुणठितो साहू॥

वृ. सर्वेषामपि मूलनयानामपि शब्दात्तद्भेदानामपि नायानां द्रव्यास्तिकादीनां बहुविधवक्तव्यां सामान्यमेव विशेष एव उभयमेव परस्परनिरपेक्ष्यमित्यादिरूपाथवा नामादिनयानां मध्ये को नयः कं साधुमिच्छतीत्यादि रूपां निशम्य श्रुत्वा तत्सर्वनयविशुद्धं सर्वनयसम्मतं वचनं यच्चरणगुणस्थितश्चारित्रज्ञानस्थितः साधुर्यस्मात्सर्वे नया भावतो भावनिक्षेपमिच्छन्ति। तदेवं नयवक्तव्यतापि कृता भाष्यस्तुतिरायणमिदं गम्यकर्तृकत्वं गाथाद्वयम् -

कप्पववहाराणं भासं मुत्तूणं वित्थरं सव्वं।
पुव्वायरिएहिं कयं सीसाणहिओवएसत्थं॥
भवसयसहस्समहणं एवंतो यंति जे उ काहिति।
कम्मरसयविप्पमुक्का मुक्खमविग्घेण गच्छंति॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देशक इव निर्दिष्टा विषमस्थानेषु तत्वमार्गस्य।
विदुषामतिप्रशस्यो जयति श्री चूर्णिकारोऽसौ ॥
विषयोऽपि व्यवहारो व्यधायि सुगमो गुरूपदेशेन।
यदवादि तत्र पुण्यं तेन जनः स्यात्सुगतिभागी ॥
दुर्बोधातपकष्ट, व्यपगमलब्धैकविमलकीर्तिभरः।
टीकामिमामकार्षीत् मलयगिरिः पेशलवचोभिः ॥
व्यवहारस्य भगवतो यथास्थितार्थप्रदर्शनदक्षं।
विवरणमिदं समाप्तं श्रमणगणानाममृतभूतम् ॥
जीयाद्वै सुगुरुः सदा मुनिवरो बोधिप्रदो मोहनो,
हर्षोमे व्रतदायकः सुचरणः पन्यासभूषावृतः;
माणिक्येन सुबोधशांतमनसा संशोधितं तेन यद्,
ध्यातव्यं व्यवहारसूत्रमिदमानंदप्रदं मुक्तये ॥

उद्देशकः-१० समाप्तः

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता व्यवहार सूत्रस्य
(भद्रबाहु स्वामि रचिता निर्युक्ति-युक्तं) संघदासगणि विरचितं भाष्यं
एवं मलयगिरि आचार्य विरचिता टीका परिसमाप्ता।

३६	तृतीयंछेदसूत्रं "व्यवहारं" समाप्तम्

भागः-२१
पीठिका एवं उद्देशकाः १, २, ३

भागः-२२
उद्देशकाः ४-५-६-७-८-९-१०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ભાવભરી વંદના

જેમના દ્વારા સૂત્રમાં ગુંથાયેલ જિનવાણીનો ભવ્ય વારસો
વર્તમાનકાલીન ''આગમસાહિત્ય''માં પ્રાપ્ત થયો
એ સર્વે સૂરિવર આદિ આર્ષ પૂજ્યશ્રીઓને-

પંચમ ગણધર શ્રી સુધર્મા સ્વામી		ચૌદ પૂર્વધર શ્રી ભદ્રબાહુ સ્વામી	
દશ પૂર્વધર શ્રી શય્યંભવસૂરિ		(અનામી) સર્વે શ્રુત સ્થવીર મહર્ષિઓ	
દેવવાચક ગણિ		શ્રી શ્યામાચાર્ય	
દેવર્દ્ધિગણિ ક્ષમાશ્રમણ		જિનભદ્ર ગણિ ક્ષમાશ્રમણ	
સંઘદાસગણિ		સિદ્ધસેન ગણિ	
જિનદાસ ગણિ મહત્તર		અગત્સ્યસિંહ સૂરિ	
શીલાંકાચાર્ય		અભયદેવસૂરિ	
મલયગિરિસૂરિ		ક્ષેમકીર્તિસૂરિ	
હરિભદ્રસૂરિ		આર્યરક્ષિત સૂરિ (?)	
દ્રોણાચાર્ય		ચંદ્ર સૂરિ	
વાદિવેતાલ શાંતિચંદ્ર સૂરિ		મલ્લધારી હેમચંદ્રસૂરિ	
શાંતિચંદ્ર ઉપાધ્યાય		ધર્મસાગર ઉપાધ્યાય	
ગુણરત્નસૂરી		વિજય વિમલગણિ	
વીરભદ્ર	ઋષિપાલ	બ્રહ્મમુનિ	તિલકસૂરિ
સૂત્ર-નિર્યુક્તિ - ભાષ્ય - ચૂર્ણિ - વૃત્તિ - આદિના રચયિતા અન્ય સર્વે પૂજ્યશ્રી			

વર્તમાન કાલિન આગમ સાહિત્ય વારસાને
સંશોધન-સંપાદન-લેખન આદિ દ્વારા મુદ્રીત/અમુદ્રીત સ્વરૂપે રજૂ કર્તા
સર્વે શ્રુતાનુરાગી પૂજ્યપુરુષોને

આનંદ સાગરસૂરિજી	ચંદ્રસાગર સૂરિજી	મુનિ માણેક
જિન વિજયજી	પુન્યવિજયજી	ચતુરવિજયજી
જંબુ વિજયજી	અમરમુનિજી	કનૈયાલાલજી
લાભસાગરસુરિજી	આચાર્ય તુલસી	ચંપક સાગરજી

સ્મરણાંજલિ

બાબુ ધનપતસિંહ	પં૦ બેચરદાસ	પં૦ જીવરાજભાઈ
પં૦ ભગવાનદાસ	પં૦ રૂપેન્દ્રકુમાર	પં૦ હીરાલાલ
શ્રુત પ્રકાશક સર્વે સંસ્થાઓ		

Jain Education International For Private & Personal Use Only www.jainelibrary.org

૪૫ આગમ મૂળ તથા વિવરણનું શ્લોક પ્રમાણદર્શક કોષ્ટક

क्रम	आगमसूत्रनाम	मूल श्लोक प्रमाण	वृत्ति-कर्ता	वृत्ति श्लोकप्रमाण
१.	आचार	२५५४	शीलाङ्काचार्य	१२०००
२.	सूत्रकृत	२१००	शीलाङ्काचार्य	१२८५०
३.	स्थान	३७००	अभदेवसूरि	१४२५०
४.	समवाय	१६६७	अभयदेवसूरि	३५७५
५.	भगवती	१५७५१	अभयदेवसूरि	१८६१६
६.	ज्ञाताधर्मकथा	५४५०	अभयदेवसूरि	३८००
७.	उपासकदशा	८१२	अभयदेवसूरि	८००
८.	अन्तकृद्दशा	९००	अभयदेवसूरि	४००
९.	अनुत्तरोपपातिकदशा	१९२	अभयदेवसूरि	१००
१०.	प्रश्नव्याकरण	१३००	अभयदेवसूरि	५६३०
११.	विपाकश्रुत	१२५०	अभयदेवसूरि	९००
१२.	औपपातिक	११६७	अभयदेवसूरि	३१२५
१३.	राजप्रश्निय	२१२०	मलयगिरिसूरि	३७००
१४.	जीवाजीवाभिगम	४७००	मलयगिरिसूरि	१४०००
१५.	प्रज्ञापना	७७८७	मलयगिरिसूरि	१६०००
१६.	सूर्यप्रज्ञप्ति	२२९६	मलयगिरिसूरि	९०००
१७.	चन्द्रप्रज्ञप्ति	२३००	मलयगिरिसूरि	९१००
१८.	जम्बूद्वीपप्रज्ञप्ति	४४५४	शान्तिचन्द्रउपाध्याय	१८०००
१९थी	निरयावलिका	११००	चन्द्रसूरि	६००
२३.	(पञ्च उपाङ्ग)	–	–	–
२४.	चतुःशरण	८०	विजयविमलयगणि	(?) २००
२५.	आतुर प्रत्याख्यान	१००	गुणरत्नसूरि (अवचूरि)	(?) १५०
२६.	महाप्रत्याख्यान	१७६	आनन्दसागरसूरि (संस्कृतछाया)	१७६
२७.	भक्तपरिज्ञा	२१५	आनन्दसागरसूरि (संस्कृतछाया)	२१५
२८.	तन्दुल वैचारिक	५००	विजयविमलगणि	(?) ५००
२९.	संस्तारक	१५५	गुणरत्न सूरि (अवचूरि)	११०
३०.	गच्छाचार★	१७५	विजयविमलगणि	१५६०
३१.	गणिविद्या	१०५	आनन्दसागरसूरि (संस्कृतछाया)	१०५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रम	आगमसूत्रनाम	•मूल श्लोक प्रमाण	वृत्ति-कर्ता	•वृत्ति श्लोकप्रमाण
३२.	देवेन्द्रस्तव	३७५	आनन्दसागरसूरि (संस्कृत छाया)	३७५
३३.	मरणसमाधि ★	८३७	आनन्दसागरसूरि (संस्कृत छाया)	८३७
३४.	निशीथ	८२१	जिनदासगणि (चूर्णि)	२८०००
			सङ्घदासगणि (भाष्य)	७५००
३५.	बृहत्कल्प	४७३	मलयगिरि+क्षेमकीर्ति	४२६००
			सङ्घदासगणि (भाष्य)	७६००
३६.	व्यवहार	३७३	मलयगिरि	३४०००
			सङ्घदासगणि (भाष्य)	६४००
३७.	दशाश्रुतस्कन्ध	८९६	- ? - (चूर्णि)	२२२५
३८.	जीतकल्प ★	१३०	सिद्धसेनगणि (चूर्णि)	१०००
३९.	महानिशीथ	४५४८	–	–
४०.	आवश्यक	१३०	हरिभद्रसूरि	२२०००
४१.	ओघनिर्युक्ति	नि.१३५५	द्रोणाचार्य	(?)७५००
-	पिण्डनिर्युक्ति ★	नि. ८३५	मलयगिरिसूरि	७०००
४२.	दशवैकालिक	८३५	हरिभद्रसूरि	७०००
४३.	उत्तराध्ययन	२०००	शांतिसूरि	१६०००
४४.	नन्दी	७००	मलयगिरिसूरि	७७३२
४५.	अनुयोगद्वार	२०००	मलधारीहेमचन्द्रसूरि	५९००

નોંધ :-

(૧) ઉક્ત ૪૫ આગમ સૂત્રોમાં વર્તમાન કાળે પહેલાં ૧ થી ૧૧ अंगसूत्रो, ૧૨ થી ૨૩ उपांगसूत्रो, ૨૪થી૩૩ प्रकीर्णकसूत्रो ૩૪થી ૩૯ छेदसूत्रो, ૪૦ થી ૪૩ मूळसूत्रो, ૪૪-૪૫ चूलिकासूत्रो ના નામે હાલ પ્રસિદ્ધ છે.

(૨) ઉક્ત શ્લોક સંખ્યા અમે ઉપલબ્ધ માહિતી અને પૃષ્ઠ સંખ્યા આધારે નોંધેલ છે. જો કે તે સંખ્યા માટે મતાંતર તો જોવા મળે જ છે. જેમકે આચાર સૂત્રમાં ૨૫૦૦, ૨૫૫૪, ૨૫૨૫ એવા ત્રણ શ્લોક પ્રમાણ જાણવા મળેલ છે. આવો મત-ભેદ અન્ય સૂત્રોમાં પણ છે.

(૩) ઉક્ત વૃત્તિ-આદિ જે નોંધ છે તે અમે કરેલ સંપાદન મુજબની છે. તે સિવાયની પણ વૃત્તિ-ચૂર્ણિ આદિ સાહિત્ય મુદ્રિત કે અમુદ્રિત અવસ્થામાં હાલ ઉપલબ્ધ છે જ.

(૪) गच्छाचार અને मरणसमाधि ના વિકલ્પે चंदावेज्झय અને वीरस्तव प्रकीर्णक આવે છે. જે અમે "आगमसुत्ताणि" માં મૂળ રૂપે અને "આગમદીપ"માં અક્ષરશઃ ગુજરાતી અનુવાદ રૂપે આપેલ છે. તેમજ जीतकल्प જેના વિકલ્પ રૂપે છે એ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंचकल्पनुं भाष्य अमे ''आगमसुत्ताणि''मां संपादीत कर्युं छे.

(५) ओघ अने पिण्ड ए बंने निर्युक्ति विकल्पे छे. जे हाल मूळसूत्र रूपे प्रसिध्ध छे. जे बंनेनी वृत्ति अमे आपी छे. तेमज तेमां भाष्यनी गाथाओ पण समाविष्ट थई छे.

(६) चार प्रकीर्णक सूत्रो अने महानिशीथ ए पांच आगमनी कोई वृत्ति आदि उपलब्ध थवानो उल्लेख मळतो नथी. प्रकीर्णक नी संस्कृत छाया उपलब्ध छे तेथी मूकी छे. निशीथ-दशा-जितकल्प ए त्रणेनी चूर्णि आपी छे. जेमां दशा अने जीतकल्प ए बंने उपरवृत्ति मळती होवानो उल्लेख छे, पण अमे ते मेळवी शक्या नथी. ज्यारे निशीथ उपर तो मात्र वीसमा उद्देशकःनी ज वृत्ति नो उल्लेख मळे छे.

➧ वर्तमान काळे ४५ आगममां उपलब्ध निर्युक्तिः ➧

क्रम	निर्युक्ति	श्लोकप्रमाण	क्रम	निर्युक्ति	श्लोकप्रमाण
१.	आचार-निर्युक्ति	४५०	६.	आवश्यक-निर्युक्ति	२५००
२.	सूत्रकृत-निर्युक्ति	२६५	७.	ओघनिर्युक्ति	१३५५
३.	बृहत्कल्प-निर्युक्ति ★	–	८.	पिण्डनिर्युक्ति	८३५
४.	व्यवहार-निर्युक्ति ★	–	९.	दशवैकालिक-निर्युक्ति	५००
५.	दशाश्रुत०-निर्युक्ति	१८०	१०.	उत्तराध्ययन-निर्युक्ति	७००

नोंध :-

(१) अहीं आपेल श्लोक प्रमाण ए गाथा संख्या नथी. ''३२ अक्षरनो एक श्लोक'' ए प्रमाणथी नोंधायेल श्लोक प्रमाण छे.

(२) ★ बृहत्कल्प अने व्यवहार ए बंने सूत्रोनी निर्युक्ति हाल भाष्य मां भळी गई छे. जेनो यथासंभव उल्लेख वृत्तिकार महर्षि ए भाष्य उपरनी वृत्तिमां कर्यो होय तेवुं जोवा मळेल छे.

(३) ओघ अने पिण्डनिर्युक्ति स्वतंत्र मूलआगम स्वरूपे स्थान पामेल छे तेथी तेनुं स्वतंत्र संपादन आगम-४१ रूपे थयेल छे. (तेमज आ संपादनमां पण छे.)

(४) बाकीनी छ निर्युक्तिमांथी दशाश्रुतस्कन्ध निर्युक्ति उपर चूर्णि अने अन्य पांच निर्युक्ति उपरनी वृत्ति अमे अमारा संपादनमां प्रकाशीत करी छे. ज्यां आ छ निर्युक्ति स्पष्ट अलग जोई शकाय छे.

(५) निर्युक्तिकर्ता तरीके भद्रबाहुस्वामी नो उल्लेख ज जोवा मळे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ભાષ્યં

क्रम	भाष्य	श्लोकप्रमाण	क्रम	भाष्य	गाथाप्रमाण
१.	निशीषभाष्य	७५००	६.	आवश्यकभाष्य ★	४८३
२.	बृहत्कल्पभाष्य	७६००	७.	ओघनिर्युक्तिभाष्य ★	३२२
३.	व्यवहारभाष्य	६४००	८.	पिण्डनिर्युक्तिभाष्य ★	४६
४.	पञ्चकल्पभाष्य	३१८५	९.	दशवैकालिकभाष्य ★	६३
५.	जीतकल्पभाष्य	३१२५	१०.	उत्तराध्ययनभाष्य (?)	–

નોંધ :-

(૧) निशीष, बृहत्कल्प અને व्यवहारभाष्य ના કર્તા सङ्घदासगणि હોવાનું જણાય છે. અમારા સંપાદનમાં निशीष भाष्य તેની चूर्णि સાથે અને बृहत्कल्प તથા व्यवहार भाष्य તેની-તેની वृत्ति સાથે સમાવિષ્ટ થયું છે.

(૨) पञ्चकल्पभाष्य અમારા आगमसुत्ताणि भाग-३८ માં પ્રકાશીત થયું.

(૩) आवश्यकभाष्य માં ગાથા પ્રમાણ ૪૮૩ લખ્યું જેમાં ૧૮૩ ગાથા મૂળભાષ્ય રૂપે છે અને ૩૦૦ ગાથા અન્ય એક ભાષ્યની છે. જેનો સમાવેશ आवश्यक सूत्र-सटीकं માં કર્યો છે. [જો કે विशेषावश्यक भाष्य ખૂબજ પ્રસિધ્ધ થયું છે પણ તે સમગ્ર आवश्यकसूत्र- ઉપરનું ભાષ્ય નથી અને अध्ययनो અનુસારની અલગ અલગ वृत्ति આદિ પેટા વિવરણો તો आवश्यक અને जीतकल्प એ બંને ઉપર મળે છે. જેનો અત્રે ઉલ્લેખ અમે કરેલ નથી.]

(૪) ओघनिर्युक्ति, पिण्डनिर्युक्ति, दशवैकालिकभाष्य નો સમાવેશ તેની તેની वृत्ति માં થયો જ છે. પણ તેનો કર્તા વિશેનો ઉલ્લેખ અમોને મળેલ નથી. [ओघनिर्युक्ति ઉપર ૩૦૦૦ શ્લોક પ્રમાણ ભાષ્યનો ઉલ્લેખ પણ જોવા મળેલ છે.]

(૫) उत्तराध्ययनभाष्यની ગાથા निर्युक्तिમાં ભળી ગયાનું સંભળાય છે (?)

(૬) આ રીતે अंग - उपांग - प्रकीर्णक - चूलिका એ ૩૫ आगम सूत्रो ઉપરનો કોઈ ભાષ્યનો ઉલ્લેખ અમારી જાણમાં આવેલ નથી. કોઈક સ્થાને સાક્ષી પાઠ-આદિ સ્વરૂપે भाष्यगाथा જોવા મળે છે.

(૭) भाष्यकर्ता તરીકે મુખ્ય નામ सङ्घदासगणि જોવા મળેલ છે. તેમજ जिनभद्रगणि-क्षमाश्रमण અને सिद्धसेन गणि નો પણ ઉલ્લેખ મળે છે. કેટલાંક ભાષ્યના કર્તા અજ્ઞાત જ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

વર્તમાન કાળે ૪૫ આગમમાં ઉપલબ્ધ ચૂર્ણિ:

क्रम	चूर्णि	श्लोकप्रमाण	क्रम	चूर्णि	श्लोकप्रमाण
१.	आचार-चूर्णि	८३००	९.	दशाश्रुतस्कन्धचूर्णि	२२२५
२.	सूत्रकृत-चूर्णि	९९००	१०.	पञ्चकल्पचूर्णि	३२७५
३.	भगवती-चूर्णि	३११४	११.	जीतकल्पचूर्णि	१०००
४.	जीवाभिगम-चूर्णि	१५००	१२.	आवश्यकचूर्णि	१८५००
५.	जंबूद्वीपप्रज्ञप्ति-चूर्णि	१८७९	१३.	दशवैकालिकचूर्णि	७०००
६.	निशीथचूर्णि	२८०००	१४.	उत्तराध्ययनचूर्णि	५८५०
७.	बृहत्कल्पचूर्णि	१६०००	१५.	नन्दीचूर्णि	१५००
८.	व्यवहारचूर्णि	१२००	१६.	अनुयोगदारचूर्णि	२२६५

નોંધ :-

(૧) ઉક્ત ૧૬ चूर्णिમાંથી निशीथ , दशाश्रुतस्कन्ध, जीतकल्प એ ત્રણ चूर्णि અમારા આ સંપાદનમાં સમાવાઈ ગયેલ છે.

(૨) आचार, सूत्रकृत, आवश्यक, दशवैकालिक, उत्तराध्ययन, नन्दी, अनुयोगद्वार એ સાત चूर्णि પૂજ્યપાદ આગમોદ્ધારક શ્રી એ પ્રકાશીત કરાવી છે.

(૩) दशवैकालिकની બીજી એક चूर्णि જે अगत्स्यसिंहसूरिकृत છે તેનું પ્રકાશન પૂજ્ય શ્રી પુન્યવિજયજીએ કરાવેલ છે.

(૪) जंबूद्वीपप्रज्ञप्तिचूर्णि વિશે હીરાલાલ કાપડીયા પ્રશ્નાર્થચિહ્ન ઉભું કરે છે. भगवती चूर्णि તો મળેજ છે, પણ હજી પ્રકાશીત થઈ નથી. તેમજ बृहत्कल्प , व्यवहार, पञ्चकल्प એ ત્રણ હસ્તપ્રતો અમે જોઈ છે પણ પ્રકાશીત થયાનું જાણમાં નથી.

(૫) चूर्णिकार તરીકે जिनदासगणिमहत्तरનું નામ મુખ્યત્વે સંભળાય છે. કેટલાકના મતે અમુક चूर्णिના કર્તાનો સ્પષ્ટોલ્લેખ મળતો નથી.

“આગમ-પંચાંગી” એક ચિન્ત્ય બાબત”

૧ વર્તમાન કાળે પ્રાપ્ત આગમ સાહિત્યની વિચારણા પછી ખરેખર આગમના પાંચ અંગોમાં કેટલું અને શું ઉપલબ્ધ છે તે જાણ્યા પછી એક પ્રશ્ન થાય કે આગમ પંચાંગી ની વાતો કેટલી ચિન્ત્ય છે. अंग-उपांग-प्रकीर्णक-चूलिका એ ૩૫ આગમો ઉપર भाष्य નથી. એટલે ૩૫ આગમનું એક અંગ તો અપ્રાપ્ય જ બન્યું. સૂત્ર પરત્વે ઉપલબ્ધ निर्युक्ति ફક્ત છ છે. એટલે ૩૯ આગમોનું એક અંગ અપ્રાપ્ય જ બન્યું. આ રીતે ક્યાંક भाष्य, ક્યાંક निर्युक्ति અને ક્યાંક चूर्णिના અભાવે વર્તમાન કાળે સુવ્યવસ્થિત पंचांगी એક માત્ર आवश्यक सूत्रની ગણાય.

૨ नंदीसूत्र માં पंचांगीને બદલે संग्रहणी, प्रतिपत्ति ઓ વગેરેના પણ ઉલ્લેખ છે.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

➡ ૪૫ આગમ અંતર્ગત વર્તમાન કાળે ઉપલબ્ધ વિભાગો ⬅

[સૂચના :- અમે સંપાદીત કરેલ आगमसुत्ताणि-सटीकं માં બેકી નંબરના પૃષ્ઠો ઉપર જમણી બાજુ आगमसूत्र ના નામ પછી અંકો આપેલ છે. જેમકે ૧/૩/૬/૨/૫૪ વગેરે. આ અંકો તે તે આગમના વિભાગીકરણને જણાવે છે. જેમકે आचारમાં પ્રથમ અંક श्रुतस्कन्धनो છે તેના વિભાગ રૂપે બીજો અંક चूला છે તેના પેટા વિભાગ રૂપે ત્રીજો અંક अध्ययन નો છે. તેના પેટા વિભાગ રૂપે ચોથો અંક उद्देशक નો છે. તેના પેટા વિભાગ રૂપે છેલ્લો અંક मूलनो છે. આ मूल ગદ્ય કે પદ્ય હોઈ શકે. જો ગદ્ય હોય તો ત્યાં પેરેગ્રાફ સ્ટાઈલથી કે છુટુ લખાણ છે અને गाथा/પદ્ય ને પદ્યની સ્ટાઈલથી ॥ - ॥ ગોઠવેલ છે.

પ્રત્યેક આગમ માટે આ રીતે જ ઓબ્લિકમાં (/) પછી ના વિભાગને તેના-તેના પેટા-પેટા વિભાગ સમજવા.

જ્યાં જે-તે પેટા વિભાગ ન હોય ત્યાં (/-) ઓબ્લિક પછી ડેસ મુકીને તે વિભાગ ત્યાં નથી તેમ સુચવેલું છે.]

(૧) आचार - श्रुतस्कन्धः/चूला/अध्ययनं/उद्देशकः/मूलं
चूला નામક પેટા વિભાગ બીજા श्रुतस्कन्ध માં જ છે.

(૨) सूत्रकृत - श्रुतस्कन्धः/अध्ययनं/उद्देशकः/मूलं

(૩) स्थान - स्थानं/अध्ययनं/मूलं

(૪) समवाय - समवायः/मूलं

(૫) भगवती - शतकं/वर्ग्गः-अंतरशतकं/उद्देशकः/मूलं
અહીં शतक ના પેટા વિભાગમાં બે નામો છે. (૧) वर्ग्गः (૨) अंतर्शतक કેમકે शतक ૨૧, ૨૨, ૨૩ માં शतक ના પેટા વિભાગનું નામ वर्ग्गः જ જણાવેલ છે. शतक - ૩૩,૩૪,૩૫,૩૬,૪૦ ના પેટા વિભાગને अंतरशतक અથવા शतकशतक નામથી ઓળખાવાય છે.

(૬) ज्ञाताधर्मकथा- श्रुतस्कन्धः/वर्ग्गः/अध्ययनं/मूलं
પહેલા श्रुतस्कन्ध માં अध्ययन જ છે. બીજા श्रुतस्कन्ध નો પેટાવિભાગ वर्ग्ग નામે છે અને તે वर्ग्ग ના પેટા વિભાગમાં अध्ययन છે.

(૭) उपासकदशा- अध्ययनं/मूलं

(૮) अन्तकृद्दशा- वर्ग्गः/अध्ययनं/मूलं

(૯) अनुत्तरोपपातिकदशा- वर्ग्गः/अध्ययनं/मूलं

(૧૦) प्रश्नव्याकरण- द्वारं/अध्ययनं/मूलं
आश्रव અને संवर એવા સ્પષ્ટ બે ભેદ છે જેને आश्रवद्वार અને संवरद्वार કહ્યા છે. (કોઈક द्वार ને બદલે श्रुतस्कन्ध શબ્દ પ્રયોગ પણ કરે છે)

(૧૧) विपाकश्रुत- श्रुतस्कन्धः/अध्ययनं/मूलं

(૧૨) औपपातिक- मूलं

(૧૩) राजप्रश्नीय- मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

(१४) **जीवाजीवाभिगम-** ★प्रतिपत्तिः/★ उद्देशकः/मूलं
આ આગમમાં ઉક્ત ત્રણ વિભાગો કર્યા છે તો પણ સમજણ માટે प्रतिपत्तिः પછી એક પેટાવિભાગ નોંધનીય છે. કેમકે प्रतिपत्ति -३-માં नेरइय, तिरिक्खजोणिय, मनुष्य, देव એવા ચાર પેટાવિભાગો પડે છે. તેથી तिपत्ति/(नेरइयआदि)/उद्देशकः/मूलं એ રીતે સ્પષ્ટ અલગ પાડેલા છે, એજ રીતે દશમી प्रतिपत्ति ના उद्देशकः નવ નથી પણ તે પેટાવિભાગ प्रतिपत्तिः નામે જ છે.

(१५) **प्रज्ञापना-** पदं/उद्देशकः/द्वारं/मूलं
પદના પેટા વિભાગમાં ક્યાંક उद्देशकः છે, ક્યાંક द्वारं છે પણ પદ-૨૮ના પેટા વિભાગમાં उद्देशकः અને તેના પેટા વિભાગમાં द्वारं પણ છે.

(१६) **सूर्यप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं

(१७) **चन्द्रप्रज्ञप्ति-** प्राभृतं/प्राभृतप्राभृतं/मूलं
આગમ ૧૬-૧૭માં प्राभृतप्राभृत ના પણ प्रतिपत्तिः નામક પેટા વિભાગ છે. પણ उद्देशकः આદિ મુજબ તેનો વિશેષ વિસ્તાર થાયેલ નથી.

(१८) **जम्बूदीपप्रज्ञप्ति-** वक्षस्कारः/मूलं

(१९) **निरयावलिका** - अध्ययनं/मूलं

(२०) **कल्पवतंसिका** - अध्ययनं/मूलं

(२१) **पुष्पिता** - अध्ययनं/मूलं

(२२) **पुष्पचूलिका** - अध्ययनं/मूलं

(२३) **वण्हिदशा** - अध्ययनं/मूलं
આગમ ૧૯ થી ૨૩ निरयावलिकादि નામથી સાથે જોવા મળે છે કેમકે તેને ઉપાંગના પાંચ વર્ગ તરીકે સૂત્રકારે ઓળખાવેલા છે. જેમાં વર્ગ-૧, निरयावलिका, વર્ગ-૨ कल्पवतंसिका... વગેરે જાણવા

(२४ थी ३३) **चतुःशरण (आदि दशपयन्ना)** मूलं

(३४) **निशीथ** - उद्देशकः/मूलं

(३५) **बृहत्कल्प** - उद्देशकः/मूलं

(३६) **व्यवहार** - उद्देशकः/मूलं

(३७) **दशाश्रुतस्कन्ध** - दशा/मूलं

(३८) **जीतकल्प** - मूलं

(३९) **महानिशीथ** - अध्ययनं/उद्देशकः/मूलं

(४०) **आवश्यक** - अध्ययनं/मूलं

(४१) **ओघ/पिण्डनिर्युक्ति** - मूलं

(४२) **दशवैकालिक** - अध्ययनं/उद्देशकः/मूलं

(४३) **उत्तराध्ययन** - अध्ययनं//मूलं

(४४- ४५) **नन्दी-अनुयोगद्वार** - मूलं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

અમારા સંપાદીત ૪૫ આગમોમાં આવતા મૂલ નો અંક તથા તેમાં સમાવિષ્ટ ગાથા

क्रम	आगमसूत्र	मूलं	गाथा	क्रम	आगमसूत्र	मूलं	गाथा
१.	आचार	५५२	१४७	२४.	चतुःशरण	६३	६३
२.	सूत्रकृत	८०६	७२३	२५.	आतुरप्रत्याख्यान	७१	७०
३.	स्थान	१०१०	१६९	२६.	महाप्रत्याख्यानं	१४२	१४२
४.	समवाय	३८३	९३	२७.	भक्तपरिज्ञा	१७२	१७२
५.	भगवती	१०८७	११४	२८.	तंदुलवैचारिक	१६१	१३९
६.	ज्ञाताधर्मकथा	२४१	५७	२९.	संस्तारक	१३३	१३३
७.	उपासक दशा	७३	१३	३०.	गच्छाचार	१३७	१३७
८.	अन्तकृद्दशा	६२	१२	३१.	गणिविद्या	८२	८२
९.	अनुत्तरोपपातिक	१३	४	३२.	देवेन्द्रस्तव	३०७	३०७
१०.	प्रश्नव्याकरण	४७	१४	३३.	मरणसमाधि	६६४	६६४
११.	विपाकश्रुत	४७	३	३४.	निशीष	१४२०	–
१२.	औपपातिक	७७	३०	३५.	बृहत्कल्प	२१५	–
१३.	राजप्रश्निय	८५	–	३६.	व्यवहार	२८५	–
१४.	जीवाभिगम	३९८	९३	३७.	दशाश्रुतस्कन्ध	११४	५६
१५.	प्रज्ञापना	६२२	२३१	३८.	जीतकल्प	१०३	१०३
१६.	सूर्यप्रज्ञप्ति	२१४	१०३	३९.	महानिशीथ	१५२८	८
१७.	चन्द्रप्रज्ञप्ति	२१८	१०७	४०.	आवश्यक	९२	२१
१८.	जम्बूदीपप्रज्ञप्ति	३६५	१३१	४१.	ओघनिर्युक्ति	११६५	११६५
१९.	निरयावलिका	२१	–	४१.	पिण्डनिर्युक्ति	७१२	७१२
२०.	कल्पवतंसिका	५	१	४२.	दशवैकालिक	५४०	५१५
२१.	पुष्पिता	११	२	४३.	उत्तराध्ययन	१७३१	१६४०
२२.	पुष्पचूलिका	३	१	४४.	नन्दी	१६८	९३
२३.	वण्हिदशा	५	१	४५.	अनुयोगद्वार	३५०	१४१

નોંધ :- ઉક્ત गाथा સંખ્યાનો સમાવેશ मूलं માં થઈ જ જાય છે. તે मूल સિવાયની અલગ गाथा સમજવી નહીં. मूल શબ્દ એ અમો सूत्र અને गाथा બંને માટે નો આપેલો સંયુક્ત અનુક્રમ છે. गाथा બધાંજ સંપાદનોમાં સામાન્ય અંક ધરાવતી હોવાથી તેનો અલગ અંક આપેલ છે. પણ સૂત્રના વિભાગ દરેક સંપાદકે ભિન્નભિન્ન રીતે કર્યા હોવાથી અમે સૂત્રાંક જુદો પાડતા નથી.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

—: અમારા પ્રકાશનો :—

[१] अभिनव हेम लघुप्रक्रिया - १ - सप्ताङ्ग विवरणम्
[२] अभिनव हेम लघुप्रक्रिया - २ - सप्ताङ्ग विवरणम्
[३] अभिनव हेम लघुप्रक्रिया - ३ - सप्ताङ्ग विवरणम्
[४] अभिनव हेम लघुप्रक्रिया - ४ - सप्ताङ्ग विवरणम्
[५] कृदन्तमाला
[६] चैत्यवन्दन पर्वमाला
[७] चैत्यवन्दन सङ्ग्रह - तीर्थजिनविशेष
[८] चैत्यवन्दन चोविशी
[९] शत्रुञ्जय भक्ति [आवृत्ति-दो]
[१०] अभिनव जैन पञ्चाङ्ग - २०४६
[૧૧] અભિનવ ઉપદેશ પ્રાસાદ - ૧- શ્રાવક કર્તવ્ય - ૧ થી ૧૧
[૧૨] અભિનવ ઉપદેશ પ્રાસાદ - ૨- શ્રાવક કર્તવ્ય - ૧૨ થી ૧૫
[૧૩] અભિનવ ઉપદેશ પ્રાસાદ - ૩- શ્રાવક કર્તવ્ય - ૧૬ થી ૩૬
[૧૪] નવપદ - શ્રીપાલ (શાશ્વતી ઓળીના વ્યાખ્યાન રૂપે)
[૧૫] સમાધિ મરણ [વિધિ - સૂત્ર - પદ્ય - આરાધના-મરણભેદ-સંગ્રહ]
[૧૬] ચૈત્યવંદન માળા [૭૭૯ ચૈત્યવનંદનોનો સંગ્રહ]
[૧૭] તત્વાર્થ સૂત્ર પ્રબોધટીકા [અધ્યાય-૧]
[૧૮] તત્વાર્થ સૂત્રના આગમ આધાર સ્થાનો
[૧૯] સિદ્ધાચલનો સાથી [આવૃત્તિ - બે]
[૨૦] ચૈત્ય પરિપાટી
[૨૧] અમદાવાદ જિનમંદિર ઉપાશ્રય આદિ ડિરેક્ટરી
[૨૨] શત્રુંજય ભક્તિ [આવૃત્તિ - બે]
[૨૩] શ્રી નવકારમંત્ર નવલાખ જાપ નોંધપોથી
[૨૪] શ્રી ચારિત્ર પદ એક કરોડ જાપ નોંધપોથી
[૨૫] શ્રી બારવ્રત પુસ્તિકા તથા અન્ય નિયમો - [આવૃત્તિ - ચાર]
[૨૬] અભિનવ જૈન પંચાંગ - ૨૦૪૨ [સર્વપ્રથમ ૧૩ વિભાગોમાં]
[૨૭] શ્રી જ્ઞાનપદ પૂજા
[૨૮] અંતિમ આરાધના તથા સાધુ સાધ્વી કાળધર્મ વિધિ
[૨૯] શ્રાવક અંતિમ આરાધના [આવૃત્તિ ત્રણ]
[૩૦] વીતરાગ સ્તુતિ સંચય [૧૧૫૧ ભાવવાહી સ્તુતિઓ]
[૩૧] (પૂજ્ય આગમોદ્ધારક શ્રી ના સમુદાયના) કાયમી સંપર્ક સ્થળો
[૩૨] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧
[૩૩] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૨
[૩૪] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૩
[૩૫] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૪

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૩૬] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૫
[૩૭] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૬
[૩૮] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૭
[૩૯] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૮
[૪૦] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૯
[૪૧] તત્વાર્થાધિગમ સૂત્ર અભિનવ ટીકા - અધ્યાય-૧૦

પ્રકાશન ૧ થી ૪૧ અભિનવશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[४२]	आयारो	[आगमसुत्ताणि-१]	पढमं अंगसुत्तं
[४३]	सूयगडो	[आगमसुत्ताणि-२]	बीअं अंगसुत्तं
[४४]	ठाणं	[आगमसुत्ताणि-३]	तइयं अंगसुत्तं
[४५]	समवाओ	[आगमसुत्ताणि-४]	चउत्थं अंगसुत्तं
[४६]	विवाहपन्नत्ति	[आगमसुत्ताणि-५]	पंचमं अंगसुत्तं
[४७]	नायाधम्मकहाओ	[आगमसुत्ताणि-६]	छट्ठं अंगसुत्तं
[४८]	उवासगदसाओ	[आगमसुत्ताणि-७]	सत्तमं अंगसुत्तं
[४९]	अंतगडदसाओ	[आगमसुत्ताणि-८]	अट्ठमं अंगसुत्तं
[५०]	अनुत्तोववाइयदसाओ	[आगमसुत्ताणि-९]	नवमं अंगसुत्तं
[५१]	पण्हावागरणं	[आगमसुत्ताणि-१०]	दसमं अंगसुत्तं
[५२]	विवागसूयं	[आगमसुत्ताणि-११]	एक्कारसमं अंगसुत्तं
[५३]	उववाइयं	[आगमसुत्ताणि-१२]	पढमं उवंगसुत्तं
[५४]	रायप्पसेणियं	[आगमसुत्ताणि-१३]	बीअं उवंगसुत्तं
[५५]	जीवाजीवाभिगमं	[आगमसुत्ताणि-१४]	तइयं उवंगसुत्तं
[५६]	पन्नवणासुत्तं	[आगमसुत्ताणि-१५]	चउत्थं उवंगसुत्तं
[५७]	सूरपन्नतिः	[आगमसुत्ताणि-१६]	पंचमं उवंगसुत्तं
[५८]	चंदपन्नत्तिः	[आगमसुत्ताणि-१७]	छट्ठं उवंगसुत्तं
[५९]	जंबूद्दीवपन्नति	[आगमसुत्ताणि-१८]	सत्तमं उवंगसुत्तं
[६०]	निरयावलियाणं	[आगमसुत्ताणि-१९]	अट्ठमं उवंगसुत्तं
[६१]	कप्पवडिंसियाणं	[आगमसुत्ताणि-२०]	नवमं उवंगसुत्तं
[६२]	पुप्फियाणं	[आगमसुत्ताणि-२१]	दसमं उवंगसुत्तं
[६३]	पुप्फचूलियाणं	[आगमसुत्ताणि-२२]	एक्कारसमं उवंगसुत्तं
[६४]	वण्हिदसाणं	[आगमसुत्ताणि-२३]	बारसमं उवंगसुत्तं
[६५]	चउसरणं	[आगमसुत्ताणि-२४]	पढमं पईण्णगं
[६६]	आउरपच्चक्खाणं	[आगमसुत्ताणि-२५]	बीअं पईण्णगं
[६७]	महापच्चक्खाणं	[आगमसुत्ताणि-२६]	तीइयं पईण्णगं
[६८]	भत्तपरिण्णा	[आगमसुत्ताणि-२७]	चउत्थं पईण्णगं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[६९]	तंदुलवेयालियं	[आगमसुत्ताणि-२८]	पंचमं पईण्णगं
[७०]	संथारगं	[आगमसुत्ताणि-२९]	छट्ठं पईण्णगं
[७१]	गच्छायार	[आगमसुत्ताणि-३०/१]	सत्तमं पईण्णगं-१
[७२]	चंदावेज्झयं	[आगमसुत्ताणि-३०/२]	सत्तमं पईण्णगं-२
[७३]	गणिविज्जा	[आगमसुत्ताणि-३१]	अट्ठमं पईण्णगं
[७४]	देविंदत्थओ	[आगमसुत्ताणि-३२]	नवमं पईण्णगं
[७५]	मरणसमाहि	[आगमसुत्ताणि-३३/१]	दसमं पईण्णगं-१
[७६]	वीरत्थव	[आगमसुत्ताणि-३३/२]	दसमं पईण्णगं-२
[७७]	निसीह	[आगमसुत्ताणि-३४]	पढमं छेयसुत्तं
[७८]	बुहत्कप्पो	[आगमसुत्ताणि-३५]	बीअं छेयसुत्तं
[७९]	ववहार	[आगमसुत्ताणि-३६]	तइयं छेयसुत्तं
[८०]	दसासुयक्खंधं	[आगमसुत्ताणि-३७]	चउत्थं छेयसुत्तं
[८१]	जीयकप्पो	[आगमसुत्ताणि-३८/१]	पंचमं छेयसुत्तं-१
[८२]	पंचकप्पभास	[आगमसुत्ताणि-३८/२]	पंचमं छेयसुत्तं-२
[८३]	महानिसीहं	[आगमसुत्ताणि-३९]	छट्ठं छेयसुत्तं
[८४]	आवसस्सयं	[आगमसुत्ताणि-४०]	पढमं मूलसुत्तं
[८५]	ओहनिज्जुत्ति	[आगमसुत्ताणि-४१/१]	बीअं मूलसुत्तं-१
[८६]	पिंडनिज्जुत्ति	[आगमसुत्ताणि-४१/२]	बीअं मूलसुत्तं-२
[८७]	दसवेयालियं	[आगमसुत्ताणि-४२]	तइयं मुलसुत्तं
[८८]	उतरज्झयणं	[आगमसुत्ताणि-४३]	चउत्थं मूलसुत्तं
[८९]	नंदीसूयं	[आगमसुत्ताणि-४४]	पढमा चूलिया
[९०]	अनुओगदारं	[आगमसुत्ताणि-४५]	बितिया चूलिया

પ્રકાશન ૪૨ થી ૯૦ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

[૯૧]	આયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	પહેલું અંગસૂત્ર
[૯૨]	સૂયગડ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	બીજું અંગસૂત્ર
[૯૩]	ઠાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ત્રીજું અંગસૂત્ર
[૯૪]	સમવાય -	ગુજરાતી અનુવાદ	[આગમદીપ-૧]	ચોથું અંગસૂત્ર
[૯૫]	વિવાહપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૨]	પાંચમું અંગસૂત્ર
[૯૬]	નાયાધમ્મકહા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	છઠ્ઠું અંગસૂત્ર
[૯૭]	ઉવાસગદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	સાતમું અંગસૂત્ર
[૯૮]	અંતગડદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	આઠમું અંગસૂત્ર
[૯૯]	અનુત્તરોપપાતિકદસા-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	નવમું અંગસૂત્ર
[૧૦૦]	પણ્હાવાગરણ-	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	દશમું અંગસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૦૧]	વિવાગસૂય -	ગુજરાતી અનુવાદ	[આગમદીપ-૩]	અગિયારમું અંગસૂત્ર
[૧૦૨]	ઉવવાઇય	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	પહેલું ઉપાંગસૂત્ર
[૧૦૩]	રાયપ્પસેણિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	બીજું ઉપાંગસૂત્ર
[૧૦૪]	જીવાજીવાભિગમ -	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ત્રીજું ઉપાંગસૂત્ર
[૧૦૫]	પન્નવણાસુત્ત	ગુજરાતી અનુવાદ	[આગમદીપ-૪]	ચોથું ઉપાંગસૂત્ર
[૧૦૬]	સૂરપન્નત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	પાચમું ઉપાંગસૂત્ર
[૧૦૭]	ચંદપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	છઠ્ઠું ઉપાંગસૂત્ર
[૧૦૮]	જંબુદ્દીવપન્નતિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	સાતમું ઉપાંગસૂત્ર
[૧૦૯]	નિરયાવલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	આઠમું ઉપાંગસૂત્ર
[૧૧૦]	કપ્પવડિંસિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	નવમું ઉપાંગસૂત્ર
[૧૧૧]	પુપ્ફિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	દશમું ઉપાંગસૂત્ર
[૧૧૨]	પુપ્ફચૂલિયા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	અગિયારમું ઉપાંગસૂત્ર
[૧૧૩]	વણ્હિદસા -	ગુજરાતી અનુવાદ	[આગમદીપ-૫]	બારમું ઉપાંગસૂત્ર
[૧૧૪]	ચઉસરણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલો પયન્નો
[૧૧૫]	આઉરપ્પચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજો પયન્નો
[૧૧૬]	મહાપચ્ચક્ખાણ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજો પયન્નો
[૧૧૭]	ભત્તપરિણ્ણા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથો પયન્નો
[૧૧૮]	તંદુલવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમો પયન્નો
[૧૧૯]	સંથારગ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠો પયન્નો
[૧૨૦]	ગચ્છાયાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૧
[૧૨૧]	ચંદાવેજ્ઝય -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	સાતમો પયન્નો-૨
[૧૨૨]	ગણિવિજ્જા -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	આઠમો પયન્નો
[૧૨૩]	દેવિંદત્થઓ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	નવમો પયન્નો
[૧૨૪]	વીરત્થવ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	દશમો પયન્નો
[૧૨૫]	નિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પહેલું છેદસૂત્ર
[૧૨૬]	બુહતકપ્પ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	બીજું છેદસૂત્ર
[૧૨૭]	વવહાર -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ત્રીજું છેદસૂત્ર
[૧૨૮]	દસાસુયક્ખંધ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	ચોથું છેદસૂત્ર
[૧૨૯]	જીયકપ્પો -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	પાંચમું છેદસૂત્ર
[૧૩૦]	મહાનિસીહ -	ગુજરાતી અનુવાદ	[આગમદીપ-૬]	છઠ્ઠું છેદસૂત્ર
[૧૩૧]	આવસ્સય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	પહેલું મૂલસુત્ર
[૧૩૨]	ઓહનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૧
[૧૩૩]	પિંડનિજ્જુત્તિ -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	બીજું મૂલસુત્ર-૨
[૧૩૪]	દસવેયાલિય -	ગુજરાતી અનુવાદ	[આગમદીપ-૭]	ત્રીજું મુલસૂત્ર

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[૧૩૫] ઉત્તરજ્ઝયણ - ગુજરાતી અનુવાદ [આગમદીપ-૭] ચોથું મૂલસુત્ર
[૧૩૬] નંદીસુત્તં - ગુજરાતી અનુવાદ [આગમદીપ-૭] પહેલી ચૂલિકા
[૧૩૭] અનુયોગદ્વાર - ગુજરાતી અનુવાદ [આગમદીપ-૭] બીજી ચૂલિકા

પ્રકાશન ૯૧ થી ૧૩૭ આગમદીપ પ્રકાશને પ્રગટ કરેલ છે.

[૧૩૮] દીક્ષા યોગાદિ વિધિ
[૧૩૯] ૪૫ આગમ મહાપૂજન વિધિ
[१४०] आचाराङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१
[१४१] सूत्रकृताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-२
[१४२] स्थानाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-३
[१४३] समवायाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-४
[१४४] भगवतीअङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-५/६
[१४५] ज्ञाताधर्मकथाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४६] उपासकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४७] अन्तकृद्दशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४८] अनुत्तरोपपातिकदशाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१४९] प्रश्नव्याकरणाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-७
[१५०] विपाकश्रुताङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५१] औपपातिकउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५२] राजप्रश्नियउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-८
[१५३] जीवाजीवाभिगमउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-९
[१५४] प्रज्ञापनाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१०/११
[१५५] सूर्यप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५६] चन्द्रप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१२
[१५७] जम्बूद्वीवप्रज्ञप्तिउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१३
[१५८] निरयावलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१५९] कल्पवतंसिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६०] पुष्पिताउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६१] पुष्पचूलिकाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६२] वण्हिदसाउपाङ्गसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६३] चतुःशरणप्रकीर्णकसूत्र सटीकं आगमसुत्ताणि सटीकं-१४
[१६४] आतुरप्रत्याव्यानप्रकीर्णकसूत्रं सटीकं आगमसुत्ताणि सटीकं-१४
[१६५] महाप्रत्याख्यानप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४
[१६६] भक्तपरिज्ञाप्रकीर्णकसूत्रं सच्छायं आगमसुत्ताणि सटीकं-१४

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१६७]	तंदुलवैचारिकप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१६८]	संस्तारकप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१६९]	गच्छाचारप्रकीर्णकसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१४
[१७०]	गणिविद्याप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७१]	देवेन्द्रस्तवप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७२]	मरणसमाधिप्रकीर्णकसूत्रं सच्छायं	आगमसुत्ताणि सटीकं-१४
[१७३]	निशीथछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१५-१६-१७
[१७४]	बृहत्कल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-१८-१९-२०
[१७५]	व्यवहारछेदसूत्रं सटीकं	आगगम सुत्ताणि सटीकं-२१-२२
[१७६]	दशाश्रुतस्कन्धछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७७]	जीतकल्पछेदसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२३
[१७८]	महानिशीथसूत्रं (मूलं)	आगमसुत्ताणि सटीकं-२३
[१७९]	आवश्यकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२४-२५
[१८०]	ओघनिर्युक्तिमूलसूत्रं सटीकं	आगम सुत्तामि सटीकं-२६
[१८१]	पिण्डनिर्युक्तिमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२६
[१८२]	दशवैकालिकमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२७
[१८३]	उत्तराध्ययनमूलसूत्रं सटीकं	आगमसुत्ताणि सटीकं-२८-२९
[१८४]	नन्दी-चूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०
[१८५]	अनुयोगद्वारचूलिकासूत्रं सटीकं	आगमसुत्ताणि सटीकं-३०

પ્રકાશન ૧૩૯ થી ૧૮૫ આગમશ્રુત પ્રકાશને પ્રગટ કરેલ છે.

—: સંપર્ક સ્થળ :—

'આગમ આરાધના કેન્દ્ર'

શીતલનાથ સોસાયટી-વિભાગ-૧, ફ્લેટ નં-૧૩, ૪થે માળે

શ્રી નમિનાથ જૈન દેરાસરજી પાછળ, બ્હાઈ સેન્ટર, ખાનપુર

અમદાવાદ-૧

Jain Education International For Private & Personal Use Only www.jainelibrary.org

"आगमसुत्ताणि-सटीकं" ભાગ ૧ થી ૩૦ નું વિવરણ

आगमसुत्ताणि	समाविष्टाआगमाः
भाग-१	आयार
भाग-२	सूत्रकृत
भाग-३	स्थान
भाग-४	समवाय
भाग-५-६	भगवती (अपरनाम व्याख्याप्रज्ञप्ति)
भाग-७	ज्ञाताधर्मकथा, उपासकदशा, अन्तकृद्दशा, अनुत्तरोपपातिकदशा, प्रश्नव्याकरण
भाग-८	विपाकश्रुत, औपपातिक, राजप्रश्निय
भाग-९	जीवाजीवाभिगम
भाग-१०-११	प्रज्ञापना
भाग-१२	सूर्यप्रज्ञप्ति, चन्द्रप्रज्ञप्ति
भाग-१३	जम्बूद्वीपप्रज्ञप्ति
भाग-१४	निरयावलिका, कल्पवतंसिका, पुष्पिका, पुष्पचूलिका वण्हिदशा, चतुःशरण, आतुरप्रत्याख्यान, महाप्रत्याख्यान, भक्तपरिज्ञा, तन्दुलवैचारिक, संस्तारक, गच्छाचार, गणिविद्या, देवेन्द्रस्तव, मरणसमाधि
भाग-१५-१६-१७	नीशीथ
भाग-१८-१९-२०	बृहत्कल्प
भाग-२१-२२	व्यवहार
भाग-२३	दशाश्रुतस्कन्ध, जीतकल्प, महनिशीथ
भाग-२४-२५	आवश्यक
भाग-२६	ओघनिर्युक्ति, पिण्डनिर्युक्ति
भाग-२७	दशवैकालिक
भाग-२८-२९	उत्तराध्ययन
भाग-३०	नन्दी, अनुयोगद्वार

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org